चौखम्बा

संस्कृत की सभी प्रतियोगी परीक्षा के लिए उपयोगी

संस्कृत शास्त्र-मञ्जूषा

लेखक-डॉ. उदयशंकर झा

यू.जी.सी. नेट (संस्कृत कोड-25 एवं 73) द्वितीय एवं तृतीय प्रश्नपत्र परीक्षा एवं विभिन्न राज्यस्तरीय यू.जी.सी. नेट समकक्ष परीक्षा ।

विभिन्न संस्कृत विश्वविद्यालय द्वारा आयोजित शिक्षाशास्त्री (बी.एड.) प्रवेश परीक्षा ।

राज्यस्तरीय प्राध्यापक पात्रता (संस्कृत) परीक्षा एवं अध्यापक चयन परीक्षा ।

आई.ए.एस, पी.सी.एस तथा अन्य प्रशासनिक प्रतियोगी (संस्कृत) परीक्षा ।

संस्कृत विषयक शास्त्री, आचार्य, बी.ए, एम.ए, एम.फिल, पी.एचडी प्रवेश परीक्षा ।

धर्मशिक्षक भर्ती परीक्षा एवं अन्य प्रतियोगिता (संस्कृत) परीक्षा ।

संस्कृतविषयस्य सर्वासां परीक्षाणां कृते

संस्कृत शास्त्र-मञ्जूषा

"संस्कृतविषयस्य सर्वासां परीक्षाणां कृते"

।। श्रीः ।।
चौखम्बा सुरभारती ग्रन्थमाला
536

संस्कृत शास्त्र-मञ्जूषा

''संस्कृतविषयस्य सर्वासां परीक्षाणां कृते''

यू.जी.सी. नेट (संस्कृत कोड-25 एवं 73) द्वितीय प्रश्नपत्र परीक्षा एवं विभिन्न राज्यस्तरीय यू.जी.सी. नेट समकक्ष परीक्षा, विभिन्न संस्कृत विश्वविद्यालय द्वारा आयोजित शिक्षाशास्त्री (बी.एड.) प्रवेश परीक्षा, राज्यस्तरीय प्राध्यापक पात्रता (संस्कृत) परीक्षा एवं अध्यापक चयन परीक्षा, आई.ए.एस, पी.सी.एस तथा अन्य प्रशासनिक प्रतियोगी (संस्कृत) परीक्षा संस्कृत विषयक शास्त्री, आचार्य, बी.ए, एम.ए, एम.फिल, पी.एचडी प्रवेश परीक्षा, धर्मशिक्षक भर्ती परीक्षा एवं अन्य प्रतियोगिता (संस्कृत) परीक्षा ।

लेखक
डॉ. उदयशंकर झा

चौखम्बा सुरभारती प्रकाशन
वाराणसी

© **सर्वाधिकार सुरक्षित** । इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण या किसी भी विधि (जैसे-इलेक्ट्रोनिक, यांत्रिक, फोटो-प्रतिलिपि, रिकॉडिग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, प्रकाशक की पूर्वलिखित अनुमति के बिना नही किया जा सकता है।

प्रकाशक :

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के 37/117 गोपाल मंदिर लेन, पोस्ट बॉक्स न. 1129
वाराणसी-221001
दूरभाष : (0542) 2335263

© **सर्वाधिकार प्रकाशकाधीन**

प्रथम संस्करण : 2012
मूल्य : 300.00

अन्य प्राप्तिस्थान :

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली न. 21-ए, अंसारी रोड़, दरियागंज
नई दिल्ली-110002
दूरभाषः (011) 32996391, टेलीफैक्सः (011) 23286537

*

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड़, जवाहर नगर,
पोस्ट बॉक्स न. 2113, दिल्ली-10007

*

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पोस्ट बॉक्स न. 1069, वाराणसी-221001

मुद्रक
डीलक्स ऑफसेट प्रिंटर्स, दिल्ली

डॉ० भगीरथ मिश्र
प्राचार्य/संकायाध्यक्ष
स्नातकोत्तर दर्शनविभाग
कामेश्वर सिंह दरभंगा संस्कृत विश्व-
विद्यालय, कामेश्वरनगर, दरभंगा-846008
(बिहार)

प्रशस्तिवाक्

आयुष्मता डॉ० उदय शंकर झा शर्मणा शिक्षाशास्त्रविभागीय वरिष्ठप्राध्यापकेन निर्मितं विभिन्न-प्रतियोगितार्णवसन्तरणनौकायित 'संस्कृतशास्त्रमञ्जूषा' नामकं ग्रन्थरत्नमशेष-प्रतिभागिच्छात्राणां कृते महदुपकाराय भवितेति दृढो मे विश्वासः। ग्रन्थेऽस्मिन् वेदवेदाङ्गदर्शनभाषाविज्ञानविषयकानेक वस्तुनिष्ठप्रश्नोत्तराणां सन्निवेशः ग्रन्थनिर्मात्रा विहितोऽस्ति।

अतो जगज्जननीं जानकीं जानकीजानिञ्चाभ्यर्थये यद् ग्रन्थलेखकोऽयंदीर्घायुर्भूयादिति।

भगीरथ मिश्रः

दीपावली
26.10.2011

(डॉ० भगीरथ मिश्र)

डॉ० रामचन्द्र झा
प्राचार्य एवं पूर्व अध्यक्ष/संकायाध्यक्ष
स्नातकोत्तर ज्योतिष विभाग
कामेश्वर सिंह दरभंगा संस्कृत विश्व-
विद्यालय, कामेश्वरनगर, दरभंगा-846008
(बिहार)

शुभाशंसनम्

व्याकरणभाषाविज्ञानसाहित्यशास्त्रस्य पण्डितेन श्रीमदुदयशंकरशर्मणा प्रणीतः 'संस्कृतशास्त्रमञ्जूषा' ग्रन्थो मया सम्यगवलोकितः।

ग्रन्थेऽस्मिन् लेखकेन वर्तमानपरीक्षाप्रणालीं मनसि निधाय वस्तुनिष्ठप्रश्नानां मार्गदर्शनं कारितम्।

अयं ग्रन्थः विभिन्नासु प्रतियोगिपरीक्षासु नूनमेव लाभकरः स्यादिति लेखकः धन्यवादार्हः इति शम्।

रामचन्द्र झा

दीपावली
26.10.2011

(डॉ० पं० श्रीरामचन्द्र झा)

प्रो० विद्येश्वर झा
प्राचार्य/संकायाध्यक्ष/विभागाध्यक्षश्च
स्नातकोत्तर वेद विभाग
कामेश्वर सिंह दरभंगा संस्कृत विश्व-
विद्यालय, कामेश्वरनगर, दरभंगा-846008
(बिहार)

शुभाशंसनम्

ॐ सहनाववतु सहनौ भुनक्तु सहवीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै।।

सुविदितिमेव सर्वेषां शिक्षातल्लजानां यद् शिक्षयैव राष्ट्रस्य सर्वविधविकाशः सेत्स्यति, तत्रापि यदि शिक्षका शिक्षणदक्षा भवेयुस्तदैवच्छात्राः सम्यक्शिक्षां ग्रहीष्यन्ति। मन्ये शिक्षकाणां कोटयः पञ्चधा भवन्ति-1. वञ्चकाः, 2. रञ्जकाः, 3. ग्रन्थपाठकाः, 4. प्रत्येकं-विश्लेषकाः, 5. समूहालम्बकाश्च। तेषु वञ्चकाः शिक्षकाः छात्राणां पुरस्तात् विषयं परित्यजन्तो विषयान्तरं कृत्वा समयाकुर्वन्ति। रञ्चकाः शिक्षकाः छात्राणं पुरस्तात् पाठ्यांशं परित्यजन्तः सरसवाक्यैः छात्रान् रञ्जयन्तो घण्टिकां यापयन्ति। ग्रन्थपाठकाः समयानुसारं यथाग्रन्थं छात्रान् बोधयन्ति। प्रत्येकविश्लेषकाः शिक्षकाः पाठ्यांशमादाय छात्रान् सम्यग्बोधयन्ति। समूहालम्बकाः शिक्षकाः ये पाठ्यग्रन्था भवन्ति तेषु ये ये विषयाः प्रतिपादिताः सन्ति तान् सर्वान् मनसि कृत्वा छात्रैः सह तादात्म्यभावेन प्राञ्जलया भाषया सम्यग्रूपेण जिज्ञासून् बोधयन्ति, तादृशाः शिक्षका वस्तुतः शिक्षका भवन्ति। तदर्थमेव कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालयस्य शिक्षाशास्त्रविभागीयः सहायक प्रोफेसर डॉ० उदय शंकर झाः शिक्षणपद्धतौ व्याकरण-साहित्य-दर्शनादि विषयेषु भूरिशः परिश्रम्य विविध-परीक्षाषु प्रतियोगिताषु छात्रेषु पाटवातिशयाधानाय प्रस्तुतं 'संस्कृतशास्त्रमञ्जूषा' नामकं पुस्तकं लिलेख। प्रर्थयेऽहं वाग्देवीं यदयं लेखकः चिराय जीवतात् छात्राणां हिताय विविध लिख्याच्च।

विद्येश्वर झा

दीपावली
26.10.2011

(डॉ० विद्येश्वर झा)
अध्यक्षः
वेदविभाग
कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय
दरभंगा

डॉ० बौआनन्द झा
अध्यक्ष
स्नातकोत्तर दर्शन विभाग
कामेश्वर सिंह दरभंगा संस्कृत विश्व-
विद्यालय, कामेश्वरनगर, दरभंगा-846008
(बिहार)

आवास:
प्रोफेसर कॉलोनी, दिग्घी पश्चिम
दरभंगा-846004

शुभाशंसनम्

वैयाकरणप्रवरेण शिक्षाशास्त्रविभागीयप्राध्यापकेन डॉ० उदय शंकर झा शर्मणा विनिर्मिता 'संस्कृतशास्त्रमञ्जूषा' अन्वर्थनामधेया वेद-वेदाङ्ग-दर्शन-भाषाविज्ञान विषयक वस्तुनिष्ठात्मक प्रश्नोत्तराणामतिविस्तृतविवेचनपरा दृष्टिपथमायाता। 'नेट' 'वेट' प्रभृतिविभिन्नप्रतियोगितासु प्रतिभागिनां संस्कृतच्छात्राणां वस्तुनिष्ठात्मकप्रश्नोत्तरविधाने सम्भावितं काठिन्यमाकलय्य विद्वद्वरेण डॉ झा महोदयेन तेषां समेषां प्रश्नोत्तरविधाने सौकर्याधानाय 'संस्कृतशास्त्रमञ्जूषा' नाम्नी नितान्तमभिनवा कृतिर्विदुषां समक्षमुपस्थापिता।

आशासे चेयमभिनवा कृतिश्छात्राणां विदुषाञ्च कृते महदुपकरिष्यतीति भूतभावनं श्रीबैद्यनाथमभ्यर्थये यदयं विद्वाँल्लेखको झा महोदयः शुभंयुः शतायुर्भूयादिति।

दीपावली
26.10.2011

(डॉ० बौआनन्द झा)

प्राक्कथनम्

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चर्तुदश।।

भारतवर्षवाटिकायां संस्कृतशास्त्रवृक्षः प्राचीनकालादेव बहुभि र्विचक्षणैःग्रन्थकृन्मालाकारैः स्वज्ञानजलेन संसिक्तः सन् पुष्पितः फलितश्च। अस्य संस्कृतशास्त्रवृक्षस्य प्रधानमूलं ऋग्यजुस्सामाथर्वाणः इति चत्वारो वेदाः, उपमूलानि वेदाङ्गानि-शिक्षा, व्याकरणं, निरूक्तं, ज्योतिषं, छन्दः, कल्पश्चेति षडङ्गानि सन्ति। अस्य संस्कृतशास्त्रवृक्षस्य शाखाः भाषाविज्ञानं, नव-दर्शनानि, पुराणेतिहासौ, धर्मशास्त्रंकर्मकाण्डञ्च सन्ति। अस्य पत्राणि कोशाः टीकाग्रन्थाश्च। अस्य फलम् अभ्युदयो निःश्रेयसश्च। इत्थं धर्मार्थकाममोक्षाणां पुरूषार्थं चतुष्टयानां संसाधकं साहित्यं संस्कृतशास्त्रमेवास्ति।

सम्प्रतिके परीक्षाप्रधानयुगे एतादृशस्य कस्यचन पुस्तकस्य समुपलब्धिः यू.जी.सी नेट/जे. आर. एफ. संस्कृतवाङ्मयस्य विभिन्नप्रतियोगिपरीक्षासु प्रविविक्षूणां कृतेऽपि महत्त्वमादधाति। अस्मिन् ग्रन्थे ग्रन्थानां ग्रन्थकाराणां तेषां विशिष्टसिद्धान्तानां च परिचयात्मकं विशिष्टविवरणात्मकं तथ्यं स्थाने-स्थाने प्रदत्तमस्ति। इयं खलु 'संस्कृतशास्त्रमञ्जूषा' संस्कृत विश्वविद्यालयीय संस्कृतच्छात्राणाम् एवं च सामान्य विश्वविद्यालयीय संस्कृतच्छात्राणां कृतेऽपि लाभकरी एव। किम्बहुना परीक्षायाम् उत्तरलेखने छात्राः यथा सौविध्यम् अनुभवेयुः तदर्थं सर्व चेष्टितमस्ति।

इयं 'संस्कृतशास्त्रमञ्जूषा' द्वादशाध्यात्मिका। तत्र (1) प्रथमाध्याये-वैदिकसाहित्यस्य निरुपणम्, (2) द्वितीयाध्याये-व्याकरणशास्त्रस्य विवेचनम्, (3) तृतीयाध्याये-साहित्यशास्त्रस्य विवेचनम्, (4) चतुर्थाध्याये-ज्योतिषशास्त्रं निरूपितम्, (5) पञ्चमाध्याये-शिक्षाशास्त्रं विवेचितम्, (6) षष्ठाध्याये-निरुक्तस्य प्रतिपादनम्, (7) सप्तमाध्याये-भाषाविज्ञानं प्रतिपादितम्, (8) अष्टमाध्याये-कल्पशास्त्रं विवेचितम्, (9) नवमाध्याये-दर्शनशास्त्रस्य निरूपणम्, (10) दशमाध्याये-पुराणेतिहासौ प्रतिपादितौ, (11) एकादशाध्याये-धर्मशास्त्रकर्मकाण्डे च निरूपिते, (12) द्वादशाध्याये च-सामान्यज्ञानस्य विवेचनानि सन्ति। यदि एतेन ग्रन्थेन छात्राणां मनागपि हितं भविष्यति चेत् तदा मदीयः परिश्रमः सफलो भविष्यति।

कृतज्ञताज्ञापनम्–ग्रन्थस्यास्य सफलतायां येषां विद्वद् वर्याणां साहाय्यं मया लब्धन्तेषु कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालयस्य स्नातकोत्तर विभागीया ममाग्रजाः पूज्यचरणा दर्शन

संकायाध्यक्षः डॉ० भगीरथ मिश्रः महानुभावाः, ज्योतिष संकायाध्यक्षः डॉ० रामचन्द्र झा महानुभावाः, वेद-संकायाध्यक्षः डॉ० विद्येश्वर झा महोदयाः, दर्शनविभागाध्यक्षः डॉ० बौआनन्द झा महोदयाः प्रामुख्येन स्मर्यन्ते। यतस्तेषामाशीर्वचोभिः ग्रन्थस्यास्य समाप्तिरगात्।

तथा चास्य ग्रन्थस्य निर्माणक्रमे येषामन्येषां धीमतां सुहृदवर्गाणां साहाय्यमवाप्य विषयाणां परिवर्तनं परिवर्द्धनञ्च मया विहितं, तेषु वैदिकप्रवराः डॉ० विनय कुमार मिश्रः, साहित्याशिरोमणयो डॉ० विश्राम तिवारी महोदयाः, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालयस्य शिक्षाशास्त्र-निदेशकाः डॉ नागेन्द्र कुमार सिंह महोदयाः, शिक्षाशास्त्रप्राध्यापकाः डॉ० घनश्याम मिश्राः, डॉ० नन्दकिशोर चौधरी, डॉ० ऋद्धि नाथ झा प्रभृतयः अन्यतमाः सन्ति। अतः एतेषां समेषां कृते कार्तज्ञ्यं समर्पयामि।

एतत्प्रकाशने श्री नवनीत दास गुप्तमहोदयाः चौखम्बा सुरभारती प्रकाशनप्रबन्धकाः भृशं साधुवादार्हाः सन्ति। येषां सत्प्रयासेन सौहार्देन च पुस्तकमिदं प्रकाशितम्।

अन्ते इदमपि निवेदनं यन्मम ज्ञानात् प्रमादात् भ्रमवशात् कम्प्यूटरजन्यदोषाद् वा काश्चन त्रुटयः सञ्जातास्ताः संशोध्य सविद्वद्भिः नीरक्षीरविवेकिभिः शास्त्रवगाहनशेमुषीसम्पन्नैः सूचनीयोऽयं जनः इति भूयो भूयः मया प्रार्थ्यते।

दीपावली
26.10.2011

विनयावनतः
उदय शंकर झा
(डॉ० उदय शंकर झा)
सहायक प्रोफेसर, शिक्षाशास्त्र विभागः
कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय,
दरभंगा
दूरभाषः 09905073233

विषय-सूची

Contents

प्रशस्तिवाक् v

शुभाशंसनम् vi

प्राक्कथनम् ix

1. वैदिकसाहित्यज्ञानम् 1-57

(क) वेदानां परिचयः-1, (ख) वैदिककालस्य देवताः-3, (ग) वैदिकव्याख्या-पद्धतिः-4, (घ) वैदिक-वाङ्मयस्य परिचयक्रम्-5, (ङ) ऋग्वेदस्य परिचयः-6, (च) यजुर्वेदस्य परिचयः-8, (छ) सामवेदस्य परिचयः-9, (ज) अथर्ववेदस्य परिचयः-11, (झ) ब्राह्मणम्-11, (ञ) आरण्यकम्-13, (ट) उपनिषद्-13, (ठ) वैदिक स्वरप्रक्रिया-15, (ड) वेदानां रचनाकालः-16, (ढ) प्रातिशाख्य वेदांगम्-17, (ण) वैदिकसाहित्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-18, (त) ऋग्वेदस्य वस्तुनिष्ठप्रश्नोत्तराणि-27, (थ) यजुर्वेदस्य वस्तुनिष्ठप्रश्नोत्तराणि-40, (द) सामवेदस्य वस्तुनिष्ठप्रश्नोत्तराणि-48, (ध) अथर्ववेदस्य वस्तुनिष्ठप्रश्नोत्तराणि-53

2. व्याकरणशास्त्रम्

The Science of Grammar 58-156

A (क) व्याकरणस्य महत्त्वम्-58, (ख) व्याकरणस्य निर्वचनानि-59, (ग) व्याकरणस्य परम्पराक्रमः-60, (घ) व्याकरणशिक्षणस्य पाठ्यक्रमः-61, (ङ) संस्कृतव्याकरणस्य विशेषता-62, (च) वर्णविचार-63, (छ) व्याकरणस्य प्रयोजनानि-66, (ज) संज्ञा/परिभाषा-विवेचनम्-68, (झ) सन्धिविवेचनम्-68, (ञ) उपसर्ग/अव्यय विवेचनम्-75, (ट) सुबन्तविवेचनम्-77, (ठ) तिङन्तविवेचनम्-80, (ड) कारक-विभक्ति-विवेचनम्-83, (ढ) प्रत्ययविवेचनम्-84, (ण) समासविवेचनम्-89

B (त) व्याकरणस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-93, (थ) संज्ञा/परिभाषा/आगम/आदेशादिविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-106, (द) सन्धिविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-116, (ध) सुबन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-123, (न) तिङन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-129, (प) कारकस्य (विभक्ते) वस्तुनिष्ठप्रश्नोत्तराणि-133, (फ) प्रत्ययविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-139, (ब) समासविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-149

3. छन्दस् (साहित्यम्) 157-299

A (क) छन्दविवेचनम्-157, (ख) काव्यस्यार्थः-162, (ग) काव्यस्य प्रयोजनम्-163, (घ) काव्यभेदाः-163, (ङ) रसनिरूपणम्-165, (च) रसभेदनिरूपणचक्रम्-168,

(छ) संस्कृतकाव्यानां विकासक्रमः-168, (ज) गद्यसाहित्यम्-172, (झ) चम्पूकाव्य-विवेचनम्-175, (ञ) अलंकारविवेचनम्-175, (ट) पद्य-काव्यम्-180, (ठ) रूपक (नाटक) काव्यम्-183

B (ड) गद्यस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-191, (ढ) कादम्बर्याः वस्तुनिष्ठ-प्रश्नोत्तराणि-197, (ण) हर्षचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि-202, (त) दशकुमारचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि-203, (थ) वासवदत्तायाः वस्तुनिष्ठप्रश्नोत्तराणि-203, (द) अन्य-गद्य-काव्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-204, (ध) पद्य-काव्यस्यपरिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-205

C (क) रघुवंशस्य वस्तुनिष्ठप्रश्नोत्तराणि-215, (ख) कुमारसंभवस्य वस्तुनिष्ठ-प्रश्नोत्तराणि-218, (ग) मेघदूतम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-219, (घ) किरातार्जुनीयम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-224, (ङ) शिशुपालवधम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-226, (च) नैषधीयचरितम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-229, (छ) बुद्धचरितम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-232, (ज) सौन्दरानन्दस्य वस्तुनिष्ठप्रश्नोत्तराणि-233, (झ) साहित्यदर्पणस्य वस्तुनिष्ठप्रश्नोत्तराणि-233, (ञ) रसगङ्गाधरस्य वस्तुनिष्ठप्रश्नोत्तराणि-238, (ट) काव्यप्रकाशस्य वस्तुनिष्ठ-प्रश्नोत्तराणि-239, (ठ) ध्वन्यालोकम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-241, (ड) ऋतुसंहारम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-242, (ढ) शतकत्रयस्य वस्तुनिष्ठ-प्रश्नोत्तराणि-243, (ण) अन्य पद्यकाव्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-244, (त) चम्पू काव्यस्य परिचयात्मक वस्तुनिष्ठप्रश्नोत्तराणि-251

D **नाटकम्**-(क) नाटकस्य परिचयात्मक वस्तुनिष्ठप्रश्नोत्तराणि-254, (ख) वेणीसंहारम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-266, (ग) रत्नावली इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-268, (घ) नागानन्दम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-269, (ङ) प्रियदर्शिका इत्यस्य वस्तुनिष्ठ-प्रश्नोत्तराणि-270, (च) उत्तररामचरितम्-मालतीमाधवम्-महावीरचरितम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-271, (छ) अभिज्ञानशाकुन्तलम् इत्यस्य वस्तुनिष्ठ-प्रश्नोत्तराणि-274, (ज) मुद्राराक्षसम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-280, (झ) मृच्छकटिकम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-283, (ञ) शारिपुत्रप्रकरणम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-288, (ट) मालिविकाग्निमित्रम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-288, (ठ) विक्रमोर्वशीयम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-289, (ड) स्वप्नवासवदत्तम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-289, (ढ) अन्य नाटकस्य वस्तुनिष्ठप्रश्नोत्तराणि-291, (ण) छन्दस्य वस्तुनिष्ठप्रश्नोत्तराणि-292, (त) अलङ्कारस्य वस्तुनिष्ठप्रश्नोत्तराणि-295

4. ज्योतिषाम् 300-357

(क) ज्योतिष-शास्त्रस्य परिचयः-300, (ख) ज्योतिषशास्त्रस्य निर्वचनानि-301, (ग) ज्योतिषशास्त्रस्य वैदिकभेदाः-301, (घ) ज्योतिषशास्त्रस्योत्पत्तिः-301, (ङ) ज्योतिषशास्त्रस्य प्रयोजनानि-302, (च) ज्योतिषशास्त्रस्य भेदाः-302, (छ) सिद्धान्तज्योतिषस्य तात्त्विक-समीक्षणम्-305, (ज) संहिताशास्त्रम्-307, (झ)

प्रश्नशास्त्रंनिमित्तशास्त्रञ्च-307, (ञ) रमलशास्त्रम्-308, (ट) ज्योतिषशास्त्रस्य लोकोपकारकत्वम्-308, (ठ) ज्योतिषशास्त्रसम्मतप्रमाणानि-309, (ड) ज्योतिषमेव विज्ञानम्-309, (ढ) ज्योतिषशास्त्रस्य प्रसिद्धा: ग्रन्था:-310, (ण) विशिष्टज्योतिर्विदां सङ्क्षिप्त: परिचय:-311, (त) पञ्चसंवत्सरयुगस्याधिवाद:-317, (थ) वैदिकसाहित्ये दिवसस्य पञ्चभागा:-317, (द) वैदिकदृष्टयानक्षत्रसूची-317, (ध) दिक्शूल-सिद्धयोग-अर्द्धप्रहरादिविवेचनम्-318, (न) ज्योतिषशास्त्रस्य वस्तुनिष्ठानि-320, (प) ज्योतिषशास्त्रे परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि- 348

5. शिक्षा-(शिक्षा घ्राणं तु वेदस्य) 358-369

(क) शिक्षाशास्त्रविवेचनम्-358, (ख) वेदाङ्गेषु प्रातिशाख्यम्-359, (ग) शिक्षा-साहित्यविवरणम्-360, (घ) आचार्यादीनां लक्षणानि-364, (ङ) शिक्षाया: वस्तुनिष्ठप्रश्नोत्तराणि-364

6. निरुक्त: 370-379

(क) निरुक्तस्य परिचय-370, (ख) निर्वचनस्य सिद्धान्त:-370, (ग) निरुक्तकारा: निघण्टो: व्याख्याकारश्च-371, (घ) निरुक्तस्य सामान्योद्देश्यानि-372, (ङ) निरुक्तस्य टीकाकारा:-372, (च) निरुक्तस्य महत्त्वम्-373, (छ) निरुक्तस्य शैली-373, (ज) निरुक्त-व्याकरणयो: सामञ्जस्यम्-373, (झ) निरुक्ते मन्त्रभेदा:-374, (ञ) दैवतस्वरूपनिरूपणम्-375, (ट) निरुक्तस्य वस्तुनिष्ठप्रश्नोत्तराणि-375

7. भाषाविज्ञानम् (Linguistics) 380-405

(क) भाषाविज्ञानस्य परिचय:-380, (ख) भाषाविज्ञानानां वर्गीकरणम्-381, (ग) भाषाविज्ञानस्याङ्गानि-382, (घ) भाषाणां वर्गीकरणम्-383, (ङ) भारोपीय-भाषापरिवारस्य सामान्य-परिचय:-383, (च) भारोपीय-भाषापरिवारस्य वैशिष्ट्यानि-384, (छ) ध्वनिवर्गीकरणम्-384, (ज) ध्वनि-नियमा:-385, (झ) भाषाविज्ञानस्य वस्तुनिष्ठप्रश्नोत्तराणि-386

8. कल्पशास्त्रम् (हस्तौ कल्पोऽथ पठ्यते)
The Science of Detailing of Religious Ceremonies 406-415

(क) कल्पशास्त्रस्य परिचय:-406, (ख) कल्पसूत्ररचनाया उद्देश्यानि-407, (ग) कल्पसूत्रस्य मुख्यो विषय:, भेदा:, विषयविभागश्च-407, (घ) शुक्ल-यर्जुवेदीय-कल्पसूत्राणां वैशिष्ट्यम्-407, (ङ) कल्पशुल्बसूत्रम्-409, (च) कल्पशास्त्रस्य टीकाकारा-410, (छ) कल्पशास्त्रस्य वस्तुनिष्ठप्रश्नोत्तराणि-411

9. दर्शनशास्त्रम् (Philosophical Treatise) 416-500

(क) दर्शनशब्दस्यार्थ:-416, (ख) दर्शनशास्त्रस्य परिभाषा-417, (ग) दर्शनशास्त्रस्य प्रकारा:-418, (घ) न्यायदर्शनम्-418, (ङ) वैशेषिकदर्शनम्-419, (च) सांख्य-दर्शनम्-420, (छ) योगदर्शनम्-421, (ज) मीमांसादर्शनम्-422, (झ) उत्तरमीमांसा-दर्शनम् (वेदान्तदर्शनम्)-422, (ञ) चार्वाकदर्शनम्-423, (ट) बौद्धदर्शनम्-423,

(ठ) जैन दर्शनम् (आर्हतदर्शनम्)-424, (ड) पाश्चात्यदर्शनम्-425, (ढ) दर्शन-शास्त्रस्य प्रयोजनानि-425, (ण) पदार्थनिरूपणम्-426, (त) दर्शनस्य प्रमुखग्रन्थाः, ग्रन्थकाराःसमयश्च-427, (थ) तालिका द्वारा आस्तिक/नास्तिक दर्शनस्य प्रमाण/पदार्थ/द्रव्य निरूपणम्-431, (द) न्यायदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-432, (ध) वैशेषिकदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-438, (न) सांख्य-योग-दर्शनयोः वस्तुनिष्ठ-प्रश्नोत्तराणि-446, (प) मीमांसादर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-458, (फ) वेदान्त-दर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-462, (ब) चार्वाकदर्शनस्य वस्तुनिष्ठ-प्रश्नोत्तराणि-480, (भ) बौद्धदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-483, (म) जैनदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-490, (य) दर्शनस्य परिचयात्मकानि वस्तुनिष्ठ- प्रश्नोत्तराणि-(दर्शनग्रन्थाःग्रन्थकाराश्च)-495

10. पुराणेतिहासौ- 501-534

(क) पुराणानामुद्भव-501, (ख) पुराणसंवृद्धिः-501, (ग) पुराणानां प्रतिपाद्यार्था-502, (घ) पुराणेष्वितिहासांशः-502, (ङ) पुराणरचनाकालः-503, (च) पुराणानां नामानि तत्प्रमाणञ्च- 503, (छ) पुराणानां श्लोकसंख्याः-503, (ज) अष्टादश-उपपुराणानि-504, (झ) ज्योतिर्लिंगविवरणी-504, (ञ) एकादश रुद्र-रुद्राणीनामावली-504, (ट) दशावतार एवं चतुर्विंशतिः अवतारानां विवरणम्-504, (ठ) चतुर्युगानां चतुर्दशमन्वन्तरानां विवरणी-505, (ड) रामायणम्-505, (ढ) महाभारतम्-505, (ण) पुराणानां वस्तुनिष्ठप्रश्नोत्तराणि-506, (त) रामायणस्य वस्तुनिष्ठप्रश्नोत्तराणि-520, (थ) महाभारतस्य वस्तुनिष्ठप्रश्नोत्तराणि-525

11. धर्मशास्त्रंकर्मकाण्डञ्च- 535-572

(क) धर्मशास्त्रम् The Science of Jurisprudence-535, (ख) धर्मशास्त्रस्य परिचय-536, (ग) धर्मभेदा-537, (घ) धर्मस्य मुख्यपुरुषार्थत्वम्-537, (च) धर्म-शास्त्रवाङ्मयस्य परिचयः -538, (छ) धर्मसूत्रस्य परिचय-538, (ज) धर्मशास्त्रकाराणां संक्षिप्तपरिचयः-539, (झ) एकादशीव्रतविवरणी-546, (ञ) प्रमुखव्रतानि-547, (त) धर्मशास्त्रकर्मकाण्डयोः वस्तुनिष्ठप्रश्नोत्तराणि-548

12. सामान्यज्ञानम्- 573-606

(क) भारतस्य राज्यानि राजधान्यश्च-573, (ख) विश्वस्य प्रमुखदेशास्तेषां राजधान्यश्च-573, (ग) भारतीयसंस्कृतिः, सभ्यता, भाषादि-575, (घ) शासकाः तेषां कालः, धर्मश्च-579, (ङ) विशिष्टजनानां परिचयः-587, (च) संस्था-संस्थापकः-लेखकश्च-588, (छ) प्रथमः, ऐतिहासिककालः, उपाधिः-590, (ज) राष्ट्रीय-अन्तर्राष्ट्रिय-सम्बन्धि विशिष्टज्ञानम्-594, (झ) नदी, पर्वत, पदार्थादि ज्ञानम्-599, (ञ) आविष्कारकाः, निर्मातारः-601, (ट) चलचित्रादि-602, (ठ) आदर्शवाक्यम्-603, (ड) सम्मानः-604, (ढ) क्रीडा-605, (ण) विशिष्टज्ञानम्-605

13. कवि परिचय 607-657

• • •

संस्कृतशास्त्रमञ्जूषा

ॐ

सा नः वसतु जिह्वाग्रे सर्वसौभाग्यदायिनी।
अविद्यानाशिनी देवी सर्वशुक्लासरस्वती।। 1।।
प्रश्नानां वस्तुनिष्ठानां संकलनन्तथोत्तरम्।
छात्राणामुपकाराय प्रमोदाय विपश्चिताम्।। 2।।
उदयशंकरस्येयं शास्त्रतत्त्वप्रदायिका।
संस्कृतशास्त्रमञ्जूषा पूर्णा तिष्ठतु सर्वदा।। 3।।

1

वैदिकसाहित्यज्ञानम्

(क) वेदानां परिचय

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते। अखिल-भूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्रचीनतम इति सर्वैरेव अङ्गीक्रियते। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, स्मृत्यादयस्तु तन्मूलकतया। श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी। न केवलं धर्ममूलतयैव वेदाः समादृताः, अपि तु विश्वस्मिन् सर्वप्राचीन-ग्रन्थतयाऽपि। प्राचीनानि धर्मसमाज-व्यवहार-प्रभृतीनि वस्तुजातानि बोधयितुं श्रुतयः एव क्षमन्ते। प्रधानतया वेदो द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च। तथा च संहिता-ब्राह्मण-आरण्यक-उपनिषद इति वेदस्य चत्वारः विभागाः विद्यन्ते।

तस्माद्यज्ञात्सर्वहुतःऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।

(ऋक्-10. 90. 8)

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमएानि अथर्वाङ्गिरसो मुखम्।।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।।

(अथर्व. 10. 7. 20)

"विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः" इति वह्वृच्प्रातिशाख्ये वेदशब्दस्यार्थ अभिहितः। "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुत्या- प्रत्यगात्म-साक्षात्कारस्यैव मोक्षहेतुत्वं समर्थितं, तादृशसाक्षात्कारसाधकानि वेदान्तादीनि शास्त्राण्येव भवितुमर्हन्ति। आध्यात्मिक-मूल्यानि मानवस्य जीवनस्य च महत्त्वपूर्णानि तथ्यानि भवन्ति। येषु येषु शास्त्रपदवाच्येषु-प्राधान्येन आध्यात्मविषयाः प्रतिपादिताः सन्ति, तत्र प्रसङ्गोपात्तानां लौकिकानामपि विषयाणां विश्लेषणस्य-तात्पर्यं आध्यात्म-विषय एव पर्यवस्यति। सायणाचार्येण भणितं यत्- "अपौरुषेयबाक्यं वेदः" "इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकं साधनं यो वेदयति स वेदः" वेदपदेन तु -

1. संहिता, 2. ब्रह्मणम्, 3. आरण्यकम्, 4. उपनिषद् इति चतुर्णां ग्रन्थानां बोधो भवति। एतेषु चतुर्षु विभागेषु छन्दोबद्धः मन्त्ररूपो ब्रह्मणभागो गद्यात्मको यागादिवर्णनपरकः, आरण्यकभागो छन्दोबद्धमन्त्रयुक्तो गाथारूपो वा विद्यते। उपनिषद्भागे तत्तत्संहितागत- ब्रह्मज्ञानादिविषयाणां वर्णनरूपेण संकलनम्। यथा-

1. ऋक्संहिता, यस्यां संहितायां स्तुतिपरकमन्त्राणां संग्रहः विद्यते।
2. यजुःसंहिता, यस्यां संहितायां याजकीयानां मन्त्राणां संग्रहः विद्यते।
3. सामसंहिता, यस्यां संहितायां गायनपरकमन्त्राणां संग्रहः विद्यते।
4. अथर्वसंहिता, यस्यां संहितायां विविधविघ्न-विनाशकाऽऽभिचारिकमन्त्राणां संग्रहःविद्यते।

प्रधानतया वेदो द्विविधः **मन्त्ररूपो ब्राह्मणरूपश्च**। मन्त्र समुदाय एव संहिता शब्देन व्यवहृतः। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्यव्याख्यारूप एव। ब्राह्मण-ग्रन्थोऽपि-ब्राह्मणम्, आरण्यकम्, उपनिषदश्च, यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः, आरण्ये पठिताः यज्ञस्य आध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकानि। उपनिषदो ब्रह्मबोधिका मोक्षसाधनीभूता अयमेवभागो वेदानाम् अन्तिमभागतया वेदान्त इत्युच्यते। ब्राह्मणभागो गृहस्थानामुपयोगी, आरण्यकभागो वानप्रस्थमाश्रितानाम्, उपनिषदश्च सन्न्यासिनामुपयुज्यन्त

इत्यपि कथयितुं शक्यते। यथा-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।

सेयं वेदस्त्रयीतिपदेनापि व्यवह्रियते, सा खलु रचना पद्यमयी सा ऋक्, या गद्यमयी सा यजुः, या पुनः समग्रागानमयी-रचना सा सामेति कथ्यते। ऋग्वेदेऽपि अथर्ववेदानामुल्लेखदर्शनात्।

चतस्रः संहिताः सन्ति-ऋग्यजुसामथर्वभेदात्। अर्थात् चत्वारो वेदाःसन्ति। इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकम् उपायं यो ग्रन्थो वेदयति स वेदः। वेदविषये मनुस्मृतौ उक्तमस्ति वेदोऽखिलो धर्ममूलम्। महाभाष्ये ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।

वेदानाम्-उपादेयता-शतपथब्राह्मणे-(11.5.6.1)

यावन्तं ह वै इमां पृथिवीं वित्तेनपूर्णां ददत् लोकं जयति त्रिभिस्तावन्तं जयति भूयांसं च अक्षय्यं च य एवं विद्वान् अहरहः स्वाध्यायमधीते, तस्मात् स्वाध्यायोऽध्येतव्यः।

वेदज्ञस्य प्रशंसायां मनुस्मृतिकारः मनुस्मृतिग्रन्थे-(12/102) ब्रूते

वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते।।

वेदे मुख्यतया चतुर्दश(14) छन्दांसि प्रयुक्तानि सन्ति। किञ्च सप्त एव प्रमुखानि। तत्र वर्णवृतानामेव प्रयोगः नतु मात्रिकवृत्तानाम्। वेदेषु त्रयः स्वराः प्रयुक्ताः-1. उदात्तः, 2. अनुदात्तः, 3. स्वरितश्चेति।

वेदेषु अष्ट विकृतयः-1. जटा पाठः? 2. माला? 3. शिखा, 4. रेखा, 5. ध्वजः, 6. दण्डः, 7. रथः, 8. घनः।

जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः।।

ध्यातव्याः-

ऋग्वेदस्य दशमे मण्डले संवादसूक्तानि सन्ति-

1. यम-यमी संवादः, 2. पुरुरवा-उर्वशीसंवादः, 3. सरमा-पणिसंवादः।

(ख) वैदिककालस्य देवताः-

1. द्युलोकस्यदेवताः-सूर्यः, वरुणः, मित्रः।
2. अन्तरिक्षस्य देवताः-पर्यन्यः, वायुः, इन्द्रः, मारूतश्च।
3. पृथ्वीलोकस्य देवताः-पृथ्वी, उषा, अग्नि, सोमादयः।

वेदः	ब्राह्मणग्रन्थाः	आरण्यकग्रन्थाः	उपनिषदः
1. ऋग्वेदः	ऐतरेयः शांखायनः (कौषीतकी)	ऐतरेयः, शांखायनः	ऐतरेयः, कौषीतकी
2. यजुर्वेदः	शतपथब्राह्मणः, तैत्तिरीयब्राह्मणः	बृहदारण्यकः, तैत्तिरीयारण्यकः,	तैत्तिरीयोपनिषद्, कठोपनिषद् श्वेताश्वतरोपनिषद्
3. सामवेदः	पंचविंशः, षड्विंशः, आर्षेय, दैवत, छान्दोग्य, संहिता, वंशः, जैमिनीय, सामविधन	तवलकारः, छान्दोग्य	छान्दोग्य, केन
4. अथर्ववेदः	गोपथब्राह्मण		

1. ऐतरेयब्राह्मणः-अत्र चत्वारिंशत्(40) अध्यायाःसन्ति। अत्र मुख्यरूपेण सोमयागवर्णनमस्ति।
2. शांखायनब्राह्मणः-अस्य अपरं नाम कौषीतकी। अत्र 30 त्रिंशत् अध्यायाः सन्ति। अत्र अग्याधान-अग्निहोत्रदर्शपौर्णमासवर्णनमस्ति।
3. शतपथब्राह्मणः-शुक्लयजुर्वेदीयोऽयं ब्राह्मणः। अस्य पाठद्वयं प्राप्नोति।
   1. माध्यन्दिनशाखीये-चतुर्दश(14) काण्डाः, शताध्यायाश्च सन्ति।
   2. कण्वशाखीये-अत्र सप्तदश(17) काण्डाः, 104 अध्यायाः सन्ति।
4. तैत्तिरीयब्राह्मणे-अत्र त्रयः काण्डाः सन्ति। अत्र अग्न्याधान-वाजपेय-सोम-राजसूय-सौत्रमणि-बृहस्पतिसव-वैश्यसव-नक्षत्रेष्टिवर्णनमस्ति।
5. गोपथब्राह्मणे-अथर्ववेदस्य एकमात्रोऽयं ब्राह्मणः। अस्य द्वौ भागौ स्तः पूर्वभागः उत्तरभागश्च। पूर्वभागे पञ्च प्रपाठका उत्तरभागे च षड् प्रपाठकाः।

(ग) वैदिकव्याख्या-पद्धतिः-

1. सायणाचार्यः- सायणाचार्यस्तु वैदिकसम्प्रदायस्य यथार्थवेत्तासीत्। अद्यापि वेदानामर्थनिर्णये सायणभाष्यमेव प्रमाणरूपेण स्वीक्रियते। सायणाचार्यस्य समयः 1400 शताब्दी वर्तते। सर्वप्रथमं सायणाचार्यः कृष्णयजुर्वेदसंहितायाः भाष्यं रचयामास, तदनन्तरं ऋग्वेदसंहिताभाष्यं ततः सामवेद-संहितायाः भाष्यं चकार। संहिताभाष्यस्य अन्तिमे चरणेऽनेन महाभागेन अथर्ववेदसंहिताभाष्यं सम्पादितम्।

यज्ञं यजुर्भिरध्वर्युर्निर्ममीते ततो यजुः।
व्याख्यातं प्रथमं पश्चादृचां व्याख्यानमीरितम्।।
साम्नामृगाश्रितत्वेन सामव्याख्याथ वर्तते।
अनुतिष्ठासु जिज्ञासावशाद् व्याख्याक्रमोऽयहम्।।
व्याख्याय वेदत्रितयमामुष्मिकफलप्रदम्।
ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति।।

अनेन प्रकारेण सायणाचार्यस्तु चतुर्णां वेदानामभिज्ञो विद्वान् आसीत्। अनेन विद्वद्वरेण ऋग्यजुस्सामाथर्वसंहितासु ऐतरेय-तैत्तिरीय-ताण्ड्य-षड्विंश-सामविधान-आर्षेय-देवताध्याय-वंश-शतपथब्राह्मणग्रन्थेषु तैत्तिरीय-ऐतरेयारण्यकयोः भाष्यं कृतम्। अद्यापि वैदिकवाङ्मयस्य दुरूहाणामर्थानां ज्ञानाय सायणभाष्यस्य महती उपयोगिता विद्यते।

2. यास्काचार्यः- यास्कप्रणीते निरुक्ते वैदिकशब्दार्थज्ञानस्य प्रक्रिया वर्णिताऽस्ति। "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।" निघण्टोः पञ्चानाम् अध्यायानां द्वादशाध्यायेषु व्याख्यां चकार यास्कः।

3. हलायुधः- सायणपूर्ववर्तिषु आचार्येष्वेकः हलायुधः एव एतादृशः विद्वान् बभूव, यः काण्व-यजुर्वेदसंहितायाः स्वकीयं विशिष्टं भाष्यं चकार। हलायुधस्य कालः-1170-1200 खीष्टाब्दः अस्ति।

4. उव्वटः-उव्वटाचार्यः मम्मटाचार्यस्य भ्राता आसीत्। उव्वटस्य कालः-1018-1063 खीष्टाब्दः अस्ति। अस्य विद्वद्वरस्य चत्वारो ग्रन्थाः समुपलभ्यन्ते-1. ऋक्प्रातिशाख्यटीका, 2. ऋक्सर्वानुक्रमणीभाष्यम्, 3. यजुः प्रातिशाख्यटीका, 4. ईशावास्योपनिषद्भाष्यञ्च।

5. माधवाचार्यः-अनेन विद्वद्वरेण सामवेदसंहितायाः प्रथमं भाष्यं कृतम्। माधवस्य पितुर्नाम नारायणः आसीत्। अस्य समयः षष्ठशतकम् अस्ति।

6. महीधरः-शुक्लयजुर्वेदीयमाध्यन्दिनिशाखाध्यायी विद्वानयं काश्यामेव अध्ययनं कृत्वा महत्तर प्रतिष्ठां लब्ध्वा च काशी-नरेशस्य सभापण्डितो बभूव। महीधरस्य रचना "वेददीप" नामिका विद्यते।

7. दयानन्द-सरस्वती- आचार्यवरस्य आर्यसमाजसंस्थापकस्य महर्षेः दयानन्दय वेदव्याख्यानं सर्वथा नवीनं समाजोत्कर्षशीलञ्चास्ति। अयं विद्वद्वरः शुक्लयजुर्वेदसंहितायाः भाष्यं, एवं च ऋग्वेद-संहितायाः भाष्यं रचयामास। दयानन्दस्य वेदव्याख्यायाः मूलाधाराः अष्टाध्यायीनिरुक्त-मित्यादयः ग्रन्थाः सन्ति।

8. अरविन्दः-आधुनिकेषु वेदव्याख्यानकारेषु महर्षेः अरविन्दस्य विचारसरणिः सर्वथा प्रंशसनीया उपादेया चास्ति। एतन्मते वैदिकमन्त्राः सिद्धानां वाणी अस्ति, या अन्तर्जगतः आध्यात्मिकतानां नियमिका अस्ति।

9. प्रो. विल्सनाचार्यः-प्रो. एच. एच. विल्सन-महोदयः ऋग्वेदस्य प्रथमआंगल- अनुवादकः अस्ति। यस्य प्रकाशनं 1850 खीष्टाब्दे अभवत्।

10. प्रो. ओल्डेनवर्ग-वैदिकव्याख्याकारेषु ओल्डेनवर्गस्य विशिष्टं महत्त्वपूर्णं च स्थानं विद्यते। अनेन जर्मन विद्वद्वरेण ऋग्वेदस्योपरि स्वकीयं मार्मिकं विवेचनात्मकञ्च भाष्यं कृतम्, यत् 1909-1912 खीष्टाब्दे वर्लिनिदेशात् प्रकाशितञ्च।

(घ) वैदिक-वाङ्मयस्य परिचयचक्रम्-





(ङ) ऋग्वेदस्य परिचयः-(The first of the four Vedas.)

ऋच्यते स्तूयते यया सा ऋक्, तादृशीनामृचां समूह एव ऋग्वेदः। ऋग्वेदगतमन्त्रद्रष्टारो ऋषयः-गृत्समदविश्वामित्रवामदेवात्रिभरद्वाजवशिष्ठादयः सन्ति। एते सर्वे ऋषयः-ऋषिसूक्तदेवता-सूक्तछंन्दःसूक्तार्थसूक्तभेदात् पृथक् पृथक् विवेंचितव्याः।

सृष्ट्युत्पत्तिकाले एकस्य एव वेदस्य कालक्रमवशात् विविधाः विभागाः खण्डानि वा अभूवन्। सर्वे जानन्त्येव यत् भगवता कृष्णद्वैपायनेन द्वापरयुगस्य अन्ते मानवबुद्धिसामर्थ्यम्

अध्ययनसौकर्यज्ञाभिलक्ष्य संकलनपूर्वकम् एकस्यैव वेदस्य ऋग्यजुःसामाथर्वरूपेण चत्वारो विभागाः कृता। ऋग्वेद एव ऋक्संहिताशब्देन अभिधीयते। ऋग्वेदे(क) सूक्तः, (ख) मण्डलम्। (क) सूक्तः-1. ऋषिः, 2. देवता, 3. छन्दः, 4. अर्थः। (ख) मण्डलम्-1. मण्डलम्, 2. अनुवाकः। पुनः ब्राह्मणः त्रिधा विभज्यते। 1. ब्रह्मणः, - (क) ऐतरेयब्राह्मणः (ख) कौषीतकिब्राह्मणः। 2. आरण्यकम्-(क) ऐतरेय आरण्यकम्, (ख) कौषीतकि आरण्यकम्। 3. उपनिषत्-(क) ऐतरेय (ख) कौषीतकि। अस्मिन् वेदे दश मण्डलानि, पञ्चाशीतिः अनुवाकाः एवं अशीत्यधिक-पञ्चशतोत्तरसहस्रं मन्त्राः सन्ति। अस्य वेदस्य ऋत्विक्-होता विद्यते।

अत्र मण्डलक्रमः वैज्ञानिकः सुप्रसिद्धः सुप्रचलितश्च वर्तते। अत्र देवानुसारं सूक्तं विभाजनमस्ति। अष्टकक्रमश्च संख्यादृष्ट्या वा समीचीनं प्रतिभाति। अस्मिन् क्रमे समस्त-ऋग्वेदः समानाष्टभागेषु विभक्तः। स च अष्टकनाम्ना ज्ञायते। प्रत्येकस्मिन् अष्टके अष्टाध्यायाः सन्ति। तत्र भिन्नाः भिन्नाः वर्णसंख्या भिन्नाश्च मन्त्रसंख्याः। अतः ऋग्वेदे मण्डलक्रमानुसारेण (10) मण्डलाः, 85 अनुवाकाः, 1028 सूक्ताः, 10552 मन्त्राः सन्ति। अष्टकक्रमानुसारेण च 8 अष्टकाः, 64 अध्यायाः, 2024 वर्गाः, 10552 मन्त्राः सन्ति।

ऋग्वेदस्य शाखाः-

1. शाकलशाखा,
2. वाष्कलशाखा,
3. आश्वलायनशाखा,
4. शांखायनशाखा,
5. मण्डूकायनशाखा।

ऋग्वेदसम्बद्धाः ब्राह्मणग्रन्थाः-	1. ऐतरेयः,	2. कौषीतकी।
ऋग्वेदस्य आरण्यकग्रन्थाः-	1. ऐतरेयः,	2. शांखायनः।
ऋग्वेदस्य उपनिषदः-	1. ऐतरेयः,	2. कौषीतकी, 3. मन्त्रः।

सम्प्रतिऋग्वेदस्य प्रचलिता संहिता शाकलशाखीया एव वर्तते। अस्याः संहितायाः अन्ते ऋक्परिशिष्टनाम्ना संगृहीतानि षट्त्रिंशत्संख्यकानि सूक्तानि सन्ति। एतेषु सूक्तेषु कानिचित् सूक्तानि अतीव प्रख्यातानि सन्ति। यथा-1. श्रीसूक्तम्, 2. रात्रिसूक्तम्, 3. मेधासूक्तम्, 4. शिवसंकल्पसूक्तञ्च।

ऋग्वेदस्य कतिपय-सूक्तानामर्थगाम्भीर्यमत्यद्भुतं विज्ञानं सृष्टिविज्ञानं वा दृष्ट्वा विद्वांसः साश्चर्याः स्तब्धाश्च भवन्ति।

1. अग्निसूक्तम् (ऋक्-1. 1)

अग्निसूक्तेऽस्मिन्स्तूयमानत्वाद् अग्निदेवः। ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य प्रथमः मन्त्रोऽयम् अग्नेः स्तुतिमुपस्थापयति। अग्निर्देवता। विश्वामित्रपुत्रोमधुच्छन्दा ऋषिः। गायत्री छन्दश्च। अत्र भगवान् वेदपुरुष आह-अग्निनामकं देवम् ईले स्तौमि।

अग्निमीले पुरोहितं, यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।।
त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम्।
त्वं पुत्रो भवसि यस्तेऽविधत् त्वं सखा सुशेवःपास्यसधृषः।।

2. इन्द्रसूक्तम् (ऋक्. 2. 12)

"यो जात" इति पञ्चदशमन्त्रात्मकस्य सूक्तस्य ऋषिः गृत्समदः। इन्द्रो देवता। त्रिष्टुप् छन्दः। गृत्समदो ब्रूते, हे जनासः! यः मनस्वान् देवः जायमान एव स्वकीयेन कर्मणा सर्वान् देवान् पर्यभूषत्, यः चलन्तीं पृथिवीम् अदृंहत्, यः इतस्ततश्चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमितवान्, यः अहिं हत्वासर्पणशीलाः सप्त-सिन्धून् अरिणात्, यः अश्मनोः अन्तः अग्निं जजान, स इन्द्रः, नाहमस्मि।

यो जात एव प्रथमो मनस्वान्, देवो देवान् क्रतुना पर्यभूषत्।
यस्य शुष्माद् रोदसी अभ्यसेतां, नृम्णस्य महना स जनास इन्द्रः।। 1।।
यः पृथिवीं व्यथमानामदृंहद्, यः पर्वतान् प्रकुपिताँ अरम्णात्।
यो अन्तरिक्षं विममे वरीयो, यो द्यामस्तभ्नात् स जनास इन्द्रः।। 2।।

3. वरुणसूक्तम् (ऋक्. 1. 25)

सूक्तेऽस्मिन् वरुणस्य स्तुतिं कुर्वन् शुनः शेपो ब्रूते-हे वरुण! यथा लोकेप्रजाः कदाचित् प्रमादमपि कुर्वन्ति, तथैव तव सम्बन्धि अस्माकं व्यवहारे यः प्रमादः भवति, स क्षम्यताम्। तव कृपाप्राप्त्यर्थं। वयं स्तुतिभिः तवमनः प्रमोदयामः।

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यविद्यवि।। 1।।

4. उषम् सूक्तम् (ऋक् 3. 61)

सूक्तस्यास्य उषा देवता, विश्वामित्रो ऋषिः, त्रिष्टुप् छन्दश्च। ऋषिः उषसः स्तुतिं कुर्वन् आह, हे भगवति! त्वमेव वाजिनि, त्वमेव मघोनि, त्वमेव प्रकृष्टज्ञानवती, त्वमेव विश्ववारा, पुराणी, युवती च असि। हे देवि! त्वं मरणधर्मरहिता, सुवर्णमयरथोपेता, असि, एतादृशीं त्वां प्रभूतबलयुक्ताः अश्वाः आवहन्तु।

ऋतस्य बुध्नउषसामिषण्यन्, वृषा मही रोदसी आ विवेश।
मही मित्रस्य वरुणस्य माया, चन्द्रेव भानुं विदधे पुरुत्रा।।

(च) यजुर्वेदस्य परिचयः-(The Second of the Four Vedas.)

यजूंषिगद्यानि, अध्वर्युणा यज्ञे उपयुज्यमाना मन्त्रा एवात्र यजुर्वेदे संकलितः। कृष्णयजुः शुक्लयजुः इति द्विप्रकारकः यजुर्वेदः, तेषु 1957 मन्त्राः सन्ति। येषु अग्नि चयनम्, उखाभरणम्, चितयः, रूद्रहः, शतरुद्रियम्, सोमसम्पादनविधिःइत्यादीनि विषयवस्तूनि सन्ति। यजुर्वेदे-(क) कृष्णयजुः (ख) शुक्लयजुः।

(क) कृष्णयजुः-

1. तैत्तरीयशाखा, (संहिता) अत्र सप्त काण्डाः, 44 प्रपाठकाः, 631 अनुवाकाश्च सन्ति।

2. मैत्रायणीशाखा(संहिता) अत्र चत्वारः काण्डाः, 54 प्रपाठकाः, 2144 मन्त्राः सन्ति।,

3. काठकशाखा(संहिता) अत्र 40 स्थानकाः, 843अनुवाकाः, 3091 मन्त्राः सन्ति।

4. कपिष्ठलकठसंहिता-अत्र 6 षड् अष्टकाः, 48 अध्यायाः सन्ति।

(ख) शुक्लयजुः-

1. माध्यन्दिनशाखा अथवा वाजसनेयिसंहिता- अत्र 40 अध्यायाः, 1975 मन्त्राः सन्ति।

2. काण्वशाखा-अत्र 40 अध्यायाः, 2086 मन्त्राः सन्ति। पुनः ब्राह्मणः त्रिधा विभज्यते।

(क) ब्राह्मणः-1. शतपथ ब्राह्मणः, 2. तैत्तिरीय- ब्राह्मणः।

(ख) आरण्यकम्-1. बृहत्, 2. आरण्यकम्।

(ग) उपनिषत्-1. बृहत् आरण्यकोपनिषत्, 2. ईशोपनिषत्। यजुर्वेदे-40 अध्यायाः सन्ति। 1303 अनुवाकाः 1975 मन्त्राश्च सन्ति। अस्य वेदस्य ऋत्विक् अध्वर्युः विद्यते।

1. त्रेतायां यजुराख्यः एक एव वेद आसीत्, यथोक्तं मत्स्यपुराणे-

एकमाध्वर्यवं पूर्वमासीद् द्वैधन्तु तत्पुनः।
सामान्यविपरीतार्थैः कृतं शास्त्राकुलन्त्विदं।।

2. शिवसंकल्पसूक्तम् (वाजस. 34)

षड्ऋचात्मकस्य सूक्तस्यायं ऋषिः याज्ञवल्क्यः, मनः देवता, त्रिष्टुप् छन्दश्च। सूक्तेऽस्मिन् ऋषिर्वदति, यन्मनः जाग्रतः पुरुषस्य दूरमुद्गच्छति। यथा-

सुसारथिरश्वानिव यन्मनुष्यान्, नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं, तन्मे मनः शिवसंकल्पमस्तु।।

3. प्रजापतिसूक्तम्

पंचमन्त्रात्मके सूक्तेऽस्मिन् वर्णितमस्ति यत् ब्रह्माण्डेऽस्मिन् यत्किञ्चिदपि दृश्यते, तत्सर्वंप्रजापतिरेवास्ति। स षोडशावयवलिंगशरीरीप्रजापतिः एव अस्ति। अग्नि-आदित्य-वायु-चन्द्र-शुक्र-ब्रह्मओंकारादिरूपैः सः प्रजापतिरेवव्याख्यातः प्रसिद्धश्च।

यस्माज्जातं न पुरा किंच नैव, य आबभूव भुवनानि विश्वा।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी।।

(छ) सामवेदस्य परिचयः-(The Third of the Four Vedas.)

यज्ञे चत्वारो ऋत्विजो भवन्ति। होता-अध्वर्युः-उद्गाता-ब्रह्मा। होता-आह्वानकर्ता, स हि यज्ञावसरे प्रक्रान्त-देवतानां प्रशंसायां रचितान् मन्त्रान् उच्चारणयन् देवता आह्वयति। उच्चस्वरेण गानकर्ता, स हि स्वरवद्धान् मन्त्रानुच्चैर्गायति, तदपेक्षितो मन्त्रसंग्रहः सामवेदः। सामवेदस्य गानप्रचुरता प्रार्थिता, सामवेदे-1549 मन्त्राः सन्ति। सामवेदगत मन्त्राणां सप्तस्वराः यतस्ते गीयन्ते। पूर्वार्चिकमेव छन्दः, छन्दसी, छन्दसिका चेति त्रिभिरपि नामभिरभिधीयते। उत्तरार्चिकन्तु अनुष्ठान निर्देशकम्।

सामवेदे-(क) पूर्वार्चिकम्, (ख) उत्तरार्चिकम्। (क) पूर्वार्चिकम्-1. अग्नेयपर्व, 2.

ऐन्द्रपर्व, 3. पवमानपर्व, 4. आरण्यकपर्व। (ख) उत्तरार्चिकम्-1. दशरात्रम्, 2. संवत्सरम्, 3. ऐकाहम्। पुनः ब्राह्मणः त्रिधा विभज्यते। (क) ब्राह्मणः-1. ताण्डयः, 2. षड्विंशः, 3. सामविधानम्, 4. जैमनीयम्। (ख) आरण्यकम्-1. छान्दोग्यम्, 2. तवतकारः। (ग) उपनिषत्-1. छान्दोग्यम्, 2. केनोपनिषत्। सामवेदे 1549 मन्त्राः सन्ति। अस्य वेदस्य ऋत्विक् उद्गाता विद्यते।

ऋचा सह सम्बद्धं स्वरप्रधानं गायनमेव सामशब्दस्य व्युत्पत्तिलभ्योऽर्थः भवति।

यथोक्तम्-

"तया सह सम्बद्धःअमो नाम स्वरः यत्र वर्तते तत् साम" इति। सामवेदो द्विधा विभज्यते पूर्वार्चिकम् उत्तरार्चिकम् च।

1. पूर्वार्चिकमेव छन्दः, छन्दसी, छन्दसिका चेति त्रिभिरपि नामभिरभिधीयते। विषयानुसारं पूर्वार्चिकं चतुर्षु भागेषु विभज्यते, -

1. आग्नेयपर्व,
2. ऐन्द्रपर्व,
3. पवमान-पर्व,
4. आरण्यकपर्व,

"महानाम्नी"आर्चिकश्चास्ति। अत्र षड् 6 अध्यायाः, 650 मन्त्राः सन्ति।

2. उत्तरार्चिकं तु अनुष्ठाननिर्देशकम्। तस्य बहवो विभागाःसन्ति। उत्तरार्चिके 21 अध्यायाः अथवा 9 प्रपाठकाः, 1225 मन्त्राः सन्ति। तेषु प्रमुखाः भेदाः यथा-

1. दशरात्रम्।
2. संवत्सरम्।
3. ऐकाहम्।
4. अहीनम्।
5. सत्रम्।
6. प्रायश्चित्तम्।
7. क्षुद्रम्

अस्यां संहितायां 1875 ऋचः प्राप्यन्ते। विष्णुपुराणानुसारेण वेदव्यासः कृष्णद्वैपायनः वेदं चतुर्धा विभज्य स्वशिष्याय जैमिनये सामवेदं पाठयामास। सम्प्रति सामवेदसंहितायाः तिस्रः एव शाखाः समुपलभ्यन्ते, -

1. कौथुमीयशाखा,
2. राणायनीयशाखा,
3. जैमिनीयशाखा,

सामवेदस्य ब्राह्मणग्रन्थाः-

पञ्चविंशः, षड्विंशः, सामविधानब्राह्मणः, आर्षेयब्राह्मणः। मन्त्रब्राह्मणः, देवताध्यायब्राह्मणः,

वंशब्राह्मणः, संहितोपनिषद्ब्राह्मणः, जैमिनीयब्राह्मणः, (आर्षेय) जैमिनीयतवल्कारब्राह्मणः, जैमिनीयोपनिषद्ब्राह्मणः।

सामवेदस्योपनिषदः-छान्दोग्योपनिषद्, केनोपनिषद्।

सामवेदस्यारण्यकग्रन्थो नास्ति।

(ज) अथर्ववेदस्य परिचयः-(The last of four Scriptures Vedas)

अभिचार क्रियायाः प्राधान्येन प्रतिपादकोऽयं वेदः अथर्वनामकर्षिणा दृष्टत्वात् अथर्ववेद इत्युच्यते। अस्मिन् वेदे 5987 मन्त्राः विद्यन्ते। अथर्ववेदस्य नवशाखा आसन्, परं सम्प्रति शौनकपिप्पलाद समाख्ये द्वे एव शाखे प्राप्येते। अथर्ववेदे-(क) शोनकशाखा, (ख) पिप्पलादशाखा। पुनः ब्राह्मणः त्रिधा विभज्यते। (क) ब्राह्मणः-1. बृहत् आरण्यकोपनिषत्, 2. गोपथब्राह्मणम्। (ख) आरण्यकम्-शून्यम्। (ग) उपनिषत्-1. प्रश्नः, 2. माण्डूक्यः, 3. मण्डूकः। अथर्ववेदे 20 काण्डानि, 731 सूक्तानि, 2987 मन्त्राः च विद्यते। अस्य वेदस्य ऋत्विक् ब्रह्मा विद्यते।

अथर्ववेदस्य उपलब्धेषु अनेकाभिधानेषु अथर्ववेद-ब्रह्मवेद-अंगिरोवेद-अथर्वांगिरेवेदादीनि नामानि प्रमुखतां भजन्ते। "थर्व" धातुः कौटिल्यार्थकः तथा हिंसावाचकः अस्ति। अत एव "अथर्व" शब्दस्य अर्थोऽस्ति यत् अकुटिलवृत्या अहिंसावृत्या च मनसः स्थैर्यप्राप्तकर्ता व्यक्तिः। अथर्वांगिरस्पदस्य व्याख्याकरणे सति प्रतीयते यत् ऋषिद्वयेन दृष्टानां मन्त्राणां समूहरूपः एव अथर्ववेदः। अथर्वदृष्टाः मन्त्राः शान्तिपुष्टिकर्मयुक्ताः सन्ति, परन्तु अंगिरेदृष्टाः मन्त्राः आभिचारिकाः सन्ति। वेदेऽस्मिन् मारणमोहनोच्चाटनादीनां ज्वरापस्मारादिरोगविनाशकानाञ्च मन्त्राणां संग्रहोऽस्ति। अत्र 20काण्डानि, 34 प्रपाठकाः, 111 अनुवाकाः, 731 सूक्तानि, 5987 मन्त्राश्च सन्ति। सम्प्रति अथर्ववेदस्य द्वे एव शाखे समुपलभ्येते-

1. पिप्पलादशाखा,
2. शौनकशाखा।

(झ) ब्राह्मणम्-(Brahmanam)

तैत्तिरीयसंहितायां, पाणिनीयव्याकरणे, निरुक्ते, शतपथब्राह्मणे, ऐतरेयब्राह्मणे च ब्राह्मणशब्दस्य ग्रन्थस्यार्थे प्रयोगः समुपलभ्यते। यज्ञीयकर्मकाण्डस्य व्याख्याविवरणयोः सम्पादनं ब्राह्मणग्रन्थानां मुख्यो विषयः। यथोक्तं विद्वद्वरेण वाचस्पतिमिश्रेण-

नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते।।

वेदस्य शेषभूताः यज्ञयागादिमीमांसकाःब्राह्मणग्रन्थाः प्रायेण गद्यात्मका एव भवन्ति। एतेषां ब्राह्मणग्रन्थानां विषया ऋक्-यजुः-सामाथर्वेभ्यःनितरां भिद्यते। ब्राह्मणग्रन्थानां प्रतिपाद्यस्य विधेः दशप्रकारा भवन्ति। यथोक्तम्-

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना।।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।

ऋग्वेदस्य द्वे ब्राह्मणे स्तः, 1. ऐतरेयब्राह्मणम्, 2. शांखायनब्राह्मणम्। ब्राह्मणेऽस्मिन् अष्टौ पंजिकाः सन्ति, तासु पंजिकासु पञ्च पञ्च अध्यायाः सन्ति। इदं सम्पूर्णं ब्राह्मणसाहित्यं गद्यात्मकमेवास्ति।

ब्राह्मणानां प्रतिपाद्यविषयस्य विवरणम्-

विधिः-यज्ञस्य अनुष्ठानोपदेश एव विधिरित्यभिधीयते। अज्ञातार्थज्ञापको वेदभागो विधिः।

तत्र विधिश्चतुर्विधः, 1. उत्पत्तिविधिः, 2. विनियोगविधिः, 3. अधिकारविधिः, 4. प्रयोगविधिश्चेति।

1. **उत्पत्तिविधिः**-तत्र कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिःयथा-" अग्निहोत्रं जुहोति" इति।
2. **विनियोगविधिः**-अंगप्रधानसम्बन्ध-बोधको विधिः विनियोगविधिः। यथा-" दध्ना जुहोति" इति। ज्ञातव्यमस्ति यत् मन्त्राणां विनियोगस्य प्रथमावतारो ब्राह्मणग्रन्थेषु समुपलभ्यते। " स नः पवस्व शङ्गवे" इत्यस्य मन्त्रस्य विनियोगः पशूनां रोगनिवृत्तये भवति।
3. **अधिकारविधिः**-कर्मजन्यफलस्वाम्यवबोधको विधिः अधिकारविधिः।
4. **प्रयोगविधिः**-प्रयोगप्राशुभावबोधकोविधिः प्रयोगविधिः।
5. **नियमविधिः**-नानासाधन-साध्य-क्रियायाम् एकसाधनप्राप्तौ अप्राप्तस्य अपरसाधनस्य प्रापको विधिः नियमविधिः। यथा-" यजेत स्वर्गकामः" इत्यादि।
6. **परिसंख्याविधिः**-उभयोः युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः। यथा-" पंच-पंचनखाः भक्ष्याः" इति।
7. **हेतुः**-येनहेतुना कर्मकाण्डविधिः विशेषरूपेण सम्पन्नो भवति, तस्य हेतोः निर्देशः एव हेतुः इत्यभिधीयते।
8. **निरुक्तिः**-ब्राह्मणग्रन्थेषु यत्र-तत्रसमागतानां विशिष्टानां पदानां निर्वचनमपि कृतमस्ति। निर्वचनमिदं मार्मिकं वैज्ञानिकञ्च भवति।
9. **अर्थवादः**-यज्ञेषु मेध्यपदार्थानां निन्दा एव अर्थवाद इति कथ्यते। यथा-" अमेध्या वै माषाः" इति। " वायुर्वै क्षेपिष्ठा देवता" इति।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम्।। मनु. 3/70

1. देवताध्यायब्राह्मणम्-ब्राह्मणग्रन्थे त्रयः खण्डाः सन्ति। प्रथमखण्डे देवतानां वर्णनं समुपलभ्यते। प्रथमखण्डस्य प्रथमकण्डिकायां सोमदेवानां नाम्ना निर्देशः अनेन प्रकारेण कृतोऽस्ति-अग्निः, इन्द्रः, प्रजापतिः, सोमः, वरुणः, त्वष्टा, अंगिराः, सरस्वती इत्यादिकाः देवास्ते सन्ति।
2. आर्षेयब्राह्मणम्-ब्राह्मणमिदं सामवेदस्य चतुर्थं ब्राह्मणमस्ति। अस्मिन् ब्राह्मणे त्रयः प्रपाठकाः द्वयशीतिखण्डाश्च सन्ति।
3. ऐतरेयब्राह्मणम्-ऐतरेयब्राह्मणम् अतीव प्रथितमस्ति ऋग्वेदीयब्राह्मणग्रन्थेषु।
4. शतपथब्राह्मणम्-शुक्लयजुर्वेदस्य माध्यन्दिनकाण्वशाखयोः इदं शतपथब्राह्मणं ब्राह्मणग्रन्थेषु सर्वाधिकमहत्त्वपूर्णं विशालं च अस्ति।

5. तैत्तिरीयब्राह्मणम्-कृष्णयजुर्वेदस्य एकमात्रे समुपलब्धे तैत्तिरीयाख्ये ब्राह्मणेऽस्मिन् त्रयः काण्डाः सन्ति।
6. ताण्ड्यमहाब्राह्मणम्-पंचविंशत्यध्यायात्मकमिदं ब्राह्मणं ताण्ड्यमहाब्राह्मणं पंचविंशब्राह्मणं वा कथ्यते।
7. गोपथब्राह्मणम्-गोपथब्राह्मणं तु अथर्ववेदस्य एकमात्र ब्राह्मणग्रन्थोऽस्ति।
8. सामविधानब्राह्मणम्-सामवेदस्योपलब्धेषु ब्राह्मणग्रन्थेषु विषयदृष्ट्या सामविधानब्राह्मणं नितरां भिन्नमस्ति।
9. ब्राह्मणग्रन्थानां वैशिष्ट्यं सामान्यं च दृग्गोचरी भवति तत्र ब्राह्मणग्रन्थानां मुख्यवैशिष्टयं तु यज्ञसम्पादनमेवास्ति। यज्ञस्य सूक्ष्मातिसूक्ष्मविधानमपि ब्राह्मणग्रन्थेषु विस्तारेण समुपलभ्यते।

(ञ) आरण्यकम् (Aranyakam)

अरण्याध्ययनादेतद् आरण्यकमितीर्यते।
अरण्ये तदधीयेतेत्येवं वाक्यं प्रचक्षते।।

सायणाचार्यस्य उपर्युक्तवचनानुसारेण अरण्ये पाठ्यत्वेन अस्य ग्रन्थस्य आरण्यकम् इति सार्थकमभिधानं वर्तते। यतः मन्त्राणां मननस्य सर्वश्रेष्ठस्थानम् अरण्यमेव भवति। कृष्णद्वैपायनेन लिखितमस्ति-"आरण्यकञ्च वेदेभ्यः औषधिभ्योऽमृतं यथा" प्राणविद्याप्रधान मन्त्रब्राह्मणात्मकः वेदांशः एव आरण्यकमिति संज्ञां लभते। ऐतरेयारण्यके समुल्लिखितमस्ति यत् "प्राण" एव ऋषिरूपःअस्ति, यथा-विश्वः मित्रं यस्य विश्वामित्रः। सर्वं पाप्मनः त्रायत इति अत्रिः। एतादृशः गृत्समदः, वामदेवः, वशिष्ठः, भरद्वाजः, इत्यादयः सर्वे प्राणरूपाः एव सन्ति।

1. ऐतरेयारण्यकम्-ऋग्वेदस्य ऐतरेयशाखानुवर्ती, ग्रन्थेऽस्मिन् ऐतरेयाण्यके पञ्चारण्यकानि सन्ति।
2. शांखायनारण्यकम्-पंचदशाध्यायात्मकस्यास्य शांखायनारण्यकस्य प्रथमद्वितीयाध्याययोः महाव्रतस्य वर्णनं विद्यते। तृतीयाध्यायतः षष्ठाध्यायपर्यन्तं कौषीतक्युपनिषद् कथ्यते। सप्तमाध्यायतः अष्टमाध्यायं यावत् संहितोपनिषद् वर्णितास्ति। इत्थंकौषीतक्युपनिषद्, संहितोपनिषद् च इमे द्वे उपनिषदे शांखायनारण्यकस्य एव अंगविशेषौ स्तः। नवमेऽध्याये प्राणविद्यायाः, दशमेऽध्याये आन्तर-अग्निहोत्रस्य विवेचनमुपलभ्यन्ते। एकादशेऽध्याये मृत्योरपसारकस्य विधानं, द्वादशेऽध्याये विल्वफलेन मणिनिर्माणस्य प्रक्रियायाः कालस्वरूपस्य च वर्णनं वर्त्तते। त्रयोदशचतुर्दशाध्याययोः जीवः ब्राह्मणोः ऐक्यप्राप्तेः जीवनस्य परमलक्ष्यरूपेण विवेचनमस्ति। पञ्चदशेऽध्याये आचार्यवरस्य शांखायनस्य वंशपरम्परायाः वर्णनमस्ति।
3. तैत्तिरीयारण्यकम्-कृष्णयजुर्वेदीये तैत्तिरीयारण्यके दश प्रपाठकाः सन्ति, येऽरण इति नाम्ना ज्ञायन्ते।

(ट) उपनिषद् (Upanisad)

उपनिषद् शब्दस्तु वेदान्तशब्देन पराविद्याशब्देन वा अभिधीयते। "वेदान्तो नाम उपनिषत्प्रमाणम्"

आचार्यवर: शंकर: प्राह-उप शब्दो हि सामीप्यमाह, नि शब्दश्च निश्चयार्थ:, तस्मादैकात्म्यं निश्चितम्। सा विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते। यद्यपि शताधिका: उपनिषद्ग्रन्था: वर्तन्ते तथापि उपनिषदां विषये दशसंख्या अतीव महत्त्वपूर्णा अस्ति, यथोतम्-

ईश-केन-कठ-प्रश्न-मुण्ड-मण्डूक्य-तित्तिर:।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।

1. ईशावास्योपनिषद्-

शुक्लयजुर्वेदसंहिताया: चत्वारिंशत्तमोऽध्याय:"ईशावास्यमिदं सर्वम्" इति मन्त्रेण प्रारभ्यते, अत: अध्यायोऽयम् ईशावास्योपनिषद् इत्युच्यते।

2.प्रश्नोपनिषद्-

अथर्ववेदस्य पिप्पलादशाखाया: उपनिषदियं प्रश्नानां समष्टिकारणात् प्रश्नोपनिषद् इत्युच्यते।

3. केनोपनिषद्-

"केनेषितं पतति प्रेषितं मन:" इति मन्त्रेण प्रारभ्यते इयमुपनिषद्। अस्यामुपनिषदि चत्वार: खण्डा: सन्ति। प्रथमखण्डे अष्टौ मन्त्रा:, द्वितीयखण्डे पञ्चमन्त्रा:, तृतीयखण्डे द्वादशमन्त्रा:तथा चतुर्थेखण्डे नवमन्त्रा: समुपलभ्यन्ते। अस्या: उपनिषद: सर्वत्र परमात्मन: शक्तिरनुसन्धेया मुमुक्षुभि: इति सारांश:।

4. तैत्तिरीयोपनिषद्-

तैत्तिरीयारण्यकस्य सप्तम-अष्टम-नवमखण्डानां सम्मिलितमभिधानं तैत्तिरीयोपनिषद् इति वर्तते। अस्याम् उपनिषदि तिस्रो वल्लयो भवन्ति, - शिक्षावल्ली, भृगुवल्ली, आनन्दवल्ली च।

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति,
यत् प्रयन्त्यभिसंविशन्ति, तद्विविजिज्ञासस्व तद्ब्रह्म" इति।

5. कठोपनिषद्-

कृष्णयजुर्वेदस्य कठशाखासम्बन्धे अस्याम् उपनिषदि द्वौ अध्यायौ स्त:। प्रत्यध्यायं तिस्र: तिस्रो वल्लय:सन्ति। नचिकेतोपाख्यानम् अत्र अतीव प्रसिद्धमस्ति। यम द्वारा बहुधा परीक्षितोऽपि ऐहिकामुष्मिक-फलभोगविराग सम्पन्न:शान्तोदान्त: नचिकेता आह, -

श्वोभावा मर्त्यस्य यदन्तकेतत्, सर्वेन्द्रियाणां जरयन्ति तेज:।
अपि सर्वं जीवितमल्पमेव, तवैव वाहास्तव नृत्यगीते।।

6. छान्दोग्योपनिषद्-

सामवेदस्य ताण्ड्यशाखाया: अष्टम: प्रपाठक:एव छान्दोग्योपनिषत्-शब्देन अभिधीयते। मधुविद्या-पुरुषविद्या-अग्निविद्या-प्राणविद्या-वैश्वानरविद्या-भूमाविद्या-आत्मविद्या-प्रभृतीनां-विद्यानां वर्णनम् अस्यामेव उपनिषदि समुपलभ्यते।

7. बृहदारण्यकोपनिषद्-

इयं बृहदारण्यकोपनिषद् न केवलं तत्त्वज्ञानदृष्ट्या अतीव प्रामाणिकी वर्तते, अपि तु आकारदृष्ट्यापि अतीवविशालास्ति। षडध्याय-समन्वितेऽस्मिन् उतनिषदग्रन्थे याज्ञवल्क्यस्य ब्रह्मविषयकं तत्त्वज्ञानमतीव विस्तरेण निरूपितमस्ति।

8. ऐतरेयोपनिषद्-

ऐतरेयाण्यकस्य चतुर्थादध्यायात् षष्ठाध्यायपर्य्यन्तस्यनामैतरेयोपनिषद् वर्तते। अस्यामुपनिषदि त्रय अध्याया: सन्ति।

9. मुण्डकोपनिषद्-

इयमुपनिषत् अथर्ववेदीया वर्तते। इयं मुण्डकनिमित्ताय निर्मिताऽस्ति। अस्यामेवोपनिषदि आयाति-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्य:पिप्पलं स्वाद्वति अनश्नन् चान्य: अभिचाकशीति।।

माण्डूक्योपनिषद्-इयमुपनिषदतीव लघ्वी वर्तते, परन्तु विषयोऽस्य वैशाल्यं नूनं बिभर्ति। अस्यामुपनिषदि केवलं द्वादश वाक्यानि सन्ति।

10. श्वेताश्वतरोपनिषद्-

इयमुपनिषत् कृष्णयजुर्वेदीया वर्तते। अस्यामुपनिषदि षडध्याया: सन्ति। अस्यामुपनिषदि जीवतत्त्वस्य, ब्रह्मतत्त्वस्य, प्रकृतितत्त्वस्य च वर्णनं सविस्तरं समुपलभ्यते। उपनिषद्वाक्यमहाकोशे 181 एकाशीत्युत्तरशतोपनिषदां वाक्यानि संगृहीतानि सन्ति।

(ठ) वैदिक-स्वरप्रक्रिया-

उदात्तानुदात्तस्वरिताणां वैदिकस्वराणां सत्ता, वैदिक-भाषाया: महती विशेषताऽस्ति।

अद्यपर्यन्तमुपलब्धेषु सर्वेषु संहिताग्रन्थेषु स्वरचिह्ना: संलग्ना: सन्ति। स्वराणां त्रिविधभेदा: भवन्ति। यथोक्तम्-

उदात्तश्चानुदात्तश्च स्वरितश्च त्रय स्वरा:।
आयाम-विश्रम्भाक्षेपैस्त उच्यन्ते स्वरास्त्रय:।।

वैदिकस्वर-रेखांकनम्-



(ङ) वेदानां रचनाकालः

ऋग्वेदस्य पुरुषसूक्तस्य अष्टममन्त्रस्यानुसारेण ऋगादीनां चतुर्णामपि वेदानाम् उत्पत्तिः सृष्ट्युत्पत्तिकाले एव सिद्ध्यति। ज्यौतिषगणनानुसारेण सृष्ट्युत्पत्तिकालादारभ्य अद्यावधि 2010 सौरवर्षाणि, तदनुसारेण 1, 95, 58, 035 वर्षाणि व्यतीतानि इति निश्चीयते।

1. मैक्समूलरमहोदयेन-ऋग्वेदस्य रचना 1150 ई.पू. समीपे जाता। बुद्धधर्मोदयात् प्रगेव च ब्राह्मणग्रन्था अपि व्यरच्यन्त। बुद्धेन ब्राह्मणग्रन्थेषु विवेचितानामेव यागविधीना कट्वी आलोचना क्रियते स्म, अपि च उपनिषत्समर्थितं कतिपयतत्त्वजातमात्मसात् क्रियते स्म, अतः बुद्धात् पूर्वतना(500 ई.पू.) एव ब्रह्मणोपनिषद्भागाः सम्भवन्ति। वैदिकसाहित्ये चत्वारि युगानि-छन्दोयुगम् , मन्त्रयुगम्, ब्राह्मणयुगम्, सूत्रयुगञ्च। प्रत्येकयुगविकासाय तेन 200 वर्षस्य कालखण्डःस्वीकृतः। अस्य मान्यता अस्ति यत् शाक्यमुनेः बुद्धात् 600 वर्षपूर्वमेव, अर्थात् 1200 ई0पूर्वमेव छन्दोयुगस्य अस्तित्वम् आसीत्। इत्थम् ऋग्वेदस्य रचनाकालः 1200+ 2010=3210 वर्षेभ्यः पूर्वमेव भवितुं शक्नोति।
2. डॉ. अविनाशचन्द्रदासमतम्- अयं महानुभावः वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्त्वानि विशेषतः आर्यावर्त्ततश्चतुर्दिक्षु चतुः समुद्रीस्थितिमाधारीकृत्य गणनाद्वारा वेदस्य समयं 25 सहस्रसंवत्सरपूर्वं मन्यते। इदमीयं मतं "ऋग्वैदिक इण्डिया" (Rigvedic India) नामके पुस्तके व्यक्ततयाऽनेन प्रतिपादितम्।
3. बाल-गंगाधर-तिलकमतम्-वैदिककालविषयकःसिद्धान्तः अपि ज्यौतिषशास्त्रमेव अनुसरति। महापुरुषोऽयं स्वीकरोति यत् ऋग्वैदिकमन्त्राणां रचनाकालः 4000 B.C. इत्यारभ्य 6000 B.C. यावत् प्राचीनः भवितुं शक्नोति। तिलकमहोदयेन वैदिककालश्चतुर्धा विभक्तः-
   1. अदितिकालः-6000 ई0 पूर्वतः 4000 पूर्व पर्यन्तम्।
   2. मृगशिरःकालः-4000 ई0 पूर्वत:2500 ई0पूर्व पर्यन्तम्।
   3. कृत्तिकाकालः-2500 ई0 पूर्वतः 1400 ई0 पूर्व पर्यन्तम्।
   4. अन्तिमःकालः-1400 ई0 पूर्वतः 500 ई0 पूर्व पर्यन्तम्।
4. वेबर-महोदयस्य मतम्-History of India Literature नामक पुस्तके कथितं यत्-वेदाः 1500 B.C.इति मन्यते।
5. जैकोबी महोदयस्य मतम्-अनेन महोदयेन ऋग्वेदस्य मण्डूकसूक्तस्य ऋचाम् अधिकृत्य ज्योतिषगणनानुसारेण वैदिकरचनाकालः 2500 B.C. इति मन्यते।
6. पं. शंकर-बालकृष्ण दीक्षितस्य मतम्-अनेन महोदयेन ज्यौतिषगणनया शतपथब्राह्मणस्य रचनाकालः 3000 B.C. इति स्वीकरोति। शतपथब्राह्मणादपि प्राचीनतरः ऋग्वेदः तस्य मते 3500 B.C. इति भवितुं शक्यते।
7. विन्टरनित्ज महोदयस्य मतम्-वैदिकभाषायाः पारस्परिकतुलनात्मकअध्ययनेन ऋग्वेदस्य रचनाकालः 4500 इत्यारभ्य 6000 इति कालस्य मध्यवर्ती कालखण्डः स्वीकृतः।

8. वेदस्थितज्यौतिषतत्त्वाधारं मतम्- भारते षड् ऋतवो भवन्ति। अमी ऋतव:सूर्यसंक्रमण-निमित्तका:। इदमपि प्रसिद्धं यत् प्राचीनकालादधुनापर्यन्तममी ऋतव:पश्चात्सर्पन्ति। वेदोक्तज्यौतिषतत्त्वानुसारेण वेदानां 2500 ई०पू० पूर्वकालिकता प्रतीता भवन्ति।

9. शिलालेखस्य समय:-वैदिकरचनाकाल: शिलालेखस्य आधारोपरि 2000 ई. पू. सिद्ध्यति। अयं कालनिर्णय:तिलकस्य मतं सन्निकृष्टं करोति।

संस्कृतवाङ्मये वेदानां रक्षणार्थं षट्शास्त्राणि अङ्गभूतानि सन्ति-

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि वेदास्याहुर्मनीषिण:।।

"वेद" इति शब्द: "विद्ज्ञाने" , विद् सत्तायाम्" , "विदलृ लाभे" , "विद् विचारणे"

इत्येतेभ्य: चतुर्भ्य धातुभ्यो निष्पन्नोऽस्ति। प्रधानतया वेदो द्विविध:मन्त्ररूप:(संहिता) ब्राह्मणरूपश्चेति। पुन: ब्राह्मण: त्रिधा विभज्यते। तद्यथा-ब्राह्मणम्, आरण्यकम्, उपनिषत् चेति। पुन: वेदस्य बहव: विभागा: भवन्ति। वेदस्य अङ्गानि वेदाङ्गानि। अङ्ग्यन्ते ज्ञायन्ते एभिरिति अङ्गानि।

षड् वेदाङ्गानि सन्ति-1. शिक्षा, 2. व्याकरणम्, 3. छन्द:, 4. निरुक्तम्, 5. ज्योतिषम्, 6. कल्प:।

(ढ) प्रातिशाख्यवेदांगम्-

पदप्रकृतानि प्रातिशाख्यानि, एतदतिरिक्तं प्रातिशाख्य ग्रन्थेषु, शिक्षा-व्याकरण-छन्दसां नियमा: विवेचिता: सन्ति। कस्या: शाखाया: नियमविशेष:क:, इति प्रदर्शनम् एव प्रातिशाख्य-ग्रन्थानां प्रयोजनमस्ति। अर्थात् शिक्षा-व्याकरण-छन्दसां समाहार: एव प्रातिशाख्यग्रन्थ:। इमे प्रातिशाख्या: संहिताभेदेन शाखाभेदेन वा विभिन्ना: वर्तन्ते।

यथा- ऋग्वेदस्य ऋक्प्रातिशाख्यम्, यजुवेदस्य वाजसनेयिप्रातिशाख्यम्, तैत्तिरीयप्रातिशाख्यम्, सामवेदस्य ऋक्तन्त्रम्, पुष्यसूत्रप्रातिशाख्यम् तथा अथर्ववेदस्य शौनकीया प्रातिशाख्यम्, अथर्ववेदप्रातिशाख्यश्चेति सुप्रसिद्धा: प्रातिशाख्यग्रन्था: सन्ति।

1. **समानाक्षराणि-"अष्टौ समानाक्षराण्यादित:।"** अर्थात् वर्णमालाया: आदित: आरम्भ वर्णसमाम्नायस्य अष्टावक्षराणि समानाक्षरसंज्ञकानि भवन्ति। अर्थात् अ, आ, इ, ई, उ, ऊ, ऋ, ॠ इमानि अष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्ति। अत्र उव्वटेन कथितम्- "समानाक्षरसंस्थाने।" अर्थात् समानस्थानीयौ समानवर्णौ दीर्धतां प्राप्नुवन्ति।
2. **सन्ध्यक्षराणि-"ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि"।** यथोक्तम् आचार्यवरेण उव्वटेन-सामानाक्षरेभ्य: उत्तराणि चत्वारि अक्षराणि सन्ध्यक्षरसंज्ञकानि भवन्ति। अर्थात्, ए, ऐ, ओ, औ, एतानि चत्वारि सन्ध्यक्षराण्युच्यन्ते।।
3. **अघोषा:-"अन्त्या: सन्त तेषामघोषा:।"** अर्थात्, श, ष, स, ॅक, ॅप, अघोषसंज्ञका: सन्ति।
4. **सोष्मा:-"युग्मौ सोष्माणौ"** वर्गे वर्गे च द्वितीय-चतुर्थौ वर्णौ सोष्माणौ वेदितव्यौ।

5. **स्वरभक्तिः**-स्वरभक्तिस्तु पूर्ववर्ती रेफेन लकारेण वा सम्बद्धा भवति, यथोक्तं- **"स्वरभक्तिः पूर्वभागमक्षरांगम्।"** सा स्वरभक्तिः पूर्वं रेफं लकारं वा भजते। सा द्विविधा-दीर्धस्वरभक्तिः, ह्रस्वस्वरभक्तिश्च।

6. **यमाः**-"स्पर्शा यमानुनासिकाः स्वान्परेषु स्पर्शेष्वनु नासिकेषु।" इमे यमाःचतुर्विधाः भवन्ति।
   1. अघोषाल्पप्राणाः-कँ, चँ, टँ, तँ, पँ। 2. अघोष-महाप्राणाः-खँ, छँ, ठँ, थँ, फँ।
   3. सघोषाल्पप्राणाः-गँ, जँ, डँ, दँ, बँ। 4. सघोषमहाप्राणाः-घँ, झँ, ढँ, धँ, भँ।

7. **रक्ता-"रक्तसंज्ञोऽनुनासिकः"**। अर्थात् अनुनासिकवर्णाः रक्तसंज्ञकाः भवन्ति। यथा- ङ्, ञ्, ण्, न्, म्, इमे अनुनासिकवर्णाः रक्तसंज्ञकाः सन्ति।

8. **संयोगः**-द्वयोः व्यञ्जनवर्णयोः सन्निपात एव "संयोग" इत्युच्यते।

9. **प्रगृह्यः**-सम्बोधनात्मकपदस्य अन्ते विद्यमानस्य ओकारस्य प्रगृह्यसंज्ञा भवति।

10. **रेफितः**-**"ऊष्मारेफौ पञ्चमो नामिपूर्वः।"** अर्थात् स्वरवर्ण

1. वेदाः

(ण) वैदिकसाहित्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्नः-कति वेदाः सन्ति, के च ते?
   उत्तरम्-चत्वारो वेदाः, 1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदः, 4. अथर्ववेदः।
2. प्रश्नः-वेदानां कति संहिताः सन्ति?
   उत्तरम्-चत्वारि- ऋग्यजुःसामाथर्वभेदात्।
3. प्रश्नः-वेदस्य का परिभाषा?
   उत्तरम्-"मन्त्रब्राह्मणयोर्वेदनामधेयम्"। इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकम् उपायं यो ग्रन्थो वेदयति स वेदः।
4. प्रश्न-"वेदत्रयी" इत्यस्य किं तात्पर्यम्?
   उत्तरम्- 1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदश्च।
5. प्रश्न-पद्यात्मको वेदः कः?
   उत्तरम्- ऋग्वेदः।
6. प्रश्नः-वैदिकसाहित्यं कति विधं विभज्यते? के च ते?
   उत्तरम्-चतुर्विधं विभज्यते, 1. वेदानां संहिताः, 2. ब्राह्मणग्रन्थाः, 3. आरण्यकग्रन्थाः, 4. उपनिषद्ग्रन्थाः।
7. प्रश्नः-वेदे मुख्यतया कति छन्दांसि प्रयुक्तानि सन्ति? तानि कति प्रमुखानि?
   उत्तरम्-चतुर्दश(14) छन्दांसि प्रयुक्तानि सन्ति, किञ्च सप्त(7) एव प्रमुखानि। तत्र वर्णवृत्तानामेव प्रयोगः न तु मात्रिकवृत्तानाम्।

छन्दः	प्रथमपादः	द्वितीयपादः	तृतीयपादः	चतुर्थपादः	पञ्चमपादः	वर्णसंख्या
1. गायत्री	8	8	8			24
2. उष्णिक्	8	8	12			28
3. अनुष्टुप्	8	8	8	8		32
4. बृहती	8	8	12	8		36
5. पंक्तिः	8	8	8	8	8	40
6. त्रिष्टुप्	11	11	11	11		44
7. जगती	12	12	12	12		48

8. प्रश्नः-वेदेषु कति स्वराः? के च ते?
   उत्तरम्- त्रयः स्वराः, 1. उदात्तः, 2. अनुदात्तः, 3. स्वरितः।
9. प्रश्नः-वेदेषु कति विकृतयः?के च ते?
   उत्तरम्- अष्ट विकृतयः, 1. जटा पाठः, 2. माला, 3. शिखा, 4. रेखा, 5. ध्वजः, 6. दण्डः, 7. रथः, 8. घनः।
10. प्रश्नः-वेदानां कियत्यः ऋत्विजः सन्ति?
    उत्तरम्-चत्वारः, 1. ऋग्वेदः-होता, 2. यजुर्वेदः--अध्वर्युः, 3. सामवेदः-उद्गाता, 4. अथर्ववेदः-ब्रह्मा।
11. प्रश्नः-सर्वेषां वेदानां कियत्यः शाखाः सन्ति?
    उत्तरम्-एकत्रिंशदधिकएकादशशतानि(1131) शाखाः।
12. प्रश्नः- वर्तमानकाले कियत्यः शाखाः उपलब्धाः?
    उत्तरम्-(12) द्वादश शाखाः उपलब्धाः।
13. प्रश्नः-वेदः इत्यत्र कः प्रत्ययः?
    उत्तरम्- विद् घञ् प्रत्ययः। (विद् ज्ञाने-ज्ञान प्राप्तिः करणम्)
14. प्रश्नः-सम्प्रति कति वेदाः वर्तन्ते?
    उत्तरम्-चत्वारो वेदाः।
15. प्रश्नः-प्राचीनतमः वेदः कः?
    उत्तरम्- ऋग्वेदः।
16. प्रश्नः-कस्य वेदस्य कः उपवेदः, के च ऋषयः इति निर्दिशत-?
    उत्तरम्-1. ऋग्वेदस्य आयुर्वेदः (अग्निऋषिः) , 2. यजुर्वेदस्य धनुर्वेदः(वायुऋषिः), 3. सामवेदस्य गान्धर्ववेदः(आदित्यऋषिः) , 4. अथर्ववेदस्य अर्थवेदः(अंगिराऋषिः)।
17. प्रश्नः-कस्य वेदस्य "ऋत्विक्" कः इति दर्शयत?
    उत्तरम्-ऋग्वेदस्य होता, यजुर्वेदस्य अध्वर्युः, सामवेदस्य उदगाता, अथर्ववेदस्य ब्रह्म।
18. प्रश्न-"गोपथब्राह्मणम्" इति कस्य वेदस्य ग्रन्थः?
    उत्तरम्- अथर्ववेदस्य।
19. प्रश्न-"प्रातिशाख्यम्" केन रूपेणावगन्तव्यम्?
    उत्तरम्- वैदिकव्याकरणरूपेण।

20. प्रश्नः-"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्" उक्तिरियं कस्यां सूक्तौ विद्यते?
उत्तरम्-संज्ञानसूक्तौ।
21. प्रश्नः-"विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्" इतीयं सूक्तिः कस्य वेदस्य?
उत्तरम्- ऋग्वेदस्य।
22. प्रश्नः-शं नः कुरु प्रजाभ्यः- इतीयं सूक्तिः कस्य वेदस्य?
उत्तरम्- यजुर्वेदस्य।
23. प्रश्नः-"सर्वाः आशाः मम मित्रं भवन्तु" इति अयं वेदो वदति?
उत्तरम्-अथर्ववेदः।
24. प्रश्नः-"माता भूमिः पुत्रोऽहं पृथिव्याः" -इति को वेदो वदति?
उत्तरम्- अथर्ववेदः।
25. प्रश्नः-उपनिषदां संख्या प्रसिद्धा का?
उत्तरम्- दश।
26. प्रश्नः-प्रस्थानत्रयम् किम्?
उत्तरम्- 1. उपनिषद्, 2. गीता, 3. ब्रह्मसूत्राणि।
27. प्रश्नः-आयुर्वेदस्यायं प्रवर्त्तकः?
उत्तरम्- धन्वन्तरिः।
28. प्रश्नः-कौटिल्यार्थशास्त्रमनेन सम्बद्धमस्ति-?
उत्तरम्- राजनीत्या।
29. प्रश्नः-"विद्ययाऽमृतम श्नुते" इति केन सह सम्बन्धितः?
उत्तरम्- ईशोपनिषदा।
30. प्रश्नः-"शुल्वसूत्रं" किम्?
उत्तरम्- वेदिकायाः निमाणकं ग्रन्थम्।
31. प्रश्नः-चतुर्णामपि वेदानां "भाष्यम्" कस्य नाम्ना प्रसिद्धम्?
उत्तरम्- सायणभाष्यम्।
32. प्रश्नः-वेदः शब्दस्य अर्थमभिलक्ष्य सायणाचार्येण किमुक्तम्?
उत्तरम्- अपौरुषेयवाक्यं वेदः।
33. प्रश्नः-"वेदत्रयी" पदेन किं गृहीतः?
उत्तरम्- 1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदश्च,
34. प्रश्नः-उत्कृति-छन्दे प्रतिपदं कति वर्णाः प्राप्यन्ते?
उत्तरम्- (104)
35. प्रश्नः-प्रतिपदं 100 अक्षराणि कुत्र समुपलभ्यन्ते?
उत्तरम्- अभिकृतौ।
36. प्रश्नः-संस्कृतौ प्रतिपदं कति अक्षराणि दृश्यन्ते?
उत्तरम्- 96 अक्षराणि।

37. प्रश्नः-विकृतौ प्रतिपदं कति अक्षराणि उपलभ्यन्ते?
उत्तरम्- 92 अक्षराणि।
38. प्रश्न-वैदिकच्छन्देषु "88" अक्षराणि कुत्र भवन्ति?
उत्तरम्- आकृतिः।
39. प्रश्नः-"84" अक्षराणि प्रतिपदं कुत्र भवन्ति?
उत्तरम्- प्रकृतिः।
40. प्रश्न-प्रतिपदं 52 अक्षराणि कुत्र प्रद्योतयति?
उत्तरम्- अतिजगती।
41. प्रश्नः-"56" अक्षरैः विनियमितः छन्दविशेषः कः?
उत्तरम्- शक्वरी।
42. प्रश्नः-"अतिशक्वरी" इत्यत्र प्रतिपदं कति अक्षराणि भवन्ति?
उत्तरम्- 60 अक्षराणि।
43. प्रश्नः-"64" अक्षरैः नियमितः वैदिकच्छन्दविशेषः कः?
उत्तरम्- अष्टिः।
44. प्रश्नः-"अत्यष्टिः" प्रतिपदं कति अक्षरैः विलसति?
उत्तरम्- 68 अक्षराणि।
45. प्रश्नः-"धृतौ" प्रतिपदं कति अक्षराणि भवन्ति?
उत्तरम्- 72 अक्षराणि।
46. प्रश्नः-"अतिधृतौ" प्रतिपदं काः अक्षरसंख्याः भवन्ति?
उत्तरम्- (76)
47. प्रश्नः-संहितायां विकृतपाठेषु कति प्रकाराः प्राप्यन्ते?
उत्तरम्- (08) अष्ट।
48. प्रश्नः-नासदीयसूक्तस्य प्रकृतिः कीदृगस्ति?
उत्तरम्- दार्शनिकी।
49. प्रश्नः- "कामस्तदग्रे समवर्ततादि" मन्त्रोऽयं कस्मिन् सूक्ते वर्तते?
उत्तरम्- नासदीयसूक्ते।
50. प्रश्नः-"नासदासीन्नो सदासीत्तदानीम्" इति मन्त्रः कस्मिन् सूक्ते प्राप्यते?
उत्तरम्- नासदीयसूक्ते।
51. प्रश्नः-तिलक-महोदयस्य मते इन्द्रस्य प्रतीकः कः?
उत्तरम्- सूर्यः।
52. प्रश्नः-यास्कमतानुसारेण वृत्रस्य प्रतीकभूतः कः?
उत्तरम्- मेघः।
53. प्रश्नः-"याति देवः प्रवता यात्युद्वता। याति शुभ्राभ्यां यजतो हरिभ्याम्" इति मन्त्रेण सम्बद्धःकः?
उत्तरम्- सविता।

54. प्रश्नः-"दस्रा" इति उपाधिना उपहितः दैवतः कः?
उत्तरम्- अश्विनौ।
55. प्रश्नः-गायत्री-मन्त्रस्य उपास्य देवता का?
उत्तरम्- सविता।
56. प्रश्नः-सोमाद् अधिकं मधुम् ईहते?
उत्तरम्- अश्विन्।
57. प्रश्नः-सूर्यस्य माता का अस्ति?
उत्तरम्- उषा।
58. प्रश्नः-"दिव्यभिषक्" इत्युपाध्युपहितः दैवतः कः?
उत्तरम्- अश्विनौ।
59. प्रश्नः-यास्कमतानुसारेण स्थानभेदेन कति विधाः देवताः?
उत्तरम्- त्रिविधाः।
60. प्रश्नः-भुज्योः समुद्धर्ता कः?
उत्तरम्- अश्विन्।
61. प्रश्नः-ऋजाष्वाय नेत्रप्रदाता कः?
उत्तरम्- अश्विन्।
62. प्रश्नः-"पवमान" इत्युपाध्युपहितः कः?
उत्तरम्- सोमः।
63. प्रश्नः-"सद्यो जंघामायसीं विश्पलायै" इति मन्त्रांशेन सम्बद्धः कः?
उत्तरम्- अश्विन्।
64. प्रश्नः-"मौञ्जवत्" इति कस्य विशेषणमस्ति?
उत्तरम्- सोमस्य।
65. प्रश्नः-वज्रिन्-विशेषण-विशिष्टः कः?
उत्तरम्- इन्द्रः।
66. प्रश्नः-बृत्रहन्ता कः?
उत्तरम्- इन्द्रः।
67. प्रश्नः-रुद्रस्य निवासस्थानं कुत्र अस्ति?
उत्तरम्- अन्तरिक्षलोके।
68. प्रश्नः-"सोमपा" कस्य विशेषणमस्ति?
उत्तरम्- इन्द्रस्य।
69. प्रश्नः-प्रातः-सायंकालयोः सम्बद्धः कः?
उत्तरम्- सविता।
70. प्रश्नः-"अहन्नहिं पर्वते शिश्रियाणं" इति मन्त्रेण सम्बद्धः कः?
उत्तरम्- इन्द्रः।

71. प्रश्नः-"नासत्या" विशेषणेन विशिष्टः कः?
उत्तरम्- अश्विनौ।
72. प्रश्नः-गुहानिरुद्धस्य अत्रेः समुद्धर्ता कः?
उत्तरम्- अश्विन्।
73. प्रश्नः-पुराणी युवती का?
उत्तरम्- उषस्।
74. प्रश्नः-युगल-देवता कः अस्ति?
उत्तरम्- अश्विनौ।
75. प्रश्नः-उषा-देवता-सम्बद्धलोकविशेषः कः?
उत्तरम्- द्युलोकः।
76. प्रश्नः-"विश्ववारा" का अस्ति?
उत्तरम्- उषस्।
77. प्रश्नः-कति वेदाङ्गानि सन्ति?
उत्तरम्- (06) षड्।
78. प्रश्नः-"मन्त्रब्राह्मणयोर्वेदनामधेयम्" कस्येयमुक्तिः?
उत्तरम्- सायणः।
79. प्रश्नः-शाबरभाष्यानुसारेण ब्राह्मणग्रन्थानां प्रतिपाद्यविषयाः कतिविधयः?
उत्तरम्- (10) दश।
80. प्रश्नः-ऐतरेयब्राह्मणे कति अध्यायाः विद्यन्ते?
उत्तरम्- (40) चत्वारिंशत्।
81. प्रश्नः-"चरैवेति" इति वाक्यांशेन सम्बद्धःग्रन्थःकः?
उत्तरम्- ऐतरेयब्राह्मणम्।
82. प्रश्नः-कौषीतकिब्राह्मणे कति अध्यायाः सन्ति?
उत्तरम्-(30) त्रिंशतिः।
83. प्रश्नः-राजसूययागः शतपथब्राह्मणस्य कस्मिन् काण्डे उपलभ्यते?
उत्तरम्- पंचमकाण्डे।
84. प्रश्नः-ताण्ड्यमहाब्राह्मणस्य प्रमुखप्रतिपाद्यविषयः कः?
उत्तरम्- सामः सोमयागश्च।
85. प्रश्नः-वत्स-मेधातिथेः आख्यायिका कस्मिन् ब्राह्मणे समुपवर्णिताऽस्ति?
उत्तरम्- ताण्ड्यमहाब्राह्मणे।
86. प्रश्नः-षड्विंशब्राह्मणे कति प्रपाठकाः सन्ति?
उत्तरम्- (05) पञ्च।
87. प्रश्नः-सामविधानब्राह्मणे कति प्रकरणानि सन्ति?
उत्तरम्-(03) त्रीणि।

88. प्रश्नः-आर्षेयब्राह्मणे कति प्रपाठकाः सन्ति?
उत्तरम्-(03) त्रयः।
89. प्रश्नः-गोपथब्राह्मणस्य विभागसंख्या अस्ति?
उत्तरम्- (02) द्वे।
90. प्रश्नः-सम्पूर्णे गोपथब्राह्मणे कति प्रपाठकाः सन्ति?
उत्तरम्-(11) एकादश।
91. प्रश्नः-"अरण्याध्ययनादेतद् आरण्यकम्" इति कस्येयमुक्तिः?
उत्तरम्- सायणस्य।
92. प्रश्नः-"सर्वा ऋचःसर्वे वेदाःसर्वे घोषःएकैव व्याहृतिः प्राण एव प्राण" इत्यनेन वाक्येन सम्बद्धः आरण्यक-ग्रन्थः कः?
उत्तरम्- ऐतरेयारण्यकम्।
93. प्रश्नः-"कश्यपः पश्यको भवति। यत् सर्वं पश्यतीति सौक्ष्म्यात्" वाक्यमिदं केनारण्यकेन सम्बद्धमस्ति?
उत्तरम्- तैत्तिरीयारण्यकम्।
94. प्रश्नः-तवलकारारण्यके कति अध्यायाः सन्ति?
उत्तरम्-(04) चत्वारः।
95. प्रश्नः-"अथा अर्धो वा एष आत्मनःयत् पत्नी" वाक्यमिदं केनारण्यकेन सम्बद्धमस्ति?
उत्तरम्- तैत्तिरीयारण्यकेन।
96. प्रश्नः-नचिकेतसः पित्राकृतः यागविशेषः कः?
उत्तरम्- विश्वजित्याग:।
97. प्रश्नः-पवमानसूक्तस्य देवता कोऽस्ति?
उत्तरम्- सोमः।
98. प्रश्नः-वैदिककालनिर्णये ज्योतिषशास्त्रस्योपयोगः केन कृतः?
उत्तरम्- तिलकेन।
99. प्रश्नः-"जलाष" इति कस्य विशेषणम्?
उत्तरम्- रुद्रस्य।
100. प्रश्नः-को नाम देवः द्युस्थानीयः?
उत्तरम्- सूर्यः।
101. प्रश्नः-हरिश्चन्द्रोपाख्यानं कस्मिन् ब्राह्मणे उपलभ्यते?
उत्तरम्- ऐतरेयब्राह्मणे।
102. प्रश्नः-ब्राह्मणग्रन्थेषु किं निरूपितो भवति?
उत्तरम्-यज्ञानुष्ठानस्य पद्धत्या सह फलप्राप्तिः तत् विधेः निरूपणञ्च।
103. प्रश्नः-वेदानां कौ द्वौ भेदौ?
उत्तरम्- संहिता ब्राह्मणञ्च(वेदो हि मन्त्रब्राह्मणभेदेन द्विविधः।)

104. प्रश्नः-संहिता कां कथ्यते?
उत्तरम्- वेदस्य मन्त्रभागं संहिता कथ्यते।
105. प्रश्नः-आरण्यकब्राह्मणयोर्मध्ये को भेदः?
उत्तरम्- आरण्यके संहितापरकविवेचनमस्ति, तथा ब्राह्मणे संहितापरकभाष्यम्।
106. प्रश्नः-ब्राह्मणग्रन्थानां कियती संख्या अस्ति?
उत्तरम्-(13 त्रयोदश)
107. प्रश्नः-"वेदत्रयी" इत्यस्य संहिता कस्य घटकस्य प्रतीको भवति?
उत्तरम्- 1. ऋग्वेदस्य-शरीरम्, 2. यजुर्वेदस्य-मनः, 3. सामवेदस्य-बुद्धिः।
108. प्रश्नः-अथर्ववेदः कस्य घटकस्य प्रतीकः वर्तते?
उत्तरम्- आत्मायाः।
109. प्रश्नः-संहिताचतुष्टयस्य संकलनकर्ता कः?
उत्तरम्- महर्षि वेदव्यासः।
110. प्रश्नः-ऋत्विज-शब्दस्य कोऽर्थः?
उत्तरम्- यज्ञकर्ता (होता)
111. प्रश्नः-वेदस्य के त्रयो विभागः?
उत्तरम्- 1. संहिता, 2. ब्राह्मणम्, 3. आरण्यकम्।
112. प्रश्नः-उपनिषद् इत्यस्य अपरनाम किम्?
उत्तरम्- "वेदान्तः।"
113. प्रश्नः-प्रतिपादित-विषयस्य दृष्ट्या वेदस्य के विभागाः?
उत्तरम्- द्वौ, 1. कर्मकाण्डम्, 2. ज्ञानकाण्डम्।
114. प्रश्नः-महाभाष्यानुसारं वेदानां कियत्यः शाखाः सन्ति?
उत्तरम्-1.ऋग्वेदस्य-21 शाखाः, 2. यजुर्वेदस्य-100शाखाः, 3. सामवेदस्य-1000 शाखाः, 4. अथर्ववेदस्य-09 शाखाः।
115. प्रश्नः-यज्ञः साक्षात् कस्य रूपं वर्तते?
उत्तरम्- विष्णोः।
116. प्रश्नः-"मुक्तिकोपनिषद्" इति आधृत्य उपनिषदानां कियती संख्या?
उत्तरम्-(102)
117. प्रश्नः-"सूत्रग्रन्थः" कति भागेषु विभक्तोऽस्ति?
उत्तरम्- चत्वारः, 1. श्रौतसूत्रम्, 2. गृह्यसूत्रम्, 3. धर्मसूत्रम्, 4. शुल्वसूत्रम्।
118. प्रश्नः-रेखागणितं कुत्र प्राप्नोति?
उत्तरम्- शुल्वसूत्रे।
119. प्रश्नः-को वेद विभाजकः?
उत्तरम्- वेद-व्यासः।
120. प्रश्नः-गद्यात्मको वेदः कः?
उत्तरम्- शुक्ल-यजुर्वेदः।

121. प्रश्नः-को वेदो गद्यपद्यात्मकः?
उत्तरम्- कृष्ण-यजुर्वेदः।
122. प्रश्नः- यज्ञानुष्ठानेन सम्बद्धो वेदः कः?
उत्तरम्- यजुर्वेदः।
123. प्रश्नः-"मन्त्रब्राह्मणौ" कस्यार्थौ भवतः? श
उत्तरम्- वेदस्य।
124. प्रश्नः- कति वेदाङ्गानि, कानि च तानि?
उत्तरम्-(6 षड्वेदाङ्गानि) 1. शिक्षा, 2. कल्पः, 3. व्याकरणम्, 4. निरूक्तम्, 5. छन्दः, 6. ज्योतिषम्।
125. प्रश्नः- वेदाङ्गानां कानि महत्त्वानि?
उत्तरम्- वेदज्ञानस्य प्राप्त्यर्थं वेदाङ्गाध्ययनस्य विशिष्ट-महत्त्वमस्ति।
126. प्रश्नः- शिक्षा वेदाङ्गस्य किम् उद्देश्यम्?
उत्तरम्- वैदिक-ऋचाणामुच्चारण-विशेषोद्देश्यम्।
127. प्रश्नः- शिक्षयाः का उपमा प्रदीयते?
उत्तरम्- शिक्षा घ्राणं तु वेदस्य।
128. प्रश्नः- ऋग्वेदेन सम्बन्धित-शिक्षाग्रन्थाः के सन्ति?
उत्तरम्- 1. शौनकीयशिक्षा, 2. वाशिष्ठशिक्षा, 3. पाणिनीयशिक्षा।
129. प्रश्नः- कस्य वैयाकरणस्य शिक्षा सर्वैः वेदैः सम्बद्धा मन्यन्ते?
उत्तरम्- पाणिनिशिक्षा।
130. प्रश्नः- शुक्लयजुर्वेदस्य कः शिक्षग्रन्थः प्रसिद्धतमः?
उत्तरम्- याज्ञवल्क्यशिक्षाग्रन्थः।
131. प्रश्नः- कृष्णयजुर्वेदस्य कः शिक्षाग्रन्थः उपलभ्यते?
उत्तरम्- 1. भरद्वाजशिक्षा(संहिता शिक्षा) 2. व्यासशिक्षा।
132. प्रश्न- सामवेदस्य शिक्षाग्रन्थाः के सन्ति?
उत्तरम्- 1. नारदीयशिक्षा, 2. गौतमीशिक्षा, 3. लोमशशिक्षा।
133. प्रश्नः- अथर्ववेदस्य शिक्षाग्रन्थः कोऽस्ति?
उत्तरम्- माण्डूकी शिक्षा।
134. प्रश्न- वर्तमानकाले कियन्ति प्रातिशाख्यानि उपलभ्यन्ते?
उत्तरम्- 5 पञ्च, 1. ऋक्, 2. तैत्तिरीय, 3. वाजसनेयि, 4. सामाथर्व, 5. प्रातिशाख्यानि।
135. प्रश्न- वैदिकसाहित्ये त्रैलोक्यशब्देन के गृह्यन्ते?
उत्तरम्- 1. पृथिवी, 2. आन्तरिक्षः, 3. स्वर्गः।
136. प्रश्न- "अश्विनौ" इत्यस्य सम्बन्धः केन स्थानेन वर्तते?
उत्तरम्- द्युलोकेन।
137. प्रश्न-युगल-देवता का ?
उत्तरम्- अश्विनौ।

138. प्रश्नः-महाभाष्ये वेदविषये किमुक्तमस्ति?
उत्तरम्- ब्राह्मणेन निष्कारणो धर्मःषडङ्गो वेदोऽध्येयो ज्ञेयश्च।
139. प्रश्न-"ऋतावरी" कस्यै देवतायै प्रयुक्तो भवति?
उत्तरम्- उषस्।
140. प्रश्न-"दुहिता दिवः" कस्यै देवतायै प्रयुक्तो भवति?
उत्तरम्- उषस्।
141. प्रश्न-का देवता सूर्यस्य पत्नी तथा माता इति कथ्यते?
उत्तरम्- उषस्।
142. प्रश्न-षोड्श संस्काराणां वर्णनं कस्मिन् कल्पसूत्रे विद्यते?
उत्तरम्- गृह्यसूत्रे।
143. प्रश्न-यज्ञवेदी-निर्माणेन सम्बद्धं सूत्रं किम्?
उत्तरम्- शुल्बसूत्रम्।
144. प्रश्न-कौषीतकि गृह्यसूत्रस्य प्रारम्भिक-संस्कारः कः? विवाह-संस्कारः।

2. ऋग्वेदः-The first of the four Vedas.

(त) ऋग्वेदस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्नः-"ऋग्वेदस्य का परिभाषा?
उत्तरम्- स्वरूपं ऋच्यते स्तूयतेऽनया इति ऋक्। अर्थात् मन्त्रः।
2. प्रश्नः-"तिसृणां संहिता कस्य घटकस्य प्रतीकः?
उत्तरम्- ऋक्-शरीरम्, यजुः-मनस्, साम-बुद्धिः,
3. प्रश्नः-"विश्वस्य आदिग्रन्थः ऋग्वेदस्य आद्यक्षरं किम्?
उत्तरम्-"अ"
4. प्रश्नः-"ऋक् संहितां काभ्यां द्वाभ्यां क्रमाभ्यां विभक्तःकृतःस्यात्?
उत्तरम्- मण्डलमेवमष्टकक्रमाभ्याम्।
5. प्रश्नः-"मण्डलक्रमानुसार-ऋग्वेदे कति मण्डलानि सन्ति?
उत्तरम्- दश-(10)
6. प्रश्नः-"प्रत्येक-मण्डलं केषु विभक्तः कृतः स्यात्?
उत्तरम्- सूक्तेषु।
7. प्रश्नः-"ऋक्संहितां कति अष्टकेषु विभाजितः?
उत्तरम्- अष्ट (8)
8. प्रश्नः-"अष्टकं कतिषु विभाजितः?
उत्तरम्- अध्यायेषु।
9. प्रश्नः-"प्रत्येक-अष्टकेषु कति अध्यायाःसन्ति?
उत्तरम्- अष्ट (8)

10. प्रश्नः-"अष्टकक्रमैः ऋक्संहितायां कति अध्यायाः सन्ति?
उत्तरम्- (8×8=64) चतुःषष्टिः।
11. प्रश्नः-"ऋक्संहितायां कति सूक्तानि सन्ति?
उत्तरम्- (1028) एकं सहस्रमष्टाविंशतिः सूक्तानि सन्ति।
12. प्रश्नः-"ऋग्वेदस्य ऋत्विक् किं कथ्यते?
उत्तरम्- होता।
13. प्रश्नः-"सृष्टि-रचनातः पूर्वस्थितेः कस्मिन् सूक्ते वर्णितः अस्ति?
उत्तरम्- नासदीयसूक्ते।
14. प्रश्नः-"सृष्टि-रचना ब्राह्मणादि वर्णानां विवरणं च कस्मिन् सूक्ते प्राप्यते?
उत्तरम्- पुरुषसूक्ते।
15. प्रश्नः-"भारतीयदृष्ट्या वेदस्य रचना कदा अभूत्?
उत्तरम्-भारतीय-दृष्टिकोणेन वेदः अपौरूषेयः तथा सृष्टेः पूर्वस्य मन्यते।
16. प्रश्नः-"ज्योतिषस्याधारोपरि वेदकाल-निर्धारणस्य यत्नः केन कृतः?
उत्तरम्- बालगंगाधरतिलकः।
17. प्रश्नः-"भद्रसूक्तं(कल्याणसूक्तं) केन कारणेन प्रसिद्धम्?
उत्तरम्- स्वस्तिवाचनेन।
18. प्रश्नः-"वेदे वसन्त-सम्पात केन नक्षत्रेण भवति?
उत्तरम्- मृगशिरा नक्षत्रेण।
19. प्रश्नः-"वर्तमाने वसन्त-सम्पात केन नक्षत्रेण भवति?
उत्तरम्- उत्तरभाद्रपदेन।
20. प्रश्नः-"खिल भागेन किं तात्पर्यम्?
उत्तरम्- परिशिष्टम्।
21. प्रश्नः-"वर्तमाने ऋग्वेदस्य कियत्यः शाखा उपलब्धाः?
उत्तरम्- (2) द्वे।
22. प्रश्नः-"महाभाष्ये ऋग्वेदस्य समग्रशाखाः कियत्यः मन्यन्ते?
उत्तरम्- एकविंशतिः (21)।
23. प्रश्नः-"दाहसंस्कारविषये केषु ऋग्वेदीय सूक्तेषु निर्देशः अस्ति?
उत्तरम्- दशममण्डलस्य षोडश अष्टादशे च सूक्तेषु।
24. प्रश्नः-"ऋषयः कस्य रसस्य अत्यधिक-गुणगानं कृतं स्यात्?
उत्तरम्- सोमरसस्य।
25. प्रश्नः-"सोमः किमस्ति ?
उत्तरम्- सोम-अग्नीति द्वयोः तत्त्वयोःपारस्परिकक्रियया सृष्टिः विद्यमानोऽस्ति।
26. प्रश्नः-"वेदे सर्वाधिक-स्तुतिः कस्य देवस्य कृता स्यात्?
उत्तरम्- इन्द्रस्य।

27. प्रश्नः-वेदस्य द्रष्टारः के: ?
उत्तरम्-ऋषयः।
28. प्रश्नः-ऋग्वेदे कियत्यः देवताः?
उत्तरम्- त्रयस्त्रिंशत् (33)।
29. प्रश्नः-"स्वस्तिवाचनार्थं कं ऋग्वेदीय-सूक्तं प्रसिद्धम्?
उत्तरम्- भद्रसूक्तम् (कल्याणसूक्तम्।)
30. प्रश्नः-"ऋग्वेदस्य प्रथमः मन्त्रः कः?
उत्तरम्- अग्निमीळे पुरोहितम्। यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।"
31. प्रश्नः-"यज्ञे सोमस्य का महत्ता?
उत्तरम्- अग्नौ सोमस्याहुति एव यज्ञः, अतएव सोमः आधारभूत-तत्त्वेषु वर्तते।
32. प्रश्नः-"पाश्चात्य-विद्वान् मैक्समूलरः वेदस्य रचनाकालः किं मन्यते?
उत्तरम्- ई0पू0द्वादश-शतानि वर्षाणि(1200)।
33. प्रश्नः-"मैक्समूलरानुसारेण आर्यस्य उद्गमस्थानम् आसीत्?
उत्तरम्- मध्यएशिया।
34. प्रश्नः-"वेदस्य प्रसिद्ध-सम्वाद-सूक्तानि कानि कानि सन्ति?
उत्तरम्- यम यमी सम्वादः, पुरुरवा-उर्वसीसंवादः, सरमा-पणि संवादः।
35. प्रश्नः-"आचार्य सायणस्य वेदस्य कर्तृत्व-विषये किं मतमऽस्ति?
उत्तरम्- वेदः अपौरूषेय इति।
36. प्रश्नः-"ऋग्वेदस्य काः शाखाः उपलब्धाः?
उत्तरम्- बाष्कलः एवं शाकलः।
37. प्रश्नः-"पाश्चात्य विद्वान्सः. ऋग्वेदस्य कानि मण्डलानि अर्वाचीनं मन्यन्ते?
उत्तरम्-प्रथमं एवं दशमं च मण्डलम्।
38. प्रश्नः-"वेदोच्चारणेन सम्बद्धः अष्ट-विकृतयः के के सन्ति?
उत्तरम्- 1. जटा, 2. माला, 3. शिखा, 4. रेखा, 5. ध्वजः, 6. दण्डः, 7. रथः, 8. घनः।
39. प्रश्नः-"अष्ट-विकृतीनां किं महत्त्वम्?
उत्तरम्-एतेन वैदिकोच्चारणमेवं क्रम-सुरक्षितौ भवतः।
40. प्रश्नः-"ऋग्वेदस्य प्रथम व अन्तिममण्डलानि अर्वाचीनंस्वीकर्तुं भाषाशास्त्रीयतर्कः किमस्ति?
उत्तरम्-एतेषु मण्डलेषु रेफस्य स्थानोपरि लकारः प्रयुज्यते, यः द्वाभ्यां नवन् मण्डलपर्यन्तं नास्ति।
41. प्रश्नः-"प्रसिद्धकथनम्" एकं सदविप्रा वहुधा वदन्ति" कुतः उद्धृतोऽस्ति?
उत्तरम्- ऋग्वेदात्(1/164/46)
42. प्रश्नः-"वेदस्य विभाजनं कस्मिन् युगे भवतिस्म?
उत्तरम्- द्वापरस्य अन्तिम-समये।
43. प्रश्नः-"वेदस्य विभाजनकर्ता केन नाम्ना सम्बोधयति?
उत्तरम्- वेदव्यासनाम्ना।

44. प्रश्नः-"वर्तमाने वैवस्वतमन्वतरस्य अष्टाविंशति-कलियुगायवेदव्यासःकः?
उत्तरम्- महर्षिपराशरपुत्रः कृष्णद्वैपायनः।
45. प्रश्नः-"प्रसिद्ध-ऋषिकाःकाः?
उत्तरम्- शची, वाचक्ववी गार्गी, ब्रह्मवादिनीधोषा, ममता, विश्ववारा, अपाला, सूर्या, वाक्।
46. प्रश्नः-"ऋग्वेदस्य कस्मिन् सूक्ते द्यूतस्य वर्णनमस्ति?
उत्तरम्- कितव सूक्ते (दशम मण्डलस्य पञ्चत्रिंशत् सूक्ते)
47. प्रश्नः-"अक्षैर्मादिव्यः" कस्मिन् सूक्ते उपदिष्टः?
उत्तरम्- कितवसूक्ते।
48. प्रश्नः-"केवलाघो भवति केवलादी" कुत्र कथितमस्ति?
उत्तरम्-ऋग्वेदस्य भिक्षु(दानस्तुति) सूक्ते।
49. प्रश्नः-"ऋग्वेदस्य कानि मण्डलानि परिवारमण्डल-कथ्यते?
उत्तरम्- द्वितीयतः सप्तम मण्डलपर्यन्तम्।
50. प्रश्नः-"वर्तमाने दृश्यमानान् ध्रुवतारान् वैज्ञानिकःकेन नाम्ना ज्ञायते?
उत्तरम्-अल्फा।
51. प्रश्नः-"ऋग्वेदीय अष्टम मण्डलस्य द्रष्टा कौ?
उत्तरम्- कण्व व उशनस् ऋषी।
52. प्रश्नः-"ऋग्वेदे प्रथमसूक्तस्य देवता कः?
उत्तरम्- अग्निः।
53. प्रश्नः-"ऋग्वेदस्य सम्पूर्ण मन्त्रसंख्या का?
उत्तरम्- (10580. 25)
54. प्रश्नः-"ऋग्वैदिक-बालखिल्यसूक्तानां संख्या का अस्ति?
उत्तरम्- (11) एकादशः।
55. प्रश्नः-"ऋग्वेदस्य अष्टकक्रमे कति अष्टकाः विद्यन्ते?
उत्तरम्-(08) अष्टौ।
56. प्रश्नः-"ऋग्वेदस्य बालखिल्यसूक्तसम्बद्धः मण्डलः कः?
उत्तरम्- अष्टमः।
57. प्रश्नः-"ऋग्वेदस्य अष्टकक्रमे कति अनुवाकाः प्राप्यन्ते?
उत्तरम्-(85) पञ्चाशीति।
58. प्रश्नः-"सम्पूर्ण ऋग्वेदस्य शब्द-संख्या काः?
उत्तरम्-(1, 53, 826)
59. प्रश्नः-"सम्पूर्णेषु, ऋक्मन्त्रेषु अक्षराणां संख्या का?
उत्तरम्-(4, 32, 000)
60. प्रश्नः-"सम्प्रति ऋग्वेदस्य समुपलब्ध-प्रचलित-शाखा का अस्ति?
उत्तरम्- शाकलशाखा।

61. प्रश्नः-"ऋग्वैदिक-शाकलसंहितायाः पदपाठः केन कृतः?
उत्तरम्- शाकलेन।
62. प्रश्नः-"कृष्णद्वैपायन-व्यासाद् ऋग्वेदाध्यायी शिष्यः कः?
उत्तरम्-पैलः।
63. प्रश्नः-"ऋग्वैदिकसूक्तसंख्या काः?
उत्तरम्-(1028) अष्टाविंशत्युपरि सहस्रम्।
64. प्रश्नः-"गृह्यसूत्रस्य ऋग्वैदिकशाखाः काः?
उत्तरम्- 1. शांखायनः, 2. आश्वलायन।
65. प्रश्नः-"माण्डूकायनशाखा-सम्बद्धःवेदविशेषः कः?
उत्तरम्- ऋग्वेदः।
66. प्रश्नः-"शांखायनशाखा-सम्बद्धः वेदविशेषः कः?
उत्तरम्-ऋग्वेदः।
67. प्रश्नः-"मैक्समूलर-महोदयेन निर्धारितःऋग्वैदिककालखण्डःकः?
उत्तरम्- (1000 B.C.-1200 B.C.)
68. प्रश्नः-"4000 B.C. इति ऋग्वेदिक-रचनाकालः केन विदुषा स्वीकृतः?
उत्तरम्- तिलकेन।
69. प्रश्नः-"विण्टरनित्समहोदयेन स्वीकृतः ऋग्वैदिक रचनाकालः कः?
उत्तरम्- 4500-6000 B.C.
70. प्रश्नः-"1200-1500 B.C. इति ऋग्वैदिकरचनाकालः केन स्वीकृतः?
उत्तरम्-वेबरमहोदयेन।
71. प्रश्नः-"कयोः द्वयोः विदुषोः ऋग्वैदिककालनिर्धारणसामग्री समाना वर्तते?
उत्तरम्- जैकीबी-तिलकयोः।
72. प्रश्न-कात्यायनप्रणीत-ऋग्वैदिकसर्वानुक्रमण्यनुसारेण "शतर्चिनां" मण्डलःकः?
उत्तरम्- प्रथमः।
73. प्रश्न-ऋग्वेदे"गार्त्समदं मण्डलम्" इति कस्य मण्डलस्य अभिधानविशेषःवर्तते?
उत्तरम्- द्वितीयस्य।
74. प्रश्न-ऋग्वैदिक-तृतीयमण्डलस्य ऋषिविशेषः कः?
उत्तरम्-विश्वामित्रः।
75. प्रश्न-किम् नाम चतुर्थ मण्डलम् तु ऋग्वेदस्य?
उत्तरम्- वामदेवः।
76. प्रश्न-ऋग्वेदसंहितायां पञ्चमं मण्डलं किम्?
उत्तरम्- आत्रेयः।
77. प्रश्न-भारद्वाजनाम्ना विश्रुतं ऋग्वैदिकमण्डलं किम्?
उत्तरम्- षष्ठम्।

78. प्रश्न-किम् नाम सप्तमं मण्डलं ऋग्वेदस्य?
उत्तरम्-वाशिष्ठम्।
79. प्रश्न-ऋग्वेदस्य अनुक्तगोत्रात्मकं मण्डलं किम्?
उत्तरम्-अष्टमं मण्डलम्।
80. प्रश्न-ऋग्वेदे पवमानसंज्ञकं मण्डलं किम्?
उत्तरम्-नवमं मण्डलम्।
81. प्रश्न-किं मण्डलम् अर्वाचीनं प्रक्षिप्तं च मन्यन्ते वैदेशिकाः ऋग्वेदसंहितायाम्?
उत्तरम्-दशमं मण्डलम्।
82. प्रश्न-ऋग्वैदिक-शाकलसंहितायां गायत्री-छन्देषु निबद्धानां मन्त्राणां संख्याःकाः?
उत्तरम्- (2467)
83. प्रश्न-ऋग्वैदिकमन्त्रेषु उष्णिक् मन्त्राणां संख्याः काः?
उत्तरम्-(341)
84. प्रश्न-अनुष्टुप्-छन्दमयाः ऋग्वैदिकमन्त्राणां संख्याः कति वर्तन्ते?
उत्तरम्-(855)
85. प्रश्न-ऋग्वेदे बृहती छन्दोबद्धमन्त्राणां संख्या का विद्यते?
उत्तरम्-(181)
86. प्रश्न-ऋग्वेदे पंक्तिसंज्ञकाः मन्त्राः कति सन्ति?
उत्तरम्-(312)
87. प्रश्न-ऋग्वेदसंहितायां त्रिष्टुप्-संज्ञकाः कति मन्त्राः सन्ति?
उत्तरम्-(4253)
88. प्रश्न-ऋग्वेदसंहितायां जगती-छन्दसमाश्रिताः कति मन्त्राः विद्यन्ते?
उत्तरम्- (1348)
89. प्रश्न-अखिले ऋग्वैदिकवाङ्मये एकपदा ऋचः कति प्राप्यन्ते?
उत्तरम्-(06)
90. प्रश्न-नित्यद्विपदा ऋचः कति विद्यन्ते शाकलसंहितायाम्?
उत्तरम्- (17) सप्तदश।
91. प्रश्न-"चत्वारि शृंगा त्रयो अस्य पादा" इति मन्त्रस्य सन्दर्भ संख्या काऽस्ति?
उत्तरम्- ऋक्-4. 58. 3.
92. प्रश्न-पुरुरवा-उर्वसी-संवादसूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्-(10/95)
93. प्रश्न-यम-यमी-संवादसूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्-(10/10) दशम।
94. प्रश्न-"ओ चित् सखायं सख्या ववृत्याम्" इति मन्त्रःकस्मिन् सूक्ते समुपलभ्यते?
उत्तरम्-यम-यमी-सम्वादसूक्ते।

95. प्रश्न-सरमा-पणि-संवादसूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्- (10/108)
96. प्रश्न-विश्वामित्र-नदी-संवादसूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्- (3/33)
97. प्रश्न-"प्रपर्वतानुशती उपस्थाद श्वे" इति मन्त्रः कस्मिन् सूक्ते सम्प्राप्यते?
उत्तरम्- विश्वामित्र-नदी-संवादसूक्ते।
98. प्रश्न-ऋक्. 1/1/1 इति क्रमेण संकेतितः मन्त्रः कः?
उत्तरम्- अग्निमीले पुरोहितम्।
99. प्रश्न-पुरुषसूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्- (10/90)
100. प्रश्न-तस्माद्यज्ञात्सर्वहुतः ऋचः सामानिजज्ञिरे इति मन्त्रः कस्मिन् सूक्ते समुपलभ्यते?
उत्तरम्- पुरुषसूक्ते।
101. प्रश्न-ऋकृ. 10/121. इति क्रमेण संकेतितम् सूक्तं किमस्ति?
उत्तरम्-हिरण्यगर्भसूक्तम्।
102. प्रश्न-श्रद्धासूक्तस्य ऋग्वैदिकक्रमः कः?
उत्तरम्- (10/151)
103. प्रश्न-ऋग्वैदिक वाक्सूक्तस्य क्रमः कोऽस्ति?
उत्तरम्- (10/125)
104. प्रश्न-"कस्मै देवाय हविषा विधेम" इति मन्त्रःकस्मिन् सूक्ते वर्तते?
उत्तरम्- हिरण्यगर्भे।
105. प्रश्न-श्रद्धासूक्तस्य ऋषिका काऽस्ति?
उत्तरम्- श्रद्धाकामायनी।
106. प्रश्न-"अग्निमीळे पुरोहितम् इति मन्त्रेण कः प्रारभ्यते?
उत्तरम्- ऋग्वेदः।
107. प्रश्न-"यज्जाग्रतो दूरमुदैति दैवं" इति मन्त्रेणसम्बद्धःसूक्तविशेषः कः?
उत्तरम्-शिवसंकल्पसूक्तम्।
108. प्रश्न-"समानी व आकूतिः समाना हृदयानि वः" इति कस्य वेदस्य अन्तिमः मन्त्रः विद्यते?
उत्तरम्- ऋग्वेदस्य।
109. प्रश्न-पुरुरवा-उर्वशी-संवादसूक्ते कति मन्त्राः सन्ति?
उत्तरम्- (18) अष्टादश।
110. प्रश्न-विश्वामित्र-नदी-संवादसूक्ते कति मन्त्राः प्राप्यन्ते?
उत्तरम्- (13) त्रयोदश।
111. प्रश्न-संवादसूक्तेषु कामातुरा नारी का?
उत्तरम्- यमी।

112. प्रश्न-सरमा-पणि-सम्वादसूक्ते कति मन्त्राः समुपलभ्यन्ते?
उत्तरम्- (11) एकादश।
113. प्रश्न- ऐतरेयब्राह्मणसम्बद्धः वेदविशेषः कः?
उत्तरम्-ऋग्वेदः।
114. प्रश्न-कौषीतकिब्राह्मणस्य नामान्तरमस्ति?
उत्तरम्-शांखायनब्राह्मणम्।
115. प्रश्न-वाष्कलोपनिषद्-सम्बद्ध वेदविशेषः कः?
उत्तरम्- ऋग्वेदः।
116. प्रश्न-ऋग्वेदेतर उपनिषद् अस्ति?
उत्तरम्- श्वेताश्वतरोपनिषद्।
117. प्रश्न-ऋग्वेदस्य शिक्षा-वेदांगं किमस्ति?
उत्तरम्- पाणिनीयशिक्षा।
118. प्रश्न-ऋक् प्रातिशाख्यस्य नामान्तरानि कानि सन्ति?
उत्तरम्- ऋक्लक्षणम्, परिषद्, पार्षदः।
119. प्रश्न-ऋग्वेदस्य धर्मसूत्रं किमस्ति?
उत्तरम्- वशिष्ठधर्मसूत्रम्।
120. प्रश्न-ऋग्वैदिक-देवतानाम् उपाधिः अस्ति?
उत्तरम्- असुरः।
121. प्रश्न-"धृतव्रत" विशेषणेन विशिष्टः कः?
उत्तरम्- वरुणः।
122. प्रश्न-वैदिकदेवतासु मार्गाध्यक्षः कः?
उत्तरम्- वरुणः।
123. प्रश्न-"आधृणि" इति उपाधिना उपहितः देवविशेषः कः?
उत्तरम्- (पूषन्) वरुणः।
124. प्रश्न-"आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च" इति मन्त्रेण सम्बद्धःकः?
उत्तरम्-सवित्।
125. प्रश्न-उरुक्रमः कः?
उत्तरम्- विष्णुः।
126. प्रश्न-. विष्णोः निवासस्थानं कुत्र अस्ति?
उत्तरम्- द्युलोके।
127. प्रश्न-"उरुगाय" इत्युपाध्युपहितः कः?
उत्तरम्- विष्णुः।
128. प्रश्न-"देवता" शब्दः कस्मिन् लिंगे प्रयुज्यते?
उत्तरम्-स्त्रीलिंगे।

129. प्रश्न-"घृतलोमः" कस्याः देवतायाः विशेषणमस्ति?
उत्तरम्- अग्नेः।
130. प्रश्न-. "जातवेदाः" अनेन विशेषणेन विशिष्टः देवः कः?
उत्तरम्- अग्निः।
131. प्रश्न-"ब्रह्मणस्पतिः" कः अस्ति?
उत्तरम्-बृहस्पतिः।
132. प्रश्न-"पुरोहित" इत्यभिधानेन अभिहितः कः?
उत्तरम्- अग्निः।
133. प्रश्न-ऋग्वेदस्य नवम-मण्डलस्य देवता कोऽस्ति?
उत्तरम्- सोमः।
134. प्रश्न-"दमूनाः" कस्य विशेषणमस्ति?
उत्तरम्- अग्नेः।
135. प्रश्न-"शतक्रतु" विशेषेण विशिष्टः कः?
उत्तरम्- इन्द्रः।
136. प्रश्न- ऋग्वेद-संहितायां स्वातन्त्र्येण रुद्रस्य सूक्तसंख्या काः?
उत्तरम्-(03) त्रयः।
137. प्रश्न-मरुतां पिता कः?
उत्तरम्- रुद्रः।
138. प्रश्न ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य देवता काऽस्ति?
उत्तरम्- अग्निः।
139. प्रश्न-"स नः पितेव सूनवेऽग्ने" इति मन्त्रांशेन सम्बद्धदेवता का?
उत्तरम्- अग्निः।
140. प्रश्न-"अग्निमीले पुरोहितम्" इति मन्त्रेण कः प्रारभ्यते?
उत्तरम्- ऋग्वेदः।
141. प्रश्न-"उत त्वः पश्यन्न ददर्श वाच" अनेन मन्त्रेण सम्बद्धः ऋक्मण्डलः कः?
उत्तरम्- (10) दश।
142. प्रश्न-"दुहिता दिवः" का अस्ति?
उत्तरम्- उषस्।
143. प्रश्न-"सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्" इति मन्त्रेण सम्बद्धः वेदविशेषः कः?
उत्तरम्- ऋग्वेदः।
144. प्रश्न-"सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गन्तवा उ" कस्य उक्तिरियम्?
उत्तरम्- पुरुरवसः।
145. प्रश्न- "न वै स्त्रैणानि सख्यानि सन्ति इति मन्त्रेण सम्बद्धः सूक्तविशेषःकः?
उत्तरम्- पुरुरवा-उर्वशी।

146. प्रश्न- विश्वामित्र-नदी-संवादसूक्ते प्राथमिकेषु मन्त्रेषु समुल्लिखितौ नद्यौ?
उत्तरम्- विपाट्-शुतुद्री।
147. प्रश्न- "एना वयं पयसा पिन्वमाना अनुयोनिं देवकृतं चरन्ती:" कस्या: उक्तिरियम्?
उत्तरम्- नद्यो:।
148. प्रश्न- विश्वामित्र-नदी-संवादसूक्ते विश्वामित्रेण उक्त: तस्य पितु: नाम किम्?
उत्तरम्- कुशिक:।
149. प्रश्न- "रमध्व मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवै:" कस्या: उक्तिरियम्?
उत्तरम्- विश्वामित्रस्य।
150. प्रश्न- "एतद्वचो जरितर्मापि मृष्ठा, आ यत्ते घोषानुत्तरा युगानि" अत्र "ते" पदेन क: उद्दिष्ट:?
उत्तरम्- विश्वामित्र:।
151. प्रश्न- "यदङ्गत्वा भरता संतरेयु: गव्यन्ग्राम इषित इन्द्रजूत:" इत्यत्र "त्वा" इति पदेन क: उद्दिष्ट:?
उत्तरम्- नद्यौ।
152. प्रश्न- ऋक्. 3/33/9 इति मन्त्रे नद्यो: सम्बोधनम् अस्ति?
उत्तरम्- स्वसार:।
153. प्रश्न- "गर्भे नु नौ जनिता दम्यती कर्देवस्त्वष्टा सपिता विश्वरूप:" कस्या: उक्तिरियम्?
उत्तरम्- यम्या:।
154. प्रश्न- "उद्व ऊर्मि: शम्या हन्त्वायो योक्त्राणि मुञ्चत्" अस्य वक्ता क:?
उत्तरम्- विश्वामित्र:।
155. प्रश्न- "किं भ्राता सद्यनाथं भवति, किमु स्वसा यन्निर्ऋति: निगच्छात्" कस्या उक्तिरियम्?
उत्तरम्- यम्या:।
156. प्रश्न-यमस्य पिता क:?
उत्तरम्- विवस्वान्।
157. प्रश्न-"इति त्वा देवा इम आहुरैल यथे मेतद्भवसि मृत्युबन्धु:" इत्यत्र ऐल: क:?
उत्तरम्- पुरुरवा।
158. प्रश्न- "पुरुरवा-उर्वशी-संवादसूक्ते" उर्वशी का अस्ति?
उत्तरम्- अप्सरा।
159. प्रश्न- आदर्शप्रेमी इति रूपेण क: वर्णित: अस्ति?
उत्तरम्- पुरुरवा।
160. प्रश्न- उर्वश्या: उक्तिषु स्त्रीणां हृदय: कीदृग्वर्णित:?
उत्तरम्- सालावृकदृश:।
161. प्रश्न- सरमा-पाणि-संवादसूक्ते कति मन्त्रा: सन्ति?
उत्तरम्- (11) एकादश।
162. प्रश्न- "सरमा" का अस्ति?
उत्तरम्- देवशुनी।

163. प्रश्न- "पणय:" कस्य अनुचरा: आसन्?
उत्तरम्-वलस्य।
164. प्रश्न-पणिभि: अभिहितेषु मन्त्रेषु: ऋषि: क:?
उत्तरम्- पणि:।
165. प्रश्न- "स्वसारं त्वा कृणवे मा पुनर्गा, अप ते गवां सुभगे भजाम" मन्त्रेऽस्मिन् "सुभगे" इति सम्बोधनं कस्या कृते अस्ति?
उत्तरम्- सरमायै।
166. प्रश्न- "घृतस्य स्तोकं सकृदहन आश्ना" कस्या उक्तिरियम्?
उत्तरम्- उर्वश्या:।
167. प्रश्न- ऋक्प्रातिशाख्ये कति पटलानि सन्ति?
उत्तरम्-(18) अष्टादश।
168. प्रश्न- ऋक्प्रातिशाख्यस्य प्रथमपटलस्य विषयवस्तु: क:?
उत्तरम्- संज्ञा।
169. प्रश्न- वाजसनेयि-प्रातिशाख्यस्य प्रणेता क:?
उत्तरम्- कात्यायन:।
170. प्रश्न- वाजसनेयि-प्रातिशाख्ये कति अध्याया: सन्ति?
उत्तरम्-(08) अष्टौ।
171. प्रश्न- श्रौत्रसूत्राणां प्रतिपाद्यविषय: क:?
उत्तरम्- वैदिकयाग:।
172. प्रश्न- वंशीयमण्डलानि कुत्र उपलभ्यन्ते?
उत्तरम्- ऋग्वेदे।
173. प्रश्न- ऋग्वेदस्य पदपाठकर्ता क: आसीत्?
उत्तरम्- शाकल्य:।
174. प्रश्न- "मां नो नि क: पुरुषत्रा नमस्ते" कुत्र वर्तते?
उत्तरम्- विश्वामित्रनदीसंवादे।
175. प्रश्न- ऋग्वेदस्य नवमण्डलस्य देवता क:?
उत्तरम्- पवमानसोम:।
176. प्रश्न- शुन:शेपोख्यानं कुत्र वर्तते?
उत्तरम्- ऐतरेयब्राह्मणे।
177. प्रश्न- ऋग्वेदस्य प्रथममण्डलस्य ऋषि: क:?
उत्तरम्- मधुच्छन्दा।
178. प्रश्न- बालगंगाधर-तिलकानुसारं ऋग्वेदस्य काल: खीस्तपूर्व:?
उत्तरम्- (2500)
179. प्रश्न- ऋग्वेदस्य ब्राह्मणग्रन्था: के सन्ति?
उत्तरम्- (2 द्वौ) 1. ऐतरेय:, 2. शाङ्खायन।

180. प्रश्न-ऐतरेयब्राह्मण: कति अध्यायेषु, कति पञ्चिकासु, कति कण्डिकाषु विभक्तोऽस्ति?
उत्तरम्- 40चत्वारिंशत् अध्यायेषु, 8 अष्ट पञ्चिकासु, 285कण्डिकासु च।
181. प्रश्न-ऐतरेये मुख्यरूपेण किं विवेचितमस्ति?
उत्तरम्-सोमयागस्य हौत्रकर्मम्।
182. प्रश्न- शाङ्खायन-ब्राह्मणस्य अपरनाम किमस्ति?
उत्तरम्- कौपितकि ब्राह्मण।
183. प्रश्न-कौपितकि ब्राह्मणे कति अध्यायेषु कति कण्डिकासु च विभजित: सन्ति?
उत्तरम्- 30 अध्यायेषु, 226 कण्डिकासु।
184. प्रश्न- ऋग्वेदेन सम्बद्ध: आरण्यक: के सन्ति?
उत्तरम्-ऐतरेय-शाङ्खायनश्च।
185. प्रश्न- शाङ्खायन-आरण्यके कति अध्याया: सन्ति?
उत्तरम्- 30 त्रिंशति: अध्याया:।
186. प्रश्न- ऋग्वेदे मण्डलानां संख्या का?
उत्तरम्- 10 दश।
187. प्रश्न- ऋग्वेदस्य उपवेद: क:?
उत्तरम्-आयुर्वेद:।
188. प्रश्न- ऋग्वेदस्य ऋषि: क:?
उत्तरम्- अग्निवेद:।
189. प्रश्न- सर्वै: प्राचीनतम: वेद: कोऽस्ति?
उत्तरम्- ऋग्वेद:।
190. प्रश्न- ऋग्वेदस्य पदपाठ: सर्वप्रथम: केन क्रियते?
उत्तरम्- शाकल्य ऋषि:।
191. प्रश्न- ब्रह्मं नेति नेति कस्मिन् उपनिषदि कथ्यते?
उत्तरम्- बृहदारण्यक-उपनिषदि।
192. प्रश्न- ऋग्वेदस्य ऋषि: कोऽस्ति?
उत्तरम्-अग्नि:।
193. प्रश्न- नासदीय सूक्त: कस्य वेदस्य अस्ति?
उत्तरम्- ऋग्वेदस्य।
194. प्रश्न- महीधर: वेदस्य कोऽस्ति?
उत्तरम्-भाष्यकार:।
195. प्रश्न- वाजसनेयि संहितायां कियन्तोऽध्याया:?
उत्तरम्- चत्वारिंशत् (40)
196. प्रश्न- ऋग्वेदस्यारण्यके स्त:?
उत्तरम्- 1. ऐतरेयारण्यकं-शौखायनं वा, 2. कौषीतकी-आरण्यञ्च।

197. प्रश्न "ऐतरेयोपनिषद्" "कौषीतक्युपनिषच्च" इति द्वयं केन वेदेन सम्बद्धं विद्यते?
उत्तरम्-ऋग्वेदेन।
198. प्रश्न- ऋग्वेदस्य कियत्यो मुख्याः शाखाः सन्ति?
उत्तरम्- 5 पञ्च।
199. प्रश्न- "ऋक् प्रातिशाख्यम्" केन वेदेन सम्बद्धम्?
उत्तरम्- ऋग्वेदेन।
200. प्रश्न- ऋग्वेदस्य मन्त्राणां का संज्ञा?
उत्तरम्- ऋचा।
201. प्रश्न- "नासत्या" इदं कस्य विशेषणं विद्यते?
उत्तरम्- अश्विनौ।
202. प्रश्न- सम्पूर्ण-ऋग्वेदे गायत्री-छन्दे निबद्धा-ऋचायाः का संख्या?
उत्तरम्- 2449 संख्या।
203. प्रश्न- ऋग्वेदस्य अपर-नाम किम्?
उत्तरम्- दशत्रयी।
204. प्रश्न- ऋग्वेदे रुद्रेन सम्बद्धः स्वतन्त्र-सूक्तानां का संख्या?
उत्तरम्- (3) तिस्रः।
205. प्रश्न- "समानो मन्त्रः समितिः समानी" इति मन्त्रेण सम्बद्ध-मण्डलः कः?
उत्तरम्- (10) दशम।
206. प्रश्न- "यम-यमी-संवादसूक्तम्" ऋग्वेदस्य केन मण्डलेन सम्बद्धः?
उत्तरम्- (10) दशम्।
207. प्रश्न- यम-यमी-संवादसूक्तेः कः छन्दः?
उत्तरम्- त्रिष्टुप-छन्दः।
208. प्रश्न-"नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते" अत्र "योषा" एवं "कन्या" इत्यस्य सादृश्यं केन क्रियते?
उत्तरम्- नदी।
209. प्रश्न- "बृहन् मित्रस्य वरुणस्य धाम कदु ब्रव आहो वीच्या नृन्" कस्येयमुक्तिः?
उत्तरम्- यमस्य।
210. प्रश्न-"किं भ्राता सद्यनाथं भवाति किमु स्वसा यन्निर्ऋतिनिगच्छात्" इयं कस्याः उक्तिः?
उत्तरम्- यमी इत्यस्य।
211. प्रश्न- संवाद-सूक्तेषु कामातुरा-नारी का?
उत्तरम्- यमी।
212. प्रश्न- "हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहे नु" अस्मिन् वाक्ये "जाये" इति सम्बोधनं कस्यै उद्दिष्टोऽस्ति?
उत्तरम्- उर्वश्यै।

213. प्रश्न-"पुनरस्तं परेहि दुरापना वात इवाहमस्मि" अत्र" अहम्" पदेन का उद्दिष्टोऽस्ति?
उत्तरम्- उर्वशी।
214. प्रश्न-"ता अञ्जयोऽरुणयो न सस्रुःश्रिये गावो न धेनवोऽनवन्त" इयं कस्याःउक्तिः?
उत्तरम्- उर्वश्याः।
215. प्रश्न-"पुरुरवो मा पृथा मा प्रपप्तो मा त्वा वृकासो अशिवास उक्षन्" अस्य मन्त्रस्य को ऋषिः?
उत्तरम्- उर्वशी।
216. प्रश्न- "पणियः" कस्य गाः अपहृतः?
उत्तरम्- वृहस्पतेः।
217. प्रश्न- "कास्मेहितिःका परितक्म्यासीत् वयं रसाया अतरःपयांसि" इयमुक्तिः कस्याः?
उत्तरम्- पणि-इत्यस्याः।
218. प्रश्न-आश्वलायन-श्रौत्रेण सम्बद्धः वेदः कः?
उत्तरम्- ऋग्वेदः।
219. प्रश्न-"पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" अस्य मन्त्रस्य किं सूक्तम्?
उत्तरम्- पुरुषसूक्तम्।
220. प्रश्न-य" अपांनपात्" विशेषणेन युक्तः का देवता?
उत्तरम्- अग्निः।

3. यजुर्वेदः- The second of the four Vedas.

(थ) यजुर्वेदस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्न-यजुर्वेदस्य ऋत्विक् कः?
उत्तरम्- अध्यर्युः।
2. प्रश्न-ययजुर्वेदस्य(101) शाखायाः उल्लेखकर्ता-भाष्यकारः कः?
उत्तरम्-चरक-महोदयः।
3. प्रश्न- पंचविंशब्राह्मणस्य नामान्तरमस्ति?
उत्तरम्- प्रौढब्राह्मणम्।
4. प्रश्न- त्रिषु भिन्नं ब्राह्मणं किम्?
उत्तरम्- संहितोपनिषद्ब्राह्मणम्।
5. प्रश्न- जैमिनीयब्राह्मणस्य नामान्तरमस्ति?
उत्तरम्- तवलकारब्राह्मणम्।
6. प्रश्न-यजुर्वेदस्य कियत्यः शाखाः श्रूयन्ते?
उत्तरम्- (85)
7. प्रश्न-यजुर्वेदस्य मुख्य देवता?
उत्तरम्- वायुः।

8. प्रश्न-यजुर्वेदस्य मुख्याचार्यः कः?
   उत्तरम्- वैशम्पायनः।
9. प्रश्न- कस्य वेदस्य शुल्बसूत्राणि समुपलभ्यन्ते?
   उत्तरम्- यजुर्वेदस्य।
10. प्रश्न-यजुर्वेदस्य वाजसनेयिशाखायां कति मन्त्राः प्राप्यन्ते?
    उत्तरम्- (1975)
11. प्रश्न-षड्मन्त्रात्मकं शिवसंकल्पसूक्तं वाजसनेयिसंहिताया:कस्मिन् अध्याये प्राप्यते?
    उत्तरम्- चतुस्त्रिंशत्। (34)
12. प्रश्न- "ईशावास्योपनिषद्" वाजनेयिसंहिताया: कस्मिन् अध्याये विद्यते?
    उत्तरम्- (40) चत्वारिंशत्।
13. प्रश्न-यजुर्वेदस्य वर्ण्य-विषय:कोऽस्ति?
    उत्तरम्- यज्ञस्य विधानम्।
14. प्रश्न-यजुर्वेदस्य प्रमुख-प्रतिपाद्यविषयः कोऽस्ति?
    उत्तरम्- यागः।
15. प्रश्न- शुक्ल-कृष्णभेदात्मकः वेदविशेषः कः?
    उत्तरंम्- यजुर्वेदः।
16. प्रश्न- कृष्णद्वैपायनाद् यजुर्वेदाध्यायी शिष्यविशेषः कः?
    उत्तरम्- वैशम्पायनः।
17. प्रश्न- ब्रह्मसम्प्रदाय-"आदित्यसम्प्रदाययोः सम्बद्धः वेदविशेषः कः?
    उत्तरम्- यजुर्वेदः।
18. प्रश्न- मैत्रायणी-संहितायां कति मन्त्राः विद्यन्ते?
    उत्तरम्- (2144)
19. प्रश्न-यजुर्वेदीया शिक्षा काः?
    उत्तरम्- याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, माण्डव्यशिक्षा।
20. प्रश्न- कात्यायन-श्रौत्रसूत्रस्य लेखकः कः?
    उत्तरम्- कात्यायनः।
21. प्रश्न-यजुर्वेदस्य कति गृह्यसूत्राणि?
    उत्तरम्- 9 नव।
22. प्रश्न- "आपस्तम्ब-गृह्यसूत्रम्" केन वेदेन सम्बद्धम्?
    उत्तरम्- कृष्णयजुर्वेदेन।
23. प्रश्न- "आपस्तम्ब-धर्मसूत्रम्" कस्य वेदस्य कया शाखया सम्बन्धितं जायते?
    उत्तरम्-कृष्ण-यजुर्वेदस्य तैत्तिरीय-शाखया।
24. प्रश्न-यजुर्वेदस्य कठशाखया सम्बद्धं किं धर्मसूत्रम्?
    उत्तरम्- "विष्णु-धर्मसूत्रम्।"

25. प्रश्न- "वाजसनेयि-प्रातिशाख्यम्" कया संहितया सम्बद्धम्?
उत्तरम्- वाजसनेयि-संहिताया।
26. प्रश्न- "पुरुरवा-उर्वशी" आख्यानेन सम्बद्धः ब्राह्मणग्रन्थः कः?
उत्तरम्- शतपथब्राह्मणः।
27. प्रश्न-यजुर्वेदस्य प्रमुखविषयः कः?
उत्तरम्- कर्म।
28. प्रश्न-यजुर्वेदीयः शिक्षाग्रन्थः कः?
उत्तरम्- भारद्वाजशिक्षा।
29. प्रश्न- "इषे त्वोर्जेत्वा. . . . " इति कस्य वेदस्योक्तिः?
उत्तरम्- यजुर्वेदस्य।
30. प्रश्न- स्वामीदयानन्दः कस्य वेदस्य भाष्यकर्त्ता अस्ति?
उत्तरम्- यजुर्वेदस्य।
31. प्रश्न- देवेषु भूषिष्ठैः सूक्तैः स्तुतःकः?
उत्तरम्- इन्द्रः।
32. प्रश्न-यजुर्वेदीयः श्रौत्राणि कानि?
उत्तरम्- कठश्रौत्रसूत्रम्, भारद्वाजश्रौत्रसूत्रम्, वाधूलश्रौत्रसूत्रम्।
33. प्रश्न-यजुर्वेदीयः श्रौत्रसूत्रग्रन्थाः के?
उत्तरम्- वाराहश्रौत्रसूत्रम्, मानवश्रौत्रसूत्रम्, मैत्री-श्रौत्रसूत्रम्।
34. प्रश्न- कौषीतकिश्रौत्रसूत्रस्य नामान्तरमस्ति?
उत्तरम्- शांखायनश्रौत्रसूत्रम्।
35. प्रश्न- शांखायनश्रौत्रसूत्रस्य नामान्तरमस्ति?
उत्तरम्- कौषीतकिश्रौत्रसूत्रम्।
36. प्रश्न- वेदपाठस्य विकृतयः कति सन्ति?
उत्तरम्- अष्टौ।
37. प्रश्न- को वेदः गद्यात्मकः वर्तते?
उत्तरम्- यजुर्वेदः।
38. प्रश्न-यजुर्वेदे प्रयुक्तःकःशब्दःसंसारे त्यागस्य प्रतीको वर्तते?
उत्तरम्- स्वाहा।
39. प्रश्न- शुक्ल-कृष्णयोः भेदौ कस्मिन् आधारोपरि स्तः?
उत्तरम्- कृष्णे मन्त्रब्राह्मणाश्च उभयो एव स्तः, शुक्ले शुद्धरूपेण मन्त्रोऽस्ति।
40. प्रश्न- कृष्ण-यजुर्वेदस्य ग्रह्यसूत्रं किम्?
उत्तरम्- 1. आपस्तम्बः, 2. हिरण्यकेशी, 3. बोधायनः, 4. मानव, 5. काठक, 6. वैखानसः।
41. प्रश्न- वैदिक राष्ट्रगीतं "आब्रह्मन् ब्राह्मणो. . . . . कस्मिन् वेदे अस्ति?
उत्तरम्- यजुर्वेदे।

42. प्रश्न- मनस्तत्त्वस्य विविच्यमानं प्रसिद्ध-यजुर्वेदीयसूक्तं किम्?
उत्तरम्- शिवसङ्कल्प सूक्तम्।
43. प्रश्न- कर्मकाण्ड-मुख्यत: कस्मिन् वेदोपरि आधारितोऽस्ति?
उत्तरम्- यजुर्वेदे।
44. प्रश्न- माध्यन्दिनी-शाखाया:प्रथम-द्वितीय-अध्याययो: कस्य विवेचनमस्ति?
उत्तरम्- सोमयज्ञपितृयज्ञश्च।
45. प्रश्न- माध्यन्दिनी-शाखाया:प्रथम पञ्चत्रिंशत् अध्यायेषु प्रमुखप्रतिपाद्यविषय: किमस्ति?
उत्तरम्- श्रौतकर्मकाण्ड:।
46. प्रश्न- माध्यन्दिनी-शाखायां अग्निहोत्रस्य वर्णनं कस्मिन् अध्याये वर्तते?
उत्तरम्- तृतीयाध्याये।
47. प्रश्न- माध्यन्दिनी-शाखायां चतुर्थत:अष्टाध्याय पर्यन्तं कस्य विवेचनमस्ति?
उत्तरम्- सोमयाग:(विशेषत: अग्निष्टोमयाग:)
48. प्रश्न- माध्यन्दिनी-शाखायां नवम-दशमाध्यायो: विषय: किमस्ति?
उत्तरम्- राजसूय एवं वाजपेय-यागौ।
49. प्रश्न- माध्यन्दिनी-शाखायां अग्निचयनस्य वर्णनं कस्मिन् अध्याये विद्यते?
उत्तरम्- (11-18) एकादशत:अष्टादशाध्यायपर्यन्तम्।
50. प्रश्न- माध्यन्दिनी-शाखायां प्रसिद्ध रुद्रसूक्तस्य वर्णनं कस्मिन् अध्याये वर्तते?
उत्तरम्- (16) षोडषोऽध्याये।
51. प्रश्न- माध्यन्दिनी-शाखायां वसोर्धारा सम्बन्धा:मन्त्रा:कस्मिन् अध्याये विद्यते?
उत्तरम्- (18) अष्टादशाध्याये।
52. प्रश्न- माध्यन्दिनी-शाखायां पसिद्ध:"अश्वमेध" यज्ञस्य वर्णनं कुत्र वर्तते?
उत्तरम्- (22-25) द्वाविंशतित:पञ्चविंशति अध्यायेषु।
53. प्रश्न- माध्यन्दिनी-शाखायां खिलमन्त्रानां सङ्गह:कस्मिन् अध्याये वर्तते?
उत्तरम्- (26-29) षड्विंशतित:नवविंशतिअध्यायेषु।
54. प्रश्न- "पुरुषमेध यागस्य" वर्णनं कस्मिन् अध्याये वर्तते?
उत्तरम्- (30) त्रिंशत् अध्याये।
55. प्रश्न- "पुरुष-सूक्त" इत्यस्य वर्णनं कस्मिन् अध्याये वर्तते?
उत्तरम्- (31) एकत्रिंशति:अध्याये।
56. प्रश्न- सर्वमेधमंत्र: हिरण्यगर्भसूक्तञ्च कस्मिन् अध्याये सङ्कलितोऽस्ति?
उत्तरम्- (32-33)
57. प्रश्न- कस्मिन् अध्याये "पितृमेध" वर्णितोऽस्ति?
उत्तरम्- (35) पञ्चत्रिंशत् अध्याये।
58. प्रश्न- शिव सङ्कल्पोपनिषत् कस्मिन् अध्याये विद्यते?
उत्तरम्- (34) चतुस्त्रिंशत् अध्याये।

59. प्रश्न- प्रवर्ग्य विषयक-मन्त्राः कस्मिन् अध्याये सङ्कलितोऽस्ति?
उत्तरम्- (36-39)
60. प्रश्न- ईशावास्योपनिषद् कस्मिन् अध्याये वर्णितऽस्ति?
उत्तरम्- (40) चत्वरिंशत् अध्याये।
61. प्रश्न- शवदाहस्य मन्त्रः यजुर्वेदस्य कस्मिन् अध्याये विद्यते?
उत्तरम्- (35) पञ्चत्रिंशत् अध्याये।
62. प्रश्न-यजुर्वेदस्य ऋषिः कोऽस्ति?
उत्तरम्- वायुदेवः।
63. प्रश्न- काठकसंहितायां कानि कानि कथानकानि सन्ति?
उत्तरम्-पञ्च, 1. इठिमिका, 2. मध्यमिका, 3. ओरिमिका, 4. याज्यानुवाक्या, 5. अश्वमेधाद्यनुवचनम्।
64. प्रश्न- कः वेदः अध्वर्युवेदः ?
उत्तरम्- यजुर्वेदः।
65. प्रश्न- शतपथे कति अध्यायाः सन्ति?
उत्तरम्- 100 अध्यायाः,
66. प्रश्न- काण्वशास्त्रीय-शतपथे कति काण्डानि, कति अध्यायाः, कति ब्राह्मणानि, कियत्यः कण्डिकाश्च सन्ति?
उत्तरम्- 104अध्यायाः, 17 काण्डानि, 435 ब्राह्मणाः, 6806 कण्डिकाश्च।
67. प्रश्न- शतपथस्य शाब्दिकोऽर्थः किमस्ति?
उत्तरम्- "शतं पन्थानो यस्य तच्छतपथम्।
68. प्रश्न- माध्यन्दिनीय-शतपथे कति प्रपाठकाः सन्ति?
उत्तरम्- 68 प्रपाठकाः।
69. प्रश्न- काण्वशास्त्रीय-शतपथे कति प्रपाठकाः सन्ति?
उत्तरम्- प्रपाठकाभावः।
70. प्रश्न- यजुर्वेदस्य उपवेदः कोऽस्ति?
उत्तरम्- धनुर्वेदः।
71. प्रश्न-यजुर्वेदस्य कौ द्वौ भेदौ?
उत्तरम्-1. शुक्लयजुर्वेदः, 2. कृष्णयजुर्वेदः। (शुक्लकृष्णयजुर्वेदौ)
73. प्रश्न- बृहदारण्यकस्य प्रवक्ता कोऽस्ति?
उत्तरम्- याज्ञवल्क्यः।
74. प्रश्न- ईशावास्योपनिषद् कस्याः संहितायाः अन्तिमाध्यायःवर्तते?
उत्तरम्- यजुर्वेद-संहितायाः।
75. प्रश्न- "तन्मे मनः शिवसंकल्पमस्तु" अस्य मन्त्रांशस्य सूक्तं किम्?
उत्तरम्- शिवसंकल्प-सूक्तम्।

76. प्रश्न- वाजसनेयि-संहिताया: सम्बन्ध: केन वेदेन विद्यते?
उत्तरम्- यजुर्वेदेन।
77. प्रश्न- पुरुषमेघ-नामक-यज्ञस्य वर्णनं कस्मिन् वेदे वर्तते?
उत्तरम्- यजुर्वेदे।

(ख) शुक्लयजुर्वेद:

76. प्रश्न- माध्यन्दिन्-शाखा-सम्बद्ध: वेदविशेष: क:?
उत्तरम्-शुक्लयजुर्वेद:।
77. प्रश्न- शुक्लयजुर्वेदस्य काण्वशाखायां कति मन्त्रा: विद्यन्ते?
उत्तरम्- (2086)
78. प्रश्न- "ईशोपनिषद्" कस्मिन् वेदे अस्ति?
उत्तरम्- शुक्लयजुर्वेदे।
79. प्रश्न- शुक्ल-यजुर्वेदेन सम्बद्धं सूत्रं किम्?
उत्तरम्- कात्यायन-श्रौत्रसूत्रम्।
80. प्रश्न- शुक्ल-यजुर्वेदस्य किं गृह्यसूत्रम्?
उत्तरम्- पारस्करगृह्यसूत्रम्।
81. प्रश्न- शुक्ल-यजुर्वेदेन सम्बद्धं किं शुल्वशास्त्रम्?
उत्तरम्- कात्यायन-शुल्वशास्त्रम्।
82. प्रश्न- "शिवसंकल्पसूक्तेन" सम्बद्ध: वेद: क:?
उत्तरम्- शुक्लयजुर्वेद:।
83. प्रश्न- शुक्लयजुर्वेदस्य आरण्यकग्रन्थ: क:?
उत्तरम्- बृहदारण्यकम्।
84. प्रश्न- कस्य वेदस्य खण्डविशेष: ईशावास्योपनिषदस्ति?
उत्तरम्- शुक्लयजुर्वेदस्य।
85. प्रश्न- शुक्लयजुर्वेदस्य ब्राह्मणं किमस्ति?
उत्तरम्- शतपथब्राह्मणम्।
86. प्रश्न- शुक्लयजुर्वेदस्य कात्यायनश्रौत्रसूत्रस्य नामान्तरं किमस्ति?
उत्तरम्- पारास्करश्रौत्रसूत्रम्।
87. प्रश्न- शुक्ल-यजुर्वेदे कति अध्याया:, कति मन्त्रा: सन्ति?
उत्तरम्- 40 अध्याया:, 4061मन्त्रा:।
88. प्रश्न- तेन त्यक्तेन भुञ्जीथा इति कस्य वेदस्योक्ति:?
उत्तरम्- शुक्ल-यजुर्वेदस्य।
89. प्रश्न- शुक्लयजुर्वेदस्य कियत्य: शाखा: वर्तन्ते?
उत्तरम्- 15 पञ्चदश शाखा:।
90. प्रश्न- शुक्ल-यजुर्वेदस्य गृह्यसूत्रं किम्?
उत्तरम्- पारस्कर:।

91. प्रश्न-शुक्लयजुर्वेदे "पिनाकधनुष" इति सम्बद्धा देवता का?
उत्तरम्- रुद्रः।
92. प्रश्न- उव्वटोऽस्ति कस्य भाष्यकारः?
उत्तरम्- शुक्लयजुर्वेदस्य।
93. प्रश्न- शतपथब्राह्मणं कस्य वेदस्य ब्राह्मणम्?
उत्तरम्- शुक्लयजुर्वेदस्य।
94. प्रश्न- शुक्लयजुर्वेदस्य शुल्बसूत्रं किमस्ति?
उत्तरम्- कात्यायनशुल्बसूत्रम्।
95. प्रश्न- शुक्लयजुर्वेदस्य धर्मसूत्रम् अस्ति?
उत्तरम्- हारीतधर्मसूत्रम्।
96. प्रश्न- शंखधर्मसूत्रेण सम्बद्धः वेदविशेषः कः?
उत्तरम्- शुक्लयजुर्वेदः।
97. प्रश्न- शुक्ल यजुर्वेदस्य कियत्यः शाखाः सन्ति?
उत्तरम्- पञ्चदश शाखाः।
98. प्रश्न- वाजसनेयी-शाखायाः अपरनाम किमस्ति?
उत्तरम्- माध्यन्दिनी-शाखा।
99. प्रश्न- शुक्लयजुर्वेदीय उपनिषदः कति सन्ति?
उत्तरम्- (19 एकोनविंशतिः।)
100. प्रश्न- बृहदारण्यकं केन वेदेन सम्बन्धितमस्ति?
उत्तरम्- शुक्लयजुर्वेदेन।
101. प्रश्न- शुक्ल-यजुर्वेदे कति अनुवाकाः विद्यन्ते?
उत्तरम्- (303 अनुवाकाः)
102. प्रश्न- शुक्लयजुर्वेदानुसारं "पिनाक" कस्य धनुषः?
उत्तरम्- रुद्रस्य।
103. प्रश्न शुक्लयजुर्वेदस्य वाजसनेयिशाखायां कति अध्यायाः विद्यन्ते?
उत्तरम्- चत्वारिंशत्(40)
104. प्रश्न- शुक्ल-यजुर्वेदस्य उपलब्धः शाखाः काः?
उत्तरम्- वाजसनेयी एवं कण्व शाखाः।

(ग) कृष्ण-यजुर्वेदः

105. प्रश्न- कृष्ण-यजुर्वेदस्य कियत्यः शाखाः समुपलब्धाः सन्ति?
उत्तरम्- चतस्रः, 1. तैत्तिरीयः, 2. मैत्रायणी, 3. काठकः, 4. कठ-कपिष्ठलः।
106. प्रश्न- कृष्ण यजुर्वेदस्य कियत्यः शाखाः सन्ति?
उत्तरम्- षडशीति शाखाः।
107. प्रश्न- कृष्णयजुर्वेदीय काठक संहिता कति स्थानकेषु विभेदितः अस्ति?
उत्तरम्- (5) पञ्च।

108. प्रश्न- कृष्णयजुर्वेदस्य कति उपनिषदः सन्ति?
उत्तरम्- (32 द्वात्रिंशत्।)
109. प्रश्न- कृष्णयजुर्वेदस्य आरण्यकं किमस्ति?
उत्तरम्- तैत्तिरीय-आरण्यकम्।
110. प्रश्न- कृष्णयजुर्वेदेन सम्बधितं ब्राह्मणं किम् ?
उत्तरम्- तैत्तिरीय ब्राह्मणम्।
111. प्रश्न- कृष्णयजुर्वेदस्य कस्य अन्यब्राह्मणस्य गवेषकः उल्लेखयति?
उत्तरम्- काठक ब्रह्मणस्य।
112. प्रश्न- कृष्णयजुर्वेदस्य कियत्यः शाखाः वर्तन्ते?
उत्तरम्- 86 षडशीति।
113. प्रश्न- कृष्ण-यजुर्वेदे कति मन्त्राः सन्ति?
उत्तरम्-18, 000 मन्त्राः।
114. प्रश्न- कृष्णयजुर्वेदस्य ब्राह्मणमस्ति?
उत्तरम्- मैत्रायणीब्राह्मणम्।
115. प्रश्न- कृष्णयजुर्वेदस्य कियत्यः शाखाः समुपलभ्यन्ते?
उत्तरम्- (04) चतुरः।
116. प्रश्न- तैत्तिरीयशाखया सम्बद्धः वेदविशेषः कः?.
उत्तरम्- कृष्णयजुर्वेदः।
117. प्रश्न- कृष्णयजुर्वेदस्य शाखाः काः सन्ति?
उत्तरम्- तैत्तिरीय मैत्रायणी काठक कठ-कपिष्ठलशाखा।
118. प्रश्न- कृष्ण-यजुर्वेदस्य कति शुल्वसूत्राणि?
उत्तरम्- (6) षट्।
119. प्रश्न- "बौधायन-शुल्वसूत्रम्" केन वेदेन सम्बद्धं वर्तते?
उत्तरम्- कृष्ण-यजुर्वेदेन।
120. प्रश्न- "आपस्तम्ब-शुल्वसूत्रम्" कस्य वेदस्य विद्यते?
उत्तरम्- कृष्ण-यजुर्वेदस्य।
121. प्रश्न- "कपिष्ठल-शाखा" केन वेदेन सम्बद्धा?
उत्तरम्- कृष्ण-यजुर्वेदेन।
122. प्रश्न- "कठोपनिषद्" इत्यनेन सम्बद्धो वेदः कः?
उत्तरम्- कृष्णयजुर्वेदः।
123. प्रश्न- कृष्ण-यजुर्वेदस्य कियत्यः उपनिषदः सन्ति?
उत्तरम्- 1. तैत्तिरीयोपनिषद्, 2. कठोपनिषद्, 3. श्वेताश्वतरोपनिषद्, 4. मैत्रायण्युपनिषद्, 5. महानारायणोपनिषच्चेति।
124. प्रश्न- कृष्ण-यजुर्वेदस्य किं प्रातिशाख्यम्?
उत्तरम्- तैत्तिरीय-प्रातिशाख्यम्।

125. प्रश्न- कृष्णयजुर्वेदीय: श्रौतसूत्रग्रन्था: के?
उत्तरम्- बौधायनश्रौतसूत्रम्, आपस्तम्बश्रौतसूत्रम्, सत्याषाढ़श्रौतसूत्रम्।
126. प्रश्न- वैखानसश्रौतसूत्रेण सम्बद्ध: वेदविशेष क:?
उत्तरम्- कृष्णयजुर्वेद:।
127. प्रश्न- कृष्णयजुर्वेदस्य उपनिषद् अस्ति?
उत्तरम्- श्वेता श्वतरोपनिषद्।
128. प्रश्न- कृष्णयजुर्वेदस्य शुल्बसूत्राणि कानि?
उत्तरम्- मानवशुल्बसूत्रम्, आपस्तम्बशुल्बसूत्रम्, बसैधायनशुल्बसूत्रम्।
129. प्रश्न- मैत्रायणी शुल्बसूत्रेण सम्बद्ध: वेदविशेष: क:?
उत्तरम्- कृष्णयजुर्वेद:।
130. प्रश्न- वाराहशुल्बसूत्रेण सम्बद्ध:वेदविशेष: क:?
उत्तरम्- कृष्णयजुर्वेद:।
131. प्रश्न- कृष्णयजुर्वेदस्य शुल्बसूत्रं किम्?
उत्तरम्- वाधूलशुल्वसूत्रम्।
132. 40. कृष्णयजुर्वेदस्य धर्मसूत्राणि कानि?
उत्तरम्- विष्णुधर्मसूत्रम्, वशिष्ठधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्।
133. प्रश्न- कृष्णयजुर्वेदीया: गृह्यसूत्रग्रन्था: के?
उत्तरम्- कठगृह्यसूत्रम्, बौधायनगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्।
134. प्रश्न- सत्याषाढ़गृह्यसूत्रेण सम्बद्ध: वेद: क:?
उत्तरम्- कृष्णयजुर्वेद:।

4. सामवेद:-The third of the four Vedas.

(द) सामवेदस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्न- सामवेदस्य कियत्य: शाखा: श्रूयन्ते?
उत्तरम्- (1000)
2. प्रश्न- सम्प्रति सामवेदस्य कियत्य: शाखा: समुपलभ्यन्ते?
उत्तरम्- (03) तिस्र:, 1. राणायनीय:, 2. कौथुमीय:, 3. जैमिनीय:।
3. प्रश्न- सामवेदस्य कौथुमशाखायां पूर्वार्चिके कति मन्त्रा: विद्यन्ते?
उत्तरम्-(650)
4. प्रश्न- सामवेदस्य कौथुमशाखायाम् उत्तरार्चिके कति मन्त्रा: विद्यन्ते?
उत्तरम्- (1225)
5. प्रश्न- सामवेदस्य उत्तरार्चिके कति प्रपाठका: विद्यन्ते?
उत्तरम्- (9) नव प्रपाठका:।
6. प्रश्न- सामगानस्य कति विभागा: विद्यन्ते?
उत्तरम्- (05) पञ्च।

7. प्रश्न- राणायनीय-शाखया सम्बद्धः वेदविशेषः कः?
   उत्तरम्- सामवेदः।
8. प्रश्न- सामवेदस्य शाखा काऽस्ति?
   उत्तरम्- जेमिनीयशाखा।
9. प्रश्न- ऋग्वेदस्य कति मन्त्राः सामवेदे समुपलभ्यन्ते?
   उत्तरम्- (1504) वा (1800)
10. प्रश्न- का सामगानपद्धतिः"हुँकारेण" प्रारभ्यते?
    उत्तरम्- प्रस्तावः।
11. प्रश्न- सा सामगानपद्धतिः, या "ॐ कारेण" प्रारभ्यते?
    उत्तरम्- उद्गीथः।
12. प्रश्न- सामवैदिक-पूर्वार्चिकस्य पंचमः अध्यायः कः?
    उत्तरम्- पवमानपर्वम्।
13. प्रश्न- सामवेदीयः उपनिषद्ग्रन्थः किमस्ति?
    उत्तरम्- केनोपनिषद्।
14. प्रश्न- छान्दोग्योपनिषद्-सम्बद्ध-वेदविशेषः कः?
    उत्तरम्- सामवेदः।
15. प्रश्न- सामवेदीयः प्रातिशाख्यग्रन्थः कः?
    उत्तरम्- पुष्यसूत्रप्रातिशाख्यम्।
16. प्रश्न- शाकटायनकृतस्य ऋक्तन्त्रस्याधारभूतः वेदः कः?
    उत्तरम्- सामवेदः।
17. प्रश्न- "नारदीयशिक्षा" कस्य वेदस्य शिक्षा-वेदांगमस्ति?
    उत्तरम्- सामवेदस्य।
18. प्रश्न- खादिरश्रौतसूत्रेण सम्बद्धः वेदविशेषः कः?
    उत्तरम्- सामवेदः।
19. प्रश्न- सामवेदसम्बद्धः श्रौत्रसूत्रविशेषः कः?
    उत्तरम्- जैमिनीयश्रौत्रसूत्रम्।
20. प्रश्न- आर्षेयश्रौतसूत्रस्य नामान्तरं किमस्ति?
    उत्तरम्- मशकश्रौत्रसूत्रम्।
21. प्रश्न- खादिरगृह्यसूत्रेणसम्बद्धः वेदः कः?
    उत्तरम्- सामवेदः।
22. प्रश्न- सामवेदीयः गृह्यसूत्रग्रन्थाः के?
    उत्तरम्- गौतमगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, जैमिनीयगृह्यसूत्रम्।
23. प्रश्न- गौतमधर्मसूत्रेण सम्बद्धः वेदः कः?
    उत्तरम्- सामवेदः।

24. प्रश्न- वंशब्राह्मणेन सम्बद्धः वेदविशेषः कः?
उत्तरम्- सामवेदः।
25. प्रश्न- अर्वाचीनतमः ब्राह्मणग्रन्थः कः?
उत्तरम्- गोपथब्राह्मणम्।
26. प्रश्न- शुनः-शेपाख्यानम् कस्मिन् ब्राह्मणे वर्णितम् अस्ति?
उत्तरम्- ऐतरेयब्राह्मणे।
27. प्रश्न- पुरुरवा-उर्वशी-आख्यानं कस्मिन् ब्राह्मणे वर्णितम् अस्ति?
उत्तरम्- शतपथब्राह्मणे।
28. प्रश्न- "महाब्राह्मणम्" इत्यनेन विशेषणेन विशिष्टं ब्राह्मणं किम्?
उत्तरम्- ताण्ड्यब्राह्मणम्।
29. प्रश्न-ऐतरेयाण्यके कति अध्यायाः वर्तन्ते?
उत्तरम्- अष्टादश। (18)
30. प्रश्न- सामवेदीये वंशब्राह्मणे कति खण्डाः सन्ति?
उत्तरम्- (03) त्रयः।
31. प्रश्न- "जैमिनीयब्राह्मणं (श्रौत्रसूत्रम्) केन वेदेन सम्पृक्तम्?
उत्तरम्- सामवेदेन।
32. प्रश्न- सामवेदस्य प्रमुखः प्रतिपाद्यविषयोऽस्ति?
उत्तरम्- गानम्।
33. प्रश्न- ताण्ड्यब्राह्मणं कस्य अस्ति?
उत्तरम्- सामवेदस्य।
34. प्रश्न- नचिकेतसः पितुर्नाम किम्?
उत्तरम्- वाजस्रवा।
35. प्रश्न- सामवेदः "सहस्रवर्त्मा सामवेदः" कथं कथ्यन्ते?
उत्तरम्- (1000) सहस्रशाखा कारणात्।
36. प्रश्न- सामवेदः केषु विभाजितः वर्तते?
उत्तरम्- आर्चिकेषु।
37. प्रश्न- सामवेदे कति आर्चिकाः सन्ति?
उत्तरम्- द्वौ, 1. पूर्वार्चिकः, 2. उत्तरार्चिकः।
38. प्रश्न- सामवेदस्य स्व-मन्त्राः कति सन्ति?
उत्तरम्- (75) पञ्चसप्ततिः मन्त्राः।
39. प्रश्न- कौथुमशाखानुसारेण सामवेदे कति मन्त्राः विद्यन्ते?
उत्तरम्- (1875)
40. प्रश्न- सामवेदे कति छन्दाः प्रस्तुताः सन्ति?
उत्तरम्- द्वौ, 1. गाथा, 2. प्रगाथा।

41. प्रश्न- सामवेदे कति प्रमुख-स्वराः सङ्गीतस्य आधारः मन्यन्ते?
उत्तरम्- सप्तस्वराः।
42. प्रश्न- सामवेदीय मन्त्रेषु कानि गानानि भवन्ति?
उत्तरम्- 1. प्रकृतिगानम्, 2. ऊहगानम्, 3. उह्यगानम्।
43. प्रश्न- प्रकृतगानेषु कानि गानानि भवन्ति?
उत्तरम्- 1. ग्रामगेयगानम्, 2. आरण्यक गानम्।
44. प्रश्न- ग्रामगेयगानेषु कति पर्वाणि भवन्ति?
उत्तरम्- त्रीणि, 1. आग्नेयम्, 2. ऐन्द्रम्, 3. पवमानम्।
45. प्रश्न- आरण्यकगानेषु कति पर्वाणि भवन्ति?
उत्तरम्- पञ्च, 1. अर्क, 2. द्वन्द्व, 3. व्रतम्, 4. शुक्रिय, 5. महानाम्नी।
46. प्रश्न- "सामवेदादिदं गीतं सञ्जग्राह पितामहः" इत्यादयः संगीताचार्यः कः?
उत्तरम्- शार्ङ्गदेवः।
47. प्रश्न- "सङ्गीत-रत्नाकरः" इत्यस्य ग्रन्थस्य कः रचनाकारः?
उत्तरम्- शार्ङ्गदेवः।
48. प्रश्न- सामवेदे प्रयुक्त-प्रगाथा-छन्दं कयो द्वयोःछन्दयोःमिश्रणं वर्तते?
उत्तरम्- गायत्री-जगती इत्ययोः।
49. प्रश्न- सामवेदे ऋग्वेदस्य केभ्यः मण्डलेभ्यः मन्त्रः सङ्गृहीतः अस्ति?
उत्तरम्- अष्टम-नवम-मण्डलाभ्याम्।
50. प्रश्न- सामवेदस्य जैमिनीय-शाखायाः अध्ययनं कुत्र भवति?
उत्तरम्- केरल राज्ये।
51. प्रश्न- भारते कस्याः सामवेदीयशाखयाः अति प्रसिद्धिं अस्ति?
उत्तरम्- कौथुमी शाखायाः।
52. प्रश्न- कौथुमीशाखायाः उच्चारणस्य के द्वे पद्धती स्तः?
उत्तरम्- 1. नागरपद्धतिः, 2. मद्रपद्धति।
53. प्रश्न- सामवेदस्य कति ब्राह्मणानि सन्ति?
उत्तरम्- (9 नव) 1. प्रौढ़(ताण्ड्य/महाब्राह्मण) 2. षड्विंशः, 3. सामविधान, 4. आर्षेय, 5. देवताध्यायः, 6. छान्दोग्योपनिषद् ब्रह्मणः, 7. संहितोपनिषद् ब्राह्मणः, 8. वंशब्राह्मणः, 9. जैमिनीयब्राह्मणः।
54. प्रश्न- तवलकारः(जैमिनीयोपनिषद् ब्राह्मण) केन वेदेन सम्बद्धः अस्ति?
उत्तरम्- सामवेदेन।
55. प्रश्न- आरण्यकानां मुख्यविषयः किमस्ति?
उत्तरम्- आध्यात्मिकं चिन्तनम्।
56. प्रश्न- सामवेदीय महावाक्यं "तत्त्वमसि," इत्यस्य निरूपणं कस्याम् उपनिषदि वर्तते?
उत्तरम्-छान्दोग्योपनिषदि।

57. प्रश्न- सामवेदस्य उपवेद: कोऽस्ति?
उत्तरम्- गन्धर्ववेद:।
58. प्रश्न-यज्ञानुष्ठानस्य अवसरोपरि ऋषय: कं वेदं गायन्ति?
उत्तरम्- सामवेदम्।
59. प्रश्न- सामवेदे कति ब्राह्मणग्रन्था: सन्ति?
उत्तरम्- (9. नव ब्राह्मणग्रन्था:)
60. प्रश्न- सामवेदस्य ऋषि: कोऽस्ति?
उत्तरम्- सूर्य:।
61. प्रश्न- सामवेदस्य ग्रह्यसूत्रं किमस्ति?
उत्तरम्- 1. गोभिल:, 2. खादिर:।
62. प्रश्न- सामवेदे स्व-मन्त्रा: कति सन्ति?
उत्तरम्- 75 मन्त्रा:।
63. प्रश्न- "अग्निआयाहि वीतय" इति कस्य वेदस्योक्ति:?
उत्तरम्- सामवेदस्य।
64. प्रश्न- को गीत्यात्मको वेद:?
उत्तरम्- सामवेद:।
65. प्रश्न- "केनोपनिषद्" कस्यवेदस्य कया शाखया सम्बद्धा अस्ति?
उत्तरम्- सामवेदस्य जैमिनीय-शाखया।
66. प्रश्न- सामवेदेन सम्बद्धं किं प्रातिशाख्यम्?
उत्तरम्- सामप्रातिशाख्यम्।
67. प्रश्न- सामवेदेन सम्बद्धानि कियन्ति गृह्यसूत्राणि?
उत्तरम्- (3) त्रीणि।
68. प्रश्न- "गोभिल-गृह्यसूत्रम्" सामवेदस्य कया शाखया सम्बद्धम्?
उत्तरम्- कौथुम-शाखया।
69. प्रश्न- "गौतम-धर्मसूत्रम्" कस्य वेदस्य कया शाखया सम्बद्धम् ?
उत्तरम्- सामवेदस्य राणायणीय-शाखया।
70. प्रश्न- "हुँ" इत्यत: प्रारम्भ: सामगान-पद्धते: किं नाम?
उत्तरम्- प्रस्ताव:।
72. प्रश्न- "ॐ" इत्यत: प्रारम्भ: सामगान-पद्धते: किं नाम?
उत्तरम्- उद्गीथ:।
73. प्रश्न- सामवेदस्य ऋत्विक् क:?
उत्तरम्- उद्गाता।

5. अथर्ववेदः-The last of four Scriptures(Vedas)

(ध) अथर्ववेदस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्न- ब्रह्मा कस्य वेदविशेषस्य ऋत्विगस्ति?
   उत्तरम्-अथर्ववेदस्य।
2. प्रश्न- "ब्रह्मवेद" इत्यभिधानेन अभिहितः वेदः कः?
   उत्तरम-अथर्ववेदः।
3. प्रश्न- "भैषज्यवेदः" इति कस्य नामान्तरः विद्यते?
   उत्तरम्- अथर्ववेदस्य।
4. प्रश्न- चारणवैद्यशाखा-सम्बद्धः वेद विशेषः कः?
   उत्तरम्- अथर्ववेदः।
5. प्रश्न- अंगिरोवेदः" इति कस्योपाधिः वर्तते?
   उत्तरम्- अथर्ववेदस्य।
6. प्रश्न- सम्प्रति अथर्ववेदस्य कियत्यः शाखाः उपलभ्यन्ते?
   उत्तरम्- (09) नवशाखाः।
7. प्रश्न- अथर्ववेदस्य काण्डसंख्या काऽस्ति?
   उत्तरम्- (20) विशतिः।
8. प्रश्न- अथर्ववेदस्य सम्पूर्णसूक्तसंख्या काऽस्ति?
   उत्तरम्- (731) वा (730) वा (760)
9. प्रश्न- अथर्ववेदस्य समग्रमन्त्रसंख्या काऽस्ति?
   उत्तरम्- (5987)
10. प्रश्न- "सर्पवेदः" कस्योपवेदः वर्तते?
    उत्तरम्- अथर्ववेदस्य।
11. प्रश्न- अथर्ववेदस्य बृहत्तमः काण्डविशेषः के?
    उत्तरम्- (20) विंशतिः।
12. प्रश्न- अथर्ववेदस्य ब्राह्मणम् अस्ति?
    उत्तरम्- गोपथब्राह्मणम्।
13. प्रश्न- कस्य वेदस्य किमपि आरण्यकम् नास्त्येव?
    उत्तरम्-अथर्ववेदस्य।
14. प्रश्न- "माण्डूकी-शिक्षया सम्बद्धः वेदविशेषः कः?
    उत्तरम्- अथर्ववेदः।
15. प्रश्न- अथर्ववेदीयः प्रातिशाख्यग्रन्थः कः?
    उत्तरम्- शौनकीयप्रातिशाख्यम्।
16. प्रश्न- किं नाम अथर्ववेदीयं श्रौतसूत्रम्?
    उत्तरम्- वैतानश्रौतसूत्रम्।

17. प्रश्न- कौशिकगृह्यसूत्रेण सम्बद्धः वेदविशेषः कः?
उत्तरम्- अथर्ववेदः।
18. प्रश्न- कस्य वेदस्य धर्मसूत्रग्रन्थः नास्त्येव?
उत्तरम्- अथर्ववेदस्य।
19. प्रश्न- भैषज्यसूक्तानि कुत्र वर्तन्ते?
उत्तरम्- अथर्ववेदे।
20. प्रश्न- शौनकशाखा केन वेदेन सम्पृक्ता?
उत्तरम्- अथर्ववेदेन।
21. प्रश्न- गोपथब्राह्मणं कं वेदमवलम्बते?
उत्तरम्- अथर्ववेदम्।
22. प्रश्न- गोपथः कति भागेषु विभेदितोऽस्ति?
उत्तरम्- द्वयोः, 1. पूर्वगोपथः, 2. उत्तरगोपथः।
23. प्रश्न- वरुणदेवस्य स्थानं किम्?
उत्तरम्- द्युस्थानम्।
24. प्रश्न- "भूमिसूक्तं कं वेदं विषयी करोति?
उत्तरम्- अथर्ववेदम्।
25. प्रश्न- को नाम देवः वृत्रहा इत्युच्यते?
उत्तरम्- इन्द्रः।
26. प्रश्न- पृथिवी सूक्तं कस्य वेदस्य अस्ति?
उत्तरम्- अथर्ववेदस्य।
27. प्रश्न- मैत्रेयी शिक्षामवाप-?
उत्तरम्- याज्ञवल्क्यात्।
28. प्रश्न- अथर्ववेदः काभिः संज्ञाभिः अभिहितोऽस्ति?
उत्तरम्- 1. अथर्वाङ्गिरोवेदः, 2. ब्रह्मवेदः, 3. भिषग्वेदः, 4क्षत्रवेदः।
29. प्रश्न- अथर्ववेदस्य शाखायाः कानि नामानि?
उत्तरम्- 1. पैप्पलादः, 2. तौदः, 3. मौदः, 4. शौनकः, 5. जाजलः, 6. जलदः, 7. ब्रह्मवदः, 8. देवदर्शः, 9. चारणवैद्यः।
30. प्रश्न- वर्तमाने काः-काः शाखाः समुपलभ्यन्ते?
उत्तरम्- 1. पैप्पलाद शाखा, 2. शौनक शाखा।
31. प्रश्न- अथर्ववेदः केषु विभजितः?
उत्तरम्- काण्डेषु।
32. प्रश्न- अथर्ववेदे समग्रतया कति काण्डानि सन्ति?
उत्तरम्- (20) विंशति काण्डानि।
33. प्रश्न-अथर्ववेदस्य विंशति-काण्डाणां अधिकांश-सूक्तानि केन सम्बन्धितानि सन्ति?
उत्तरम्- इन्द्रेण।

34. प्रश्न- अथर्ववेदस्य प्रतिपाद्य विषय: किमस्ति?
उत्तरम्- ब्रह्मविषयकदार्शनिकसिद्धान्त-राजनीति-प्रायश्चित्त-भैषज्यकर्मशान्तिक व पौष्टिककर्म सामनस्य कर्म-आयुष्यकर्म-अभिचारकर्म।
35. प्रश्न- कृषिकर्मण: विवेचनं कस्मिन् वेदे अस्ति?
उत्तरम्- अथर्ववेदे।
36. प्रश्न- अथर्ववेदस्य तृतीयकाण्डस्य सप्तदशसूक्तं केन नाम्ना विख्यातम्?
उत्तरम्- कृषि-सूक्तमितिनाम्ना।
37. प्रश्न- अथर्ववेदे समग्रतया कति प्रपाठका: सन्ति?
उत्तरम्- (36) षट्त्रिंशत् प्रपाठका:।
38. प्रश्न- अथर्ववेदे आहत्य कति मन्त्रा: सन्ति?
उत्तरम्- (5, 987 मन्त्रा:।)
39. प्रश्न- कानि अथर्ववेदीय काण्डानि विवाहेन सम्बन्धितानि सन्ति?
उत्तरम्- (14) चतुर्दशतमे काण्डे।
40. प्रश्न- कस्मिन् काण्डे दु:स्वप्ननाशार्थ-प्रार्थना वर्तते?
उत्तरम्- (16) षोडषतम काण्डे।
41. प्रश्न- अध्यात्मविषयक-काण्डानि कानि सन्ति?
उत्तरम्- (13, 15, 19 तमानि काण्डानि)
42. प्रश्न- कस्मिन् काण्डे चत्वारि मन्त्राणां सूक्तानि सन्ति?
उत्तरम्- प्रथमकाण्डे।
43. प्रश्न- पञ्चानां मन्त्राणां समाहार-सूक्तानि कस्मिन् काण्डे सन्ति?
उत्तरम्- द्वितीय-काण्डे।
44. प्रश्न- . तृतीयकाण्डे प्रत्येक-सूक्तेषु कति मन्त्रा:सन्ति?
उत्तरम्- षड्-मन्त्रा:।
45. प्रश्न- चतुर्थ-काण्डस्य सूक्तेषु कति-कति मन्त्रा:सन्ति?
उत्तरम्- सप्त वा अष्ट मन्त्रा:।
46. प्रश्न- कस्मिन् काण्डे अष्ट वा तदधिका: मन्त्रा: सन्ति?
उत्तरम्- पञ्चम-काण्डे।
47. प्रश्न- षष्ठे काण्डे कति सूक्तानि सन्ति?
उत्तरम्-(118 सूक्तानि)
48. प्रश्न- सप्तम्-काण्डे कति सूक्तानि सन्ति?
उत्तरम्- (118 सूक्तानि)
49. प्रश्न- अथर्ववेदे संसारस्योत्पत्ति केन कथ्यते?
उत्तरम्- जलेन(अथर्ववेद-4/2/6/8)
50. प्रश्न- भैषज्यसूक्तेषु कानि कानि चिकित्सा प्रणाल्याया: वर्णनमस्ति?
उत्तरम्-1. जल-चिकित्सा, 2. सूर्यकिरण-चिकित्सा, 3. मानसिक-चिकित्सा।

51. प्रश्न- आयुर्वेदस्य मूलं कस्मिन् वेदे दृश्यते?
उत्तरम्- अथर्ववेदे।
52. प्रश्न- . अथर्ववेदस्य ऋत्विक् किं कथ्यते?
उत्तरम्- ब्रह्मा।
53. प्रश्न-भैंषज्य-सूक्तेषु दन्तपीड़ाया: कारणं किं मन्यते?
उत्तरम्- कृमिम्।
54. प्रश्न- ब्रह्मण: यज्ञे किं कार्यं भवति?
उत्तरम्- सम्पूर्ण-व्यवस्थाया: निरीक्षणम्।
55. प्रश्न- ."मा भ्राता भ्रातरं द्विक्षन्" इति मन्त्र: कुत: उद्धृत:?
उत्तरम्- अथर्ववेदात् (3/30/3)
56. प्रश्न- अथर्ववेदस्य विशिष्टसूक्तानि कानि?
उत्तरम्-1. गृहमहिमासूक्तम्, 2. दीर्घापुष्पसूक्तम्, 3. संज्ञानसूक्तम्, 4. पृथ्वीसूक्तम्।
57. प्रश्न- अथर्ववेदस्य प्रथममन्त्रं किमस्ति?
उत्तरम्- शं नो देवीरभिष्टये आपो भवन्तु पीतये। शं योरभिस्त्रवन्तु न:।
58. प्रश्न- त्रिष्टुप्-छन्दसि कति अक्षराणि सन्ति?
उत्तरम्-(44) चतुश्चत्वारिंशत्।
59. प्रश्न- अथर्ववेदेन सम्बद्धा: उपनिषद: कियत्य: सन्ति?
उत्तरम्- (31 एकत्रिंशत्।
60. प्रश्न- अथर्ववेदे केषां प्रकाराणां औषधिनां वर्णनं विद्यते?
उत्तरम्- जन्म-मरणम्, उच्चाटनम्, मोहनादि मन्त्राणां औषधिनां वर्णनम्।
61. प्रश्न- अथर्ववेदस्य उपवेद: क:?
उत्तरम्-अर्थशास्त्रम्।
62. प्रश्न- आरण्यकग्रन्थानां मुख्यविषय: किमस्ति?
उत्तरम्-आध्यात्मिक-चिन्तनम्।
63. प्रश्न- "सत्यमेव जयते" इति कस्मिन् उपनिषदि अस्ति?
उत्तरम्- मुण्डकोपनिषदि।
64. प्रश्न- अथर्ववेदस्य ग्रह्यसूत्रं किमस्ति?
उत्तरम्-कौशिक ग्रह्यसूत्रम्।
65. प्रश्न- "शंनोदेवीरभीष्टये. . . " इति कस्य वेदस्योक्ति:?
उत्तरम्- अथर्ववेदस्य।
66. प्रश्न- पैप्लाद संहिता कस्य वेदस्य अस्ति?
उत्तरम्- अथर्ववेदस्य।
67. प्रश्न- "अथर्ववेदस्य शौनक-शाखया सम्बद्धा उपनिषद् का अस्ति?
उत्तरम्- मुण्डकोपनिषद्।

68. प्रश्न- "प्रश्नोपनिषद्" कस्य वेदस्य कया शाखया सम्बद्धा विद्यते?
उत्तरम्- अथर्ववेदस्य पिप्पलाद-शाखया।
69. प्रश्न- "माण्डूक्योपनिषद्" केन वेदेन सम्बद्धा?
उत्तरम्-अथर्ववेदेन।
70. प्रश्न- ओंकारस्य रहस्यवर्णनं कस्यामुपनिषदि वर्तते?
उत्तरम्- मण्डूक्योपनिषदि।
71. प्रश्न- उपनिषदोऽपरं नाम किम्?
उत्तरम्- ब्रह्मविद्या।
72. प्रश्न- अथर्ववेदेन सम्बद्धं प्रातिशाख्यं किम्?
उत्तरम्- अथर्वप्रतिशाख्यम्।
73. प्रश्न- यज्ञस्य पूर्ण-संस्काराय को वेदः आवश्यकः?
उत्तरम्- अथर्ववेदः।

• • •

2

व्याकरणशास्त्रम्

The Science of Grammar

(क) व्याकरणस्य महत्त्वम्

परस्पर-मानवविचाराणाम् अभिव्यक्तिं शुद्धां, परिष्कृतां, परिमार्जितां च कर्तुं भाषाविशेषस्य व्याकरणम् आवश्यकम्। षट्सु वेदाङ्गेषु प्रधानं व्याकरणं, न केवलं वेदमन्त्रेषु विद्यमानानां अर्थावबोधनं करोति परं तु तेषां रक्षणमपि करोति। संस्कृतभाषायाः व्याकरणस्य च अध्ययनाध्यापनस्य परम्परा अतिप्राचीना वर्तते। व्याकरणशिक्षायाः ज्ञानं विना छात्राः शुद्धरूपेण भाषाज्ञानं न प्राप्तुं शक्नुवन्ति। व्याकरणेन भाषा व्यवस्थिता क्रियते। भाषा व्यवस्थितकरणाय व्याकरणस्य विश्लेषणम् आवश्यकं भवति। डॉ0 स्वीट महोदयेन "व्याकरणं भाषायाः विश्लेषणम्" इति उक्तम्। तदनुसारं व्याकरणेन एव भाषारचनाज्ञानं भवति। व्याकरणशिक्षणाभावे रचनायाः अनुवादस्य च शिक्षा अपूर्णा। शब्दरचनायाः वाक्यरचनायाश्च आधारः व्याकरणमेव अस्ति। उद्यानवनस्य मनुष्यपशुपक्ष्यादिभ्यः कण्टकाकीर्णं तन्त्रीकवचं यथा रक्षकं भवति तथा भाषायाः रक्षकमस्ति व्याकरणम्। भाषायाः साधुत्वासाधुत्वज्ञानम् अनेन ज्ञायते।

मुखं व्याकरणं स्मृतम्-

वेदपुरूषस्य मुखं भवति व्याकरणम्। "व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम्" इति व्युत्पत्त्यनुसारेण संस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्ध्यशुद्ध्योः विचारः व्याकरणेनैव क्रियते। ऋग्वेदकालतः एव व्याकरणशास्त्रस्य निर्देशः समुपलभ्यते, किन्तु व्याकरणस्य उत्पत्तिकथा तु तैत्तिरीयसंहितायां वर्णिताऽस्ति। महर्षे यास्कस्य निरुक्तग्रन्थे तु व्याकरणस्य अनेकेषां पारिभाषिकशब्दानां प्रयोगः समुपलभ्यते। व्याकरणस्य लब्धप्रतिष्ठाचार्यः पाणिनिः स्वकीयेऽष्टाध्यायीनामके ग्रन्थे स्वपूर्ववर्तीनां अनेकेषां वैयाकरणानां नाम निर्देशं चकार। पाणिनिः शब्दानुशासनग्रन्थद्वारा लौकिकसंस्कृतभाषां व्यवस्थापयामास। इत्थं शब्दानुशासनम् अष्टाध्यायी वा व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः अस्ति। अस्य पाणिनिव्याकरणस्य सम्प्रदायद्वयस्य उपलभ्यते, प्राचीनव्याकरणं नव्यव्याकरणञ्च। पूर्वाचार्याणामयं ज्ञाननिक्षेपः सम्प्रति भारतीयानां किमुत बुद्धिजीविनां मानवमात्राणाममूल्यो निधिः। एतेनैव भारतीया गौरवधुरं सगर्वमुद्वहन्ति। आधुनिकाः विद्वांसः प्रधानरूपेण व्याकरणशास्त्रप्रवर्तकान् अष्टावेव मन्यन्ते।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः।।

किमिति चेत्-मुखं विना भोजन-व्यापारः नास्ति। भोजनं विना शरीरं नास्ति। शरीरं विना प्राणरक्षणं न भवति। ऋग्वेदे व्याकरणस्य प्रशंसा एवमस्ति-

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्याँ आविवेश।।

व्याकरणस्य इच्छापूर्तिकारणत्वाद् वृषभेति नाम्ना सम्बोधनमस्ति। अस्य चत्वारि शृङ्गाणि भवन्ति। तानि-(1) नाम, (2) आख्यातः(क्रिया) (3) उपसर्गः, (4) निपातः। त्रयः पादाः-वर्तमान-भूत-भविष्यत्काला: एते त्रयः काला: विद्यन्ते। द्वे शीर्षे-सुप्, तिङ्। अस्य सप्त हस्ताः-प्रथमादयः सप्तविभक्तयः सन्ति। त्रिधा बद्धः-व्याकरणरूप वृषभः उरः, कण्ठः, शिरः, इति स्थानेषु बद्ध इति। अयं महान् देवो, यः मनुष्येषु प्रविष्टो विद्यते। भगवान् पतञ्जलिः व्याकरणस्य प्रयोजनानि प्रत्यपादयत्। तेषु (1) रक्षा, (2) ऊहः, (3) आगमः, (4) लघुः, (5) असंदेहः, (6) अपभाषणम्, (7) दुष्टःशब्दः, (8) अविद्वांसः (9) विभक्तिंकुर्वन्ति, (10) नामकरणमिति। (11) यदधीतम्, (12) यस्तु प्रयुंक्ते, (13) यो वा इमाम्, चत्वारि इत्यादि महाभाष्योदाहरणानि अपि व्याकरणमध्ययनानां प्रयोजनानि सन्ति।

छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते,
ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणन्तु वेदस्य, मुखं व्याकरणं स्मृतम्"।।
तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते।

इति पाणिनीयशिक्षाकारस्य वचनेन सिद्ध्यति यत् "मुखं व्याकरणं स्मृतम्" अत्र तु सूचयति यत् व्याकरणम् अन्य वेदांगैः अतुलनीयम् अस्ति। किंच श्वासंप्रश्वासस्य गतिशीलने सति समस्त लोकजीवनधारणे समर्था भवन्ति। व्याकरणशास्त्राणां विधिवत् ज्ञानं, वेदांग स्वरूपस्य रक्षां करोति एवं च स्वर्गे लोके च कामधुक् भवति इति वचनमपिचरितार्थं

भवति। समुचितज्ञानाभावे तु-

मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह,
स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोपराधात्

एतेन स्पष्टो भवति यत्-स्वरवर्णापराध-परिहाराय शिक्षाग्रन्थः अपेक्षितो वर्त्तते।

(ख) व्याकरणस्य निर्वचनानि-(निश्चित् वचनानि निर्वचनानि).

(1) "व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृति-प्रत्यय-विभाग-द्वारा निष्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्", वि आङ् इत्युपसर्ग पूर्वक कृञ् धातोः"करणाधिकरणयोश्च" इति सूत्रेण ल्युटि प्रत्ययेन सिद्ध्यति व्याकरणमितीदं पदं भवति।

(2) व्याक्रियन्ते-पृथक्क्रियन्ते साधुशब्दाः, असाधुशब्देभ्यः प्रकृतिप्रत्ययादिज्ञान महिम्नाऽनेनेति व्याकरणम्।

(3) व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः येनेति व्याकरणम्।

(4) व्याक्रियन्ते-परिज्ञायन्ते शब्दाः अनेनेति व्याकरणम्।

(5) शब्दानुशासनं व्याकरणम्।

(6) लक्ष्य लक्षणं व्याकरणम्।

(7) प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्याधायकं शास्त्रं व्याकरणम्।

(8) भाषायाः व्यावहारिकविश्लेषणमेव व्याकरणम्।

(9) आङ्ग्लभाषायां Grammar इति पदं Grammatike techne इति ग्रीक्भाषापदात् निष्पन्नम्। अस्यार्थः भवति-the art of letters.

(10) व्याकरणं केवलं संरचनायाः व्याकरणमस्ति।

(11) व्याकरणं नाम शब्दसाधुत्वव्यवस्थापकं शास्त्रम्।

(12) Grammar is a set of rules and regulations which controls and teaches us the correct use of the language.

(13) प्रथमो हि विद्वांसो वैयाकरणाः।

(14) शब्दज्ञानजनकं व्याकरणम्।

(15) अनुशिष्यन्तेऽपशब्देभ्यः पृथक् कृत्य कथ्यन्ते साधुशब्दानुशासनम्।

(16) व्याकरणन्तु वेदानां वेदः।

(17) व्याकरणज्ञाने सर्ववेदपारायणजं पुण्यमिति।

(18) शब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्यलक्षणात्मको वा ग्रन्थविशेषः व्याकरणम्।

(19) एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।

(20) प्रयोगशरणं व्याकरणम्। नावैयाकरणाय निर्ब्रूयात्।

(21) शब्दब्रह्मणि निष्णातः पर ब्रह्माधिगच्छति।

(ग) व्याकरणस्य परम्पराक्रम

ब्रह्मा संस्कृतव्याकरणस्य आदि ज्ञाता अस्तीति मन्यते। ब्रह्मावृहस्पतये प्रोवाच, वृहस्पतिरिन्द्रायेन्द्रो भारद्वाजाय , भारद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः इति ऋक्तन्त्रे 1/4 उद्धृतः। अक्षरसमाम्नाय शिक्षावेदांगस्य मौलिकप्रमुखः अंगः वर्त्तते। एतेन स्पष्टं भवति यत् शिक्षावेदांगस्य आदि प्रवर्त्तकः सृष्टिकर्ता ब्रह्मा अस्ति। द्वितीय प्रवक्ता अंगिरःपुत्रो बृहस्पतिः देवानां पुरोहितः अस्ति। तृतीयप्रवक्ता देवराजः इन्द्रः, चतुर्थो भारद्वाजः, पंचमः ऋषयः षष्ठ ब्राह्मणः वर्तन्ते। इन्द्रेण व्याकरणं सम्यग् परिमार्जितं च कर्तुं पदानां प्रकृति-प्रत्ययादीनां विभाजनं कृतम्। इत्थं अनेके वैयाकरणाः आसन् तेषु प्रमुखाःसन्ति-

(1) ब्रह्मा प्रथमः	वैयाकरणः
(2) बृहस्पतिः	द्वितीयः वैयाकरणः

(3) इन्द्रः	तृतीयः वैयाकरणः(ऐन्द्रव्याकरणम्)
(4) भारद्वाजः	चतुर्थः वैयाकरणः(भारद्वाजव्याकरणम्)
(5) भागुरिः	भागुरि व्याकरणम्
(6) काशकृत्स्न	काशकृत्स्नव्याकरणम्
(7) वैयाघ्रपदः (काशिकायाम्)	वैयाघ्रपदव्याकरणम्
(8) माध्यन्दिनिः(काशिकायाम्)	माध्यन्दिनि व्याकरणम्
(9) शौनकः(चरकसंहितायामुल्लिखितः)	शौनकी व्याकरणम्
(10) गौतमः(भाष्यकारेणोल्लिखितः)	गौतम व्याकरणम्
(11) व्याडिः:(भाष्यकारेणोल्लिखितः)	व्याडि व्याकरणम्
(12) कश्यपः(पाणिनि-अष्टाध्यायाः)	कश्यप व्याकरणम्
(13) वशिष्ठः	वशिष्ठ व्याकरणम्
(14) अत्रिः	अत्रेः व्याकरणम्
(15) गालवः(पाणिनि-अष्टाध्यायाः)	गालवीय व्याकरणम्
(16) आपिशलिः	आपिशलि-व्याकरणम्
(17) चाक्रवर्मणः(कश्यपस्य पुत्रः)	चाक्रवर्मणस्य व्याकरणम्
(18) शाकटायनः	शाकटायन व्याकरणम्
(19) शाकल्यः	शाकल्य-व्याकरणम्
(20) सेनकः	सेनक व्याकरणम्
(21) स्फोटायनः(स्फोटसिद्धान्तस्य प्रवर्तकः)	स्फोटायन व्याकरणम्
(22) गार्ग्यः	गार्ग्यस्य व्याकरणम्
(23) पाणिनिः	अष्टाध्यायी
(24) कात्यायनः(वार्तिककारः)	पाणिनिव्याकरणोपरि वार्तिकरचना
(25) पतञ्जलिः	महाभाष्यम्
(26) भट्टोजिदीक्षितः	सिद्धान्तकौमुदी, प्रौढ़मनोरमा, इत्यादि
(27) आचार्य वरदराजः	लघुसिद्धान्तकौमुदी, मध्यसिद्धान्तकौमुदी,
(28) नागेशभट्टः	लघुशब्देन्दुशेखरः, परिभाषेन्दुशेखरः
(29) कौण्डभट्टः	वैयाकरणभूषणसारः
(30) भर्तृहरिः	वाक्यपदीयम्,

(घ) व्याकरणशिक्षणस्य पाठ्यक्रमः-

(1) वर्णमाला	उच्चारणस्थानम्, शुद्धोच्चारणम्, वर्णानां वर्गीकरणम्,
(2) सन्धिः	स्वर-व्यञ्जन-विसर्गादयः।
(3) नामशब्दाः	संज्ञा, सर्वनाम, विशेषणादयः,
(4) लिङ्गम्	1. पुल्लिङ्ग, 2. स्त्रीलिङ्गः, 3. नपुंसकलिङ्गश्च।
(5) वचनम्	एकवचनं, द्विवचनम्, बहुवचनञ्च।

(6) कारकः	कर्ता कर्म च करणं सम्प्रदानं तथैव च, अपादानाधिकरणमित्याहु कारकाणि षट्।
(7) धातुपाठः	प्रथमं भ्वादिगणः, पश्चात् अन्यगणधातूनां पाठः, क्रमिक-परस्मै-आत्मने-उभयपदी-पञ्चलकार-अन्यलकाराणां ज्ञानम्।
(8) समासः	(1) अव्ययीभावः, (2) तत्पुरुषः, (3) बहुव्रीहिः, (4) द्वन्द्वः।
(9) प्रत्ययः	(1) कृदन्तः, (2) तद्धितः, (3) स्त्रीप्रत्ययाः।
(10) उपसर्गः	द्वाविंशति उपसर्गाः। यः शब्दांशः शब्दानां धातुनां वा पूर्वं पूर्वं प्रयुक्तं भवति।
(11) वाक्यरचना	कर्तृवाच्य, कर्मवाच्य, भाववाच्य, विभक्तिप्रयोगादि कार्यम्।

(ङ) संस्कृतव्याकरणस्यविशेषता

यदा वैदिकसंस्कृतस्य समाप्तिः लौकिकसंस्कृतस्य च प्रादुर्भावोऽभवत्, तदा संस्कृतभाषायाः क्षेत्रे महती अव्यवस्था प्रसरति स्म। ततः विद्वान्सः एकस्य नूतनस्य व्याकरणस्य आवश्यकताम् अनुभवन्ति स्म। एतस्मिन्नेव काले पाणिनेः प्रादुर्भावः अभवत्। पाणिनिः अष्टाध्यायीनामकं ग्रन्थं रचयित्वा व्याकरणाभावं पूरितवान्। अष्टाध्यायी एकः अद्भुतः ग्रन्थः अस्ति। अस्मिन् ग्रन्थे एतावत् सूक्ष्मं विश्लेषणं कृतवान्, तथा च सूक्ष्मातिसूक्ष्मनियमानां प्रतिपादनं तावज्मौलिकतया कृतवान् यत् भारतवर्षमेव न अपितु विश्वस्य विदुषःपाणिनिप्रतिभायां आश्चर्यो भवति। अष्टाध्यायी व्याकरणस्य मुकुटायमानो ग्रन्थोऽस्ति। अयं ग्रन्थः न केवलं व्याकरणनियमानां संकल्पमात्रोऽपितु भाषाविज्ञानोपरि व्याकरणोपरि च सर्वोत्कृष्टा मौलिका रचना अस्ति। अस्य ग्रन्थस्य रचना सूत्रप्रणाल्या अभूत्। पाणिनिना एकमपि पदं व्यर्थं न प्रयुक्तम्। अधुनापि विद्वज्जनाः सूत्रप्रणालीं समादरन्ति। उक्तञ्च-

"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः"

त्रिमुनिव्याकरणम्-पाणिनिमहर्षेः अष्टाध्यायी, कात्यायनस्य वार्तिकं, पतञ्जलिमुनेः भाष्यं च त्रिमुनिव्याकरणमिति प्रसिद्धम्। अतएव-

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते।।

इति भट्टोजीदीक्षितेन वैयाकरणसिद्धान्तकौमुदीप्रारम्भे मङ्गलाचरणं विहितम्।

व्याकरणशास्त्रस्य विभागः-अत्र द्वौ भागौ स्तः। 1. पाणिनिमहर्षेः प्राचीनाः। 2. अर्वाचीनाः।

व्याकरणस्यविभागाः- 1. वैदिकमात्रम् (प्रातिशाख्यादि) 2. लौकिकमात्रम्(कातन्त्रादि) 3. वैदिकलौकिकोभयविधम्(आपिशल, पाणिनीयादि)।

(क) पञ्चाङ्गव्याकरणम्-सूत्रपाठः, धातुपाठः, गणपाठः, लिङ्गानुशासनं, शिक्षा च इति पञ्च अङ्गानि पाणिनिना ग्रथितानि इति हेतोः पाणिनीयव्याकरणस्य पञ्चाङ्ग- व्याकरणमिति प्रसिद्धिः।

(ख) गण-धातवः-पाणिनिः "गणान्" रचयित्वा संस्कृत-व्याकरणं रक्षितवान्। अनेकान् शब्दान् एकेन नियम-विशेषानुसारेण एकसमूहे एकत्रितं कृतवान् तेषां संचालनञ्च एकेन नियमेन यथा भवतु, तथाऽकरोत्।

गणपाठं कृत्वा पाणिनिः भौगोलिक-सामाजिक-राजनीतिकादीन् शब्दान् एकस्मिन् सूत्रे अस्थापयत्। गणपाठानां क्षेत्रम् अतिविस्तृतम्। गणानां रचनायाः आधारः ध्वनिरस्ति। धातूनां वर्गीकरणं गणानां रूपे अस्ति। एषाम् आधारोऽपि ध्वनिः। ध्वनिः एवं तस्मात् उद्गरितस्य अर्थस्य पुनः पुनः अवलोकनं कृत्वा पाणिनिः गणान् अरचयत्। पाणिनिना सकला धातवः दशसु गणेषु विभक्ताः। 1. भ्वादिगणः, 2. अदादिगणः, 3. जुहोत्यादिगणः, 4. दिवादिगणः, 5. स्वादिगणः, 6. तुदादिगणः, 7. रुधादिगणः, 8. तनादिगणः, 9. कृत्यादिगणः, 10. चुरादिगणश्च।

"अष्टाध्याय्याः" अनुसारं संस्कृते 1944 धातवः सन्ति, ये एषु दशसु गणेषु विभक्ताः सन्ति। स्वकीयस्य कृते आत्मनेपदीधातवः परेषां कृते च परस्मैपदी धातवः, उभयो कृते उभयपदी धातवः प्रयुक्ताः। संस्कृते 170 धातवः भ्वादयः सन्ति। भ्वादिधातुनां ज्ञानेन एव छात्राः संस्कृतवाक्यानि सरलतया लिखितुं शक्नुवन्ति।

(ग) प्रकार्याणि-1. शब्दरचना, 2. भाषारचना, 3. भाषाविश्लेषणम्, 4. नियमनिर्धारणम्, 5. साधुशब्दनिरूपणम्, 6. शुद्धप्रयोगः।

(घ) ध्वनिविचारः-संस्कृतसाहित्ये ध्वनिविचारो महान् विस्तृतः परिलक्ष्यते। व्याकरण-शास्त्रे ध्वनेरुत्पत्तिः सम्प्रतिपादिता वर्तते। नित्या वाक्(शब्दो वा) परा, पश्यन्ती, मध्यमा, वैखरी इति चतुर्विधध्वन्यात्मिका भवति। सिद्धान्तशैवानां मतम्-

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।। इति

(1) परा-तन्त्रशास्त्रज्ञाश्रित्य मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्द ब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते।

(2) पश्यन्ती-नाभि पर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते।

(3) मध्यमा-ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोगत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते। अत्र अर्थविभागो जायते।

(4) वैखरी-तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रमता च मूर्धानमाहत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या व्यवहारोपयुक्ता च वैखरी वागुच्यते।

स च शब्दः ध्वनिः, वर्णश्चेति द्विविधः। ध्वनिः मृदङ्गादिजन्यः, वर्णः कण्ठादि- संयोगात् जायते। वर्णरूपा वैखरी वाक् पदवाक्यरूपेण कथ्यते।

(च) वर्णविचार

ध्वनीनां विश्लेषणं वर्गीकरणं चात्र भवति। वर्ण्यते अभिव्यंज्यते वा लधूत्तमोध्वनिः येन सः वर्णः। न क्षरः अक्षरः यस्मात् तदक्षरम्। भाषा कापि वा भवतु परं तस्या भाषायाः कृते एका वर्णमाला आवश्यकी, वर्णमालाः तु बहव्यः सन्ति, परं सर्वासां वर्णमालानामपेक्षया संस्कृत-भाषायाः कृते याः वर्णमालाऽस्ति सा उत्कृष्टतरास्ति। अत्र वर्णमालायाः यः क्रमः अस्ति सः नितान्तं वैज्ञानिकः अस्ति। संस्कृतवर्णमालायाः वैज्ञानिकं रूपं प्राचीनभारतीयानां वैशिष्ट्यमस्ति। आशुतोषः भगवान शिवः वेदवांग्मयेभ्यः स्व सम्बन्धनीं विद्यां देवीं वाचं दाक्षीपुत्राय भगवते पाणिनये ददौ,

नन्द-नृपति-समये पाटलिपुत्रे वर्ष-नामक गुरूना विद्याध्ययनस्य कामनया पाणिनि: समुपस्थितो बभूव। विद्याकाम: पाणिनि: सनकादिसिद्धै: सह भगवत: शंकरस्याराधनां कृतवान्, याभि: आराधनाभि: लोककल्याणकारी शिव: चतुर्दश सूत्रात्मकं वर्णसमाम्नायम् अपौरूपेय रूपम् पाणिनये प्रदत्तवान। नन्दिकेश्वरकृत काशिकाया: द्वौ श्लोकौ अस्या: वार्तायाः सम्पादकौ स्त:। यथा-1-

नृत्तावसानेनटराजराजोननादढक्कांनवपंचवारम्,
उद्धर्त्तुकाम:सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम्।

"अत्र सर्वत्र सूत्रेषु अन्त्यं वर्ण चतुर्दशम्, धात्वर्थं समुपादिष्टं पाणिन्यादीष्ट सिद्धये।" **अथ वर्णसमाम्नाय:** 1. अइउण् 2. ऋलृक् 3. एओङ् 4. ऐऔच् 5. हयवरट् 6. लण् 7. ञमङणनम् 8. झभञ् 9. घढधष् 10. जवगडदश् 11 खफछठथचटतब् 12. कपय् 13. शषसर् 14. हल् इति माहेश्वराणि सूत्राणि। स: अयम् अक्षर-समाम्नायो वाक्समाम्नाय: पुष्पित: फलितश्चक्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशि: सर्ववेदपुण्यफल प्राप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयेते। आदौ तावत् वर्णानां संख्या, प्रकारा:, अच् , हल्, इत्यादीनां वर्गीकरणस्य ज्ञानमावश्यकं वर्त्तते।

प्रत्याह्रियन्ते सङ्क्षिप्यन्ते वर्णा: यत्र स: प्रत्याहार:। प्रत्याहाराणां संख्या-42 मन्यन्ते।

प्रत्याहाराणामकारादिक्रमेण परिसङ्ख्या

1. अक्	8. इक्	15. खय्	22. झय्	29. मय्	36. वल्
2. अच्	9. इच्	16. खर्	23. झर्	30. यञ्	37. वश्
3. अट्	10. इण्	17. ङम्	24. झल्	31. यण्	38. शर्
4. अण्	11. उक्	18. चय्	25. झश्	32. यम्	39. शल्
5. अम्	12. एङ	19. चर्	26. झष्	33. यय्	40. हल्
6. अल्	13. एच्	20. छव्	27. बश्	34. यर्	41. हश्
7. अश्	14. ऐच्	21. जश्	28. भष्	35. रल्	42. ञम्

माहेश्वर मतानुसारं संस्कृत-वर्णमालायां विद्यमानानामक्षराणां संख्या एवमस्ति। कति वर्णा: सन्तीति प्रश्नं समाधातुमाह पाणिनीय शिक्षायाम्-

त्रिषष्टिश्चतुष्षष्टिर्वा वर्णा शम्भुमतेमता:,
प्राकृते संस्कृते चापि स्वयं प्रोक्ता: स्वयंभुवा।

प्रकृत्यनुकूले मातृभाषा-स्वरूपे, देववाण्यां च शम्भुमतानुसारेण त्रिषष्टिश्चतु: षष्टिर्वा वर्णानां संख्या: प्रतिपादिता:। ह्रस्व, दीर्घ, प्लुत, भेदै: स्वराणामेकविंशति: संख्यामन्यन्ते। ककारात् मकार पर्यन्तं स्पर्श संज्ञक-वर्णानां संख्या पंचविंशति: मन्यन्ते। य व र ला: अन्तस्था:, शषसहा ऊष्माण:, संज्ञकाश्चाष्टौसंख्याका:। लोके कुं खुं गुं घुं यमा:, अनुस्वार:, विसर्ग: जिह्वामूलीय:, उपध्मानीय:, दु:पृष्ट वर्ण:, प्लुतलृकार इति+21+25+8+ 4+4+1+63एवं+दीर्घ लृ+64 वर्णा: संस्कृत वर्णमालायां सन्ति। अर्थात् व्यवहार रूपे तु स्वरा "स्वयंराजन्ते इतिस्वरा:" अ आ इ ई उ ऊ ए ऐ ओ औ ऋ ६ लृ इति त्रयोदश वर्णा: सन्ति।

अचामष्टादशभेदविवरणम्

अ इ उ ऋ ऌ	अ इ उ ऋ ए ऐ ओ औ	अ इ उ ऋ ऌ ए ओ ऐ औ
ह्रस्वभेदाः	दीर्घभेदाः	प्लुतभेदाः
1. उदात्तनुनासिकः	7. उदात्तनुनासिकः	13. उदात्तनुनासिकः
2. उदात्ताननुनासिकः	8. उदात्ताननुनासिकः	14. उदात्ताननुनासिकः
3. अनुदात्तानानासिकः	9. अनुदात्तानानासिकः	15. अनुदात्तानानासिकः
4. अनुदात्तानानुनासिकः	10. अनुदात्तानानुनासिकः	16. अनुदात्तानानुनासिकः
5. स्वरितानुनासिकः	11. स्वरितानुनासिकः	17. स्वरितानुनासिकः
6. स्वरितानानुनासिकः	12. स्वरितानानुनासिकः	18. स्वरितानानुनासिकः

मुखगत-स्थान-बोधक-चक्रम्-

कण्ठः	तालु	ओष्ठ	मूर्धा	दन्ताः	कण्ठतालु	कण्ठोष्ठम्	दन्तोष्ठम्	जिह्वामूलम्
अ	इ	उ	ऋ	ऌ	ए	ओ	व्	ॅू क
क्	च्	प्	ट्	त्	ऐ	औ		ॅू ख
ख्	छ्	फ्	ठ्	थ्	–	–	–	–
ग्	ज्	ब्	ड्	द्	–	–	–	–
घ्	झ्	भ्	ढ्	ध्	–	–	–	–
ङ्	ञ्	म्	ण्	न्	–	–	–	–
ह्	य्	ॅू प	र्	ल्	–	–	–	–
: विसर्ग	श्	ॅू फ	ष्	स्	–	–	–	–

आभ्यन्तरबाह्यप्रयत्नज्ञानार्थकं चक्रम्-

आभ्यन्तरप्रयत्नाः	स्पृष्टाः			ईषत्स्पृष्टाः	ईषद्विवृताः		विवृताः	संवृताः
संज्ञा	स्पर्शाः			अन्तःस्थाः	ऊष्माणः		स्वराः	
वर्णाः	क ख च छ ट ठ त थ प फ	ग घ ज झ ड ढ द ध ब भ	ङ ञ ण न म	य र ल व	श ष स	 ह	अ इ उ ऋ ऌ ए ओ ऐ औ	ह्रस्वोऽकार प्रयोगः
बाह्यप्रयत्नाः	अल्पमहाप्राणाः विवाराः श्वासाः अघोषाः	अल्पप्राणाः संवारः नादाः घोषाः	म. प्रा. संवारः नादाः घोषाः	अल्पप्राणाः संवारः नादाः घोषाः	महाप्राणाः विवारः श्वासाः अघोषाः	महा. संव नाद. घो.	उदात्तानुदात्तस्वरिताः	

व्यंजनानि- कवर्ग, चवर्ग टवर्ग तवर्ग पवर्ग रूपाणि येषां वर्णानामुच्चारणार्थं जिह्वा मुखस्य केवलं एकं भागं स्पृशति एवं च वायुः क्षणं विरम्य झटिति वहिर्भवति ते वर्णाः स्पर्शाः। स्पर्शानां

संख्या: पंचविशति: सन्ति। भाष्यकार: व्यंजनस्य तुलना नट् भार्यावत् कृतं स्यात्। तद् यथा नटान्तं स्त्रियो रंगगता: पृच्छति कस्य यूयमिति तं तं तवेत्याहु:। एवं व्यंजनान्यपि यस्य यस्या: च कार्यमुच्यते तं तं भजन्ते। "परेण स्वरेण व्यंज्यते इति व्यंजनम्"। यस्योच्चारणं विना स्वरेण न भवति तद् व्यंजनम्। अर्थात् ह य ब र ल ञ म ङ ण न झ भ घ ढ ध ज व ग ड द ख फ छ ठ थ च ट त क प श ष स इति त्रयत्रिंशत् वर्णा: व्यंजनानि सन्ति। उच्चारण-वैविध्यात् व्यंजनानां त्रयो हि भागा: सन्ति। **1. स्पर्श 2. अन्त:स्थ 3. ऊष्म: अयोगवाहा:, अनुस्वार:, विसर्ग:, यमा:,**

(च) शब्दविचार:-अत्र पदानां विश्लेषणं, विभक्तिप्रत्ययानामध्ययनं, सन्धिसमासादीनाम् अनुशीलनं, लिङ्गज्ञानं च क्रियते।

(छ) वाक्यविचार:-अस्मिन् विभागे वाक्येषु विद्यमानानां शब्दानां विचार:, तेषां क्रम: कारकाणां प्रयोग:, वाक्यानां रचना करणीया, विरामचिह्नानाम् अध्ययनं च विधीयते।

(ज) अर्थविचार:-संस्कृतशब्दानाम् अर्थ: प्रत्ययोपसर्गादियोजनेन परिवर्तनं प्राप्नोति। वाक्यपदीये संयोगविप्रयोगसाहचर्यादिविशेषस्मृतिकारणै: शब्दानाम् अर्थप्रतीति: जायते इत्युक्तम्। वेदे स्वरभेदेऽपि अर्थभेद: भवतीति वचनं तु अरुणो मासकृत्, यथेन्द्रशत्रु: इत्यादि उदाहरणस्थलेषु स्पष्टमेव।

(झ) लिङ्गविचार:-संस्कृते संज्ञाशब्दानां लिंग-निर्धारणं प्रत्ययस्याधारे भवति। संस्कृते लिङ्गं त्रिविधं भवति- 1. पुल्लिङ्ग:, 2. स्त्रीलिङ्ग:, 3. नपुंसकलिङ्गश्च। संस्कृते अभ्यासेन एव अस्य ज्ञानं भवति।

(छ) व्याकरणस्य प्रयोजनानि

(व्याकरणस्य स्वरूपं, महत्वम्, फलं उपयोगश्च)

1. "यो वेद वेदवदनं सदनं हि सम्यग् ब्राह्मया: स वेदमपिवेदकिमन्यशास्त्रम्।
यस्मादत: प्रथममेतदधीत्य विद्वान् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी"।।

वस्तुत: व्याकरणज्ञानाभावे वेद-वेदान्त, स्मृतिपुराणेतिहास, काव्यादि शास्त्रान्तरेषु प्रवेशाधिकारिण: न भवन्ति, इति भास्कराचार्येण भणितम्।

2. रक्षोहागमलघ्वसंदेहाप्रयोजनम्-रक्षा इति-व्याकरणाध्ययनावगतवर्णलोपागमवर्ण विकारो गृहीत प्रकृतिप्रत्ययविभागो वेदान् पालयिष्यतीत्येतदर्थमध्येयं व्याकरणम्। **ऊह इति**- प्रकृतिवद्विकृति: कर्त्तव्येति मीमांसकसिद्धान्तात् प्रकृतियागे पठितस्य अग्नये त्वा जुष्टं निर्वपामीति मन्त्रस्थाग्निपदस्य सौर्य चरूं निर्वपेत् ब्रह्मवर्चसकाम इति सौर्येचरौ विकृतियागेसूर्यसम्बन्धिनिर्वाप-प्रकाशनाऽसमर्थत्वात्तदपहाय तत्स्थाने सूर्यायेत्यूहार्थमध्येयं व्याकरणम्।

आगम इति-ब्राह्मणेन निष्कारण इत्यादिश्रुत्वा व्याकरणस्य पदपदार्थावगम द्वारा वाक्यार्थावगमोपयोगित्वात्तदनध्ययनप्रयुक्तस्य वेदार्थाऽज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारार्थमध्येयं व्याकरणम्। लघ्विति-शब्दानामानन्त्यात् प्रक्रियारूपलघुभूतोपायज्ञानार्थमध्येयं व्याकरणम्।

असन्देह इति-स्थूलपृषतीमाग्निवारूणीमनड्वाहीमालभेतेत्यत्र कर्मधारयो बहुव्रीहिर्वेति सन्देहप्रागभावपरिपालनार्थमध्येयं व्याकरणम्। आनुषङ्गिकानि प्रयोजनानि तेऽसुरा हेलयो हेलय

इति कुर्वन्तः पराबभूवुस्तस्माद् ब्राह्मणेन म्लेच्छितवै, नापभाषितवै, म्लेच्छोहवा एष्यदपशब्दः। म्लेच्छा माभूमेत्यध्येयं व्याकरणम्। अत्र पदद्विवचने कर्त्तव्ये वाक्यद्विर्वचनं लत्वञ्च कृतमसुरैः। एवञ्च शास्त्रबोधितविपरीतोच्चारणेन निन्द्या माभूमेत्यध्येयं व्याकरणम्। एवं च 1. दुष्टःशब्दः, 2. यदधीतम्, 3. यस्तु प्रयुंक्ते, 4. अविद्वांसः 5. विभक्तिं कुर्वन्ति, 6. यो वा इमाम्, चत्वारि इत्यादि महाभाष्योद्दाहरणानि अपि व्याकरणमध्ययनानां प्रयोजनानि सन्ति।

3. "पाणिनीये महाभाष्ये पदसाधुत्व लक्षणं सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चनः" इति परासर पुराणे कथितः।

4. यद्यपि बहुनाधीषे तथापि पठपुत्र व्याकरणम्, स्वजनः (सम्बन्धि) श्वजनो (कुत्ता) माभूत् सकलः (सम्पूर्णः) शकलः (खण्डः) सकृत् (एकवार) शकृत् (विष्ठा)।

5. "व्याकरणज्ञाने सर्ववेद परायणजं पुण्यमिति" अतः व्याकरणं वेदानां वेदः इति नागेशेनोक्तम्।

6. वाक्यपदीकारभर्तृहरिः ब्रह्मकाण्डे व्याकरणाध्ययनं उत्तमतपः मन्यते- "आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः, प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः"।। व्याकरणं स्मृति एवंच पर ब्रह्म प्राप्तस्य साधनं स्वीक्रियते वाक्यपदीकारः-"यदैकं प्रक्रियाभेदैर्वुधा प्रविभजन्ते, तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते"।

7. सम्यग् शब्द प्रयोगे लाभः-

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत्" ।।

एवं वर्णा प्रयोक्तव्या ना व्यक्ता न च पीडिताः सम्यग् वर्ण प्रयोगेन ब्रह्मलोके महीयते।

मानवविचाराणाम् अभिव्यक्तिं, शुद्धां, परिष्कृतां, परिमार्जितां च कर्तुं भाषा विश्लेषणाय व्याकरणम् आवश्यकम्। व्याकरणं वेदपुरूषस्य मुखमिति, येन प्रकारेण शरीरे मुखस्य स्थानं प्रधानं भवति तेनैव प्रकारेण वेदाङ्गेषु व्याकरणस्य स्थानं प्रधानं विद्यते। रक्षा-ऊह-आगम-लघुः-असंदेहः इति पञ्च प्रयोजनानि व्याकरणस्य वररूचिना वर्णितानि। व्याकरणविद्यायां दर्शनशास्त्रस्योपयोगाः अत्यधिकाः सन्ति। मनोरमायां प्रौढानां मनोरमयतीत्यर्थिकायाम् किं प्रौढत्वम्? "सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम् प्रौढत्वम्" महाभाष्यविचार-समये सकलदर्शनार्थस्य तत्र तत्र ध्वननात्। अयमाशयः-"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म" ब्रह्मैवेदं सर्वम् "आत्मैवेदंसर्वम्" इत्यादिभिः श्रुतिभिः जगत्कारणस्य सत्यत्वमेकत्वं ब्रह्मत्वम् आत्मत्वञ्च यथा प्रतिपाद्यते तथा "वागेवार्थं पश्यति वागेवार्थं ब्रबीति वागेवार्थं निहितं सन्तनोति। "ओमित्येतदक्षरमिदं सर्वम्" ओमितिब्रह्म" इत्यादिभिः शब्द-स्वरूपतापि प्रतिपाद्यत इति शब्दब्रह्मेव जगत्कारणम्। शब्दब्रह्मप्राप्त्युपायत्वं च वाक्यपदीये भणितं भर्तृहरि महोदयाः- "तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः, तस्य प्रवृत्ति तत्त्वज्ञो ब्रह्मामृतमश्नुते।" इति कारिकया शब्दसंस्कार-द्वारा व्याकरणस्यावगम्यते। शब्दसंस्कारस्य सिद्धत्वं सिद्ध्युपायत्वात्।

व्याकरणम्

1. संज्ञा, 2. सन्धिः, 3. अव्ययः, 4. सुवन्तः, 5. तिङन्तः, 6. कारकः, 7. प्रत्ययः, 8. समासः,

(ज) संज्ञा/परिभाषा विवेचनम्

स्वरूपनिर्वचनं लक्षणकथनं वा परिभाषा इत्युच्यते। प्रसंगप्राप्तप्रमुख- परिभाषाणां संज्ञानां च संक्षिप्तं विवरणमत्र प्रस्तूयते-

1. संहिता-"परः सन्निकर्षः संहिता" वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।
2. गुणः-"अदेङ् गुणः" अत् एङ् च गुणसंज्ञः स्यात्। अ, ए, ओ इत्येताः गुणसंज्ञकाः भवन्ति।
3. वृद्धिः-"वृद्धिरादैच्" आदैच्च वृद्धिसंज्ञः स्यात्।
4. प्रातिपदिकम्- "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रतिपदिकसंज्ञं स्यात्।
5. नदी-"यू स्त्र्याख्यौ नदी" ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।
6. घि-"शेषो घ्यसखि" शेष इति स्पष्टार्थम् अनदी संज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घि संज्ञम्।
7. उपधा-"अलोन्त्यात्पूर्व उपधा" अन्त्यादयः पूर्वो वण उपधा संज्ञः स्यात्।
8. अपृक्तं-"अपृक्तम् एकाल् प्रत्ययः" एकाल् प्रत्ययो यः सोऽपृक्तसंज्ञं स्यात्।
9. गतिः- "गतिश्च" प्रादयः क्रियायोगे गतिसंज्ञाः स्युः।
10. पदम्- "सुप्तिङन्तं पदम्" सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।
11. विभाषा-"न वेति विभाषा"
12. सवर्णं-"तुल्यास्य प्रयत्नं सवर्णम्" "ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।"
13. टि-"अचोऽन्त्यादि टि" अचां मध्ये योऽन्त्यः, स आदिर्यस्य तद् टिसंज्ञं स्यात्।
14. प्रगृह्यम्-"ईदूदेद्विवचनं प्रगृह्यम्" ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्।
15. सर्वनामस्थानम्- "शि सर्वनामस्थानम्" शि इत्येतद् उक्तसंज्ञं स्यात्।
16. निष्ठा-"क्तक्तवतू निष्ठा" एतौ निष्ठासंज्ञौ स्तः।

(झ) सन्धिविचार

सम् उपसर्गात् धा धातोः कि प्रत्ययात् निष्पद्यते सन्धि शब्दः। शब्दोऽयं पुंसि लिङ्गे प्रयुज्यते।

संहितैकपदे नित्या नित्याधातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।

एकस्मिन् पदे सन्धिकार्यं नित्यं भवति। धातूपसर्गयोरपि सन्धिकार्यं नित्यं भवति। समासे सन्धिकार्यं नित्यं भवति। वाक्येऽस्मिन् सन्धिकार्यं विवक्षाधीना भवति।

कति सन्धयः, के च ते? पञ्चसन्धयःभवन्ति-

1. अच्सन्धिः, 2. हल्सन्धिः, 3. विसर्गसन्धिः, 4. स्वादिसन्धिः, 5. प्रकृतभावसन्धिः।

1. अच्सन्धि-

(क) यण्सन्धिः > (यण्=य् व् र् ल्)

इको यणचि-6.1.74 इकः स्थाने यण् स्यादचि संहितायां विषये। अत्र इकः(षष्ठ्यन्त), यण् (प्रथमान्त), अचि (सप्तम्यन्त) अर्थात् इ, ई, उ, ऊ, ऋ, ॠ, ऌ इत्येतेषां वर्णानामनन्तरं यदि असवर्णस्वरा वर्तन्ते तर्हि क्रमशः-"इ-ई" इत्यनयोःस्थाने यकारः, उ-ऊ इत्यनयोः स्थाने वकारः, ऋ-ॠ इत्यनयोः स्थाने रकारः(रेफः), ऌकारस्य स्थाने लकारश्च आदेशो भवति।

यथा-इ-य+इति+आदिः=इत्यादिः, प्रति+एक+प्रत्येकः, यदि+एवं+यद्येवं, इति+आह+इत्याह, इति+अयं+इत्ययं, मति+आ=मत्या, सुधी+उपास्यः =सुध्युपास्यः, प्रति+अगात्+प्रत्यागात् इत्यादयः।

उ-व+ सुआगतम्+स्वागतम्, मधु+अरि+मध्वरिः, अनु+अयः+अन्वयः, अनु+आदेशः अन्वादेशः, गुरु+आज्ञा+गुर्वाज्ञा, पठतु+आ+पठत्वा, इत्यादयः।

ऋ-र+धातुअंशः+धां+शः, धातृए+धो, मातृ+आ+मा, हर्तृ+ई+हीं, मातृए मो, कोष्टृ+आ+क्रोष्ट्रा, इत्यादयः।

ऌ-ल+ऌ+आकृतिः+लाकृतिः, ऌ+आकारः+लाकारः।

इक् (स्थाने)	असवर्ण अच्	यण् (विकारः)	सन्धिविच्छेदः	सन्धिः (सिद्धरूपम्)
इ+	अ=	य्	यदि+अत्र(यद्+य्+अत्र)	=यद्यत्र
ई+	अ=	य्	नदी+अम्बुः(नद्+य्+अम्बु)	=नद्यम्बुः
ई+	उ=	य्	सुधी+उपास्यः(सुध्+य्+उपास्यः)	=सुध्युपास्यः
उ+	अ=	व्	मधु+अरिः(मध्+व्+अरि)	=मध्वरिः
ऊ+	आ=	व्	वधू+आगमनम्(वध्+व्+आगमनम्	=वध्वागमनम्
ऋ+	इ=	र्	पितृ+इच्छा(पित्+र्+इक्ष्छा)	=पित्रिच्छा
ऌ+	आ=	ल्	घस्लृ+आदेशः(घस्+ल्+आदेशः)	=घसलादेशः

(ख) जश्त्व-

"झलां जश् झशि(8. 4. 53) झलि(झश्) परे झलां जशःस्युः" यथा- दुघ+धम्+दुग्धम्, एतत्+दर्शनम्+एतद्दर्शनम्, दघ्+धः+दग्धः, युध्+धः+युद्धः, शुध्+धिः+शुद्धिः, लभ्+धः+लब्धः, क्षुभ्+धः+क्षुब्धः,

(ग) अयादि-सन्धिः एचोऽयवायावः (6. 1. 78) एचः क्रमाद् अय् अव् आय् आव् एते स्युरचि। अर्थात् ए ऐ ओ औ इत्येतेभ्यः वर्णेभ्यः स्वरे परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय्, ओकारस्य स्थाने अव्, औकारस्य स्थाने आव् च आदेशाः भवति। यथा-

1. ए-अय्; हरे+ए =हरये, जे+अ=जयः, ए+अ=अयः, कवे+ए=कवये, मते+ए =मतये, ने+अनम्=नयनम्, चे+अ=चयः, शे+इतः=शयितः,
2. ओ-अव; विष्णो+ए=विष्णवे, गो+एषणा+गवेषणा, भो+अति=भवति, गुरो+ए =गुरवे, भो+अनम्=भवनम्, पो+अनम्=पवनम्, गुरो+अः=गुरवः, भानो+ए=भानवे,

3. ऐ-आय्; नै+अक:+नायक:, गै+अक:=गायक:, दै+अक:=दायक:,

4. औ-आव्; पौ+अक:=पावक:, भौ+अक:=भावक:।

एच् (स्थाने)	अच् (परे)	आदेश (विकार:)	सन्धिविच्छेद:	सन्धि: (सिद्धरूपम्)
ए+	ए	अय्	हरे+ए(हर+अय्+ए)	=हरये
ऐ+	आ	आय्	नै+अक:(न्+आय्+अक:	=नायक:
ओ+	अ	अव्	विष्णो+ए(विष्ण्+अव्+ए)	=विष्णवे
औ+	अ	आव्	पौ+अक:(प्+आव्+अक:)	=पावक:

(घ) सवर्णदीर्घ-"अक: सवर्णे दीर्घ:" 6.1.10 अक: सवर्णेऽचि परे पूर्वपरयो-**दीर्घ** एकादेश: स्यात्। अत्र अक:(पञ्चमी) अ इ उ ऋ लृ त: सवर्णेऽचिपरे (सप्तम्यन्ते) अ आ+**अ** आ=आ, इ ई+इ ई=ई, उ ऊ+उ ऊ=ऊ, ऋ ६+ऋ ६=६, पूर्वपरयो मिलनेन दीर्घ: (प्रथमान्त:) भवति।

"अ आ इत्येतयो: अनन्तरं यदि अ आ इत्येतौ वर्णौ स्त: तर्हि आकार:, इ ई इत्येतयो: अनन्तरं यदि इ ई इत्येतौ वर्णौ स्त: तर्हि ईकार:, उ ऊ इत्येतयो: अनन्तरं यदि उ, ऊ इत्येतौ **वर्णौ** स्त: तर्हि ऊकार:, ऋ इत्यनन्तरं ऋ लृ इत्येतौ वर्णौ स्त: तर्हि ६कार: पूर्वपरयो: स्थाने **दीर्घ:** एकादेशत्वेन भवति। दीर्घरूपाभावे लृकारस्य प्रयोग: न भवति। सवर्णसंज्ञा-तुल्यास्य प्रयत्नं सवर्णम्-ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्वयं यस्य येन तुल्यं तन्मिथ: सवर्णसंज्ञं स्यात्।

(1) अआ+अ आ=कार्य+आलय:=कार्यालय:, विद्या+आलय:=विद्यालय:, राम+अयनम्=रामायनम् महा+अनुभाव:=महानुभाव:, त्रिपुर+अरि+त्रिपुरारि:, शश+अंक:+शशाक:, सुर+अरि+सुरारि:, विद्या+अर्थी+विद्यार्थी,

(2) इ ई+इ ई=अधि+ईश्वर:=अधीश्वर:, नदी+ईश:=नदीश:, श्री+ईश:=श्रीश:, मही+ईश:=महीश:, कवि+इन्द्र:=कवीन्द्र:, इति+इव+इतीव, मुनि+इन्द्र:+मुनिद्र:, गिरि+ईश:+गिरीश:, पृथ्वी+ईश्वर:+पृथ्वीश्वर:, श्री+ईश:+श्रीश:, नदी+ईश:+नदीश:,

(3) उ ऊ+उ ऊ=ऊ भानु+उदय:=भानूदय:, गुरु+उपदेश:=गुरूपदेश:, वधू+उत्साह: =वधूत्साह:, चमू+ऊर्ज:+चमूर्ज:, साधु+ऊचु:+साधूचु:,

(4) ऋ ॠ+ऋ ॠ=ॠ पितृ+ऋषि:=पितृषि:, पितृ+ऋणम्=पितृणम्, होतृ+ऋकार:= होतृकार:, होतृ+ऋकार:+होतृकार:,

(ङ) गुण-सन्धि:

अदेङ्गुण: अत् एङ् च गुण संज्ञं स्यात्। ए ओ, अर् अल्। आद्गुण: (6.1.84) अवर्णादचि परे पूर्वपरयोरेको गुण आदेश: स्यात्। आत् (पञ्चम्यन्त) , गुण:(प्रथमान्त) "अ आ इत्येतयो: वर्णयो: अनन्तरं यदि इ ई इत्येतौ वर्णौ स्त:, तर्हि पूर्वपरयो: स्थाने एकार:, उ ऊ इत्येतौ वर्णौ स्त: तर्हि ओकार:, ऋ ॠ इत्येतौ वर्णौ स्त:, तर्हि अर्, लृकार: अस्ति तर्हि अल् आदेशत्वेन च भवति।

अ आ-इ ई=ए देव+इन्द्र:+देवेन्द्र:, उप+इन्द्र:+उपेन्द्र:, गण+ईश:+गणेश:, परम+ईश्वर:+ परमेश्वर:, रमा+ईश:+रमेश:, तथा+इति+तथेति,

अ आ-उ ऊ=ओ सूर्य+उदयः+सूर्योदयः, छात्र+उपस्थिति+छात्रोपस्थिति, नव+ऊढा+नवोढा, दया+ऊनः+दयोनः, गंगा+ऊर्मिः+गंगोर्मिः,

अ आ-ऋ ॠ=अर् ब्रह्म+ऋषिः+ब्रह्मर्षिः, महा+ऋषिः+महर्षिः,

अ आ-ऌ=अल् तव+ऌकारः+तवल्कारः,

अ/आ+इ/ई	अ/आ+उ/ऊ	अ/आ+ऋ/ॠ	अ/आ+ऌ
ए	ओ	अर्	अल्
उप+इन्द्रः=उपेन्द्रः, सुर+ईशः=सुरेशः,	जल+उत्पत्तिः=जलोत्पत्तिः, जल+ऊर्मिः=जलोर्मिः	देव+ऋषि=देवर्षि, महा+ऋषि=महर्षि	महा+ऌकारः= महल्कारः, मम+ऌकारः=ममल्कारः

(च) वृद्धि-सन्धि-

वृद्धिरादैच् (1.1.1) आदैच्च वृद्धिसंज्ञः स्यात्। एवं च वृद्धिरेचि (6. 1. 88) आदेचि परे वृद्धिरेकादेशः स्यात्। अ आ इत्येतयोः वर्णयोः अनन्तरं यदि ए, ऐ इत्येतौ वर्णौ स्तः, तर्हि पूर्वपरयोः स्थाने ऐकारः, यदि ओ औ इत्येतौ स्तः तर्हि औकारः च पूर्वपरयोः स्थाने एकादेशत्वेन भवति। अ आ इत्येताभ्यां वर्णाभ्याम् ऋकारे ॠकारे च परे आर्, ऌकारे परे च आल् आदेशो भवति।

अ आ-ए ऐ=ऐ अद्य+एव=अद्यैव, मत+ऐक्यम्=मतैक्यम्, सदा+एव=सदैव, यथा+एव=यथैव, एक+एकम्=एकैकम्, तव+ऐश्वर्यम्=तवैश्वर्यम्

अ आ-ओ औ=औ तिल+ओदनम्=तिलौदनम्, दिव+ओकसः=दिवौकसः, महा+औषधिः=महौषधिः, महा+औदार्यम्=महौदार्यम्,

अ/आ+ए/ऐ	अ/आ+ओ/औ	अ/आ+ऋ/ॠ	अ/आ+ऌ
ऐ	औ	आर्	आल्
कृष्ण+एकत्वम्=कृष्णैकत्वम्, तथा+एव=तथैव, सदा+एव=सदैव	गंगा+ओघ=गङ्गौघः, दिव्य+औषधम्=दिव्यौषधम्, मम+औषधम्=ममौषधम्	उप ॠच्छति उपार्च्छति,	उप ऌकारीयति उपाल्कारीयति

(छ) पूर्वरूपः-"एङः पदान्तादति (6.1.109) पदान्तादेङोऽतिपरे पूर्वरूपमेकादेशः स्यात्।" यथा-" यज्ञे+अग्नि=यज्ञेऽग्नि, वृक्षे+अस्मिन्=वृक्षेऽस्मिन्, गो+अग्रम्=गोऽग्रम्, हरे अव हरेऽव, विष्णो अव विष्णोऽव,

(ज) पररूपः-"एङि पररूपम् (6.1.94) आदुपसर्गात् एङादौ धातौ परे पररूपमेकादेशः स्यात्।" यथा- प्र+ऐषयति=प्रेषयति, प्र+एजते=प्रेजते, उप+ओषधि=उपोषधि,

(झ) द्वित्व-"अचोरहाभ्यां द्वे (8.4.46) अचः पराभ्यां रेफ हकाराभ्यां परस्य यरो द्वे वास्तः"। यथा-हरि+अनुभव=हर्य्यनुभवः, कर्म-कर्म्म, सर्व्वम्,

2. प्रकृतिभावसन्धि-

1. प्लुतप्रगृह्या अचि नित्यम्-प्लुता: प्रगृह्याश्च वक्ष्यन्ते ते अचि परे नित्यं प्रकृत्या स्यु:। यथा-एहि कृष्ण3+अत्र गौश्चरति=एहि कृष्ण3 इत्यत्र प्लुताकारात् अकारे परे न सवर्णदीर्घ:।

2. ऋत्यक:- ऋति परे अक: प्रकृतिभाव: स्यात्। अ, इ, ऋ, लृ वर्णानां पश्चात् ह्रस्व ऋकार: अस्ति चेत् तर्हि विकल्पेन ह्रस्व: सन्ध्यभावश्च भवति पदान्ते। यथा-ब्रह्म+ऋषि:=ब्रह्मऋषि:, सप्त+ऋषीणां=सप्त ऋषीणाम्।

3. प्रगृह्य, प्रकृतिभाव:-"ईदूदेद्द्विवचनं प्रगृह्यम् (1.1.11) ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्।" ईकारान्तम् ऊकारान्तञ्च द्विवचनं प्रगृह्यसंज्ञकंभवति। अत: सन्धिकार्यं नैव भवति। प्रकृतिभावो भवति। यथा-हरी+एतौ=हरी एतौ, विष्णू+इमौ=विष्णू इमौ, गङ्गे+अमू=गङ्गे अमू, पचेते+इमौ=पचेते इमौ, मुनी+इमौ+मुनी इमौ, साधू+अत्र+साधू अत्र, बालिके+एते+बालिके एते।

4. अदसो मात्-अदस्शब्दावयवमकारात् परस्य ईकारस्य, ऊकारस्य च प्रगृह्य संज्ञा स्यात्। यथा-अमी+ईशा:=अमी ईशा:, रामकृष्णावमू+आसाते=रामकृष्णावमू आसाते।

5. ओत्-ओदन्तो निपात: प्रगृह्य: स्यात्। ओकारान्तस्य निपातस्यापि प्रगृह्यसंज्ञा भवति। अत: अत्रापि प्रकृतिभावो भवति। यथा-अहो+ईशा:=अहो ईशा:।

3. हल्सन्धि:

(क) श्चुत्वसन्धि:→श्चु:-श्, च्, छ्, ज्, झ्, ञ्

"स्तोश्चुना श्चु:" (8/4/40) सकारतवर्गयो: शकारचवर्गाभ्यां योगे शकारचवर्गौ स्त:। अर्थात् "सकारस्य शकारचवर्गाभ्यां योगे शकार:, तवर्गस्य शकारचवर्गाभ्यां योगे क्रमात् चवर्ग: आदेशो भवति। (त् इत्यस्य च, द् इत्यस्य ज्, न् इत्यस्य ञ्, स् इत्यस्य श् भवति।

1. स-श→रामस्+शेते+रामश्शेते, रामस्+चिनोति+रामश्चिनोति,

2. तवर्ग-चवर्ग→उत्+चारणम्=उच्चारणम्, तत्+छवि=तच्छवि:, एतद्+जलम्=एतज्जलम्, उत्+ज्वल:=उज्ज्वल:, सत्+चरित्र=सच्चरित्र,

(ख) ष्टुना ष्टु:-स्तो: ष्टुना योगे ष्टु: स्यात्।

1. स-श→रामस्+षष्ठ:=रामष्षष्ठ:, रामस्+टीकते=रामष्टीकते,

2. तवर्ग-टवर्ग→तद्+टीका=तट्टीका, षष्+थ:=षष्ठ:, उद्+डीन=उड्डीन

दुष्+त:=दुष्ट:, विष्+नु=विष्णु, पेष्+ता=पेष्टा,

स-श	शिशुस्+शेते	शिशु+श्+शेते	=शिशुश्शेते
स्-श्	मनस्+चञ्चलम्	मन+श्+चञ्चलम्	=मनश्चञ्चलम्
स्-श्	रामस्+छात्र:	राम+श्+छात्र:	=रामश्छात्र:
त्-च्	भगवत्+शक्ति	भगव+च्+शक्ति	=भगवच्शक्ति
त्-च्	सत्+चित्	स+च्+चित्	=सच्चित्

द् ज् न्-ञ्	सुहृद्+जगाम हे गुणिन्+जानातु	सुह+ज्+जगाम हे गुणि+ञ्+जानातु	=सुहृज्जगाम =हे गुणिञ्जानातु
न्-ञ् न्-ञ्	यज्+न याच्+ना	यज्+ञ्+अ; याच्+ञ्+आ	=यज्ञः =याच्ञा

(ग) जश्त्व-

"झलां जशोऽन्ते (8.2.39) पदान्ते झलां जशः स्युः। यथा=वाक्+ईशः=वागीशः, दिक्+अन्तः=दिगन्तः, दिक्+गजः=दिग्गजः, षट्+एव=षडेव, सुप्+अन्तः=सुबन्तः, सत्+आचार=सदाचार, दिक्+भ्रमः=दिग्भ्रमः, जगत्+ईशः=जगदीशः, अच्+अन्तः=अजन्तः, षट्+आननः=षडाननः, चित्+आनन्दः=चिदानन्दः,

(घ) अनुनासिकं "यरोऽनुनासिकेऽनुनासिको वा (8.4.45) यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्" यथा-एतद्+मुरारी=एतन्मुरारी, दिक्+नाग=दिङ्नाग, षट्+मुखः=षण्मुखः, तत्+मात्रम्=तन्मात्रम्, उत्+मुखः=उन्मुखः, जगत्+नाथ=जगन्नाथ, जगत्+मिथ्या=जगन्मिथ्या, वाक्+मयम्=वाङ्मयम्, तत्+न=तन्नः, सद्+मतिः=सन्मतिः।

(ङ) परसवर्णः-"तोर्लि (8.4.60) तवर्गस्य लकारे परे परसवर्णः स्यात्।" यथा-तत्+लीनः=तल्लीनः, उद्+लेखः=उल्लेखः, पद्+लवः=पल्लवः, तत्+लयः=तल्लयः, आदि।

(च) पूर्वसवर्णः-1."उदस्थास्तम्भोः पूर्वस्य (8.4.61) उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्" यथा-उद्+स्थानम्=उत्थानम्, उद्+स्तम्भनम्=उत्तम्भनम्,

2."झयो होन्यतरस्याम् (8.4.62) झयः परस्य हस्य पूर्वसवर्णो वा स्यात्।" यथा-वाक्+हरिः=वाग्घरिः, तत्+हितम्=तद्धितम्, उत्+हरणम्=उद्धरणम्, अज्+हीनम्=अज्झीनम्, तद्+हानि=तद्धानिः, त्रिष्टुब्+हसति=त्रिष्टुब् भसति, मधुलिड्+हसति=मधुलिड् ढसति।

(छ). चर्त्व सन्धि-"खरि च (8.4.55) खरि परे झलां चरः स्युः। झल् वर्णानां स्थाने चर् (च, ट, त, क, प, श, स, ष) वर्णाः भवन्ति चेत् झलामनन्तरं खर् प्रत्याहार वर्णाः स्युः।

उदाहरणार्थ-उद+थानम्=उत्थानम्, तद्+परम्=तत्परम्, उद्+थापकः=उत्थापकः, सद्+कारः=सत्कारः, दिक्+पालः=दिग्पालः, तज्+शिवः=तच्छिवः, उद्+पन्नः=उत्पन्नः,

(ज) छत्व "शश्छोऽटि (8.4.63) पदान्ताज्झयः परस्य शस्य छो वा स्यादटि परे।"

यथा-तद्+शिवः=तच्छिवः, सत्+शीलः=सच्छीलः।

(झ) अनुस्वारः-1."मोऽनुस्वारः (8.3.23) मान्तस्य पदस्यानुस्वारः स्यात् हलि।" यथा-हरिम्+वन्दे=हरिंवन्दे, कार्यम्+कुरु=कार्यंकुरु, गृहम्+गच्छति=गृहंगच्छति, ईश्वरम्+भजति=ईश्वरंभजति, सम्+सारः=संसारः, पाठम्+पठ=पाठं पठ।

2."नश्चापदान्तस्य झलि (8.3.24) नस्य मस्य चापदान्तस्य झल्यनुस्वारः" यथा-रम्+स्यते=रंस्यते, आक्रम्+स्यते=आक्रंस्यते, दन्+शनम्=दंशनम्, यशान्+सि=यशांसि, नम्+स्यति=नंस्यति।

(ञ) परसवर्ण:-1. "अनुस्वारस्य ययि परसवर्ण: (8.4.58)" अनुस्वारस्य ययि परे परसवर्ण: स्यात्। यथा-शम्+त:=शान्त:, शम्+कित:=शंकित:, अं+कित:=अङ्कित:, कुं+ठित:=कुण्ठित:, गुं+फित:=गुम्फित:, अं+चित:=अञ्चित:, कं+टकम्=कण्टकम्।

(2) "वा पदान्तस्य (8.4.59) पदान्तस्य अनुस्वारस्य ययि परे वा परसवर्ण:। पदान्तानुस्वारानन्तरं यय् प्रत्याहार: भवति चेत् परावर्ण: भवति। यथा-त्वं+करोषि=त्वङ्करोषि, अहम्+पचामि=अहम्पचामि, यं+लोकम्=यंल्लोकम्।

(ट) रुत्व-"सम: सुटि (8.3.5) समो रु:स्यात्सुटि।" यथा-सम्+कार:=संस्कार, सम्+कृत=संस्कृत, सम्+कर्ता=संस्कर्ता, सम्+कृति=संस्कृति,

4. विसर्गसन्धि:

1. सत्व-(क) "विसर्जनीयस्य स: (8.3.34) खरि विसर्जनीयस्य स: स्यात्।" विसर्गस्य स्थाने सकारादेश: स्यात् खरि परे। स्यात्। यथा-

विष्णु:+त्राता=विष्णुस्त्राता, राम:+तिष्ठति=रामस्तिष्ठति, बाल:+चलति=बालश्चलति, जना:+तिष्ठन्ति=जनास्तिष्ठन्ति।

(ख) "वा शरि (8.3.36) शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। यथा-

श् ष्-राम:+चलति=रामश्चलति, राम:+टीकते=रामष्टीकते,

स्-राम:+त्रायते=रामस्त्रायते; बाल:+तिशति=बालस्तिशति, हरि:+शेते=हरिश्शेते, हरि:त्राता=हरिस्त्राता; पूर्ण:+चन्द्र:=पूर्णस्चन्द्र:;

श् ष् स्-मुनि:+शेते=मुनिश्शेते; राम:+षष्ठ:=रामष्षष्ठ:; नि:+सार:=निस्सार:; कृष्ण:+ सर्प:=कृष्णस्सर्प:, (विकल्प से)

र्-मुनि:+आगत:=मुनिरागत:;

2. "इदुदुपधस्य चाऽप्रत्ययस्य (8.3.41) इकारोकारोपधस्याऽऽप्रत्ययस्य विसर्गस्य ष: स्यात्कुप्वो:। यथा-आवि:+कृतम्=आविष्कृतम्, दु:+कृतम्=दुष्कृतम्, नि:+प्रत्युहम्=निष्प्रत्युहम्, नि:+क्रान्त:=निष्क्रान्त:,

3. कानाम्रेडिते (8.3.12) कान्नकारस्य रु: स्यादाम्रडिते परे। यथा- कान्+कान=कांस्कान,

4. उत्व. (क) "अतो रोरप्लुतादप्लुते (6.1.111) अप्लुतादत:परस्य रो:उ: स्यादप्लुतेऽति"

यथा-शिवस् (र्) +अर्च्य:=शिवोऽर्च्य:, बालस्(र्)+अयम्=बालोऽयम्, स:+अपि=सोऽपि, बालक:+अवदत्=बालकोऽवदत्,

5. (क) "खरवसानयोर्विसर्जनीय: (8.3.15) खरि अवसाने च परे रेफस्य विसर्जनीय: स्यात्पदान्ते।" (ख) "शर्परे विसर्जनीय: (8.3.35) शर्परे खरि विसर्जनीयस्य विसर्जनीय:, न त्वन्यत्।" उदाहरणार्थ-

(क) पयस्+सु=पय:सु, निस्-नि:, पयस-पय:, बहुशस्-बहुश:, बाल+सुप:=बाल:,

(ख) निर्+नि:, प्रातर्=प्रात:, अन्तर्=अन्त:, पुनर्=पुन:, पितृ-पितर्=पित:, मातृ-मातर=मात:,

5. स्वादिसन्धि-

1. रुत्व-"ससजुषो रु:" (8.2.66) पदान्तस्य सस्य सजुष् शब्दस्य च रु: स्यात्। यथा-हरिस्+अवदत्=हरिरवदत्, वधूस्+एषा=वधूरेषा, शिशुस्+आगच्छति=शिशुरागच्छति, पितुस्+ इच्छा=पितुरिच्छा, भ्रातुर+कन्या=भ्रातु:कन्या,

2. उत्व–

1. "अतो रोरप्लुतादप्लुते" (6.1.113) अप्लुताद् ह्रस्वात् अकारात् परस्य रेफस्य उकार: स्यात् अप्लुते अकारे परे। यथा-शिवस्(र्)+अर्च्य: शिवोऽर्च्य:, स:+अपि=सोऽपि, बालस् (र्) अयम्=बालोऽयम्, बालक:+अवदत्=बालकोऽवदत्, राम:+अस्ति=रामोऽस्ति,
2. "हशि च (6.1.14) अप्लुतादत: परस्य रो: उ: स्याद्धशि।" यथा- क:+अयम्=कोऽयम्; राम:+गच्छति=रामोगच्छति; स:+अपि=सोऽपि; शिवस्+वन्ध:=शिवो वन्ध:; नूतन:+ घट:=नूतनो घट:; मन:+रथ:=मनोरथ:; रावण:+हत:=रावणो हत:; मन:+भाव:=मनोभाव:; क:+गच्छति=को गच्छति, देव:+हसति=देवो हसति, राम:+वदति=रामो वदति।
3. "भोभगो अघो अपूर्वस्य योऽशि" (8.3.17) भोस्, भगोस्, अघोस् अकारपूर्वस्य च रेफस्य स्थाने यकारादेशो भवति अश् परे। एवं "हलि सर्वेषाम्" भोस्, भघोस्, अघोस्, अकारपूर्वस्य च यकारस्य लोप: स्यात् हल् प्रत्याहारे परे। यथा-भोस्+देवा:=भो देवा:, भोस्+लक्ष्मि=भो लक्ष्मि, भगोस्+नमस्ते=भगो नमस्ते, देवास्+हसन्ति=देवा हसन्ति, देवास्+नम्या=देवा नम्या:, अघोस्+याहि=अघो याहि,
4. (क) "रषाभ्यां नो ण:समानपदे (8.4.1) एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य ण: स्यात्।" (ख) "अट्कुप्वाङ्नुम्व्यवायेऽपि (8.4.2) अट् कवर्ग पवर्ग आङ्नुंम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य ण: स्यात्समानपदे।" (ग) "इण् को: (8.3.57) इत्यधिकृत्य" (घ) "आदेशप्रत्यययो (8.3.59) कीर्+न:=कीर्ण:, पूर्+न:=पूर्ण:, रामेण, रामाणाम्, रामेषु, भवन्ति।
5. "रोरि" रेफस्य रेफे परे लोप: स्यात्। "ढ्रलोपे पूर्वस्य दीर्घोऽण:" ढकारस्य रेफस्य च लोपे सति ढकारे रेफे च परे पूर्वस्य अणो दीर्घ: स्यात्। यथा-पुनर्+रमते=पुनारमते, हरिर्+रम्य:=हरी रम्य:, शम्भुर्+राजते=शम्भू राजते, अन्तर्+राष्ट्रिय:=अन्ताराष्ट्रिय:, नि:+रव:=नीरव:, दु:+राज:= दूराज:, नि:+रोग:=नीरोग:, प्रात:+रम्यम्=प्रातारम्यम्।
6. "एत्ततदो: सुलोपोऽकोरनञ्समासे हलि" अककारयो: एतत्तदो: य: सु तस्य लोप: स्यात् हलि परे न तु नञ् समासे। यथा-एष:+विष्णु:=एष विष्णु:, स:+शम्भु:=स शम्भु:, स:+लिखति=स लिखति, एष:+सखा=स सखा।

(ञ) उपसर्ग/अव्यय-विवेचनम्

"न व्येति इति अव्ययम्" "स्वरादिनिपातमव्ययम्" अर्थात् येषां पदानां लिङ्ग-संख्यानिमित्तको रूप-भेदो नास्ति तानि "अव्ययानि" इत्युच्यते। यथोक्तम्–

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्।।

अव्ययस्य भेदः-चत्वारो भेदाः-1. उपसर्गः, 2. क्रियाविशेषणम्, 3. समुच्चयबोधकम्, 4. मनोविकार-सूचकम्।

1. उपसर्गः- यः क्रिया, संज्ञा तथा विशेषण-शब्दानां प्रारम्भे योज्यते सः उपसर्गः।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहार-संहार-विहार-परिहारवत् ।।
धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते।
विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा।।

1. प्रहारः=प्र+हृ+घञ्+सु (आघातः)
2. आहारः=आ+हृ+घञ्+सु (भक्षणम्)
3. विहारः=वि+हृ+घञ्+सु (भ्रमणम्)
4. संहारः=सम् हृ+घञ्+सु (विनाशः, उपसंहारः)
5. परिहारः=परि+हृ+घञ्+सु (निराकरणम्)

संस्कृते उपसर्गाः 22 द्वाविंशतिः सन्ति-प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ (आङ्), नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप। यथा-प्र+भू=प्रभवति, उद्+गम्=उद्गच्छति इत्यादयः।

2. क्रियाविशेषणम्-यः अव्यय-शब्दःक्रियायाः विशेषता प्रकटयति सः क्रियाविशेषण-अव्ययः। क्रिया विशेषण-शब्दाः सर्वनामः, संख्यावाचकविशेषणं, तद्धितः तथा च कृदन्तः शब्दैः रचयन्ति।

क्रियाविशेषणस्य पञ्चभेदा-

1. मूल अव्ययः, यथा-विना, वृथा, पृथक्, अन्तरः, उच्चैः, नीचैः, ह्य, श्व, दिवा, रात्रौ, अद्य इत्यादयः।
2. सङ्ख्यावाचकोद्भव अव्ययः, यथा-एकधा, द्विधा, त्रिधा, चतुर्धा, पञ्चधा इत्यादयः।
3. सर्वनामोद्भव अव्ययः-यथा, यदा, तदा, कदा, कदाचित्, इदानीम्, किम्, तथा, इत्यादयः।
4. तद्धितोद्भव अव्ययः-यथा-पुत्रवत्, रामवत्, भस्मसात्, कृष्णवत्, आत्मसात् इत्यादयः।
5. कृदुद्भव-अव्ययः-यथा-गत्वा, पठित्वा, भवितु , भुक्त्वा, ज्ञात्वा, परित्यज्य, श्रोतुम् इत्यादयः।
6. समुच्चयबोधक अव्ययः-येन समुदायस्य बोधो भवति। यथा-च, वा, तु, चेत्, किन्तु इत्यादयः।
7. मनोविकारसूचक अव्ययः-येन अव्ययेन मनस्य विभिन्न-विकारस्य व्यक्तो भवन्ति। यथा-हा, धिक्, हन्त, बत, आः, हुम्, हा, हा-हा इत्यादयः।

(ट) सुबन्तविवेचनम्-

"अर्थवद्धातुरप्रत्ययः प्रातिपदिकम्" (1.2.45) धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। इति पाणिनिसूत्रानुसारं "प्रातिपदिकं" तद्भवति, यत् अर्थवत्, अधातुः अप्रत्ययः भवेत्।

संस्कृतभाषायां केवलं प्रातिपदिकं (सुप् तिङ् सहितं) प्रयोक्तव्यम्। "अपदं न प्रयुञ्जीतः"। तादृशेन प्रातिपदिकेन साकं सुप् प्रत्ययस्य तिङ्प्रत्ययस्य वा योगेन पदत्वं साध्यते। सुप्प्रत्ययानां द्वारा शब्दरूपाणि, तिङ्प्रत्ययानां द्वारा धातुरूपाणि सञ्जायन्ते। "सुप्तिङन्तं पदम्" इति सूत्रेण सुवन्तं तिङन्तं च पदसंज्ञात्वं प्राप्नोति। सुप् अन्ते यस्य तत् सुवन्तम्। "स्वौजसमौट्छस्टा-भ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम् भ्यस्ङसोसाम्-ङयोस्सुप्" इति पाणिनीयसूत्रानुसारं "सु" तः आरम्भ "सुप्" पर्यन्तं विद्यमाना 21 प्रत्ययाः सुप्प्रत्ययत्वेन गृह्यन्ते।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु (स्=:)	औ	जस्(अस्)
द्वितीया	अम्	औट् (औ)	शस् (अस्)
तृतीया	टा (आ)	भ्याम्	भिस्(भिः)
चतुर्थी	ङे	भ्याम्	भ्यस्(भ्यः)
पञ्चमी	ङसि(अस्)	भ्याम्	भ्यस्(भ्यः)
षष्ठी	ङस् (अस्)	ओस्(ओः)	आम्
सतमी	ङि (इ)	ओस्(ओः)	सुप्(सु)

1. अजन्तपुंलिङ्गशब्दाः-अकारान्ताः, इकारान्ताः, उकारान्ताः, ऋकाराताः, ऐकारान्ताः, ओकारान्ताः, औकारान्ताः च।
2. अजन्तस्त्रीलिङ्गशब्दाः-आकारान्ताः, इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः, ऋकाराताः, ऐकारान्ताः, ओकारान्ताः, औकारान्ताः च।
3. अजन्तनपुंसकलिङ्गशब्दाः- अकारान्ताः, इकारान्ताः, उकारान्ताः, ऋकारान्ताः, एकारान्ताः, ऐकारान्ताः, ओकारान्ताः, औकारान्ताः च।
4. हलन्तपुंलिङ्गशब्दाः-चकारान्ताः, जकारान्ताः, तकारान्ताः, दकारान्ताः, नकारान्ताः, शकारान्ताः, षकारान्ताः, सकारान्ताः, हकारान्ताः च।
5. हलन्तस्त्रीलिङ्गशब्दाः- चकारान्ताः, जकारान्ताः, तकारान्ताः, दकारान्ताः, धकारान्ताः, नकारान्ताः, पकारान्ताः, भकारान्ताः, रेफान्ताः, वकारान्ताः, शकारान्ताः, षकारान्ताः, सकारान्ताः, हकारान्ता च भवन्ति।
6. हलन्तनपुंसकलिङ्गशब्दाः-चकारान्ताः, जकारान्ताः, तकारान्ताः, दकारान्ताः, नकारान्ताः, रेफान्ताः, शकारान्ताः, षकारान्ताः, सकारान्ताः, हकारान्ता च भवन्ति।

अजन्तपुल्लिङ्गशब्दरूपम्-

1. अकारान्त "राम" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	2. इकारान्त "हरि" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	3. ऋकारान्त "पितृ" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,
प्रथमा-रामः रामौ रामाः हे राम हे रामौ हे रामाः	प्रथमा-हरिः हरी हरयः हे हरे हे हरी हे हरयः	प्रथमा-पिता पितरौ पितरः हे पितः हे पितरौ हे पितरः
द्वितीया-रामम् रामौ रामान्	द्वितीया-हरिम् हरी हरीन्	द्वितीया-पितरम् पितरौ पितॄन्
तृतीया-रामेण रामाभ्याम् रामैः	तृतीया-हरिणा हरिभ्याम् हरिभः	तृतीया-पित्रा पितृभ्याम् पितृभिः
चतुर्थी-रामाय रामाभ्याम् रामेभ्यः	चतुर्थी-हरये हरिभ्याम् हरिभ्यः	चतुर्थी-पित्रे पितृभ्याम् पितृभ्यः
पञ्चमी-रामात् रामाभ्याम् रामेभ्यः	पञ्चमी-हरेः हरिभ्याम् हरिभ्यः	पञ्चमी-पितुः पितृभ्याम् पितृभ्यः
षष्ठी-रामस्य रामयोः रामाणाम्	षष्ठी-हरेः हरयोः हरिणाम्	षष्ठी-पितुः पित्रोः पितॄणाम्
सप्तमी--रामे रामयोः रामेषु	सप्तमी-हरौ हरयोः हरिषु	सप्तमी-पितरि पित्रोः पितृषु

अजन्तस्त्रीलिङ्गशब्दरूपम्-

4. आकारान्त "रमा" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	5. इकारान्त "मति" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	6. ईकारान्त "नदी" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,
प्रथमा-रमा रमे रमाः हे रमे हे रमे हे रमाः	प्रथमा-मतिः मती मतयः हे मते हे मती हे मतयः	प्रथमा- नदी नद्यौ नद्यः हे नदि हे नद्यौ हे नद्यः
द्वितीया-रमाम् रमे रमाः	द्वितीया-मतिम् मती मतीः	द्वितीया-नदीम् नद्यौ नदीः
तृतीया-रमया रमाभ्याम् रमाभिः	तृतीया-मत्या मतिभ्याम् मतिभिः	तृतीया-नद्याः नदीभ्याम् नदीभिः
चतुर्थी-रमायै रमाभ्याम् रमाभ्यः	चतुर्थी-मत्य, मतये मतिभ्याम् मतिभ्यः	चतुर्थी-नद्यै नदीभ्याम् नदीभ्यः
पञ्चमी-रमायाः रमाभ्याम् रमाभ्यः	पञ्चमी-मत्याः, मतेःमतिभ्याम् मतिभ्यः	पञ्चमी-नद्याः नदीभ्याम् नदीभ्यः
षष्ठी-रमायाः रमयोः रमाणाम्	षष्ठी- मत्याः, मतेः मत्योः मतिनाम्	षष्ठी-नद्याः नद्योः नदीनाम्
सप्तमी-रमायाम् रमयोः रमासु	सप्तमी-मत्याम्, मतौ मत्योः मतिषु	सप्तमी-नद्याम् नद्योः नदीषु

अजन्तनपुंसकल्लिङ्गशब्दरूपम्-

7. अकारान्त "ज्ञान" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	8. हलन्तपुल्लिङ्ग "तत्" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	9. हलन्तपुल्लिङ्ग "युष्मद्" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,
प्रथमा-ज्ञानम् ज्ञाने ज्ञानानि हे ज्ञान हे ज्ञाने हे ज्ञानानि	प्रथमा- सः तौ ते	प्रथमा-त्वम् युवाम् यूयम्
द्वितीया-ज्ञानम् ज्ञाने ज्ञानानि	द्वितीया-तम् तौ तान्	द्वितीया-त्वाम्, त्वा युवाम् युष्मान्
तृतीया-ज्ञानेन ज्ञानाभ्याम् ज्ञानैः	तृतीया-तेन ताभ्याम् तैः	तृतीया-त्वया युवाभ्याम् युष्माभिः
चतुर्थी-ज्ञानाय ज्ञानाभ्याम् ज्ञानेभ्यः	चतुर्थी-तस्मै ताभ्याम् तेभ्यः	चतुर्थी-तुभ्यम्, ते युवाभ्याम् युष्मभ्यम्
पञ्चमी-ज्ञानात् ज्ञानाभ्याम् ज्ञानेभ्यः	पञ्चमी-तस्मात् ताभ्याम् तेभ्यः	पञ्चमी-त्वत् युवाभ्याम् युष्मत्
षष्ठी-ज्ञानस्य ज्ञानयोः ज्ञानानाम्	षष्ठी- तस्य तयोः तेषाम्	षष्ठी-तव, ते युवयोः युष्माकम्
सप्तमी-ज्ञाने ज्ञानयोः ज्ञानेषु	सप्तमी-तस्मिन् तयोः तेषु	सप्तमी-त्वयि युवयोः युष्मासु

हलन्तपुल्लिङ्ग-स्त्री-नपुंसकल्लिङ्ग शब्दरूपानि-

10. हलन्तपुल्लिङ्ग "इदम्" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,	11. हलन्तस्त्रील्लिङ्ग "इदम्" शब्दः **विभक्ति** एकंवचन, द्विवचन, वहुवचन,	12. हलन्तनपुंसक "इइम्" शब्दः, **विभक्ति** एकवचन, द्विवचन, वहुवचन,
प्रथमा- अयम् इमौ इमे	प्रथमा- इयम् इमे इमाः	प्रथमा- इदम् इमे इमानि
द्वितीया-इमम् इमौ इमान्	द्वितीया-इमाम्, एनाम् इमे, एने इमाः, एनाः	द्वितीया-इदम्, एनत् इमे, एने इमानि, एनानि
तृतीया-अनेन आभ्याम् एभिः	तृतीया-अनया, एनया आभ्याम् आभिः	तृतीया-अनेन, एनेन आभ्याम् एभिः
चतुर्थी-अस्मै आभ्याम् एभ्यः	चतुर्थी-अस्यै आभ्याम् आभ्यः	चतुर्थी- अस्मै आभ्याम् एभ्यः
पञ्चमी-अस्मात् आभ्याम् एभ्यः	पञ्चमी-अस्याः आभ्याम् आभ्यः	पञ्चमी- अस्मात् आभ्याम् एभ्यः
षष्ठी-अस्य अनयोः एषाम्	षष्ठी-अस्याः अनयोः, एनयोः आसाम्	षष्ठी- अस्य अनयोः एषाम्
सप्तमी-अस्मिन् अनयोः एषु	सप्तमी-अस्याम् अनयोः, एनयोः आसु	सप्तमी- अस्मिन् अनयोः एषु

हलन्तपुल्लिङ्ग-स्त्री-नपुंसकल्लिङ्ग शब्दरूपानि-

13. हलन्तपुल्लिङ्ग" अस्मद्" शब्दः, विभक्ति एकवचन, द्विवचन, वहुवचन	14. हलन्तस्त्रील्लिङ्ग" किम्" शब्दः, विभक्ति एकवचन, द्विवचन, वहुवचन	15. हलन्तनपुंसकल्लिङ्ग" किम्" शब्द विभक्ति एकवचन, द्विवचन, वहुवचन
प्रथमा- अहम् आवाम् वयम्	प्रथमा- का के काः	प्रथमा- किम् के कानि
द्वितीया-माम्, मा आवाम्, नौ अस्मान्, नः	द्वितीया-काम् के काः	द्वितीया-किम् के कानि
तृतीया-मया आवाभ्याम् अस्माभिः	तृतीया- कया काभ्याम् काभिः	तृतीया-केन काभ्याम् कैः
चतुर्थी-मह्यम् आवाभ्याम् अस्मभ्यम्,	चतुर्थी-कस्मै काभ्याम् काभ्यः	चतुर्थी-कस्मै काभ्याम् केभ्यः
पञ्चमी-मत् अवाभ्याम् अस्मत्	पञ्चमी-कस्याः काभ्याम् काभ्यः	पञ्चमी-कस्मात् काभ्याम् केभ्यः
षष्ठी-मम आवयोः अस्माकम्	षष्ठी-कस्याः कयोः कासाम्	षष्ठी-कस्य कयोः केषम्
सप्तमी-मयि आवयोः अस्मासु	सप्तमी-कस्याम् कयोः कासु	सप्तमी-कस्मिन् कयोः केषु

(ठ) तिङन्तविवेचनम्-(धातुप्रकरणम्)

प्रत्येकस्मिन् वाक्ये या काऽपि क्रिया भवत्येव। क्रियापदानि द्विविधानि-1. तिङन्तानि, 2. कृदन्तानि च। तिङ् अन्ते येषां तानि तिङन्तानि पाणिनिमतानुसारं 18 अष्टादश तिङ् प्रत्यया भवन्ति

धातवः त्रिविधाः भवन्ति-1. परस्मैपदिनः, 2. आत्मनेपदिनः, 3. उभयपदिनः च। प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः इति क्रमेण पुरुषाः त्रयः। पुनश्च तत्र एकवचनं, द्विवचनं, बहुवचनं चेति त्रीणि वचनानि भवन्ति।

1. परस्मैपदिनः प्रत्ययाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	सः-तिप्(ति) पठति	तौ-तस्(तः) पठतः	ते-झि(अन्ति) पठन्ति
मध्यमपुरुषः	त्वम् सिप्(सि) पठसि	युवाम् थस्(थः) पठथः	यूयम् थ पठथ
उत्तमपुरुष	अहम्-मिप्(मि) पठामि	आवाम्-वस्(वः) पठावः	वयम्-मस्(मः) पठामः

2. आत्मनेपदिनः प्रत्ययाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	त (वर्धते)	आताम् (वर्धेते)	झ(वर्धन्ते)
मध्यमपुरुषः	थास्(वर्धसे)	आथाम्(वर्धेथे)	ध्वम्(वर्धध्वे)
उत्तमपुरुष	इट् (वर्धे)	वहि(वर्धावहे)	महिङ्(वर्धामहे)

एतेषाम् आरम्भे "ल" अस्ति इति कारणात् "लकारः" इत्युच्यते। पाणिनि उक्ताः दशलकाराः इत्थं भवन्ति। वर्तमान-भूत-भविष्यरूपेण त्रयः कालाः भवन्ति।

क्र. सं	लकारः	अर्थः	सूत्रम्	उदाहरणम्
1.	लट्	वर्तमानम्	वर्तमाने लट्	भवति
2.	लिट्	अनद्यतनपरोक्षभूतम्	परोक्षे लिट्	बभूव
3.	लुट्	अनद्यतनभविष्यत्	अनद्यतने लुट्	भविता
4.	लृट्	सामान्यभविष्यत्	लृट् शेषे च	भविष्यति
5.	लोट्	विधि-आशीर्वाद-आदेशालयः	"लोट् च, आशिषि लिङ्लोटौ'	भवतु
6.	लङ्	अनद्यतनभूतम्	अनद्यतने लङ्	अभवत्
7.	लुङ्	अद्यतनभूतार्थे	लुङ्	अभूत्
8.	विधिलिङ्	विधि-निमन्त्रणसत्कारादयः	"विधिनिमन्त्रणा-	भवेत्
9.	आशीर्लिङ्	आशीर्वाद	आशिषि लिङ्लोटौ	भूयात्
10.	लृङ्	हेतुहेतुमद्भावभविष्यत्	"लिङ्निमित्तेलृङ् क्रियातिपत्तौ"	अभविष्यत्

धातुषु दश गणाः भवति।

भ्वाद्यदादी जुहोत्यादिदिवादिः स्वादिरेव च।
तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः।।

धातुरूपम्- परस्मैपदिनः प्रत्ययाः

लकार	पुरुष	एकवचन द्विवचन बहुवचन	लकार, पुरुष	एकवचन द्विवचन बहुवचन
लट्	प्रथमपुरुष	भवति भवतः भवन्ति	लिट्-प्रथमपुरुष	बभूव बभूवतुः बभूवुः
	मध्यमपुरुष	भवसि भवथः भवथ	मध्यमपुरुष	बभूविथ बभूवथुः वभूव
	उत्तमपुरुष	भवामि भवावः भवामः	उत्तमपुरुष	बभूव बभूविव बभूविम
लुट्	प्रथमपुरुष	भविता भवितारौ भवितारः	लृट् प्रथमपुरुष	भविष्यति भविष्यतः भविष्यन्ति
	मध्यमपुरुष	भवितासि भवितास्थः भवितास्थ	मध्यमपुरुष	भविष्यसि भविष्यथः भविष्यथ
	उत्तमपुरुष	भवितास्मि भवितास्व भवितास्म	उत्तमपुरुष	भविष्यामि भविष्यवः भविष्यमः
लोट्	प्रथमपुरुष	भवतु भवताम् भवन्तु	लङ्-प्रथमपुरुष	अभवत् अभवताम् अभवन्
	मध्यमपुरुष	भव भवतम् भवत	मध्यमपुरुष	अभवः अभवतम् अभवत
	उत्तमपुरुष	भवानि भवाव भवाम	उत्तमपुरुष	अभवम् अभवाव अभवाम

क्रमशः ...

विधि लिङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भवेत् भवेताम् भवेयुः भवेः भवेतम् भवेत भवेयम् भवेव भवेम	आ.लि.	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भूयात् भूयास्ताम् भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म
लुङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	अभूत् अभूताम् अभूवन् अभूः अभूतम् अभूत अभूवम् अभूव अभूम	लृङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	अभविष्यत् अभविष्यताम् अभविष्यन् अभविष्यः अभविष्यतम् अभविष्यत अभविष्यम् अभविष्याव अभविष्याम

धातुरूपम्-आत्मनेपदिनः प्रत्ययाः

लकार	पुरुष	एकवचन द्विवचन बहुवचन	लकार	पुरुष	एकवचन द्विवचन बहुवचन
लट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भाषते भाषेते भाषन्ते भाषसे भाषेथे भाषध्वे भाषे भाषावहे भाषामहे	लिट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	बभाषे बभाषते बभाषिरे बभाषिषे बभाषथे बभाषिध्वे बभाषे बभाषिवहे बभाषिमहे
लुट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भाषिता भाषितारौ भाषितारः भाषितासे भाषितासाथे भाषिताध्वे भाषिताहे भाषितास्वहे भाषितास्वमहे	लृट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भाषिष्यते भाषिष्येते भाषिष्यन्ते भाषिष्यसे भाषिष्येथे भाषिष्यध्वे भाषिष्ये भाषिष्यावहे भाषिष्यामहे
लोट्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भाषताम् भाषेताम् भाषन्ताम् भाषस्व भाषेथाम् भाषध्वम् भाषै भाषावहै भाषामहै	लङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	अभाषत अभाषेताम् अभाषन्त अभाषथाःअभाषेथाम् अभाषध्वम् अभाषे अभाषावहि अभाषामहि
विधि लिङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भाषेत भाषेयाताम् भाषेरन् भाषेथाः भाषेयाथाम् भाषेध्वम् भाषेय भाषेवहि भाषेमहि	आ. लिङ्	प्रथमपुरुष मध्यमपुरुष उत्तमपुरुष	भाषिषीष्ट भाषिषीयास्ताम् भाषिषीरन् भाषिषीष्ठाः भाषिषीयास्थाम् भाषिषीध्वम् भाषिषीय भाषिषीवहि भाषिषीमहि

क्रमशः .....

लुङ्	प्रथमपुरुष	अभाषिष्ट अभाषिषाताम् अभाषिषत	लृङ्	प्रथमपुरुष	अभाषिष्यत् अभाषिष्येताम् अभाषिष्यन्त
	मध्यमपुरुष	अभाषिष्ठा:अभाषिषाथाम् अभाषिध्वम्		मध्यमपुरुष	अभाविष्यथा:अभाविष्ये अभाषिष्यामहि
	उत्तमपुरुष	अभाषिषि अभाषिष्वहि अभाषिष्महि		उत्तमपुरुष	अभाषिष्ये अभाषिष्यावहि अभाषिष्यध्वम्

(ड) कारकम्-विभक्तिविवेचनम्-

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणमित्येवं कारकाणि षट्।।

1. कर्ता-"स्वतन्त्र: कर्ता" क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थ: कर्ता स्यात्।
2. कर्म-"कर्तुरीप्सिततमं कर्म" कर्तु: क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।
3. करणम्-"साधकतमं करणम्" क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।
4. सम्प्रदानम्-"कर्मणा यमभिप्रैति स सम्प्रदानम्" दानस्य कर्मणा यमभिप्रति स सम्प्रदानसंज्ञं स्यात्।
5. अपादान्-"ध्रुवमपायेऽपादानम्" अपायो विश्लेष:, तस्मिन्साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्यात्।
6. अधिकरण्म्-"आधारोऽधिकरणम्" कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधार: कारकमधिकरणम्।

1. प्रथमाविभक्ति:-"प्रातिपदिकार्थ-लिङ्ग--परिमाण-वचनमात्रे प्रथमा" नियतोपस्थितिक: प्रातिपदिकार्थ:। मात्रशब्दस्य प्रत्येकं योग:। प्रातिपदिकार्थमात्रे(उच्चै:, नीचै:, कृष्ण:, श्री:, ज्ञानम्) लिङ्गमात्रे(तट:, तटी, तटम्) परिमाणमात्रे(द्रोणो व्रीहि:) संख्यामात्रे(एक:, द्वौ, बहव:) च प्रथमा स्यात्। एवं च सम्बोधने प्रथमा स्यात्।

सु (स्=:) औ जस्(अस्)

2. द्वितीयाविभक्ति:-(क) "कर्मणि द्वितीया" अनुक्ते कर्मणि द्वितीया स्यात्। यथा-हरि: सेव्यते। (ख) "अकथितं च" अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। यथा-गां दोग्धि पय:। इत्यादि (ग) "उभसर्वतसो: कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। इति वार्तिकेण उभयत:, सर्वत:, धिक्, उपर्युपरि, अधोऽध:, अध्यधि, त्रय: आम्रेडितान्ता: इति पदानां योगेऽपि द्वितीया भवति। (घ) "अभित:परित: समया निकषा हा प्रतियोगेऽपि" इति वार्तिकेण अभित:, परित:, समया, निकषा, हा इति पदानां योगेऽपि द्वितीया स्यात्। (ङ) "अन्तराऽन्तरेण युक्ते" इति सूत्रेण अन्तरा, अन्तरेण योगे द्वितीया विभक्ति: स्यात्।

अम् औट् (औ) शस् (अस्)

3. तृतीयाविभक्ति:-(क) "कर्तृकरणयोस्तृतीया" इति सूत्रेण अनभिहिते कर्तरि करणे च तृतीयाविभक्ति: स्यात्। यथा-रामेण बाणेन हतो बाली। (ख) "सहयुक्तेऽप्रधाने" इति सूत्रेण सह, साकं, समं, सार्धम् इत्यादि सहार्थकपदानां योगे तृतीयाविभक्ति:स्यात्। यथा-पुत्रेण सहागत:

पिता। (ग) "येनाङ्गविकारः" इति सूत्रेण येन विकृतेन अंगेन अखिलशरीरस्य विकृतिः उक्ता, तेन अंगवाचकशब्देन सह तृतीयाविभक्तिः स्यात्। यथा-अक्ष्णा काणः।

टा (आ) भ्याम् भिस्(भिः)

4. चतुर्थीविभक्तिः-(क) "चतुर्थी सम्प्रदाने" इति सूत्रेण सम्प्रदानसंज्ञकेषु पदेषु चतुर्थी विभक्तेः प्रयोगः भवति। यथा-विप्राय गां ददाति। (ख) "रुच्यर्थानां प्रीयमाणः" इति सूत्रेण रुच्यर्थकधातुभिर्योगे प्रीयमाणस्य सम्प्रदानसंज्ञा भवति। (ग) "नमः स्वस्ति-स्वहा-स्वधाऽलं-वषड्योगाच्च" इति वार्तिकेण नमः, स्वस्ति, स्वाहा, स्वधा, अलं, वषट् इत्यादिभिर्योगे चतुर्थीविभक्तिः स्यात्। यथा-हरये नमः, प्रजाभ्यः स्वस्ति, अग्नये स्वाहा इत्यादि।

ङे भ्याम भ्यस् (भ्यः)

5. पंचमीविभक्तिः-(क) "अपादाने पंचमी" इति सूत्रेण अपादानसंज्ञकेषु पदेषु पंचमी-विभक्तिः स्यात्। यथा-ग्रामाद् आयाति। (ख) "भीत्रार्थानां भयहेतुः" इति सूत्रेण भी, त्रै इत्यादिभिर्धातुभिर्योगे पंचमी विभक्तिः स्यात्। यथा-चौराद् बिभेति। (ग) "पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्" इति सूत्रेण पृथक्, विना, नाना, इत्यादिभिर्योगे तृतीया, पंचमी, द्वितीया स्यात्। यथा-पृथक् रामेण रामात् रामं वा।

ङसि (अस्) भ्याम् भ्यस् (भ्यः)

6. षष्ठी-विभक्तिः-(क) "षष्ठी शेषे" इति सूत्रेण कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामि-भावादिः सम्बन्धः शेषस्तत्र षष्ठी स्यात्। यथा-मातुः स्मरति। (ख) "कर्तृकर्मणोः कृति" इति सूत्रेण अनुक्तकर्तायां कर्मणि च षष्ठी स्यात्। यथा-कृष्णस्य कृतिः। (ग) "षष्ठी हेतुप्रयोगे" अनेन सूत्रेणापि हेतु-शब्देन हेतु प्रयोगे षष्ठी स्यात्। यथा-अन्नस्य हेतोः वसति।

ङस् (अस्) ओस् (ओः) आम्

7. सप्तमी-विभक्तिः-(क) "सप्तम्यधिकरणे च" इति सूत्रेण अधिकरणे सप्तमी स्यात्। यथा-कटे आस्ते, स्थल्यां पचति। (ख) "निमित्तात्कर्मयोगे" इति वार्तिकेण निमित्तेषु क्रिया-फलवाचकेषु च शब्देषु सप्तमी स्यात्। यथा-

चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः।।

ङि (इ) ओस् (ओः) सुप् (सु)

(ढ) प्रत्ययविवेचनम्- Suffix

1. कृदन्त (Agentives)

"प्रतीयते अर्थ विशेषो बोध्यते येन सः प्रत्ययः"। प्रत्ययाः सामान्यतः द्विधा भवन्ति। धातोः विधीयमानः प्रत्ययः कृदन्तः इत्युच्यते। कृदन्तरूपाणि कदाचित् क्रियार्थम् असमापिकाक्रियार्थं वा बोधयन्ति। कृदन्तेभ्यः सुप् प्रत्ययाः भवन्ति। क्वचिदव्ययत्वेन च व्यवहारः भवति कृदन्तानाम्।

कृत्य प्रत्ययाः सप्त भवन्ति। ते यथा-1. तव्यत्, 2. तव्य, 3. अनीयर्, 4. केलिमर्, 5. यत्,

6. क्यप्, 7. ण्यत् इत्येषां कृत्यप्रत्ययत्वेन व्यवहारः। एते कर्मवाच्ये भाववाच्ये च उपयुज्यते, न तु कर्तरि। उक्तञ्च सूत्रम्-"तयोरेव कृत्यक्तखलर्थाः" यथा-मया गन्तव्यम्, त्वया कर्तव्यम्, भवता करणीयम् इत्यादि।

1. निरन्तरतासूचकवर्तमानकालिकविशेषणम्-(शतृ, शानच्)

(क) शतृ (अत्) परस्मैपदी-भवत (पुं०) भवन्ति (स्त्री०) भवत (नपुं०)

(ख) शानच् (आन्) आत्मनेपदी-कम्पमाणः (पुं०), कम्पमाना, (स्त्री०) कम्पमानम् (नपुं०)।

2. पूर्णताबोधकभूतकालिकविशेषणम्-(क्त, क्तवतु)

(क) क्त (त) कर्मवाच्ये भाववाच्ये च-कृतः(पुं०), कृता(स्त्री०), कृतम् (नपुं०)।

(ख) क्तवतु (तव) कर्तृवाच्ये गतवान् (पुं०), गतवती (स्त्री०), गतवत् (नपुं०)।

3. योग्यताबोधकभविष्यतकालिकविशेषणम् (कृत्य)

प्रत्ययः	धातुः	रूपंम् (पुं० स्त्री० नपुं०)	अर्थः
1. तव्यत्,	भू	भवितव्यः, भवितव्या, भवितव्यम्	भवितुं योग्य
2. तव्य,	गम् पठ्	गन्तव्यः, गन्तव्या, गन्तव्यम् पठितव्यः, पठितव्या, पठितव्यम्	गन्तुं योग्यं पठितुं योग्यं
3. अनीयर्,	दृश्, कृ, पच्, गम्,	दर्शनीयः, करणीयः, पचनीयः, गमनीयः, दर्शनीया, करणीया, पचनीया, गमनीया, दर्शनीयम्, करणीयम्, पचनीयम्, गमनीयम्,	कर्तुं योग्यं
4. केलिमर्, (एलिम)	पच्	पचेलियः, पचेलिया, पचेलियम्,	
5. यत्, (य)	गम्	गम्यः, गम्या, गम्यम्,	
6. क्यप्, (य)	शिक्ष्	शिष्यः, शिष्या, शिष्यम्,	
7. ण्यत् (य)	क्रि	कार्यः, कार्या, कार्यम्,	

4. कर्तृवाचकविशेषणम्-कृत् प्रत्ययः कर्तृवाच्ये-

प्रत्ययः	धातुः	रूपम् (पुं० स्त्री० नपुं०)	अर्थः
णवुल(अक)		कारकः कारिका कारकम्	
तृच्(इ)		दातृ दात्री दातृ	
ण्वुन् (अक)		नर्तकः नर्तकी+	
णिनि (इन्)		उपकारी उपकारिणी +	
क (अ)		जलदः जलदा जलदम्	
अण् (अ)		कुम्भ+कृ+अण्=कुम्भकारः,	

क्रमशः .....

ट (अ)	वने+चर+अ=वनेचरः,	
ङ (अ)	सरस्+जन्+अ=सरोजम्	
क्विप्	धर्म+विद्+क्विप्=मर्मविद्,	
(सर्वापहारलोप)	धर्मविद्, शास्त्रविद्	

5. अन्यकृदन्तविशेषणम्-

क	तुमुन, तुम	गम्+तुम्=गन्तुम्, पठ्+तुम=पठितुम्,
ख	क्त्वा, ल्यप्	गम्+क्त्वा=गत्वा, आ+गम्+ल्यप्=आगत्य,
ग	ल्युट्(अन्)	भू+अन्=भवनम्, हसनम्, श्रवणम्, पठनम्
घ	घञ्	भू+अ=भावः, पच्+अ=पाकः, पठ्+अ=पाठः विग्रहे तु पठनम्=पाठः, पतनम्त्रातः, भवनम्त्रभावः

धातु	क्तवतु	क्त्वा	तुमुन	तव्य	अनीयर	शतृ	शानच
पठ्	पठितवान्	पठित्वा	पठितुम्	पठितव्यः	पठनीयः	पठन्	+ +
गम्	गतवान्	गत्वा	गन्तुम्	गन्तव्यः	गमनीयः	गच्छन्	+ +
अधिह्	अधीतवान्	अधीत्य	अध्येतुम्	अध्येतव्यः	अध्ययनीयः	+ +	अधीयानः
कथ्	कथितवान्	कथयित्वा	कथयितुम्	कथयितव्यः	कथनीयः	कथयन्	+ +

2. तद्धितप्रत्ययः -

"तेभ्यः अर्थेभ्यः हिता उपयोगिनः प्रत्ययाः तद्धिताः"। "ये प्रत्ययाः संज्ञा, सर्वनाम, विशेषण, अव्ययादि शब्दानां परे तिष्ठन्ति एवं च भिन्नार्थबोधका भवन्ति ते तद्धिता"

1. **संज्ञा**-पृथिवी इति संज्ञाशब्दे अण् या अम् (अ)" पार्थिवः, (पृथिव्यां भवः जातः विकारः ईश्वरः अयं पार्थिवः।) शिव+अण्=शैवः।
2. **सर्वनाम**-1. मम अयम्=मदीयः, (अस्मद्+छ+ईय) 2. मम अयम्=मामकः (अस्मद्+अण्) 3. मम अयम् मामकीनः(अस्मद्+खञ्+ईन्) मम सम्बन्धिनः।
3. **विशेषण**-1. अनयोः अयम् अतिशयेन प्रियः=प्रिय+तरप् (तर) प्रियतरः।
   2. प्रिय इयसुन् (ईयस्) प्रेयान्।
4. **अव्ययम्**-1. श्वः भवः श्वस्+त्य(त्यप्)=श्वस्त्यः, 2. श्वस्+तन (टयु, तुट्)=श्वस्तनः, 3. श्वस्+तिक्(उय्, तुट्)=शौवस्तिकः।
5. **तस्यापत्यम्(अपत्यार्थे प्रयुक्त प्रत्ययः)** (अण्, इञ्, ठक्, ण्य, यञ्, ष्यन्, फक्)

   1. अण् (अ) पुत्रस्यापत्यम्=पौत्रः, रघो अपत्यम्=राघवः, दुहिता अपत्यम्=दौहित्रः। 2. इक् (इ) दशरथस्यापत्यम्=दाशरथिः, दक्षस्यापत्यम्=दाक्षिः। 3. ठक्(एय) गंगायाः अपत्यम्=गांगेयः, राधायाः अपत्यम्=राधेयः, कुन्त्याः अपत्यम्=कौन्तेयः। 4. ण्य, यञ् ष्यन्(य) दिते अपत्यम्=दैत्यः, गर्गस्यापत्यम्=गार्ग्यः, चिते अपत्यम्=चैत्यः। 5. फक् (आयन्) नडस्यापत्यम्=नाडायनः, गर्गस्यापत्यम्=गार्ग्यायनः।

6. सा अस्य देवता (अण् अ)

1. अण् (अ) शिव देवता अस्य शैवः, शक्तिः देवता अस्य शाक्तः।

7. "तद् अधीते तद् वेद" (अण्अ), ठक् (इक्), पुन् (अक्)

1. अण्(अ) व्याकरणमधीते वेद वा वैयाकरणः, वैद्यकमधीते वेद वा वैद्यः, निरूक्तमधीते वेद वा नैरूक्तः, छन्दमधीते वेद वा छन्दसः, ज्योतिषमधीते वेद वा ज्यौतिषः। 2. ठक् (इक्) न्यायमधीते वेद वा नैयायिकः, वार्तिकः, ऐतिहासिकः, पौराणिकः, साहित्यिकः, वैदिकः, याज्ञिकः, तार्किकः, अलंकारिकः, मासिकः, दार्शनिकः। 3. पुन्(अक्) क्रममधीते वेद वा क्रमकः, पदकः, शिक्षकः, मीमांसकः।

8. तत्र जातः, तत्र+भवः,-छ (ईय) ल्यक् (त्य) यत् (य) घ (इय)

1. छ (ईय) शालायां जातः भवः वा शालीयः(शाला+ईय) मालीयः, भारतीयः, पूर्वीयः, उत्तरीयः। 2. ल्यक्(त्य) दक्षिणस्यां जातः भवः वा दक्षिणात्यः। (दक्षिण+त्य) 3. यत्(य) दिवि भवः जातः वा दिव्यः, प्राच्यः, उदीच्यः, ग्राम्यः, ग्रामीणः, आपः, अन्त्यः, वन्यः, अवाच्य। 4. घ (इय) राष्ट्रेभवः जातः वा राष्ट्रियः आदि।

9. तेन प्रोक्तम्-अण्(अ) छ(ईय)

1. अण्(अ) ऋषिणा प्रोक्तम् आर्षम्, मानवकः, पातञ्जलम्। 2. छ(ईय) वाल्मीकिना प्रोक्तं वाल्मीकीयम्, पाणिनीयम्।

10. तस्य इदम् -छ (ईय) खञ् (ईन्)

1. छ(ईय) तस्य अयं तदीयः, तदीया, तदीयम्। अस्य अयं यदीयः, यदीया, यदीयम्। मम अयं मदीयः, अण्(अ) मामकः। 2. खञ्(ईन) मामकीनः, भवतः अयं (ठक्-क) भावत्कः, भवतः अयं (ईय) भवदीयः।

11. तद् अस्य अस्ति अथवा तद् अस्मिन् अस्ति। (मतुप(मत् वत्) इन् विनि(विन्) ग्मिनि(ग्मिन्)

1. मतुप(मत् वत्) गौ अस्ति अस्य गोमान्, गोमती। श्रीमान्, श्रीमती। वलवान, वलवती। बुद्धिमान्, बुद्धिमती। गुणवान्, गुणवती, रूपवान, रूपवती। 2. इन्त्रल्इन्त्रलिनः, वली, वलिनी, वलि। गुणी, गुणिनी, गुणि। 3. विनि(विन्) तपः अस्ति अस्य अस्मिन् वा तपस्विन्, -तपस्वी, तपस्विनी, तपस्वि। 4. ग्मिनि(ग्मिन्) वाक् अस्ति अस्य अस्मिन् वा वाग्ग्यी, वाच ग्मिन् वाग्ग्यिन् (वाग्ग्मीपंडितः)

12. तद् अस्य पण्यम्-

1. ठक् (इक्) लावणिकः(लवणविक्रेता) मौदनिकः (मोदी) तद् अस्य प्रहरणम्-

1. ठक्(इक्) आसिकः, चार्क्रिकः, धानुष्कः, 2. ईकक्(ईक्) शाक्रीकः, यास्टीकः, व्रार्जिकः, 3. इन् शुली, त्रिशुली, चक्री, वज्री, मुसली।

13. अतिशयवाचकप्रत्ययः-(तरप्, तमप्, ईयसुन्, इष्ठन्)

1. तरप्- तौलनिकः अनयोः अयं लघुः लघु तरप् लघुतर, 2. ईयसुन- लघु ईयसुन लघीयान्।

3. तमप्-आत्यनिकः , एषां अयं लघु लघुतमः, (लघु तमप्) 4. इष्ठन्-लघिष्ठः (लघु इष्ठन्)

शब्दः	तर	तम	ईयस	इष्ठ
दुर	दूरतरः	दूरतमः	दवीयान्	दविष्ठः
शीघ्र	क्षिप्रतरः	क्षिप्रतमः	क्षिप्रवान्	क्षेपिष्ठः
लघु	हस्वतरः	हस्वतमः	हस्वयान्	हस्विष्ठः

3. स्त्रीप्रत्यया-

स्त्रीत्वविवक्षायां प्रत्ययानां योजनं द्विप्रकारेण मन्यते। 1. मूलस्त्रीलिङ्गशब्दाः, 2. स्त्रीप्रत्ययान्तशब्दाः।

1. मूलस्त्रीलिङ्गशब्दाः-यथा-रमा, लता, माला, मति, कृति, धेनु, वधू, नी, मातृ, स्वसृ, आपद्, शरत्, प्रतिपद, उषस्, आशिष्, कुंकुम, वाच, गिर, दिश आदि।

2. स्त्रीप्रत्ययान्तशब्दाः-यद्यपि स्त्रीप्रत्ययाः-टाप्, ङाप्, चाप्, -ङीप्, ङीष्, ङीन् इति षड्। मुख्यतः स्त्रीप्रत्ययाः त्रयः सन्ति। यथा- 1. टाप्(आ) 2. ङीप्(ई) 3. ङीष्(ई)

1. टाप् (आ) चाप्(आ) "अजाद्यतष्टाप्" इति सूत्रेण अजादिगणपठितानां शब्दानां तथा अकारान्त शब्दानां स्त्रीत्वविवक्षायां टाप् प्रत्ययो भवति।

1. अज्+टाप् (आ)=अजा,
2. एक+टाप् (आ)=एका,
3. श्वेत+टाप् (आ)=श्वेता
4. वत्स+टाप्(आ)=वत्सा,
5. मूषक+टाप्(आ)=मूसिका,.
6. पाचक+टाप्(आ)=पाचिका,
7. निपुण+टाप्(आ)=निपुणा,
8. वैश्य+टाप् (आ)=वैश्या,
9. चटक+टाप्(आ)=चटिका,
10. शुद+टाप् (आ)=शुद्रा,
11. चतुर+टाप् (आ)=चतुरा,
12. कोकिलः+टाप्(आ)=कोकिला
13. सूर्यः+चाप्(आ)=सूर्या,

2. (क) ङीप् (ई) "ऋन्नेभ्योङीप्" ऋकारान्तात् तथा नकारान्तात् पुंलिङ्गशब्दात् स्त्रीत्वे ङीप् प्रत्ययो भवति।

ऋकारान्तात्शब्दाः	नकारान्तात्शब्दाः
1. गन्तृ+ङीप् (ई)=गन्त्री	1. मायाविन्+ङीप् (ई)=मायाविनी
2. कर्तृ+ङीप् (ई)=कर्त्री	2. मालिन्+ङीप् (ई)=मालिनी
3. हन्तृ+ङीप् (ई)=हन्ती	3. तेजस्विन्+ङीप् (ई)=तेजस्विनी
4. शिक्षयतृ+ङीप्(ई)=शिक्षयित्री	4. गुणिन्+ङीप् (ई)=गुणिनी,
5. दातृ+ङीप् (ई)=दात्री	5. दण्डिन्+ङीप् (ई)=दण्डिनी
6. जनयितृ+ङीप्(ई)=जनयित्री	6. मनोहारिन्+ङीप्(ई)=मनोहारिणी,

क्रमशः .....

ऋकारान्तात्शब्दाः	नकारान्तात्शब्दाः
7. धातृ+ङीप् (ई)=धात्री	7. यशस्विन्+ङीप् (ई)=यशस्विनी
8. भोक्तृ+ङीप् (ई)=भोक्त्री	8. मानिन्+ङीप् (ई)=मानिनी
9. प्रसवितृ+ङीप् (ई)=प्रसवित्री	9. मनस्विन्+ङीप् (ई)=मनस्विनी

(ख) "टिडढाण्ञ्द्वयसज्दध्नञ्मात्रच्तयप्पठक्ठञ्क्ञ्कवरपः" इति सूत्रेण टकारान्तात्, ठक्, अण्, अञ्, द्वयसच्, मात्रच्, तयप्, ठक्, ठञ्, तथा क्वरप् प्रत्ययानतेभ्यः शब्देभ्यो ङीप् प्रत्ययो भवति।

1. नदट्+ङीप्(ई)=नदी,	2. चोरट्+ङीप्(ई)=चोरी
3. देवट्+ङीप्(ई)=देवी	4. सुपर्णृ+ङीप्(ई)=सौपणेयी

(ग) "वयसी प्रथमे" अनेन सूत्रेण वयसवाचिशब्देभ्यो स्त्रीत्वे ङीप् प्रत्ययो भवति।

1. कुमार्+ङीप्(ई)=कुमारी	2. किशोर+ङीप्(ई)=किशोरी
3. वधूट्+ङीप्(ई)=वधूटी	4. नर्+ङीप्(ई)=नारी

3. ङीष् (ई) (क) "षिद्गौरादिभ्यश्च" इति सूत्रेण "ष" कार इत् प्रत्ययानां शब्दानां तथा गौरादिगणे पठितानां शब्दानां स्त्रीत्वे ङीष् प्रत्ययो भवति।

1. नर्तक+ङीष्(ई)=नर्तकी,	2. गौर+ङीष्(ई)=गौरी
3. रजक+ङीष्(ई)=रजकी	4. सुन्दर+ङीष्(ई)=सुन्दरी

(ख) "पुंयोगादाख्यायाम्" इति सूत्रेणपुंलिङ्गशब्दाः, ये पुरुषद्योतक शब्दाः तेषां स्त्रीत्वे ङीष् प्रत्ययो भवति।

1. गोपः+ङीष्(ई)=गोपी	2. शुद्रः+ङीष्(ई)=शुद्री

(ग) जातिवाचक पुंलिङ्गशब्दानां स्त्रीत्वे ङीष् प्रत्ययो भवति।

1. ब्राह्मण+ङीष्(ई)=ब्राह्मणी	2. मानुष+ङीष्(ई)=मानुषी
3. सिंह+ङीष्(ई)=सिंही	4. व्याघ्रः+ङीष्(ई)=व्याघ्री

(घ) "वोतो गुणवचनात्" इति सूत्रेण उकारान्त गुणवाची शब्दानां स्त्रीत्व विवक्षयां ङीष् प्रत्ययो भवति।

1. मृदु+ङीष्(ई)=मृद्वी, मृदुः	2. पटु+ङीष्(ई)=पट्वी, पटुः
3. साधु+ङीष्(ई)=साध्वी, साधुः	4. गुरु+ङीष्(ई)=गुर्वी गुरुः
5. बहु+ङीष्(ई)=बह्वी बहुः,	6. रात्रि+ङीष्(ई)=रात्री रात्रिः,

(ण) समासविवेचनम्-

समसनं समासः। अनेकस्य पदस्य एकपदीभवनं समासः इत्यर्थः। सम् उपसर्गात् अस् धातोः घञ् प्रत्ययात् समासः निष्पद्यते। समासः सुबन्तानां भवति, न तु तिङन्तानाम्। समासः युगपत् द्वयोः द्वयोः सुबन्तयोः भवति। द्वन्द्वे तु युगपत् बहूनामपि।

अत्र "समर्थः" पदः" समर्थाश्रिते लाक्षणिकः। सामर्थ्यस्य द्वौ प्रकारौ स्तः।

1. एकार्थीभावः-स्वार्थपर्यवसायिनां पदानां विशिष्टैकार्थोपस्थितिजनकत्वम् एकार्थीभावत्वम्।

2. व्यपेक्षाभावः-स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद्यःपरस्परसम्बन्धः सा व्यपेक्षा।

3. समासविग्रहः-"वृत्त्यर्थावबोधकं वाक्यं विग्रहः "विग्रहस्य द्वौ प्रकारौ स्तः।

1. लौकिक विग्रहः-यः विग्रहः लोके व्यवहारयोग्यो भवति, यथा-राज्ञःपुरुषः-राजपुरुषः।

2. अलौकिक विग्रहः-लोके अव्यवहृतः, साधनिकायै उपयोगी इति अलौकिकःविग्रहः। यथा-राजन् ङस् पुरुष सुँ इति अलौकिक-विग्रहः।

समासः पञ्चधा-

केवलश्चाव्ययीभावो द्वन्द्वस्तत्पुरुषस्तथा।
बहुव्रीहिश्च विज्ञेयः समासः पञ्चधा बुधैः।।

1. केवल-समासः-(Only Compound)

2. अव्ययीभाव-समासः-(Adverbial Compound)

3. तत्पुरुष-समासः-(Determinative Compound)

3.1 कर्मधारय समासः (Appositional Compound)

3.2 द्विगु समासः-(Numeral Compound)

4. बहुव्रीहि-समासः-(Attributive Compound)

5. द्वन्द्व-समासः-(Copulative Compound)

समासस्य कथा-राजाभोजेन एकः कविः संक्षेपे समासस्य प्रकारेण सह स्व जीवन-व्यथा अपि श्रावयत्। यथा-

द्वन्द्वो द्विगुरपि चाहं, मद्गेहे नित्य अव्ययीभावः।
तत्पुरुष कर्मधारय, येनाहं स्यां बहुव्रीहिः।
चकारबहुलो द्वन्द्वः, स चासौ कर्मधारयः।
यस्य तेषां बहुव्रीहिः, शेषस्तत्पुरुषो मतः।



क्रमशः .....

↓

तत्पुरुषभेदः कर्मधारयः।

(तत्पुरुषः समानाधिकरणः कर्मधारयः)

(कृष्णः सर्पः कृष्णसर्पः)

|

कर्मधारयभेदो द्विगुः।

(कर्मधारयसमासे यदा पूर्वपदं संख्यावाचकं स्यात् तर्हि द्विगुसमासः कथ्यते।)

(पञ्चानां तन्त्रानां समाहारः इति पञ्चतन्त्रम्, पञ्चभिःगोभिःक्रीतःइतिपञ्चगुः।)

1. **केवल-समासः**-विशेषसंज्ञा-विनिर्मुक्तः केवलसमासः। यत्र समासस्तु भवति किन्तु शास्त्रे तस्य काऽपि संज्ञा नास्ति। स केवल समासः भवति। अस्य प्रचीननाम सुप्सुपा समासः यथा-पूर्वं भूतः इति भूतपूर्वः, पूर्वम् उक्तः इति पूर्वोक्तः।

2. **अव्ययीभाव-समासः**-प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः। समासेऽस्मिन् पूर्वपदं प्रायः अव्ययं भवति उत्तरपदज्ञानव्ययः। किन्तु समासे कृते समस्तपदं अव्ययः भवति। अनव्ययं अव्ययं भवति इति अव्ययीभावः। अस्मिन् समासे प्रायः पूर्वपदार्थस्य प्रधानता भवति। यथा-हरौ इति अधिहरि। अत्र अधिपूर्वपदमस्ति तद् अधिकरणस्य द्योतकमस्ति। एवमेव "अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावाऽत्ययाऽसम्प्रतिशब्दप्रादुर्भावपश्चाद्यथाऽनुपूर्व्य यौगपद्यसादृश्य- सम्पत्तिसाकल्यान्तवचनेषु"।।2. 1. 6।।" इति सूत्रेण-यथाशक्तिः, उपगंगम्, सुमद्रम्, दुर्भिक्षम्, निर्मक्षिकम्, अतिकष्टम्, इतिहरि, अनुग्रह, अनुदानम्, प्रतिदिनम्, सचक्रम्, सशिवम्, समक्षम्, सतृणम्, साग्नि, उपराजम्, पञ्चगङ्गम् इत्यादयः।

3. **तत्पुरुष-समासः**-प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः। तत्पुरुषभेदः कर्मधारयः। "तत्पुरुषः समानाधिकरणः कर्मधारयः।" यदा तत्पुरुषसमासे समस्यमानेषु पदेषु समानविभक्तिः स्यात्तर्हि तस्य नाम कर्मधारयः भवति। यथा-महाराजः, कृष्णसर्पः। कर्मधारयभेदो द्विगुः। कर्मधारयसमासे यदा पूर्वपदं संख्यावाचकं स्यात् तर्हि द्विगुसमासः कथ्यते। यथा-त्रिफला, त्रिलोकी, पञ्चगवम्। द्वितीयान्तात् सप्तम्यन्तपर्यन्तं यस्य-यस्य विभक्त्यन्तस्य उत्तरपदेन समासः क्रियते। स तत्पुरुषः तया एव विभक्त्या व्यवहृयते। द्वितीया-कृष्णं श्रितःत्रकृष्णश्रितः, तृतीया-नखैःभिन्नःत्रनखभिन्नः, चतुर्थी-भूताय वलि=भूतवलिः, पञ्चमी-चोरात् भयम्=चोरभयम्, षष्ठी-राज्ञः पुरुषः=राजपुरुषः, सप्तमी-दाने वीरः दानवीरः, कर्मधारयः-कृष्णः सर्पः कृष्णसर्पः, नवम् अन्नम् नवान्नम्, द्विगुः-पञ्चानां तन्त्रानां समाहारः इति पञ्चतन्त्रम्, पञ्चभिः गोभिः क्रीतः इति पञ्चगुः।

4. **बहुव्रीहि-समासः**-प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः। यत्र समस्यमानेभ्यः पदेभ्यः भिन्नमेव पदार्थस्य प्राधान्यं स्यात् तत्र बहुव्रीहिः भवति। यथा पीतम् अम्बरं यस्य सः पीताम्बरः, दशाननः, चक्रपाणिः, चित्रगुः, श्वेतम् अम्बरं यस्या सा श्वेताम्बरा।

5. **द्वन्द्व-समासः**-प्रायेण उभयपदार्थप्रधानो द्वन्द्वः। "च" इत्यस्यार्थे "चार्थे द्वन्द्व" इति सूत्रेण द्वन्द्वसमासः विधीयते। यथा-हरिहरौ-हरिश्च हरश्च, पाणी च पादौ च पाणिपादौ इति। अत्र उभयोः प्राधान्यमस्ति।

समासिकपदम्	लौकिकविग्रहः	अलौकिकविग्रहः	समासनिर्देशः
भूतपूर्वः	पूर्वं भूतः	पूर्व अम् भूत सु	केवलसमासः
वागर्थाविव	वागर्थौ इव	वागर्थ औ इव	केवलसमासः
पूर्वोक्तः	पूर्वम् उक्तः	पूर्व अम् उक्त सु	केवलसमासः
अधिहरि	हरौ अधि	ळरि ङि अधि	अव्ययीभावसमासः
उपराजम्	राज्ञःसमीपम्	राजन ङस् उप	अव्ययीभावसमासः
सुमद्रम्	मद्राणां समृद्धिः	मद्र आम् सु	अव्ययीभावसमासः
दुर्यवनम्	यवनानां व्यृद्धिः	यवन आम् दुर	अव्ययीभावसमासः
निर्मक्षिकम्	मक्षिकाणामभावः	मक्षिका आम् निर्	अव्ययीभावसमासः
अतिहितम्	हिमस्यात्ययः	हिम ङसि अति	अव्ययीभावसमासः
अतिनिद्रम्	निद्रा सम्प्रति न युज्यते	निद्रा सु अति	अव्ययीभावसमासः
इति-हरि	हरिशब्दस्य प्रकाशः	हरि ङस् इति	अव्ययीभावसमासः
अनुविष्णु	विष्णोः पश्चात्	विष्णु ङसि अनु	अव्ययीभावसमासः
अनुरूपम्	रूपस्य योग्यम्	रूप ङस् अनु	अव्ययीभावसमासः
प्रत्यर्थम्	अर्थं अर्थं प्रति	अर्थ अम् प्रति	अव्ययीभावसमासः
यथाशक्तिः	शक्तिमतिक्रम्य	शक्ति अम् यथा	अव्ययीभावसमासः
सहरिः	हरेः सादृश्यम्	हरि ङस् सह (स)	अव्ययीभावसमासः
पञ्चगङ्गम्	पञ्चानां गङ्गानां समाहारः	पञ्चन् आम् गङ्गा आम्	अव्ययीभावसमासः
कृष्णश्रितः	कृष्णंश्रितः	कृष्ण अम् श्रित सु	द्वितीया तत्पुरुषसमासः
नखभिन्नः	नखैर्भिन्नतः	नख् भिस् भिन्न सु	तृतीया तत्पुरुषसमासः
भूतबलिः	भूतेभ्योबलिः	भूत भ्यस् बलि सु	चतुर्थी तत्पुरुषसमासः
चोरभयम्	चोराद्भयम्	चोर ङसि भय सु	पञ्चमी तत्पुरुषसमासः
राजपुरुषः	राज्ञः पुरुषः	राजन् ङस् पुरुष सु	षष्ठी तत्पुरुषसमासः
अक्षशौण्डः	अक्षेषु शौण्डः	अक्ष सुप् शौण्ड सु	सप्तमी तत्पुरुषसमासः
घनश्यामः	घन इव श्यामः	घन सु श्याम सु	कर्मधारयसमासः
त्रिलोकी	त्रयाणां लोकानां समाहारः	त्रि ङस् लोक ङस्	द्विगुसमासः
उरीकृत्य	उरी कृत्वा	उरी कृ क्त्वा	गतितत्पुरुषसमासः
प्राचार्यः	प्रगतःआचार्यः	प्रगत सु आचार्य सु	प्रादितत्पुरुषसमासः
कुम्भकारः	कुम्भं करोति	कुम्भ अम् कार सु	उपपदतत्पुरुषसमासः
पीताम्बरः	पीतम् अम्बरम् यस्य सः	पीत सु अम्बर सु	बहुव्रीहिसमासः
पाणिपादम्	पाणी च पादौ च	पाणि औ पाद औ	द्वन्द्वसमासः

(B) व्याकरणम्

(1. व्याकरणस्य परिचयः, 2. संज्ञा/परिभाषा/आगमः/आदेशादिः-3. सन्धिः, 4. सुबन्तम्, 5. तिङन्तम्, 6. कारकम्, 7. प्रत्ययः, 8. समासः,)

(त) व्याकरणस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्नः-"अष्टाध्यायी" इत्यस्य ग्रन्थस्य कः रचनाकारः
   उत्तरम्- पाणिनिः।
2. प्रश्नः-पाणिनि-प्रणीते शब्दानुशासने(अष्टाध्यायी ग्रन्थे) कति अध्यायाः समुपलभ्यन्ते?
   उत्तरम्- (8) अष्टौ अध्यायाः,
3. प्रश्नः-पाणिनि-अष्टाध्याय्याः प्रति अध्यायं कति पादाः सन्ति?
   उत्तरम्- (04) चत्वारः।
4. प्रश्नः-"सिद्धान्तकौमुदी" इन्यस्य ग्रन्थस्य कः रचनाकारः?
   उत्तरम्- भट्टोजिदीक्षितः।
5. प्रश्नः-व्याकरणशिक्षणस्य मुंख्यो विधिः कः?
   उत्तरम्- आगमनविधिः।
6. प्रश्नः-"प्रक्रियाकौमुदी" इत्यस्य रचनाकारः कः?
   उत्तरम्- रामचन्द्रः।
7. प्रश्नः-वेदपुरुषस्य मुखात्मकं वेदांगं किम्?
   उत्तरम्- व्याकरणम्।
8. प्रश्नः-व्याकरणवेदांगस्य कति सम्प्रदायाः श्रूयन्ते?
   उत्तरम्- (08) अष्टौ,
9. प्रश्नः-सम्प्रति व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः कोऽस्ति?
   उत्तरम्- शब्दानुशासनम्।
10. प्रश्नः-"लिङ्गानुशासनम्" इति ग्रन्थं कः लिखितवान्?
    उत्तरम्- व्याडिः।
11. प्रश्नः-शब्दानुशासने कस्य उल्लेखः नास्ति?
    उत्तरम्- वेदीनिर्माणविधेः।
12. प्रश्नः-"वाक्यपदीयम्" कस्य "आचार्यस्य" कृतिः-?
    उत्तरम्- भर्तृहरेः।
13. प्रश्नः-पतञ्जलिप्रणीतः ग्रन्थः कः?
    उत्तरम्- महाभाष्यम्।
14. प्रश्नः-अष्टाध्याय्याः प्रथमसूत्रं किमस्ति?
    उत्तरम्- वृद्धिरादैच।
15. प्रश्नः- वियोगात्मकाभाषा का?
    उत्तरम्- हिन्दी।

16. प्रश्नः-भाषा विनिमयस्य साधनं किमस्ति?
उत्तरम्- विचारः।
17. प्रश्नः-भाषाणां वर्गीकरणस्य क आधारः स्वीकृतः?
उत्तरम्- आकृतिः।
18. प्रश्नः-भारतीयार्यभाषासु प्रचीनतमा का?
उत्तरम्-वैदिक-संस्कृतभाषा।
19. प्रश्नः-पाणिनि महोदयस्य जन्मस्थलं वर्तमानेकाले केन नाम्ना प्रसिद्धम्?
उत्तरम्- लाहौर नाम्ना।
20. प्रश्नः-"एकः शब्दः सत्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति" कस्येदं कथनम्?
उत्तरम्- महाभाष्यकारस्य पतञ्जलेः।
21. प्रश्नः-पतञ्जलिः कस्य अवतारः मन्यते?
उत्तरम्- शेषनागस्य।
22. प्रश्नः-व्याकरणस्य व्युत्पत्तिजन्यः अर्थः किमस्ति?
उत्तरम्- व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्।
(वि+आङ् कृ+ल्युट्=व्याकरणम्).
23. प्रश्नः- कति व्याकरणानि वेदाङ्गे-परिगणितानि सन्ति?
उत्तरम्-नव, 1. ऐन्द्रं, 2. चान्द्रं, 3. काशकृत्स्नं, 4. कौमारं, 5. शाकटायनं, 6. सारस्वतं, 7. आपिशलं, 8. शाकलं, 9. पाणिनीयम्।
24. प्रश्न-वेदाङ्ग रूपेण सर्वाधिक-सङ्गाह्य-व्याकरणं किमस्ति?
उत्तरम्- पाणिनि-व्याकरणम्।
25. प्रश्न-मुनित्रये केषां समावेशो भवति?
उत्तरम्-1. पाणिनेः, 2. कात्यायनस्य, 3. पतञ्जलेश्च।
26. प्रश्न-कः वार्तिककारः?
उत्तरम्- कात्यायनः।
27. प्रश्न-"सिद्धान्तकौमुदी" इत्यस्य लेखकः कः?
उत्तरम्- भट्टोजीदीक्षितः।
28. प्रश्न- भट्टोजीदीक्षित-कृत-प्रौढ़मनोरमायाः खण्डनं केन कृतम्?
उत्तरम्- पण्डितराज-जगन्नाथेन।
29. प्रश्न-"मनोरमाकुचमर्दनम्" इत्यस्य लेखंकः कः?
उत्तरम्- पण्डितराजो-जगन्नाथः।
30. प्रश्न-वरदराजस्य कानि रचनाकार्याणि?
उत्तरम्- 1. लघुसिद्धान्त कौमुदी, 2. मध्यसिद्धान्तकौमुदी, 3. सारकौमुदी च।
31. प्रश्न-पाणिनि अष्टाध्यायीग्रन्थे कति सूत्राणि सन्ति?
उत्तरम्- (3978 सूत्राणि।)

32. प्रश्न-धातवः कतिषु गणेषु विभक्ताः सन्ति?
उत्तरम्- दशसु गणेषु।
33. प्रश्न-धातु-गणानां नामावली का?
उत्तरम्- 1. भ्वादिः, 2. अदादिः, 3. जुहोत्यादिः, 4. दिवादिः, 5. स्वादिः, 6. तुदादिः, 7. रुधादिः, 8. तनादिः, 9. क्र्यादिः, 10. चुरादिः।
34. प्रश्न-शब्देन्दुशेखरः इत्यस्य कः रचनाकारः?
उत्तरम्- नागेश भट्टः।
35. प्रश्न-कस्मिन् गणे अल्पधातवः वर्तन्ते?
उत्तरम्- तनादिगणे।
36. प्रश्न- कति धातवः सन्ति?
उत्तरम्- (1970)
37. प्रश्न-कति माहेश्वरानि सूत्राणि?
उत्तरम्-(14) चतुर्दश सूत्राणि।
38. प्रश्न-कानि माहेश्वरानि सूत्राणि?
उत्तरम्-1. अइउण्, 2. ऋलृक्, 3. एओङ्, 4. ऐऔच्, 5. हयवरट्, 6. लण्, 7. ञमङणनम्, 8. झभञ्, 9. घढधष्, 10जबगडदश्, 11खफछठथचटतब्, 12. कपय्, 13. शसषर्, 14. हल्।
39. प्रश्न-माहेश्वरसूत्रस्य उत्पत्तिः कस्मात् अभूत्?
उत्तरम्- शिवस्य डमरुतः।
40. प्रश्न-माहेश्वरसूत्रे कति मूलस्वरवर्णाः वर्तन्ते?
उत्तरम्-पञ्च, (अ, इ, उ, ऋ, लृ)
41. प्रश्न-भर्तृहरि महोदयस्य वाक्यपदीये कति काण्डानि सन्ति?
उत्तरम्-त्रीणि, 1. ब्रह्मकाण्डम्, 2. वाक्यकाण्डम्, 3. पदकाण्डम्।
42. प्रश्न-कैयटः महाभाष्योपरि का व्याख्या विहिता?
उत्तरम्- "प्रदीप" नाम्नी व्याख्या।
43. प्रश्न-जयादित्य एवं वामन नामनी वैयाकरणाभ्यां सूत्रानुक्रमाभ्यां अष्टाध्यायां किं वृत्तिग्रन्थं अलिखताम्?
उत्तरम्-काशिका-वृत्तिग्रन्थम्।
44. प्रश्न-काशिकायाः प्रथमतःपञ्चमाध्यायान् कः अलिखत्?
उत्तरम्- जयादित्यः।
45. प्रश्न-काशिकायाः अन्तस्य "अध्यायत्रयस्य" लेखकः कः?
उत्तरम्- वामनः।
46. प्रश्न-काशिकायां कति अध्यायाः सन्ति?
उत्तरम्-(8) 5+3=8 अष्टाध्यायाः।

47. प्रश्न-"न्यास" नाम्ना प्रख्यात-काशिकाव्याख्यानग्रन्थस्य मूलं अभिधानं किमस्ति?
उत्तरम्- काशिकाविवरणपञ्जिका।
48. प्रश्न- काशिकाविवरणपञ्जिकायाः लेखकः कः?
उत्तरम्- जिनेन्द्रबुद्धिः।
49. प्रश्न-काशिकोपरि "पदमञ्जरी" व्याख्यायाः लेखकः कः?
उत्तरम्- हरदत्तः।
50. प्रश्न-वैयाकरणभूषण-वैयाकरणभूषणसारयोश्च प्रणेता कोऽस्ति?
उत्तरम्- कौण्डभट्टः।
51. प्रश्न-परिभाषेन्दुशेखरस्य स्रष्टा कोऽस्ति?
उत्तरम्- नागेशभट्टः।
52. प्रश्न- परिभाषेन्दुशेखरस्य विषयः किमस्ति?
उत्तरम्-पाणिनीयव्याकरणस्य परिभाषायाः विवेचनम्।
53. प्रश्न-नागेशभट्टस्य भट्टोजीदीक्षितकृत प्रौढ़मनोरमोपरि लिखित व्याख्याग्रन्थस्य किं नाम अस्ति?
उत्तरम्- शब्देन्दुशेखरः।
54. प्रश्न-महाभाष्यप्रत्याख्यानसंग्रहस्य लेखकः कोऽस्ति?
उत्तरम्- नागेशभट्टः।
55. प्रश्न-वैयाकरणसिद्धान्तमञ्जूषा-लघुमञ्जूषा-परमलघुमञ्जूषाणां रचनाकारः कः?
उत्तरम्- नागेशभट्टः।
56. प्रश्न-व्याकरणस्य प्रक्रिया-परम्परायाः पर्यायभूत-आचार्य-भट्टोजिदीक्षितस्य सूत्रानुक्रमाणां-पाणिनीयव्याकरणस्य व्याख्यानग्रन्थः कः?
उत्तरम्- शब्दकौस्तुभः।
57. प्रश्न-व्याकरणस्य दार्शनिकसन्दर्भोपरि भट्टोजिदीक्षितस्य विमर्शात्मकग्रन्थः कः?
उत्तरम्- व्याकरणमतोन्मज्जनम्।
58. प्रश्न-कातन्त्र-व्याकरणस्य आचार्यः कः?
उत्तरम्- शिव वर्मा।
59. प्रश्न-कातन्त्र-व्याकरणे कति अध्यायाः कति सूत्राणि च वर्तन्ते?
उत्तरम्- चत्वारः अध्यायाः, 1400 सूत्राणि च।
60. प्रश्न-प्रौढ़मनोरमा इत्यस्य लेखकः कः?
उत्तरम्- भट्टोजिदीक्षितः।
61. प्रश्न-क्षपणक(सिद्धसेन दिवाकरस्य) व्याकरणं किमस्ति?
उत्तरम्- शब्दानुशासनम्।
62. प्रश्न-जैनेन्द्रव्याकरणस्य आचार्यः कः?.
उत्तरम्- देवनन्दी।

63. प्रश्न-"विश्रान्तविद्याधर" व्याकरणस्य प्रवर्तक: क:?
उत्तरम्- वामन:।
64. प्रश्न-"सरस्वती कण्ठाभरणम्" व्याकरणे कति अध्याया: कति सूत्राणि च सन्ति?
उत्तरम्- अष्टौ अध्याया:, 6421 सूत्राणि च।
65. प्रश्न-"सरस्वतीकण्ठाभरणस्य प्रचोदक: क: अस्ति?
उत्तरम्- भोजदेव:।
66. प्रश्न-जैनशाकटायन-व्याकरणग्रन्थस्य रचनाकार: क:?
उत्तरम्- पाल्यकीर्ति:।
67. प्रश्न-पाल्यकीर्ति इत्यस्य अपरं नाम किमस्ति?
उत्तरम्- शाकटायन:।
68. प्रश्न-जैनशाकटायने कति अध्याया: सूत्राणि च सन्ति?
उत्तरम्- अष्टौ अध्याया:, 3200 सूत्राणि च।
69. प्रश्न-शिवस्वामी द्वारा प्रवृत्तं व्याकरणं किम्?
उत्तरम्- शिवशब्दानुशासनम्।
70. प्रश्न-सिद्धान्तकौमुदी इत्यस्य तत्त्वबोधिनी-व्याख्याया: लेखक: क:?
उत्तरम्- ज्ञानेन्द्र सरस्वती।
71. प्रश्न-सिद्धान्तकौमुदी इत्यस्य बालमनोरमाव्याख्याया:सर्जनकर्ता आचार्य: क:?
उत्तरम्- वासुदेवदीक्षित:।
72. प्रश्न-पाणिनि महोदयस्य अष्टके वा अष्टाध्यायां प्रत्येकम् अध्याये कति पादा: (उपविभागा:) वर्तन्ते?
उत्तरम्- चत्वार: पादा:।
73. प्रश्न-अष्टाध्याया: प्रथमाध्यायस्य विषय: किमस्ति?
उत्तरम्- शास्त्रोपयोगी संज्ञा-परिभाषाया: सङ्कलनम्।
74. प्रश्न-कस्मिन् अध्याये समास-कारकस्य च विवेचना अस्ति?
उत्तरम्- द्वितीयाध्याये।
75. प्रश्न-तृतीयाध्यायस्य विषयवस्तूनि किं सन्ति?
उत्तरम्- कृत्य प्रत्यया: कृत् प्रत्ययाश्च।
76. प्रश्न-तद्धितानां विमर्ण: कस्मिन् अध्याये अस्ति?
उत्तरम्- चतुर्थ-पञ्चमाध्याययो:।
77. प्रश्न-षष्ठाध्याये कस्य विमर्श: वर्तते?
उत्तरम्- तिङन्त, सन्धि, स्वरनियमानाम्।
78. प्रश्न-अङ्गाधिकार-नाम्ना कस्य अध्यायस्य प्रसिद्धि: अस्ति?
उत्तरम्- सप्तमाध्यायस्य।
79. प्रश्न-अङ्गाधिकारस्य विषय: किमस्ति?
उत्तरम- सुबन्ता: तिङन्ताश्च।

80. प्रश्न-अष्टमाध्याये विवेच्यविषया: के सन्ति?
उत्तरम्- द्वित्वविधानं, स्वर-वैदिकी प्रक्रिया, सन्धि:षत्वणत्वविधानं च।
81. प्रश्न-कात्यायनस्य अपरं नाम किम्?
उत्तरम्- वररुचि:।
82. प्रश्न-पाणिनि महोदयस्य महाकाव्यं किम्?
उत्तरम्- जाम्बवती-विजयम्।
83. प्रश्न-कात्यायनस्य महाकाव्यं किम्?
उत्तरम्- स्वर्गारोहणम्।
84. प्रश्न-कात्यायनस्य अन्यानि कानि रचनाकार्याणि?
उत्तरम्-1. कात्यायनस्मृति:, 2. उभयसारिकाभाण: (रूपक:) 3. भ्राजश्लोका:।
85. प्रश्न-पाणिनीय व्याकरणस्य प्रक्रिया-परम्परायाः आद्यग्रन्थ: क:?
उत्तरम्- रूपावतार:।
86. प्रश्न-रूपावतारस्य रचनाकार: क:?
उत्तरम्- धर्मकीर्ति:।
87. प्रश्न-प्रक्रियाकौमुदी करय रचना वर्तते?
उत्तरम्- रामभद्राचार्यस्य।
88. प्रश्न-सिद्धान्तकौमुदीग्रन्थे कति प्रकरणानि सन्ति?
उत्तरम्- (14) चतुर्दशप्रकरणानि।
89. प्रश्न-सिद्धान्तकौमुदी इत्यस्य प्रथमप्रकरणं किम्?
उत्तरम्- संज्ञाप्रकरणम्।
90. प्रश्न- परिभाषा प्रकरणस्य क्रम: किमस्ति?
उत्तरम्- द्वितीय:।
91. प्रश्न- सन्धिप्रकरणस्य क्रम: किम्?
उत्तरम्- तृतीय:।
92. प्रश्न-सुबन्तं कस्मिन् प्रकरणे अस्ति?
उत्तरम्- चतुर्थप्रकरणे।
93. प्रश्न-अव्यय: कस्मिन् प्रकरणे अस्ति?
उत्तरम्-पञ्चमे।
94. प्रश्न-षष्ठप्रकरणस्य विषय: किमस्ति?
उत्तरम्- स्त्रीप्रत्यय:।
95. प्रश्न-सप्तमप्रकरणे किं वर्णितमस्ति?
उत्तरम्- कारकम्।
96. प्रश्न-समासप्रकरणस्य क्रम: किम्?
उत्तरम्- अष्टम:।

97. प्रश्न- नवमप्रकरणे किं वर्णितमस्ति?
उत्तरम्- तद्धित:।
98. प्रश्न- तिङन्तप्रकरणस्य क्रम: किमस्ति?
उत्तरम्- दशम:।
99. प्रश्न-ण्यन्तादिप्रक्रिया कस्मिन् प्रकरणे अस्ति?
उत्तरम्-एकादशप्रकरणे।
100. प्रश्न-कृदन्त: कस्मिन् प्रकरणे अस्ति?
उत्तरम्- द्वादशप्रकरणे।
101. प्रश्न-त्रयोदश-प्रकरणे किमस्ति?
उत्तरम्- वैदिकप्रकरणम्।
102. प्रश्न- सिद्धान्तकौमुदी इत्यस्य अन्तिमं प्रकरणं किम्?
उत्तरम्- स्वरप्रकरणम्।
103. प्रश्न-"मनोरमामण्डन" व्याकरणग्रन्थस्य लेखक: क:?
उत्तरम्- भानुजी दीक्षित:।
104. प्रश्न-व्याकरण-वाङ्मयस्य बृहत्तमोग्रन्थ: क:?
उत्तरम्- "व्याकरणसिद्धान्तसुधानिधि:।"
105. प्रश्न-"व्याकरणसिद्धान्तसुधानिधि" इत्यस्य लेखक: क:?
उत्तरम्- विश्वेश्वर पाण्डेय:।
106. प्रश्न-अष्टाध्याय्या: परिणाम: कति श्लोकानां विद्यते?
उत्तरम्- सहस्रम्।
107. प्रश्न-अष्टाध्यायां कति पादा: सन्ति?
उत्तरम्- (8×4=32) द्वात्रिंशति: पादा:।
108. प्रश्न-महाभाष्यकार: पाणिनीयव्याकरणस्य कति सूत्राणां व्याख्या अकुर्वत्?
उत्तरम्- (1710 सूत्राणाम्)
109. प्रश्न-महाभाष्ये कति अध्याया: सन्ति?
उत्तरम्- अष्टौ अध्याया:।
110. प्रश्न-महाभाष्ये अध्यायान् केषु विभाजितोऽस्ति?
उत्तरम्-आह्निकेषु।
111. प्रश्न-आह्निेन किं तात्पर्यम्, (का परिभाषा)?
उत्तरम्- एक: अह:(दिवस:) पर्यन्तं पठितुं योग्य:आह्निक:।
112. प्रश्न-महाभाष्ये कति आह्निकानि सन्ति?
उत्तरम्- (85) पञ्चाशीति आह्निकानि।
113. प्रश्न-महाभाष्ये कति प्रत्याहारसूत्राणां व्याख्यानं अभवन्?
उत्तरम्-अष्टसूत्राणाम्।

114. प्रश्न-माहेश्वरसूत्रेषु कस्य व्यञ्जनवर्णस्य द्विवारं प्रयोगः भवति?
उत्तरम्- हकारस्य।
115. प्रश्न-कस्य माहेश्वरसूत्रेषु अकार उच्चारणार्थमात्रं न भूत्वा इत्संज्ञकः अस्ति?
उत्तरम्-"लण् सूत्रे।
116. प्रश्न-लण् सूत्रे अकारं इत्संज्ञक-स्वीकरणस्य प्रयोजनं किम्?
उत्तरम्- "र" प्रत्याहारस्य निर्माणम्।
117. प्रश्न-"र" प्रत्याहारे के वर्णाः आगच्छन्ति?
उत्तरम्- रकार एवं लकार वर्णाः। (र, ल)
118. प्रश्न-माहेश्वरसूत्रैः कति प्रत्याहाराः रचयन्ति?
उत्तरम्- (42) द्विचत्वारिंशत्।
119. प्रश्न-सर्वेषां स्वर-व्यञ्जनप्रत्याहाराणां बोधक-प्रत्याहारः कोऽस्ति?
उत्तरम्- अल् प्रत्याहारः।
120. प्रश्न-अच् प्रत्याहारेण कस्य अभिधानं भवति?
उत्तरम्- समस्त स्वराणाम्।
121. प्रश्न- समस्त व्यञ्जनवर्णानां कस्मिन् प्रत्याहारे ग्रहणं भवति?
उत्तरम्- हल् प्रत्याहारे।
122. प्रश्न-पञ्चाङ्ग व्याकरणं किमस्ति?
उत्तरम्-1. सूत्रपाठ, 2. गणपाठ, 3. धातुपाठ, 4. उणादिपाठ, 5. लिङ्गानुशासनम्।
123. प्रश्न-पाणिनि महोदयस्य गुरुः कः आसीत्?
उत्तरम्- आचार्य उपवर्षः।
124. प्रश्न-सूत्राणि कति प्रकारकाणि भवन्ति? कानि च तानि?
उत्तरम्- षट्, 1. संज्ञा, 2. परिभाषा, 3. विधि, 4. नियम, 5. अतिदेश, 6. अधिकार।
125. प्रश्न-पण्डितप्रवर भट्टोजिदीक्षितस्य पदशास्त्रीयग्रन्थाः के सन्ति?
उत्तरम्-1. सिद्धान्तकौमुदी, 2. प्रौढ़मनोरमा, 3. शब्दकौस्तुभ, 4. वैयाकरणभूषणकारिका।
126. प्रश्न-भट्टोजिदीक्षितस्य धर्मशास्त्रीयग्रन्थाः के सन्ति?
उत्तरम्-1. त्रिस्थलीसेतु, 2. तिथिनिर्णयः, 3. प्रवर-निर्णयः, 4. चतुर्विंशतिमत व्याख्या।
127. प्रश्न-सूत्रस्य किं लक्षणम्?
उत्तरम्-"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।"
128. प्रश्न-वार्तिकस्य किं लक्षणम्?
उत्तरम्-"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। तं ग्रन्थं वार्तिकं प्राहुर्बार्तिकज्ञा विचक्षणाः।।"
129. प्रश्न-भाष्यस्य किं लक्षणम्?
उत्तरम्-"सूत्रार्थो वर्ण्यते यत्र वर्णैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो बिदुः।।"
130. प्रश्न-व्याख्यानस्य कति अङ्गानि भवन्ति?
उत्तरम्-(6 षट्) 1. **पदच्छेदः**, 2. **पदार्थोक्तिः**, 3. **विग्रहः**, 4. **वाक्ययोजना**, 5. **आक्षेपः**, 6. **समाधानम्**।

131. प्रश्न-प्रातिपदिकः कं कथयति?
उत्तरम्-धातु एवं प्रत्ययेन सह समस्त सार्थकशब्दाः, समास एवं तद्धितानां प्रतिपदिकसंज्ञा भवति।
132. प्रश्न-"गोर्नदीय" इति कस्य नाम अस्ति?
उत्तरम्- महाभाष्यकार पतञ्जलेः।
133. प्रश्न-व्याकरणमते कति प्रमाणानि कानि च तानि?
उत्तरम्- 5 पञ्च, 1. प्रत्यक्षः, 2. अनुमानः, 3. शब्दः, 3. अभ्यासः, 5. अदृष्टः।
134. प्रश्न- व्याकरणमते वाण्याः काः?
उत्तरम्-तिस्रः, 1. पश्यन्ती, 2. मध्यमा, 3. वैखरी।
135. प्रश्न-स्फोटवादः कस्य प्रतिपाद्यः वर्तते?
उत्तरम्-व्याकरणस्य।
136. प्रश्न-"शब्दरत्न" इत्यस्य लेखकः कः?
उत्तरम्- हरिदीक्षितः।
137. प्रश्न- अष्टाध्यायीवृत्तिः इत्यस्य लेखकः कः?
उत्तरम्- वररूचि।
137. प्रश्न-अष्टाध्यायीभाष्यवृत्तिः इत्यस्य लेखकः कः?
उत्तरम्- दयानन्द सरस्वती।
138. प्रश्न-"रूपमाला" इत्यस्य लेखकः कः?
उत्तरम्- विमल सरस्वती।
139. प्रश्न-प्रक्रिया सर्वस्व इति ग्रन्थस्य लेखकः कः?
उत्तरम्- नारायण भट्ट।
140. प्रश्न-महाभाष्य दीपिका इत्यस्य लेखकः कः?
उत्तरम्- भर्तृहरि।
141. प्रश्न-कियन्ति मुख्यानि व्याकरणानि?
उत्तरम्- (8/9) अष्ट नव वा।
142. प्रश्न-पाणिनिः कस्य क्षेत्रस्य वास्तव्यः?
उत्तरम्- पाकिस्तान-स्थित-लाहौरस्य।
143. प्रश्न-दाक्षीपुत्रः कः?
उत्तरम्- पणिनिः।
144. प्रश्न-गोणिका-पुत्ररूपेण को ज्ञायते?
उत्तरम्- पतञ्जलिः।
145. प्रश्न-"अथ शब्दानुशासनम्" कस्य ग्रन्थस्य प्रारम्भिक-वाक्यम्?
उत्तरम्- महाभाष्यस्य।
146. प्रश्न-नागेशभट्टस्य पितुर्नाम किम्?
उत्तरम्- शिवभट्टः।

147. प्रश्न-नागेशभट्टस्य मातुर्नाम किम्?
उत्तरम्- सतीदेवी।
148. प्रश्न-नागेशः कस्याश्रित आसीत्?
उत्तरम्- शृङ्गवेर-पुराधीश-रामसिंहस्य।
149. प्रश्न-नागेशस्य जन्मसमयः कः?
उत्तरम्- 1720 ई0 वर्षम्।
150. प्रश्न-परमलघुमञ्जूषायां कियन्ति प्रकरणानि सन्ति?
उत्तरम्- चतुर्दश-प्रकरणानि।
151. प्रश्न-स्फोटस्य कति भेदाः सन्ति?
उत्तरम्- (8) अष्टौ।
152. प्रश्न-स्फोटशब्दस्य का व्युत्पत्तिः?
उत्तरम्- स्फुटति-विकसति-अभिव्यक्ती-भवत्यर्थो यस्मादिति स्फोटः।
153. प्रश्न-वैयाकरणाऽनुसारेण शक्तिः कीदृशी?
उत्तरम्- पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावा-परपर्याया।
154. प्रश्न-वैयाकरणैः पदपदार्थयोः कीदृशः सम्बन्धः स्वीक्रियते?
उत्तरम्- "तादात्म्यम्।"
155. प्रश्न-वैयाकरणमते पदं कीदृशम्?
उत्तरम्- स्फोटात्मकम्।
156. प्रश्न-किन्नाम साधुत्वम्?
उत्तरम्- व्याकरणाऽन्वाख्येयत्वं पुण्यजनकताऽवच्छेदक-धर्मत्वं वा।
157. प्रश्न-मञ्जूषाकाराऽनुसारेण वृत्तिः कतिविधा, का च सा?
उत्तरम्- त्रिविधा-1. शक्तिः, 2. लक्षणा, 3. व्यञ्जनारूपा।
158. प्रश्न-विशेषार्थ-निर्णायकाः संयोगादयः कियन्तः सन्ति?
उत्तरम्- (14) चतुर्दश।
159. प्रश्न-लक्षणा कतिविधा?
उत्तरम्- द्विविधा।
160. प्रश्न-नागेशमते शक्तिः कतिविधा?
उत्तरम्- (2) द्विविधा।
161. प्रश्न-कतिविधा वागस्ति, सा च का?
उत्तरम्- चतुर्विधा, 1. परा, 2. पश्यन्ति, 3. मध्यमा, 4. वैखरीरूपा।
162. प्रश्न-नागेशेन कतिविधो ध्वनिः स्वीक्रियते?
उत्तरम्- द्विविधः।
163. प्रश्न-शाब्दबोधे कियन्ति सहकारि-कारणानि, कानि च तानि?
उत्तरम्- चत्वारि, 1. आकाङ्क्षा, 2. योग्यता, 3. आसत्ति, 4. तात्पर्यम् च।

164. प्रश्न-का नाम आकाङ्क्षा?
उत्तरम्- वाक्यसमयग्राहिका आकाङ्क्षा।
165. प्रश्न-योग्यतायाः किं स्वरूपम्?
उत्तरम्- परस्पराऽन्वयप्रयोजक-धर्मवत्त्वरूपम्।
166. प्रश्न-आसत्तेः किं स्वरूपम्?
उत्तरम्- प्रकृतान्वय-बोधाननुकूल-पदाव्यवधानम्।
167. प्रश्न-किं नाम तात्पर्यम्?
उत्तरम्-एतद् वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्यम्।
168. प्रश्न-को नाम धात्वर्थः?
उत्तरम्- फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः।
169. प्रश्न-नागेशमते का नाम क्रिया?
उत्तरम्- सर्वकारकाऽन्वयितावच्छेदकधर्मवती क्रिया।
170. प्रश्न-प्रयोगसङ्ग्रहस्य रचयिता कः?
उत्तरम्- वररुचि।
171. प्रश्न-"प्रयोगमुखम्" केन विरचितम्?
उत्तरम्- धर्मकीर्तिना।
172. प्रश्न-"प्रयोगमुखम्" कस्य विवरणं विद्यते?
उत्तरम्- प्रयोगसंङ्ग्रहस्य।
173. प्रश्न-प्रयोगमुखे कति पटला विराजन्ते?
उत्तरम्- (5) पञ्च।
174. प्रश्न-समासशक्ति-दीपिकायां कारिकायाः रचनाकारः कः?
उत्तरम्- दीनबन्धु झा महोदयः।
175. प्रश्न-समासशक्ति-दीपिकाऽन्तर्गते कियन्तः कारिका?
उत्तरम्- (27) सप्तविंशतिः।
176. प्रश्न-कौमुदी-मूलार्थ-विद्योतिन्याः प्रणेता कः?
उत्तरम्- पं० दीनबन्धु झा।
177. प्रश्न-न्यायसिद्धान्त-मुक्तावली कस्याः व्याख्या?
उत्तरम्- कारिकावल्या।
178. प्रश्न-कारिकावल्याः प्रणेता कोऽस्ति?
उत्तरम्- विश्वनाथ पञ्चानन भट्टाचार्यः।
179. प्रश्न-का नाम व्युत्पत्तिः?
उत्तरम्- कार्यकारणभावज्ञानम्।
180. प्रश्न-पाणिनेः मातुर्नाम किम्?
उत्तरम्- दाक्षी।

181. प्रश्न-पाणिनिः कस्य स्थानस्य निवासी आसीत्?
उत्तरम्- पाकिस्तान-स्थित-लाहौरस्य।

182. प्रश्न-पतञ्जलेः मातुर्नाम किम्?
उत्तरम्- गोणिका।

183. प्रश्न-पतञ्जलेर्महाभाष्यं कियत्सु आह्निकेषु विभक्तम्?
उत्तरम्- (85) पञ्चाशीत्याह्निकेषु।

184. प्रश्न-महाभाष्यस्य प्रथमाह्निकं केन नाम्ना ज्ञायते?
उत्तरम्- "पस्पशाह्निकम्" इति नाम्ना।

185. प्रश्न- महाभाष्यस्य द्वितीयाह्निकं किम्?
उत्तरम्- प्रत्याहाराह्निकम्।

186. प्रश्न-षड्विधात्मकं व्याख्यानं किम्?
उत्तरम्- पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना। आक्षेपश्च समाधानं व्याख्यानं षड्विधं मतम्।।

187. प्रश्न-को नाम आचार्यः?
उत्तरम्-"आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते।।

188. प्रश्न-किं नाम अक्षरम्?
उत्तरम्- न क्षीयते न क्षरतीति वाऽक्षरम्।
अर्थमश्नुते व्याप्नोतीत्यक्षरं पदं वाक्यं वा।।

189. प्रश्न-का नाम संज्ञा, संज्ञिनश्च के?
उत्तरम्- अनाकृतिःसंज्ञा, आकृतिमन्तः संज्ञिनः। व्याकरणे पूर्वोच्चारितःसंज्ञी, परोच्चारिता च संज्ञाकथ्यते।

190. प्रश्न- को नाम आख्यातः?
उत्तरम्- नियमपूर्वक-अध्यापनं नाम आख्यातः।

191. प्रश्न-को नाम विप्रतिषेधः?
उत्तरम्- तुल्यबल-विरोधे-नियमयोर्बलाबल-विचारः।

192. प्रश्न-पाणिनेरनुसारेण गुरुः कतिविधः, कश्च सः?
उत्तरम्- चतुर्विधः, 1. आचार्यः, 2. प्रवक्ता, 3. श्रोत्रियः, 4. अध्यापकश्च।

193. प्रश्न-किं नाम अर्थवत्त्वम्?
उत्तरम्-एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वम्-अर्थवत्त्वम्।

194. प्रश्न- को वाग्वज्रो यजमानं हिनस्ति?
उत्तरम्- मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो, न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

195. प्रश्न-वेदस्य उपाङ्गानि कानि सन्ति?
उत्तरम्- पुराण-न्याय-मीमांसा-धर्मशास्त्राणि।

196. प्रश्न-ओङ्कारे-अकाराद्यास्त्रयो वर्णाः केषां वाचकाः, अन्त्यो ध्वनिश्च किं कथ्यते?
उत्तरम्- अकाराद्यास्त्रयो वर्णा ब्रह्मविष्णुमहेश्वराः। अन्त्ये प्रतीयमानो यो ध्वनिः ब्रह्मेति कथ्यते।।
197. प्रश्न- को नाम मोक्षः?
उत्तरम्- आत्यन्तिकदुःखध्वंसो मोक्षः।
198. प्रश्न-वैयाकरणभूषणसारस्य को निर्माता?
उत्तरम्- कौण्डभट्टः।
199. प्रश्न- वैयाकरणभूषणसारे कियन्ति प्रकरणानि?
उत्तरम्- (14) चतुर्दश।
200. प्रश्न-कौण्डभट्टस्य पितुर्नाम किम्?
उत्तरम्- रङ्गोजिभट्टः।
201. प्रश्न- कौण्डभट्टस्य पितृव्यस्य किं नाम विद्यते?
उत्तरम्- श्रीमद्भट्टोजिदीक्षितः।
202. प्रश्न-पुंस्त्वं किम्?
उत्तरम्- सत्त्वरजस्तमोगुणानामाधिक्यं पुंस्त्वम्।
203. प्रश्न-किं नाम स्त्रीत्वम्?
उत्तरम्- सत्त्वरजस्तमोगुणानामपचयः स्त्रीत्वम्।
204. प्रश्न-किन्नाम नपुंसकत्वम्?
उत्तरम्- सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्।
205. प्रश्न-कात्यायन-रचितानां वार्तिकानां कियत्यः संख्याः सन्ति?
उत्तरम्- (1500) पञ्चदशशतानि।
206. प्रश्न-महाभाष्य-प्रदीपस्य रचयिता कोऽस्ति?
उत्तरम्- कैयटः।
207. प्रश्न-महाभाष्य-प्रदीपे "उद्योत" टीकायाः रचनाकारः कः?
उत्तरम्- नागेशः।
208. प्रश्न-वाक्यपदीये कियन्ति खण्डानि, कानि च तानि?
उत्तरम्- (3) त्रीणि, 1. ब्रह्मकाण्डम्, 2. पदकाण्डम्, 3. वाक्यकाण्डञ्च।
209. प्रश्न-कौमार-रचितं किं व्याकरणम्?
उत्तरम्- कातन्त्र-व्याकरणम्।
210. प्रश्न-वोपदेव-रचितं किं व्याकरणम्?
उत्तरम्- मुग्धबोध-व्याकरणम्।
211. प्रश्न-सारस्वत-व्याकरणस्य को लेखकः?
उत्तरम्- अनुभूति-स्वरूपाचार्यः।
212. प्रश्न-वररुचिकृतं किं व्याकरणम्?
उत्तरम्- प्राकृत-प्रकाशः।

213. प्रश्न-"शब्दानुशासनम्" कस्य व्याकरणम्?
उत्तरम्- हेमचन्द्रस्य।
214. प्रश्न- संस्कृते कति पुरुषाः भवन्ति, के च ते?
उत्तरम्- त्रयो पुरुषाः, 1. प्रथम-पुरुष, 2. मध्यम-पुरुष, 3. उत्तम-पुरुष।
215. प्रश्न-संस्कृते कति लिङ्गानि?
उत्तरम्- (3) त्रीणि।
216. प्रश्न-अनुनासिक-वर्णानां का संख्या?
उत्तरम्- (5) पञ्च।

(थ) संज्ञा/परिभाषा/आगम/आदेशादिविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न-कति माहेश्वरसूत्राणि सन्ति?
उत्तरम्- चतुर्दश।
2. प्रश्न-माहेश्वराणि इत्यत्र कः प्रत्ययः?
उत्तरम्- अण् प्रत्ययः।
3. प्रश्न-किमर्थानि माहेश्वरसूत्राणि?
उत्तरम्- प्रत्याहारसंज्ञार्थानि।
4. प्रश्न-माहेश्वरसूत्रेषु अन्त्या भवन्ति?
उत्तरम्- इत्संज्ञका।
5. प्रश्न-"आदिरन्त्येन सहेता" अनेन सूत्रेण विधीयते?
उत्तरम्- प्रत्याहारसंज्ञा।
6. प्रश्न-कति प्रत्याहाराः सन्ति ?
उत्तरम्- त्रिचत्वारिंशत्।
7. प्रश्न-केषां वर्णानाम् उदात्त-अनुदात्त-स्वरित संज्ञाः भवन्ति?
उत्तरम्- स्वरवर्णानाम्(अचाम्)
8. प्रश्न-अ, इ, उ, ऋ वर्णानां प्रत्येकस्य भेदाः भवन्ति?
उत्तरम्- अष्टादश।
9. प्रश्न-ए, ऐ, ओ, औ वर्णानां प्रत्येकस्य भेदाः भवन्ति?
उत्तरम्- द्वादश।
10. प्रश्न-"तुल्यास्य प्रयत्नं सवर्णम्" अनेन सूत्रेण विधीयते?
उत्तरम्- सवर्णसंज्ञा।
11. प्रश्न-अ-कवर्गः हकार-विसर्ग वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- कण्ठः।
12. प्रश्न-इ-चवर्गः य श वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- तालु।
13. प्रश्न-ऋ-टवर्गः र ष वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- मूर्धा।

14. प्रश्न-लृ-तवर्गः ल स वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- दन्तः।
15. प्रश्न-उ-पवर्गः उपध्मानीयः वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- ओष्ठः।
16. प्रश्न-ओ औ वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- कण्ठौष्ठ्य।
17. प्रश्न-एकारः ऐकारः वर्णानाम् उच्चारणस्थानमस्ति?
उत्तरम्- कण्ठतालुः।
18. प्रश्न-ञ म ङ ण न वर्णानां विशेषस्थानम् अस्ति?
उत्तरम्- नासिका।
19. प्रश्न-प्रयत्नः कतिविधः भवति?
उत्तरम्- द्विविधः।
20. प्रश्न-आभ्यन्तरप्रयत्नः कतिविधः के च ते?
उत्तरम्- चतुर्विधः, स्पृष्टः, ईषत्स्पृष्टः, विवृतः, संवृतश्च।
21. प्रश्न-बाह्यप्रयत्नः कतिविधः के च ते?
उत्तरम्-एकादश, विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्च।
22. प्रश्न-स्पर्शाः वर्णाः के सन्ति?
उत्तरम्- कवर्गतः पवर्ग पर्यन्तम्।
23. प्रश्न-अन्तःस्थाः वर्णाः सन्ति?
उत्तरम्- य, र, ल, व।
24. प्रश्न-ऊष्मवर्णाः सन्ति?
उत्तरम्- श, ष, स, ह।
25. प्रश्न-वर्गस्य प्रथम-तृतीय-पञ्चमवर्णानाम् अन्तःस्थानाञ्च बाह्यप्रयत्नःअस्ति?
उत्तरम्-अल्पप्राणः।
26. प्रश्न-वर्गस्य द्वितीयचतुर्थवर्णानाम् ऊष्माणाञ्च बाह्यप्रयत्नः अस्ति?
उत्तरम्- महाप्राणः।
27. प्रश्न-वृद्धिसंज्ञाविधायकं सूत्रम्?
उत्तरम्- वृद्धिरादैच्।
28. प्रश्न-आ, ऐ, औ एते वर्णाः सन्ति?
उत्तरम्- वृद्धिसंज्ञकाः।
29. प्रश्न-गुणसंज्ञा केन सूत्रेण विधीयते?
उत्तरम्- अदेङ्गुणः।
30. प्रश्न-गुणसंज्ञकाः वर्णाः सन्ति?
उत्तरम्-अ, ए, ओ।

31. प्रश्न-प्रादीनां क्रियायोगे भवति?
उत्तरम्-उपसर्गसंज्ञा।
32. प्रश्न-कति उपसर्गा:?
उत्तरम्-द्वाविंशति:।
33. प्रश्न-"अवसान" संज्ञा केन सूत्रेण भवति?
उत्तरम्- "विरामोऽवसानम्"।
34. प्रश्न-"संहिता" संज्ञा केन सूत्रेण भवति?
उत्तरम्-"पर:सन्निकर्ष: संहिता"।
35. प्रश्न-"पद" संज्ञा केन सूत्रेण भवति?
उत्तरम्- "सुप्तिङन्तं पदम्"।
36. प्रश्न-संयोगसंज्ञा विधायकं सूत्रम्?
उत्तरम्-"हलोऽनन्तरा संयोग:"।
37. प्रश्न-ह्रस्वस्य स्वरवर्णस्य भवति?
उत्तरम्- लघुसंज्ञा।
38. प्रश्न-संयोगे परे ह्रस्व स्वरस्य एवं दीर्घ स्वरस्य संज्ञा भवति?
उत्तरम्- गुरुसंज्ञा।
39. प्रश्न-नदी संज्ञा बिधायकं सूत्रं किमस्ति?
उत्तरम्-"ङिति ह्रस्वस्य"।
40. प्रश्न-"मति ङे मत्यै" अत्र "मति" इत्यस्य नदी-संज्ञा केन सूत्रेण भवति?
उत्तरम्-"ङिति ह्रस्वस्य"।
41. प्रश्न-"यू स्त्र्याख्यौ नदी" इति सूत्रे "यू" इत्यनेन कयो: वर्णद्वयो: बोधो भवति?
उत्तरम्- ई, ऊ।
42. प्रश्न-"घि" संज्ञा केन सूत्रेण भवति?
उत्तरम्-"शेषो घ्यसखि"।
43. प्रश्न-ङित् विभक्तौ केन सूत्रेण "घि" संज्ञकं गुणो विधीयते?
उत्तरम्-घेर्ङिति।
44. प्रश्न-"घि" संज्ञकेन विहित"ङि" विभक्तिं केन सूत्रेण औकारो भवति?
उत्तरम्- अच्च घे: इति सूत्रेण।
45. प्रश्न-"शेषो घ्यसखि" इति सूत्रे "शेष" शब्द कया संज्ञया सम्बद्ध:?
उत्तरम्- नदी-संज्ञा।
46. प्रश्न-प्रतिपदिकसंज्ञाविधायकं सूत्रं किम्?
उत्तरम्-अर्थवदधातुरप्रत्यय: प्रातिपदिकम्।
47. प्रश्न-शब्दानुशासने प्रातिपदिकसंज्ञाविधायकानि कति सूत्राणि सन्ति?
उत्तरम्-(02) द्वौ।

48. प्रश्न-"कृत्तद्धितसमासाश्च" इति सूत्रेण का संज्ञा विधीयते?
उत्तरम्- प्रतिपदिकसंज्ञा।
49. प्रश्न-"दाशरथिः" अत्र कस्मिन् अर्थे प्रातिपदिक-संज्ञा भवति?
उत्तरम्- तद्धितान्तार्थे।
50. प्रश्न-"कारकः" अत्र कीदृशः प्रातिपदिक-संज्ञा भवति?
उत्तरम्- कृदन्तार्थे।
51. प्रश्न-"पीताम्बरः" अत्र कस्मिन् अर्थे प्रातिपदिक-संज्ञा भवति?
उत्तरम्- समासान्तार्थे।
52. प्रश्न-"डित्थ" इत्यस्य प्रातिपदिक-संज्ञा केन सूत्रेण भवति?
उत्तरम्-अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।
53. प्रश्न-केन सूत्रेण "उपधा" विधीयते?
उत्तरम्-अलोऽन्यात्पूर्व उपधा।
54. प्रश्न-"अपृक्त" संज्ञा विधायकं सूत्रं किम्?
उत्तरम्- अपृक्त एकाल्प्रत्ययः।
55. प्रश्न-"लता सु लता स् लता" अत्र "स्" इत्यस्य लोपः कया संज्ञया सम्बन्धोऽस्ति?
उत्तरम्- अपृक्त-संज्ञया
56. प्रंश्न-गतिसंज्ञा केन सूत्रेण भवति?
उत्तरम्- गतिश्च।
57. प्रश्न-"आदर" "अनादर" अर्थयोः कयोः गति-संज्ञा भवतः?
उत्तरम्- सत्, असत् इत्ययोः।
58. प्रश्न-"गतिश्च" अस्मिन् सूत्रे विधेय "गति" संज्ञायाः किमुद्देश्यम्?
उत्तरम्- प्रादयः।
59. प्रश्न-"च्लि" प्रत्ययान्तस्य का संज्ञा भवति?
उत्तरम्- गति-संज्ञा।
60. प्रश्न-"आदरानादरयोःसदसती" इति सूत्रेंण कस्याः संज्ञायाः विधानं भवति?
उत्तरम्- गति-संज्ञायाः।
61. प्रश्न-"अलम्" इत्यस्य कस्मिन् अर्थे, केन सूत्रेण च "गति" संज्ञा भवति?
उत्तरम्- भूषणार्थे, "भूषणेअलम्" इति सूत्रेण।
62. प्रश्न-"अन्तर" इत्यस्य कस्मिन् अर्थे, केन सूत्रेण च "गति" संज्ञा भवति?
उत्तरम्- अपरिग्रह-अर्थे, "अन्तरपरिग्रहे" इति सूत्रेण।
63. प्रश्न-"अस्तम्" अस्य अव्ययस्य गति-संज्ञा केन सूत्रेण भवति?
उत्तरम्- "अस्तं च" इति सूत्रेण।
64. प्रश्न-"अच्छगत्यर्थवदेषु" इति सूत्रेण कस्याः संज्ञायाः विधानं भवति?
उत्तरम्- गति-संज्ञा।

65. प्रश्न-"विभाषा कृञि" सूत्रस्य कया संज्ञया सह सम्बन्धः वर्तते?
उत्तरम्- गति-संज्ञया।
66. प्रश्न-" कृञ्" धातुना युक्ते सति कयोः द्वयोः "गति" संज्ञा भवति?
उत्तरम्- उपाजे, अन्वाजे।
67. प्रश्न-" कृञ्" इत्यनेन युक्तः"उरसि" "मनसि" इत्यस्य च कस्मिन् अर्थे गति-संज्ञा भवति?
उत्तरम्- अन्तर्द्धि-इत्यर्थे।
68. प्रश्न-"अनत्याधान उरसिमनसि" अस्य सूत्रस्य किमुदाहरणम्?
उत्तरम्- उरसिकृत्य।
69. प्रश्न-"अग्निचित्" अत्र टि किमस्ति?
उत्तरम्- इत्।
70. प्रश्न-"निष्ठा" संज्ञा केन सूत्रेण भवति?
उत्तरम्-क्तक्तवतू निष्ठा।
71. प्रश्न-"कृ णिच् क्त कारितम्" अत्र "णि" इत्यस्य लोपः केन सूत्रेण भवति?
उत्तरम्- निष्ठायां सेटि।
72. प्रश्न-"प्र-क्षि क्त प्रक्षीण्" अत्र केन सूत्रेण धातुं दीर्घो भवति?
उत्तरम्- निष्ठायामण्यर्थे।
73. प्रश्न-"छिद् क्त छिन्तः" अत्र केन सूत्रेण नत्वो भवति?
उत्तरम्- रदाभ्यां निष्ठातो नः पूर्वस्य च दः।
74. प्रश्न-केन सूत्रेण सम्प्रसारणसंज्ञा विधीयते?
उत्तरम्-इग्यणः सम्प्रसारणम्।
75. प्रश्न-"विभाषा" संज्ञा केन सूत्रेण भवति?
उत्तरम्-न वेति विभाषा।
76. प्रश्न-किम् नाम सवर्णसंज्ञा?
उत्तरम्- तुल्यास्य प्रयत्नं सवर्णम्।
77. प्रश्न-"टि" संज्ञाविधायकं सूत्रं किम्?
उत्तरम्-अचोऽन्त्यादि टि।
78. प्रश्न-"प्रगृह्य" संज्ञा केन सूत्रेण भवति?
उत्तरम्- ईदूदेद्विवचनं प्रगृह्यम्।
79. प्रश्न-"शिशू" इत्यस्य "प्रगृह्यसंज्ञा" केन सूत्रेण भवति?
उत्तरम्- ईदूदेद्विवचनं प्रगृह्यम्।
80. प्रश्न-"अमी अत्र" अस्मिन् पदे "अमी" इत्यस्य "प्रगृह्यसंज्ञा" केन सूत्रेण भवति?
उत्तरम्- "अदसो मात्" इति सूत्रेण।
81. प्रश्न-"शि सर्वनामस्थानम्" इति सूत्रस्य"शि" इत्यस्य काभ्यां द्वाभ्यां विभक्तिभ्यां सम्बन्धः?
उत्तरम्- जस्, शस्।

82. प्रश्न-"समासेषु" प्रथमा निर्दिष्टस्य का संज्ञा?
उत्तरम्-उपसर्जनसंज्ञा।
83. प्रश्न-"विभाषा कृञि" इति सूत्रेण का संज्ञा?
उत्तरम्- गति।
84. प्रश्न-"मुनि" इति पदस्य का संज्ञा?
उत्तरम्- घि।
85. प्रश्न-"उपधा" संज्ञा केन सूत्रेण भवति?
उत्तरम्- अलोऽन्त्यात् पूर्व उपधा।
86. प्रश्न-पाणिनीय व्यवस्थायां "उपधा" का विद्यते?
उत्तरम्- संज्ञा।
87. प्रश्न-सुवन्त-तिङन्तयोः का संज्ञा?
उत्तरम्- पदसंज्ञा।
88. प्रश्न-सम्प्रसारणेन "य्" "व्" इत्ययोः के भवतः?
उत्तरम्- इ, उ, भवतः।
89. प्रश्न-"पतत् ङीप् पतन्ती" अत्र केन सूत्रेण "नुम्" इत्यस्यागमः भवति?
उत्तरम्- शप्श्यनोर्नित्यम्।
90. प्रश्न-"द्विगोः" सूत्रे कस्मात् सूत्रात् "ङीप्" इत्यस्य अनुवर्तनं भवति?
उत्तरम्- ऋणेभ्योङीप्।
91. प्रश्न-"नदी" संज्ञा केन सूत्रेण भवति?
उत्तरम्-यू स्त्राख्यौ नदी।
92. प्रश्न-समासशास्त्रे उपसर्जनं नाम किम्?
उत्तरम्-प्रथमानिर्दिष्टम्।
93. प्रश्न-सप्तर्षयः इत्यत्र समासविधायकं सूत्रं किम्?
उत्तरम्-दिक्संख्ये संज्ञायाम्।
94. प्रश्न-स्वादिपञ्चवचनानां का संज्ञा?
उत्तरम्- सर्वनामस्थानम्।
95. प्रश्न-संख्या कं कथ्यते?
उत्तरम्- बहुगणवतुडति संख्या।
96. प्रश्न-तरप् एवं तमप् इत्यस्य का संज्ञा भवति?
उत्तरम्- तरप्तमपौ घः इति घः संज्ञा।
97. प्रश्न-सम्बुद्धिसंज्ञा कां कथ्यते?
उत्तरम्-सम्बोधने प्रथमा एकवचनं सम्बुद्धिसंज्ञकं भवति।
98. प्रश्न-द्वित्वस्य द्वितीयरूपं किं कथ्यते?
उत्तरम्- आम्रेडित।

99. प्रश्न-अभ्यासं किं कथ्यते?
उत्तरम्-द्वित्वस्य प्रथमरूपम्।
100. प्रश्न-"प" एवं "फ" इत्यस्य पूर्व-अर्द्धविसर्ग-तुल्य-ध्वनिं किं कथ्यते?
उत्तरम्- उपध्मानीयम्।
101. प्रश्न-अपृक्त इति कं कथ्यते?
उत्तरम्- एकवर्णात्मकं प्रत्ययम्।
102. प्रश्न-घुसंज्ञा कान् धातून् भवति?
उत्तरम्-षट् धातून्, 1. डुदाञ्, 2. दाण्, 3. दो, 4. देङ्, 5. दुधाञ्, 6. धेट्।
103. प्रश्न-"घु" संज्ञा विधायकं सूत्रं किमस्ति?
उत्तरम्- दाधाघ्वदाप्।
104. प्रश्न-भट्टोजिदीक्षितः प्रातिपदिकार्थस्य का व्याख्या करोति?
उत्तरम्-नियतोपस्थितिकः प्रातिपदिकार्थः।
105. प्रश्न-व्याडि महोदयः प्रातिपदिकार्थं कस्मिन् स्वीकरोति?
उत्तरम्- व्यक्तौ।
106. प्रश्न-वाजप्यायनः प्रातिपदिकार्थं कस्मिन् स्वीकरोति?
उत्तरम्- जातौ(जात्याम्)
107. प्रश्न-पतञ्जलिः प्रातिपदिकार्थं केषु स्वीकरोति?
उत्तरम्- 1. स्वार्थ, 2. द्रव्य, 3. लिङ्ग, 4. संख्या, 5. कारकः।
108. प्रश्न-कैयटः प्रातिपदिकार्थं केषु स्वीकरोति?
उत्तरम्-1. स्वार्थ, 2. द्रव्य, 3. लिङ्ग, 4. संख्या।
109. प्रश्न-लुक्, लूप् एवं श्लु इति किमस्ति?
उत्तरम्-एते अदर्शनं लोपस्य वा कारक संज्ञा भवति।
110. प्रश्न-उपसर्गाणां गति-संज्ञा कदा भवति?
उत्तरम्-क्रियायोगे उपसर्गस्य गतिसंज्ञा भवति। (उपसर्गाः क्रियायोगें।)
111. प्रश्न-अन्वादेशं कं कथ्यते?
उत्तरम्-यस्मिन् कार्ये यस्य ग्रहणं अभूत् तस्य पुनः अन्य कार्येषु उपयोग-करणं अन्वादेशो भवति।
112. प्रश्न-आबन्तं कं कथ्यते?
उत्तरम्-टाप्, डाप्, चाप् एते त्रयं स्त्रीप्रत्ययं "आप्" इति कथ्यते, तस्यान्तं पदं आबन्तमिति कथ्यते।
113. प्रश्न-संस्कृत वर्णमालायां कति मूलस्वराः भवन्ति?
उत्तरम्-पञ्च, अ, इ, उ, ऋ, ऌ।
114. प्रश्न-ध्वनि-परिवर्तनस्य सर्वप्रमुखकारणं किम्?
उत्तरम्- प्रयत्न लाघवम्।

115. प्रश्न-सूत्रं किमुच्यते?
उत्तरम्- अल्पाक्षरत्वे सति बह्वर्थबोधकत्वं सूत्रत्वम्।
116. प्रश्न-धातुसंज्ञकाः के भवन्ति?
उत्तरम्- क्रियावाचिनो भ्वादयः।
117. प्रश्न-सर्वनामसंज्ञकाः के शब्दाः सन्ति?
उत्तरम्- (35) पञ्चत्रिंशत्, सर्वादयः।
118. प्रश्न-अव्ययसंज्ञकाः के भवन्ति?
उत्तरम्- स्वरादयो निपाताश्च।
119. प्रश्न-किं नाम अव्ययम्?
उत्तरम्- सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।
120. प्रश्न-"श्री" शब्दस्य षष्ठी-विभक्ति-बहुवचने का संज्ञा विकल्पेन भवति?
उत्तरम्- नदी-संज्ञा।
121. प्रश्न-भूपति शब्दस्य "घि" संज्ञा विधायकं सूत्रं किम्?
उत्तरम्- पतिः समास एव।
122. प्रश्न-समासे पति शब्दस्य का संज्ञा भवति?
उत्तरम्- घि संज्ञा।
123. प्रश्न-"भवत+छन्=भवदीयः अत्र भवत् शब्दस्य केन सूत्रेण पद संज्ञा भवति?
उत्तरम्- सिचि च।
124. प्रश्न-स्वप्+क्त=सुप्तः अत्र स्वप् धातोः किं कार्यं भवति?
उत्तरम्- सम्प्रसारणम्।
125. प्रश्न-पाणिनेः मते "वधू" शब्दस्य का संज्ञा?
उत्तरम्- नदी-संज्ञा।
126. प्रश्न-उप+भुज्+तुमुन=उपभोक्तुम् अत्र धातोः कं अशं गुणः अभूत्?
उत्तरम्- उपधा।
127. प्रश्न-"रम् घञ् रामः" अत्र धातोः अकारस्य का संज्ञा?
उत्तरम्- उपधा-संज्ञा।
128. प्रश्न-पठ्+घञ्=पाठः अत्र धातोः को विधिः प्रयुक्तः?
उत्तरम्- वृद्धि।
129. प्रश्न-"राजन्+सु (स्)=राज्ञि "स्" इत्यस्य लोपः कथं भवति?
उत्तरम्- अयं अपृक्तः अस्ति।
130. प्रश्न-"कारके" इदं कीदृशं सूत्रम्?
उत्तरम्- अधिकार-सूत्रम्।
131. प्रश्न-कृदन्तस्य का संज्ञा भवति?
उत्तरम्- प्रातिपदिक-संज्ञा।

132. प्रश्न-"मुनि" शब्दस्य का संज्ञा?
उत्तरम्- घि-संज्ञा।
133. प्रश्न-"सर्वनामस्थाने चाऽसम्बुद्धौ" इति सूत्रेण कं दीर्घं भवति?
उत्तरम्- उपधा-दीर्घ।
134. प्रश्न-"अष्टाध्यायी" इति ग्रन्थे सम्पूर्ण-उपधा कार्यः केन सम्बद्धः?
उत्तरम्- स्वरेन सम्बद्धः।
135. प्रश्न-"अलम्" अत्र कस्मिन् अर्थे "गति" संज्ञा भवति?
उत्तरम्- भूषण-अर्थे।
136. प्रश्न-समासशास्त्रे प्रथमानिर्दिष्टस्य का संज्ञा?
उत्तरम्- उपसर्जनसंज्ञा।
137. प्रश्न-अपादान-संज्ञा विधायकं सूत्रं किम्?
उत्तरम्- जनिकर्तुः।
138. प्रश्न-अष्टाध्यायी ग्रन्थे "पद-संज्ञाविधायक" सूत्राणां का संख्या?
उत्तरम्- (4) चतस्रः।
139. प्रश्न-अष्टाध्यायी ग्रन्थे "प्रातिपदिक-संज्ञाविधायक" सूत्राणां का संख्या?
उत्तरम्- (2) द्वे।
140. प्रश्न-"राजभ्याम्" अत्र "राजन्" शब्दस्य का संज्ञा भवति?
उत्तरम्- पद-संज्ञा।
141. प्रश्न-"अष्टाध्यायां" सर्वनामस्थान-संज्ञा" कति विधायकानि सूत्राणि?
उत्तरम्- (2) द्वे।
142. प्रश्न-"सर्वनामस्थान" संज्ञा विधायकानि सूत्राणि कानि?
उत्तरम्- 1. सुडनपुंसकस्य, 2. सर्वादीनि सर्वनामानि।
143. प्रश्न-ईकारान्त स्त्रीलिङ्गवाचक-शब्दस्य का संज्ञा भवति?
उत्तरम्- नदी-संज्ञा।
144. प्रश्न-धात्वादि स्थले अन्त्यवर्णेन पूर्ववर्णस्य का संज्ञा?
उत्तरम्- उपधा-संज्ञा।
145. प्रश्न-सुवन्तं तिङन्तं च किं संज्ञकं भवति?
उत्तरम्- पद-संज्ञकम्।
146. प्रश्न-निषेध-विकल्पौ किं कथ्यते?
उत्तरम्- विभाषा।
147. प्रश्न-"अ" एवं "आ" इति परस्परं किमस्ति?
उत्तरम्- सवर्णः।
148. प्रश्न-राजन् अत्र अन् इत्यस्य का संज्ञा?
उत्तरम्- टि-संज्ञा।

149. प्रश्न-पुंल्लिङ्ग-स्त्रीलिङ्गयो:"सु, औ, जस्, अम्, औट्" एतेषां विभक्तिनां का संज्ञा?
उत्तरम्- सर्वनामस्थान-संज्ञा।
150. प्रश्न-राजन्, अम् अत्र "अम्" इत्यस्य का संज्ञा?
उत्तरम्- सर्वनामस्थान-संज्ञा।
151. प्रश्न-"क्त" एवं "क्तवतु" प्रत्ययानां का संज्ञा?
उत्तरम्- निष्ठा-संज्ञा।
152. प्रश्न-"यण्" इत्यस्य स्थाने "इक्" विधानं किं कथ्यते?
उत्तरम्- सम्प्रसारणम्।
153. प्रश्न-ईकारान्त, ऊकारान्त एवं एकारान्त द्विवचनानां का संज्ञा?
उत्तरम्- प्रगृह्य-संज्ञा।
154. प्रश्न-"हरी एतौ" अत्र हरी इत्यस्य का संज्ञा?
उत्तरम्- प्रगृह्य-संज्ञा।
155. प्रश्न-"पठ" ण्वुल् पाठक:" अत्र धातो: "उपधां" केन सूत्रेण वृद्धि: भवति?
उत्तरम्- अत उपधाया: इति सूत्रेण।

(द) सन्धिविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न-सन्धि: इत्यत्र प्रत्यय: क:?
उत्तरम्- क्तिन् प्रत्यय:।
2. प्रश्न-वाक्ये सन्धिकार्यं भवति?
उत्तरम्- विवक्षाधीनम्।
3. प्रश्न-कति सन्धय:, के च ते?
उत्तरम्- पञ्च, -1. अच्सन्धि:, 2. हल्सन्धि:, 3. प्रकृतभावसन्धि: 4. विसर्गसन्धि:, 5. स्वादिसन्धि:।
4. प्रश्न-सूत्राणि कतिविधानि? के च ते?
उत्तरम्- षड्विधम्। संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारश्च।
5. प्रश्न-"इको यणचि" इति सूत्रेण का भवति?
उत्तरम्- यण्सन्धि:।
6. प्रश्न- यण्सन्धे: उदाहरणान् दर्शय?
उत्तरम्- दध्यत्र, स्वागतम्, दध्योदन:, धात्वंश:, लाकृति:। इत्यादि
7. प्रश्न-"नेमे" इत्यत्र क: सन्धि:?
उत्तरम्- गुणसन्धि:।
8. प्रश्न-आद्यन्तम्, प्रत्येकम्, अभ्यग्नि:-इत्येतेषु क: सन्धि:?
उत्तरम्- यण्सन्धि:।
9. प्रश्न-अयादिसन्धे: उदाहरणान् दर्शय?
उत्तरम्- हरये, विष्णवे, नायक:, पावक:, गव्यम्, नाव्यम्।

9. प्रश्न- गुणसन्धेः उदाहरणं दर्शय-?
   उत्तरम्- रमेशः, कूपोदकम्, जलोर्मि, कृष्णर्द्धिः।
10. प्रश्न-गुण-विधिः कस्य भवति?
    उत्तरम्- इक्-इत्यस्य।
11. प्रश्न-"चि+तव्यत्=चेतव्यम्" धातोः को विधिः अस्ति?
    उत्तरम्- गुण-विधिः।
12. प्रश्न-प्र+एजते सन्धत्त?
    उत्तरम्- प्रेजते।
13. प्रश्न-गुणसंज्ञकाः के?
    उत्तरम्- अत्+एङ् (ए, ओ)।
14. प्रश्न-गुणसन्धिविधायकसूत्रं किम्?
    उत्तरम्- आद्गुणः।
15. प्रश्न-तव+लृकारः सन्धत्त?
    उत्तरम्-तवल्कारः।
16. प्रश्न-गुणसंज्ञाविधायकं सूत्रं किम्?
    उत्तरम्- अदेङ्गुणः।
17. प्रश्न-अदेङ्गुणः अत्र "अत्" इत्यनेन ह्रस्व-अकारस्य बोधः केन सूत्रेण भवति?
    उत्तरम्- अणुदित् सवर्णस्य चाऽप्रत्ययः।
18. प्रश्न-"इ" "उ" इत्ययोः गुण विहिते सति किं परिवर्तनम्?
    उत्तरम्- ए, ओ, इत्ययोः।
19. प्रश्न-वृद्धिसन्धिं दर्शय -?
    उत्तरम्- तस्यैषः, गङ्गौघः, कृष्णौत्कण्ठ्यम्, प्रौहः, प्रार्णम्। इत्यादि
20. प्रश्न-तवैव-इत्यत्र कः सन्धिः?
    उत्तरम्- बृद्धिसन्धिः।
21. प्रश्न-"एत्येधत्यूठ्सु" इति सूत्रेण कः आदेशः स्यात्?
    उत्तरम्-वृद्धिः।
22. प्रश्न-वृद्धिसंज्ञकाः के?
    उत्तरम्-आत् ऐच् (ऐ, ओ)।
23. प्रश्न-वृद्धिसंज्ञा विधायकं सूत्रं किम्?
    उत्तरम्- वृद्धिरेचि।
24. प्रश्न-वृद्धिसन्धिविधायकं सूत्रं किम्?
    उत्तरम्- वृद्धिरादैच्।
25. प्रश्न-"वृद्धि" विधिः कस्य भवति?
    उत्तरम्- इक् इत्यस्य।

26. प्रश्न-"गो+सु=गौ" अत्र "गो" शब्दे को विधिः?
    उत्तरम्- वृद्धिः।
27. प्रश्न-"पठ्+घञ्=पाठः" अत्र धातौ को विधिः?
    उत्तरम्- वृद्धिः।
28. प्रश्न-"सखि+औ=सखायौ" अस्य शब्दस्य इकारस्य को विधिः?
    उत्तरम्- वृद्धिः।
29. प्रश्न-"दशरथ+इञ्=दाशरथिः" अत्र "दशरथस्य" आदिस्वरस्य वृद्धिः केन सूत्रेण भवति?
    उत्तरम्- तद्धितेष्वचामादेः।
30. प्रश्न-"हृ+घञ्=हारः" अत्र धातौ ऋकारस्य "वृद्धिः" केन सूत्रेण विधीयते?
    उत्तरम्- अचो ञ्णितिः।
31. प्रश्न-"वद्+घञ्=वादः अत्र धातौ आकारस्य "वृद्धिः" केन सूत्रेण भवति?
    उत्तरम्- अत उपधायाः।
32. प्रश्न-"कृ+ण्वुल्=कारकः" अत्र धातौ "ऋकारस्य" वृद्धिः इत्यनेन किं भवति?
    उत्तरम्- आ।
33. प्रश्न-"सुखेन ऋतः" "सुख ऋतः सुखार्थः" अत्र को विधिः?
    उत्तरम्- वृद्धि।
34. प्रश्न-"इ" "उ" इत्ययोः वृद्धिः विहिते सति किं रूपम्?
    उत्तरम्- ऐ, औ, इत्ययोः।
35. प्रश्न-"द्वित्व" विधिना सम्बद्ध-सूत्रं किम्?
    उत्तरम्- अनचि च।
36. प्रश्न-शिशु+ऐक्यम् इत्यस्य सन्धिपदं किम्?
    उत्तरम्- शिशवैक्यम्।
37. प्रश्न-सु+उक्तिः इत्यस्य सन्धिपदं किम्?
    उत्तरम्-सूक्तिः।
38. प्रश्न-"देवैश्वर्यम्" इत्यस्य सन्धिविच्छेदः कः?
    उत्तरम्- देव+ऐश्वर्यम्।
39. प्रश्न-दीर्घसन्धिः केन सूत्रेण भवति?
    उत्तरम्- "अकः सवर्णे दीर्घः"
40. प्रश्न-दीर्घसन्धेः उदाहरणं दर्शय-?
    उत्तरम्- पुस्तकालयः, वधूपकारः, दैत्यारी, श्रीशः, वाचनालयादि।
41. प्रश्न-पितृ+ऋणम् इत्यत्र कः सन्धिः?
    उत्तरम्- दीर्घ।
42. प्रश्न-"श्चुत्वसन्धिः" केन सूत्रेण भवति?
    उत्तरम्- स्तोः श्चुना श्चुः। (स्तोःश्चुना योगे श्चुः स्यात्)

43. प्रश्न-"श्चुत्वसन्धेः" उदाहरणान् दर्शय?
उत्तरम्- स-श=हरिश्शेते, रामश्चिनोति, त-च=सच्चित्, शाडिङ्गय।
44. प्रश्न-"ष्टुत्वसन्धिः" केन सूत्रेण भवति?
उत्तरम्- ष्टुना ष्टुः। (स्तोःष्टुना योगे ष्टुः स्यात्)
45. प्रश्न-ष्टुत्वसन्धेः उदाहरणान् दर्शय?
उत्तरम्- रामष्षष्ठः, हरिष्टीकते, पेष्टा, तट्टीका, चक्रिण्ढौकसे, षट्सन्तः।
46. प्रश्न-"यशांसि" अत्र कः सन्धिः?
उत्तरम्- अनुस्वारसन्धिः।
47. प्रश्न-"तवैव" इत्यत्र कः सन्धिः?
उत्तरम्- अवधारणार्थे पररूपम्।
48. प्रश्न-"षड्वारम्" अत्र कीदृशो हल्सन्धिः?
उत्तरम्- जस्त्वसन्धिः।
49. प्रश्न-"अभवच्च" इत्यस्मिन् कः सन्धिः?
उत्तरम्- श्चुत्वसन्धि।
50. प्रश्न-गो+यम् पदस्य सन्धिःशब्दः कः?
उत्तरम्- गव्यम्।
51. प्रश्न-गो+यूतिः पदस्य सन्धियुक्तं पदं किम्?
उत्तरम्- गव्यूतिः।
52. प्रश्न-अक्षौहिणी पदस्य सन्धिविच्छेदः कः?
उत्तरम्- अक्ष+ऊहनी
53. प्रश्न-ऋण+ऋणम्-सन्धिशब्दः कः?
उत्तरम्- ऋणार्णम्।
54. प्रश्न-"तच्छिवः" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- तत्+शिवः।
55. प्रश्न-षड्वारम्-अत्र कीदृशो हल्सन्धिः?
उत्तरम्- जश्त्वसन्धिः।
56. प्रश्न-सुगण्णीशः -इत्यत्र कःसन्धिः?
उत्तरम्- ङमुडागमसन्धिः।
57. प्रश्न-बहुनेच्छसि इत्यस्य सन्धिविच्छेदः कथम्?
उत्तरम्- बहुना+इच्छसि।
58. प्रश्न-"दर्शयाम्यहम्" इत्यस्य सन्धिविच्छेदं कुरु?
उत्तरम्- दर्शयामि+अहम्।
59. प्रश्न-"ह्यासनम्" इत्यस्य विच्छेदः कथम्?
उत्तरम्- हि+आसनम्।

60. प्रश्न-"खल्वेषः" इत्यस्य सन्धिविच्छेदः कथम्?
उत्तरम्- खलु+एषः।
61. प्रश्न-"मध्वास्वादनम्" इत्यत्र सन्धिविच्छेदं कुरु?
उत्तरम्- मधु+आस्वादनम्।
62. प्रश्न-"शर्वोपमम्" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- शर्व+उपमम्।
63. प्रश्न-"देवर्णम्" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- देव+ऋणम्।
64. प्रश्न-"दिग्गजः" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- दिक्+गजः।
65. प्रश्न-"यावज्जीवम्" इत्यस्य सन्धिः कः?
उत्तरम्- यावत्+जीवम्।
66. प्रश्न-"युष्मन्नामाङ्किताः" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- युष्मत्+नाम+अङ्किताः।
67. प्रश्न-"भूयसोक्तेन" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- भूयसा+उक्तेन।
68. प्रश्न-"महच्चित्रम्" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- महत्+चित्रम्।
69. प्रश्न-"मत्यायाशा" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- मत्यै+आशा।
70. प्रश्न-"विद्वज्जनः" इत्यत्र सन्धिं विघटयत?
उत्तरम्- विद्वद्+जनः।
71. प्रश्न-"दृष्ट्वोवाच" इत्यस्य सन्धिविच्छेदं प्रदर्शयत?
उत्तरम्- दृष्ट्वा+उवाच।
72. प्रश्न-"ममानुमत्या" इत्यस्य सन्धिविच्छेदं प्रदर्शयत?
उत्तरम्- मम+अनुमत्या।
73. प्रश्न-"पुस्तकेऽस्मिन्" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- पुस्तके+अस्मिन्।
74. प्रश्न-सङ्गतौ+आत्मानम्=सन्धिं कुरुत?
उत्तरम्- सङ्गतावात्मानम्।
75. प्रश्न-देवौ+आसाते=इत्यनयोः सन्धिःकथम्?
उत्तरम्- देवावासाते।
76. प्रश्न-यत्+लभ्यते सन्ध्यन्तं पदं किम्?
उत्तरम्-यल्लभ्यते।

77. प्रश्न-शिष्यः+नमति सन्धिं योजयत?
उत्तरम्- शिष्यो नमति।
78. प्रश्न-"गुरुः+एति" सन्धियुक्तं पदं किम्?
उत्तरम्- गुरुरेति।
79. प्रश्न-"हरिस्+षष्ठः" सन्धिं कुरुत?
उत्तरम्- हरिष्षष्ठः।
80. प्रश्न-"समिध्+भ्याम्" इत्यस्य सन्धियुक्तं पदं किम्?
उत्तरम्- समिद्भ्याम्।
81. प्रश्न-"रामम्+नमामि" इति सन्धत?
उत्तरम्- रामं नमामि।
82. प्रश्न-कृष्णः+गच्छति इत्यत्र सन्धियुक्तं पदं किम्?
उत्तरम्-कृष्णो गच्छति।
83. प्रश्न-"सम्राट+गच्छति=सन्धत्त?
उत्तरम्- सम्राड्गच्छति।
84. प्रश्न-"ककुभ्+शयनम् सन्धत्त?
उत्तरम्- ककुप्शयनम्।
85. प्रश्न-"गुरु+उपदेशः सन्धत्त?
उत्तरम्-गुरूपदेशः।
86. प्रश्न-महा+ऋषिः इत्यस्य सन्धिपदं किम्?
उत्तरम्- महर्षिः।
87. प्रश्न-"वर्षर्तुः" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- वर्षा+ऋतुः।
88. प्रश्न-"गङ्गोर्मि" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- गङ्गा+ऊर्मिः।
89. प्रश्न-"नमस्ते" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- नमः+ते।
90. प्रश्न-"वागीशः" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- वाक्+ईशः।
91. प्रश्न-"मनीषा" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- मनस्+ईसा।
93. प्रश्न-"अन्वभवत्" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- अनु+अभवत्।
94. प्रश्न-"तच्श्रुत्वा" सन्धिविच्छेदं कुरुत?
उत्तरम्- तत्+श्रुत्वा।

95. प्रश्न-"संस्करोति" सन्धिविच्छेदं कुरुत?
उत्तरम्-सम्+करोति।
96. प्रश्न-सत्+आचार: इत्यस्य सन्धिपदं किम्?
उत्तरम्- सदाचार:।
97. प्रश्न-"भो+अनम् इत्यस्य सन्धिपदं किम्?
उत्तरम्- भवनम्।
98. प्रश्न-विद्वान्+लिखति इत्यस्य सन्धिपदं किम्?
उत्तरम्- विद्वाल्लिँखति।
99. प्रश्न-जगत्+जालम् इत्यस्य सन्धिपदं किम्?
उत्तरम्- जगज्जालम्।
100. प्रश्न-आशी:+वाद: इत्यस्य सन्धिपदं किम्?
उत्तरम्- आशीर्वाद:।
101. प्रश्न-"मुनि+आगच्छति इत्यस्य सन्धिपदं किम्?
उत्तरम्- मुनिरागच्छति।
102. प्रश्न-लेखक:+टीकते इत्यस्य सन्धिपदं किम्?
उत्तरम्- लेखकष्टीकते।
103. प्रश्न-महत्+लावण्यम् इत्यस्य सन्धिपदं किम्?
उत्तरम्-महल्लावण्यम्।
104. प्रश्न-गो+यम् इत्यस्य सन्धिपदं किम्?
उत्तरम्-गव्यम्।
105. प्रश्न-चम्+चल: इत्यस्य सन्धिपदं किम्?
उत्तरम्- चञ्चल:।
106. प्रश्न-षड्+सन्त: इत्यस्य सन्धिपदं किम्?
उत्तरम्- षट्त्सन्त:।
107. प्रश्न-कान्+कान् इत्यस्य सन्धिपदं किम्?
उत्तरम्- कांस्कान्।
108. प्रश्न-आवि:+कृतम् इत्यस्य सन्धिपदं किम्?
उत्तरम्-आविष्कृतम्।
109. प्रश्न-अन्तर्+राष्ट्रिय: इत्यस्य सन्धिपदं किम्?
उत्तरम्-आर्न्तराष्ट्रिय:।
110. प्रश्न-"षट्+आनन:" इति योजयत?
उत्तरम्-षडानन:।
111. प्रश्न-शोध+छात्र: सन्धत्त?
उत्तरम्- शोधच्छात्र:।

112. प्रश्न-"सच्चित्" इत्यस्य सन्धिविच्छेदः कः?
उत्तरम्- सत्+चित्।
113. प्रश्न-सम्यक्+दर्शनम् सन्धिरूपं किम्?
उत्तरम्- सम्यग्दर्शनम्।
114. प्रश्न-भ्रातः+गच्छ सन्धिं कुरुत?
उत्तरम्-भ्रातर्गच्छ।
115. प्रश्न-मातृच्छेदः अत्र सन्धिःकः?
उत्तरम्- श्चुत्वसन्धिः।
116. प्रश्न-एतयोः+बलम् सन्धिं कुरुत?
उत्तरम्- एतयोर्बलम्।
117. प्रश्न-मनः+अनुसारेण सन्धिं कुरुत?
उत्तरम्-मनोऽनुसारेण।
118. प्रश्न-"वाताच्चिन्ता" सन्धिविच्छेदे कुरुत?
उत्तरम्- वातात्+चिन्ता।
119. प्रश्न-"सङ्कीर्तयति" कस्य सन्धेरुदाहरणमेतत्?
उत्तरम्- अनुनासिकसन्धेः।
120. प्रश्न-"अस्त्युज्जयिन्याम्" अस्य सन्धिविचछेदःकथम्?
उत्तरम्- अस्ति+उज्जयिन्याम्।
121. प्रश्न-"चैव" इत्यस्य कथं विचछेदः?
उत्तरम्- च+एव।
122. प्रश्न-"जगद्वन्द्यः" इत्यस्य कथं विचछेदः?
उत्तरम्- जगत्+वन्द्यः।
123. प्रश्न-"विद्यतेऽद्यापि" इदं कस्य सन्धेरुदाहरणम्?
उत्तरम्-पूर्वरूपसन्धेः।
124. प्रश्न-आचारात्+लभते अस्य सन्धिः कथम्?
उत्तरम्-आचाराल्लभते।
125. प्रश्न-"भ्रातृद्धिः" सन्धिं विघटयत?
उत्तरम्- भ्रातृ+ऋद्धिः।
126. प्रश्न-"षण्मुखः" इत्यस्य विकल्परूपं किम्?
उत्तरम्- षट्मुखः।
127. प्रश्न-"गुरुः+आद्रियते इत्यस्य सन्धिर्भवति?
उत्तरम्- गुरुराद्रियते।
128. प्रश्न-छत्वसन्धेः उदाहरणं दर्शयत?
उत्तरम्- तच्छिवः।

129. प्रश्न-"शिवो+वन्द्यः" इत्यत्र प्रयुक्तं सूत्रम्?
उत्तरम्- हशि च।
130. प्रश्न-दिग्गजः इत्यस्य सन्धिविच्छेदो भवति?
उत्तरम्- दिक्+गजः।
131. प्रश्न-"सङ्कल्प" शब्दस्य सन्धिविच्छेदः किं रूपम्?
उत्तरम्- सम्+कल्प।
132. प्रश्न-"संयमः" इत्यस्य सन्धिविच्छेदो भवति?
उत्तरम्- सम्+यमः।
133. प्रश्न-"उच्चारण" अत्र का सन्धिः?
उत्तरम्- व्यञ्जन-सन्धि।
134. प्रश्न-"सच्चित्" अत्र कः सन्धिः?
उत्तरम्- श्चुत्व सन्धिः।

(ध) सुवन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न-प्रातिपदिकेन कस्य विधानं भवति?
उत्तरम्- सुप्-पदस्य।
2. प्रश्न-"प्रणाली" शब्दस्य षष्ठ्येकवचने रूपं दर्शय-?
उत्तरम्- प्रणाल्याः।
3. प्रश्न-"गो" शब्दस्य द्वितीयाविभक्तौ बहुवचन रूपं किम्?
उत्तरम्- गाः।
4. प्रश्न-"गुरु" शब्दस्य चतुर्थी एकवचनरूपं किम्?
उत्तरम्- गुरुवे।
5. प्रश्न-वारि शब्दस्य पञ्चमी एकवचनरूपं किम्?
उत्तरम्- वारिणः।
6. प्रश्न- कानि रूपाणि शुद्धानि?
उत्तरम्-वारि-वारिणी-वारीणि।
7. प्रश्न-सम्राज्-परिव्राज् -विश्वसृज्-एते शब्दाः केषु लिङ्गेषु?
उत्तरम्-पुंलिङ्गेषु।
8. प्रश्न-मनस्-हविस्-वपुस्-तस्थिवस्-इत्येते शब्दाः कस्मिन् लिङ्गे वर्तन्ते?
उत्तरम्-नपुंसकलिङ्गे।
9. प्रश्न-"रवि" शब्दस्य चतुर्थी एकवचनं रूपं दर्शय?
उत्तरम्- रवये।
10. प्रश्न-"सखि" शब्दस्य पुंलिङ्गे प्रथमा द्विवचनस्य रूपं किम्?
उत्तरम्- सखायौ।
11. प्रश्न-"नृ" शब्दस्य षष्ठीबहुवचने रूपं दर्शय?
उत्तरम्- नृणाम्/नॄणाम्।

12. प्रश्न-"भू:" शब्दस्य ऊकारान्तस्य सप्तमी एकवचने रूपद्वयं किम्?
उत्तरम्- भूवि-भूमौ।
13. प्रश्न-"अक्षि" शब्दस्य इकारान्तनपुंसकलिङ्गस्य तृतीया एकवचनं दर्शयत?
उत्तरम्- अक्ष्णा।
14. प्रश्न-"दधि" शब्दस्य सप्तमी विभक्तौ त्रिषुवचनेषु रूपं किम्?
उत्तरम्- दध्नि-दधनि-दध्नो:-दधिषु।
15. प्रश्न-एनाम्-एने-एना: इति कस्य सर्वनामशब्दस्य रूपाणि?
उत्तरम्- इदम् शब्दस्य स्त्रीलिङ्गस्य।
16. प्रश्न-"अदस्" शब्दस्य स्त्रीलिङ्गे चतुर्थी एकवचनरूपं किम्?
उत्तरम्- अद:-अमू-अमूनि।
17. प्रश्न-"अस्मद्" शब्दे "न:" इति रूपं कतिवारं कुत्र च आयाति?
उत्तरम्- त्रिवारम्-द्वितीया, चतुर्थी, षष्ठीविभक्तिषु।
18. प्रश्न-"तस्थिवस्" शब्दस्य प्रथमाद्विवचनरूपं किम्?
उत्तरम्- तस्थिवसौ।
19. प्रश्न-भा:-भासौ-भास: इति कस्य शब्दस्य रूपाणि?
उत्तरम्- "भास्"।
20. प्रश्न-"विद्वस्" शब्दस्य "विदुष:" इति काषु विभक्तिषु रूपं भवति?
उत्तरम्- द्वितीया, पञ्चमी, षष्ठी।
21. प्रश्न-"आशिस्" शब्दस्य तृतीयाविभक्ति-एकवचनरूपं किम्?
उत्तरम्- आशिषा।
22. प्रश्न-"प्रधी" शब्दस्य द्वितीयाविभक्ति-एकवचनरूपं किम्?
उत्तरम्- प्रध्यम्।
23. प्रश्न-अकारान्त पुंलिङ्गस्य "निर्जर" शब्दस्य कोऽर्थ:?
उत्तरम्- जरारहित:।
24. प्रश्न-"अहन्" शब्दस्य द्वितीयाविभक्तौ रूपाणि प्रदर्शयत?
उत्तरम्- अह:-अह्नी-अहनी-अहानि।
25. प्रश्न-"पथिन्" शब्दस्य लिङ्गं किम्?
उत्तरम्- पुलिङ्गम्।
26. प्रश्न-"धनुष्" शब्दस्य पञ्चमीविभक्तौ रूपाणि कानि?
उत्तरम्- धनुष:-धनुर्भ्याम्-धनुर्भ्य:।
27. प्रश्न-"भवत्" शब्दस्य "भवत:" कतिवारं कुत्र च आयाति?
उत्तरम्- त्रिवारं-1. द्वितीया बहुवचने, 2. पञ्चमी एकवचने, 3. षष्ठी एकवचने।
28. प्रश्न-इकारान्तस्य "मति" शब्दस्य द्वितीयाबहुवचनरूपं किम्?
उत्तरम्- मती:।

29. प्रश्न-"वधू" शब्दस्य चतुर्थी एकवचनं किम्?
उत्तरम्- वध्वै।
30. प्रश्न-"चन्द्रमस्" शब्दस्य लिङ्गं किम्?
उत्तरम्- सकारान्तपुंलिङ्गम्।
31. प्रश्न-"चन्द्रमस्" शब्दस्य तृतीयाचतुर्थीपञ्चमीविभक्तिषु द्विवचने रूपं किम्?
उत्तरम्- चन्द्रमाभ्यां, चन्द्रमाभ्यां, चन्द्रमाभ्यां।
32. प्रश्न-"आत्मन्" शब्दः कस्मिन् लिङ्गे भवति?
उत्तरम्- नकारान्तपुंलिङ्गे।
33. प्रश्न-दता-दद्भ्रयाम्-दद्भिः इति कस्य शब्दस्य तृतीया विभक्तिरूपाणि?
उत्तरम्- दातृशब्दस्य।
34. प्रश्न-"विश्वपा" शब्दस्य प्रथमा-एकवचनबहुवचनरूपे के?
उत्तरम्- विश्वपाः-विश्वपाः।
35. प्रश्न-"कति" शब्दः किं वचनान्तः?
उत्तरम्- नित्यः बहुवचनान्तः।
36. प्रश्न-"मातृ" शब्दस्य द्वितीया-बहुवचने रूपं किम्?
उत्तरम्- मातॄः।
37. प्रश्न-"अग्नि" शब्दस्य चतुर्थी एकवचनं किम्?
उत्तरम्- अग्नये।
38. प्रश्न-"रवि" शब्दस्य सप्तमी एकवचनं किम्?
उत्तरम्- रवौ।
39. प्रश्न-"साधु" शब्दस्य सप्तमी द्विवचनं किम्?
उत्तरम्- साध्वोः।
40. प्रश्न-"शिशु" शब्दस्य तृतीयाबहुवचनं किम्?
उत्तरम्- शिशुभिः।
41. प्रश्न-"नभस्" शब्दस्य द्वितीयाबहुवचनं किम्?
उत्तरम्- नभः।
42. प्रश्न-"स्त्री" शब्दस्य द्वितीया बहुवचनं किम्?
उत्तरम्- स्त्रीः।
43. प्रश्न-"इदम्" शब्दस्य (स्त्रीलिङ्गे) चतुर्थी बहुवचनं किम्?
उत्तरम्- आभ्यः।
44. प्रश्न-"चतुर" शब्दस्य स्त्रीलिङ्गे चतुर्थी बहुवचनं रूपं प्रदर्शयत?
उत्तरम्- चतसृभ्यः।
45. प्रश्न-"नृपति" शब्दस्य तृतीया-एकवचनं रूपं किम्?
उत्तरम्- नृपतिना।

46. प्रश्न-"जन्मन्" शब्दस्य प्रथमाबहुवचनं किम्?
उत्तरम्- जन्मनि।
47. प्रश्न-"कर्मन्" शब्दस्य पञ्चमी एकवचने रूपं किम्?
उत्तरम्- कर्मण:।
48. प्रश्न- नरी" शब्दस्य सम्बोधने एकवचने रूपं किम्?
उत्तरम्- हे नारि!
49. प्रश्न-"नृ" शब्दस्य तृतीया-एकवचनं किम्?
उत्तरम्- न्रा।
50. प्रश्न-"आचार्य" शब्दस्य षष्ठी द्विवचनरूपं किम्?
उत्तरम्- आचार्ययो:।
51. प्रश्न-"गौरी" शब्दस्य द्वितीया बहुवचनं किम्?
उत्तरम्- गौरी:।
52. प्रश्न-"दधि" शब्दस्य प्रथमाद्विवचने किं रूपम्?
उत्तरम्- दधिनी।
53. प्रश्न-"राजन्" शब्दस्य "राज्ञ:" इति कासु विभक्तिषु भवति?
उत्तरम्- द्वितीयाबहु0, पञ्चमी-षष्ठी एकवचनेषु।
54. प्रश्न-"इदं" शब्दस्य स्त्रीयां पञ्चमी विभक्ति-एकवचने किं रूपम्?
उत्तरम्- अस्या:।
55. प्रश्न-"सन्धि" शब्दस्य द्वितीया बहुवचनं रूपं किम्?
उत्तरम्- सन्धीन्।
56. प्रश्न-"नृपति" शब्दस्य तृतीयाबहुवचने किं रूपम्?
उत्तरम्- नृपतिभि:।
57. प्रश्न-"भानु" शब्दस्य तृतीया-एकवचनरूपं किम्?
उत्तरम्- भानुना।
58. प्रश्न-इकारान्तशब्देषु "भूपति" शब्दस्य सम्बोधनैकवचनं किम्?
उत्तरम्- हे भूपते!
59. प्रश्न-उकारान्त "शम्भु" शब्दस्य सम्बोधनद्विवचनं रूपं किम्?
उत्तरम्- हे शम्भू!
60. प्रश्न-रोगी-कपटी-कामी- एते शब्दा: किमान्ता:?
उत्तरम्- इनन्ता:।
61. प्रश्न-देही-द्रोही-कुशली शब्दानां मूलशब्दं सूचयत?
उत्तरम्- देहिन्-द्रोहिन्-कुशलिन्।
62. प्रश्न--"अधिकारिन्" शब्दस्य तृतीया-एकवचनं किम्?
उत्तरम्- अधिकारिणा।

63. प्रश्न-"मर्माणि" इत्यस्य मूलशब्दः कः?
उत्तरम्- मर्मन्।
64. प्रश्न-"यावत्" शब्दस्य पुंलिङ्गे द्वितीयाबहुवचनरूपं किम्?
उत्तरम्- यावतः।
65. प्रश्न-"कियत्" शब्दस्य पुंलिङ्गे द्वितीया एकवचनरूपं किम्?
उत्तरम्- कियन्तम्।
66. प्रश्न-"महत्" शब्दस्य पुंलिङ्गे सम्बोधनैकवचने रूपं किम्?
उत्तरम्- महत्।
67. प्रश्न-"अहन्" शब्दस्य प्रथमान्तरूपाणि प्रदर्शयत?
उत्तरम्- अहः-अही/अहनी-अहानि।
68. प्रश्न-"अमुष्य-अमुयोः-अमीषाम्" इति अदस् शब्दस्य किं लिङ्गान्तरूपाणि स्युः?
उत्तरम्- पुलिङ्गस्य।
69. प्रश्न-"अणिमन्" शब्दस्य सप्तम्येकवचनं किम्?
उत्तरम्- अणिमनि।
70. प्रश्न-"गो" शब्दस्य द्वितीया बहुवचने रूपं किम्?
उत्तरम्- गाः।
71. प्रश्न-कस्य शब्दस्य सर्वाणि रूपाणि उपलभ्यन्ते?
उत्तरम्- महत्।
72. प्रश्न-"दिव्" शब्दस्य प्रथमैकवचने रूपं किम्?
उत्तरम्- द्यौः।
73. प्रश्न-"अप" शब्दस्य षष्ठी बहुवचने किं रूपम्?
उत्तरम्- अपाम्।
74. प्रश्न-"चतुर" शब्दस्य स्त्रीलिङ्गे षष्ठी बहुवचने किं रूपम्?
उत्तरम्- चतसृणाम्।
75. प्रश्न-"मधवन्" शब्दस्य षष्ठी एकवचने रूपं भवति?
उत्तरम्- मघोनः।
76. प्रश्न-युवन् शब्दस्य षष्ठी बहुवचने किं रूपं भवति?
उत्तरम्- युनाम्।
77. प्रश्न-एतत् शब्दस्य स्त्रियां षष्ठी बहुवचने किं रूपं भवति?
उत्तरम्- एतासाम्।
78. प्रश्न-विद्वस् शब्दस्य षष्ठी बहुवचने किं रूपं भवति?
उत्तरम्- विदुषाम्।
79. प्रश्न-"विधि" शब्दः कस्मिन् लिङ्गे वर्तते?
उत्तरम्- पुंलिङ्गे।

80. प्रश्न-"भवती" शब्दस्य सम्बोधने किं रूपम्?
उत्तरम्- भवति।
81. प्रश्न-"भ्रातृ" शब्दस्य सम्बोधने किं रूपम्?
उत्तरम्- हे भ्रातः।
82. प्रश्न-"शिशु" शब्दस्य सम्बोधनैकवचने किं रूपम्?
उत्तरम्- शिशो।
83. प्रश्न-"सुप्" प्रत्ययाः कति भवन्ति?
उत्तरम्- एकविंशति।
84. प्रश्न-"यकृत्" शब्दस्य लिङ्गं किम्?
उत्तरम्- नपुंसकलिङ्गम्।
85. प्रश्न-"अक्षि" शब्दस्य तृतीयैकवचने किं रूपम्?
उत्तरम्- अक्ष्णा।
86. प्रश्न-"इदं" शब्दस्य (स्त्रीलिङ्गे) तृतीयैकवचने किं रूपम्?
उत्तरम्- अनया।
87. प्रश्न-"विश्" शब्दस्य सप्तम्येकवचने किं रूपम्?
उत्तरम्- विशि।
88. प्रश्न-"अदस्" शब्दस्य पुंलिङ्गे तृतीयाबहुवचनं रूपं किम्?
उत्तरम्- अमीभिः।
89. प्रश्न-"चित्तं स्वास्थ्यं लभताम्" अत्र कर्तृपदस्य लिङ्गं किम्?
उत्तरम्- नपुंसकलिङ्गम्।
90. प्रश्न-"सम्प्रति वार्ताः श्रुयन्ताम्" अत्र कर्तृपदं किम्?
उत्तरम्- ते।
91. प्रश्न-"प्रेक्षस्व पनस्य शोभाम्" अत्र कर्मकारकं किम्?
उत्तरम्- शोभाम्।
92. प्रश्न-उपानह् शब्दस्य पञ्चमीविभक्ति-एकवचने किं रूपं भवति?
उत्तरम्- उपानहः।
93. प्रश्न-जगत् शब्दस्य प्रथमाबहुवचनं किम्?
उत्तरम्- जगत्।
94. प्रश्न-दिश् शब्दस्य सप्तमी बहुवचने किं रूपं भवति?
उत्तरम्- दिक्षु।
95. प्रश्न-स्रज शब्दस्य प्रथमाबहुवचने किं रूपं भवति?
उत्तरम्- स्रजः।
96. प्रश्न-गिर् शब्दस्य सप्तमीबहुवचने किं रूपं भवति?
उत्तरम्- गीर्षु।

97. प्रश्न-प्राञ्च् शब्दस्य प्रथमा एकवचने किं रूपम्?
उत्तरम्- प्राङ्।
98. प्रश्न-भू शब्दस्य प्रथमाबहुवचने किं रूपम्?
उत्तरम्- भुवः।
99. प्रश्न-दातृ शब्दस्य द्वितीयाबहुवचने किं रूपं भवति?
उत्तरम्- दातॄन्।
100. प्रश्न-"पूर्व-उभय-सर्व-द्वार" शब्देषु कस्य शब्दस्य त्रिषु लिङ्गेषु द्विवचनरूपं नास्ति?
उत्तरम्- उभयशब्दस्य।

(न) तिङन्तविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न-धातुभिः कस्य विधानं भवति?
उत्तरम्- तिङ्-पदस्य।
2. प्रश्न-वर्तमानकाले (Present tense) कति लकाराःभवन्ति?
उत्तरम्- (3त्रयः) 1. लट्, 2. लोट्, 3. लिङ्,।
3. प्रश्न- भविष्यतकाले (Future tense) कति लकाराः भवन्ति?
उत्तरम्- (2द्वौ) 1. लृट्, 2. लुट्।
4. प्रश्न-भूतकाले (Past tense) कति लकाराःभवन्ति?
उत्तरम्- 4 चत्वारः, 1. लङ्, 2. लिट्, 3. लृङ्, 4. लुङ्।
5. प्रश्न-धातूनां कौ द्वौ भेदौ?
उत्तरम्- 1. परस्मैपदी, 2. आत्मनेपदी।
6. प्रश्न- कस्य लकारस्य प्रयोगः वेदे भवति?
उत्तरम्- लेट् लकारस्य।
7. प्रश्न-लिङ् लकारस्य कति भेदाः?
उत्तरम्- 1. आशीर्लिङ्, 2. विधिलिङ्।
8. प्रश्न-धातूनां कति गणाः सन्ति, के च ते?
उत्तरम्- दश, 1. भ्वादि, 2. अदादि, 3. जुहोत्यादि, 4. दिवादि, 5, स्वादि, 6. तुदादि, 7. रुधादि, 8. तनादि, 9. क्रयादि, 10. चुरादि।
9. प्रश्न-कति लकाराः के च ते?
उत्तरम्- (10 दश) 1, लट्, 2, लिट्, 3. लुट्, 4. लृट्, 5. लेट्, 6 लोट्, 7. लङ्, 8. लिङ्, 9. लुङ्, 10. लृङ्।
10. प्रश्न-कस्मिन् गणे सर्वाधिकं धातु संख्या भवन्ति?
उत्तरम्- भ्वादिगणे 1035 धातवः सन्ति।
11. प्रश्न-अल्पतरा धातवः कस्मिन् गणे सन्ति?
उत्तरम्- तनादिगणे, 10 दश।
12. प्रश्न- धातुपाठे कुलकति धातवः परिगणिताः सन्ति?
उत्तरम्- (1940)

13. प्रश्न-"भू-सत्तायाम्" इति धातोः लुङि मध्यमपुरुषैकवचने किं रूपम्?
उत्तरम्- अभूः।
14. प्रश्न-व्रज-गतौ इति धातोः आत्मनेपदि लुटि प्रथम पुरुषैकवचने किं रूपम्?
उत्तरम्- व्रजिष्यते।
15. प्रश्न-"जनी प्रदुर्भावे" इति धातोः लिङि प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्- जायेत।
16. प्रश्न-दृशिर्-प्रेक्षणे धातोः लिटि कर्तरि प्रथमपुरुषरूपाणि दर्शय?
उत्तरम्- ददर्श-ददृशतुः-ददृशुः।
17. प्रश्न-"मन-ज्ञाने" इति धातोः लिङिप्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्- अमनत।
18. प्रश्न-ब्रूञ् व्यक्तायां वाचि" धातोः लिटि प्र. पु. रूपाणि कानि?
उत्तरम्- उवाच-ऊचतुः-ऊचुः।
19. प्रश्न-वृतु-वर्तते इति धातोः लटि उत्तमपुरुषरूपाणि दर्शयत?
उत्तरम्- वर्ते-वर्तावहे-वर्तामहे।
20. प्रश्न-गम्लृ-गतौ धातोः विधिलिङि मध्यमपुरुषरूपाणि दर्शय?
उत्तरम्- गच्छेः-गच्छेतं-गच्छेत।
21. प्रश्न-"गद-व्यक्तायां वाचि" धातोः लङि प्रथमपुरुषरूपाणि कानि?
उत्तरम्- अगदत्-अगदतां-अगदन्।
22. प्रश्न-"लोक-दर्शने" धातोः लोटि प्रथमपुरुषरूपाणि कानि?
उत्तरम्- लोकतां-लोकेताम्-लोकन्ताम्।
23. प्रश्न-"लिख-अक्षरविन्यासे" धातोः आशीर्लिङि प्र. पु. एकवचने किं रूपम्?
उत्तरम्- लिख्यात्।
24. प्रश्न-"डुदाञ्-दाने धातोः लटि उत्तमपुरुषे परस्मैपदि द्विवचने किं रूपम्?
उत्तरम्- दद्वहे।
25. प्रश्न-वद-व्यक्तायां वाचि इति धातोः लिटि प्र. पु. रूपाणि कानि?
उत्तरम्- उवाद-ऊदतुः-ऊदुः।
26. प्रश्न-दाञ्-दाने" धातोः लटि प्रथमपुरुष रूपाणि कानि?
उत्तरम्- यच्छति-यच्छतः-यच्छन्ति।
27. प्रश्न-दा-मा-स्था-पा-एषां कर्मणि लटि रूपाणि निर्दिशत्?
उत्तरम्- दीयते-भीयते-स्थीयते-पीयते।
28. प्रश्न-लभ्-रभ्-अधी एषां कर्तरि लटि रूपाणि दर्शय?
उत्तरम्- लभते-रभते-अधीते।
29. प्रश्न-"भी" धातोः लटि प्र. पु. एकवचनं रूपं किम्?
उत्तरम्- बिभेति।

30. प्रश्न-"भिद्" धातोः लटि प्र. पु. एकवचनं रूपं किम्?
उत्तरम्- भिनतिः।
31. प्रश्न-"स्मि" धातोः लटि प्र. पु. वहुवचने किं रूपम्?
उत्तरम्- स्मयन्ते।
32. प्रश्न-नश्-रूध्-इष्-शक्-एषां लिटि प्रथमैकवचनरूपाणि लिखत?
उत्तरम्- ननाश-रुरोध-इयेष-शशाक।
33. प्रश्न-हृ हरणे इति धातोः लट्लकारे प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्- हरति।
34. प्रश्न-वेत्ति-विन्दति-विद्यते-एषां मूलधातवः के?
उत्तरम्- विद् ज्ञाने-विद् प्राप्तौ-विद् सत्तायाम्।
35. प्रश्न-"निपीय" इत्यस्य मूलधातोः नाम किम्?
उत्तरम्- पा-पाने।
36. प्रश्न-"दृशिर्" प्रेक्षणे इति धातोः लृट् लकार प्र. पु. द्विवचनरूपं किम्?
उत्तरम्- द्रक्ष्यतः।
37. प्रश्न-"भू" धातोः लट्लकारे प्रथमपुरुषैकवचने किं रूपम्?
उत्तरम्- भवति।
38. प्रश्न-"अद्" धातोः लोट् लकारस्य उत्तमैकवचने किं रूपम्?
उत्तरम्- अदानि।
39. प्रश्न-"जुहोमि" हु धातोः कस्य लकारस्य क्ष्पमस्ति इति निर्धारणं करोतु?
उत्तरम्- लट्।
40. प्रश्न-"दिव्" धातोः लङ्लकारस्य रूपं किम्?
उत्तरम्- अदीव्यत्।
41. प्रश्न-"तुद्" धातोः आत्मनेपदस्य लट्लकारस्य प्रथमपुरुषैकवचनस्य रूपं किम्?
उत्तरम्- तुदते।
42. प्रश्न-रुध् धातोः लोट् लकारस्य मध्यमपुरुषस्य बहुवचनस्य रूपं किम्?
उत्तरम्- रुद्ध।
43. प्रश्न-"तन्" धातोः विधिलिङ् लकारस्य म. पु. एकवचने किं रूपम्?
उत्तरम्- तनुथा।
44. प्रश्न-चर् धातोः उत्तमपुरुषस्य लट् लकारस्य रूपं किम्?
उत्तरम्- चोरयामि-चोरयावः-चोरयामः।
45. प्रश्न-"बभुव" इत्यत्र को धातुः?
उत्तरम्- भू।
46. प्रश्न-"जघास" इत्यत्र को धातुः?
उत्तरम्- अद्।

47. प्रश्न-"तोत्स्यति" इत्यत्र लकारः कः?
उत्तरम्- लृट्।
48. प्रश्न-धातुरूपेषु कति लकाराः भवन्ति?
उत्तरम्- 10 दश।
49. प्रश्न-धातुरूपव्यवस्थयां कति पुरुषाः संयोजिताः सन्ति?
उत्तरम्- 3 त्रयःपुरुषा।
50. प्रश्न-"नम्" धातोः लृट्लकारे म. पु. द्वि. वचने किं रूपम्?
उत्तरम्- नस्यथः।
51. प्रश्न-"या" धातोः लोटि मध्यमपुरुषैकवचने किं रूपम्?
उत्तरम्- याहि।
52. प्रश्न-स्थाधातोः विधिलिङ्लकारे उ. पु. एकवचने किं रूपम्?
उत्तरम्- तिष्ठेयम्।
53. प्रश्न-नमयति-नाशयति-पाठयति-एतेषु कः प्रत्ययः?
उत्तरम्- णिच्प्रत्ययः।
54. प्रश्न-ब्रूञ् णिच्-किं रूपं भवेत्?
उत्तरम्- वाचयति।
55. प्रश्न-रामः पठितुम् इच्छति-किं पदं साधु?
उत्तरम्- पिपठिषति।
56. प्रश्न-वक्तुम् इच्छिति इत्यत्र किं रूपं स्यात्?
उत्तरम्- विवक्षति।
57. प्रश्न-रामः सीताम् आप्तुम् इच्छति- सन्नन्तरूपं दर्शय?
उत्तरम्- ईप्सति।
58. प्रश्न-पिता पुत्र विषये ज्ञातुम् इच्छति-सन्नन्तरूपं किम्?
उत्तरम्- जिज्ञासते।
59. प्रश्न-सः पुस्तकं दातुम् इच्छति-सन्नन्तरूपं किम्?
उत्तरम्- दित्सति।
60. प्रश्न-हरिणी इव आचरति इति किम्?
उत्तरम्- हरिणायते।
61. प्रश्न-ज्ञा+सन्+तिप्=किं रूपम?
उत्तरम्- जिज्ञासते।
62. प्रश्न-"सेव्" धातोः लोटि प्रथमपुरुषद्विवचने किं रूपम्?
उत्तरम्- सेवेथाम्।
63. प्रश्न-"हृ" धातोः विधिलिङ्लकारे उत्तमपुरुषद्विवचने किं रूपम्?
उत्तरम्- हरेवहि।

64. प्रश्न-"इज्यात्" इत्यत्र को धातुः?
उत्तरम्- यज्य।
65. प्रश्न-"अचूचुरत्" इत्यत्र कः लकारः?
उत्तरम्- लुङ्।
66. प्रश्न-परस्मैपदसंज्ञकाः के प्रत्ययाः?
उत्तरम्-(11) एकादशप्रत्ययाः, 1. तिप्, 2. तस्, 3. झि, 4. सिप्, 5. थस्, 6. थ, 7. मिप्, 8. वस्, 9. मस्, 10. शतृ, क्वसुश्चेति।
67. प्रश्न-आत्मनेपदसंज्ञकाः प्रत्ययाः के सन्ति?
उत्तरम्-(11) एकादशप्रत्ययाः, 1. त, 2. आताम्, 3. झ, 4. थास्, 5. आथाम्, 6. ध्वम्, 7. इट्, 8. वहि, 9. महिङ्, 10. शानच्, 11. कानच्।
68. प्रश्न-चर-गति भक्षणयोः इति धातोः लुटि प्रथमपुरुषबहुवचने किं रूपम्?
उत्तरम्- चरितारः।

(प) कारकस्य(विभक्तेः) विषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न-कारकत्वं किम्?
उत्तरम्- क्रियाजनकत्वं कारकत्वम्।
2. प्रश्न-कति कारकाणि सन्ति?
उत्तरम्- षड् (6)
3. प्रश्न-प्रातिपदिकार्थमात्रे किं भवति?
उत्तरम्- प्रथमाविभक्तिः।
4. प्रश्न-प्रथमाविभक्तेः "कारकं किम्" ?
उत्तरम्- कर्ताकारक।
5. प्रश्न-द्वितीयाविभक्तेः "कारकं किम्" ?
उत्तरम्- कर्मकारक।
6. प्रश्न-तृतीयाविभक्तेः "कारकं किम्" ?
उत्तरम्-करणकारक।
7. प्रश्न- चतुर्थीविभक्तेः "कारकं किम्?
उत्तरम्-सम्प्रदानम्।
8. प्रश्न-पञ्चमीविभक्तेः "कारकं किम्" ?
उत्तरम्- अपादानकारक।
9. प्रश्न-षष्ठीविभक्तिेः "कारकं किम्" ?
उत्तरम्- कारकाभावः, सम्बन्धः।
10. प्रश्न-सप्तमीविभक्तिेः"कारकं किम्"-?
उत्तरम्- अधिकरणकारक।
11. प्रश्न-"रामं विना, रामेण विना, रामाद्विनां" इति कः प्रयोगः शुद्धः?
उत्तरम्- सर्वे प्रयोगाः शुद्धाः:।

12. प्रश्न-परिमाणमात्रस्य उदाहरणम् अस्ति?
उत्तरम्- द्रोणो व्रीहिः।
13. प्रश्न-"सम्बोधने च" अनेन किं भवति?
उत्तरम्- प्रथमा।
14. प्रश्न-उक्तकर्मणि का विभक्तिः?
उत्तरम्- प्रथमा।
15. प्रश्न- कर्तुरीप्सिततमं कारकं किं भवति?
उत्तरम्- कर्मसंज्ञम्।
16. प्रश्न-अनुक्ते कर्मणि का विभक्तिः?
उत्तरम्- द्वितीया।
17. प्रश्न-"अकथितञ्च" सूत्रमिदं किं करोति?
उत्तरम्- कर्मसंज्ञा।
18. प्रश्न-"गां दोग्धि पयः" अत्र अकथितं किमस्ति?
उत्तरम्- गाम्।
19. प्रश्न-बलिं याचते वसुधाम्" अत्र बलि पदस्य कर्मसंज्ञा केन सूत्रेण भवति?
उत्तरम्- अकथितञ्च।
20. प्रश्न-"अधिशीङ्स्थाऽऽसां कर्म" सूत्रस्योदाहरणं किमस्ति?
उत्तरम्- हरिः वैकुण्ठम् अधिशेते।
21. प्रश्न-"उपवसति वैकुण्ठं हरिः" अत्र केन सूत्रेण कर्मसंज्ञा?
उत्तरम्- उपान्वध्याङ्वसः।
22. प्रश्न-कस्य योगे द्वितीया न भवति?
उत्तरम्- नमः।
23. प्रश्न-"रमा मातरम् अभिद्रुह्यति स्म" अत्र का विभक्तिः?
उत्तरम्- द्वितीया।
24. प्रश्न-लक्षणे द्योत्ये "अनु" इत्यस्य का संज्ञा भवति?
उत्तरम्- उपसर्गसंज्ञा।
25. प्रश्न-कर्म प्रवचनीयाः" इति किं प्रोक्तवन्त?
उत्तरम्- कर्म।
26. प्रश्न- अनु हरिं सुराः अत्र "अनु" इति किम्?
उत्तरम्- कर्मप्रवचनीयः।
27. प्रश्न-"वृक्षं प्रति विद्योतते विद्युत्" अत्र कः कर्मप्रवचनीयः?
उत्तरम्- प्रति।
28. प्रश्न-"सहयुक्तेऽप्रधाने" अनेन किम् विधीयते?
उत्तरम्- तृतीयाविभक्तिः।

29. प्रश्न-जटाभिस्तापसः अत्र केन सूत्रेण तृतीया?
उत्तरम्- इत्थंभूतलक्षणे।
30. प्रश्न-"हेतौ" अनेन सूत्रेण भवति?
उत्तरम्- तृतीया।
31. प्रश्न- "विप्राय गां ददाति" अत्र विप्राय पदस्य का संज्ञा?
उत्तरम्- सम्प्रदानसंज्ञा।
32. प्रश्न-"हरये रोचते भक्तिः" अत्र प्रीयमाणः कः?
उत्तरम्- हरिः।
33. प्रश्न-"रामः सीतालक्ष्मणाभ्यां सह वनतगच्छत्" वाक्येऽस्मिन् "सीतालक्ष्मणाभ्यां सह" इत्यस्य कारकं किम् ?
उत्तरम्- करण कारकम्।
34. प्रश्न-अपादाने का विभक्तिः भवति?
उत्तरम्- पञ्चमीविभक्तिः।
35. प्रश्न-"भीत्रार्थानां भयहेतुः" अनेन सूत्रेण किम् भवति?
उत्तरम्- अपादानसंज्ञा।
36. "प्रश्न-हेतु" शब्दस्य प्रयोगे का विभक्तिः?
उत्तरम्- षष्ठीविभक्तिः।
37. प्रश्न-कृद्योगे कर्तरि कर्मणि च प्रयोगे का विभक्तिः?
उत्तरम्- षष्ठीविभक्तिः।
38. प्रश्न-"क्तस्य च वर्तमाने" अनेन सूत्रेण किं भवति?
उत्तरम्- षष्ठीविभक्तिः।
39. प्रश्न-आधारः कति विधः?
उत्तरम्- त्रिविधः।
40. प्रश्न-"आधारोऽधिकरणम्" अनेन सूत्रेण किं विधीयते?
उत्तरम्- अधिकारसंज्ञा।
41. प्रश्न-"कटे आस्ते" अत्र कः आधारः?
उत्तरम्- औपश्लेषिकः।
42. प्रश्न-"गोषु दुह्यमानासु गतः" अत्र का विभक्तिः वर्तते?
उत्तरम्- सति सप्तमी।
43. प्रश्न-प्रशंसार्थकयोः साधुनिपुणयोः योगे किं भवति?
उत्तरम्- सप्तमी।
44. प्रश्न-"अधिरीश्वरे" अनेन सूत्रेण किं भवति?
उत्तरम्- कर्मप्रवचनीयसंज्ञा।
45. प्रश्न-अधि भुवि रामः अत्र "अधि" कः वर्तते?
उत्तरम्- कर्मप्रवचनीयः।

46. प्रश्न-"आशिषि नाथः" इति सूत्रेण का विभक्तिः भवति?
उत्तरम्- षष्ठी।
47. प्रश्न-"साध्वसाधुप्रयोगे" इत्यनेन का विभक्तिः उक्ता?
उत्तरम्- सप्तमी।
48. प्रश्न-"आख्यानोपयोगे" इति सूत्रेण किं भवति?
उत्तरम्- अपादानसंज्ञा।
49. प्रश्न-कर्तृवाच्यस्य कर्ताकारके का विभक्तिः?
उत्तरम्- प्रथमाविभक्तिः।
50. प्रश्न-कर्मवाच्यस्य कर्ताकारके का विभक्तिः?
उत्तरम्- तृतीयाविभक्तिः।
51. प्रश्न- कर्तृवाच्यस्य कर्मकारके का विभक्तिः?
उत्तरम्- द्वितीयाविभक्तिः।
52. प्रश्न- कर्मवाच्यस्य कर्मकारके का विभक्तिः?
उत्तरम्- प्रथमाविभक्तिः।
53. प्रश्न-भाववाच्यस्य कर्ताकारके का विभक्तिः?
उत्तरम्- तृतीयाविभक्तिः।
54. प्रश्न-अन्तराऽन्तरेण युक्ते" इत्यनेन का विभक्तिः?
उत्तरम्- द्वितीयाविभक्तिः।
55. प्रश्न-"क्रुधद्रुहेर्ष्यार्थानां यं प्रति कोपः" तत्र का विभक्तिः?
उत्तरम्- द्वितीया।
56. प्रश्न-तथायुक्तं चानीप्सितम् इति सूत्रस्योदाहरणं किम्?
उत्तरम्- ग्रामं गच्छन् तृणं स्पृशति।
57. प्रश्न-"पुष्पेभ्यःस्पृहयति" अत्र केन सूत्रेण चतुर्थीविभक्तिः?
उत्तरम्- स्पृहेरीप्सितः।
58. प्रश्न-क्रियया यमभिप्रेति तत् किम्?
उत्तरम्- सम्प्रदानम्।
59. प्रश्न-कर्मादीनामपि सम्बन्धमात्रविवक्षायां का विभक्तिः?
उत्तरम्- षष्ठी।
60. प्रश्न-उपपदविभक्तेः का विभक्तिः बलीयसी?
उत्तरम्- कारकविभक्तिः।
61. प्रश्न-विभक्तयोः द्वे प्रकारे के स्तः?
उत्तरम्- 1. कारकविभक्तिः, 2. उपपदविभक्तिः।
62. प्रश्न-कारकविभक्तिः कं कथ्यते?
उत्तरम्- क्रिया सह संज्ञा-सर्वनामयोः प्रत्यक्षसम्बन्ध-स्थापनमेव।

63. प्रश्न-अव्यय शब्दस्य योगेन का विभक्तिः भवति?
उत्तरम्- उपपदविभक्तिः।
64. प्रश्न-कति कारकाणि कानि च तानि?
उत्तरम्-(6 षट्) कर्ता कर्म च करणं च सम्प्रदानं तथैव च, अपादनाधिकरणं च इत्याहुः कारकानि षट्।
65. प्रश्न-"नाना" इति शब्दस्य योगे का विभक्तिः भवति?
उत्तरम्- तृतीया।
66. प्रश्न-जुगुप्साविरामदीनामर्थे विभक्तिः भवति?
उत्तरम्- पञ्चमी।
67. प्रश्न-क्रोधद्रोहासूयादीनामर्थयूक्तानां धातूनां योगे विभक्तिः स्यात्?
उत्तरम्- चतुर्थी।
68. प्रश्न-"मुच्" धातुयोगे का विभक्तिः भवति?
उत्तरम्- पञ्चमी।
69. प्रश्न-"उपरि" शब्दस्य योगे का विभक्तिः?
उत्तरम्- द्वितीया।
70. प्रश्न-उदिते (सूर्य) कमलं विकसति सूर्यपदे का विभक्ति भवेत्?
उत्तरम्- सप्तमी।
71. प्रश्न-"अन्तरा" शब्दस्य योगे का विभक्तिः?
उत्तरम्- द्वितीया।
72. प्रश्न-"पयामुचे" इत्यत्र का विभक्तिः अस्ति?
उत्तरम्- चतुर्थी।
73. प्रश्न-"बहूनि काव्यानि पठितानि हरिणा" अत्र कर्तृपदे का विभक्तिरस्ति?
उत्तरम्- तृतीया।
74. प्रश्न-"नमो भगवते वासुदेवाय" इत्यत्र किमर्थं चतुर्थी विभक्तिः?
उत्तरम्- नमस्शब्दयोगेन।
75. प्रश्न-द्वितीया विभक्तिः किं द्योतयति?
उत्तरम्- कर्मम्।
76. प्रश्न-ग्रामं गच्छन् तृणं स्पृशति" इति वाक्ये तृणशब्दे का विभक्तिःवर्तते?
उत्तरम्- द्वितीया।
77. प्रश्न-"दरिद्रः उपवसति" इति वाक्ये किं पदं प्रयोक्तुं शक्यते?
उत्तरम्- गृहे।
78. प्रश्न-"प्रति" प्रवचनीययोगे का विभक्तिः?
उत्तरम्- द्वितीया।
79. प्रश्न-"पादेन खञ्जः" इति वाक्ये तृतीयाविभक्तेः कारणं किम्?
उत्तरम्- अङ्गविकारः।

80. प्रश्न-"विना" इति अव्ययस्य योगे काः विभक्त्यः भवन्ति?
उत्तरम्- द्वितीया, तृतीया, पञ्चमी च।
81. प्रश्न- सम्प्रदाने का विभक्तिः?
उत्तरम्- चतुर्थी।
82. प्रश्न-"यूपाय दारू" इत्यत्र चतुर्थ्याः कारणं किम्?
उत्तरम्- तादर्थ्यम्।
83. प्रश्न-द्रुहधातुयोगे यं प्रति द्रोहः तस्मिन् विभक्तिर्भवति?
उत्तरम्- चतुर्थी।
84. प्रश्न-"वषट्" इति शब्दप्रयोगे का विभक्तिः भवति?
उत्तरम्- चतुर्थी।।
85. प्रश्न-"पर्याप्तार्थक" अलं शब्दस्य योगे का विभक्तिर्भवति?
उत्तरम्- चतुर्थी।
86. प्रश्न-गङ्गा कुत्र निस्सरति?
उत्तरम्- हिमालयात्।
87. प्रश्न-"याने चलति तेन प्रस्थितम्" इत्यत्र चलति इति?
उत्तरम्- सप्तमीविभक्त्यन्तम्।
88. प्रश्न-कर्ता कर्मवाच्ये कस्यां विभक्तौ भवति?
उत्तरम्- तृतीया।
89. प्रश्न-कर्मपदं कर्मवाच्ये कस्यां विभक्तौ भवति?
उत्तरम्- प्रथमा।
90. प्रश्न-प्रमादार्थक धातोः योगे का विभक्ति भवति?
उत्तरम्- पञ्चमी।
91. प्रश्न-"कर्ता" इत्यस्य कियन्तो भेदाः, के च ते?
उत्तरम्-(5) पञ्च, 1. स्वतन्त्रकर्ता, 2. हेतुकर्ता, 3. कर्म-कर्ता, 4. अभिहितकर्ता, 5. अनभिहितकर्ता।
92. प्रश्न-कर्म कतिविधम्, किञ्च तत्?
उत्तरम्-(7) सतविधम्, 1. ईप्सितं कर्म, 2. अनीप्सितं कर्म, 3. ईप्सितऽनीप्सितं कर्म, 4. अकथितं कर्म, 5. अनभिहितं कर्म, 6. कर्तृकर्म, 7. अभिहितं कर्म।
93. प्रश्न-करणं कतिविधम्, तच्च किम्?
उत्तरम्- (2) द्विविधम्, 1. बाह्यम्, 2. आभ्यन्तरञ्चेति।
94. प्रश्न-सम्प्रदानं कतिविधम्, किञ्च तत्?
उत्तरम्- (3) त्रिविधम्, 1. प्रेरकम्, 2. आनुमन्त्रिकम्, 3. अनिराकर्तृकञ्चेति।
95. प्रश्न-अपादानं कतिविधम्, तच्च किम्?
उत्तरम्- (2) द्विविधम्, 1. चलम्, 2. अचलञ्चेति।

96. प्रश्न-अधिकरणं कतिविधम्, किञ्च तत्?
उत्तरम्-(4) चतुर्विधम्, 1. अभिव्यापकम्, 2. औपश्लेषिकम्, 3. वैषयिकम्, 4 सामीप्यकञ्चेति।
97. प्रश्न- "अभितः" /"सर्वतः" इत्यस्य योगे का विभक्तिः भवति?
उत्तरम्-द्वितीया-विभक्तिः।
98. प्रश्न-क्रिया-सिद्धेः प्रकृष्ट-उपकारकः कः कारकः?
उत्तरम्- करण-कारक।
99. प्रश्न-"इत्थंभूतलक्षण" इत्यनेन सम्बद्धा का विभक्तिः?
उत्तरम्- तृतीया-विभक्तिः।
100. प्रश्न-"कर्ता" इत्यस्य इष्टतं कारकः कः भवति?
उत्तरम्- कर्म-कारकः।
101. प्रश्न-"बहिः" इत्यस्य योगे का विभक्तिः प्रयुज्यते?
उत्तरम्- पञ्चमी।

(फ) प्रत्ययविषयकानि वस्तुनिष्ठप्रश्नोत्तराणि-

(क) कृदन्ताः (ख) तद्धितान्ताः (ग) स्त्रीप्रत्ययान्ताश्च-

1. प्रश्न-"ण्यन्तः" इत्यस्य कः अर्थः?
उत्तरम्-णि (णिच्) अन्ते यस्य सः ण्यन्तः।
2. प्रश्न-"सन्नतः" इत्यस्य कः अर्थः?
उत्तरम्-सन् प्रत्ययः अन्ते यस्य सः सन्नतः।
3. प्रश्न-आत्तुम् इच्छतीति अत्र किं रूपम्?
उत्तरम्-जिघत्सति।
4. प्रश्न-अस+सन्=किं रूपम्?
उत्तरम्- बुभूषति।
5. प्रश्न-आप्तुम् इच्छतीति अत्र किं रूपम्?
उत्तरम्- ईप्सेत।
6. प्रश्न-कृत्य प्रत्ययाः के सन्ति?
उत्तरम्- तव्य, तव्यत्, अनीयर्, यत्, क्यप्, य, केलिमर्।
7. प्रश्न-सत् इति कं कथ्यते?
उत्तरम्- शतृ एवं शानचौ तौ सत्।
8. प्रश्न-कृत्यप्रत्ययः कस्मिन् भवति?
उत्तरम्- भावकर्मे।
9. प्रश्न-रूपवान् अत्र मतुप् प्रत्यय केन सूत्रेण भवति?
उत्तरम्-रसादिभ्यश्च।
10. प्रश्न-"गंगागतः" अस्मिन् वाक्ये क्त प्रत्ययः कुत्र अस्ति?
उत्तरम्- गतः पदे।

11. प्रश्न-"वत्सस्य गोत्रपत्यं पुमान्" इति?
उत्तरम्- वात्सः।
12. प्रश्न-षण्णां मातृणाम् अपत्यं पुमान् इति?
उत्तरम्- षाण्मातुरः।
13. प्रश्न-पाण्डोः अपत्यं पुमान् इति ?
उत्तरम्- पाण्डवः।
14. प्रश्न-व्याकरणम् अधीते वेत्ति वा इति?
उत्तरम्-वैयाकरणः।
15. प्रश्न-राष्ट्रे भवः इति?
उत्तरम्- राष्ट्रियः।
16. प्रश्न-"शाब्दिकः अत्र कः प्रत्ययः?
उत्तरम्- ठक् प्रत्ययः।
17. प्रश्न-"वासुदेवः" इत्यस्मिन् शब्दे कः प्रत्ययः?
उत्तरम्- अण्।
18. प्रश्न-विनता शब्दात् ढक् प्रत्यये किं रूपं भविष्यति?
उत्तरम्- वैनतेयः।
19. प्रश्न-सभापति शब्दात् अण् प्रत्यये किं रूपं भवति?
उत्तरम्- साभापतः।
20. प्रश्न-"धनशब्दात्" ठन् प्रत्यये किं रूपमस्ति?
उत्तरम्- धनिकः।
21. प्रश्न-चित्रयायुक्तः मासः किं भवति?
उत्तरम्- चैत्रः।
22. प्रश्न-पिपासाशब्दात् इतच् प्रत्यये रूपं किं भवति?
उत्तरम्- पिपासितः।
23. प्रश्न-गुरुता-महत्ता-लघुता-ब्राह्मणता इत्यादि शब्देषु कः प्रत्ययोऽस्ति?
उत्तरम्- तल्।
24. प्रश्न-पण्डितशब्दात् इमनिच् प्रत्यये किं रूपं भवति?
उत्तरम्- पण्डितमन्।
25. प्रश्न-"नैपुण्यम्" इत्यत्र कः प्रत्ययोऽस्ति?
उत्तरम्- ष्यञ्।
26. प्रश्न-"सख्यम्" इति सखिशब्दात् कः प्रत्ययोऽस्ति?
उत्तरम्- य प्रत्ययः।
27. प्रश्न-"काकेन तुल्यम्" इत्यस्य तद्धितप्रत्ययान्तं किं रूपम्?
उत्तरम्-काक्तुल्यम्।

28. प्रश्न-दैवम्-औपगवं-नैशं-ग्रैष्यम् इत्यादि शब्देषु तद्धितप्रत्ययः कः?
उत्तरम्- अण्।
29. प्रश्न-राज्ञोऽपत्यं पुमान्" इति किं भवति?
उत्तरम्- राजन्यः।
30. प्रश्न-कुलस्यापत्यं पुमान् इति किं भवति?
उत्तरम्- कुलीनः।
31. प्रश्न-युवतीनां समूहः इति?
उत्तरम्- यौवतम्।
32. प्रश्न-लक्ष्मीः अस्य/अस्मिन् वा अस्तीति?
उत्तरम्- लक्ष्मीवान्।
33. प्रश्न-वृत्तिः-वृद्धिः-वृष्टिः इत्येतेषु कः प्रत्ययः?
उत्तरम्- क्तिन् प्रत्ययः।
34. प्रश्न-गरीयान्-गरीष्ठः-अनयोः कौ प्रत्ययौ?
उत्तरम्- ईयसुन् इष्ठन्।
35. प्रश्न-"अर्च+क्तवतु"=रूपं कथं स्यात्?
उत्तरम्- अर्चितवान्।
36. प्रश्न-"कृ+तृच्"=किं रूपं स्यात्?
उत्तरम्- कर्ता।
37. प्रश्न-"जन+यत् किं रूपम्?
उत्तरम्- जन्यम्।
38. प्रश्न-"स्वप्+क्त" किं रूपम्?
उत्तरम्- सुप्तः।
39. प्रश्न-"मृ+शानच्" किं रूपम्?
उत्तरम्- म्रियमाणः।
40. प्रश्न-"प्र+वस् ल्यप् किं रूपम्?
उत्तरम्- प्रोष्य।
41. प्रश्न-अधि+स्था+तृच्-मेलयतु?
उत्तरम्- अधिष्ठाता।
42. प्रश्न-"प्रति+भा+ल्युट्-एतेषां मेलने रूपं कथं भवति?
उत्तरम्- प्रतिभानम्।
43. प्रश्न-घ्रा+शतृ-दा+शतृ इति के रूपे?
उत्तरम्- जिघ्रन्, ददत्।
44. प्रश्न-अभि+षिच्+तुमुन् किं रूपं भवति?
उत्तरम्- अभिषेक्तुम्।

45. प्रश्न-समुन्नतिम्-प्रकृतपत्ययविवेचनं कथम्?
उत्तरम्- सम्+उत्+नम्+क्तिन्।
46. प्रश्न-निधानम् इत्यत्र प्रकृतिःका प्रत्ययश्च कः?
उत्तरम्- नि+धा+ल्युट्।
47. प्रश्न-सभारुढः अत्र प्रकृतिः का?प्रत्ययः कः?
उत्तरम्- सम्+आ+रुह+क्त।
48. प्रश्न-सन्दीपनम् इत्यत्र कः प्रत्ययः?
उत्तरम्- ल्युट्।
49. प्रश्न-परीक्षितुम् अत्र कः प्रत्ययः?
उत्तरम्- तुमुन्।
50. प्रश्न-प्र+विशृण्वुल्=किं रूपं स्यात्?
उत्तरम्- प्रवेशकः।
51. प्रश्न-लिख्+तृच् इति किं रूपम्?
उत्तरम्- लेखिता।
52. प्रश्न-"जलमयः" चिन्मयः, एषां कः प्रत्ययः?
उत्तरम्- मयट् प्रत्ययः।
53. प्रश्न-गृह्णाति इत्यस्य कत्वान्तं रूपं किम्?
उत्तरम्- गृहीत्वा।
54. प्रश्न-जानाति अस्य तुमुन्नन्तं रूपं किम्?
उत्तरम्- ज्ञातुम्।
55. प्रश्न-हर्ता-भर्ता-नेता एषां तुमुन्नन्तं निर्दिशत?
उत्तरम्- हर्तुं-भर्तुं-नेतुं।
56. प्रश्न-लिप्+अनीयर=?
उत्तरम्- लेपनीयम्।
57. प्रश्न-नभस्तः, नदीतः, गतः, कृतः एतेषां प्रत्ययः कः?
उत्तरम्- तसिल् प्रतययः।
58. प्रश्न-मुच्+क्त्वा ?
उत्तरम्- मुक्त्वा।
59. प्रश्न-अध्यापकः, चिन्तकः, निवेदकः-एषां कः प्रत्ययः?
उत्तरम्- घञ् प्रत्ययः।
60. प्रश्न-प्र+ईर्+ण्वुल् ?
उत्तरम्- प्रेरकः।
61. प्रश्न-कृत+क्तिन् ?
उत्तरम्- कृतिः।

62. प्रश्न-बालिका: पुस्तकानि(धा-) विद्यालयं गच्छति?
उत्तरम्- धारयन्त्य:।
63. प्रश्न-स्तुधातो: यत् प्रत्ययान्तं रूपं किं भवति?
उत्तरम्- स्तुत्य:।
64. प्रश्न-केलिमर् प्रत्यय: क: प्रत्यय:?
उत्तरम्- कृदन्तप्रत्यय:।
65. प्रश्न-ग्लानमिति शब्दे धातो: प्रत्ययोऽस्ति?
उत्तरम्- ल्युट्।
66. प्रश्न-"विधाय" -"विचिन्त्य" -विलप्य" इत्यादिषु शब्देषु धातुभ्य: क: प्रत्ययो भवति?
उत्तरम्- ल्यप्।
67. प्रश्न-श्रावं श्रावम्" इत्यत्र श्रु धातो: क:प्रत्ययो भवति?
उत्तरम्- ण्मुल।
68. प्रश्न-"कर्त्ता" इत्यत्र कृधातो: क: प्रत्ययो भवति?
उत्तरम्- तृच्।
69. प्रश्न-"गृहीत:" इत्यत्र क: प्रत्यय:?
उत्तरम्- कृदन्त:।
70. प्रश्न-"अग्रेसर:" इत्यत्र क: प्रत्ययोऽस्ति?
उत्तरम्- ट: प्रत्यय:।
71. प्रश्न-"प्रियंवद:" इत्यत्र कृदन्तप्रत्यय:क:?
उत्तरम्- खच् प्रत्यय:।
72. प्रश्न-"वेदवित्" इत्यत्र विद् धातो: कृदन्तप्रत्यय: क:?
उत्तरम्- क्विप्।
73. प्रश्न-"यशस्करी" इति शब्देऽस्मिन् कृदन्तप्रत्यय: क:?
उत्तरम्- इनि प्रत्यय:।
74. प्रश्न-"भिक्षु:" इत्यत्र कृदन्तप्रत्यय: क:?
उत्तरम्- उ प्रत्यय:।
75. प्रश्न-"साहित्यम्" इत्यत्र "सहित" -शब्दात् कस्मिन् प्रत्यये सिद्ध्यति?
उत्तरम्- ष्यञ्।
76. प्रश्न-दिवाकर:-विभाकर:-निशाकर:-लिपिकर: इत्येतेषु शब्देषु क: प्रत्ययो भवति?
उत्तरम्- अच् प्रत्यय:।
77. प्रश्न-शाकाहारी-अमिषभोजी-मिथ्यावादी-मित्रद्रोही इत्यादि शब्देषु क: प्रत्ययो भविष्यति?
उत्तरम्- णिनि: प्रत्यय:।
79. प्रश्न-ग्रामीण: शब्देऽस्मिन् ग्रामशब्दात् तद्धितप्रत्यय: कोऽस्ति?
उत्तरम्- खञ् प्रत्यय:।

80. प्रश्न-"नैमित्तिक" शब्दे केन प्रातिपदिकेन "ठक्" प्रत्ययः भवति?
उत्तरम्- निमित्तेन।
81. प्रश्न-प्रच्छ् धातोः तुमुन् प्रत्यये सति किं रूपम्?
उत्तरम्- प्रष्टुम्।
82. प्रश्न-"विहाय" पदेऽस्मिन् कः प्रत्ययोऽस्ति?
उत्तरम्- ल्यप् प्रत्ययः।
83. प्रश्न-श्रु+तव्यत्=किं रूपम्?
उत्तरम्- श्रोतव्यः।
84. प्रश्न-"राजकीय" शब्दे केन प्रातिपदिकेन "छ" प्रत्ययः भवति?
उत्तरम्- राजन्-शब्देन।
85. प्रश्न-लिख् धातोः तव्यत् प्रत्ययान्तः कः?
उत्तरम्- लेखितव्यम्।
86. प्रश्न-"स्तुत्यः" इत्यत्र कः प्रत्ययः?
उत्तरम्- क्यप् प्रत्ययः।
87. प्रश्न-शास् धातोः "क्यप्" प्रत्यये किं रूपं भवति?
उत्तरम्- शिष्यः।
88. प्रश्न-"लवणः" इत्यत्र कः प्रत्ययः?
उत्तरम्- ल्यु प्रत्ययः।
89. प्रश्न-मृतवती इत्यत्र कः प्रत्ययः?
उत्तरम्- मतुप् प्रत्ययः।
90. प्रश्न-प्रातिपदिकेन षष्ठी-सप्तमी-द्विवचने कः प्रत्ययः भवति?
उत्तरम्- ओस्।
91. प्रश्न-"भयम्" इत्यत्र कः प्रत्ययः?
उत्तरम्- अध् प्रत्ययः।
92. प्रश्न-"धारणा" इत्यत्र कः प्रत्ययः?
उत्तरम्- युच् प्रत्ययः।
93. प्रश्न-सु कृ+खल्=इति किं रूपम्?
उत्तरम्- सुकरः।
94. प्रश्न-दैत्यः" इत्यत्र कः प्रत्ययः?
उत्तरम्- ण्य प्रत्ययः।
95. प्रश्न-"पौत्रः" इत्यत्र कः प्रत्ययः?
उत्तरम्- अञ् प्रत्ययः।
96. प्रश्न-"दाक्षिः" इत्यत्र कः प्रत्ययः?
उत्तरम्- इञ् प्रत्ययः।

97. प्रश्न-"श्वशुर्यः" इत्यत्र कः प्रत्ययः?
उत्तरम्- यञ् प्रत्ययः।
98. प्रश्न-"वैनतेयः" इत्यत्र कः प्रत्ययः?
उत्तरम्- ढक् प्रत्ययः।
99. प्रश्न-"श्रीमत्" इत्यत्र कः प्रत्ययः?
उत्तरम्- मतुप् प्रत्ययः।
100. प्रश्न-गुण वतुप् इति किं रूपम्?
उत्तरम्- गुणवत्।
101. प्रश्न-"साध्वी" अत्र केन सूत्रेण "ङीष्" अभूत्?
उत्तरम्- वो तो गुणवचनात्।
102. प्रश्न-"वो तो गुणवचनात्" सूत्रे "वोतः" अत्र का विभक्तिः?
उत्तरम्- पञ्चमी-विभक्तिः।
103. प्रश्न-नारी इत्यत्र कः प्रत्ययः?
उत्तरम्- ङीप्।
104. प्रश्न-"युवतिः" इत्यत्र कः प्रत्ययः?
उत्तरम्- ङीन् प्रत्ययः।
105. प्रश्न-"एधनीयम्" अत्र कः प्रत्ययः?
उत्तरम्- अनीयर्।
106. प्रश्न-"गौरी" इत्यत्र कः स्त्रीप्रत्ययः?
उत्तरम्- ङीष्।
107. प्रश्न-"सूकरी" अत्र केन सूत्रेण "ङीष्" अभूत्?
उत्तरम्- जातेरस्त्रीविषयादयः।
108. प्रश्न-"कृतिः शब्दे प्रकृत-प्रत्ययः कौ?
उत्तरम्- कृ+क्तिन्=कृतिः।
109. प्रश्न- आदिष्टः अत्र कः प्रत्ययः?
उत्तरम्- क्तः प्रत्ययः।
110. प्रश्न-"शर्वरा" इति शब्दस्य कोऽर्थः?
उत्तरम्- सन्ध्या।
111. प्रश्न-"मघोनः" अस्य शब्दस्य कोऽर्थः?
उत्तरम्- इन्द्रः।
112. प्रश्न-"वो तो गुणवचनात्" सूत्रे "ङीष्" इत्यस्यानुवर्तनं केन सूत्रेण भवति?
उत्तरम्- अन्यतो ङीष्।
113. प्रश्न-"मातामहस्य+स्त्री=मातामही" अत्र कः स्त्रीप्रत्ययः?
उत्तरम्- ङीष्।

114. प्रश्न-"विद्वस्" इत्यस्य स्त्रीलिङ्ग वाचकं रूपं किम्?
उत्तरम्- विदुषी।
115. प्रश्न-"प्रविश्य" शब्दस्य प्रकृति-प्रत्यय: क:?
उत्तरम्- प्र विश्+ल्यप्।
116. प्रश्न-"विदस्यापत्यं स्त्री" -इत्यर्थे कस्य शब्दस्य निष्पत्ति: भवति?
उत्तरम्- वैदी।

स्त्रीप्रत्यया:-

117. प्रश्न-"अजा" इति पदे क: प्रत्यय:?
उत्तरम्- टाप्।
118. प्रश्न-"सूर्या" अत्र क: प्रत्यय:?
उत्तरम्- चाप्।
119. प्रश्न-"अजाद्यतष्टाप्-" इदं सूत्रं अष्टाध्यायी इत्यस्य कस्मिन् अध्याये विद्यते?
उत्तरम्- चतुर्थाध्याये।
120. प्रश्न-"अजाद्यतष्टाप्-" कीदृशमिदं सूत्रम्?
उत्तरम्- विधि-सूत्रम्।
121. प्रश्न-प्रथमवयोवाचक-अकारान्त-शब्देन स्त्रीत्वे क: प्रत्यय: भवति?
उत्तरम्- ङीप्-प्रत्यय:।
122. प्रश्न-"द्विगो:" सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्- ङीप्-प्रत्यय:।
123. प्रश्न-"अष्टाध्यायी" शब्दे केन सूत्रेण "ङीप्" भवति?
उत्तरम्- द्विगो: इति सूत्रेण।
124. प्रश्न-"भवती" इति पदे क: स्त्रीप्रत्यय:?
उत्तरम्- ङीप्।
125. प्रश्न-"उरुमात्री" इत्यत्र क: प्रत्यय:?
उत्तरम्- ङीप्।
126. प्रश्न-"कुमारी" इत्यत्र केन सूत्रेण ङीष् प्रत्यय: भवति?
उत्तरम्- वयसि प्रथमे।
127. प्रश्न-"युवन्" शब्दस्य स्त्रीप्रत्यय: "ति" रूपं किम्?
उत्तरम्- युवति:।
128. प्रश्न-युवति: अत्र केन सूत्रेण "ति" प्रत्ययो भवति?
उत्तरम्- "यूनस्ति:" इति सूत्रेण।
129. प्रश्न-"भगवती" शब्दस्य प्रकृति-प्रत्यय: क:?
उत्तरम्- भग+मतुप=ङीप्।
130. प्रश्न-"अनीता" शब्दस्य प्रकृति-प्रत्यय: क:?
उत्तरम्- आ+नय+टाप्।

131. प्रश्न-"प्रमत्तः" इत्यस्य शब्दार्थः कः?
उत्तरम्- सावधानः।
132. प्रश्न-"देवता" शब्दस्य किं लिङ्गम्?
उत्तरम्- स्त्रीलिङ्गम्।
133. प्रश्न-"उगितश्च" सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्- ङीप्।
134. प्रश्न-"कुरुचरी" अत्र केन सूत्रेण स्त्रीप्रत्ययः ङीप् भवति?
उत्तरम्- टिडढाणञ्द्वयसज्दध्नञ्मात्रच् तयप्ठक्ठञ्कञ्क्वरपः।
135. प्रश्न- "तयप्" प्रत्ययान्त-प्रातिपदिकेन स्त्रीत्वे कः प्रत्ययः भवति?
उत्तरम्- ङीप्-प्रत्ययः।
136. प्रश्न-"वोतो गुणवचनात्" सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्- ङीष्-प्रत्ययः।
137. प्रश्न-उकारान्त-गुणवाचक शब्देन स्त्रीत्वे कः प्रत्ययः आगच्छति?
उत्तरम्- ङीष्-प्रत्ययः।
138. प्रश्न-"पुंयोगादाख्यायाम्" सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्- ङीष्-प्रत्ययस्य।
139. प्रश्न-"गोपी" अत्र कः स्त्रीप्रत्ययः अस्ति?
उत्तरम्- ङीष्-प्रत्ययः।
140. प्रश्न-"इन्द्राणी" अत्र कस्यागमः भवति?
उत्तरम्- आनुक्।
141. प्रश्न-"हिमानी" इति शब्दस्य कोऽर्थः?
उत्तरम्- महद् हिमम्।
142. प्रश्न-"आचार्यानी" अत्र केन सूत्रेण स्त्रीप्रत्ययः भवति?
उत्तरम्-"इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवनमातुलाचार्याणामानुक्" इति सूत्रेण।
143. प्रश्न-"क्रीतात् करणपूर्वात्" इत्यनेन कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्- ङीष्-प्रत्ययः।
144. प्रश्न-"वस्त्रक्रीती" अत्र केन सूत्रेण ङीष् भवति?
उत्तरम्- "क्रीतात् करणपूर्वात्" सूत्रेण।
145. प्रश्न-"तटी" अत्र केन सूत्रेण स्त्रीप्रत्ययः ङीष् विधीयते?
उत्तरम्- जातिरस्त्रीविषयादयोपधात् इति सूत्रेण।
146. प्रश्न-"ऊङुतः" सूत्रेण कस्य प्रत्ययस्य विधानं भवति?
उत्तरम्- ऊङ्-प्रत्ययः।
147. प्रश्न-"कुरुः" अत्र कः स्त्रीप्रत्ययः अस्ति?
उत्तरम्- ऊङ्-प्रत्ययः।

148. प्रश्न-"पङ्गोश्च" सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानं भवति?
उत्तरम्- ऊङ्-प्रत्ययः।
149. प्रश्न-"पङ्गु" अत्र कः स्त्रीप्रत्ययः भवति?
उत्तरम्- ऊङ्-प्रत्ययः।
150. प्रश्न-"करभोरुः" अत्र केन सूत्रेण स्त्रीप्रत्ययः ऊङ् विधीयते?
उत्तरम्- "उरूत्तरपदादौपम्ये-"
151. प्रश्न-देवट+ङीप्=इति किं रूपम्?
उत्तरम्-देवी।
152. प्रश्न-सूर्य+ङीष्=इति किं रूपम्?
उत्तरम्- सूरी।
153. प्रश्न-"शुद्री" इत्यत्र कः स्त्री प्रत्ययः?
उत्तरम्- ङीष् प्रत्ययः।
154. प्रश्न-"कारु" इत्यत्र कः प्रत्ययः?
उत्तरम्- उण् प्रत्ययः।
155. प्रश्न-मूषिका इति शब्दे स्त्री प्रत्ययः कः?
उत्तरम्- टाप् प्रत्ययः।
156. प्रश्न-"युवन्+ति=युवतिः" अत्र नकारस्य लोपः केन सूत्रेण भवति?
उत्तरम्- "न लोपः प्रातिपदिकान्तस्य" इति सूत्रेण।
157. प्रश्न-"संहितशफलक्षणवामादेश्च" इदं सूत्रं अष्टाध्यायाः कस्मिन् अध्याये विद्यते?
उत्तरम्- चतुर्थोध्यायः।
158. प्रश्न-"स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानंभवति?
उत्तरम्- ङीष्।
159. प्रश्न-"अतिकेशी, चन्द्रमुखी" अत्र कः स्त्रीप्रत्ययः भवति?
उत्तरम्- ङीष्।
160. प्रश्न-"बह्वी" अत्र केन सूत्रेण कः स्त्रीप्रत्ययः भवति?
उत्तरम्- "बह्वादिभ्यश्च" सूत्रेण-ङीष् प्रत्ययो भवति।
161. प्रश्न-"शकटी, रात्री" अत्र कः स्त्रीप्रत्ययः?
उत्तरम्- ङीष्।
162. प्रश्न-"रात्री" "पद्धती" अत्र वैकल्पिक-स्त्रीत्वबोधकं रूपं किम्?
उत्तरम्- "रात्रिः, पद्धतिः" रूपम्।
163. प्रश्न-"शार्ङ्गरव" अत्र "शार्ङ्गरवाद्ययो ङीन्" इति सूत्रेण ङीन् स्त्रीप्रत्ययविहिते सति स्त्रीवाचकं रूपं किम्?
उत्तरम्- "शार्ङ्गरवी"

(ब) समासविषयकानिवस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- समासः कति विधः, के च ते?
   उत्तरम्- पञ्चधा, 1. केवलः, 2. अव्ययीभावः, 3. तत्पुरुषः, 4. बहुव्रीहिः, 5. द्वन्द्व।
2. प्रश्न-विशेषसंज्ञाविनिर्मुक्तो समासः कः?
   उत्तरम्- केवलसमासः।
3. प्रश्न-पूर्वपदार्थप्रधानः समासः कः?
   उत्तरम्- अव्ययीभावसमासः।
4. प्रश्न-उत्तरपदार्थप्रधानः समासः कः?
   उत्तरम्- तत्पुरुषसमासः।
5. प्रश्न-अन्यपदार्थप्रधानः समासः कः?
   उत्तरम्- बहुव्रीहिसमासः।
6. प्रश्न-उभयपदार्थप्रधानः समासः कः?
   उत्तरम्- द्वन्द्वसमासः।
7. प्रश्न-तत्पुरुषभेदः कः?
   उत्तरम्- कर्मधारयसमासः।
8. प्रश्न-कर्मधारयभेदः कः?
   उत्तरम्- द्विगुसमासः।
9. प्रश्न-व्यधिकरणतत्पुरुषसमासः कतिविधः?
   उत्तरम्- एकादशविधः।
10. प्रश्न-किं परार्थाभिधानम्?
    उत्तरम्- वृत्तिः।
11. प्रश्न-कति वृत्तयः?
    उत्तरम्- पञ्च।
12. प्रश्न-पूर्वं भूतो भूतपूर्वः(पूर्व अम् भूत सु) अत्र कः समासः?
    उत्तरम्- केवलसमासः।
13. प्रश्न-"अधिहरि" "आयतीगवम्" अत्र कः समासः?
    उत्तरम्- अव्ययीभावसमासः।
14. प्रश्न-वृत्यर्थावबोधकं वाक्यं भवति-?
    उत्तरम्- विग्रहः।
15. प्रश्न-कृष्णस्य समीपम् उपकृष्णम् अत्र कः समासः?
    उत्तरम्- अव्ययीभावः।
16. प्रश्न-"यथा" इत्यस्य कति अर्थाः?
    उत्तरम्- चत्वारः।
17. प्रश्न-सहरि अत्र कः विग्रहः?
    उत्तरम्- हरेः सादृश्यम्।

18. प्रश्न-पञ्चानां गङ्गानां समाहारः-इति?
उत्तरम्- पञ्चगङ्गम्।
19. प्रश्न-"श्यामोज्ज्वलवपुः" इति कस्योदाहरणम्?
उत्तरम्- बहुपदबहुव्रीहिसमासस्य।
20. प्रश्न-"मुख चन्द्रः" इत्यत्र कीदृशः कर्मधारयः?
उत्तरम्- अवधारणापूर्वपदकर्मधारयः।
21. प्रश्न-उपशरदम् अत्र कः समासान्तः प्रत्ययः?
उत्तरम्- टच्।
22. प्रश्न-"कृष्णं श्रितः कृष्णश्रितः" अत्र कः समासः?
उत्तरम्- द्वितीयातत्पुरुषः।
23. प्रश्न-ग्रामं प्राप्तः ग्रामप्राप्तः, ग्रामं गमी ग्रामगमी" अत्र कः समासः?
उत्तरम्- द्वितीयातत्पुरुषः।
24. प्रश्न-"आचारेण निपुणः-आचारनिपुणः" अत्र कः समासः?
उत्तरम्- तृतीयातत्पुरुषः।
25. प्रश्न-मासेन पूर्वः=मासपूर्वः, गुडेन मिश्रः=गुडमिश्रः" अत्र कःसमासः?
उत्तरम्- तृतीयातत्पुरुषः।
26. प्रश्न-यूपाय दारुः=यूपदारुः, भूताय वलिः=भूतवलिः अत्र कः समासः?
उत्तरम्- चतुर्थीतत्पुरुषः।
27. प्रश्न-गवे हितम्=गोहितम्, गवे सुखम्=गोसुखम् अत्र कः समासः?
उत्तरम्- चतुर्थीतत्पुरुषः।
28. प्रश्न-चोरात् भयम्=चोरभयम्, पदात् च्युतः=पदच्युतः" अत्र कः समासः?
उत्तरम्- पञ्चमीतत्पुरुषः।
29. प्रश्न-बन्धनात् मुक्तः=बन्धनमुक्तः, गृहात् निर्गतः=गृहनिर्गतश्च" अत्र कःसमासः?
उत्तरम्- पञ्चमीतत्पुरुषः।
30. प्रश्न-"राज्ञः पुरुषः=राजपुरुषः, विप्रस्य पुत्रः=विप्रपुत्रः" चेत्यत्र कःसमासः?
उत्तरम्- षष्ठीतत्पुरुषः।
31. प्रश्न-शास्त्रे प्रवीणः=शास्त्रप्रवीणः, अक्षेषु शौण्डः=अक्षशौण्डःकः समासः?
उत्तरम्- सप्तमीतत्पुरुषः।
32. प्रश्न-दाने वीरः=दानवीरः, चक्रे बन्धः=चक्रबन्धः अत्र कः समासः?
उत्तरम्- सप्तमीतत्पुरुषः।
33. प्रश्न-"पौर्वशालः, द्वैमातुरः, पञ्चगवधनः" इत्यादि कस्य उदाहरणं भवति?
उत्तरम्- द्विगुसमासः।
34. प्रश्न-पूर्वकायः, मध्याह्नः, आसनार्धम्, पूर्वरात्रः, मध्यरात्रः इत्यत्र कः समासः?
उत्तरम्-एकदेशीसमासः।

35. प्रश्न-"शिवौ" इत्यत्र कः समासः?
उत्तरम्- एकशेषसमासः।
36. प्रश्न-तत्पुरुषः समानाधिकरणः भवति?
उत्तरम्- कर्मधारयः।
37. प्रश्न-"नृसिंहः" कस्योदाहरणं स्यात्?
उत्तरम्- उपमानोत्तरपदकर्मधारयस्य।
38. प्रश्न-"अनुदरम्" इति नञ् तत्पुषः कमर्थं द्योतयति?
उत्तरम्- अल्पतार्थम्।
39. प्रश्न-"सुपुरुषः" इति कस्य उदाहरणम्?
उत्तरम्- प्रादिसमासस्य।
40. प्रश्न-"चतुर्युगम्" इति कस्योदाहरण्?
उत्तरम्- समाहार द्विगुसमासस्य।
41. प्रश्न-संख्यापूर्वः समासः कः?
उत्तरम्- द्विगु।
42. प्रश्न-"निश्शङ्कम्" इति कस्य उदाहरणम्?
उत्तरम्- क्रियाविशेषणबहुब्रीहेः।
43. प्रश्न-"त्रिदशाः" इति कस्योदाहरणम्?
उत्तरम्- अभ्यासबहुब्रीहेः।
44. प्रश्न-"अक्षतशरीरः" इत्यस्य विग्रहवाक्यं किं स्यात्?
उत्तरम्- अक्षतं शरीरं यस्य सः इति(बहुब्रीहिः)
45. प्रश्न-"विक्रमादित्यः" इत्यस्य विग्रहवाक्यं दर्शय?
उत्तरम्- विक्रमे आदित्य इव (सप्तमीतत्पुरुषः)
46. प्रश्न-"जीवनसञ्जीवनी" पदस्य विग्रहवाक्यं दर्शय?
उत्तरम्- जीवनाय सञ्जीवनी(चतुर्थीतत्पुरुषः)
47. प्रश्न-घनश्यामः इत्यस्य कः विग्रहः?
उत्तरम्-घन इव श्यामः(कर्मयारय)
48. प्रश्न-"न अश्वः=अनश्वः, न एकः=अनेकः, न आर्यः=अनार्यः" अत्र कःसमासः?
उत्तरम्- नञ् तत्पुरुषः।
49. प्रश्न-"पुण्यपुरुष" इदं विग्रहवाक्यं कस्यास्ति?
उत्तरम्- पुण्यश्चासौ पुरुषः(कर्मधारय)
50. प्रश्न-"जितेन्द्रियः" इति पदस्य विग्रहवाक्यं दर्शय?
उत्तरम्- जितानि इन्द्रियाणि यस्य सः(बहुब्रीहिः)
51. प्रश्न-देवपूजकः ब्राह्मणः=देवब्राह्मणः अत्र कः समासः?
उत्तरम्- मध्यमपदलोपीसमासः।

52. प्रश्न-प्रगत:आचार्य:प्राचार्य:, शेभन:राजा सुराजा, दुष्ट:जन:दुर्जन:अत्र क:समास:?
उत्तरम्- गति-कर्मधारय)
53. प्रश्न-कुम्भं करोतीति कुम्भकार:, गां ददातीति गोद: अत्र क: समास:?
उत्तरम्- उपपदसमास:।
54. प्रश्न-रामश्च कृष्णश्च रामकृष्णौ गावश्च अश्वश्च गवाश्वम् अत्र क:समास:?
उत्तरम्- समाहार द्वन्द्व।
55. प्रश्न-मुष्टिभ्यां मुष्टिभ्यां इदं युद्ध प्रवृत्तम् इति मुष्टामुष्टि अत्र क:समास:?
उत्तरम्- कर्मव्यतिहार बहुव्रीहि।
56. प्रश्न-पीतम् अम्बरम् यस्य पीताम्बर:, शोभनो गन्धो यस्य स: सुगन्धि:, अत्र क:समास:?
उत्तरम्- बहुव्रीहि:।
57. प्रश्न-त्रयाणाम् भुवनानां समाहार: इति त्रिभुवनम् इति क: समास:?
उत्तरम्- समाहार द्विगु।
58. प्रश्न-"दक्षिणपूर्वा" अत्र विग्रहवाक्यं दर्शय?
उत्तरम्- दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा।
59. प्रश्न-"गजसिंहम्" अस्य विग्रहवाक्यं दर्शय?
उत्तरम्- गजाश्च सिंहाश्च एषां समाहार:।
60. प्रश्न-"कापुरुष:-किंराजा-कदन्नम् इति कस्य समासस्य उदाहरणानि?
उत्तरम्- प्रादिसमासस्य।
61. प्रश्न-"मृद:पिण्ड इव मति:यस्य स:" इति विग्रहवाक्यस्य समस्त पदं किम्?
उत्तरम्- मृत्पिण्डमति:।
62. प्रश्न-"कुपुरुष:" अत्र क: समास:?
उत्तरम्- गतिसमास:।
63. प्रश्न-कुम्भकार: क: समास:?
उत्तरम्- उपपदसमास:।
64. प्रश्न-अहश्च रात्रिश्च इति विग्रहवाक्यस्य समस्त पदं किम्?
उत्तरम्- अहोरात्र:।
65. प्रश्न-"न अलङ्कृतं शरीरं यस्य स:" अत्र समस्त पदं किं स्यात्?
उत्तरम्- अनलङ्कृतशरीरम्।
66. प्रश्न-कुलस्यापत्यं पुमान्" इति समस्तपदं किं स्यात्?
उत्तरम्- कुलीन:।
67. प्रश्न-गर्गस्य युवापत्यं पुमान् इति समस्तपदं किं स्यात्?
उत्तरम्- गार्ग्यायण।
68. प्रश्न-"मातापितरौ" इत्यस्य विग्रहवाक्यं किम्?
उत्तरम्- माता च पिता च मातापितरौ।

69. प्रश्न-द्वौ च दश च इति समस्तपदं किं स्यात्?
उत्तरम्- द्वादश।
70. प्रश्न-त्रयोदश अत्र कः समासः?
उत्तरम्- द्वन्द्व।
71. प्रश्न-द्वन्द्वतत्पुरुषयोः किं भवति?
उत्तरम्- परवल्लिङ्गम्।
72. प्रश्न-पञ्चषु कपालेषु संस्कृतः इत्यत्र समस्तपदं किम्?
उत्तरम्- पञ्चकपालः।
73. प्रश्न-"पुत्रेण सह आगतः पिता" इत्यत्र समस्तपदं किम्?
उत्तरम्- सपुत्रः।
74. प्रश्न-" . "शेषाद् विभाषा" अनेन किं विधीयते?
उत्तरम्- कप्।
75. प्रश्न-संज्ञा च परिभाषा च तयोः समाहारःइति समस्तपदं किम्?
उत्तरम्- संज्ञापरिभाषम्।
76. प्रश्न-ईश्वरं गुरुं च भजस्व अत्र चकारस्य कोऽर्थः?
उत्तरम्- समुच्चयः।
77. प्रश्न-भिक्षामट गां चानय अत्र चकारस्य कोऽर्थः?
उत्तरम्- अन्वाचयः।
78. प्रश्न-शिवकेशवौ अत्र शिवशब्दस्य पूर्वनिपातं केन सूत्रेण भवति?
उत्तरम्- अल्पाच्तरम्।
79. प्रश्न-पाणी च पादौ च तेषां समाहारःअत्र समस्तपदं किम्?
उत्तरम्- पाणिपादम्।
80. प्रश्न-श्वश्रूश्च श्वसुरश्च इति समस्तपदं किम्?
उत्तरम्- श्वसुरौ।
81. प्रश्न-भ्रातरो अत्र कः समासः?
उत्तरम्- एकशेषः।
82. प्रश्न-विशेषसंज्ञाविनिर्मुक्तःकः समासः?
उत्तरम्- केवलसमासः।
83. प्रश्न-समानाधिकरणतत्पुरुषः किमस्ति?
उत्तरम्- द्विगुः।
84. प्रश्न-"सप्तर्षयः" इत्यत्र कः समासः?
उत्तरम्- समानाधिकरणतत्पुरुषः।
85. प्रश्न-एकशेषेतरसमाहारात्मकः समासः कः?
उत्तरम्- द्वन्द्व।

86. प्रश्न-"नीलोत्पलम्" इति पदस्यालौकिकविग्रहः कः?
उत्तरम्- नील सु उत्पल सु।
87. प्रश्न-"अनुरूपम्" इत्यस्य पदस्य विग्रहः कः ?
उत्तरम्- रूपस्य योग्यम्।
88. प्रश्न-"जीविकापन्नः" इत्यस्य कः विग्रहः?
उत्तरम्- जीविकाम् आपन्नः।
89. प्रश्न-"छायावृक्षाः" "शाकपार्थिवः" अत्र कः समासः स्यात्?
उत्तरम्- मध्यमपदलोपी कर्मधारयः।
90. प्रश्न-सर्वदः, धनदः, दुर्जनः, एतेषां समासः कः?
उत्तरम्- उपपदसमासः।
91. प्रश्न-"राजपुरुषः" "जटाबद्धः", "शोकापन्नः," "शैलराजः" एतेषु कः समासः?
उत्तरम्- तत्पुरुषः।
92. प्रश्न-महाराजः, राजर्षिः, परमानन्दः, इत्येतानि कस्य समासस्य पदानि?
उत्तरम्- कर्मधारय।
93. प्रश्न-अक्षमः, अनृणः, अब्राह्मणः, अघोषितः एतेषां कः समासः?
उत्तरम्- नञ् तत्पुरुषः।
94. प्रश्न- खलसज्जनानां, कुन्देदुतुषाराः अनयोः समासः कः?
उत्तरम्- इतरेतरद्वन्द्वः।
95. प्रश्न-अनुरूपं, यथाशक्ति, सचक्रं, उपागमम्, उपनदि, अधिकूलम्-अत्र कः समासः?
उत्तरम्- अव्ययभावः।
96. प्रश्न-पीताम्बरः, चित्रगुः, हस्तिपादः, यशोधनः, लम्बोदरः, दुर्बुद्धिः, सुशीला, चन्द्रमुखी, दशाननः, महात्मा, प्राप्तधनः एतेषां समासनाम किम्?
उत्तरम्- बहुव्रीहिः।
97. प्रश्न-"देवानां प्रियः" "दास्याः पुत्रः" "अग्रेसरः" कस्य समासस्योदाहरणानि?
उत्तरम्- अलुक्समासः।
98. प्रश्न-पञ्चपात्रं, त्रिलोकी, त्रिभुवनम्, त्रिनेत्रम्, त्रिरात्रम्, एतेषां कः समासः?
उत्तरम्- द्विगुः।
99. प्रश्न- विद्याधनम्, वचनामृतम्, मुखचन्द्रः, एतेषु कः समासः?
उत्तरम्- उपमानपूर्णपदकर्मधारयः।
100. प्रश्न-कापुरुषः, किंराजा, कदन्नम् इत्यादिषु कः समासः?
उत्तरम्- प्रादिसमासः।
101. प्रश्न-"युधिष्ठिरः" इत्यत्र कः समासः?
उत्तरम्- अलुक्समासः।
102. प्रश्न-"शोकानलः" अत्र कः समासः?
उत्तरम्- उपमानोपत्तरपदः।

103. प्रश्न-विशेषसंज्ञाविनिर्मुक्तः समासः कः?
उत्तरम्- केवलः।
104. प्रश्न-"तस्य रूपेण मोहितः" एकपदीकरणं कथम्?
उत्तरम्- तद्रूपमोहितः।
105. प्रश्न-"चौरकर्म, चौराद्भीतिः इत्यनयोः समासौ कौ?
उत्तरम्- षष्ठीतत्पुरुषः पञ्चमी तत्पुरुषः।
106. प्रश्न-"सालवृक्षः" अत्र कः समासः?
उत्तरम्- विशेषणपूर्वपदः।
107. प्रश्न-"खड्गपाणिः" अत्र कः समासः?
उत्तरम्- व्यधिकरणबहुव्रीहिः।
108. प्रश्न-"वागर्थाविव" इति कस्य उदाहरणमस्ति?
उत्तरम्- द्वन्द्वस्य।
109. प्रश्न-"तत्पुरुषः" इत्यस्य पदस्य विग्रहवाक्यं किम्?
उत्तरम्- सः पुरुषः तत्पुरुषः।
110. प्रश्न-"पीतवस्त्रम्" इत्यत्र कः समासः?
उत्तरम्- कर्मधारय।
111. प्रश्न-व्यतिहारलक्षणबहुव्रीहिः कः?
उत्तरम्- केशाकेशि।
112. प्रश्न-"पितरौ" इत्यस्य विग्रहवाक्यं किम्?
उत्तरम्- माता च पिता च।
113. प्रश्न-कर्मधारयसमासः कति विधः?
उत्तरम्- नवविधः।
114. प्रश्न-व्यधिकरणतत्पुरुषसमासः कतिविधः?
उत्तरम्- सप्तविधः।
115. प्रश्न-"श्यामोज्ज्वलवपुः" इति कस्योदाहरणमस्ति?
उत्तरम्- बहुपदबहुव्रीहेः।
116. प्रश्न-"मुखचन्द्रः" इत्यत्र कीदृशः कर्मधारय?
उत्तरम्- अवधारणापूर्वपदकर्मधारयः।
117. प्रश्न-"शिवौ" इत्यत्र कः समासः?
उत्तरम्- एकशेषः।
118. प्रश्न-"नृसिंहः" इति कस्योदाहरणं स्यात्?
उत्तरम्- उपमानोत्तरपदकर्मधारयस्य।
119. प्रश्न-"निश्शङ्कम्" इत्यत्र कः समासः?
उत्तरम्-क्रियाविशेषणबहुव्रीहिः।

120. प्रश्न-"फलवृक्षाः, छायावृक्षाः, पुष्पलताः, एषां समासं निर्दिशत?
उत्तरम्- मध्यमपदलोपितत्पुरुषः।
121. प्रश्न-अतटाः, अपुत्रः, अपापः, एषां समासस्य नामास्ति?
उत्तरम्- नञ्बहुव्रीहिः।
122. प्रश्न-"शताब्दी" इति शब्दे समासः?
उत्तरम्- द्विगु।
123. प्रश्न-"प्रचार्यः" इत्यस्मिन् शब्दे कः समासः?
उत्तरम्- प्रादिसमासः।
124. प्रश्न-"मधुपः" इत्यत्र कः समासः?
उत्तरम्- मधुनि पिबतीति।
125. प्रश्न-"खड्गहस्ता" (देवी) इत्यत्र विग्रहः?
उत्तरम्- खड्गः हस्ते यस्याः सा।
126. प्रश्न-"मृगलोचना" इत्यस्य विग्रहः कः?
उत्तरम्- मृगस्य लोचने इव लोचने यस्याः सा।
127. प्रश्न-"आत्मनेपदम्" इत्यत्र कः समासः?
उत्तरम्- अलुक्समासः।
128. प्रश्न-नवानां रात्रीणां समाहारः?
उत्तरम्- नवरात्रम्।
129. प्रश्न-"आत्मनि इति" इत्यस्य समस्तपदं किम्?
उत्तरम्- अध्यात्मम्।
130. प्रश्न-"हरिहरौ" इत्यत्र कः समासः?
उत्तरम्- द्वन्द्व।
131. प्रश्न-सुबन्तस्य केन सह समासो भवति?
उत्तरम्- सुवन्तेन सह।
132. प्रश्न-पदानां मेलनस्य प्रक्रियां किं कथ्यते?
उत्तरम्- समसनम्।
133. प्रश्न- कुपुरुषः अत्र कः समासः?
उत्तरम्- कर्मधारय-समास।
134. प्रश्न-"चतुर्युगम्" अत्र कः समासः?
उत्तरम्- द्विगु-समास।

TOTAL- 1071

• • •

3

छन्दस् (साहित्यम्)

(क) छन्दविवेचनम्-

वेदाः छन्दोबद्धाः भवन्ति। वैदिकमन्त्रानामुच्चारणज्ञानाय छन्दोज्ञानम् आवश्यक- मस्ति। यथोक्तम् आचार्यकात्यायनेन-"यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति" इति।

ऋग्वेदसामवेदयोः सर्वे मन्त्राः छन्दोबद्धाः सन्ति। यजुर्वेदस्य गद्यात्मकाःपद्यात्मकाश्च सर्वे मन्त्राः छन्दोबद्धाः एव सन्ति। छन्दोवेदाङ्गस्य प्रतिनिधिभूतो ग्रन्थस्तु पिंगलाचार्यकृतं "छन्दः सूत्रम्" वर्तते।

प्रथम-द्वितीय-तृतीयसप्तकाणां छन्दसामक्षरविवरणम्-

1.	गायत्री	24	अक्षराणि
2.	उष्णिक्	28	अक्षराणि
3.	अनुष्टुप	32	अक्षराणि
4.	बृहती	36	अक्षराणि
5.	पंक्तिः	40	अक्षराणि
6.	त्रिष्टुप्	44	अक्षराणि
7.	जगती	48	अक्षराणि
8.	अतिजगंती	52	अक्षराणि
9.	शक्वरी	56	अक्षराणि
10.	अतिशक्वरी	60	अक्षराणि
11.	अष्टिः	64	अक्षराणि
12.	अत्यष्टिः	68	अक्षराणि
13.	धृतिः	72	अक्षराणि

14.	अतिधृतिः	76	अक्षराणि
15.	कृतिः	80	अक्षराणि
16.	प्रकृतिः	84	अक्षराणि
17.	आकृतिः	88	अक्षराणि
18.	विकृतिः	92	अक्षराणि
19.	संस्कृतिः	96	अक्षराणि
20.	अभिकृतिः	100	अक्षराणि
21.	उत्कृतिः	104	अक्षराणि

छन्दः द्विविधं भवति-1. वार्णिकछन्दः, 2. मात्रिकछन्दश्च।

1. वार्णिकछन्दः-यस्मिन् छन्दे पादस्थानां वर्णानां संख्या गण्यते तत् वर्णछन्दः। अर्थात् स्वराः स्वरव्यञ्जनाश्च छन्दसि वर्णनाम्ना व्यवह्रियते। यथा-उपेन्द्रवज्रा, वसन्ततिलका, वंशस्थादयः।

2. मात्रिकछन्दः-यस्मिन् छन्दसि पादस्थवर्णानां मात्राः गण्यन्ते तत् मात्रिकछन्दः। अर्थात् वर्णोच्चारणकाल एव मात्रा सा च लघुगुरुभेदात् द्विधा। यथा-आर्या।

(क) लघुः-ह्रस्वं लघुसंज्ञं स्यात्। अर्थात् ह्रस्वस्वरःलघुः तथा च ह्रस्वस्वरयुक्तःव्यञ्जनोऽपि लघुः। एकमात्रिकं भवति लघुवर्णः। लघुस्वराः-अ, इ, उ, ऋ, लृ।

(ख) गुरुः-दीर्घस्वरस्य गुरुसंज्ञा भवति ते च -आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ, तथा च दीर्घ स्वरयुक्तस्य व्यञ्जनस्यापि गुरुसंज्ञा भवति। गुरुवर्णः द्विमात्रिकं भवति। अन्यत् च-संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गं सम्मिश्रम्। विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन।।

(क) गुरुः-संयुक्ताद्यं गुरुसंज्ञं भवति अर्थात् संयुक्तवर्णात् पूर्ववर्णः गुरुः मन्यते यथा-यक्षः(क् +ष=क्ष) अत्र यकारः गुरुः।

(ख) दीर्घम्-दीर्धस्वराणाम् तथा च दीर्घस्वरयुक्तानां व्यञ्जनानाम्, यथा-आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ, दा, ता, नी, भू, रे इत्यादयः।

(ग) सानुस्वार-अनुस्वारयुक्तः वर्णोऽपि गुरुसंज्ञः भवति। यथा-वंशः, सायं, प्रियं, इत्यादयं।

(घ) विसर्गसमिश्रम्-विसर्गयुक्तः(:) वर्णः गुरुसंज्ञः भवति। यथा-पतिः, रामः, लेखकः। अत्र तिः, मः, कः गुरुवर्णाः।

(ङ) पदान्तवर्णस्तु विकल्पेन लघुः गुरुर्वा भवति। छन्दलक्षणे लघुवर्णस्य कृते "ल" प्रयुज्यते चिह्नञ्च। तथा गुरुवर्णस्य कृते "ग" "ऽ" प्रयुज्यते।

वर्णानामथवा मात्राणां समूह "गण" उच्यते। त्रयाणां वर्णानां समूहः गणः कथ्यते। अष्टौ गणाः सन्ति, ते च "यमाताराजभानसलगाः"-य=यगण, मा=मगण, ता=तगण, र=रगण, ज=जगण, भा=भगण, न=नगण, स=सगण, ल=लघु, गाः=गुरुः।

वर्णानां मात्राज्ञानम्-"यमाताराजभानसलगाः" "सूत्रस्थं" गणबोधकम् आदिवर्णं स्वीकृत्य अग्रस्थयोः द्वयोः वर्णयोः मात्रा गण्यते यथा-

गण	वर्णाः	मात्राः	विवेचनम्
य=यगण	यमाता	। ऽऽ	आदिलघुर्यः-अत्र आदिवर्णः लघु शेषौ गुरु स यगणः
म=मगण	मातारा	ऽऽऽ	मस्त्रिगुरुः-यत्र=त्रयः गुरुवर्णाः स मगणः
ता=तगण	ताराज	ऽऽ।	अन्तलघुस्तः-यत्र अन्त्यलघुः भवति स तगणः
रा=रगण	राजभा	ऽ।ऽ	रलमध्यः-यत्र मध्यलघुवर्णः स रगणः
ज=जगण	जमान	।ऽ।	जोगुरुमध्यगतो-यत्र मध्यवर्णःगुरुःशेषौ लघू स जगणः
भा=भगण	भानस	ऽ।।	भादिगुरुः-यत्र आदि वर्णः गुरुः शेषौ लघू स भगणः
न=नगण	नसल	।।।	त्रिलघुश्चनकारो-यत्र त्रयः लघुवर्णाः स नगणः
स=सगण	सलगाः	।।ऽ	सोऽन्तगुरुः-यत्र अन्त्यवर्णः गुरुःशेषौ लघू स सगणः

लघु वर्णस्य एकमात्रा दीर्धस्य च द्वे मात्रे।

वर्णः	चिह्नम्	मात्रा	वर्णः	चिह्नम्	मात्रा
लघुः	।	1(एक)	गुरुः	ऽ	2 द्वौ

छन्दलक्षणे संख्यानां कृते प्रयुक्ताः पारिभाषिकशब्दाः-

1. (एकः) -चन्द्रमा, पृथ्वी। (चन्द्रः एक एव, पृथ्वी च)
2. (द्वौ) -पक्षः, नेत्रम्। (शुक्लपक्षः, कृष्णपक्षः, द्वौ पक्षौ तथैव नेत्रम्)
3. (त्रयः) -गुणः, रामः, अग्निः।
4. (चत्वारः) वेदाः, वर्णाः, युगाः, आश्रमाः।
5. (पञ्च) -शर-इन्द्रिय-भूत-तत्वानि।
6. (षड्) -शास्त्र-रस-ऋतवः।
7. (सप्त) -अश्व-मुनि-लोक-स्वराः।
8. (अष्टौ) वसु, याम-सिद्धिः भोगिनः।
9. (नव) -अङ्क-ग्रह-द्रव्य-निधयः।
10. (दश) -दिक्-अवतारा:।
11. (एकादश) रुद्राः।
12. (द्वादश) -सूर्य-मासाः।

महत्त्वपूर्णानि छन्दलक्षणानि उदाहरणानि च-

1. आर्या- **यस्याः प्रथमे पादे, द्वादश मात्रास्तथा तृतीयेऽपि।**
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या।।

यस्य छन्दसः प्रथमे=12 मात्राः, द्वितीये पादे=18 मात्राः, तृतीये पादे=12 मात्राः, चतुर्थके पादे च=15 मात्राः सन्ति तद् आर्या छन्दः। इदं मात्रिकच्छन्दः। यथा-

1. ऽ ऽ ऽ ऽ ऽ ऽ=12 दानं भोगो नाशः

2. ऽऽ।। ऽ। ऽ।। ऽ। ऽऽऽ=18 तिस्रः गतयो भवन्ति वित्तस्य

3. ऽ।। ऽ।। ऽ ऽ=12 यो न ददाति न भुङ्क्ते

4. ऽ।। ऽऽ। ऽ।। ऽ=15 तस्य तृतीया गतिर्भवति।।

2. वसन्ततिलका-उक्ता वसन्ततिलका तभजाजगौ गः। चतुर्दश वर्णात्मकमिदं छन्दः। यत्र क्रमशः तगण-भगण-जगण-जगण उभौ गुरु तद् वसन्ततिलकाछन्दः। यथा-तगण भगण जगण जगण गुरु (ऽऽ। ऽ।।। ऽ।। ऽ। ऽ ऽ) पापान्निवारयति योजयते हिताय तगण भगण जगण जगण गुरु (ऽऽ ऽ।।। ऽ।। ऽ। ऽऽ) गुह्यं निगूहति गुणान् प्रकटीकरोति। तगण भगण जगण जगण गुरु(ऽऽ। ऽ।।। ऽ।। ऽ। ऽऽ) आपद्गतं च न जहाति ददातिकाले तगण भगण जगण जगण गुरु(ऽऽ। ऽ।।। ऽ।। ऽ। ऽऽ) सन्मित्रलक्षणमिदं निगदन्ति सन्तः।

3. शिखरिणी-रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी। रसैः=षड्, रुद्रकादश(11) 6+11=17 वर्णात्मकमिदं छन्दः-यमन सभलागः=यगण, मगण, नगण, सगण, भगण, लघु, गुरुः। (। ऽऽ ऽऽऽ।।।।।।।। ऽ। ऽ) यथा-

यदालोके सूक्ष्मं व्रजति सहजा तद् विपुलता,
यदर्थे विच्छिन्नं भवति कृत्सन्धानमिव तत्।
प्रकृत्या यद् वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्व रथजवात्।।

4. वंशस्थ:-जतौ तु वंशस्थमुदीरितं जरौ। वर्णाः-12, जगण, तगण, जगण, रगण (।ऽ। ऽऽ।। ऽ। ऽ। ऽ)

विचिन्तयन्ती यमनन्यमानसा,
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्,
कथां प्रमत्तः प्रथमं कृतामिव।।

5. मालिनी- ननमयययुतेयं मालिनी भोगिलोकैः। भोगी-8, लोकाः-7(8+7=15) वर्णाः-15, नगण, नगण, मगण, यगण, यगण(।।।।।। ऽऽऽ। ऽऽ। ऽऽ)

सरसिजमनुविद्धं शैवलेनापि रम्यं,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

6. इन्द्रवज्रा-स्यादिन्द्रवज्रा यदि तौ जगौ गः। वर्णाः-11(एकादश) तगण, तगण, जगण, गुरु, गुरु (ऽऽ। ऽऽ।। ऽ। ऽऽ)

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं,
प्रत्यर्पितन्यास इवान्तरात्मा।।

7. उपेन्द्रवज्रा–उपेन्द्रवज्रा जतजास्ततो गौ। वर्णाः–11, (एकादश) जगण, तगण, जगण, गुरुः, गुरुः(। ऽ । ऽ ऽ ।। ऽ । ऽऽ)

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविडं त्वमेव
त्वमेव सर्वं मम देव देव।।

8. स्रग्धरा–म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्। वर्णाः–21 मगण, रगण, भगण, नगण, यगण, यगण, यगण (ऽऽऽ ऽ । ऽ ऽ ।।।।।। ऽऽ । ऽऽ । ऽऽ)

या सृष्टिः स्रष्टुराद्या, वहति विधिहुतं या हविर्या च होत्री,
ये द्वे कालं विधत्तः श्रुतिविषयगुणा, या स्थिता व्याप्य विश्वम्।
यामाहुःसर्वबीजप्रकृतिरिति यया प्रणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।

9. शार्दूलविक्रीडितम्–सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्। सूर्याः–12, अश्वाः–7 (12+7=19 वर्णाः) वर्णाः–19, मगण, सगण, जगण, सगण, तगण, तगण, गुरुः (ऽऽऽ।। ऽ । ऽ ।।। ऽ ऽऽ । ऽऽ । ऽ)

पातुं न प्रथमं व्यवस्यति जलं युस्माष्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।

10. मन्दाक्रान्ता–मन्दाक्रान्ता जलधिषडगैर्मभौ नतौ ताद् गुरु चेत्। जलधिः–4, षड्=(छः), अगैः=पर्वत, अभ्भौ=सप्त(7) (4+6+7=17) वर्णाः–17, मगण, भगण, नगण, तगण, तगण, गुरुः, गुरुः(ऽऽऽ ऽ ।।।।। ऽऽ । ऽऽ । ऽऽ)

कस्चित् कान्ता विरहगुरुणास्वाधिकारात् प्रमत्तः
शापेनास्तं-गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनया स्नानपुण्योदकेषु,
स्निग्धच्छाया तरुषु वसतिं रामगिर्याश्रमेषु।।

11. द्रुतविलम्बितम्–द्रुतविलम्बितमाह नभौ भरौ। वर्णाः–12, नगण, भगण, भगण, रगण (।।। ऽ ।। ऽ ।। ऽ । ऽ)

द्रुतगतिः पुरुषो धनभाजनम्, भवति मन्दगतिश्च सुखोचितः।
द्रुतविलम्बित खेलगतिर्नृपः, सकलराज्यसुखं प्रियमश्नुते।।

12. वियोगिनी–विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी। विषमे=प्रथमे तृतीये च चरणे, ससजाः=सगण, सगण, जगण, गुरुः=1=10 वर्णाः। समे=द्वितीये चतुर्थे च चरणे, सभरालः–सगण, भगण, रगण, लघु गुरु=11 वर्णाः।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

13. स्रग्विणी-कीर्तितैषा चतूरेफिका स्रग्विणी। चतूरेफिका=4 रगण (रगण, रगण, रगण, रगण=12 वर्णाः। (ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ)

सर्वदा प्राप्नुवन्त्यात्मघोषा बलिं,
राजहांश्च जीवन्त्यहो! शैवलैः।
बालिशस्साधु सम्पत्तिमास्वादते,
हा बुभुक्षाऽर्बितो हिण्डते पण्डितः।।

14. अनुष्टुप्-

श्लोके षष्ठं गुरुं ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।

अनुष्टुप्च्छन्दसि प्रत्येकस्मिन् पादे अष्टौ (8) वर्णाः भवन्ति। प्रत्येकपादे षष्ठः वर्णः गुरुः, पञ्चमश्च ह्रस्वो भवति, द्वितीये, चतुर्थके च पादे सप्तमः वर्णः ह्रस्वो भवति, प्रथमे तृतीये च सप्तमः दीर्घो भवति।

(।ऽऽ) धर्मक्षेत्रे कुरुक्षेत्रे (।ऽ।) समवेता युयुत्सवः।

(।ऽऽ) मामकाः पाण्डवाश्चैव (।ऽ।) किमकुर्वत सञ्जय।।

(ख) काव्यस्यार्थ-

मानवः चेतनासम्पन्नः संवेदनशीलप्राणी चास्ति। तस्य मनः शरीरामाधृत्य, दुःखेन, सुखेन, प्रेम्णा, दयया, क्रोधेन, आशया च चलायमानं भवति, तथा-प्रकृत्या प्रतिक्षणं परिवर्तनेन सौम्यं, मनोरमं, विविधरूपैश्च भावं गृह्णाति। काव्येन मानवस्य भावात्मक विकासो भवति। काव्यमस्माकं भावानाम् उत्सर्जनमस्ति। काव्यमिति शब्दोऽयं कवि शब्दे क्रम धातोः औणादिके, इन् प्रत्यये कृते बाहुलकात् मकारस्य वकारादेशे रेफस्य लोपे सति कविरिति शब्दः निष्पद्यते। "कवेरिदं कर्मभावो वा काव्यम्"।

काव्यं परिभाषयन् विश्वनाथ-कविराजः स्वकीये ग्रन्थे साहित्यदर्पणे वक्ति, "वाक्यं रसात्मकं काव्यम्"। अर्थात् रस एव काव्यस्य आत्मा अस्ति। रसेन विना काव्यस्य काव्यत्वं नैव सिद्ध्यति। रसाभावे तु शब्दार्थमयं वाक्यं केवलं वाक्यमात्रमेव भवति, किन्तु यदा वाक्यं रसात्मकं भवति तदा अत्र काव्यत्वं तु भवत्येव। "रसात्मकम्" इत्येतस्य अभिप्रायोऽस्ति यत् "रस एव आत्मा साररूपतया जीवनधायको यस्य"।

1. आचार्य विश्वनाथः-"वाक्यं रसात्मकं काव्यम्"।
2. मम्मटः-"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"।
3. आनन्दवर्धनाचार्यः-"काव्यस्यात्माध्वनि"

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तःकाव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।"

4. भामहः(काव्यालङ्कारः)–"शब्दार्थौ सहितौ काव्यम्"।
5. अग्निपुराणम्–"इष्टार्थव्यवच्छिन्ना पदावली। काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्।।"
6. रुद्रटः (काव्यालङ्कारः)–"शब्दार्थौ काव्यम्"।
7. कुन्तकः–"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि। बन्धे व्यवस्थितौ काव्यं तद्विदाह्लाद-कारिणी।।" (वक्रोक्तिकाव्यजीवितम्)
8. भोजराजः(सरस्वतीकण्ठा .रणम्)–"निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दन्ति।।"
9. जयदेवः(चन्द्रलोकम्)–"निर्दोषा लक्षणवती सरीतिर्गुणभूषणा। सालङ्काररसानेक-वृतिर्वाक्काव्यनामभाक्।।"
10. जगन्नाथः(रसगङ्गाधरः) "रमणीयार्थप्रतिपादकः शब्दः काव्यम्।"
11. दण्डी (काव्यादर्शः) –"शरीरं तावत् इष्टार्थव्यवच्छिन्ना पदावली।"

संस्कृताचार्यैः काव्यस्य परिभाषा विभिन्नरूपेण दत्ता-तस्य विवेचनं कृतं स्यात्। रमणीयतायां पुरस्कृत्य भामहः, रुद्रटः, उद्भटश्च अलङ्कारमेव काव्यस्यात्मा इति अमन्यत। अनेन प्रकारेण एकस्य श्रेष्ठस्य पद्यस्य कृते तस्मिन् रस-अलङ्कार-ध्वनि- गुण-वक्रोक्ति-रमणीयता-सुशब्दावल्या-दीनिसर्वाणि-तत्त्वानि आवश्यकानि सन्ति।

(ग) काव्यस्य प्रयोजनम्-

संस्कृत-साहित्ये काव्यस्य स्थानं महत्त्वपूर्णमस्ति। आचार्य-भामहः काव्यालङ्कारे कविता-करणस्य, पठनस्य, पाठनस्य चोद्देश्यं चतुर्वर्गाणां प्राप्तिमन्यत-

धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च।
करोति प्रीतिं कीर्तिञ्च साधुकाव्यनिषेवणम्।।

आचार्यमम्मटः-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

काव्यस्य प्रयोजनं यशःप्राप्तिः, धनप्राप्तिः, सद्व्यवहार-ज्ञानम्, शिवेतरस्य च अपाकरणं सद्यः परमानन्दस्यानुभूतिः तथा कान्तासम्मित्तयोपदेशस्य प्राप्तिः विद्यते। व्याकरणशास्त्र-नियमानुसारं, पदप्रयोगज्ञानाय, अन्यान्यशास्त्रपरिज्ञानाय यानि काव्यानि विरचितानि, तानि शास्त्र-काव्यानि इत्युच्यन्ते।

(घ) काव्यभेदा-

त्रिविधं काव्यम्–1. उत्तमम्, 2. मध्यमम्, 3. अवरम्।

1. उत्तमम्–इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः। अत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थःचमत्कारजन्यःभवति तदेव उत्तमकाव्यम्। अस्य अपरनाम"ध्वनि" काव्यमपि अस्ति।

2. मध्यमम्–अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्। अत्र व्यङ्ग्यार्थः वाच्यार्थापेक्षयाधिकचमत्कारजन्यः भवति तदेव काव्यं गुणीभूतव्यङ्ग्यम् अर्थात् मध्यमं काव्यम्।

3. अवरम्-शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्। अत्र व्यङ्ग्यार्थस्याभावो भवति। तदेव काव्यं चित्रकाव्यम् अर्थात् अवरकाव्यम्।

शब्दः त्रिविधः-वाचकः, लाक्षणिकः, व्यञ्जकश्च। उक्तमपिस्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।

शब्दस्यार्थम् त्रिविधम्-1. वाच्यार्थः, 2. लक्ष्यार्थः, 3. व्यङ्ग्यार्थश्च।

वृत्तिः त्रिधा–1. अभिधा, 2. लक्षणा, 3. व्यञ्जना।

1. अभिधा-स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते-मुख्यार्थः साक्षात् सङ्केतितार्थः भवति। शब्दस्य मुख्यार्थः अभिधा वृत्या ज्ञायते। अर्थात् साक्षात्संकेतितमर्थं या बोधयति, स अभिधा इत्युच्यते। यथा- "गंगायां स्नाति" इत्यत्र गंगाशब्दः साक्षात्संकेतितं भगीरथखाताववच्छिन्नजलप्रवाहविशेषरूप गंगापदार्थस्य वाचकः।

2. लक्षणा-

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।।

यदा शब्दः स्वमुख्यार्थस्य अविवक्षायां स्वमुख्यार्थसम्बद्धम् अन्यार्थं (लक्ष्यार्थं) प्रतिपादयति तदा लक्षणा शब्दशक्तिः। अर्थात् मुख्यार्थबोधे सति प्रयोजनवशात् रूढिवशाद्वा यः शब्दः लक्षणया यमर्थं प्रतिपादयति, स शब्दस्तस्यार्थस्य लक्षकः। यथा-"गंगायां घोषः" इत्यादौ गंगा-शब्दो जलमयादिरूपार्थं वाचकत्वात् प्रकृतेऽसम्भवन्स्वस्य सामीप्यादि- सम्बन्ध-सम्बन्धिनं तटादिं बोधयति। सा शब्दस्य अर्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिः लक्षणा नाम शैत्यपावनत्वादिकं प्रयोजनम्।

षड् विधा लक्षणा-शुद्धा, गौणी, सोपादाना, सलक्षणा, सरोपा, साध्यवसानाश्च।





प्रयोजनवती सारोपा उपादानलक्षणा (एते कुन्ता:प्रविशन्ति)

प्रयोजनवती साध्यवसाना उपादानलक्षणा (कुन्ता:प्रविशन्ति)

3. **व्यञ्जना**-तत्र व्यापारो व्यञ्जनात्मक:।

यस्य प्रतीतिमाधातु लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।
विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते पर:।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।।

अर्थात्" शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव:" इति नयेन अभिधा-लक्षणा-तात्पर्याख्यासु तिसृषु वृत्तिसु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु ययाऽन्योऽर्थो बोध्यते, सा शब्दस्यार्थस्य प्रकृति-प्रत्ययादेश्च शक्ति: व्यञ्जन-ध्वजन-गमन-प्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। यथा-"गंगायां घोष:" इत्यत्र गंगाशब्द: तटे शैत्य-पावनत्वाद्यतिशयं व्यञ्जनया प्रतिपादयति इति गंगा-शब्द: शैत्यपावनत्वाद्यतिशयस्य व्यञ्जक:।

(ङ) रसनिरूपणम्-

विभावेनानुभावेन व्यक्त: संचारिणा तथा।
रसतामेति रत्यादि: स्थायीभाव: सचेतसाम्।। (विश्वनाथ:)

नाट्यशास्त्रकारेण भरतमुनिना प्रतिपादितमस्ति-

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:"। अत्र "निष्पत्ति:" शब्दस्य व्याख्या चतुर्भि: विद्वद्भि: चतुर्धा प्रतिपादिता-

(क) भट्टलोल्लटस्य-उत्पत्तिवाद:। (ख) श्री शंकुकस्य-अनुमितिवाद:। (ग) भट्ट-नायकस्यभुक्तिवाद:। (घ) अभिनवगुप्ताचार्यस्य-अभिव्यक्तिवाद:।

रसस्योदाहरणमेकम्-

शून्यं वासगृहं विलोक्यशयनादुत्थाय किञ्चिच्छनै:,
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्त्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।

रसस्य-स्थायिभावा:-

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमा:।
आस्वादांकुरकन्दोऽसौ भाव: स्थायीति संमत:।।

(सा. दर्पण)

अर्थात् यः भावः विरुद्धैः अविरुद्धैश्च भावैः न विच्छिद्यते एवंभूतः आवादांकुरकन्दः स्थायिभावशब्देन उच्यते। अयं स्थायिभावः सर्वभावेषु प्रधानम्। यथा-नराणां नृपतिः। इमे स्थायिभावाः अधोलिखिताः सन्ति-

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता शमोऽपि च।।

(सा. दर्पण)

1. रतिः-"रतिर्मनोऽनुकूलेऽथ मनसः प्रवणायितम्"।
2. हासः-"वागादिवैकृतैश्चेतोविकासो हास इष्यते"।
3. शोकः-इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशब्दभाक्"।
4. क्रोधः-प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते"।
5. उत्साहः-"कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते"।
6. भयम्-"रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्"।
7. जुगुप्सा-"दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा"।
8. विस्मयः-विविधेषु पदार्थेषु लोकसीमातिवर्तिषु।
   विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः"।।
9. शमः-"शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्"।

रसभेदा-

शृंगार-हास्य-करुण-रौद्र-वीर-भयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः।।

1. शृंगाररसः-

शृंगं हि मन्मथोभेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृंगार इष्यते।।

उदाहरणं यथा-"शून्यं वासगृहं विलोक्यशयनादुत्थाय किञ्चिच्छनैः" संभोग-शृंगारः।

2. हास्यरसः-

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवत।।

यथा-

गुरोर्गिरः पञ्चदिनान्यधीत्य, वेदान्तशास्त्राणि दिनत्रयं च।
अमी समाघ्राय च तर्कवादान्, समागताः कुक्कुटमिश्रपादाः।।

3. करुणरसः-

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः।।

यथा–

विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः।
अनयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकर्तनम्।।

4. रौद्ररसः–

रौद्रः क्रोधस्थायिभावो रक्तो रुद्रधिदैवतः।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्।।

यथा–

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं,
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनाम्,
अयमसृङ्मेदोमांसैः करोमि दिशां बलिम्।।

5. वीररसः–

उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः।।

यथा–

भो लंकेश्वर! दीयतां जनकजा, रामः स्वयं याचते,
कोऽयं ते मतिविभ्रमः, स्मर नयं, नाद्यापि किंचिद्गतम्।
नैवं चेत्खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः।
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः।।

6. भयानकरसः–

भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः।।

यथा–

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम्,
अन्तः कंचुकिकंचुकस्य विंशति त्रासादयं वामनः।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतम्,
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशंकिनः।।

7. बीभत्सरसः–

जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः।

यथा–

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूशधेभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।

आर्तः पर्यस्तनेत्रः प्रकटितदर्शनः प्रेतरंकः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति।।

8. अद्भुतरसः-

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्।।

यथा-

दोर्दण्डांचित-चन्द्रशेखर-धनुर्दण्डावभंगोद्यत -
ष्टंकार-ध्वनिरार्यबालचरित-प्रस्तावना-डिण्डिमः ।
द्राक्पर्यस्त-कपाल-संपुटमिलद्ब्रह्माण्ड-भाण्डोदर -
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति।।

9. शान्तरसः-

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः।।

यथा-

रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः,
सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे,
निःशंकः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति।।

(च) रसभेदनिरूपणचक्रम्-

क्रमांकः	रसः	स्थायिभावः	वर्णः	देवता
1.	शृंगारः	रतिः	श्यामः	विष्णुः
2.	हास्यः	हासः	शुक्लः	प्रमथः
3.	करुणः	शोकः	कपोतवर्णः	यमः
4.	रौद्रः	क्रोधः	रक्तः	रुद्रः
5.	वीरः	उत्साहः	सुवर्णवत्	महेन्द्रः
6.	भयानकः	भयम्	कृष्णः	यमः(कालः)
7.	बीभत्सः	जुगुप्सा	नीलः	महाकालः
8.	अद्भुतः	विस्मयः	पीतः	गन्धर्वः
9.	शान्तः	शमः	कुन्दपुष्पवत्	श्रीनारायणः

(छ) संस्कृतकाव्यानां विकासक्रम-

संस्कृत काव्यानाम् उत्पत्तेः बीजं "वेदे" प्राप्यते। संस्कृतकाव्यानां प्रथमकिरणं सर्वप्रथमं

ऋग्वेदे दृश्यते। तस्य अनेकानि सूक्तानि अथवा मन्त्राः ईदृशा सन्ति, यैः कवेः प्रतिभायाः सुन्दरः परिचयः प्रस्तूंयते। महाकाव्यानां विकास-परम्परायां महर्षिपाणिनेः नामाऽपि गृह्यते, येन "पातालविजयम्" "जाम्बवतीविजयम्" इति द्वे महाकाव्ये लिखिते। प्रसिद्धवैयाकरणमहर्षिपतञ्जलेः नाम कंसवधबलिबन्धनामकनाट्यरचनयोः कृतेऽपि प्रसिद्धमस्ति। लौकिकसंस्कृते काव्यलेखनस्य क्रमः वाल्मीकितः प्रारब्धः। आदिकविः यदा कामातुरक्रौञ्चपक्षिमिथुनयोरेकस्य वधम् अपश्यत्। हृदयद्रवीकरणाय, रसानुभूतिकृते च आदिकवेः वाल्मीकेः श्लोकः अवश्यं द्रष्टव्यः। यथा-

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीःसमाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

तमसा नदीतीरे व्याधः कश्चन क्रौञ्चमिथुनादेकमवधीत्। हृदयविदारिकां तद्घटनां दृष्ट्वा वाल्मीकिः स्वीयामनुभूतिं श्लोकरूपेण व्यक्तीकृतवान्। अर्थात् शोकः श्लोकत्वमागतः एषानुभूतिरेव रसानुभूतिरिति कविना परिभाषायाम् उच्यते। अस्मिन् काव्ये 24, 000 श्लोकाः तथा सप्तकाण्डानि सन्ति। रामायणवत् महाभारतमपि एकम् उपजीव्यं काव्यमस्ति। इदम् अष्टादशपर्वेसु विभक्तम् एकं बृहद्ग्रन्थरत्नोऽस्ति, यस्मिन् प्रायः सपादलक्ष श्लोकाः सन्ति। अस्य प्रणेता वेदव्यासोऽस्ति। रामायणेन महाभारतेन च समं पुराणान्यपि संस्कृतसाहित्यस्य उपजीव्यानि सन्ति। एषु पुराणेषु अष्टादशपुराणानां तथा तावदेव उपपुराणानां विशिष्टं महत्त्वमस्ति। वेदव्यासः अस्य रचयिता अस्ति। महाकाव्यस्य परम्परासु सर्वप्रथमं वेदव्यासस्य तथा तदनन्तरं "अश्वघोषस्य" नाम आयाति। बुद्धचरितं अष्टाविंशति सर्गात्मकं तथा सौन्दरनन्दम् अष्टादशसर्गात्मकम् अस्य द्वे महाकाव्ये स्तः। कविकुलचूडामणिकालिदासस्य नाम संस्कृतसाहित्याकाशे देदीप्यमानसूर्यवत् अद्यापि विद्यमानमस्ति। अस्य काव्यानि ऋतुसंहारः, मेधदूतं, कुमारसम्भवं, रघुवंशञ्चास्ति।

विकासक्रमे काव्यपरिचय-

क्रमांक	कविनाम	ग्रन्थनाम	सर्गादि
1.	कुमारदासः	जानकीहरणम्	षोडशसर्गाः
2.	भारविः	किरातार्जुनीयम्	अष्टादशसर्गाः
3.	माघः	शिशुपालवधमहाकाव्यम्	द्वाविंशतिसर्गाः
4.	रत्नाकरः	हरविजयमहाकाव्यम्	पञ्चविंशतिसर्गाः
5.	शिवस्वामी	कप्फनाभ्युदयम्	विंशतिसर्गाः
6.	क्षेमेन्द्रः	दशावतारचरितम्	
7.	मङ्खकः	श्रीकण्ठचरितम्	पञ्चशितिसर्गाः
8.	श्रीहर्षः	नैषधचरितम्	द्वाविंशतिसर्गाः
9.	(एतिहासिककाव्यानि) वाक्यपतिराजः	गउडवहो	
10.	पद्मगुप्तः	नवसाहसाङ्कचरितम्	अष्टादशसर्गाः
11.	बिल्हणः	विक्रमाङ्कदेवचरितम्	अष्टादशसर्गाः

क्रमशः .....

12.	कल्हण:	राजतरङ्गिणी	अष्टौ तरङ्गा:
13.	हेमचन्द्र:	कुमारपालचरितम्	अष्टाविंशतिसर्गा:
14.	सोमेश्वर:	कीर्तिकौमुदीकाव्यम्	
15.	शास्त्रकाव्यानि भट्टि:	भट्टि:	द्वाविंशतिसर्गा:
16.	(देवकाव्यानि) गोकुलनाथ	भिक्षाटनकाव्यम्	द्वाविंशतिसर्गा:

17. अन्यानि प्रसिद्धानि देवकाव्यानि-

1. जयद्रथस्यहरचरितचिन्तामणि:,
2. लोलम्बराजस्यहरिविलासकाव्यम्,
3. वेदान्तदेशिकस्ययादवाभ्युदयम्,
4. राजचूडामणिदीक्षितस्यरुक्मिणीहरणम्,
5. कृष्णदासकविराजस्यगोविन्दलीलामृतम्,
6. अमरचन्द्रसूरि:बालभारतम्,
7. देवप्रभसूरि:पाण्डवचरितम्,
8. कृष्णानन्दस्यसहृदयानन्दम्,
9. वामनभट्टबाणस्यनलाभ्युदयम्।

18. यमककाव्यानि– 1. घटखर्परस्ययमककाव्यम् -द्वाविंशतिश्लोकै:ग्रथितम्।
2. "" - नीतिवर्मण:कीचकवधकाव्यम्-पञ्चसर्गा:।
3. "" - वासुदेवस्यनलोदयकाव्यम्-चत्वार: सर्गा:।

19. श्लेषकाव्यानि–

(1) सन्ध्याकरनन्दी कवे:-रामचरितम्,
(2) धनञ्जय कवे: -राघवपाण्डवीयम्,
(3) कविराजमाच्वभट्टस्य-राघवपाण्डवीयम्,
(4) हरदत्तसूरे:-राघवनैषधम्,
(5) विद्यामाधवस्य-पार्वतीरुक्मिणीयम्,
(6) वेङ्कटाध्वरीनस्य-यादवराघवीयम्,
(7) चिदम्बरकवे:-राघवपाण्डवयादवीयम्,
(8) दैवज्ञसूरे:-रामकृष्णविलोमकाव्यम्,

20. कवयित्र्य:–

(1) विज्जका,
(2) फल्गुहस्ति

(3) लखिमा
(4) मोरिका
(5) इन्दुलेखा
(6) वैजयन्ती
(7) मारुला
(8) विकटनितम्बा
(9) त्रिवेणी-क्षमाराव् प्रभृतय: स्त्रीकवय: संस्कृतसाहित्ये प्रसिद्धा:।

21. खण्डकाव्यानि-गीतकाव्यानि वा-खण्डकाव्यमेतत् पञ्चप्रकारकं विद्यते।

(1) ऋग्वेदकालिकं खण्डकाव्यम्
(2) भक्तिरसमयं खण्डकाव्यम्
(3) ऐतिहासिकं खण्डकाव्यम्
(4) रूपकान्तर्गतं खण्डकाव्यम्
(5) सङ्कीर्णं खण्डकाव्यम्।

(1) कालिदासस्य मेघदूतम्-अत्र पूर्वभाग:, उत्तरभागश्चेति द्वौ भागो स्त:।
(2) कालिदासस्य ऋतुसंहारम्-षट्सर्गा:, 153 श्लोकाश्च सन्ति।
(3) जयदेवस्य गीतगोविन्दम्-द्वादशसर्गात्मकं काव्यम्-कृष्णस्तुतिपरकम्।
(4) अमरुकस्य-अमरुशतकम्-मुक्तकानिश्रृङ्गाररसस्यन्दीनि प्रबन्धायमानानि प्रसिद्धानि सन्ति।
(5) गोविन्दाचार्यस्य-आर्यासप्तशती-मुक्तकस्वरूपं, श्रृङ्गाररससर्वस्वभूतम्।
(6) पण्डितराज जगन्नाथस्य ग्रन्था:-

(1) भामिनीविलास:	(2) गङ्गालहरी
(3) सुधालहरी	(4) अमृतलहरी
(5) करुणालहरी	(6) लक्ष्मीलहरी
(7) यमुनार्णवचम्पू:	(8) आसफविलास:
(9) प्राणाभरणम्	(10) जगदाभरणम्
(11) चित्रमीमांसाखण्डनम्	(12) मनोरमाकुचमर्दनम्
(13) रसगङ्गाधरश्च।	

22. इतरेमुक्तककारा:-

(1) भर्तृहरि:-शतकत्रयम्	(2) भल्लट:-भल्लटशतकम्
(3) मधुसूदन:-मधुसूदनशतकम्	(4) हरिहरोपाध्याय:-हरिहरसुभाषितम्।

23. स्तोत्रकाव्यानि–

(1) पुष्पदन्तस्य महिम्नः स्तोत्रम्

(2) मयूरस्यसूर्यशतकम्

(3) शङ्कराचार्यस्यसौन्दर्यलहरी

(4) कुलशेखरस्यमुकुन्दमाला

(5) उत्पलदेवस्यशिवस्तोत्रावली

(6) जगद्धरस्यस्तुतिकुसुमाञ्जलिः।

(ज) गद्यसाहित्यम्-

"गद्य" शब्दस्य व्युत्पत्तिः गद् "व्यक्तायां वाचि" इति धातोः "गदमदचरयमश्चानुपसर्गे" इति सूत्रेण यत् प्रत्यये सति गद्यम् इति शब्दः निष्पन्नो भवति। यस्य च अर्थः भवति "स्पष्टं कथनम्" इति "पादशून्या पदसंरचना एव गद्यमिति"। समग्रे वेदसाहित्ये पद्येन सह गद्यस्यापि स्थानं विद्यते। गद्यमिदं सरलं समासरहितं भूत्वा सुबोधकमस्ति। कुत्रचित् गद्येऽस्मिन् उपमा रूपकादीनां अलङ्काराणां च प्रयोगः विहितः। वैदिक-गद्यं सरलं स्पष्टं च विद्यते। ततः वेदाङ्गेषु, आयुर्वेदादिग्रन्थेषु, सूत्रवाङ्मयेषु च गद्यस्य प्राधान्यम् अस्ति।

(1) अपादः पदसन्तानो गद्यम् इति-दण्डिना उक्तम्।

(2) गद्यं कवीनां निकषं वदन्ति इति आलोचकाः।

(3) "वृत्तबन्धोज्झितं गद्यम्" इति आचार्यविश्वनाथः।

(4) आंग्लभाषायां गद्यम् prose प्रोज इति शब्देन ज्ञायते। प्रोज शब्दस्यार्थः भवति- "स्पष्ट-सरल-अनलंकृत-भाषायां कथनम्" इति।

गद्यस्यलक्षणम्-"ओजस्समासभूयस्त्वमेतद्गद्यस्य लक्षणम्" ओजो गुणसम्पन्नत्वं, समासबाहुल्यं च गद्यकाव्यस्य लक्षणम्।

गद्यप्रभेदा-

(1) कथासाहित्यम्-एतत् लेखकस्य कल्पनासु आधारितं भवति।

(2) आख्यायिका साहित्यम्-एतत् ऐतिहासिकतथ्याधारितं भवति।

गद्यसाहित्यस्यपरिचय-

1. सुबन्धेः-वासवदत्ता।
2. बाणभट्टस्य-हर्षचरितम्-कादम्बरी च।
3. दण्डिनः-काव्यादर्शः-दशकुमारचरितम् च।
4. धनपालस्य-तिलकमञ्जरी।
5. वादीभसिंहस्यगद्यचिन्तामणिः।
6. मेरुतुंगाचार्यस्यप्रबन्धचिन्तामणिः।

7. राजशेखरस्य-प्रबन्धकोशः।
8. वामनभट्टबाणस्यवेमभूपालचरितम्।
9. वल्लालसेनस्य-भोजप्रबन्धः।
10. महाकविवरददेशिकस्यगद्यरामायणम्।
11. महाकविविश्वेश्वरपाण्डेयस्य-मन्दारमञ्जरी।
12. अम्बिकादत्तव्यासस्य-शिवराजविजय।
13. ऋषिकेश भट्टाचार्यस्य-प्रबन्धमञ्जरी।
14. पण्डितक्षमारावस्य-कथापत्रकम्, ग्रामज्योतिः, कथामुक्तावली।
15. राजगोपालस्यशैवालिनी, कुमुदिनी।
16. कृष्णामाचार्यस्य-मन्दारवती।
17. आचार्यमेधाव्रतस्यकुमुदिनीचन्द्रः।
18. आचार्यश्रीशैलस्य-मेनका।
19. नृसिंहाचार्यस्यसौदामिनी।
20. भट्टमथुरानाथशास्त्रिणः-भारती, संस्कृतरत्नाकर।
21. शैलताताचार्यस्यदुर्गेशनन्दिनी।
22. हरिचरणभट्टाचार्यस्यकपालकुण्डला।
23. वामनकृष्णचित्तलस्यलोकमान्यतिलकचरितम्।
24. वेङ्कटेशवातनसोवानि कवेः-शिवाजी प्रबन्धः।
25. मङ्गलदेवशास्त्रिणः-प्रबन्धप्रकाशः। एवम् आधुनिक गद्यसाहित्यं विविधं विपुलं च वर्तते। संस्कृतपत्रपत्रिकाणां योगदानमपि महत्त्वपूर्णमस्ति।

संस्कृतगद्यस्यविशेषता-

1. कथा-ऐतिहासिककथाः, पौराणिककथाः, नैतिककथाः, काल्पनिककथाः, विनोदपूर्णकथाः।
2. जीवनचरित्रम्।
3. वैज्ञानिकाविष्काराः।
4. वर्णनम्, प्राकृतिकदृश्यम्।
5. विचारात्मकनिबन्धाः,
6. प्राकृतिकविषयाः, यथा-जीवजन्तुपशुपक्ष्यादिविषयाः।
7. पत्रव्यवहारात्मकाः।
8. विमर्शनात्मकाः-यथा-ग्रन्थविमर्शः, रचनाविमर्शः, सामाजिकविमर्शः।
9. मानवव्यवहारात्मकाः-यथा-निवासः, आचारव्यवहाराः, नीतिनियमादयः।
10. यात्रा।

1. गद्य-काव्यम्

1. हर्षचरितम्-(Harshacharitam)

संस्कृतगद्यसाहित्ये बाणभट्ट: दण्डिसुबन्ध्यो:अनतरं सुविख्यात: रचनाकार: वर्तते। बाणभट्टस्य पिता चित्रभानु: माता च राज्यदेवी आसीत्। सम्राजो हर्षवर्धनस्याऽऽज्ञयैवायं हर्षचरितनामकस्य गद्यकाव्यस्य रचनां कृतवान्। अस्मिन् ग्रन्थेऽष्टौ उच्छ्वासा: तत्र आद्ये उच्छ्वास-त्रये बाणेन स्वीया कथा लिखिता। चतुर्थादुछ्वासादारभ्य समाप्ति-पर्यन्तं हर्षस्य चरित्रं वर्णितम्।

"ओज: समासस्भूयात्वमेतद् गद्यस्य जीवितम्" इति विदुषां विशेषतयालङ्कारिकाणां मते गद्यलेखकानां मूर्धन्यो बाण:, गद्यकाव्यानां प्रथमं च हर्षचरितम्। व्यञ्जनाप्रयोगे वक्रोक्ति: रचनायां च बाण: सकलकविमूर्ध्न्य:। हर्षचरिते तात्कालिकोत्तरभारतस्य स्थिति: स्पष्टरूपेण प्रकाश्यते।

2. कादम्बरी (Kadambari)

बाणभट्ट:गद्यकाव्यस्य अप्रतिम:कवि: विद्यते। बाणभट्टस्य हर्षचरितम् (आख्यायिका) कादम्बरी (कथा) च सुविख्यात:वर्तते। पदानाम् उचितप्रयोग:, भावानाम् आर्जवम्, उपमाश्लेषपरिसंख्या-उत्पेक्षा-रूपक-विरोधाभास-समासोक्ति-प्रभृतीनाम्-

अलङ्काराणां स्वाभाविकसमावेश: देशकालपात्रानुसारिभाषाया:मञ्जुलसन्निवेश:, पाञ्चाली-रीतिश्च कादम्बरीं विहाय अन्यत्र न अवलोक्यते। अत्र राज्ञ: शूद्रकस्य वर्णनं, चाण्डालकन्यावर्णनं, जावालिवर्णनम्, विन्ध्याटवीवर्णनम्, महाश्वेतावर्णनम्, आच्छोदसरोवरवर्णनम्, चन्द्रापीडस्य दिग्विजयवर्णनमित्यादीनि मनोज्ञानि वर्णनानि, वीक्ष्य केनचित् उक्तम्-"वाणी वाणो वभूव:"।

गद्यकाव्येषु कादम्बर्या: सर्वोत्तमं स्थानमास्ते। भावपक्ष-कलापक्ष-लोकचरित्र-शास्त्रीयतत्त्वसन्निवेश-बाह्यजगत्-प्रभृतीनां वर्णने कवे: सूक्ष्मातिसूक्ष्मदृष्टि: सर्वत्रैव राजते। श्रीराजशेखरेण पाञ्चालीरीते: निदर्शना बाणस्य शैलीति कथिता-

शब्दार्थयो: समो गुम्फ:पाञ्चाली रीतिरिष्यते।
शीलाभट्टारिका वाचि बाणोक्तिषु च सा यदि।।

3. दशकुमारचरितम् (Dashakumaracharitam)

दशकुमारचरितम् इत्यस्य ग्रन्थस्य रचनाकार: दण्डी अस्ति। दण्डिन: जन्म काञ्चीवरमिति नाम्नाधुना प्रसिद्ध-नगरे अभवत्। काञ्च्या: पल्लवनरेशस्य पुत्रस्य शिक्षायै दण्डी"काव्यादर्शम्" रचितवान् इति प्रसिद्धास्ति। नवमशताब्द्या: ग्रन्थेषु दण्डिन: नामोल्लेख: प्राप्यते। अत: दण्डिन: समयो नवमशताब्द्या: पूर्वं भवितुमर्हति। दशकुमारचरितं दण्डिन: गद्यकाव्यं विद्यते। दशकुमाराणां चरितं काव्येऽस्मिन् वर्णितम् अत:दशकुमारचरितमिति नाम। दशकुमाराणां चरित्रचित्रणेनास्य नाम सार्थकं भवति।

महाकवे: दण्डिन:"दशकुमारचरितम्" संस्कृत-साहित्ये गद्यकाव्यत्रयेषु कथानकस्य रोमाञ्चकताया: कौतुहल-पूर्णतायाश्च कारणेन महत्त्वपूर्णं स्थानं भजते। दशकुमारचरितं श्लाघनीयं तथाख्यानककाव्यस्य ज्वलदुदाहरणं विद्यते। दण्डिन: पात्रस्य शिष्टो हास:, मधुरंव्यङ्ग्यम्,

पारस्परिकप्रेमालापः, सुखं दुःखं च काव्ये यत्र-तत्र वर्णितमस्ति। दण्डिनः शैली, सुबोधा, सरला, सरसा, तथा प्रभावमयी दृश्यते। अस्य गद्यस्यार्थस्पष्टता रसाभिव्यक्तिश्च विशिष्टगुणौ विद्यते। "दण्डिनः पदलालित्यम्" इति प्रसिद्धमस्ति। दशकुमारचरितगतासु घटनासु विस्मयजनकघटनानां प्राचुर्येणाद्भुतो रसः प्रधानम्। दण्डिनः समये भारते शैवधर्मस्य प्राधान्यमासीत्।

(झ) चम्पू Champu काव्यविवेचनम्-(मिश्रम्)

सामान्यतःकाव्यस्य भेदद्वयं प्रथते-दृश्यंश्रव्यञ्चेति। श्रव्यकाव्यमपि द्विप्रकारकम्-गद्यकाव्यं पद्यकाव्यञ्चेति। चम्पूशब्देन संस्कृतसाहित्ये "गद्यपद्यमयंकाव्यम्" इति कथ्यते। पञ्चतन्त्रादिषु साहित्यग्रन्थेषु गद्यपद्यद्वयप्रयोगो दृश्यते। गद्यकाव्यगतमर्थगौरवं पद्यकाव्यगतमर्थगौरवपुरस्कृत्य रागमयत्वं चेत्युभयं मिलितं तदधिकं चमत्कारं जनयेदिति भावनैव चम्पूकाव्यस्योत्पत्तौ कारणत्वेन सम्भाव्यते। सर्वप्रथमाचार्यो दण्डी-"गद्यपद्यमयीवाणीचम्पूरित्यभिधीयते" इति चम्पूलक्षणमुक्तवान्। उपलब्धचम्पूनां प्राचीनतमचम्पूनिर्माणकालश्च ख्रीष्टाब्दस्य दशमशतकं(915-959) निश्चीयते।

चम्पूकाव्यस्य विकासक्रम-

चम्पूकाव्यं गद्यकाव्यस्यैव परिमार्जितं रूपमिति कथनं सत्यम्। यजुर्वेदे गद्यपद्ययोर्मिश्रण-मुपलभ्यते तथापि नासौ चम्पूप्रकारः। त्रिविक्रमभट्टः "नलचम्पूः" इति संज्ञया प्रसिद्धं चम्पूग्रन्थं प्रणीय गद्येपद्ये च समानभागेन काव्यगुणानुपस्थापयितुमयतत्। नलचम्पूः मदालसाचम्पूः नवसारीशिलालेखश्चेति त्रयः प्रबन्धास्त्रिविक्रमभट्टेन विरचिताः। दिगम्बरजैनः सोमप्रभसूरि-959 तमेशवीयवर्षे यशस्तिलकचम्पू नामकं ग्रन्थं लिखितवान्। धर्मशर्माभ्युदय नामक महाकाव्यप्रणेता हरिश्चन्द्रो नाम दिगम्बरजैनः, "जीवन्धरचम्पू नामकं ग्रन्थं प्रणीतवान्।

भोजराजेन धाराधीशेन कृता "रामायणचम्पूः" एकादश- शतकोद्भवः प्रसिद्धः चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्त्वपूर्णम्। एवं च भागवतचम्पूरिति नाम्ना अनेके चम्पूग्रन्थाः प्रथन्ते। महाभारतकथामाश्रित्य अनन्तभट्टेन भारतचम्पूः नामको विशालग्रन्थो विरचितो यत्र द्वादशस्तवकेषु महाभारतकथोपनिबद्धा। दक्षिणभारतीयाश्चम्पूग्रन्थान् अधिकसंख्यायां रचितवन्तः। वरदाम्बिकापरिणयचम्पूः ऐतिहासिकदृष्ट्या महत्त्वपूर्णः। नीलकण्ठकविना कृतोऽयं ग्रन्थः समुद्रमन्थनं विषयीकरोति, स चायं नीलकण्ठः शिवलीलार्णवकर्त्तुरभिन्न एवेति ख्रीष्टशप्त- दशशतक-पूर्वार्द्ध-भागोऽस्य निश्चितः समयः। विश्वगुणादर्शचम्पूःग्रन्थे भौगोलिकं वर्णनं तीर्थानां गुणदोषविमर्शश्च कृतो बोध्यः। तथा च वैष्णवमतपोषकाश्चम्पूग्रन्थाः जैनमतावलम्बिनो वैष्णवविद्वांसः रघुनाथदासः चम्पूपुस्तकं कृतवान्।

(ञ) अलंकारविवेचनम्-

(Rhetoric)

(उपमा, रूपकम्, दीपकम्, अपह्नुति, यमक, शब्दालंकारः, अर्थालंकारश्चेति।)

"अलं करोतीति अलङ्कारः" "आभूषितं करोतीति अलंकारः" अलं कृ धातोः घञ्प्रत्ययोगेन अलंकार-शब्दः सिद्धयति। लेटिन भाषायां अलंकार शब्दस्यार्थः। AURUM "स्वर्ण" विद्यते। आभूषित-करणमेव अलंकारः। अलंकारः काव्यस्य महत्त्वपूर्णमङ्गं वर्तते। अलंकृतिरलंकारः।

"काव्य-सौन्दर्यस्य विधायकानां-सम्पूर्ण-तत्त्वानां विवेचनशास्त्रमेव अलंकार-शास्त्रम्।" अलंकारस्य त्रयो भेदाः (1) शब्दालंकार, (2) अर्थालंकार, (3) उभयालंकार श्चेति मन्यन्ते। "शब्दार्थौ सहितौ काव्यम्" इति भामह-कथनेन स्पष्टं भवति यत् "सत्यं शिवं सुन्दरम्" इत्यत्र चरमतत्त्वं सुन्दरमेव वर्तते। शिव-सुन्दरयोश्च यदा सत्येन सह संयोगो भवति, तदा संसारे मंगलोदयः भवति। ते आचार्या गुण, रस, रीति, भावादि विषयाः अलंकारस्य अन्तर्गते मन्यन्ते। भगवान् शंकरः अलंकारशास्त्रस्य शिक्षणं सर्वप्रथमं ब्रह्मणे दत्तवान्, ब्रह्मा च देवेभ्यः कतिभ्यश्च ऋषिभ्यश्च तच्छिक्षां ददौ। तदनुसृत्याष्टादश ब्रह्मशिष्या अष्टादशस्वधिकरणेषु शास्त्रमिदं निबद्धवन्तः। नन्दिकेश्वरो रसम्, धिषणो दोषान्, उपमन्युर्गुणान्, भरतश्च रूपकाणि निरूपितवान्।

अलङ्कारो नाम सौन्दर्यम्, यथा-कटक-कुण्डल-हारादिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति। तथैव अनुप्रास-उपमादिभिःअलङ्कारैः कविताकामिन्याः शोभावर्द्धनं क्रियते। येन कविताकामिनीकुरूपासत्यपिसौन्दर्यं प्राप्नोति।

अलङ्कारस्य लक्षणम्-

1. आचार्यमम्मटेनापि उच्यते-

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।। इति।

2. कविराजविश्वनाथेनापि उक्तम्-

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गनादिवत् ।।

(सा०द०)

ये शब्दार्थयोरनित्यधर्मत्वेन अतिशयशोभाकारिणः रसादीन् उपकुर्वन्ति, ते कालो अलङ्काराः। शरीरे यथा कटककुण्डलादीनां बाह्यशोभाऽऽधायकानाम् आत्मनः परोक्ष- धर्मत्वम्, तथैव काव्ये अनुप्रासोपमादीनाम् अलङ्काराणाम्।

(ख) उपमा-

"साम्यं वाच्यमवैधर्म्यवाक्यैक्य उपमाद्वयोः(सा0द-10/14) अत्र एकस्मिन्नेव वाक्ये द्वयोःपदार्थयोः (उपमा-उपमेययोः) साधर्म्येण वाच्यं सादृश्यं भवति। तत्र उपमा नाम अर्थाऽलङ्कारविशेषः। उपमायाः चत्वारः पदार्थाः भवन्ति। यथा-1. साधारणधर्मः, 2. इव उपमान्, 4. उपमेय। पूर्णा लुप्ता इति उपमा मूलतः द्विधा।

सौरभमम्भोरूहवन्मुखस्य कुम्भाविव स्तनौ पीनौ,
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले।

(सा०द०)

अस्मिन् उदाहरणे वाक्यत्रितयमेव वर्तते। वाक्यत्रये उपमात्रयी अपि अम्भोरुहमुपमानम्, सौरभम् इति प्रथमवाक्ये मुखमुपमेयम्, अम्भोरुहमुपमानम्, सुरभित्वं धर्म-"वत्" इति "उपमावाचकम्"

अत्र उपमानोपमेययोः साधर्म्येण वाच्यसादृश्यात् उपमा। एवमन्यत्रचन्द्रालोके लक्षणपद्यमेव उदाहरणम्।

(ग) रूपकम्

निषेधरहिते उपमेये यत्र उपमानस्य अभेदारोपः तत्र रूपकम्। उपमानेन उपमेयस्य उपरञ्जनमेव अस्य अलङ्कारस्य प्रामुख्यम्। इदं रूपकं मूलतःत्रिधा–1. परम्परितम्, 2. साङ्गम्, निरङ्गञ्चेति। यथा–

आहवे जगदुद्दण्डराजमण्डलराहवे।
श्रीनृसिंहमहीपाल! स्वस्त्यस्तु तव वाहवे।।

अत्र उपमेयभूते बाहौ उपमानभूतस्य राहोः अभेदारोपाद् किञ्च राजमण्डलरूपे उपमेये चन्द्रविम्बस्य उपमानभूतस्य अभेदारोपात् रूपकम्। साहित्यदर्पणे–

रूपकं रूपितोरोपो विषये निरपह्नवे।
तत्परम्परितं "साङ्गं" निरङ्गमिति च त्रिधा।। (सा०द०)

चन्द्रलोकेयत्रोपमानचित्रेण सर्ववाप्युपरज्यते।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते।। (चन्द्रालोके)

(घ) दीपकम्–

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्।। (सा०द०)

प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम्।
मेधां बुधः सुधामिन्दुर्विभर्ति वसुधां भवान्।। (चन्द्रालोके)

अत्र प्रस्तुताप्रस्तुतानां पदार्थानाम् एकेनैव धर्मेण सह सम्बन्धः तत्र दीपकम्। किञ्च, यत्र अनेकानां क्रियाणामेकेनैव कारकेण सह सम्बन्धः तत्रापि दीपकस्य लक्षणान्तरम्। उदाहरणम्–

बलावलेपादधुनापि पूर्ववत् प्रवाध्यते तेन जगज्जिगीषुणा।
सती च योषित्प्रकृतिश्च निश्चला पुमांसमग्येति भवान्तरेष्वपि।। (सा०द०)

अत्र प्रस्तुतभूतायाः निश्चतायाः योषित्प्रकृतेः अप्रस्तुतायाश्चपतिव्रतायाःस्त्रियः एकेनैव अनुगमनरूपेण क्रियाधर्मेण सह सम्बन्धः वर्णित इति दीपकम्। "दूरं समागतवती–" इति उदाहरणान्तरपद्ये एकस्या एव कारकभूतायाः नायिकायाः उतिष्ठत्यादिभिः बहुक्रियाभिः सह सम्बन्धात् दीपकमिति। चन्दालोकोदाहरणे प्रस्तुतस्य राज्ञः अप्रस्तुतयोः इन्दुबुधयोः एकेन धारणधर्मेण सह सम्बन्धः।

(ङ) अपह्नुति-

प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः

(सा०द०10/38)

गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन।
यदि श्लेषेण काक्वावान्यथियेत्साऽप्यपहृनुतिः।

(सा०द०10/39)

अत्र प्रकृतं(उपमेयम्) प्रतिषिध्य तदुपरि उपमानस्य आरोप:क्रियते तत्र अपहनुतिः। अस्याः लक्षणान्तरम्- यत्र किमपि गोपनीयं वस्तु कथमपि सूचयित्वा श्लेषेण अश्लेषेण वा गोपाय्यते तत्रापि अपहृनुतिः भवति। प्रथमस्य अपहृनुतयलङ्कारस्य उदाहरणं यथा-

नेदं नभोमण्डलममबुराशिः नैताश्च ताराः नवकेनभङ्गाः,
नायं शशीकुण्डलितः फणीन्द्रो, नासौ कलङ्कःशयितो मुरारिः।।

अत्र नभोमण्डल-तारा-शशि-कलङ्कानां प्रतिषेधात् परं तेषामुपरि अम्बुराशि-नवफेन-भङ्गफणीन्द्र-मुरारि प्रभृतीनामुपमानानाम् आरोपात् अपहनुतिः। काले वारिधारणाम्--" इत्याद्युदाहरणं द्वितीयलक्षणस्य। चन्द्रलोके- अपहनुत्यलङ्कारस्य लक्षणम्-" अतथ्यमारोपयितुं तथ्यापास्तिरपहनुतिः!" तत्र अपहनुतिभेदानामपि लक्षणोदाहरणानि प्रदर्शितानि सन्ति। " नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्" इति।

(च) यमकम्-

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।

(सा०द०10/8)

आवृत्तवर्णस्तवकन्दाङ्कुरं कवेः।
यमकं प्रथमाधुर्यमाधुर्य वचसो विदुः।।

(चन्द्रालोके 5/8)

अर्थवन्तः भिन्नार्थकस्य स्वरव्यञ्जनसमुदायस्य तेनैव क्रमेण पुनरावृत्तिःनाम यमकम्। अत्र द्वयोरपि पादयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्त्वम्। क्वचिदेकस्य सार्थकत्वम् अपरस्य निरर्थकत्वम्। उदाहरणम्-

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः।।

पलाश-पलाश इति सुरभिं-सुरभिं इत्यत्र च द्वयोः सार्थकत्वम्। लतान्त लतान्त इत्यत्र प्रथमस्य निरर्थकत्वम्, पराग पराग इत्यत्र द्वितीयस्य। एतेषां क्रमेण आवृत्तेः यमकम्। चन्द्रालोकस्य लक्षणपद्यमेव उदाहरणम्। स्तवक-स्तवक इत्यत्र द्वितीयस्य निरर्थकत्वम्। माधुर्य-माधुर्य इत्यत्र प्रथमस्य। परन्तु तेनैव क्रमेण आवृत्तेः यमकम्।

अलङ्कारः द्विविधः—1. शब्दालङ्कारः, 2. अर्थालङ्कारश्च।

(छ) शब्दालंकारः-(अलङ्काराः त्रिधा विभज्यते।)

शब्दाऽलङ्काराः-अनुप्रास-यमक-श्लेषादयः-यत्र अलङ्कारे शब्दः न परिवर्तनं सहते, तत्र शब्दालंकारः।

(ज) अर्थालंकारः-

अर्थालंकाराः-उपमोत्प्रेक्षासन्देहरूपकसमासोक्त्यादयः, यत्र तु शब्दपरिवर्तनेऽपि अलङ्कारत्वेन काऽपि क्षतिः, तत्र अर्थाऽलङ्कारः।

(झ) शब्दार्थोभयाऽलङ्कारः-एकः पुनरूक्तवदाभासः, शब्दस्य परिवर्तनसहत्वे असहत्वे च शब्दार्थोभयालङ्कारः।

(ञ) रीतिः-(वामनाचार्यः) रीतिरात्माकाव्यस्य। पदसंघटना रीतिः। षड् रीतयः-1. वैदर्भी, 2. गौडी, 3. पाञ्चाली, 4. लाटी, 5. मागधी, 6. आवनती।

(ट) वक्रोक्तिः(सम्प्रदायः)-आचार्यकुन्तकः-वक्रोक्तिकाव्यजीवितम्वक्रोक्तिः पञ्चधा-

1. वर्णवक्रता, 2. पदवक्रता, 3. वाक्यवक्रता, 4. अर्थवक्रता, 5. उक्तिवक्रता।

(ठ) ध्वनिसम्प्रदायः-आनन्दवर्धनः-काव्यस्यात्मा ध्वनिः। ध्वनेः त्रयः भेदाः सन्ति-1. रस-ध्वनिः, 2. अलङ्कार-ध्वनिः, 3. वस्तु-ध्वनिः।

अलङ्कारशास्त्रस्य महत्त्वपूर्णाः कृतय-

क्रमांकः	कृतिः	कृतिकारः
1.	साहित्यदर्पणः	आचार्यः विश्वनाथः
2.	रसगङ्गाधरः	पण्डितराजः जगन्नाथः
3.	ध्वन्यालोकः	आनन्दवर्धनाचार्यः
4.	काव्यमीमांसा	राजशेखरः
5.	चन्द्रालोकः	जयदेवः
6.	काव्यप्रकाशः	आचार्यः मम्मटः
7.	वक्रोक्तिकाव्यजीवितम्	कुन्तकः
8.	नाट्यशास्त्रम्	भरतमुनिः
9.	कुवलयानन्दः	अप्पयदीक्षितः
10.	सरस्वतीकण्ठाभरणम्	भोजराजः
11.	दशरूपकः	धनञ्जयः
12.	काव्यादर्शः	आचार्य दण्डी
13.	काव्यालङ्कारः	भामहः
14.	काव्यालङ्कारसूत्राणि	वामनः
15.	ध्वन्यालोकलोचनः	अभिनवगुप्तः
16.	औचित्यविचारचर्चाः	क्षेमेन्द्रः

(ट) पद्य-काव्यम्

1. रघुवंश (Raghuvansham)

महाकवेः कालिदासस्य रघुवंशम् एकोनविंशति-सर्गात्मकम् एकं लालित्यपूर्णं महाकाव्यम् अस्ति। अत्र रघोः वंशस्य कथा निबद्धा अस्ति। रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णितनृपैः सह भेदःआपतति, परन्तु वायुपुराण-वर्णित रामवंशावल्या सह रामवंशवर्णित-रामवंशावली भूयसा सामञ्जस्यं धारयति।

एकोनविंशति सर्गेषु वर्णिता रघुवंशीयराज्ञां नामावलिः यथाक्रमम् अत्र उल्लिखिता वर्तते। यथा-

1. दिलीपः	2. रघुः	3. अजः,
4. दशरथः	5. रामः	6. कुशः
7. अतिथिः	8. निषधः	9. नलः
10. नभः	11. पुण्डरीकः	12. क्षेमधन्वा
13. देवानीकः	14. अहीनगुः	15. पारियात्रः
16. शिलः	17. उन्नाभः	18. वज्रनाभः
19. शंखणः	20. व्युषिताश्वः	21. विश्वसहः
22. हिरण्यनाभः	23. कौशल्यः	24. ब्रह्मिष्ठः
25. पुत्रः	26. पुष्यः	27. ध्रुवसन्धिः
28. सुदर्शनः	29. अग्निवर्णः।	

2. मेघदूतम् (Meghadutam)

कविकुलगुरोः कालिदासस्य मेघदूतम् अति प्रसिद्धं अस्ति। मेघदूते स्वाऽनुष्ठेय-कार्यप्रमादजन्य-भर्तृशापाद्वर्षभोग्यप्रियाविश्लेषितस्य कस्यचिद्यक्षस्य मेघं सम्बोध्य स्ववल्लभाऽर्थं प्रेषणीयसन्देशकथनं प्रदर्शितं महाकविना। रामगिर्याश्रमस्थेन यक्षेण अलकापुर्यां विद्यमानायाः प्रियायाः सकाशे सन्देश-प्रेषणाऽऽर्थं मेघस्याऽऽसादनाय मार्गमन्तराऽऽपतितानां तत्तद्देशानां यादृशं विवरणं कृतं, तेनाऽस्य कविवरस्य भौगोलिकज्ञानेऽसाधारणवैभवं स्फुटं भवति। प्रसादगुणसमलं कृतेऽत्र काव्ये यथा रस-ध्वनि-अलंकाराणामुत्कर्षो दृश्यते। काव्यमिदं खण्डकाव्यलक्षणाऽऽक्रान्तं। खण्डकाव्यलक्षणं यथा साहित्यदर्पणे-"खण्डकाव्यं भवेत्काव्यस्यैकदेशाऽनुसारि च" इति।

गीतिकाव्ये मेघदूतस्य स्थानम्-

गीतिकाव्यस्य आदितमं काव्यं मेघदूतम्। अस्मिन् काव्ये कुवेरशापविमुक्तस्य यक्षस्य मनोव्यथायाः मार्मिकं चित्रमस्ति। पूर्वमेघः बाह्यप्रकृतेः भारतभूमेश्च मनोहरं चित्रं प्रस्तौति। संस्कृतसाहित्यस्यातिमहार्हं रत्नमस्ति मेघदूतम्। मेघदूते तु अचेतनस्य मेघस्य दूतत्वेन प्रेषणं कालिदासस्य विचित्राऽस्ति कल्पनेयम्।

3. किरातार्जुनीयम् (Kiratarjuniyam)

किरातार्जुनीयम् इत्यस्य ग्रन्थस्य लेखकः महाकविः भारविःशैवमतावलम्बी प्रकाण्डपण्डितःराजनीतेर्महान् ज्ञाता, वीररसवर्णनकुशलःअलङ्कृतशैल्याः प्रवर्तकः आसीत्।

कुशीकगोत्रीयाः ब्राह्मणाः" आनन्दपुरे" निवसन्ति स्म। अस्मिन्नेव वंशे नारायणस्वामी आसीत्। तस्य पुत्रः दामोदरः " भारवि" आसीत्। भारविः दण्डिनः प्रपितामहः आसीत्। तस्य कालस्थितिः 600 ईसवीयसमीपे मन्यते। संस्कृतविद्वत्समाजे- " भारवेरर्थगौरवम्", "नारिकेलफलसम्मितं वचो" "स्फुटता न पदैरपाकृता" इत्यादि वचनानि सुप्रसिद्धानि एव।

महाभारतकथामाश्रित्य महाकविभारविना अलंकृतकलापक्षप्रधानशैल्या विरचितं अष्टादशसर्गात्मकं वीररसप्रधानम् अर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितं "किरातार्जुनीयम्" नाम एकमेव महाकाव्यं समुपलभ्यते। अस्य ग्रन्थस्य शुभारम्भः"श्री" शब्देन, सर्गान्तः "लक्ष्मी" शब्देन च भवति। अत्र अर्जुनस्य किरातवेशधारिणा शङ्करेण सह युद्धं वर्णितम्। किराताश्च अर्जुनश्च किरातार्जुनौ(द्वन्द्वः) किरातार्जुनौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्। अस्य ग्रन्थस्य नायकः अर्जुनः, नायिका च द्रौपदी वर्तते। अर्थगौरवं, स्पष्टता, पुनरुक्तेरभावः अलंकृतशब्दयोजनाश्च अस्य महाकाव्यस्य वैशिष्ट्यम्।

4. शिशुपालवधम् (Shishupalavadham)

शिशुपालवधम् इत्यस्य ग्रन्थस्य लेखकः महाकविमाघः गुर्जरदेशे "श्रीमाल" नामक स्थाने विशिष्टब्राह्मणपरिवारे जन्म लेभे। तस्य पितुः नाम दत्तक" आसीत्। अस्य महाकवेःमाघस्य समयः700-800 मध्ये स्वीकरणं सर्वथा युक्तियुक्तं स्यात्। महाभारतीयां कथामाश्रित्य विंशतिसर्गात्मकं "शिशुपालवधमहाकाव्यम्" इति एका एव कृतिः समुपलभ्यते माघस्य। संस्कृतसाहित्ये पाण्डित्यमयशैल्याः चरमोत्कर्षोदृश्यते श्रीमाघे।

पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य इन्द्रप्रस्थनगरीं समधिकृतवन्त आसन्। युधिष्ठिरः राजसूययज्ञं कर्तुमैच्छत्। यज्ञेऽस्मिन् भगवान् श्रीकृष्णःसर्वकर्मद्रष्टा आसीत्। ततः सदस्यपूजाया अवसरस्समुपस्थितः। भीष्मोऽस्यै प्रतिष्ठायै भगवान् श्रीकृष्ण एव महत्तम इति उद्घोषितवान्। युधिष्ठिरश्च भगवन्तं श्रीकृंष्णमेव पूजयामास। शिशुपालः भगवतः श्रीकृष्णस्य इदं सम्मानं द्रष्टुं नाशकत्। स क्रोधाविष्टः रक्तीकृतनेत्रश्च सन् उच्चमुष्णञ्च श्वसितुमारेभे। धर्मराजं युधिष्ठिरं च निन्दित्वा भगवतः श्रीकृष्णस्योपरि नानाविधानाक्षेपान् कर्तुं प्रवृत्तः। ततः शतसंख्यकेषु अपराधेषु पूर्णेषु, तद्वधेऽधिकं विलम्बमनुचितम्मत्वा भगवान् श्रीकृष्णः सुदर्शनचक्रेण शिशुपालस्य शिरश्चिच्छेद।

महाकविमाघेन विंशतिसर्गात्मके स्वीये शिशुपालवधे महाकाव्ये सर्वेषामेव रसानां साधिकारं सहृदयपरितोषं कुर्वता प्राधान्यैन वीररस तदङ्गतया च सर्वेऽन्ये रसाः यथास्थानं विन्यस्ताः। अस्य कृतौ प्रायः कोऽपि श्लोकः अलङ्काररहितो न दृश्यते। यथा-

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टा-द्वयपरिवारितवारणेन्द्रलीलाम्।। 4/20

नवसर्गगते माघे नवशब्दो न विद्यते। इति।

5. नैषधीयचरितम् (Naishadhiyacharitam)

नैषधीयचरितम् अस्य महाकाव्यस्य लेखक: महाकविना श्रीहर्षेण नलदमयन्त्या: स्नेहकथाय: चित्ताकर्षकं वर्णनं द्वाविंशतिसर्गेषु समाहितम्। सौन्दर्यातिशयसमन्विता विदर्भराजतनया भैमी नैषधीयचरितमहाकाव्यस्य प्रधानभूता नायिका विद्यते। तस्यामादर्शनायिकाया: सर्वे गुणा: समाविष्ट: सन्ति। कुण्डिनपुर्या अधिपते: भूपते: भीमसेनस्य आत्मजा दमयन्ती त्रिलोकललनाललामभूत अतीव कमनीया वर्तते। चन्द्रमस: सारभागं समाकृत्य दमयन्त्या: सौन्दर्यातिशयविनिर्माणं वेधस विहितामित्येवंरूपेण कल्पते महाकवि: श्रीहर्ष:। सा दमयन्ती अनन्यसुन्दरी, उच्चकुलप्रसूता अनुरागवती चासीत्।

यथा–

हतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।
कृतमध्यविलं विलोक्यते धृतगम्भीरखनीलिमा।।
इतीरिता पत्त्ररथेन तेन हीणा च हृष्टा च बभाण भैमी।
चेतो नलङ्कामयते मदीयं नाऽन्यत्र कुत्राऽपि च साऽभिलाषम्।।

6. बुद्धचरितम् (Buddhacharitam)

बुद्धचरितम् इत्यस्य रचनाकार: महाकवि: अश्वघोषोऽपि बौद्धधर्म-प्रचाराय काव्य विरचितवान्। हृदयगतभावनाया उद्बोधिका भवति कविता। कविता मानवहृदयमुत्तेजयति समाकर्षयति च। बुद्धचरित्रमहाकाव्ये महात्मन: गौतमबुद्धस्य चरित्रं वर्णितमस्ति। अस्मिन् ग्रन्थे 28 सर्गा: आसन् परञ्च सम्प्रति केवलं 18 सर्गा: समुपलभ्यन्ते। तेषु अपि 14 सर्गा: एव अश्वघोषविरचिता: सन्ति। सौन्दरनन्दस्यान्ते कविना स्वयमेवोक्तम्–

"यथा तिक्तौषधिं पानाय मधुना सम्मेल्यते तथैवाहं धर्मप्रचाराय काव्यस्याश्रयं गृहीतवानस्मि।" अत एव अश्वघोषस्य काव्यकृति:बौद्धधर्मस्य दार्शनिकविचाराणां प्रचारिका विद्यते। अस्यै प्रामाणिका ग्रन्था: सन्ति–1. बुद्धचरितम्, 2. सौन्दरनन्दम्, 3. शारिपुत्रप्रकरणञ्चेति।

जीवनचरितं स्थितिकालश्च–

अश्वघोष: साकेतस्य (अयोध्याया:) निवासी आसीत्। सुवर्ण्याक्ष्या: पुत्र: अश्वघोष: तार्किक: रामायण-महाभारतयो: विशेषज्ञश्चासीत्। राज्ञ: कनिष्केन सह सम्बन्ध: अपि आसीत्। अत: अश्वघोषस्य स्थितिकाल: 150 ईस्वीपूर्व मन्यते।

7. साहित्यदर्पण–

सहित्यदर्पणस्य लेखक: कविराजो विश्वनाथ: उत्कलप्रदेशे ब्राह्मणकुले जन्म लेभे। चण्डीदास: पितामहानुज:, चन्द्रशेखरश्च पिताऽऽसीत्। विश्वनाथस्य रचनासु साहित्यदर्पण: सर्वाधिक: प्रख्यातो वर्तते। अस्मिन् ग्रन्थे श्रव्यदृश्ययोरुभयोरेव प्रकारयो: काव्ययो: वर्णनमास्ते। अयं ग्रन्थ: सम्पूर्णकाव्यशास्त्रस्य प्रतिनिधिभूतो विद्यते। अस्मिन् ग्रन्थे (10) दश परिच्छेदा: सन्ति।

1. **प्रथमपरिच्छेदे**—काव्यलक्षणस्य, काव्यप्रयोजनस्य, काव्यभेदस्य च वर्णनमास्ते।
2. **द्वितीयपरिच्छेदे**—वाक्यपदयोर्लक्षणानन्तरं शब्दस्याभिधालक्षणाव्यञ्जनानां विवेचनमास्ते।
3. **तृतीयपरिच्छेदे**—रसानां, भावानाम्, नायकनायिकयोर्भेदानाञ्च विस्तरेण वर्णनं कृतमास्ते।
4. **चतुर्थपरिच्छेदे**—ध्वनिकाव्यस्य गुणीभूतव्यङ्ग्यकाव्यस्य च विवेचनं कृतमास्ते।
5. **पञ्चमपरिच्छेदे**-व्यञ्जनावृत्तेः संस्थापनाया युक्तीनां प्रदर्शनं कृतमास्ते।
6. **षष्ठपरिच्छेदे**—नाटकस्य पूर्णतया विवेचनं कृतमास्ते।
7. **सप्तमपरिच्छेदे**—काव्यदोषानां सोदाहरणं निरूपणं कृतमास्ते।
8. **अष्टमपरिच्छेदे**—गुणानां निरूपणं कृतमास्ते।
9. **नवमपरिच्छेदे**-चतसृणां रीतिनां वर्णनं कृतमास्ते।
10. **दशमपरिच्छेदे**—शब्दार्थालङ्काराणां विशदं विवेचनं कृतमास्ते।

(ठ) रुपक-काव्यम्

(संस्कृत-नाटकसाहित्यम्)

संस्कृतसाहित्ये वैदिकयुगात् नाटकानां परम्परा प्रवाहः विद्यते। नाटक शब्दोऽयं "नट्" धातोः निष्पन्नो वर्तते यस्यार्थास्सन्ति-नृत्यम्, अभिनयः, अनुकरणञ्च। एतदङ्गभूतानां ताण्डवलास्यनृत्यानाम् अभिनयगीतवाद्यादीनाञ्च सम्बन्धः शङ्करपार्वतीप्रजापतिनारदादिभिरभिहितः प्राचीनग्रन्थेषु वर्णितः। सर्वेन्द्रियाणां नयनं प्रधानम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। लोके विद्यमानानाम् इतिवृत्तानां घटनानां वा चित्रणमेव नाटकम्। नाटकान्तम् हि साहित्यम् इति। महाकविना कालिदासेन उक्तम् "नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्" संस्कृतसाहित्ये दशरूपकाण्यष्टादशोपरूपकाणि च सन्ति।

1. "काव्येषु नाटकं रम्यम्"
2. अवस्थायाः अनुकरणमेव नाटकमस्ति।
3. अवस्थाविशेषस्य अनुकरणं कृत्वा आनन्द-मनोरंजन-प्राप्तिकरणमेव नाटकम्।
4. अवस्थानुकृतिः नाट्य।
5. नाट्यशास्त्रं पञ्चमो वेदः इति भरतमुनिः मन्यते।
6. जग्राह पाठ्यं ऋग्वेदात्सामभ्यो गीतमेव च, यजुर्वेदादभिनयान् रसानाथर्वणादपि। ब्रह्मा ऋग्वेदात् सम्वादं, सामवेदात् गानं, यजुर्वेदात् अभिनयम्, अथर्ववेदात् रसञ्च गृहीत्वा नाट्यवेदमरचयत्।
7. "नाट्यकारकृतप्रसिद्ध कल्पितकथासार ग्रथितरचनानुसारी रङ्गपीठे प्रयोक्तृप्रशिक्षितनटाभिनयसंगीतादिजन्यरसद्वारा प्रेक्षकाणां विनोदविश्रान्त्युपदेशजनको व्यापारः नाटकं रूपकं वा।"
8. "रूपारोपात्तु रूपकम्" रूपकं परिभाषयन् साहित्यदर्पणकारः विश्वनाथ-कविराजः। अर्थात् दृश्य-काव्यं नटे रामादिस्वरूपारोपादूपकमित्युच्यते। अंगेन, वचनेन,

वेशरचनयास्तम्भस्वेदादिभिश्च रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयपदव्यवहार्यम्। स एव नटे रामादिरूपारोपात् "रूपकम्" इत्युच्यते। तत्र रूपकाणि तु दश एव यथा- 1. नाटकं, 2. प्रकरणं, 3. भाणः, 4. व्यायोग, 5. समवकारः, 6. डिमः, 7. ईहामृगः, 8. अंकः, 9. वीथी, 10. प्रहसनं च।

1. नाटकम्-

नाटकं ख्यातवृत्तं स्यात् पंचसन्धिसमन्वितम्।
विलसद्धैर्यादिगुणवद्युक्तम् नानाविभूतिभिः।।

अत्र ख्यातं रामायणादिप्रसिद्धं वृत्तम्, यथा-रामचरितादिः। उदाहरणम्- अभिज्ञानशाकुन्तलम्, स्वप्नवासवदत्तम्, प्रतिमानाटकम् इत्यादिः।

2. प्रकरणम्-

भवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृंगारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।।

यथा-कविकल्पित-लौकिकवृत्तान्त-जन्यत्वे सति विनाश-शालिधर्मकामार्थतत्परधीर-प्रशान्मविप्रामात्यवणिकन्यतमनायक-वच्छृंगाररसप्रधानदृश्यकाव्यत्वम् प्रकरणत्वम्।

3. भाणः-

भाणः स्याद् धूर्तचरितो नानावस्थान्तरात्मकः।
एकांक एक एवात्र निपुणो पण्डितो विटः।।

अत्र आकाशभाषितस्य परवचनमपि स्वयमेवानुवदन उत्तरप्रत्युत्तरे कुर्यात्। शृंगार-वीररसौ च सौभाग्य शौर्यवर्णनया सूचयेत्। प्रायेण भारती क्वापि कैशिक्यपि वृत्तिर्भवति। लास्यांगानि गेयपदादीनि, उदाहरणं लीलामधुकरः।

4. व्यायोगः-

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः।।

"सौगन्धिकाहरणम्" अस्य व्यायोगाख्यरूपकस्य प्रतिनिधिभूतमुदाहरणमस्ति।

5. समवकारः-

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम्।
संधयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे।।

तत्र शास्त्रविरोधेन कृतो धर्म शृंगारः। अर्थलाभार्थ कल्पितो अर्थ शृंगारः। प्रहसन शृंगारः काम शृंगारः। समवकीर्यन्ते बहवोऽर्था अस्मिन् इति समवकारः। यथा-समुद्रमन्थनम्।

6. डिमः-

मायेन्द्रजालःसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः।।

त्रिपुरदाहस्तु डिमाख्यरूपकस्य प्रतिनिधिभूतम् उदाहरणम् अस्ति।

7. ईहामृगः-

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः।
मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा।।

मिश्रं ख्याताख्यातम्। अन्यः प्रतिनायकः। पताका-नायकस्तु नायक-प्रतिनायकयोर्मिलिता दश। नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीतीहामृगः। यथा-कुसुमशेखर विजयादिः।

8. अङ्कः-

उत्सृष्टिकांक एकांको नेतारः प्राकृता नराः।
रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम्।।

इमं च केचित् "नाटकाद्यन्तः पात्यंकपरिच्छेदार्थमुत्सृष्टिकांकनामानम्" आहुः। अन्ये तु उत्क्रान्ता विलोमयपा सृष्टिर्यत्र इत्युत्सृष्टिकांकः। यथा- शमिष्ठाययातिः।

9. वीथी-

वीथ्यामेको भवेदंकः कश्चिदेकोत्र कल्प्यते।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः।।

एतानि च अंगानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि। स्पष्टतया नाटकादिषु विनिविष्टान्यपिइ ह उदाहृतानि। वीथीव नानारसानां चात्रमालारूपतया स्थितत्वाद् वीथीयम्। यथा-मालविकाग्निमित्रम्।

10. प्रहसनम्-

भाणवत् सन्धिसन्ध्यंग-लास्यांगाङ्कैर्विनिर्मितम्।
भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्।।

तत्र उदाहरणं शुद्धप्रहसनस्य कन्दर्पकेलिः संकीर्णप्रहसनम् यथा, धूर्तचरितम्, लठकमेलकादिश्च।

नाटकादि-दशरूपक-निरूपण-चक्रम्

रूपकविधा	अङ्कः	नायकः	कथावस्तुः	रसः	उदाहरणम्	विशिष्टविवरणम्
1. नाटकम्-	5-10	01धीरोदात्तः	इतिहासप्रसिद्धः	शृंगार/वीर	अभिज्ञान शाकुन्तलम्	सर्वोत्तमगुण-गणान्वितः
2. प्रकरणम्-	10	01धीरो-प्रशान्त	लौकिकं कल्पितञ्च	शृंगारः	मृच्छकटिकम्	मन्त्री वैश्य-ब्राह्मणनायकाः
3. भाणः-	01	01विटः	कविकल्पितम्	शृंगार/वीर	लीलामधुकरम्	धूर्तचरित्रयुतः
4. व्यायोगः	01	01धीरोदात्तः	इतिहासप्रसिद्धः	हास्य/ शृंगार	सौगन्धिका-हरणम्	पुरुषाधिक्यम्
5. समवकारः	03	12देवता/ मानव	इतिहासप्रसिद्धः	वीरः	समुद्रमन्थनम्	गायत्री-उष्णिकारि
6. डिमः,	04	16विवधाः	ऐतिहासिकः	रौद्रः	त्रिपुरदाहः	मयेन्द्रजालादियुताः

क्रमशः .....

7. ईहामृगः,	04/01	01/06	ऐतिहासिकः विबधाः	शृंगारः कल्पितः	कुसुमशेखर-विजयः	दिव्यनायिका हेतुकःकलहः
8. अंकः,	01	01. साधारणः	इतिहासप्रसिद्धः	करुणः	शर्मिष्ठाययातिः	स्त्रीविलापाधिक्यम्
9. वीथी	01	01. साधारणः	कविकल्पितः	शृंगारः	मालविकाग्नि-मित्रम्	त्रयोदश अंगानि भवन्ति
10. प्रहसनं	01	01. निन्दनीयः	कविकल्पितः	हास्यः	कन्दर्पकेलिः/ धूर्तचरि	भाणवदिदं प्रहसनम्

पारिभाषिकशब्दा-

1. नान्दी-

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता।।

अर्थः-देवद्विजनृपाणां आशीर्वादसंयुक्ता स्तुतिः अनेन (नान्दी पाठेन) क्रियते।

2. सूत्रधारः-

नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात् सबीजकम्।
रङ्गदैवतपूजाकृत् सूत्रधार उदीरितः।।

अर्थ-बीजसहितं नाट्यानुष्ठानं सूत्रं कथ्यते तस्य संचालनकर्ता सूत्रधारः कथ्यते।

3. आमुखः प्रस्तावना वा-

नटी विदूषको वापि परिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते।।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।।

अर्थः-यत्र नटी, विदूषकः अथवा परिपार्श्विकः सूत्रधारेण सह स्वकार्यविषये विचित्रैः वाक्यैः एवं प्रकारेण वार्तालापं करोति येन प्रस्तुता कथा सूच्यते तदेव आमुखः अथवा प्रस्तावना उच्यते।

4. विष्कम्भकः-

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भकः आदावङ्कस्य दर्शितः।।

5. प्रवेशकः-

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कस्यान्तर्विज्ञेयः शेषं विष्कम्भके यथा।।

6. स्वगतम्/आत्मगतम्-

अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्।

7. प्रकाशम्-

सर्वश्राव्यं प्रकाशं स्यात्।

8. अपवारितम्-

रहस्यं च यदन्यस्य परावृत्य प्रकाश्यते तद्भवेदपवारितम्।

अर्थः-समीपस्थपात्रेभ्यः मुखं परावृत्य कस्मै पात्राय रहस्यं निवेदयति तदेव अपवारितम्।

9. जनान्तिकम्-

त्रिपताककरेणान्यानपवार्यान्तरा कथाम्।
अन्योन्यामन्त्रणं यत्स्यात् जनान्ते तज्जनान्तिकम्।।

अर्थ-जनान्तिकरूपवक्ता मुखाग्रे तिस्रः अङ्गुल्यः धृत्वा अन्यपात्रं प्रति आवरणं कृत्वा अभीष्टपात्राय कर्णे शनैः शनैः निवेदयति तदेव जनान्तिकम्।

10. कञ्चुकी-

अन्तः पुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।।

अर्थः-कञ्चुकी शिष्टजनो भवति। अयं गुणवान्, वृद्धः सर्वकार्यदक्षश्च भवति।

11. पञ्च अर्थप्रकृतयः-बीज-बिन्दु-पताका-प्रकरी-कार्यार्थप्रकृतयः पञ्च।

12. पञ्च अवस्था-आरम्भ-प्रयत्न-प्राप्त्याशा-नियताप्ति-फलागमावस्थाः।

13. पञ्चसन्धयः-मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहण सन्धयः।

14. नायकलक्षणम्-

स्थायी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजो वैदग्ध्यशीलवान् नेता।।

त्रिविधः नायकः- (क) धीरोदात्तः, (ख) धीरोद्धतः, (ग) धीरललितश्च।

(क) धीरोदात्तनायक-

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढ़मानो धीरोदात्तो दृढव्रतः कथितः।।

अर्थ-आत्मप्रशंसी, क्षमावान्, अतिगम्भीरः, अतिपराक्रमी, गर्वनिगूढः, दृढ़निश्चयः धीरोदात्त नायकः भवति।

(ख) धीरोद्धतनायक-

मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः।।

अर्थः-धीरोद्धतनायकः मायावी, प्रचण्डःचञ्चलः, अतिगर्वी, आत्मप्रशंसी च भवति।

(ग) धीरललितनायक-

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्।

अर्थः-निश्चितः(चिन्तारहितः) अहोरात्रः कलाप्रियः धीरललितनायकः भवति।

नाटकस्य स्वरूपम्संस्कृतसाहित्यं भागद्वये विभज्यते-

(1) श्रव्यकाव्यम्-अस्यकाव्यस्य पाठेन श्रवणेन च आनन्दस्य प्राप्तिः भवति। यथा-कथा, आख्यायिका प्रभृतयः।

(2) दृश्यकाव्यम्-दृश्यकाव्ये आनन्दस्य प्राप्तये दर्शनीयस्य वस्तुनः तथाविधं सामर्थ्यं भवति। नाटकमस्यां श्रेण्याम् आगच्छति। अभिनयद्वारा अधिमञ्चं नाटकं प्रस्तुतीक्रियते।

नाटकसाहित्यस्यपरिचय-

(1) अश्वघोषस्य-शारिपुत्रप्रकरणे-षट् अङ्काः सन्ति।

(2) कालिदासस्य-अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयं चेति नाटकत्रयम्।

(3) विशाखदत्तस्य-मुद्राराक्षसम्, मुद्रया गृहीतो राक्षसःयत्रेति तन्मुद्राराक्षसमिति।

(4) भवभूतेः-महावीरचरितम्, मालतीमाधवम्, उत्तररामचरितम् इति नाटकत्रयम्।

(5) हर्षनृपतेः-रत्नावलीः, प्रियदर्शिका, नागानन्दनम् (पञ्चाङ्काः) इति तिस्रः नाटिकाः।

(6) भट्टनारायणस्य-वेणीसंहारम् (महाभारतकथामाश्रित्य वीररस-प्रधानम्)

(7) शूद्रकस्य-मृच्छकटिकम् (दशाङ्काः)।

(8) भासस्य-(त्रयोदशरूपकाणि)

1. प्रतिज्ञायौगन्धरायणम्, 2. अविमारकम्, 3. स्वप्नवासवदत्तम्, 4. प्रतिमानाटकम्, 5. अभिषेकनाटकम्, 6. मध्यमव्यायोगः, 7. पञ्चरात्रम्, 8. दूतवाक्यम्, 9. दूतघटोत्कचम्, 10. कर्णभारः, 11. उरुभङ्गम्, 12. बालचरितम्, 13. दरिद्रचारुदत्तम् चेति।

संस्कृतनाटकस्य विशेषता-

नाटकं साहित्यस्य महत्त्वपूर्णमङ्गं वर्तते येन प्रकारेण चित्रस्य भिन्न-भिन्नवर्णाः सहृदयस्य चित्ते वर्णस्य आनन्दस्य अनुभूतिं कारयन्ति तेनैव प्रकारेण नाटके प्रयुक्तनायकादीनां वेशभूषा-नेपथ्य-रचनादयः दर्शकस्यहृदयोपरि विशिष्टं प्रभावयन्ति आनन्दसृष्टिञ्च कुर्वन्ति। अध्ययनप्राप्तैतादृशं किमपि ज्ञानं, शिल्पं, विद्या, कला, योगः, कार्यं नास्ति यन्नाटके न दरीदृश्यते। भरतमुनिना नाटकस्य त्रीणि उद्देश्यानि प्रतिपादितानि। यथा-

(1) हितोपजननम्-व्यक्तेः समाजस्य च कल्यानार्थम् उपदेशप्रदानम्।

(2) विश्रान्तिजननम्-व्यक्तेः समाजस्य च शान्तिप्रदानम्।

(3) विनोदजननम्-व्यक्तेः समाजस्य च मनोरञ्जनम्।

1. स्वप्नवासवदत्तम् (Svapnavasavadattam)

नाट्यसाहित्ये महाकविभासस्य महती प्रसिद्धिरस्ति। कालिदासस्य समये भासस्य महती प्रसिद्धिः आसीत्। स्वप्नवासवदत्ते कवि भासः पात्राणां चरित्रचित्रणे नाट्यकलायाः अद्भुतं चित्रं चित्रयति। विशुद्धस्य विशदप्रेम्णः यादृशं वर्णनं भासेन कृतं, तादृशं संस्कृतसाहित्ये सुदुर्लभम्। स्वप्नवासवदत्तं संस्कृतसाहित्यस्य जाज्वल्यमानं महार्हं रत्नं विद्यते इति नात्र संशयः। नाटकमिदं यथैव साहित्यिकदृष्ट्या महत्त्वास्पदं, तथैव व्यावहारिकदृष्ट्यापि परमोच्चस्थानं लभते।

भासः मानव-हृदय-विकार-मर्मज्ञः, प्रकृतिवर्णनस्य महान् शिल्पी, रसालङ्कारयोः भाव-कलापक्षयोश्च प्रियः कविरिति प्रतिभाति।

2. अभिज्ञानशाकुन्तलम् (Abhijnanashakuntalam)

महाकविकालिदासस्य अभिज्ञानशाकुन्तलम् अस्ति एकं समस्याप्रधानं घटनाप्रधानं वा नाटकम्। नाटकेऽस्मिन् नायिका शकुन्तला नायकेन राज्ञा दुष्यन्तेन गान्धर्वविवाहविधिना परिणीता। स्वनगरं प्रति परावर्तमानेन तेन "एकैकमत्र दिवसे दिवसे मदीयं, नामाक्षरं गणय, गच्छसि यावदन्तम्" इत्युक्त्वा स्वनामाङ्कितमंगुलीयकं स्वयमेव शकुन्तलायाः हस्ते परिधापितम्। इत्यभिज्ञानविषयिणी घटना महाभारतस्यादिपर्वात् गृहीता।

अभिज्ञानप्रधानं शाकुन्तलम् "अभिज्ञानशाकुन्तलम्" अभिज्ञायते अनेन इति अभिज्ञानं चिह्नमिति, अभि.ज्ञा.ल्युट्। इति व्युत्पतिं दर्शं दर्शं सिद्धमेव अभिज्ञानशाकुन्तलस्य समस्याप्रधानत्वम्, नायिकाप्रधानत्वं च। अभिज्ञानञ्च शकुन्तलाञ्च इति अभिज्ञानशाकुन्तलम्। कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्। अभिज्ञानशाकुन्तले चतुर्थेऽङ्के कविः कण्वरूपेण उपस्थितोऽस्ति। अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकालौकिकप्रकृतिमानवयोः विलक्षणं समन्वयोऽस्ति। अरण्यवासिन्याः शकुन्तलायाः पतिगृह-हस्तिनापुरगमनम् अरण्यराजप्रसादयोः किमपि विलक्षणं सम्बन्धं प्रतिपादयति। अभिज्ञानशाकुन्तलस्य चमत्कारो दुर्वाससः शापघटनायामाश्रितोऽस्ति, अत एव अंकोऽयं विशिष्टं स्थानं विभर्ति। "सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्" इत्यनेन शकुन्तलाया पतिगृहगमनाय अनुज्ञा प्रार्थिता। ईदृशः वाग्व्यवहारः महाकवेः गुणगौरवमेव प्रथयति।

3. मृच्छकटिकम् (Mrichchhakatikam)

"मृच्छकटिकं" इति नाटकस्यादौ शूद्रकस्य परिचयः वर्णितोऽस्ति। शूद्रकःशिवस्यानुग्रहेण ज्ञानं प्राप्तं, विधिना चाश्वमेधयज्ञं कृतवान्। संस्कृत साहित्ये शूद्रकस्य महती प्रसिद्धिरस्ति। शूद्रकः विक्रमादित्य इव प्रतिभासम्पन्नः ऐतिहासिकः पुरुषः आसीत्। भारतीयाः विद्वांसः अस्य समयं विक्रमाब्दस्य प्रथमशताब्द्यां मन्यन्ते। शूद्रकः दण्डीवराहमिहिरयोः पूर्ववर्ती सिद्ध्यति। अनेन अस्य समयः पञ्चमशताब्द्यां न्यायसङ्गतं प्रतिभाति।

नाट्यकलादृष्ट्या मृच्छकटिकं सुन्दरं सफलं च नाटकं विद्यते। संस्कृतसाहित्ये सर्वप्रथममस्मिन्नेव नाटके राजवंशातिरिक्तः तथा निम्नवर्गस्य सामाजिको जनः नायकः दृश्यते।

शूद्रकस्य शैली सरला, प्रसाद-गुण-गुम्फिता च अस्ति। नूतनो भावः, अभिनवोऽर्थः स्थले-स्थले प्राप्यते। नाटकस्य मुख्यो रसः शृंगारः। कविना न्यायालयस्य वर्णनं कियत्सुन्दरं

कृतमिति। अनेन प्रकारेण शूद्रकः मृच्छकटिकनाटके यत्र तत्र समाजस्य, राज्ञः, तथा राजकर्मकस्य, वेश्यायाः चौरस्य च एतादृशं चित्रं प्रस्तौति यत् नाटकपठनेन तत्कालीनसमाजस्य चित्रम् अस्माकं सम्मुखे अलिखितचित्रमिव अवभासते।

4. उत्तररामचरितम् (Uttararmacharitam)

भवभूतिना विरचित उत्तररामचरितं संस्कृत-साहित्ये नाट्यप्रतिभायाः सर्वोत्तमनिदर्शनमस्ति। भवभूतेः पितुर्नाम नीलकण्ठः, मातुर्नाम जतुकर्णी आसीत्। भट्टगोपालः तस्य पितामहः ज्ञाननिधिः गुरुश्चासीत्। सः काश्यपगोत्रीयः ब्राह्मणः आसीत्। विदर्भदेशस्थपद्मपुरनगरं तस्य जन्मस्थानं वर्तते। "श्रीकण्ठ" तस्य उपाधिरासीत्। भवभूतिः कान्यकुब्जनृपतेः यशोवर्मणः आश्रितः आसीत्। तस्य स्थितिकालः 650 ईसवीतः 750 ईसवीयसमीपे भवेत्। महाकवेः भवभूतेः तिस्रः रचना 1. मालतीमाधवम्, 2. महावीरचरितम्, 3. उत्तररामचरितञ्च प्राप्यन्ते।

सप्ताङ्कात्मके अस्मिन् नाटके रामायणस्य उत्तरार्द्धं प्रदर्शितमस्ति। अत्र रामस्य वनात् प्रत्यागमनानन्तरं राज्याभिषेकादारभ्य सीतामिलनपर्यन्तं सम्पूर्णकथा प्रदर्शिता अस्ति। उत्तररामचरितम् भवभूतेः नाट्यप्रतिभायाः सर्वोत्तमनिदर्शनमस्ति। रामायणमाश्रित्य सप्तांक-कथावृत्ते श्रीरामस्य राज्याभिषेकात् लोकापवादेन सीतानिर्वासनं ततश्च सीतारामसम्मेलनं यावत् कथा वर्णिताऽस्ति। उत्तररामचरिते प्रधानरसः करुणो वर्तते। मानवीयमनोभावानां विश्लेषणे मार्मिकचित्रणे च भवभूतिः अद्वितीयो वर्तते।

भवभूतेः प्रत्येकमपि पात्रं सांस्कृतिकादर्शम् उपस्थापयति। यथा-

रामे कर्तव्यनिष्ठा, सीतायाम् आदर्शस्त्रीत्वं, लवकुशादिषु क्षत्रियोचितवीरत्वं, वाल्मीकौ शान्तिसद्भावना च प्रस्फुटी भवति। विदूषकस्याभावात् नाटके गाम्भीर्यं परिलक्ष्यते। इत्थं भवभूतेः नाट्यपात्रेषु गम्भीरता, आदर्शवादिता, आत्मसंयमः, कर्त्तव्यनिष्ठभावना सर्वत्र दृश्यते।

5. मुद्राराक्षसम् (Mudrarakshasam)

विशाखदत्त नामा नाट्यकारः, यः कूटनीतिं, राजनीतिञ्चाश्रित्य मुद्राराक्षसं नामकं निर्मितवान्। विशाखदत्तस्य पितामहः श्रीवटेश्वरदत्तः, पिता चास्य भास्करदत्तः आसीत्। विशाखदत्तः कौटिल्यार्थशास्त्रस्य शुक्रनीतिशास्त्रस्य च प्रकाण्डविद्वान् आसीत्। ज्योतिःदर्शनन्यायशास्त्रेषु चास्य नैपुण्यं दृश्यते। विशाखदत्तस्य एतानि नाटकानि प्राप्यन्ते- 1. मुद्राराक्षसम्, 2. देवीचन्द्रगुप्तम्, 3. अभिसारितवञ्चितकम्।

स्थितिकालः-वराहमिहिरात् पूर्वं पञ्चमशताब्द्यां विशाखदत्तस्य समयः स्वीकरणीयम् इति न्यायसङ्गतं प्रतिभाति। मुद्राराक्षसे चाणक्यराक्षसौ निजकूटनीत्या विलक्षणं राजनीतिकयुद्धं सन्दर्श्य दर्शकान् मोहयतः। अतः मुद्राराक्षसं संस्कृतनाटकेषु निःसन्देहमद्वितीयनाटकमिति निश्चप्रचम्। मुद्राराक्षसे विशाखदत्तस्य शैली पुरुषार्थपूर्णास्ति। मुख्यो रसः वीरः।

6. रत्नावली (Ratnavali)

रत्नावली अस्य ग्रन्थस्य लेखकः श्रीहर्षदेवः आसीत्। श्रीहर्षदेवस्य जन्म कुरुक्षेत्रसमीपे थाणेश्वरे 590 ईस्व्यां बभूव। श्रीहर्षदेवस्य पिता महाराजः प्रभाकरवर्द्धनः, माता च यशोमती

आसीत्। सम्राट्श्रीहर्षः उदारहृदयः, विद्वान्, कविश्चासीत्। श्रीहर्षदेवस्य प्रमुखतया तिस्रः रचनाः आसन्-1. रत्नावलीनाटिका, 2. प्रियदर्शकानाटिका, 3. नागानन्द- नाटकञ्च। चतुर्णामङ्कानां निबद्धा रत्नावलीनाटिकायाः प्रधानो रसः शृङ्गारः, नायकः उदयनः, नायिका रत्नावली (सागरिका) चास्ति। अस्याः अमात्यः यौगन्धरायणः, राज्ञी वासवदत्ता, वसन्तकविदूषकः, बाभव्यः, वसूभूतिः, कञ्चनमाला, सुसंगता, ऐन्द्रजालिकाश्च सन्ति। इयं नाटिका संस्कृतसाहित्ये महत्त्वपूर्णस्थानं प्राप्नोति।

7. वेणीसंहारम् (Venisanharam)

वेणीसंहारनाटकस्य रचयिता महाकविः भट्टनारायणःआसीत्। सः कान्यकुब्ज (कन्नौज) देशोद्भवः शाण्डिल्यगोत्रीयो ब्राह्मणः आसीत्। अनेन अभिधानेन वेणीसंहारनाटकस्य प्रमुख-प्रयोजनस्य सफलतायाः निदर्शनमस्ति। अस्मिन् नाटके महाभारतस्य कथा मौलिकतया नूतनेन परिवेशेन सह प्रदर्शिता। कुटिलहृदयो दुर्योधनः पाण्डवानां साधुमनोवृत्तेः अनुचितलाभेन पाण्डवान् द्यूतक्रीडायां पराजित्य तेषां राज्यापहरणाय चेष्टते। दुर्योधनस्यैवाज्ञया दुःशासनः राज्यसभायां द्रौपद्याः वेणीं गृहित्वा तां धर्षति। भीमस्य एषा भीषणप्रतिज्ञा सर्वत्र नाटके गुञ्जिता भवति। कौरवाणां विनाशः एव नाटकस्यान्तः। नाटकान्ते भीमसेनः सर्वान् कौरवान् विनिहत्य दुःशासन-रुधिरेण स्वहस्ताभ्यां द्रौपद्याः मुक्त-कचान् संयतान् करोति वेणीं बध्नाति वा। करुणरसस्य सुन्दरं दृश्यं कविरत्र प्रकटयति। इत्थं नाटकस्य वीररसस्य इमे शृंगार-बीभत्स-करुण-रसाः अङ्गरसाः सन्ति, वीररसं ते सर्वे समुत्तेजयन्ति।

(B) 3. साहित्यम्-वस्तुनिष्ठप्रश्नोत्तराणि

(1. गद्यम् Prose, 2. पद्यम् Poetry, 3. चम्पू Champu, 4. नाटकम् Drama, 5. छन्द-Metre, 6. अलंकारः-Rhetoric)

(ङ) गद्यस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. गद्यम्- (परिचयः-ग्रन्थाः-ग्रन्थकाराश्च)

1. प्रश्न- गद्यः केन मुक्तो भवति?
   उत्तरम्- पद्य-बन्धेन।
2. प्रश्न-यत्र अक्षराणां निश्चित-विधानं न भवति तत् किं कथ्यते?
   उत्तरम्- गद्यम्।
3. प्रश्न- गेयता शून्य रचना भवति?
   उत्तरम्- गद्यम्।
4. प्रश्न-येषु महाकाव्यस्य समस्त-लक्षणं न सङ्घटते तत् किं कथ्यते?
   उत्तरम्- गीतिकाव्यम्।
5. प्रश्न- मुक्तक-काव्यं कम् आधृत्य प्रवर्त्तते?
   उत्तरम्- प्रसंगम्।
6. प्रश्न- "वेतालपंचविंशतिः कस्य कृतिरस्ति?
   उत्तरम्- शिवदासस्य।

7. प्रश्न- दशकुमारचरितम् इत्यस्य लेखकः कः?
   उत्तरम्- दण्डी।
8. प्रश्न- गद्यकाव्य वेमभूपालचरितम् इत्यस्य लेखकः कः?
   उत्तरम्- वामनभट्ट बाणः।
9. प्रश्न- काव्यादर्श इत्यस्य लेखकः कः?
   उत्तरम्- दण्डी।
10. प्रश्न- वासवदत्ता अस्य ग्रन्थस्य लेखकः कः?
    उत्तरम्- सुबन्धुः।
11. प्रश्न- तिलकमञ्जरी इत्यस्य लेखकः कः?
    उत्तरम्- धनपालः।
12. प्रश्न- गद्यचिन्तामणि इत्यस्य लेखकः कः?
    उत्तरम्- वादीभसिंहः।
13. प्रश्न- प्रबन्धचिन्तामणिः इत्यस्य लेखकः कः?
    उत्तरम्- मेरुतुंगाचार्यः।
14. प्रश्न- प्रबन्धकोशः अस्य ग्रन्थस्य लेखकः कः?
    उत्तरम्- राजशेखरः।
15. प्रश्न- "शुकसप्ततिः" केन विरचिता?
    उत्तरम्- चिन्तामणि भट्टेन।
16. प्रश्न- वाणभट्टस्य समयः कः?
    उत्तरम्- (700) सप्त-शताब्दः।
17. प्रश्न- बृहत्कथायाः रचनाकारः कः?
    उत्तरम्- गुणाढ्यः।
18. प्रश्न- मन्दारमञ्जरी इत्यस्य लेखकः कः?
    उत्तरम्- महाकविविश्वेश्वरपाण्डेयः।
19. प्रश्न- प्रबन्धमञ्जरी इत्यस्य लेखकः कः?
    उत्तरम्- ऋषिकेश भट्टाचार्यः।
20. प्रश्न- प्रबन्धचिन्तामणौ कियन्ति खण्डानि सन्ति?
    उत्तरम्- (5) पञ्च।
21. प्रश्न- राजगोपालस्य रचनाकार्ये स्तः?
    उत्तरम्- 1. शैवालिनी, 2. कुमुदिनी।
22. प्रश्न- कृष्णामाचार्यस्य लेखिका वर्तते?
    उत्तरम्- मन्दारवती।
23. प्रश्न- "आचार्यमेधाव्रतम्" इत्यस्य लेखकः कः?
    उत्तरम्- कुमुदिनीचन्द्रः।

24. प्रश्न- "अवदान-शतकम्" केन कथा साहित्येन सम्बद्धम्?
उत्तरम्- बौद्धकथा-साहित्येन।
25. प्रश्न- नृसिंहाचार्यस्य का रचना ?
उत्तरम्- सौदामिनी।
26. प्रश्न- भट्टमथुरानाथशास्त्रिण· रचनाकार्ये स्तः?
उत्तरम्- 1. भारती, 2. संस्कृतरत्नाकर।
27. प्रश्न- "भोजप्रबन्धः" केन राज्ञा सम्बद्धोऽस्ति?
उत्तरम्- भोजराजेन।
28. प्रश्न- हरिचरणभट्टाचार्यस्य का रचना?
उत्तरम्- कपालकुण्डला।
29. प्रश्न- वामनकृष्णचित्तलस्य का रचना अस्ति?
उत्तरम्- लोकमान्यतिलकचरितम्।
30. प्रश्न- "वेतालपञ्चविंशतिः" कासु कथासु आश्रिता?
उत्तरम्- लोककथासु।
31. प्रश्न- प्रबन्धप्रकाशः इत्यस्य लेखकः कः?
उत्तरम्- वेङ्कटेशः।
32. प्रश्न- पञ्चतन्त्रस्य लेखकः कः?
उत्तरम्- विष्णु शर्मा।
33. प्रश्न- हितोपदेशं कः रचयामास?
उत्तरम्- नारायणपण्डितः।
34. प्रश्न- "प्रबोध-चिन्तामणिः" अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- जयशेखर सूरिः।
35. प्रश्न- राजतरंगिणी इत्यस्य लेखकः कः?
उत्तरम्- कल्हणः।
36. प्रश्न- पञ्चतन्त्रे कति तन्त्राणि सन्ति?
उत्तरम्- (5) पञ्च।
37. प्रश्न- हितोपदेशे कति परिच्छेदाः सन्ति?
उत्तरम्- (4) चत्वारः।
38. प्रश्न- पञ्चतन्त्रे किं नाम प्रथमं तन्त्रम्?
उत्तरम्- मित्रभेदः।
39. प्रश्न- पंचतन्त्रे किं नाम द्वितीयं तन्त्रम्?
उत्तरम्- मित्रसम्प्राप्तिः।
40. प्रश्न- पंचतन्त्रे किं नाम तृतीयं तन्त्रम्?
उत्तरम्- काकोलूकीयम्।

41. प्रश्न- पंचतन्त्रे किं नाम चतुर्थं तन्त्रम्?
उत्तरम्- लब्धप्रणाशम्।
42. प्रश्न- पंचतन्त्रे किं नाम पंचमं तन्त्रम्?
उत्तरम्- अपरीक्षितकारकम्।
43. प्रश्न- पञ्चतन्त्रे कस्य राज्ञः मूर्खपूत्रान् अपाठयत् विष्णुशर्मा?
उत्तरम्- अमरशक्तेः।
44. प्रश्न- पञ्चतन्त्रस्य कस्मिन् तन्त्रे काक-कच्छप-मृग-मूषकाणां मैत्री वर्णिताऽस्ति?
उत्तरम्- मित्रसम्प्राप्तौ।
45. प्रश्न- पञ्चतन्त्रे "वानर-मकर-कथा" कस्मिन् तन्त्रे आयाति?
उत्तरम्- लब्धप्रणाशे।
46. प्रश्न- ब्राह्मणी-नकुलयोः कथा पंचतन्त्रस्य कस्मिन् तन्त्रे विद्यते?
उत्तरम्- अपरीक्षितकारके।
47. प्रश्न- अपरीक्षितकारकस्य पंचतन्त्रस्य प्रथमकथा का अस्ति?
उत्तरम्- ब्राह्मणी-नकुलस्य कथा।
48. प्रश्न- "अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत्" एतत् सूक्तिसम्बन्धिनी का कथा पंचतन्त्रस्य?
उत्तरम्- लोभाविष्टचक्रधरकथा।
49. प्रश्न- नारायणपण्डितस्य आश्रयदाता काव्यसमुत्प्रेरकश्च कः राजा विशेषः?
उत्तरम्- धवलचन्द्रः।
50. प्रश्न- नारायणपण्डितः कस्य पुत्रान् अपाठयत्?
उत्तरम्- सुदर्शनस्य।
51. प्रश्न- हितोपदेशस्य कति परिच्छेदाः सन्ति?
उत्तरम्- (04) चत्वारः।
52. प्रश्न- हितोपदेशस्य प्रथमपरिच्छेदः कः?
उत्तरम्- मित्रलाभः।
53. प्रश्न- हितोपदेशस्य द्वितीयपरिच्छेदः कः?
उत्तरम्- सुहृद्भेदः।
54. प्रश्न- हितोपदेशस्य तृतीयपरिच्छेदः कः?
उत्तरम्- विग्रहः।
55. प्रश्न- हितोपदेशस्य सन्धिसंज्ञकः परिच्छेदविशेषः कः?
उत्तरम्- चतुर्थः।
56. प्रश्न- हितोपदेशे रविवाराय प्रयुक्तः शब्दविशेषः कः?
उत्तरम्- भट्टारकवारः।
57. प्रश्न- शिवाजी प्रबन्धः इत्यस्य लेखकः कः?
उत्तरम्- वातनसोवानि।

58. प्रश्न- बृहत्कथाया: कियन्तो वाचका: सन्ति?
उत्तरम्- तिस्र:।
59. प्रश्न- "बृहत्कथामञ्जरी" इत्यस्य लेखक: क:?
उत्तरम्- क्षेमेन्द्र:।
60. प्रश्न- "बृहत्कथा-मञ्जर्या" कियन्ति लम्बकानि?
उत्तरम्- (18) अष्टादश।
61. प्रश्न- कथा-सरित्सागरस्य लेखक: क:?
उत्तरम्- सोमदेव:।
62. प्रश्न- कथा-सरित्सागरे कति परिच्छेदा: सन्ति?
उत्तरम्- (18) अष्टादश।
63. प्रश्न- हितोपदेशस्य कथा किमाधारिता?
उत्तरम्- पंचतन्त्रम्।
64. प्रश्न- "वेतालपञ्चविंशते:" रचनाकार: क:?
उत्तरम्- जम्भलदत्त:।
65. प्रश्न- शैलताताचार्यस्य का रचना ?
उत्तरम्- दुर्गेशनन्दिनी।
66. प्रश्न- "सिंहासन-बत्तीसी" केन राज्ञा सम्बन्धिता?
उत्तरम्- विक्रमादित्येन।
67. प्रश्न- वेतालपंचविंशति: इत्यस्य मुख्य-नायक: क:?
उत्तरम्- त्रिविक्रमसेन:।
68. प्रश्न- "कथारत्नाकरस्य" लेखक: क:?
उत्तरम्- जैन-हैमविजचमणि महोदय:।
69. प्रश्न- "प्रबन्धचिन्तामणे:" लेखक: क:?
उत्तरम्- मेरुतुंगाचार्य:।
70. प्रश्न- आचार्यश्रीशैलस्य का रचना ?
उत्तरम्- मेनका।
71. प्रश्न- "प्रबन्धकोशस्य" लेखक: क:?
उत्तरम्- राजशेखर:।
72. प्रश्न- पण्डित-क्षमारावस्य कानि रचनाकार्यानि?
उत्तरम्-1. कथापत्रकम्, 2. ग्रामज्योति:, 3. कथामुक्तावली।
73. प्रश्न- "पुरुष-परीक्षा" इत्यस्या: रचनाकार: क:?
उत्तरम्- मैथिल-कविकोकिलो विद्यापति:।
74. प्रश्न- वेमभूपालचरितम् कस्य कृतिरस्ति?
उत्तरम्- वामनभट्टबाणस्य।

75. प्रश्न- "मदन-पराजयः" इत्यस्य रचनाकारः कः?
उत्तरम्- नागदेवः।
76. प्रश्न- गद्यरामायणम् कस्य कृतिरस्ति?
उत्तरम्- वरददेशिकस्य।
77. प्रश्न- "विषमवाणलीला" अस्य ग्रन्थस्य लेखकः कः
उत्तरम्- आनन्दवर्धनः।
78. प्रश्न- "आवन्तिसुन्दरी" अस्य ग्रन्थस्य रचनाकारः कः?
उत्तरम्- दण्डी।
79. प्रश्न- गद्यं कतिविधम्, किञ्च तत्?
उत्तरम्- द्विविधम्, 1. कथा, 2. आख्यायिकापम्।
80. प्रश्न- "गद्यं कवीनां निकषं वदन्ति" इयं सूक्तिः केन काव्येन सम्बद्धा?
उत्तरम्- गद्यकाव्येन।
81. प्रश्न- बाणभट्ट-विरचिताः कियन्तो ग्रन्थाः?
उत्तरम्- (3) त्रयः।
82. प्रश्न- बाणभट्टस्य कौ गद्यग्रन्थौ स्तः?
उत्तरम्- "हर्षचरितम्-(आख्यायिका)" "कादम्बरी(कथा) च"
83. प्रश्न- हर्षचरितस्य नायकः कः?
उत्तरम्- उत्तरम्- राजा हर्षवर्द्धनः।
84. प्रश्न- "आख्यायिका" इति कस्य प्रभेदोऽस्ति?
उत्तरम्- गद्यस्य।
85. प्रश्न- गद्यसाहित्ये पदलालित्यं कस्य प्रसिद्धं नाम?
उत्तरम्- दण्डिनः।
86. प्रश्न- दण्डीविरचितानि काव्यानि कानि?
उत्तरम्- काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा।
87. प्रश्न- गद्यकाव्यप्रकारेषु अन्यतमः प्रकारः कः?
उत्तरम्- चूर्णकम्।
88. प्रश्न- गद्यकाव्ये कानि काव्यानि आगच्छन्ति?
उत्तरम्- 1. कथा, 2. आख्यायिका, 3. चम्पू।
89. प्रश्न- बाणभट्टस्य समयः?
उत्तरम्- सप्तमशताब्दः।
90. प्रश्न- बाणभट्टस्य कौ द्वौ भ्रातरौ आस्ताम्?
उत्तरम्- 1. चित्रसेनः, 2. मित्रसेन,
91. प्रश्न- राज्ञः शूद्रकस्य राजधानी कुत्र असीत्?
उत्तरम्- विदिशा।

92. प्रश्न- दण्डिनः कियन्तो ग्रन्थाः?
उत्तरम्- (3) त्रयः।
93. प्रश्न- गद्यकाव्यम् अवन्तिसुन्दरीकथा कस्य कृतिः अस्ति?
उत्तरम्- दण्डिनः।
94. प्रश्न- छन्दोविचिति काव्यमिदं कः रचयामास?
उत्तरम्- दण्डी।
95. प्रश्न- भारवेः प्रपौत्रः आसीत्?
उत्तरम्- दण्डी।
96. प्रश्न- दण्डिनः किं प्रसिद्धमस्ति?
उत्तरम्- पदलालित्यम्।
97. प्रश्न- सोमदेवस्य कृतिः कास्ति?
उत्तरम्- कथासरित्सागरः।
98. प्रश्न- जल्हणः अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- सोमपालविजयः।
99. प्रश्न- "शिवराजविजयम्" केन रचितम्?
उत्तरम्- अम्बिकादत्तेन।
100. प्रश्न- बाणस्य कानि रचनाकार्याणि सन्ति?
उत्तरम्-1. कादम्बरी, 2. हर्षचरितम्, 3. पार्वतीपरिणयः, 4. चण्डीशतकम्, 5. मुकुटताडितक।
101. प्रश्न- कादम्बरी इत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- बाणभट्टः।
102. प्रश्न- हर्षचरितम्" कस्य कृतिरस्ति?
उत्तरम्- बाणभट्टस्य।
103. प्रश्न- भोजराजस्य कृतिः कास्ति?
उत्तरम्- सरस्वतीकण्ठाभरणम्।
104. प्रश्न- आचार्य विश्वनाथस्यानुसारं गद्यकाव्यस्य कति भेदाः?
उत्तरम्- (4) चत्वारो भेदाः।
105. प्रश्न- आचार्य विश्वनाथस्यानुसारं समासरहित-गद्यकाव्यः कः?
उत्तरम्- मुक्तकः।
106. प्रश्न- लघुत्तर-समासयुक्तं गद्यकाव्यं विश्वनाथः किं कथयति?
उत्तरम्- चूर्णकः।

(ढ) कादम्बर्याः वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- बाणस्य का गद्यशैली?
उत्तरम्- पञ्चाली।
2. प्रश्न- बाणस्य पितुः नाम किमासीत्?
उत्तरम्- चित्रभानुः।

3. प्रश्न- बाणस्य पुत्रः कः आसीत्?
   उत्तरम्- भूषणभट्टः।
4. प्रश्न- कस्मिन् गोत्रे बाणस्य जन्म बभूव?
   उत्तरम्- वत्स-गोत्रे।
5. प्रश्न- बाणविरचितं काव्यमस्ति?
   उत्तरम्- कादम्बरी।
6. प्रश्न- बाणस्य वासः आसीत्?
   उत्तरम्- शोणनदीतटे प्रीतिकूटग्रामे।
7. प्रश्न- राज्यवर्धनः कस्य पुत्रः आसीत्?
   उत्तरम्- बाणभट्टस्य।
8. प्रश्न- कादम्बरी कति भागेषु विभक्ता?
   उत्तरम्- चतुर्षु भागेषु।
9. प्रश्न- शुकनासोक्तदिशा-बुद्धिः" कदा कालुष्यमुपयाति?
   उत्तरम्- यौवनारम्भे।
10. प्रश्न- "बाणः" इति कस्य प्रभेदोऽस्ति?
    उत्तरम्- गद्यस्य।
11. प्रश्न- "लब्धाापि दुःखेन परिपाल्यते" इति कस्य कथनम्?
    उत्तरम्- शुकनाशस्य।
12. प्रश्न- कादम्बरी ग्रन्थे कस्या कथा वर्णितोऽस्ति?
    उत्तरम्- चन्द्रापीडस्य।
13. प्रश्न- कादम्बरी इति ग्रन्थे कस्य जन्मत्रयस्य वर्णनमस्ति?
    उत्तरम्- चन्द्रापीडस्य।
14. प्रश्न- गन्धर्वनगरलेखेव पश्यत एव नश्यति" कुत्रेदं वाक्यम्?
    उत्तरम्- कादम्बर्याम्।
15. प्रश्न- चन्द्रापीडः पूर्वजन्मे कः आसीत्?
    उत्तरम्- चन्द्रमाः।
16. प्रश्न- तारापीडस्य पुत्रः कः आसीत्?
    उत्तरम्- चन्द्रापीडः।
17. प्रश्न- वैशम्पायनः कस्य पुत्रः आसीत्?
    उत्तरम्- शुकनासस्य।
18. प्रश्न- पुण्डरीकः कस्यामनुरक्तः आसीत्?
    उत्तरम्- महाश्वेतायाम्।
19. प्रश्न- तारापीडस्य मन्त्री कः आसीत्?
    उत्तरम्- शुकनासः।

20. प्रश्न- चन्द्रापीडस्य अनुरागः कस्यामासीत्?
उत्तरम्- कादम्बर्य्याम्।
21. प्रश्न- साम्राज्ञी विलासवती कस्य माता आसीत्?
उत्तरम्- चन्द्रापीडस्य।
22. प्रश्न- पुण्डरीकस्य पिता कः अस्ति?
उत्तरम्- श्वेतकेतुः।
23. प्रश्न- पुण्डरीकस्य माता का आसीत्?
उत्तरम्- लक्ष्मी।
24. प्रश्न- पुण्डरीकस्य अनन्यमित्रम् आसीत्?
उत्तरम्- कपिञ्जलः।
25. प्रश्न- "पत्रलेखा" कस्य पुत्री अस्ति?
उत्तरम्- कुलूताधिपतेः।
26. प्रश्न- चन्द्रापीडस्य सेविका दूती वा का अस्ति?
उत्तरम्- पत्रलेखा।
27. प्रश्न- किन्नरयुगलमनुसरन् चन्द्रापीडः कुत्र अगच्छत्?
उत्तरम्- हेमकूटम्।
28. प्रश्न- महाश्वेतायाः आश्रमः कुत्र आसीत्?
उत्तरम्- अच्छोदसरोवरस्यपार्श्वे।
29. प्रश्न- महाश्वेता कस्य पुत्री आसीत्?
उत्तरम्- हंसस्य।
30. प्रश्न- गन्धर्वराजहंसस्य पत्नी का आसीत्?
उत्तरम्- गौरी।
31. प्रश्न- महाश्वेतायाः दासी अस्ति?
उत्तरम्- तरलिका।
32. प्रश्न- "कादम्बरी" कस्य पुत्री अस्ति?
उत्तरम्- गन्दर्भराजचित्ररथस्य।
33. प्रश्न- कादम्बर्याः माता का अस्ति?
उत्तरम्- मदिरा।
34. प्रश्न- "कादम्बरी" शब्दस्य कोऽर्थः?
उत्तरम्- मदिरा।
35. प्रश्न- कादम्बर्याः वीणावाहकः कः?
उत्तरम्- केयूरकः।
36. प्रश्न- कथाकादम्बर्याः उत्तरार्द्धभागः केन सम्पूरितः?
उत्तरम्- पुलिन्दभट्टेन।

37. प्रश्न- तारापीडस्य राजधानी कुत्र आसीत्?
उत्तरम्- उज्जयिनी।
38. प्रश्न- "प्रायेण हि पक्षिण: पशवश्च भयाहार:" इति कस्योक्ति:?
उत्तरम्- शूद्रकस्य।
39. प्रश्न- "नहि करतल स्पर्श क्लेशितानाम्" इयं सूक्ति: कस्यै विद्यते?
उत्तरम्- चण्डाल-कन्यकायै।
40. प्रश्न- कादम्बर्या: सहचरी का अस्ति?
उत्तरम्- मदलेखा।
42. प्रश्न- वैशम्पायन-शुकं राजसभायां का आनयति?
उत्तरम्- चाण्डाल कन्या।
43. प्रश्न- "लब्धापि दु:खेन परिपाल्यते" कस्य कथनमिदम्?
उत्तरम्- शुकनासस्य।
44. प्रश्न- बाणभट्ट: कादम्बरी-ग्रन्थस्य अख्यानं कस्य मुखात् वाचयति?
उत्तरम्- जाबालि मुखात्।
45. प्रश्न- कादम्बरी ग्रन्थस्य मुख्य-रस: क:?
उत्तरम्- शृंगार-रस:।
46. प्रश्न- कादम्बर्या: को प्रधाननायक:?
उत्तरम्- चन्द्रापीड़:।
47. प्रश्न- "कादम्बरी" ग्रन्थस्य का नायिका?
उत्तरम्- कादम्बरी।
48. प्रश्न- बाणस्य पितुर्नाम किम्?
उत्तरम्- चित्रभानु:।
49. प्रश्न- वाणभट्टस्य मातु: नाम किम्?
उत्तरम्- राजदेवी।
50. प्रश्न- वाणभट्टस्य गद्य-रीति का?
उत्तरम्- पाञ्चाली।
51. प्रश्न- "मनस्तु साधुध्वनिभि: पदे पदे, हरन्ति सन्तो मणिनूपुरा इव" इयं सूक्ति: कस्
ग्रन्थस्य विद्यते?
उत्तरम्- कादम्बरी ग्रन्थस्य।
52. प्रश्न- "कादम्बरी" इति ग्रन्थे कस्या: रीत्या: प्रयोग: अभूत्?
उत्तरम्- पञ्चाली रीत्या:।
53. प्रश्न- "लब्धापि दु:खेन परिपाल्यते" इति कस्य कथनम्?
उत्तरम्- शुकनाशस्य।
54. प्रश्न- राज्यरूप-विषेणोन्मत्त-मनुष्यस्य स्थिति: का भवति?
उत्तरम्- चेतनाशून्यता।

55. प्रश्न- चन्द्रापीडस्य राज्याभिषेकं कर्तुमिच्छा कस्याभूत्?
उत्तरम्- तारापीड़स्य।
56. प्रश्न- अभिषेकस्य सामग्रीं के आनीतवन्तः?
उत्तरम्- द्वारपालाः।
57. प्रश्न- शुकनासः लक्ष्मीं प्रति किं कथितवान्?
उत्तरम्- अनार्यामिति।
58. प्रश्न- "अहो विधातुरस्थाने सौन्दर्य निष्पादन-प्रयत्नः" अस्याः सूक्तेः वक्ता कः?
उत्तरम्- शूद्रकः।
59. प्रश्न- "किं वा प्रलपितेन बहुना" अस्याः सूक्तेः वक्ता कः?
उत्तरम्- शुकः।
60. प्रश्न- "अपनीताभरणश्च दिवसकर इव" अस्यां सूक्तौ कस्य वर्णनमस्ति?
उत्तरम्- राज्ञःशूद्रकस्य व्यायामशालायाः।
61. प्रश्न- राज्याभिषेकस्य समये कस्याः आवश्यकता भवति?
उत्तरम्- उपदेशस्य।
62. प्रश्न- धनं कं उन्मत्तं करोति?
उत्तरम्- अज्ञानि-जनम्।
63. प्रश्न- "करिणीभिरिव वनकरी प्रवृत्तः" सूक्तौ कस्य वर्णनमस्ति?
उत्तरम्- स्नानशालायाः।
64. प्रश्न- समस्तमलं प्रच्छालने (जलं विना स्नाने) कः समर्थः ?
उत्तरम्- गुरुपदेशः।
65. प्रश्न- शूद्रकः पूर्वजन्मे कः आसीत्?
उत्तरम्- चन्द्रापीड़ः।
66. प्रश्न- कादम्बर्याः कथायाः प्रारम्भः केन भवति?
उत्तरम्- शूद्रकेन।
67. प्रश्न- कादम्बर्याः कथायाः अन्तः केन भवति?
उत्तरम्- चन्द्रापीड़- कादम्बयोः मेलनेन।
68. प्रश्न- चन्द्रापीड़स्य मातुः नाम किम्?
उत्तरम्- विलासवती।
69. प्रश्न- कामपीड़ायां कः दिवंगतः?
उत्तरम्- पुण्डरीकः।
70. प्रश्न- महाश्वेता का आसीत्?
उत्तरम्- कादम्बर्याः सहचरी।
71. प्रश्न- चन्द्रापीड़ं दृष्ट्वा कामासक्तः कः अभूत्?
उत्तरम्- कादम्बरी।

72. प्रश्न- पितुः आह्वाने चन्द्रापीड़ः कुत्र गतः?
उत्तरम्- उज्जयिनी-नगरे।
73. प्रश्न- महाश्वेतायाः प्रेम केन सह अभूत्?
उत्तरम्- पुण्डरीकेण।
74. प्रश्न- शाल्मली-वृक्षस्य वर्णनं कस्मिन् गद्य-काव्ये अस्ति?
उत्तरम्- कादम्बरी-ग्रन्थे।

(ण) हर्षचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि-

81. प्रश्न- हर्षचरिते कियन्त उच्छ्वासाः?
उत्तरम्- (8) अष्टौ
82. प्रश्न- हर्षचरिते "स्थाणीश्वरम्" कस्य राजधानी अस्ति?
उत्तरम्- हर्षवर्धनस्य।
83. प्रश्न- हर्षवर्धनस्य पिता कः आसीत्?
उत्तरम्- प्रभाकरवर्धनः।
84. प्रश्न- हर्षवर्धनस्य भ्राता कः?
उत्तरम्- राज्यवर्धनः।
85. प्रश्न- हर्षचरिते कति उच्छ्वासाः सन्ति?
उत्तरम्-(8) अष्टौ।
86. प्रश्न- हर्षचरिते हर्षस्य भगिनी का अस्ति?
उत्तरम्- राज्यश्रीः।
87. प्रश्न- हर्षचरितस्य प्रारम्भिकेषु त्रिषु उच्छ्वासेषु कस्य कथा वर्णिताऽस्ति?
उत्तरम्- बाणभट्टस्य।
88. प्रश्न- हर्षचरितस्य प्रथमोच्द्वासे समुपवर्णितः "दधीचः" कस्य पुत्रः?
उत्तरम्- च्यवनस्य।
89. प्रश्न- शर्यातिपुत्री सुकन्या कस्य माता अस्ति?
उत्तरम्- दधीचस्य।
90. प्रश्न- हर्षचरिते समुल्लिखितस्य भगवतः च्यवन-ऋषेः आश्रमः कस्याः नद्याः तटे आसीत्?
उत्तरम्- शोणनद्याः तटे।
91. प्रश्न- हर्षचरिते दधीचस्य दूती का अस्ति?
उत्तरम्- मालती।
92. प्रश्न- हर्षचरिते भगवत्याः सरस्वत्याः पतिः कः?
उत्तरम्- दधीचः।
93. प्रश्न- सरस्वती-दधीचयोः पुत्रः सारस्वतः कया लालितः पालितश्च?
उत्तरम्- अक्षमालया।
94. प्रश्न- "अक्षमाला" सारस्वतस्य का आसीत्?
उत्तरम्- पितृव्यजाया।

95. प्रश्न-अक्षमालाया: पुत्र: क:?
उत्तरम्- वत्स:।
96. प्रश्न- द्वितीयोच्छ्वासे हर्षचरिते वर्णित: कृष्ण: कस्य पितृव्यपुत्र: आसीत्?
उत्तरम्- हर्षस्य।
97. प्रश्न- भैरवाचार्यस्य वर्णनं कुत्र मिलति?
उत्तरम्- हर्षचरिते।
98. प्रश्न- हर्षस्य माता अस्ति?
उत्तरम्- यशोवती।
99. प्रश्न- हर्षस्य सेनापति: क:?
उत्तरम्- सिंहनाद:।
100. प्रश्न-ऐतिहासिकै: हर्षस्य जन्मतिथि: कदा स्वीक्रियते?
उत्तरम्-(590 ई.) नवत्यधिकपञ्चशताब्दे।

(प) दशकुमारचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि-

101. प्रश्न- "अपहारवर्मा" कस्मिन् गद्यकाव्ये दरीदृश्यते?
उत्तरम्- दशकुमारचरिते।
102. प्रश्न- दशकुमारचरितस्य पात्रविशेष: क:?
उत्तरम्- राजवाहन:।
103. प्रश्न- "मित्रगुप्त:" कस्मिन् गद्यकाव्ये मिलति?
उत्तरम्- दशकुमारचरिते।
104. प्रश्न- "विश्रुतचरितम्" कस्य वैशिष्ट्यमस्ति?
उत्तरम्- दशकुमारचरितस्य।
105. प्रश्न- दशकुमारचरिते कियन्त: पीठिका: सन्ति?
उत्तरम्- तिस्र:।
106. प्रश्न- दशकुमारचरिते राजवाहनस्य पिता क:?
उत्तरम्- राजहंस:।
107. प्रश्न- दशकुमारचरिते कियतां कुमाराणां चरित्रं वर्णितमस्ति?
उत्तरम्- दशकुमाराणाम्।
108. प्रश्न-अवन्तिसुन्दरी-राजवाहनयो: विवाह: दशकुमारचरितस्य कस्मिन् उच्छ्वासे प्राप्यते?
उत्तरम्- पंचमे उच्छ्वासे।
109. प्रश्न- दशकुमारचरिते कति उछ्वासा: सन्ति?
उत्तरम्- (8) अष्ट।

(फ) वासवदत्ताया: वस्तुनिष्ठप्रश्नोत्तराणि-

110. प्रश्न- सुबन्धो: का रचनास्ति?
उत्तरम्- वासवदत्ता।

111. प्रश्न- राज्ञः चिन्तामणेः पुत्रः कः आसीत्?
उत्तरम्- राजवाहनः।
112. प्रश्न- नायकस्य कन्दर्पकेतोः नायिका का?
उत्तरम्- वासवदत्ता।
113. प्रश्न- कन्दर्पकेतोः सखा आसीत्?
उत्तरम्- मकरन्दः।
114. प्रश्न- वासवदत्तायाः पितुः नाम किमासीत्?
उत्तरम्- शृंगारशेखरः।
115. प्रश्न- "प्रत्यक्षरश्लेषमयप्रबन्धविन्यास-वैदग्ध्यनिधिर्निबन्धम्" उक्तिरियं कस्य गद्यकाव्यस्य वैशिष्ट्यमस्ति?
उत्तरम्- सुबन्धु कृत वासवदत्तागद्यकाव्यस्य।
116. प्रश्न- राज्यश्री कस्य पत्नी अस्ति?
उत्तरम्- ग्रहवर्मणः।
117. प्रश्न- कस्याः? नायिकायाः नाम कस्यचित् "गद्य काव्यस्य" नाम अस्ति?
उत्तरम्- वासवदत्ता।
118. प्रश्न- दूतवाक्यम् इत्यस्य नायकः कः?
उत्तरम्- कृष्णः।

(ब) अन्य-गद्य-काव्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-

119. प्रश्न- कथासरित्सागरे कति लम्बकाः सन्ति?
उत्तरम्- (18) अष्टादश।
120. प्रश्न- कथासरित्सागरे कति श्लोकाःसन्ति?
उत्तरम्- (24, 000 श्लोकाः।)
121. प्रश्न- शुकसप्तति ग्रन्थे कति कथाः सन्ति?
उत्तरम्-(70 सप्तति कथाः)
122. प्रश्न- पं. विष्णु शर्मा लिखित पञ्चतन्त्रे कानि तन्त्राणि सन्ति?
उत्तरम्- (पञ्च) 1. मित्रलाभः, 2. मित्रभेदः, 3. सन्धि विग्रहः, 4. लब्ध-प्रणाशः, 5. अपरीक्षितकारकः।
123. प्रश्न- अम्बिकादत्तव्यासस्य प्रसिद्धमपरं नाम किम्?
उत्तरम्- अभिनवबाणः।
124. प्रश्न- शिवराजविजयः कीदृशः ग्रन्थः?
उत्तरम्- ऐतिहासिकोपन्यासः।
125. प्रश्न- आधुनिकः बाणः कोऽस्ति?
उत्तरम्- अम्बिकादत्तव्यासः।
126. प्रश्न- शिवराजविजये कति निःश्वासाः सन्ति?
उत्तरम्- द्वादश(12)

127. प्रश्न- शिवराजविजयस्य नायकः कः?
उत्तरम्- शिववीरः।
128. प्रश्न- राजहंसस्य भार्या आसीत्?
उत्तरम्- वसुमती।

(भ) पद्य-काव्यस्य परिचयात्मकवस्तुनिष्ठप्रश्नोत्तराणि-

2. पद्यम्-Poetry (परिचयः-ग्रन्थाः-ग्रन्थकाराश्च)

1. प्रश्न- गङ्गालहरी" -केन रचिता?
उत्तरम्- पण्डितराजजगन्नाथेन।
2. प्रश्न- हर्षचरितमञ्जरी ग्रन्थस्य लेखकः कः?
उत्तरम्- श्रीगोविन्दचन्द्रः।
3. प्रश्न- "सूर्यशतकम्" केन रचितम्?
उत्तरम्- मयूरभट्टेन।
4. प्रश्न- "जानकीहरणम्" -अस्य काव्यस्य कविरस्ति?
उत्तरम्- कुमारदासः।
5. प्रश्न- "हरविजयकाव्यम्" केन रचितम्?
उत्तरम्- रत्नाकरेण।
6. प्रश्न- "शृङ्गार तिलकम्" कस्य कवेः रचनास्ति?
उत्तरम्- कालिदासस्य।
7. प्रश्न- केन विरचितमिदं "चौरपञ्चाशिका" काव्यम्?
उत्तरम्- बिल्हणेन।
8. प्रश्न- "दशावतारचरितम्" - इदं महाकाव्यं कस्य कवेरस्ति?
उत्तरम्- क्षेमेन्द्रमहाकवेः।
9. प्रश्न- वेतालपंचविंशतिः कस्य कृतिरस्ति?
उत्तरम्- जैमलदत्तस्य।
10. प्रश्न- सुभद्राधनञ्जयम्" इत्यस्य कः रचनाकारः?
उत्तरम्- रूपगोस्वामी।
11. प्रश्न- विद्धशालभञ्जिका" केन रचिता?
उत्तरम्- राजशेखरेण।
12. प्रश्न- विदग्धमाधवम्" इत्यस्य रचनाकारः कः?
उत्तरम्- कुलशेखरवर्मन्।
13. प्रश्न- कर्णसुन्दरी इत्यस्य रचनाकारः कः?
उत्तरम्- बिल्हणः।
14. प्रश्न- "जाम्बवतीविजयम्" केन विरचितमस्ति?
उत्तरम्- पाणिनिना।

15. प्रश्न- स्वप्नवासवदत्तम् कस्य रचना वर्तते?
उत्तरम्- भासस्य।
16. प्रश्न- बोधचन्द्रोदयम्" केन रचित:?
उत्तरम्- कृष्णमिश्रेण।
17. प्रश्न- कालिदासविरचितानि कति महाकाव्यानि?
उत्तरम्-त्रीणि, 1. रघुवंशम्, 2. कुमारसम्भवम्, 3. बुद्धचरित।
18. प्रश्न- कालिदासविरचिते खण्डकाव्ये स्त:?
उत्तरम्- द्वे, मेघदूतम्, ऋतुसंहारम्।
19. प्रश्न- किरातार्जुनीयम् केन रचितम्?
उत्तरम्- भारविना।
20. प्रश्न- "नैषधचरितम्" इति कस्य कृतिरस्ति?
उत्तरम्- श्रीहर्षस्य।
21. प्रश्न- "रावणवधम् अथवा भट्टिकाव्यम्" केन विरचितम्?
उत्तरम्- भट्टिना।
22. प्रश्न- "जानकीहरणम्" महाकाव्यं केन विरचितम्?
उत्तरम्- कुमारदासेन।
23. प्रश्न- "हरविजयम्" महाकाव्यस्य क: रचनाकार:?
उत्तरम्- रत्नाकर:।
24. प्रश्न- जातकमाला कस्य रचना अस्ति?
उत्तरम्- आर्यशूरस्य।
25. प्रश्न- प्रबन्धचिन्तामणि: कस्य कृतिरस्ति?
उत्तरम्- मेरुतुंगाचार्यस्य।
26. प्रश्न- प्रबन्धकोशस्य रचनाकार: क:?
उत्तरम्- राजशेखर:।
27. प्रश्न- नेमिदूतस्य रचनाकार: क:?
उत्तरम्- विक्रमकवि:।
28. प्रश्न- राजशेखरस्य कृति: कास्ति?
उत्तरम्- काव्यमीमांसा।
29. प्रश्न- अमरूकशतकस्य लेखक: क:?
उत्तरम्- अमरूक:।
30. प्रश्न- महाभारतस्य प्रणेता क:?
उत्तरम्- कृष्णद्वैपायन:।
31. प्रश्न- "गाथासप्तशती" कस्य कृतिरस्ति?
उत्तरम्- हालकवे:।

32. प्रश्न- "आर्यासप्तशती" कस्य कृतिरस्ति?
उत्तरम्- गोवर्धनाचार्यस्य।
33. प्रश्न- गीतगोविन्दस्य लेखकः कः?
उत्तरम्- जयदेवः।
34. प्रश्न- भर्तृहरेः रचनाः काः?
उत्तरम्-तिस्रः, 1. नीतिशतकम्, 2. वैराग्यशतकम्, 3. शृंगारशतकम्।
35. प्रश्न- "ऋतुसंहारम्" कस्य कृतिरस्ति?
उत्तरम्- कालिदासस्य।
36. प्रश्न- "सूर्यशतकम्" कस्य रचना अस्ति?
उत्तरम्- मयूरभट्टस्य।
37. प्रश्न- "चण्डीशतकं" कस्य रचना अस्ति?
उत्तरम्- वाणभट्टस्य।
38. प्रश्न- "सौन्दर्यलहरी" कस्य कृतिरस्ति?
उत्तरम्- शंकराचार्यस्य।
39. प्रश्न- सौन्दरानन्दम्" इति केन रचितम्?
उत्तरम्- अश्वघोषेन।
40. प्रश्न- रामायणमञ्जरी" कस्य महाकवेः कृतिरस्ति?
उत्तरम्- क्षेमेन्द्रस्य।
41. प्रश्न- "श्रीकण्ठचरितम्" कस्य कृतिरस्ति?
उत्तरम्- मंखकस्य।
42. प्रश्न- "व्यक्तिविवेकः" कस्य कृतिरस्ति?
उत्तरम्- महिमभट्टस्य।
43. प्रश्न- अन्विताभिधानवादस्य प्रवर्त्तकः कः?
उत्तरम्- गुरुः प्रभाकरः।
44. प्रश्न- "शृंगारप्रकाशः" कस्य कृतिरस्ति?
उत्तरम्- भोजराजस्य।
45. प्रश्न- "काव्यप्रकाशः" कस्य कृतिःअस्ति?
उत्तरम्- मम्मटस्य।
46. प्रश्न- हेमचन्द्रस्य कृतिः कास्ति?
उत्तरम्- काव्यानुशासनम्।
47. प्रश्न- "चद्रालोकः" कस्य कृतिरस्ति?
उत्तरम्- पीयूषवर्षजयदेवस्य।
48. प्रश्न- पण्डितराज-जगन्नाथस्य कृतिः अस्ति?
उत्तरम्- रसगंगाधरः।

49. प्रश्न- विश्वनाथकविराजस्य कृतिः अस्ति?
उत्तरम्- साहित्यदर्पणः।
50. प्रश्न- रत्नावल्याः रचयिता कः?
उत्तरम्- हर्षदेवः।
51. प्रश्न- व्यक्तिविवेकः कस्य रचना वर्तते?
उत्तरम्- महिमभट्टस्य।
52. प्रश्न- अन्विताभिधानवादस्य प्रणेता कः?
उत्तरम्- प्रभाकर मिश्रः।
53. प्रश्न- कवि मेण्ठस्य काव्यरचना का?
उत्तरम्- हयग्रीववधम्।
54. प्रश्न- क्षेमेन्द्रस्य रामायण-महाभारतयोरुपरि लिखिता-रचना का?
उत्तरम्- रामायणमञ्जरी, भारतमञ्जरी।
55. प्रश्न- "बोधिसत्त्वावदानकल्पलता" इत्यस्य लेखकः कः?
उत्तरम्- क्षेमेन्द्रः।
56. प्रश्न- "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः" इति कस्य लक्षणमस्ति?
उत्तरम्- महाकाव्यस्य।
57. प्रश्न- भामिनीविलासः कस्य रचना वर्तते?
उत्तरम्- पण्डितराज जगन्नाथस्य।
58. प्रश्न- "कामायनी" ग्रन्थकारः कः?
उत्तरम्- जयशंकरप्रसादः।
59. प्रश्न- "मालविकाग्निमित्रम्" ग्रन्थस्य कः रचनाकारः?
उत्तरम्- कालिदासः।
60. प्रश्न- "इन्दिरा प्रियदर्शिनी" इति गीतिकाव्यं कस्य कृतिः-?
उत्तरम्- पण्डितदुलीचन्द्रस्य।
61. प्रश्न- "संस्कृतकुराणम्" इति कुरानग्रन्थस्यानुवादं कः कृतवान्?
उत्तरम्- सत्यदेववर्मा।
62. प्रश्न- "अष्टाङ्गसंग्रहः" इति आयुर्वेदसम्बद्धं पुस्तकं कस्यास्ति?
उत्तरम्- वाणभट्टस्य।
63. प्रश्न- "पाकदर्पणम्" केन सम्बद्धमस्ति?
उत्तरम्- आयुर्वेदेन।
64. प्रश्न- "भावप्रकाशः" केन रचितः?
उत्तरम्- भावमिश्रेण।
65. प्रश्न- "सुश्रुतसंहिताम्" कः प्रत्यपादयत्?
उत्तरम्- महर्षिः सुश्रुतः।

66. प्रश्न- "पञ्चभूतविज्ञानम्" केन सम्बद्धमस्ति?
उत्तरम्- आयुर्वेदेन।
67. प्रश्न- "कर्पूरमञ्जरी" इत्यस्याः लेखकः कः?
उत्तरम्- राजशेखरः।
68. प्रश्न- "युधिष्ठिरविजयम्" केन रचितम्?
उत्तरम्- वासुदेवेन।
69. प्रश्न- "वृत्तमौक्तिकः" इत्यस्य लेखकः कः?
उत्तरम्- भट्ट चन्द्रशेखरः।
70. प्रश्न- पण्डित मधुसूदन ओझा महोदयः वैदिकछन्दस्य विवेचनार्थं कं ग्रन्थं विरचितवान्?
उत्तरम्- छन्दः समीक्षाग्रन्थम्।
71. प्रश्न- छन्दः सूत्रस्य रचनाकारः कः?
उत्तरम्- आचार्य पिङ्गलः।
72. प्रश्न- पञ्चास्तिकाय इत्यस्य लेखकः कः?
उत्तरम्- कुन्दकुन्दाचार्यः।
73. प्रश्न- सङ्गीतरत्नाकरस्य रचनाकारः कः?
उत्तरम्- सारङ्गदेवः।
74. प्रश्न-पण्डित दामोदरः सङ्गीतविषयकं कं ग्रन्थम् अलिखत्?
उत्तरम्- सङ्गीतदर्पणम्।
75. प्रश्न- पञ्चदशी इत्यस्य लेखकः कः?
उत्तरम्- विद्यारण्यः।
76. प्रश्न- औचित्यसम्प्रदायस्य प्रवर्तकः कोऽस्ति?
उत्तरम्- क्षेमेन्द्रः।
77. प्रश्न- भामहः कस्य सम्प्रदायस्य प्रवर्तकः अस्ति?
उत्तरम्- वक्रोक्ति सम्प्रदायस्य।
78. प्रश्न-ऐतिहासिक "हम्मीर महाकाव्यस्य" लेखकः कः?
उत्तरम्- जयचन्द्रः।
79. प्रश्न- ईश्वर विलास-महाकाव्यस्य प्रणेता कोऽस्ति?
उत्तरम्- श्रीकृष्णभट्टः।
80. प्रश्न- श्रीकृष्णारामभट्टः किं ऐतिहासिक-महाकाव्यं अलिखत्?
उत्तरम्- कच्छवंशमहाकाव्यम्।
81. प्रश्न- जयवंशमहाकाव्यं केन विरचितम्?
उत्तरम्- सीताराम भट्ट पर्वणीकरेण।
82. प्रश्न- मानववंशमहाकाव्यं कस्य रचना अस्ति?
उत्तरम्- सूर्यनारायणशास्त्री महोदयस्य।

83. प्रश्न- पं. चन्द्रशेखरशास्त्री महोदयः किम् ऐतिहासिक काव्यं अलिखत्?
उत्तरम्- दुर्जनचरित्र महाकाव्यम्।
84. प्रश्न- चौरपञ्चाशिकायाः लेखकः कः?
उत्तरम्- विल्हणः।
85. प्रश्न- श्रीकण्ठचरितं कः विरचितवान्?
उत्तरम्- मङ्खः।
86. प्रश्न- रावणवधस्य रचनाकारः कः?
उत्तरम्- भट्टिः।
87. प्रश्न- महाकाव्य नवसाहसाङ्कचरितस्य लेखकः कः?
उत्तरम्- पद्यगुप्त परिमलः।
88. प्रश्न- प्रसिद्ध" खण्डनखण्डखाद्यम्" इत्यस्य लेखकः कः?
उत्तरम्- श्रीहर्षः।
89. प्रश्न- क्षेमेन्द्रस्य कानि रचनाकार्यानि सन्ति?
उत्तरम्-"पञ्च", 1. पद्यकादम्बरी, 2. चतुर्युगसङ्ग्रहः, 3. दशावतारचरितम्, 4. रामायण-मञ्जरी, 5. भारतमञ्जरी।
90. प्रश्न- आर्यासप्तशती कस्य रचनाकार्यं वर्तते?
उत्तरम्-गोवर्धनस्य।
91. प्रश्न- शान्तिशतकं कः विरचितवान्?
उत्तरम्- शिल्हणः।
92. प्रश्न- मुग्धोपदेशः कस्या रचना वर्तते?
उत्तरम्- जल्हणस्य।
93. प्रश्न- वक्रोक्तिपञ्चाशिका कस्य कृतिः वर्तते?
उत्तरम्- रत्नाकरस्य।
94. प्रश्न- आदर्श-रमणी कस्य रचना अस्ति?
उत्तरम्- भट्ट मथुरानाथ शास्त्रिणः।
95. प्रश्न- आदर्शदम्पति इत्यस्य प्रणेता कोऽस्ति?
उत्तरम्- पं. बुद्धिचन्द्रशास्त्री।
96. प्रश्न- स्वामी भगवदाचार्यस्य कानि रचनाकार्यानि सन्ति?
उत्तरम्-1. भारतपारिजात(गान्धिचरित), 2. पारिजातोपहारः, 3. पारिजातसौरभम्।
97. प्रश्न- डॉ. सत्यव्रतशास्त्री महोदयस्य कानि रचनाकार्यानि सन्ति?
उत्तरम्- 1. बोधिसत्वचरितम्, 2. रामकीर्तिमहाकाव्यम्।
98. प्रश्न- दयानन्दमहाकाव्यस्य रचनाकारः कः?
उत्तरम्- अखिलानन्दः।
99. प्रश्न- डॉ. श्रीधर भास्करवर्णेकरस्य कानि रचनाकार्यानि सन्ति?
उत्तरम्-1. शिवराज्योदयः, 2. विवेकानन्दविजयः, 3. संघ गीता।

100. प्रश्न- हरनामामृत काव्यस्य प्रणेता कः?
उत्तरम्- पं. विद्याधरशास्त्री।
101. प्रश्न- महावीरसौरभम् काव्यस्य प्रणेता कः?
उत्तरम्- आचार्य मधुकरशास्त्री।
102. प्रश्न- तर्जनी महाकाव्यस्य रचयिता कः?
उत्तरम्- पं. दुर्गादत्त शास्त्री।
103. प्रश्न- त्रिवर्गे के भवन्ति?
उत्तरम्- धर्मार्थकामाः।
104. प्रश्न- पण्डित जगन्नाथस्य गीतिकाव्यं किमस्ति?
उत्तरम्- भामिनी विलासः।
105. प्रश्न- सौन्दर्यलहरी कस्य कृतिः अस्ति?
उत्तरम्- आद्य शङ्कराचार्यस्य।
106. प्रश्न- प्रसिद्ध शिवमहिम्न स्तोत्रम् इत्यस्य लेखकः कः?
उत्तरम्- पुष्पदन्तः।
107. प्रश्न- काञ्चीधामस्य प्रमुखाचार्याः के सन्ति?
उत्तरम्- 1. आचार्य भरतः, 2. आचार्य दण्डी।
108. प्रश्न- शारदाधामस्य आचार्याः के सन्ति?
उत्तरम्- 1. भामह, 2. वामन, 3. उद्भट, 4. आनन्दवर्धन, 5. अभिनवगुप्त, 6. क्षेमेन्द्र, 7. कुन्तक, 8. महिमभट्ट, 9. मम्मटः।
109. प्रश्न- धारायाः महाकालेश्वरधामस्य आचार्याःके सन्ति?
उत्तरम्-1. धनिकः, 2. धनञ्जयः, 3. भोजराजः।
110. प्रश्न- काशीविश्वनाथस्य आचार्याः के सन्ति?
उत्तरम्-1. अप्पय दीक्षितः, 2. मधुसूदन सरस्वती, 3. पण्डितराज जगन्नाथः, 4. करपात्री स्वामी, 5. रेवाप्रसाद द्विवेदी, 6. महादेव शास्त्री, 7. वाल शास्त्री, पण्डित राम राजेश्वर शास्त्रि प्रभृतयः।
111. प्रश्न- भारतीय काव्यशास्त्रस्य आचार्य परम्परायाः" लेखकः कः?
उत्तरम्- आचार्य राधावल्लभ त्रिपाठी।
112. प्रश्न- "वस्त्वलंकारदर्शनम् इत्यस्य लेखकः कः?
उत्तरम्- ब्रह्मानन्द शर्मा।
113. प्रश्न- श्रीहर्षस्य कानि रचनाकार्यानि सन्ति?
उत्तरम्-"नव", 1. नैषधीयचरितम्, 2. नवसाहसाङ्कचरिमचम्पू, 3. खण्डनखण्डखद्यम्, 4. स्थैर्यविचारणप्रकरणम्, 5. विजयप्रशस्ति, 6. गौडोर्वीशकुलप्रशस्ति, 7. अर्णववर्णन, 8. दिन्दप्रशस्ति, 9. शिवशक्तिसिद्धिः।
114. प्रश्न- नाट्य सूत्रम् इत्यस्य लेखकः कः?
उत्तरम्- भरतः।

115. प्रश्न- काव्यादर्शः इत्यस्य लेखकः कः?
उत्तरम्- दण्डी।
116. प्रश्न- काव्यमीमांसा इत्यस्य लेखकः कः?
उत्तरम्- राजशेखरः।
117. प्रश्न- अभिनवगुप्तस्य काः रचनाः?
उत्तरम्- 1. ध्वन्यालोकलोचनम्, 2. अभिनव भारती।
118. प्रश्न- चन्द्रालोकः इत्यस्य लेखकः कः?
उत्तरम्- जयदेवः।
119. प्रश्न- कुवलयानन्द इत्यस्य लेखकः कः?
उत्तरम्- अप्पय दीक्षितः।
120. प्रश्न- दशरूपकम् इत्यस्य लेखकः कः?
उत्तरम्- धनञ्जयः।
121. प्रश्न- काव्यानुशासनम् इत्यस्य लेखकः कः?
उत्तरम्- हेमचन्द्रः।
122. प्रश्न- रस सम्प्रदायस्य प्रवर्तकः कः?
उत्तरम्- भरत मुनिः।
123. प्रश्न- अलंकार-सम्प्रदायस्य के समर्थकाः?
उत्तरम्- भामह, उद्भट, रुद्रटः।
124. प्रश्न- गुण (रीतिः) सम्प्रदायस्य के समर्थकाः?
उत्तरम्- दण्डी, वामन।
125. प्रश्न- वक्रोक्ति सम्प्रदायस्य के समर्थकाः?
उत्तरम्- कुन्तकः।
126. प्रश्न- ध्वनि सम्प्रदायस्य के समर्थकाः?
उत्तरम्- आननदवर्धनः, अभिनवगुप्तः।
127. प्रश्न- औचित्य सम्प्रदायस्य कः समर्थकः?
उत्तरम्- क्षेमेन्द्रः।
128. प्रश्न- भट्टिकाव्यम् इत्यस्य लेखकः कः?
उत्तरम्- भट्टिः।
129. प्रश्न- शिशुपालवधम् इत्यस्य लेखकः कः?
उत्तरम्- माघः।
130. प्रश्न- राजतरंगिणी इत्यस्य लेखकः कः?
उत्तरम्- कल्हणः।
131. प्रश्न- कालिदासः कस्य देवस्य भक्तः?
उत्तरम्- शिवस्य।

132. प्रश्न- "व्यक्तिविवेक" इत्यस्य रचनाकार: क:?
उत्तरम्- महिमभट्ट:।
133. प्रश्न- "विषमबाणलीला" इत्यस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- आनन्दवर्धन:।
134. प्रश्न- "आवन्तिसुन्दरी अस्य लेखक: क:?
उत्तरम्- दण्डी।
135. प्रश्न- छन्दो वेदस्य किमङ्गं विद्यते?
उत्तरम्- पादस्थानीयम्।
136. प्रश्न- कालिदास: कस्य राज्याश्रित: आसीत्?
उत्तरम्- विक्रमादित्यस्य।
137. प्रश्न- भोजप्रबन्ध: कस्य कृतिरास्ति?
उत्तरम्- वल्लालसेनस्य।
138. प्रश्न- कविषु क: कवि: श्रेष्ठ:?
उत्तरम्- कालिदास:।
139. प्रश्न- "हंससन्देश:" कस्य रचना अस्ति?
उत्तरम्- वेंकटेशस्य।
140. प्रश्न- "पार्श्वाभ्युदयस्य" रचनाकार: क:?
उत्तरम्- जिनसेन:।
141. प्रश्न- "नेमिदूतम्" इत्यस्य लेखक: क:?
उत्तरम्- विक्रमकवि:।
142. प्रश्न- शीलदूतस्य रचयिता क:?
उत्तरम्- चरित्र-सुन्दरगणि:।
143. प्रश्न- "जैन-मेघदूतम्" इत्यस्य लेखक: क:?
उत्तरम्- महाकवि: मेरुतुङ्ग:।
144. प्रश्न- "पवनदूतम्" इत्यस्य रचनाकार: क:?
उत्तरम्- वादिचन्द्र:।
145. प्रश्न- "हनुमद्दूतम्" इदं केन विरचितम्?
उत्तरम्- नित्यानन्द-स्वामिना।
146. प्रश्न- "हंसदूतम्" अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- रूपगोस्वामी।
147. प्रश्न- "उद्धवसंदेश:" इत्यस्य लेखक: क:?
उत्तरम्- रूपगोस्वामी।
148. प्रश्न- "पदकल्पतरु:" इत्यस्य रचनाकार: क:?
उत्तरम्- गोविन्द दास:।

149. प्रश्न- "कलिविडम्बनम्" इत्यस्य लेखकः कः?
उत्तरम्- नीलकण्ठ दीक्षितः।
150. प्रश्न- "प्रबोधसुधाकरः" अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- शङ्कराचार्यः।
151. प्रश्न- "भावविलासः" केन विरचितः?
उत्तरम्- रुद्रकविना।
152. प्रश्न- "जानकीपरिणयम्" इत्यस्य लेखकः कः?
उत्तरम्- चक्रकविः।
153. प्रश्न- "चाणक्यनीतिदर्पणस्य लेखकः कः?
उत्तरम्- चाणक्यः।
154. प्रश्न- कालिदासस्य का शैली प्रिया आसीत्?
उत्तरम्- वैदर्भी।
155. प्रश्न- महाकाव्ये न्यूनातिन्यूनं कति सर्गाः भवन्ति?
उत्तरम्- (8) अष्ट।
156. प्रश्न- काव्यस्य प्रमुख-भेदाः कति भवन्ति?
उत्तरम्- (3) त्रयः।
157. प्रश्न- महाकाव्य-विकासस्य प्रारम्भः कुतः मन्यते?
उत्तरम्- कालिदासात्।
158. प्रश्न- अद्भुत रसे कया सन्धिः भवति?
उत्तरम्- निर्वहणेन।
159. प्रश्न- काव्ये कति रसाः मन्यन्ते?
उत्तरम्- (9) नव-रसाः।
160. प्रश्न- "वक्रोक्तिः काव्यजीवितम्" इति कस्य मतम्?
उत्तरम्- कुन्तकस्य।
161. प्रश्न- आचार्य वामनमते काव्यस्यात्मा भवति?
उत्तरम्- रीति।
162. प्रश्न- संकेतितार्थस्य बोधिका-शक्तिः का?
उत्तरम्- अभिधा।
163. प्रश्न- तिलकमंजरी इत्यस्य लेखकः कः?
उत्तरम्- धनपालः।
164. प्रश्न- "शब्द साम्यं वैषम्येऽपि स्वरस्य यत्" इति कस्य लक्षणम्?
उत्तरम्- अनुप्रासस्य।
165. प्रश्न- "शब्दार्थौ सहितौ काव्यम्" इति कस्य काव्य-लक्षणम्?
उत्तरम्- भामहस्य।

166. प्रश्न- विषमवाणलीला" कस्य रचना विद्यते?
उत्तरम्- आनन्दवर्धनस्य।
167. प्रश्न- "इष्टनाशादनिष्टापत्ते:" इदं कस्य रसस्य लक्षणम्?
उत्तरम्- करुण-रसस्य।
168. प्रश्न- प्रबन्धकोशे कति व्यक्तिनां जीवन-चरित्रं वर्तते?
उत्तरम्- (24) चतुर्विंशति:।
169. प्रश्न- ."जातकमालायां कस्य पूर्वजन्मस्य कथा विद्यते?
उत्तरम्- बोधिसत्त्वस्य।
170. प्रश्न- "श्रीकण्ठचरितम्" इति ग्रन्थे कति सर्गा: सन्ति?
उत्तरम्- (25) पञ्चविंशति।
171. प्रश्न- "हंससन्देश:" इत्यस्य कथानक: केन सम्बद्ध:?
उत्तरम्- जनकी-रामौ।
172. प्रश्न- भट्टिकाव्ये कति सर्गा: सन्ति?
उत्तरम्- (12) द्वादश।
173. प्रश्न- शास्त्रीय दृष्ट्या "कर्पूरमंजरी" कस्यां श्रेण्यामागच्छति?
उत्तरम्- नाटिका।

पद्यम्- Poetry

(क) रघुवंशम्, (ख) कुमारसंभव, (ग) मेघदूत, (घ) किरातार्जुनीयम्, (ङ) शिशुपालवधम्, (च) नैषधीयचरितम्, (छ) बुद्धचरितम्, (ज) सौन्दरानन्द:, (झ) साहित्यदर्पण, (ञ) रसगंङ्गाधर:, (ट) काव्यप्रकाश, (ठ) ध्वन्यालोकम्, (ढ) महाभारतम्, (ड) रामायणम्, (ण) ऋतुसंहारम्-(त) भर्तृहरि:-नीतिशतकम्, शृंगारशतकम्, वैरागशतकम्। (थ) अन्य-काव्यानि)

(क) रघुवंशस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- कालिदासविरचिता: कृतय: कति सन्ति?
उत्तरम्- (7) सप्त।
2. प्रश्न- दीपशिखा" कस्योपाधि:?
उत्तरम्- कालिदासस्य।
3. प्रश्न- कनिष्ठकाधिपति: क:?
उत्तरम्- कालिदास:।
4. प्रश्न-कलिदासस्य जन्मकाल: वर्तते?
उत्तरम्- ई. पू. प्रथमशताब्दी।
5. प्रश्न- कालिदास विषये प्रसिद्धोक्ति: का?
उत्तरम्- "उपमा कालिदासस्य"।

6. प्रश्न- रघुवंशे कति सर्गाः सन्ति?
   उत्तरम्- (19) एकोनविंशतिः।
7. प्रश्न- इन्दुमती स्वयंवरवर्णनं कुत्रास्ति?
   उत्तरम्- रघुवंशे।
8. प्रश्न- "रघुवंशे" कति सूर्यवंशि नृपाणां वर्णनमस्ति?
   उत्तरम्- (29) एकोनत्रिंशतिः।
9. प्रश्न- प्रामुख्येन रघुवंश-महाकाव्ये कयोः उदात्तचरित्राणां वर्णनं प्राप्यते?
   उत्तरम्- रघु-रामयोः।
10. प्रश्न- रघुवंश-महाकाव्ये कस्य वंशस्य राज्ञां वर्णनं अस्ति?
    उत्तरम्- इक्ष्वाकुवंशप्रभव-राज्ञाम्।
11. प्रश्न- रघुवंशमहाकाव्यस्य मल्लिनाथेन रचिता व्याख्या का?
    उत्तरम्- सञ्जीवनी।
12. प्रश्न- लघुत्रय्यां किं नाम कालिदास काव्यं परिगण्यते?
    उत्तरम्- रघुवंशम्।
13. प्रश्न- "दिलीपस्य गो-सेवा" रघुवंशस्य कस्मिन् सर्गे वर्णिताऽस्ति?
    उत्तरम्- द्वितीयसर्गे।
14. प्रश्न-" अजविलापः" रघुवंशस्य कस्मिन् सर्गे समुपलभ्यते?
    उत्तरम्- अष्टमे सर्गे।
15. प्रश्न- रघुवंशस्य त्रयोदशे सर्गे का कथा वर्णिता अस्ति?
    उत्तरम्- रामस्य अयोध्यां प्रत्यागमनम्।
16. प्रश्न- रघुवंशे समुपवर्णितः अन्तिमः राजा कः अस्ति?
    उत्तरम्- अग्निवर्णः।
17. प्रश्न- रघुवंशस्य मंगलाचरणे कस्य वन्दना समुपलभ्यते?
    उत्तरम्- शिवस्य।
18. प्रश्न- कामधेनु शापितः राजा कः अस्ति?
    उत्तरम्- दिलीपः।
19. प्रश्न- "नन्दिनी" कस्याः पुत्री अस्ति?
    उत्तरम्- कामधेनोः।
20. प्रश्न- "संचारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा। नरेन्द्रमार्गाट्ट इव प्रपेदे, प्रलीनभावं स स भूमिपालः।। अनेन श्लोकेन सम्बद्धः कविविशेषः कः?
    उत्तरम्- कालिदासः।
21. प्रश्न- "शैशवेऽभयस्तविद्यानाम्" इदं वाक्यं कस्य ग्रन्थस्य वर्तते?
    उत्तरम्- रघुवंशमहाकाव्यस्य।
22. प्रश्न- "वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये" कस्य ग्रन्थस्य इयमुक्तिः?
    उत्तरम्- रघुवंशस्य।

23. प्रश्न- "सञ्चारिणी दीपशिखेव रात्रौ" इति रघुवंशमहाकाव्ये कस्मिन्संदर्भे वर्णितं भवति?
उत्तरम्- इन्दुमतीस्वयंवरे।
24. प्रश्न- दिलीपस्य भार्यायाः किं नाम?
उत्तरम्- सुदक्षिणा।
25. प्रश्न- दिलीपस्य कुलगुरु कः आसीत्?
उत्तरम्- वशिष्ठः।
26. प्रश्न- कालिदासस्य रीतिः/शैली का आसीत्?
उत्तरम्- वैदर्भी।
27. प्रश्न- रघुवंशस्य नायकः कः?
उत्तरम्- दिलीपः।
28. प्रश्न- रघुवंशस्य नायिका का?
उत्तरम्- सुदक्षिणा।
29. प्रश्न- रघुवंशम् कस्मिन् काव्यविधौ अस्ति?
उत्तरम्- महाकाव्ये।
30. प्रश्न- रघुवंशस्य मुख्य-रसः कः?
उत्तरम्- शृंगार-रस।
31. प्रश्न- रघुवंशम् इत्यस्य आधार-ग्रन्थः कः?
उत्तरम्- रामायणम्।
32. प्रश्न- रघुवंशम् अस्मिन् ग्रन्थे अज-विलापे कस्य रसस्य वर्णनं विद्यते?
उत्तरम्- करुण-रसस्य।
33. प्रश्न- रघुवंशम् अस्मिन् ग्रन्थे कति श्लोकाः विद्यन्ते?
उत्तरम्- 1569 श्लोकाः।
34. प्रश्न- रघुः कं यज्ञं समपादयत्?
उत्तरम्- विश्वजितम्।
35. प्रश्न- विदूषकः राज्ञः कीदृशः सहचरः भवति?
उत्तरम्- विनोदप्रियः।
36. प्रश्न- रघुवंशम् इति ग्रन्थे रघोः वर्णने कस्य रसस्य प्रधानता अस्ति?
उत्तरम्- शान्त-रसस्य।
37. प्रश्न- "रघुवंशम्" अस्य ग्रन्थस्य प्रारम्भे कस्य राज्ञो वर्णनेन भवति?
उत्तरम्- दिलीपस्य।
38. प्रश्न- "रघुवंशम्" अस्य ग्रन्थस्य समाप्तिः कस्य राज्ञो वर्णनेन भवति?
उत्तरम्- अग्निवर्णस्य।
39. प्रश्न- "रघुवंशम्" किमस्ति काव्यम्?
उत्तरम्- महाकाव्यम्।

40. प्रश्न- "अनावृतकपाटं द्वारं देहि" इति केन कथित्?
उत्तरम्- कालिदासेन।
41. प्रश्न- "क्वः सूर्यप्रभवो वंशः" कालिदासस्य इयमुक्तिः कस्मिन् ग्रन्थे विद्यते?
उत्तरम्- रघुवंश-महाकाव्ये।
42. प्रश्न- "अलं महीपाल तव श्रमेण" इदं कथनं कस्यास्ति?
उत्तरम्- सिंहस्य।
43. प्रश्न- नन्दिनी दिलीपस्य परीक्षां कति दिनानन्तरं करोति?
उत्तरम्- (22) द्वाविंशति दिनानन्तरम्।
44. प्रश्न- "कुम्भोदरः" कस्य नाम विद्यते?
उत्तरम्- शिव-सेवकस्य।
45. प्रश्न-"न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूच्छेति मारुतस्य" कस्मात् ग्रन्थात् उद्धृतः?
उत्तरम्- रघुवंशम् ग्रन्थात्।
46. प्रश्न- रघुवंशस्य प्रथमः राजा कः आसीत्?
उत्तरम्- मनुः।
47. प्रश्न- रघुवंश-ग्रन्थे मुख्य-रसः कः?
उत्तरम्- वीर-रसः।

(ख) कुमारसंभवस्य वस्तुनिष्ठप्रश्नोत्तराणि-

48. प्रश्न- कर्तिकेयजन्मनिरूपितमस्ति?
उत्तरम्- कुमारसम्भवे।
49. प्रश्न- पार्वत्यास्तपश्चरणं कस्मिन् काव्ये वर्ण्यते?
उत्तरम्- कुमारसम्भवे।
50. प्रश्न- कुमारसम्भवे कति सर्गाः सन्ति?
उत्तरम्- (17) सप्तदश।
51. प्रश्न- "शरीरमाद्यं खलु धर्मसाधनम्" -इदं वाक्यं कुत्रास्ति?
उत्तरम्- कुमारसम्भवे।
52. प्रश्न- "रतिविलापः" कस्मिन् महाकाव्ये वर्णितः?
उत्तरम्- कुमारसम्भवे।
53. प्रश्न- "कुमारसम्भवः" -कमुद्दिश्य देवैरभिमतः?
उत्तरम्- तारकासुरसंहारमुद्दिश्य।
54. प्रश्न- शिवस्य हृदये पार्वतीं प्रति प्रेमभावमुत्पादयितुं देवेन्द्रेण कः प्रेषितः?
उत्तरम्- कामदेवः।
55. प्रश्न- शिवपार्वत्योः विवाहप्रस्तावं कर्तुं हिमालयं प्रति के अगच्छन्?
उत्तरम्- सप्तर्षयः।
56. प्रश्न- तारकासुरसंहाराय सेनापतिरसौ स्यादिति-ब्रह्मदेवः कं निर्दिशति?
उत्तरम्-षण्मुखम्(कार्तिकेयम्)

57. प्रश्न- हिमालयस्य पत्न्याः नाम किम्?
उत्तरम्- मेना।
58. प्रश्न- "काम" शव्दस्य पञ्चपर्यायनामानि निर्दिशत?
उत्तरम्- अनङ्गः, पञ्चशरः, स्मरः, कुसुमेषुः, मदन।
59. प्रश्न- "गृहम्" इत्यस्य पर्यायपदानि कानि?
उत्तरम्- वेश्मः, सद्मः, निकेतनम्, गृहम्।
60. प्रश्न- "तारकासुरवधं लक्ष्यीकृत्य विरचितं काव्यमस्ति?
उत्तरम्- कुमारसम्भवम्।
61. प्रश्न- कुमारसम्भवस्य कस्मिन् सर्गे रतिविलापःवर्णितः?
उत्तरम्- चतुर्थेसर्गे।
62. प्रश्न- "शरीरमाद्यं खलु धर्मसाधनम्" कुमारसम्भवस्य सूक्तिरियं कस्य उक्तिरस्ति?
उत्तरम्- ब्रह्मचारिणः।
63. प्रश्न- "अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता" यस्मिन् सूक्तिरियं मिलति, तद् काव्यं किम्?
उत्तरम्- कुमारसम्भवः।
64. प्रश्न- "नववैधव्यमसह्यवेदनम्" सूक्तिरियं कुत्र प्राप्यते?
उत्तरम्- कुमारसम्भवे।
65. प्रश्न- "विषवृक्षोऽपि संवर्ध्य स्वयं क्षेत्तुमसाम्प्रतम्" सूक्तिरियं कुत्र प्राप्यते?
उत्तरम्- कुमारसम्भवे।
66. प्रश्न- "पुत्रोत्सवे माद्यति का न हर्षात्" सूक्तिरियं कुतः समुद्धृता?
उत्तरम्- कुमारसम्भवतः।
67. प्रश्न- कुमारसम्भवः इत्यस्य नायकः कः?
उत्तरम्- शिवः।
68. प्रश्न- कुमारसम्भवः इत्यस्य नायिका का?
उत्तरम्- पार्वती।

(ग) मेघदूतस्य वस्तुनिष्ठप्रश्नोत्तराणि-

69. प्रश्न- "मेघदूतम्" इत्यस्य लेखकः कः?
उत्तरम्- कालिदासः।
70. प्रश्न- मेघसंदेशकाव्ये नायकः कः?
उत्तरम्- कस्चिद् यक्षः।
71. प्रश्न-"आशाबन्धः कुसुमसदृशं प्रायशोद्याङ्गनानां" इत्युक्तिःकस्मिन् ग्रन्थेऽस्ति?
उत्तरम्- मेघदूते।
72. प्रश्न- अलकापुराधीशः कः?
उत्तरम्- कुबेरः।

73. प्रश्न- केवलं मन्दाक्रान्ताछन्दसि निबद्धः ग्रन्थः कः?
उत्तरम्- मेघदूतम्।
74. प्रश्न-यक्षः शापकालं कुत्र यापयति?
उत्तरम्- रामगिरौ।
75. प्रश्न- मेघदूते कस्य वर्णनमस्ति?
उत्तरम्- यक्षस्य।
76. प्रश्न-यक्षस्य दूतः कोऽस्ति?
उत्तरम्- मेघः।
77. प्रश्न- मेघदूते किं छन्दः प्रयुक्तमस्ति?
उत्तरम्- मन्दाक्रान्ता।
78. प्रश्न- मेघदूते प्रधानः रसः कः?
उत्तरम्- विप्रलम्भ शृंगारः।
79. प्रश्न-यक्षः केन शापितः?
उत्तरम्- कुबेरेण।
80. प्रश्न- मेघदूतस्य उपजीव्यकाव्यं किम्?
उत्तरम्- ब्रह्मवैवर्तपुराणम्।
81. प्रश्न- मेघदूते कैलासपर्यन्तं मेघस्य सहयात्रिणः के सन्ति?
उत्तरम्- राजहंसाः।
82. प्रश्न- मेघदूते "जह्नुकन्या" का अस्ति?
उत्तरम्- गंगा (निर्विन्ध्या)।
83. प्रश्न- मेधदूतस्य यक्षः कस्यानुचरः आसीत्?
उत्तरम्- कुबेरस्य।
84. प्रश्न- कालिदासमते मेघे कति द्रव्याणि विद्यन्ते?
उत्तरम्- (04) चत्वारः।
85. प्रश्न- मेघदूते चेतनाचेतनेषु प्रकृतिकृपणः कः?
उत्तरम्- कामार्त्तः।
86. प्रश्न-"याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इत्यत्र "अधिगुण" शब्देन कस्य बोधः भवति?
उत्तरम्- मेघस्य।
87. प्रश्न- मेघदूतम् अवन्त्यां कस्य कथायाः प्रसिद्धिम् उद्भावयति?
उत्तरम्- उदयनस्य।
88. प्रश्न- "शिप्रावातः प्रियतम इव प्रार्थना चाटुकारः" अनेन पद्यांशेन सम्बद्धः नगरविशेषः कः?
उत्तरम्- उज्जयिनी।

89. प्रश्न-"शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या" अनेन वाक्यांशेन कस्य नृत्यं संकेतितम्?
उत्तरम्- शिवस्य।
90. प्रश्न-"ज्ञातास्वादोविवृतजघनांकोविहातुंसमर्थः" अनेनपद्यांशेन कस्याः संकेतः प्रदर्शितः मूघदूते?
उत्तरम्- गम्भीरायाः नद्याः।
91. प्रश्न- भगवतः स्कन्दस्य वसतिः कुत्र अस्ति?
उत्तरम्- देवगिरौ।
92. प्रश्न- "अन्तः शुद्धसत्वमपि भविता वर्णमात्रेण कृष्णः" अनेन पद्यांशेन कस्याः नद्याः संकेतःसमुपलभ्यते?
उत्तरम्- सरस्वत्याः।
93. प्रश्न- मेघदूते मेघाच्छादितः कैलासः कीदृशः वर्णितः अस्ति?
उत्तरम्- बलरामसदृशः।
94. प्रश्न-"मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्" इत्यनेन संबद्धःनगरविशेषः कः?
उत्तरम्- अलका।
95. प्रश्न- मेघदूते यक्षगृहस्य सम्मुखे कः वृक्षः वर्तते?
उत्तरम्- मन्दारवृक्षः।
96. प्रश्न-यक्षगृहस्य सम्मुखे कीदृग् पर्वतः दृश्यते?
उत्तरम्- इन्द्रनीलपर्वतः।
97. प्रश्न-यक्षगृहस्य हेममालेः गृहस्य मुख्यद्वारे चित्रितौ स्तः?
उत्तरम्- शंख-पद्मौ।
98. प्रश्न-यक्षिणी विशालाक्षी शापदिवसानां गणना केन माध्यमेन करोति?
उत्तरम्- पुष्पमाध्यमेन।
99. प्रश्न-यक्षस्य शापान्तः कदा भवति?
उत्तरम्- देवोत्थापिन्याम्-एकादश्याम्।
100. प्रश्न-"नीचैः गच्छत्युपरि च दशाचक्रनेमिक्रमेण" सूक्तिरियं कस्मिन् ग्रन्थे समुपलभ्यते?
उत्तरम्- मेघदूते।
101. प्रश्न- "मेघदूतम्" कीदृशं काव्यम्?
उत्तरम्- गीति-काव्यम्।
102. प्रश्न- "माघे मेघे गतं वयः" अत्र मेघे पदस्य कोऽभिप्रायः?
उत्तरम्- मेघदूतम्।
103. प्रश्न- मेघदूतम् इत्यस्य नायिका का?
उत्तरम्- यक्षिणी।
104. प्रश्न- मेघदूतम् कियद् भागे विभक्तम्, विभागनाम किम्?
उत्तरम्- द्वयोः भागयोः, 1. पूर्वमेघः, 2. उत्तरमेघः।

105. प्रश्न- मेघदूतम् इति ग्रन्थे श्लोकानां का संख्या?
उत्तरम्- 115 श्लोकाः।
106. प्रश्न- मेघदूतम् ग्रन्थस्य प्रमुख-रसः कः?
उत्तरम्- विप्रलम्भ-शृंगारः।
107. प्रश्न- मेघदूतम् ग्रन्थस्य उपजीव्य-ग्रन्थः कः?
उत्तरम्- रामायणम्।
108. प्रश्न- मेघदूतम् अस्य ग्रन्थस्य का शैली?
उत्तरम्- वैदर्भी।
109. प्रश्न- मेघदूतम् इति ग्रन्थे कः छन्दः प्रयुक्तः?
उत्तरम्- मन्दाक्रान्ता।
110. प्रश्न- उपमा सम्राट् कः?
उत्तरम्- कालिदासः।
111. प्रश्न- मेघदूतम् इति ग्रन्थे यक्षानुसारं कियत्य मासः शेषो विद्यते?
उत्तरम्- (4) चत्वारः।
112. प्रश्न- मेघदूतम् ग्रन्थे यक्षिणी शाप दिवसस्य गणना कया क्रियते?
उत्तरम्- पुष्पैः।
113. प्रश्न-"कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे" अत्र "जन" शब्दः कस्य बोधकः?
उत्तरम्- यक्षस्य।
114. प्रश्न- मेघदूतम् ग्रन्थानुसारं मेघ-तत्वं किम्?
उत्तरम्- धूमज्योतिः सलिल मरुतां सन्निपातः।
115. प्रश्न- "आषाढ़स्य प्रथमदिवसे" कस्य ग्रन्थस्योक्तिः?
उत्तरम्- मेघदूतम् ग्रन्थस्य।
116. प्रश्न- मेघदूतम् इति ग्रन्थे विरही-यक्षः केन माध्यमेन संदेशं प्रेषयति?
उत्तरम्- मेघ-माध्यमेन।
117. प्रश्न- मेघदूतम् इति ग्रन्थे अभिशप्त-यक्षः कुत्र स्थितोऽस्ति?
उत्तरम्- हेमकूटे।
118. प्रश्न- अभिशप्त-यक्षस्य पत्नी कुत्र वसति?
उत्तरम्- अलकापुरी-नगरे।
119. प्रश्न- मेघदूतस्य पूर्वमेघे कति श्लोकाः सन्ति?
उत्तरम्- (63) त्रिषष्ठि श्लोकाः।
120. प्रश्न- मेघदूतस्य उत्तरमेघे कति श्लोकाः सन्ति?
उत्तरम्- (52) द्विपञ्चाशत् श्लोकाः।
121. प्रश्न- मेघदूतम् इति ग्रन्थोपरि अधुनापर्यन्तं कतिषु भाषासु टीका विद्यते?
उत्तरम्- (18) अष्टादश भाषासु।

122. प्रश्न- धनपति-कुवेरस्य नगरी कुत्रास्ति?
उत्तरम्- अलकायाम्।
123. प्रश्न- कुवेरं कः अदशत्?
उत्तरम्- भ्रमरः।
124. प्रश्न- गीतिकाव्ये कस्य वर्णनं भवति?
उत्तरम्- जीवनस्य एक पक्षस्य।
125. प्रश्न- कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्तः" अत्र श्लोके कः छन्दः?
उत्तरम्- मन्दाक्रान्ता।
126. प्रश्न- "कामार्ता हि प्रकृति कृपणाश्चेतनाचेतनेषु" इयं सूक्तिः कुतः उद्धृतः?
उत्तरम्- मेघदूतात्।
127. प्रश्न- "रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय" इयं सूक्तिः कुतः उद्धृतः?
उत्तरम्- मेघदूतात्।
128. प्रश्न- मेघस्य यात्रा-समये वामपार्श्वे कस्याः ध्वनिः भवति?
उत्तरम्- चातकस्य।
129. प्रश्न-"सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि" अत्र "प्रणयि हृदयं" केन सम्बद्धः?
उत्तरम्- यक्षिणी।
130. प्रश्न-"प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः" अत्र यत् शब्देन कस्य ग्रहणम्?
उत्तरम्- आम्रकूटस्य।
131. प्रश्न-"भक्तिच्छेदैरिव विरचितां भूतिमंगे गजस्य" अत्र गजस्य तुलना केन सह वर्तते?
उत्तरम्- बिन्ध्येन।
132. प्रश्न-यात्राकाले मेघं कामुकत्वस्य तत्काल-फलं कुत्र प्राप्यते?
उत्तरम्- विदिशायाम्।
133. प्रश्न- उद्दामानि प्रथयति शिलावेश्मभिर्यौ वनानि-इयं केन पर्वतेन सम्बद्धः?
उत्तरम्- नीचैः इत्यनेन।
134. प्रश्न- "स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु" इयं कस्याः नद्या सम्बद्धः?
उत्तरम्- निर्बिन्ध्यायाः(गंगायाः)
135. प्रश्न- मेघदूते कस्याः नद्याः पवनं "प्रार्थनाचाटुकार-प्रियतमम्" इति कथ्यते?
उत्तरम्- शिप्रा-नद्याः।
136. प्रश्न- "अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले" इयं केन नगरेन सम्बद्धः?
उत्तरम्- उज्जयिनी-नगरेन।
137. प्रश्न-"अन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः अत्र "सुहृत्" शब्देन कस्य बोधो भवति?
उत्तरम्- यक्षस्य।
138. प्रश्न- "ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः" इयं कया नद्या सम्बद्धः?
उत्तरम्- गम्भीरा-नद्या।

139. प्रश्न- सगरतनयस्वर्गसोपानपंक्तिम्- इयं कस्याः विशेषणम्?
उत्तरम्- जह्नोः कन्याम्।

140. प्रश्न-"सोपानत्त्वं कुरु मणितटारोहणाग्रयायी" -अत्र मेघस्य सोपानत्वं कयोःदेवदम्पत्योः आरोहनाय उद्दिष्टोऽस्ति?
उत्तरम्- गौरी-शंकरोः।

141. प्रश्न-"यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानाम्" -इयमुक्तिः केन नगरेन सम्बद्धः?
उत्तरम्- अलका-नगरेन।

142. प्रश्न- अलकायां कुबेरस्य भवनेन कस्यां दिशायां यक्षस्यावासः अस्ति?
उत्तरम्- उत्तर-दिशायाम्।

143. प्रश्न- "कच्चिद् भर्तुः स्मरसि रसिकेत्वं हि तस्य प्रियेति" -इयं कया सम्बद्धः?
उत्तरम्- सारिकया।

144. प्रश्न- "भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ति" इयमुक्तिः कया सम्बद्धः?
उत्तरम्- वीणया।

145. प्रश्न-"प्रायः सर्वोपरि भवति करुणावृत्तिरार्द्रान्तरात्मा" -अत्र सर्व शब्देन कस्य बोधो भवति?
उत्तरम्- मेघस्य।

(घ) किरातार्जुनीयस्य वस्तुनिष्ठप्रश्नोत्तराणि-

146. प्रश्न- भारविः भारतस्य कस्य भागस्य निवासी?
उत्तरम्- दक्षिणभागस्य।

147. प्रश्न- भारविः कस्य नरेशस्य सभापण्डित आसीत्?
उत्तरम्- चालुक्यवंशीय-नरेशस्य।

148. प्रश्न- भारवेः पितुः नाम किम्?
उत्तरम्- श्रीधरः।

149. प्रश्न- भारवेः मातुः नाम किम्?
उत्तरम्- सुशीला।

150. प्रश्न- दुर्योधनस्य अपरं नाम किम्?
उत्तरम्- सुयोधनः।

151. प्रश्न- "शरदवर्णनम्" कस्मिन् महाकाव्ये वर्तते?
उत्तरम्- किरातार्जुनीये।

152. प्रश्न- किरातवेषधारी कः आसीत्?
उत्तरम्- शिवः।

153. प्रश्न- किरातर्जुनीये महाकाव्ये कतिसर्गाः समुपलभ्यन्ते?
उत्तरम्- (18) अष्टादश।

154. प्रश्न-श्री-शब्देन किन्तावत् महाकाव्यं प्रारभ्यते ?
उत्तरम्- किरातार्जुनीयम्।

155. प्रश्न- पशुपतास्त्रप्राप्त्यर्थं अर्जुनः कुत्र प्रयाति?
उत्तरम्- हिमालये।
156. प्रश्न- शिवार्जुनयोः युद्धः कुत्र वर्णितोऽस्ति?
उत्तरम्- किरातार्जुनीये।
157. प्रश्न- अर्थगोरवं कस्य कवेः प्रसिद्धम्?
उत्तरम्- भारवेः।
158. "प्रश्न- सहसा विदधीत न क्रियामविवेकः परमापदां पदम्" इति वाक्यस्य कर्ता कः?
उत्तरम्- भारविः।
159. प्रश्न- नारिकेलफलसंमितम् वचः कस्य अस्ति?
उत्तरम्- भारवेः।
160. प्रश्न- किरातार्जुनीयस्य प्रथमसर्गस्य छन्दः कः?
उत्तरम्- वंशस्थबिलम्।
161. प्रश्न- किरातर्जुनीये महाकाव्ये युधिष्ठिरस्य गुप्तचरः कः?
उत्तरम्- वनेचरः।
162. प्रश्न- "हितं मनोहारि च दुर्लभं वचः" सूक्तिरियं कस्य उक्तिरस्ति?
उत्तरम्- वनेचरस्य।
163. प्रश्न- भारवेः स्थितिकालः कः?
उत्तरम्- सप्तमशतकः।
164. प्रश्न- भारविः कीदृशो भक्त आसीत्?
उत्तरम्- शैवः।
165. प्रश्न- भारवेः अपरं नाम किम्?
उत्तरम्- आतपत्रभारविः।
166. प्रश्न- राजनीतिपरकं किं महाकाव्यम्?
उत्तरम्- किरातार्जुनीयम्।
167. प्रश्न- किरातार्जुनीये कस्य रसस्य प्रधान्यम्?
उत्तरम्- वीर-रसस्य।
168. प्रश्न- शिवार्जुनयुद्धमवलम्व्य रचितं काव्यं किम्?
उत्तरम्- किरातार्जुनीयम्।
169. प्रश्न- "न तितिक्षा सममस्ति साधनम्" इदं वाक्यं कस्य ग्रन्थस्य वर्तते?
उत्तरम्- किरातार्जुनीयस्य।
170. प्रश्न- अर्थ गौरवाय कः कविः प्रसिद्धः?
उत्तरम्- भारविः।
171. प्रश्न-"न नोननुन्नो नुन्नोनो नाना नानानना ननु" अस्मिन् श्लोके कः कविः असाधारण-कौशलं प्रदर्शितवान्?
उत्तरम्- भारविः।

172. प्रश्न- कस्य महाकाव्यस्य आदितः सर्गत्रयम् "पाषाणत्रयं" कथ्यते?
उत्तरम्- किरातार्जुनीयम्।
173. प्रश्न- किरातार्जुनीयम् महाभारतस्य कस्मात् पर्वात् गृहीतः?
उत्तरम्- वन-पर्वात्।
174. प्रश्न- किरातार्जुनीयम् ग्रन्थे एकाक्षर-अलंकाराणां का संख्या?
उत्तरम्- (7) सप्त।
175. प्रश्न- भारवि महोदयस्य वास्तविक-नाम किमासीत्?
उत्तरम्- दामोदरः।
176. प्रश्न- "विचित्ररूपाः खलुचित्तवृत्तयः" इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृतः?
उत्तरम्- किरातार्जुनीयम् ग्रन्थात्।

(ङ) शिशुपालवधस्य वस्तुनिष्ठप्रश्नोत्तराणि-

177. प्रश्न- माघविरचितं महाकाव्यं किमस्ति?
उत्तरम्- शिशुपालवधम्।
178. प्रश्न- रैवतकपर्वतवर्णनं कुत्र वर्तते?
उत्तरम्- शिशुपालवधे।
179. प्रश्न- माघः भारतस्य कस्य भूभागस्य निवासी?
उत्तरम्- गुजरातप्रान्तस्य भीमनाल-नगरस्य।
179. प्रश्न- शिशुपालवधे कति सर्गाः सन्ति?
उत्तरम्- (20) विंशतिः।
180. प्रश्न- "माघे सन्ति त्रयो गुणा" इत्युक्त्वा किं काव्यं प्रसिद्धम्?
उत्तरम्- शिशुपालवधम्।
181. प्रश्न- "वृहद्त्रयी" पदेन कानि पुस्तकानि गृह्यन्ते?
उत्तरम्- "त्रीणि" 1. शिशुपालवधम्, 2. किरातार्जुनीयम्, 3. नैषधीयचरितम्।
182. प्रश्न- रैवतकपर्वतस्य वर्णनं कस्मिन् सर्गे विद्यते?
उत्तरम्- चतुर्थे सर्गे।
183. प्रश्न- "घण्टामाधः" कस्योपाधिः?
उत्तरम्- माघस्य।
184. प्रश्न- शिशुपालवधस्य प्रतिनायकः कः?
उत्तरम्- शिशुपालः।
185. प्रश्न- "क्षणे-क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः" इति केन प्रतिपादितम्?
उत्तरम्- माघेन।
186. प्रश्न- शिशुपालवधस्य प्रेरणास्रोतं मुख्यं पुराणं किम्?
उत्तरम्- श्रीमद्भागवतम्।
187. प्रश्न- "नवसर्गगते माघे नवशब्दो न विद्यते" कस्य कृते इदं वाक्यम्?
उत्तरम्- माघस्यकृते।

188. प्रश्न- शिशुपालवधस्य अङ्गीरसः कः?
उत्तरम्- वीररसः।
189. प्रश्न- माघविरचिताः ग्रन्थ-संख्या कियती अस्ति?
उत्तरम्- एका।
190. प्रश्न- "प्रभात-वर्णनम्" शिशुपालवधस्य कस्मिन् सर्गे वर्तते?
उत्तरम्- एकादशे सर्गे।
191. प्रश्न- नवपलाशपलाश वनं पुरः स्पुफटपरागपरागतपङ्कजम्।
उत्तरम्-मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः।।
192. प्रश्न- अनुप्रासस्य योजनायां माघः कस्य सहोदरः?
उत्तरम्- भारवि-महोदयस्य।
193. प्रश्न-"शरीरभाजां भवदीयदर्शनं, व्यनक्ति कालत्रितयेऽपियोग्यताम्" इति कस्य ग्रन्थस्य सूक्तिः?
उत्तरम्- शिशुपालवधम् इति ग्रन्थस्य।
194. प्रश्न- उपमा, अर्थगौरवम्, पदलालित्यञ्च एते त्रयः गुणाःकस्मिन् काव्ये सन्ति?
उत्तरम्- माघे।
195. प्रश्न- माघस्य पितुर्नाम किमासीत्?
उत्तरम्- दत्तक-सर्वाश्रमः।
196. प्रश्न- "माघकाव्यम्" इति कस्य ग्रन्थस्य प्रसिद्धिरस्ति-?
उत्तरम्- शिशुपालवधकाव्यस्य।
197. प्रश्न- "मेघे माघे गतं वयः" इति कस्य महाकाव्यस्य लोकप्रियतां सूचयति?
उत्तरम्- शिशुपालवधस्य।
198. प्रश्न- माधुर्यौजः प्रसादाख्यास्त्रयोगुणाः कस्यकवेर्महाकाव्ये सन्ति?
उत्तरम्- माघस्य काव्ये।
199. प्रश्न- "बृहत्त्रय्यां किं परिगण्यते?
उत्तरम्- शिशुपालवधम्।
200. प्रश्न- शिशुपालवधस्य प्रथमसर्गे द्वारिकायां कस्यागमनं दृश्यते?
उत्तरम्- नारदस्य।
201. प्रश्न- युधिष्ठिरेण अनुष्ठिते कस्मिन् यज्ञे भगवता श्रीकृष्णेन शिशुपालस्य वधः विधीयते?
उत्तरम्- राजसूययज्ञे।
202. प्रश्न-"क्षणे-क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः" सूक्तिरियं कस्मिन् ग्रन्थे समुपलभ्यते?
उत्तरम्- शिशुपालवधे।
203. प्रश्न- उपमा, अर्थगौरवं, पदलालित्यञ्च सर्वेषामुपलब्धिःकस्य काव्ये समुपलभ्यते?
उत्तरम्- माघस्य।

204. प्रश्न- रैवतक-पर्वतस्य वर्णनं कुत्र दरीदृश्यते?
उत्तरम्- शिशुपालवधे।
205. प्रश्न- "शिशुपालवधम्" इत्यस्य प्रमुख-रसः कः?
उत्तरम्- वीर रसः।
206. प्रश्न- "शिशुपालवधम्" इति महाकाव्ये कति सर्गाः सन्ति?
उत्तरम्- (20) विंशतिः।
207. प्रश्न- "शिशुपालवधम्" इति ग्रन्थे प्रथमसर्गस्य प्रधान-छन्दः किम्?
उत्तरम्- वंशस्थः।
208. प्रश्न-"सती च योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि" इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृताऽस्ति?
उत्तरम्- शिशुपालवधम् ग्रन्थात्।
209. प्रश्न- माघस्य जन्मस्थानं कुत्र विद्यते?
उत्तरम्- भीनमाले।
210. प्रश्न- शिशुपालवधम् केषु निबद्धोऽस्ति?
उत्तरम्- सर्गेषु।
211. प्रश्न- शिशुपालवधम् इति ग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्- 1650 श्लोकाः।
212. प्रश्न- महाकवि-माघस्य समयः कः?
उत्तरम्- 675 खीष्टाब्दः।
213. प्रश्न- शिशुपालवधस्य नायकः कः?
उत्तरम्- कृष्णः।
214. प्रश्न- शिशुपालवधस्य मंगलाचरणस्य प्रारम्भः केन शब्देन भवति?
उत्तरम्- "श्री" शब्देन।
215. प्रश्न- शिशुपालवधस्य प्रथमसर्गे श्लोक-संख्या कति?
उत्तरम्- (75) पञ्चसप्ततिः।
216. प्रश्न- शिशुपालवधस्य मंगलाचरणे कस्य वर्णनमस्ति?
उत्तरम्- कृष्णस्य।
217. प्रश्न- नारदस्य हस्ते किमस्ति?
उत्तरम्- वीणा।
218. प्रश्न- "नवानधोऽधो वृहतः पयोधरान" इति कुत्र दरीदृश्यते?
उत्तरम्- शिशुपालवधम् ग्रन्थे।
219. प्रश्न- नारदस्य पितुर्नाम किम्?
उत्तरम्- ब्रह्मा।
220. प्रश्न- "भवन्ति नापुण्यकृतां मनीषिणः" इति सूक्तौ कस्य वर्णनमस्ति?
उत्तरम्- सज्जनस्य।

221. प्रश्न- नारद: कस्य संदेशं नीत्वा कृष्णस्य पार्श्वे आगच्छत्?
उत्तरम्- इन्द्रस्य।
222. प्रश्न- "शिशुपालवधम्" कुत: उद्धृतोऽस्ति?
उत्तरम्- महाभारतस्य सभापर्वात्।
223. प्रश्न- शिशुपालवधस्य लेखक: क:?
उत्तरम्- घण्टा-माघ:।
224. प्रश्न- महाकवि माघ: कस्य अनुगामी अस्ति?
उत्तरम्- भारवे:।
225. प्रश्न- द्वारिकाधीश: क:?
उत्तरम्- श्रीकृष्ण:।
226. प्रश्न- श्रीकृष्णस्य राजप्रसादे कस्य आगमनं भवति?
उत्तरम्- देवर्षि नारदस्य।
227. प्रश्न- शिशुपालस्योपरि आक्रमणस्य चर्चा केन कृत:?
उत्तरम्- बलरामेण।
228. प्रश्न- उद्धव: कस्या वार्ताया: विरोधयति?
उत्तरम्- बलरामस्य।
229. प्रश्न- शिशुपालवधस्य तेज:पुञ्ज: कस्मिन् समाहितो भवति?
उत्तरम्- श्रीकृष्णे।
230. प्रश्न- अनुप्रासस्य योजनायां माघ: कस्य सहोदर:?
उत्तरम्- भारवि-महोदयस्य।
231. प्रश्न- राजसूययज्ञे कस्य अग्रिमापूजा भवति?
उत्तरम्- कृष्णस्य।

(च) नैषधीयचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि-

232. प्रश्न- "तव वर्त्मनि बर्ततां शिवं पुनरस्तु त्वरितं समागम:" -इतीयं कस्य कवेरुक्ति:?
उत्तरम्- श्रीहर्षस्य।
233. प्रश्न- "हंससंदेश:" कस्मिन् काव्ये वर्णितोऽस्ति?
उत्तरम्- नैषधीयचरिते।
234. प्रश्न- श्रीहीर: मामल्लदेवी च कस्य पितरौ आस्ताम्?
उत्तरम्- श्रीहर्षस्य।
235. प्रश्न- श्री हर्षेण विरचिता: कियन्तो ग्रन्था:?
उत्तरम्- (9) नव।
236. प्रश्न- श्रीहर्षस्य आश्रयदाता क: आसीत्?
उत्तरम्- जयन्तचन्द्र:(जयचन्द्र:)
237. प्रश्न- श्रीहर्षस्य मातुल: क:?
उत्तरम्- मम्मट:।

238. प्रश्न- श्रीहर्षस्य पितुर्नाम किम्?
उत्तरम्- हीरः।
239. प्रश्न- श्री हर्षस्य मातुर्नाम किम्?
उत्तरम्- मामल्लदेवी।
240. प्रश्न- नैषधचरिते कति सर्गाः सन्ति?
उत्तरम्- द्वाविंशतिः।
241. प्रश्न- नैषधे नायकनायिके कौ स्तः?
उत्तरम्- दमयन्ती- नलौ।
242. प्रश्न- दमयन्त्याः पितुः नाम किम्?
उत्तरम्- भीमसेनः।
243. प्रश्न- नैषधचरितस्य उपजीव्यमस्ति?
उत्तरम्- महाभारतम्(नलोपाख्यानम्)
244. प्रश्न- नैषधे अङ्गीरसः कः?
उत्तरम्- शृगाररसः।
245. प्रश्न- विद्वदौषधं किमस्ति?
उत्तरम्- नैषधम्।
246. प्रश्न- "श्रीहर्षः" कस्याः शताब्द्याः पण्डितः?
उत्तरम्- द्वादश-शताब्द्याः।
247. प्रश्न- श्रीहर्षः कस्य मतं खण्डितवान्?
उत्तरम्- उदयनाचार्यस्य मतम्।
248. प्रश्न- उदयनाचार्यः कीदृशो नैयायिकः?
उत्तरम्- द्वैतवादी।
249. प्रश्न- श्रीहर्षस्य कृतिः कास्ति?
उत्तरम्- नैषधीयचरितम्।
250. प्रश्न- नैषधीयचरिते कति सर्गाः समुपलभ्यन्ते?
उत्तरम्- (22) द्वाविंशतिः।
251. प्रश्न- दमयन्तीमभिलक्ष्य नलस्य गुणगानं कः करोति?
उत्तरम्- हंसः।
252. प्रश्न-"मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी" नैषधीयचरिते कस्य सूक्तिः?
उत्तरम्- हंसस्य।
253. प्रश्न- श्रीहर्षः कस्य वादस्य समर्थकः?
उत्तरम्- अद्वैतवादस्य।
254. प्रश्न- प्रभाकरवर्धनस्य पुत्रः आसीत्?
उत्तरम्- हर्षवर्धन।

255. प्रश्न- प्रभाकरवर्धनस्य भार्या का आसीत्?
उत्तरम्- यशोवती।
256. प्रश्न- दित्याः पुत्रस्य किं नाम अस्ति?
उत्तरम्- हिरण्यकशिपुः।
257. प्रश्न- "दयितं जनः खलु गुणीति मन्यते" अयं श्लोकः कुतः उद्धृतः?
उत्तरम्- नैषधचरितात्।
258. प्रश्न- हिरण्यकशिपुं कः अमारयत्?
उत्तरम्- विष्णुः।
259. प्रश्न- हिरण्यकशिपुः पुनर्जन्मनि कस्य अवतारं गृहीतवान्?
उत्तरम्- रावणस्य।
260. प्रश्न- नैषधीयचरितम् अस्य ग्रन्थस्य गणना कुत्र क्रियते?
उत्तरम्- वृहत्त्रयाम्।
261. प्रश्न- नैषधीयचरितम् किमस्ति?
उत्तरम्- महाकाव्यम्।
262. प्रश्न- नैषधीयचरितम् इत्यस्य रचयिता कविः कः?
उत्तरम्- श्रीहर्षः।
263. प्रश्न- श्रीहर्षस्य शैली का?
उत्तरम्- वैदर्भी।
264. प्रश्न- नैषधीयचरितम् अस्मिन् ग्रन्थे प्रयुक्तानि प्रत्येकपदानि कानि?
उत्तरम्- श्लिष्टानि।
265. प्रश्न- भीमस्य राजधानी कुत्रासीत्?
उत्तरम्- विदर्भः।
266. प्रश्न- दूत-कार्ये कः कुशलः आसीत्?
उत्तरम्- हंसः।
267. प्रश्न- नैषधीयचरितम् इत्यस्य नायकः कीदृशो विद्यते?
उत्तरम्- कुलीनः।
268. प्रश्न- नैषधीयचरितम् इत्यस्य नायिका कीदृशी विद्यते?
उत्तरम्- कुलीना।
269. प्रश्न- नैषधीयचरिते कविः शिल्पविज्ञानेन सह कस्य विज्ञानस्य वर्णनं कृतवान्?
उत्तरम्- प्राणिविज्ञानस्य।
270. प्रश्न- नैषधीयचरिते कविःसामुद्रिकशास्त्रेण सह कस्य वर्णनं कृतवान्?
उत्तरम्- तन्त्रशास्त्रस्य।
271. प्रश्न- नैषधीयचरिते प्रयुक्तं छन्दः किम्?
उत्तरम्- उपजातिः।

272. प्रश्न- "श्रीहर्ष:" कस्य राज्याश्रित आसीत्?
उत्तरम्- जयचन्द्रस्य।
273. प्रश्न- "कृतमध्यबिलं विलोक्यते" -इयं कस्या: नायिकायै कथित:?
उत्तरम्- दमयन्त्यै।

(छ) बुद्धचरितस्य वस्तुनिष्ठप्रश्नोत्तराणि-

274. प्रश्न- बुद्धचरितस्य लेखक: क:?
उत्तरम्- अश्वघोष:।
275. प्रश्न- "बुद्धचरितम्" कीदृशं काव्यम्?
उत्तरम्- महाकाव्यम्।
276. प्रश्न- "अश्वघोषस्य बुद्धचरिते "कति सर्गा: सन्ति?
उत्तरम्- (28) अष्टाविंशति:। 277. प्रश्न- "इक्ष्वाकु" इति शब्देन क: ग्रन्थ: प्रारभ्यते?
उत्तरम्- बुद्धचरितम्।
278. प्रश्न- अश्वघोपस्य मातु: नाम किम्?
उत्तरम्- सुवर्णाक्षी।
279. प्रश्न- अश्वघोष: क: आसीत्?
उत्तरम्- बौद्ध:।
280. प्रश्न- अश्वघोष: कस्य स्थानस्य निवासी आसीत्?
उत्तरम्- साकेतस्य।
281. प्रश्न- बुद्धचरितस्य प्रथमसर्गस्य किं नाम?
उत्तरम्- भगवत्प्रसूति:।
282. प्रश्न- बुद्धचरिते अन्त: पुरविहारसंज्ञक: सर्गविशेष:क:?
उत्तरम्- द्वितीय:।
283. प्रश्न- बुद्धचरिते अभिनिष्क्रमणं कस्मिन् सर्गे वर्णितम् अस्ति?
उत्तरम्- पञ्चमे सर्गे।
284. प्रश्न- महाकवि: अश्वघोष:"छन्दकनिवर्तनम्" कस्मिन् सर्गे प्रस्तौति?
उत्तरम्- (06) षष्ठसर्गे।
285. प्रश्न- बुद्धचरितस्य सप्तमसर्गस्य प्रधानवर्ण्यविषय: क: अस्ति?
उत्तरम्- तपोवनप्रवेश:।
286. प्रश्न- बुद्धचरितस्य कस्मिन् सर्गे "अन्त:पुरविलाप:" वर्णित:?
उत्तरम्- अष्टमे सर्गे।
287. प्रश्न- बुद्धचरिते"कुमारान्वेषणम्" कस्मिन् सर्गे समुपलभ्यते?
उत्तरम्- नवमे सर्गे।
288. प्रश्न- बुद्धचरितस्य दशमसर्गस्य वर्ण्यविषय: क:?
उत्तरम्- श्रेण्याभिगमनम्।

289. प्रश्न- बुद्धचरिते कामविगर्हणसंज्ञकः सर्गः कः?
उत्तरम्- एकादश।
290. प्रश्न- बुद्धचरितस्य कस्मिन् सर्गे "अराडदर्शनः" प्राप्यते?
उत्तरम्- द्वादशे सर्गे।
291. प्रश्न- बुद्धचरितस्य कस्मिन् सर्गे अन्तःपुरविलापः" प्राप्यते?
उत्तरम्- त्रयोदशे सर्गे।
292. प्रश्न- "बुद्धत्वप्राप्तिः" बुद्धचरितस्य कस्मिन् सर्गे समुपवर्णिता?
उत्तरम्- (14) चतुर्दशे सर्गे।
293. प्रश्न- बुद्धचरितम् ग्रन्थे किं छन्दः?
उत्तरम्- अनुष्टुप्।
294. प्रश्न- बुद्धचरितम् इत्यस्य कः प्रमुख-रसः?
उत्तरम्- शान्त-रसः।

(ज) सौन्दरानन्दस्य वस्तुनिष्ठप्रश्नोत्तराणि-

295. प्रश्न- सौन्दरानन्दइत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- अश्वघोषः।
296. प्रश्न- सौन्दरानन्दमहाकाव्ये कति सर्गाः विद्यते?
उत्तरम्- (18) अष्टादश।
297. प्रश्न- सौन्दरानन्दे कयोः कथा समुवर्णिता?
उत्तरम्- सुन्दरी-नन्दयोः।
298. प्रश्न- बुद्धस्य नन्दः कीदृशः भ्राता आसीत्?
उत्तरम्- वैमात्रेयः।
299. प्रश्न- सौदरानन्दमहाकाव्ये कति सर्गाः सन्ति?
उत्तरम्- (18) अष्टादश।
300. प्रश्न- अश्वघोषरचिताः मुख्यतः कियन्तो ग्रन्थाः?
उत्तरम्- त्रयो ग्रन्थाः।

(झ) साहित्यदर्पणस्य वस्तुनिष्ठप्रश्नोत्तराणि-

301. प्रश्न- आचार्य विश्वनाथः कस्य सम्प्रदायस्य आचार्यः?
उत्तरम्- रससम्प्रदायस्य।
302. प्रश्न- विश्वनाथेन काव्यस्य किं लक्षणं कृतम्?
उत्तरम्- "वाक्यं रसात्मकं काव्यम्"।
303. प्रश्न- कस्य मते वक्रोक्तिस्तु अलंकार एवास्ति?
उत्तरम्- विश्वनाथमते।
304. प्रश्न- विश्वनाथमते काव्यशरीरे रसस्य का स्थितिः वर्तते?
उत्तरम्- आत्मरूपा।

305. प्रश्न- आचार्य विश्वनाथः केनोपाधिना विभूषितः?
उत्तरम्- "कविराज" इत्युपाधिना।
306. प्रश्न- "रीतिस्तु संघटना-विशेषः" इति कस्येयमुक्तिः?
उत्तरम्- विश्वनाथकविराजस्य।
307. प्रश्न- साहित्यदर्पणस्य दशपरिच्छेदेषु कयोः विवेचनं प्राप्यते?
उत्तरम्- काव्य-नाट्ययोः।
308. प्रश्न- साहित्यदर्पणे "रसात्मकं" इति पदस्य विग्रहः अस्ति?
उत्तरम्- रस एव आत्मा यस्य।
309. प्रश्न- विश्वनाथस्य पितुर्नाम किमासीत्?
उत्तरम्- चन्द्रशेखरः।
310. प्रश्न- विश्वनाथमते काव्यगुणाः काव्यशरीरे कीदृशः वर्तन्ते?
उत्तरम्- शौर्यादिवत्।
311. प्रश्न- विश्वनाथस्य सुप्रसिद्धो ग्रन्थः कः?
उत्तरम्- साहित्यदर्पणः।
312. प्रश्न- विश्वनाथकविराजमते काव्ये अलंकाराः कीदृशो विराजन्ते?
उत्तरम्- कटककुण्डलादिवत्।
313. प्रश्न- विश्वनाथ कविराजः कस्य राज्ञः"सन्धि-विग्रहकः" आसीत्?
उत्तरम्- उत्कलस्य राज्ञः।
314. प्रश्न- विश्वनाथकविराजः काव्ये रीतेः तुलना केन समं करोति?
उत्तरम्- अवयवसंस्थानेन।
315. प्रश्न- साहित्यदर्पणे कियन्तः परिच्छेदाः सन्ति?
उत्तरम्- (10) दश।
316. प्रश्न- साहित्यदर्पणे कस्य शैली विलोक्यते?
उत्तरम्- काव्यप्रकाशस्य।
317. प्रश्न- शब्दस्य मुख्या शक्तिः का?
उत्तरम्- अभिधा।
318. प्रश्न-मुख्यार्थवाधे सति प्रयोजनवशात् रूढ़िवशाद्वा या वृत्तिः प्रयुज्यते, सा काऽस्ति?
उत्तरम्- लक्षणा।
319. प्रश्न- "विरतास्वभिधाद्यासु ययार्थो बोध्यते परः" सा का वृत्तिः?
उत्तरम्- व्यञ्जनावृत्तिः।
320. प्रश्न- आर्थीव्यञ्जनायां हेतुः कोऽस्ति?
उत्तरम्- वक्तृवैशिष्ट्यम्।
321. प्रश्न-"गंगायां घोषः" इत्यत्र लक्षणामूलाशाब्दीव्यञ्जनया गंगापदात् कोऽर्थः बोध्यो?
उत्तरम्- शैत्यपावनत्वाद्यतिशयः।

322. प्रश्न- शाब्दीव्यञ्जना कति विधा?
उत्तरम्- द्विविधा।
323. प्रश्न- आचार्यविश्वनाथकविराजः लक्षणायाः कति भेदान् स्वीकरोति?
उत्तरम्- (80) अशीतिभेदान्।
324. प्रश्न- उपादानलक्षणा का अस्ति?
उत्तरम्- अजहत्स्वार्था।
325. प्रश्न- लक्षणलक्षणा का अस्ति?
उत्तरम्- जहत्स्वार्था।
326. प्रश्न- "गंगायां घोष" उदाहरणेऽस्मिन् का लक्षणा?
उत्तरम्- प्रयोजनमूला।
327. प्रश्न- "कुन्ताः प्रविशन्ति" इत्यत्र का लक्षणा?
उत्तरम्- प्रयोजनमूला-उपादानलक्षणा।
328. प्रश्न-रूढ़ेः प्रयोजनस्य वा अनिवार्यता कुत्र दरीदृश्यते?
उत्तरम्- लक्षणायाम्।
329. प्रश्न-योग्यताकांक्षासत्तियुक्तः पदोच्चयः कः?
उत्तरम्- वाक्यम्।
330. प्रश्न-येनोपायेन संकेतितार्थः बोध्यते तत् किमुच्यते?
उत्तरम्- संकेतग्रहसाधनम्।
331. प्रश्न- शक्तिग्रहं संकेतग्रहसाधनं कतिविधम्?
उत्तरम्-(08) अष्ट।
332. प्रश्न-"इह सहकारतरौ पिको रौति" इत्यत्र केन शक्तिग्रहोपायेन संकेतग्रहः भवति?
उत्तरम्-सिद्धपदसान्निध्यात्।
333. प्रश्न- "भूसत्तायाम्" इत्यत्र केन संकेतग्रहसाधनेन भू-धातोः सत्तायां संकेतग्रहः सम्भवति?
उत्तरम्- व्याकरणात्।
334. प्रश्न- "गो-सदृशो गवयः" इत्यत्र केनोपायात् संकेतग्रहः?
उत्तरम्- उपमानात्।
335. प्रश्न-"गुणे शुकलादयः पुंसि गुणि लिंगास्तु तद्वति" इत्यत्र संकेतग्रहस्य कः उपायविशेषः प्रयुक्तः?
उत्तरम्- कोशः।
336. प्रश्न-"यवमयश्चरुर्भवति" इत्यत्र यव-शब्दस्य दीर्घसूकविशेषः अर्थः कस्माद् बोध्यते?
उत्तरम्- वाक्यशेषात्।
337. प्रश्न- "घटोऽस्ति कलशविशेषः" इत्यत्र कस्मादुपायाद् घटे शक्तिग्रहः?
उत्तरम्- विवृतेः।
338. प्रश्न- साहित्यदर्पणे कविराजविश्वनाथः कति रसान् स्वीकरोति?
उत्तरम्- (09) नव रसान्।

339. प्रश्न- वेद्यान्तरस्पर्शशून्यः ब्रह्मास्वादसहोदरः कः?
उत्तरम्- रसः।
340. प्रश्न- अर्वाचीनरसः कः?
उत्तरम्- शान्तः।
341. प्रश्न- आस्वादंकुरकन्दोऽसौ भावः कः?
उत्तरम्- स्थायिभावः।
342. प्रश्न- "रतिः" कस्य स्थायिभावः?
उत्तरम्- शृंगारस्य।
343. प्रश्न- सर्वभावेषु प्रधानः भावः कः?
उत्तरम्- स्थायिभावः।
344. प्रश्न- मनोऽनुकूलेऽथ मनसः प्रवणायितम् भवति?
उत्तरम्- रतिः।
345. प्रश्न- "हासः" कस्य स्थायिभावः?
उत्तरम्- हास्यरस।
346. प्रश्न- वागादिवैकृतैश्चेतो विकासः कथ्यते?
उत्तरम्- हासः।
347. प्रश्न- करुणरसस्य स्थायिभावः कः?
उत्तरम्- शोकः।
348. प्रश्न- "क्रोधः" कस्य रसस्य स्थायिभावः?
उत्तरम्- रौद्ररसस्य।
349. प्रश्न- "उत्साहः" कस्य स्थायिभावः?
उत्तरम्- वीरस्य।
350. प्रश्न- भयानकरसस्य स्थायिभावः कः?
उत्तरम्- भयम्।
351. प्रश्न- "जुगुप्सा" कस्य स्थायिभावः?
उत्तरम्- बीभत्सस्य।
352. प्रश्न- "विस्मयः" कस्य स्थायिभावः?
उत्तरम्- अद्भुतस्य।
353. प्रश्न- "शमः" कस्य स्थायिभावः?
उत्तरम्- शान्तस्य।
354. प्रश्न- क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः रसः कः?
उत्तरम्- रौद्रः।
355. प्रश्न- उत्साहस्थायिभावकः हेमवर्णः महेन्द्रदैवतः रसः कः?
उत्तरम्- वीरः।

356. प्रश्न- भयस्थायिभावः कृष्णवर्णः कालाधिदैवतः स्त्रीनीचप्रकृतिःकः?
उत्तरम्- भयानकः।
357. प्रश्न- जुगुप्सास्थायिभावः नीलवर्णः महाकालदैवतः कः?
उत्तरम्- बीभत्सः।
358. प्रश्न- विस्मयस्थायिभावो गन्दर्वदैवतः पीतवर्णः कः?
उत्तरम्- अद्भुतः।
359. प्रश्न- शमस्थायिभावः उत्तमप्रकृतिः कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः कः?
उत्तरम्- शान्तरसः।
360. प्रश्न- महाकाव्ये कति सर्गाः आवश्यकाः सन्ति?
उत्तरम्- (08) अष्ट।
361. प्रश्न- कविराजविश्वनाथप्रणीतस्य साहित्यदर्पणस्य कस्मिन् परिच्छेदे महाकाव्यलक्षणं विद्यते?
उत्तरम्- षष्ठपरिचछेदे।
362. प्रश्न- साहित्यदर्पणः केषु विभक्तः?
उत्तरम्- परिच्छेदेषु।
363. प्रश्न- साहित्ये नायकस्य चत्वारो भेदाः के सन्ति?
उत्तरम्-1. धीरोदात्तः, 2. धीरोद्धतः, 3. धीरललितः, 4. धीरशान्त।
364. प्रश्न- साहित्ये कति सम्प्रदायाःसन्ति?
उत्तरम्- (6) षट् सम्प्रदायाः।
365. प्रश्न- "दोषस्तस्यापकर्षकः" इति कः उक्तवान्?
उत्तरम्- विश्वनाथः।
366. प्रश्न-यमके द्वयोः पदयोः प्रयोगः कतिवारं भवति?
उत्तरम्- द्विवारम्।
367. प्रश्न- गंगायां घोषः इत्यस्य कः लक्ष्यार्थः?
उत्तरम्- गंगा तटे घोषः।
368. प्रश्न- "विरतास्वभिधाद्यासु ययार्थो बोध्यते परः" इदं कस्याः वृत्तेः लक्षणम्?
उत्तरम्- व्यञ्जनावृत्तेः।
369. प्रश्न- "बौद्धव्यवैशिष्ट्य" इत्यस्मिन् आधारिता वृत्तिः का?
उत्तरम्- आर्थी-व्यञ्जना।
370. प्रश्न- "इष्टनाशादनिष्टापत्तेः" इदं कस्य रसस्य लक्षणम्?
उत्तरम्- करुण-रसस्य।
371. प्रश्न- आवृत्तेः उच्चारण-समयस्य बोधक-यन्त्रं किम्?
उत्तरम्- स्पैक्ट्रोग्राफः।
372. प्रश्न- वैदिक-संस्कृत-भाषायां कति मूल-ध्वनयः?
उत्तरम्- (52) द्विपञ्चाशत्।

373. प्रश्न- "कलिङ्ग साहसिकः" अत्र का लक्षणा?
उत्तरम्- रूढ़िमती-लक्षणा।
374. प्रश्न- लक्षणायाः कति भेदाः?
उत्तरम्- (80) अशीति।
375. प्रश्न- "अनुभावोविकारस्तु भाव संसूचनात्मकः" कस्य लक्षणम्?
उत्तरम्- अनुभावस्य।
376. प्रश्न- संचारिभावानां कति संख्या?
उत्तरम्- (33) त्रयस्त्रिंशत्।
377. प्रश्न- "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमा" कस्य लक्षणम्?
उत्तरम्- स्थायीभावस्य।
378. प्रश्न- "कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते" कस्य लक्षणम्?
उत्तरम्- वीर-रसस्य।
379. प्रश्न- "अकालजलदावली किरतु नाम मुक्तावली" इयं पङ्क्तिया कया सम्बद्धा?
उत्तरम्- अतिशयोक्त्या।
380. प्रश्न- "प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते" कस्य लक्षणमिदम्?
उत्तरम्- उपमायाः।

(ञ) रसगंङ्गाधरस्य वस्तुनिष्ठप्रश्नोत्तराणि-

381. प्रश्न- रसगंङ्गाधरे अध्यायस्य किं नाम?
उत्तरम्- आननम्।
382. प्रश्न- पण्डितराज जगन्नाथः कुत्रत्य आसीत्?
उत्तरम्- काश्याः निवासी।
383. प्रश्न- पण्डितराज जगन्नाथस्य पितुर्नाम किमासीत्?
उत्तरम्- पेद्द भट्टः।
384. प्रश्न- "पण्डितराज" इत्युपाधिना केन राज्ञा जगन्नाथो विभूषितः?
उत्तरम्- दिल्याः बादसाहेन शाहजहाँ महोदयेन।
385. प्रश्न- पण्डितराजस्य द्वेषिणौ कौ पण्डितौ?
उत्तरम्- भट्टोजिदीक्षित-अप्पयदीक्षितौ।
386. प्रश्न- जगन्नाथस्य गुरोर्नाम किमस्ति?
उत्तरम्- वीरेश्वरः।
387. प्रश्न- जगन्नाथेन मनोरमायाः खण्डनं केन नाम्ना कृतम्?
उत्तरम्- "मनोरमाकुचमर्दनी" इति नाम्ना।
388. प्रश्न- जगन्नाथस्य अलङ्कारशास्त्रपरको ग्रन्थ कः?
उत्तरम्- "रसगङ्गाधरः"।
389. प्रश्न- कस्य सम्प्रदायस्य आचार्यः पण्डितराजः?
उत्तरम्- रस-सम्प्रदायस्य।

390. प्रश्न- पण्डितराज-जगन्नाथस्य कियन्तो ग्रन्थाः?
उत्तरम्- (12) द्वादश।
391. प्रश्न- जगन्नाथमतेन किन्नाम काव्यम्?
उत्तरम्- "रमणीयार्थ-प्रतिपादकः शब्दः काव्यम्"।

(ट) काव्यप्रकाशस्य वस्तुनिष्ठप्रश्नोत्तराणि-

392. प्रश्न- मम्मटस्य किमलङ्कार-शास्त्रम्?
उत्तरम्- काव्यप्रकाशः।
393. प्रश्न- काव्यप्रकाशे कति अंशाः, के च ते?
उत्तरम्- त्रयः-1. कारिका, 2. वृत्तिः, 3. उदाहरणञ्च।
394. प्रश्न- काव्यप्रकाशे कियन्त उल्लासाः?
उत्तरम्- (10) दश।
395. प्रश्न- मम्मटस्य उपाधिः अस्ति?
उत्तरम्- राजानकः।
396. प्रश्न- काव्यप्रकाशस्य प्रथम-उल्लासे किं वर्णितमस्ति?
उत्तरम्-काव्यप्रयोजनम्, काव्यकारणम्, काव्यस्वरूपादि भूमिकाभागः।
397. प्रश्न- काव्यप्रकाशस्य द्वितीय-उल्लासे किं वर्णितमस्ति?
उत्तरम्-काव्यलक्षणम्।
398. प्रश्न- अर्थव्यंजकतायाः विमर्शः कस्मिन् उल्लासे वर्तते?
उत्तरम्- तृतीये उल्लासे।
399. प्रश्न- मम्मटः कस्मिन् उल्लासे ध्वनि-विचारणां प्रस्तौति?
उत्तरम्- चतुर्थे उल्लासे।
400. प्रश्न- रसस्य विवेचनं कस्मिन् उल्लासे वर्तते?
उत्तरम्- पञ्चमे उल्लासे।
401. प्रश्न- चित्रकाव्यं कुत्र निरूपितमस्ति?
उत्तरम्- षष्ठे-उल्लासे।
402. प्रश्न- काव्यदोषस्य विवेचनं कस्मिन् उल्लासे वर्तते?
उत्तरम्- सप्तमे उल्लासे।
403. प्रश्न- गुणालंकार-विभागानां विमर्शः कस्मिन् उल्लासे वर्तते?
उत्तरम्- अष्टमे उल्लासे।
404. प्रश्न- शब्दालंकारस्य विवेचनं कस्मिन् उल्लासे वर्तते?
उत्तरम्- नवमोल्लासे।
405. प्रश्न- दशमोल्लासे कस्य वर्णनम् अस्ति?
उत्तरम्- अर्थालङ्कारस्य।
406. प्रश्न- मम्मटेन काव्यस्य कति प्रयोजनानि परिगणितानि?
उत्तरम्-षट्, काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

407. प्रश्न- मम्मटस्य कानि प्रयोजनानि कविनिष्ठनि सन्ति?
उत्तरम्-1. यश:, 2. अर्थ:, 3. शिवेतरस्य(अशिवस्य) क्षय:।

408. प्रश्न- सहृदय-निष्ठ-प्रयोजनानि कानि सन्ति?
उत्तरम्-त्रीणि-1. व्यवहारज्ञानम्, 2. आनन्दानुभूति:, 3. कान्तासम्मितया उपदेश:।

409. प्रश्न- मम्मट: काव्यविभेदस्य आधारं कं स्वीकरोति?
उत्तरम्-व्यंग्यार्थम्।

410. प्रश्न- मम्मट: काव्यस्य कति भेदान् स्वीकरोति?
उत्तरम्- त्रयोभेदा:, 1. उत्तम:, 2. मध्यम:, 3. अधम:।

411. प्रश्न- शब्दा: कति प्रकारका: भवन्ति?
उत्तरम्- त्रय:, 1. वाचकशब्द:, 2. लाक्षणिकशब्द:, 3. व्यंजकशब्द:।

412. प्रश्न- मम्मट: अर्थस्य कति प्रकारान् स्वीकरोति?
उत्तरम्- त्रीन्, 1. वाच्य-अर्थ:, 2. लक्ष्य-अर्थ:, 3. व्यंग्य-अर्थ:।

413. प्रश्न- मम्मटेन दोषस्य का परिभाषा प्रदत्ता?
उत्तरम्- मुख्यार्थहतिर्दोष:।

414. प्रश्न- मम्मट: रसं कं स्वीकरोति?
उत्तरम्- विभावादि द्वारा व्यज्यमानं स्थायीभावम्।

415. प्रश्न- मम्मटेन रसस्य अंगीधर्म: क: स्वीक्रियते?
उत्तरम्- गुण:।

416. प्रश्न- कति रसदोषा: सन्ति?
उत्तरम्- (13 त्रयोदश:।

417. प्रश्न- मम्मटेन कति गुणा: मन्यते?
उत्तरम्- त्रय:, 1. माधुर्यम्, 2. ओज:, 3. प्रसाद:।

418. प्रश्न- काव्यप्रकाशस्य प्रथमोल्लासस्य किं नाम?
उत्तरम्- काव्यस्वरूपनिरूपणम्।

419. प्रश्न- काव्यप्रकाशे रसस्य का परिभाषा?
उत्तरम्-"व्यक्त: स तैर्विभावाद्यै: स्थायी भावो रस: स्मृत:"।

420. प्रश्न- काव्यप्रकाशे कति अर्थालङ्कारा: प्रतिपादिता: सन्ति?
उत्तरम्- 61 एकषष्टि:।

421. प्रश्न- काव्यप्रकाशे कति परिच्छेदा: विद्यन्ते?
उत्तरम्- (10) दश।

422. प्रश्न- मम्मट: शब्दस्य कति व्यापारान्/प्रक्रिया:/शक्ती: स्वीकरोति?
उत्तरम्- तिस्र:, 1. अभिधा, 2. लक्षणा, 3. व्यंजना चेति।

423. प्रश्न- "लोकोत्तरवर्णनानिपुणकविकर्मकाव्यम्" -इति को वदति?
उत्तरम्- मम्मटाचार्य:।

424. प्रश्न- रसनिष्पत्तिसूत्रं केन प्रतिपादितम्?
उत्तरम्- भरतमुनिना।
425. प्रश्न- मम्मट: लक्षणां कां क्रियां स्वीकरोति?
उत्तरम्- आरोपिताम्।
426. प्रश्न- "तददोषौ शब्दाथौ सगुणावनलंकृती पुन: क्वापि" कस्येयं काव्य-परिभाषा?
उत्तरम्- मम्मटस्य
427. प्रश्न- मम्मट: कस्य भूभागस्य निवासी आसीत्?
उत्तरम्- कश्मीरस्य।
428. प्रश्न- मम्मट: कस्य मार्गस्य आचार्य:?
उत्तरम्- ध्वनिमार्गस्य।
429. प्रश्न- मम्मट: केनोपाधिना विभूषित:?
उत्तरम्-" ध्वनि-प्रस्थापन-परमाचार्य" इत्युपाधिना।
430. प्रश्न- "अन्विताभिधानवाद:" इति कस्योक्ति:?
उत्तरम्- मम्मटस्य।
431. प्रश्न- संकल्पविकल्पात्मिकान्त: करणवृत्ति:" केन सम्बद्धा?
उत्तरम्- मनसा।

(ठ) ध्वन्यालोकस्य वस्तुनिष्ठप्रश्नोत्तराणि-

432. प्रश्न- ध्वन्यालोके कति उद्द्योता: सन्ति?
उत्तरम्- चत्वार:।
433. प्रश्न- ध्वन्यालोके प्रथमोद्योतस्य प्रतिपाद्य विषय:क:?
उत्तरम्- ध्वने: काव्यात्मा रूपेण प्रतिष्ठापनम्।
434. प्रश्न- कस्मिन् उद्योते काव्य-स्वरूपस्य विचारणा वर्तते?
उत्तरम्- चतुर्थोद्योते।
435. प्रश्न- ध्वन्यालोकस्य आधार-सिद्धान्त: कोऽस्ति?
उत्तरम्- ध्वनि-सिद्धान्त:।
436. प्रश्न- ध्वनि-सिद्धान्तस्य मूलप्रेरणा केन शास्त्रेण प्राप्यते?
उत्तरम्- व्याकरणशास्त्रेण
437. प्रश्न- ध्वनि-सिद्धान्त: व्याकरणस्य केन सिद्धान्तेन प्रेरितो भवति?
उत्तरम्- स्फोट-सिद्धान्तेन।
438. प्रश्न- ध्वने: आश्रयीभूत शब्द-शक्ति: का अस्ति?
उत्तरम्- व्यंजना-शक्ति:।
439. प्रश्न- व्यंजना कस्मिन् शास्त्रे मान्यते?
उत्तरम्- काव्यशास्त्रे।
440. प्रश्न- ध्वन्यालोकस्य मंगल श्लोक: क:?
उत्तरम्- "स्वेच्छाकेसरिण: स्वच्छस्वच्छायासितेन्दव:।
त्रायन्तां वो मधुरिपो: प्रपन्नार्तिच्छिदो नखा:।।

441. प्रश्न- अभिनवे अस्मिन् मंगल-श्लोके कति ध्वनयः स्वीकृतम्?
उत्तरम्-त्रिविध, 1. वस्तुध्वनिः, 2. अलङ्कार-ध्वनिः, 3. रस-ध्वनिः।

442. प्रश्न- ध्वनेः द्वौ मुख्य-भेदौ कौ स्तः?
उत्तरम्- 1. अविवक्षित-वाच्य-ध्वनिः, 2. विवक्षितान्यपरवाच्य-ध्वनिः।

443. प्रश्न- अविवक्षितवाच्यध्वनेः अपरं नाम किमस्ति?
उत्तरम्- लक्षणामूल ध्वनिः।

444. प्रश्न- अविवक्षितवाच्य/लक्षणामूलध्वनेः कति भेदाः सन्ति?
उत्तरम्- द्वे, 1. अर्थान्तर संक्रमितवाच्य ध्वनिः, 2. अत्यन्ततिरष्कृतवाच्य ध्वनिः।

445. प्रश्न- असंलक्ष्यक्रमध्वनिं पदेन कथ्यन्ते?श
उत्तरम्- 1. रसः, 2. रसाभासः, 3. भावाभास, 4. भावोदय, 5. भावसन्धिः, 6. भावशबलता, 7. भावशान्तिः।

446. प्रश्न-आनन्दवर्धनः ध्वन्यालोकस्य तृतीयोद्योते कस्य काव्यस्वरूपस्य उल्लेखं अकरोत्?
उत्तरम्-1. मुक्तकः, 2. सन्दान्तिकः, 3. विशेषकः, 4. पर्यायबन्धः, 5. परिकथा, 6. खण्डकथा, 7. सकलकथा, 8. सर्गबन्धः, 9. अभिनेयार्थः, 10. आख्यायिका, 11. कथा।

447. प्रश्न- "काव्यस्यात्मा ध्वनिः" कस्येयं काव्यपरिभाषा?
उत्तरम्- आनन्दवर्धनस्य।

448. प्रश्न- काव्यालोकः(ध्वन्यालोकः) कस्मिन् विभाजितः अस्ति ?
उत्तरम्- उद्द्योते।

449. प्रश्न- ध्वन्यालोके अध्यायः कथ्यते?
उत्तरम्- उद्योतः।

450. प्रश्न- ध्वनिसिद्धान्तस्य प्रवर्त्तकः कः?
उत्तरम्- आनन्दवर्धनः।

(ङ) ऋतुसंहारम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-

451. प्रश्न- ऋतुसंहारम् इति ग्रन्थे कति सर्गाः सन्ति?
उत्तरम्- (6) षट्सर्गाः,

452. प्रश्न- ऋतुसंहारम् इति ग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्-144 श्लोकाः

453. प्रश्न- ऋतुसंहारे ऋतु-क्रमः कोऽस्ति?
उत्तरम्- ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरः, वसन्तः।

454. प्रश्न- ऋतुसंहारे कति सर्गाः सन्ति?
उत्तरम्- (6) षट्।

455. प्रश्न- ऋतुसंहारे ऋतुवर्णनक्रमे प्रथमर्तुः कः-?
उत्तरम्- ग्रीष्मः।

456. प्रश्न- ऋतुसंहारे ऋतुवर्णनक्रमे अन्तिमः ऋतुः कः?
उत्तरम्- वसन्तः।

457. प्रश्न- ऋतुसंहार: कस्मिन् काव्येऽन्तर्भवति?
उत्तरम्-खण्ड (गीति) काव्ये।

(ढ) शतकत्रयस्य वस्तुनिष्ठप्रश्नोत्तराणि-
(नीतिशतकम्, शृंगारशतकम्, वैरागशतकम्।)

458. प्रश्न- भर्तृहरिविरचितानि पुस्तकानि कानि सन्ति?
उत्तरम्- त्रीणि, 1. नीतिशतकम्, 2., शृंगारशतकम्, 3. वैराग्यशतकम्।
459. प्रश्न- भर्तृहरे: प्रेमिकाया: किं नाम?
उत्तरम्- पिङ्गला।
460. प्रश्न- साहित्य-संगीत-कला-विहीनं पशु: क: कथितवान्?
उत्तरम्- भर्तृहरि:।
461. प्रश्न- "विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं" श्लोकांश: कुत: उद्धृत:?
उत्तरम्- नीतिशतकम् इति ग्रन्थात्।
462. प्रश्न- "सत्संगति: कथम किं च करोति पुंसाम्" इयं सूक्ति: कुत: उद्धृत:?
उत्तरम्- नीतिशतकम् इति ग्रन्थात्।
463. प्रश्न- "शतकत्रयम्" कस्य रचना अस्ति?
उत्तरम्- भर्तृहरे:।
464. प्रश्न-"धिक् तां च तं च मदनं चेमां च मां च" पद्यमिदं कस्मिन् शतकग्रन्थे प्राप्यते?
उत्तरम्- नीतिशतके।
465. प्रश्न- "कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णा" पद्यमिदं कस्मिन् शतके समुपलभ्यते?
उत्तरम्- वैराग्यशतके।
466. प्रश्न-"साहित्यसंगीतकलाविहीन:, साक्षत्पशु:पुच्छविषाणहीन:" इत्यनेन पद्यांशेन सम्बद्ध: ग्रन्थविशेष:क:?
उत्तरम्- नीतिशतकम्।
467. प्रश्न- "मनस्वी कार्यार्थी गणयति न दु:खम् न च सुखम्" पद्यमिदं भर्तृहरे: कस्मिन् शतके समुपलभ्यते?
उत्तरम्- नीतिशतके।
468. प्रश्न- "क्षीयन्तेऽखिल भूषणानि सततं-" पद्यमिदं कस्मिन् शतकग्रन्थे प्राप्यते?
उत्तरम्- नीतिशतके।
469. प्रश्न- "सर्वे गुणा: काञ्चनमाश्रयन्ति" इयं सूक्ति: कस्मात् ग्रन्थात् उद्धृत।?
उत्तरम्- नीतिशतकात्।
470. प्रश्न- "मनस्तु साधुध्वनिभि: पदे पदे, हरन्ति सन्तो मणिनूपुरा इव" इयं सू[illegible]त: कस्मात् ग्रन्थात् उद्धृता?
उत्तरम्- नीतिशतकात्।
471. प्रश्न- "न्यायात्पथ: प्रविचलन्ति पदं न धीरा:" इयं सूक्ति: कस्मात् ग्रन्थात् उद्धृता?
उत्तरम्- नीतिशतकात्।

472. प्रश्न-"पीत्वा मोहमयीं प्रसादमर्थदरामुन्मत्तभूतं जगत्" इयं सूक्तिःभर्तृहरेः कस्मात् ग्रन्थात् उद्धृता?
उत्तरम्- वैराग्य-शतकात्।

(ण) अन्य-पद्यकाव्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-

473. प्रश्न- भट्टिकाव्यरचनाकालः कः?
उत्तरम्- 500 ई०
474. प्रश्न- अद्भुतरसस्य स्थायिभावोऽस्ति?
उत्तरम्- विस्मयः।
475. प्रश्न- "मृत्युञ्जयः" इत्यस्य गणरूपं किम्?
उत्तरम्- तगणः।
476. प्रश्न- "काव्यकवि" -अष्टविध इति क उक्तवान्?
उत्तरम्- राजशेखरः।
477. प्रश्न- कवेः सादृश्यं केन क्रियते?
उत्तरम्- प्रजापतिना।
478. प्रश्न- वरतन्तुशिष्यः कः आसीत्?
उत्तरम्- कौत्सः।
479. प्रश्न- "रीतिरात्मा काव्यस्य" -इति कः वदति?
उत्तरम्- वामनाचार्यः।
480. प्रश्न- "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" -इदं वाक्यं कुत्रास्ति?
उत्तरम्- अग्निपुराणे।
481. प्रश्न- क्षेमेन्द्रस्य कः सम्प्रदायः?
उत्तरम्- औचित्यसम्प्रदायः।
482. प्रश्न- वामनाचार्यमते गुणाः कतिविधाः?
उत्तरम्-शब्दार्थभेदेन विंशतिः।
483. प्रश्न- अनुमिति सम्प्रदायस्य प्रवर्तकोऽस्ति?
उत्तरम्- महिमभट्टः।
484. प्रश्न- "विभावानुभाव व्यभिचारसंयोगाद्रसनिष्पत्तिः" अस्मिन् सूत्रे कयोः पदयोः व्याख्यानानि भिन्नानि प्रवृत्तानि?
उत्तरम्-"संयोगात्-निष्पत्तिः" इत्यनयोः।
485. प्रश्न- अद्भुतरसस्य स्थायीभावोऽस्ति?
उत्तरम्- विस्मयः।
486. प्रश्न- "विदुरनीतिः" केन सम्बद्धा?
उत्तरम्- महाभारतेन।
487. प्रश्न- शमस्थायिभावकः रसः कः?
उत्तरम्- शान्तः।

488. प्रश्न- स्तोत्र काव्येषु किं काव्यं प्रसिद्धमस्ति?
उत्तरम्- भामिनी विलासः।
489. प्रश्न- गीतगोविन्दे कियन्तः सर्गाः सन्ति?
उत्तरम्- (12) द्वादश।
490. प्रश्न- जयदेवः कस्य राज्याश्रितः?
उत्तरम्- लक्ष्मणसेनस्य।
491. प्रश्न- गीतगोविन्दे को रसः?
उत्तरम्- भक्ति-रसः।
492. प्रश्न- गीतगोविन्दस्य नायकः कः?
उत्तरम्- कृष्णः।
493. प्रश्न-"ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे" इयं कस्मात् ग्रन्थात् सम्बद्धा?
उत्तरम्- गीतगोविन्दात्।
494. प्रश्न- प्रेयोरसस्य प्रतिपादकः कः?
उत्तरम्- रुद्रटः।
495. प्रश्न- "निःशेषच्युतचन्दनं स्तनतटं" कस्योदाहरणम्?
उत्तरम्- बौद्धव्यवैशिष्ट्यस्य।
496. प्रश्न- "सशंखचक्रो हरिः" इति कस्योदाहरणम्?
उत्तरम्- संयोगस्य।
497. प्रश्न- "एतानि तैलानि हेमन्ते सुखानि" इति कस्य उदाहरणम्?
उत्तरम्- रुढीगौणी सारोपाउपादानलक्षण्लक्षणायाः।
498. प्रश्न- "भीमार्जुनौ" कस्याः शब्दशक्तिः उदाहरणम्?
उत्तरम्- साहचर्यस्य।
499. प्रश्न- "श्वेतो धावति" कस्याः उदाहरणम्?
उत्तरम्- रुढौ साध्यवसानोपदानलक्षणायाः।
500. प्रश्न- "अभूताहरणम्" कस्याः उदाहरणमस्ति?
उत्तरम्- गर्भसन्धेः।
501. प्रश्न- "ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः"कस्य लक्षणम्?
उत्तरम्- व्यायोगस्य।
502. प्रश्न- "नातिस्वल्पा नातिदीर्घा सर्गा अष्टाधिका इह" कस्य लक्षणमस्ति?
उत्तरम्- महाकाव्यस्य।
503. प्रश्न- "अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये" इति काऽस्ति?
उत्तरम्- लक्षणलक्षणा।
504. प्रश्न- "कुपितो मकरध्वजः" कस्योदाहरणम्?
उत्तरम्- लिङ्गस्य।

505. प्रश्न- "स्थाणुं वन्दे" इत्यत्र स्थाणुः कोऽस्ति?
उत्तरम्- शिवः।
506. प्रश्न- "विलासः परिसर्पश्च विधूतं तापनं तथा" इति कस्य लक्षणम्?
उत्तरम्- प्रतिमुखस्य।
507. प्रश्न- "नो नित्यः पूर्वसंवेदोज्झितः" इति कः?
उत्तरम्- रसः।
508. प्रश्न- रसस्य स्थायीभावः कुत्र न विद्यते?
उत्तरम्- समभावे।
509. प्रश्न- वाच्यो लक्ष्यश्च व्यङ्ग्यश्च कस्य भेदाः भवन्ति?
उत्तरम्- अर्थस्य।
510. प्रश्न- भट्टिकाव्ये कति सर्गाः एवं श्लोकाः सन्ति?
उत्तरम्-द्वाविंशतिः सर्गाः, 3624 श्लोकाः।
511. प्रश्न- व्याकरणस्य प्रौढिः कृतिः कास्ति?
उत्तरम्- भट्टिकाव्यम्।
512. प्रश्न- राज्ञः राजवाहनस्य कति मन्त्रिणः आसन्?
उत्तरम्- (3) त्रयः।
513. प्रश्न- मालवनरेशः कः आसीत्?
उत्तरम्- मानसारः।
514. प्रश्न- राजहंसस्य पुत्रः आसीत्?
उत्तरम्- राजवाहनः।
515. प्रश्न- मिथिला नरेशः कः आसीत्?
उत्तरम्- प्रहारवर्मणः।
516. प्रश्न- राजवाहनस्य परिणयः कया सह जातः?
उत्तरम्- अवन्तिसुन्दर्या।
517. प्रश्न- अपहारवर्मा उपहारवर्मा च कस्य पुत्रौ आस्ताम्?
उत्तरम्- प्रहारवर्मणः।
518. प्रश्न- काममंजरी का आसीत्?
उत्तरम्- गणिका।
520. प्रश्न- प्रबन्धकोशे कति जीवनचरितानि वर्णितानि सन्ति?
उत्तरम्- (24) चतुर्विंशति।
521. प्रश्न-आचार्य राधावल्लभ त्रिपाठीमहोदयेन ऐतरेय महीदासस्य सिद्धान्तः कः मन्यते?
उत्तरम्- अनुकीर्तनम्।
522. प्रश्न- अभिराजयशोभूषणस्य काव्यलक्षणं किम्?
उत्तरम्- लोकोत्तराख्यानं काव्यम्।

523. प्रश्न- पौराणिकवाङ्मयेषु काव्यशास्त्रीयतत्त्वविवेचकः प्राचीनतमः ग्रन्थः कः?
उत्तरम्- अग्निपुराणम्।
524. प्रश्न- इन्द्रायुधः कः आसीत्?
उत्तरम्- अश्वः।
525. प्रश्न- गीतगोविन्दस्य रचयिता कः?
उत्तरम्- जयदेवः।
526. प्रश्न- हंससन्देशस्य नायिका-नायकौ कौ स्तः?
उत्तरम्- जानकी-रामौ।
527. प्रश्न- "हंसदूतम्" इत्यस्य ग्रन्थस्य रचनाकारःकः?
उत्तरम्- रूपगोस्वामी।
528. प्रश्न- हंसदूतम् कस्मिन् छन्दसि निबद्धमस्ति?
उत्तरम्- शिखरिणी छन्दसि।
529. प्रश्न- हंसदूते दौत्यकर्म सम्पादयन् हंसः कुत्र याति?
उत्तरम्- श्रीकृष्णस्य पार्श्वे।
530. प्रश्न- गीतगोविन्दाख्ये गीतिकाव्ये कति सर्गाःसन्ति?
उत्तरम्- (12) द्वादश।
531. प्रश्न-" धीर-समीरे यमुना-तीरे वसति वने वनमाली" गीतिरियं कस्मिन् ग्रन्थे विद्यते?
उत्तरम्- गीतगोविन्दे।
532. प्रश्न- सुप्रसिद्धः दशावतार-स्तोत्रः कुत्र दरीदृश्यते?
उत्तरम्- गीतगोविन्दे।
533. प्रश्न- गोवर्धनाचार्यः" कस्य राज्ञः सभाकविः आसीत्?
उत्तरम्- लक्ष्मणसेनस्य।
534. प्रश्न- आर्यासप्तशत्याः प्रधानरसः कः?
उत्तरम्- शृंगारः।
535. प्रश्न- भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते" अस्य रचनाकारः कः?
उत्तरम्- शंकराचार्यः।
536. प्रश्न- संस्कृत-साहित्ये बृहत्तमं महाकाव्यं किमस्ति?
उत्तरम्- हरविजयम्।
537. प्रश्न- हरविजयमहाकाव्ये कति सर्गाः विद्यन्ते?
उत्तरम्- (50) पञ्चाशत्।
538. प्रश्न- "राघवपाण्डवीयम्" कस्य महाकवेः कृतिरस्ति?
उत्तरम्- कविराजस्य।
539. प्रश्न- राघवपाण्डवीये महाकाव्ये कति सर्गाः प्राप्यन्ते?
उत्तरम्- (13) त्रयोदश।

540. प्रश्न- श्रीकण्ठचरितमहाकाव्ये कति सर्गाः सन्ति?
उत्तरम्- (25) पञ्चविंशति।

541. प्रश्न- "वक्रोक्तिः काव्यजीवितम्" परिभाषेयं कस्य विद्यते?
उत्तरम्- कुन्तकस्य।

542. प्रश्न-एकवृत्तमयाः पद्याः अवसाने अन्यवृत्तकाः कुत्र भवन्ति?
उत्तरम्- सर्गे।

543. प्रश्न- कस्मिन् काव्ये "सर्गाः" आख्यानसंज्ञकाः भवन्ति?
उत्तरम्- आर्षकाव्ये।

544. प्रश्न- साक्षात्सङ्केतितार्थस्य बोधिकाशक्तिः का?
उत्तरम्- अभिधा।

545. प्रश्न- "एको रसः करुण एवनिमित्तभेदात्" इति केनोक्तम्?
उत्तरम्- भवभूतिना।

546. प्रश्न- कवेःकालानुसारिक्रमः कः?
उत्तरम्- भासः, कालिदासः, बाणभट्टः, भवभूतिः।

547. प्रश्न- अग्रिमा शब्दशक्तिः का?
उत्तरम्- अभिधा।

548. प्रश्न- शब्दस्य व्यंग्यार्थबोधिका वृत्तिः का?
उत्तरम्- व्यंजना।

549. प्रश्न- वीररसस्य स्थायीभावः कः?
उत्तरम्- उत्साहः।

550. प्रश्न- "न धर्मवृद्धेषु वयः समीक्ष्यते" कस्येदं वचनम्?
उत्तरम्- कालिदासस्य।

551. प्रश्न- महाकवि दण्डि महोदयस्य काव्यशास्त्रीयग्रन्थः कः?
उत्तरम्- काव्यादर्शः।

552. प्रश्न- संस्कृतमहाकाव्येषु सर्वविशालम् महाकाव्यं किमस्ति?
उत्तरम्- हरविजयमहाकाव्यम्।

553. प्रश्न-हरविजयमहाकाव्ये कियन्ति सर्गाः सन्ति?
उत्तरम्- (50) पञ्चाशत्।

554. प्रश्न- कस्मिन् पुराणे काव्यशास्त्रं प्राप्यते?
उत्तरम्- अग्निपुराणे।

555. प्रश्न- आचार्य रेवाप्रसाद द्विवेदी महोदयस्य काव्यशास्त्रीयग्रन्थः कः?
उत्तरम्- अभिनव काव्यालंकार कारिका।

556. प्रश्न- "विदग्धमुखमण्डनम्" -किमस्ति?
उत्तरम्- काव्यम्।

557. प्रश्न- तात्पर्यार्थस्य प्रतिपादकः कः?
उत्तरम्- कुमारिल भट्टः।
558. प्रश्न- तात्पर्यार्थस्य सन्दर्भे कुमारिल भट्टस्य मतं किमस्ति?
उत्तरम्-अभिहितान्वयवादः।
559. प्रश्न- आचार्य कुन्तकानुसारं काव्यस्य किं लक्षणम्?
उत्तरम्- वक्रोक्तिः काव्य जीवितम्।
560. प्रश्न- मुख्यार्थस्य लक्ष्यार्थस्य च सम्बन्धाः कति प्रकारकाः भवन्ति?श
उत्तरम्-षड्, 1. संयोगः, 2. सामीप्यः, 3. समवायः, 4. वैपरीत्यः, 5. क्रियायोगः, 6. सादृश्यः।
561. प्रश्न- उपचारः कः कथ्यते?
उत्तरम्- "उपचारो हि नाम अत्यन्तं विशकलितयोः पदार्थयोः, सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनम्।
562. प्रश्न- स्थायीभावाः कति सन्ति?
उत्तरम्-नव, 1. रतिः, 2. हासः, 3. शोकः, 4. क्रोधः, 5. उत्साहः, 6. भयः, 7. जुगुप्सा(घृणा), 8. विस्मयः, 9. निर्वेदः(शम)।
563. प्रश्न- रसाः कति सन्ति?
उत्तरम्-नव, 1. शृंगारः, 2. हास्यः, करुणः, 4. रौद्रः, 5. वीर, 6. भयानकः, 7. वीभत्सः, 8. अद्भुतः, 9. शान्तः।
564. प्रश्न- रसोत्पत्तिः इत्यस्य सूत्रं किमस्ति?
उत्तरम्- "विभावानुभावव्यभिचारि संयोगाद् रसनिष्पत्तिः"।
565. प्रश्न- भावोदयः कोऽस्ति?
उत्तरम्- कश्चित् भावस्य उद्रेक" भावोदयः"।
566. प्रश्न- काव्ये मुख्यार्थः कः?
उत्तरम्- रसः(रसश्च मुख्यः)
567. प्रश्न- वाक्ये विद्यमानाः कति दोषाः सन्ति?
उत्तरम्- (21 एकविंशतिः)
568. प्रश्न- कति अर्थदोषाः भवन्ति?
उत्तरम्- (23 त्रयोविंशतिः)
569. प्रश्न- माधुर्यस्य अतिशयप्रभावः कस्मिन् रसे वर्तते?
उत्तरम्- करुण-वियोग- शृंगार एवं शान्त रसेषु।
570. प्रश्न- काव्यस्य किं तात्पर्यम्?
उत्तरम्-कवेः कर्म काव्यम्।
571. प्रश्न- काव्यस्य कौ द्वौ भेदौ स्तः?
उत्तरम्- 1. दृश्यकाव्यम्, 2. श्रव्यकाव्यम्।

572. प्रश्न- पद्यकाव्ये कानि काव्यानि आगच्छन्ति?
उत्तरम्- 1. खण्डकाव्यम्, 2. महाकाव्यम्, 3. मुक्तककाव्यम्।
573. प्रश्न-क्रौञ्चवधस्य कारुणिक-दृश्येन वाल्मीकि-हृदये कः श्लोकः प्रवाहितोऽभूत्?
उत्तरम्- मा निषद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत्क्रौञ्चमिथुनादेकमवधीः काममोतिम्।।
574. प्रश्न- विपदि धैर्यमथाभ्युदये क्षमा, सदसि वाकपटुता युधिविक्रमः। मनो यतेषां सुखदुःखसम्भवे प्रयाति नो हर्षविषदवश्यताम्।। अस्य रचनाकारा कः?
उत्तरम्- कविराल मेण्ठः।
575. प्रश्न- संस्कृत-जगति हास्यकथायाःअधीश्वरः कविः कः मन्यते?
उत्तरम्- क्षेमेन्द्रः।
576. प्रश्न- "श्रुतबोधः" कस्य शास्त्रस्य ग्रन्थः
उत्तरम्- छन्दः शास्त्रस्य।
577. प्रश्न- प्रयोजनं कुतः सर्दव गम्यः अस्ति?
उत्तरम्-व्यञ्जनातः।
578. प्रश्न- साध्यवसाना-गौणी-लक्षणायाः किमुदाहरणम्?
उत्तरम्- "गौरयम्"
579. प्रश्न- "कौशिकी वृत्तिः" कस्मिन् रसे भवति?
उत्तरम्- शृंगार रसे।
580. प्रश्न-भट्टिकाव्यं कति काण्डेषु विभक्तमस्ति?
उत्तरम्- चतुर्षु, 1. प्रकीर्णः, 2. अधिकारः, 3. प्रसन्नः, 4. तिङन्तकाण्डम्।
581. प्रश्न- प्रयोजनं सदैव कुत्र गम्यं भवति?
उत्तरम्- व्यञ्जनायाम्।
582. प्रश्न- "गौरयम्" कस्या उदाहरणम?
उत्तरम्- सध्यवसाना गौणी लक्षणायाः।
583. प्रश्न- आचार्य कुन्तकस्य काव्य-लक्षणं किम्?
उत्तरम्- "वक्रोक्तिः काव्य जीवितम्।"
584. प्रश्न- आरोपित-शब्दव्यापारः का?
उत्तरम्- लक्षणा।
585. प्रश्न- "कटे आस्ते" अत्र आधारः कः?
उत्तरम्- औपश्लेषिकः।
586. प्रश्न- "शृंगार-तिलकम्" ग्रन्थे कति परिच्छेदाः?
उत्तरम्- (3) त्रयः।

(रामायणमहाभारतयोः विवेचनं पुराणप्रकरणे(10) पश्यन्तु)

3. चम्पू Champu परिचयः-ग्रन्थः-ग्रन्थकारः-

(त) चम्पू-काव्यस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- "नलचम्पू" इत्यस्य लेखकः कः?
उत्तरम्- त्रिविक्रम भट्टः।

2. प्रश्न- चम्पूसाहित्यस्याऽदिमो ग्रन्थः कः?
   उत्तरम्- नलचम्पूः दमयन्तीचम्पूर्वा।
3. प्रश्न- "किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः परस्य हृदयेलगनं न घूर्णयति यच्छिरः" इदं पद्यवाक्यं कुतः उद्धृतः?
   उत्तरम्- नलचम्पूतः।
4. प्रश्न- नलचम्पूग्रन्थस्य मंगलाचरणे कस्याः देवतायाः स्तुतिः विद्यते?
   उत्तरम्- शिव-पार्वत्योः।
5. प्रश्न- प्रथम चम्पू ग्रन्थः कः?
   उत्तरम्- नलचम्पू।
6. प्रश्न- नलचम्पू इत्यस्य अपर-नाम किम्?
   उत्तरम्- दमयन्ती कथा।
7. प्रश्न- नलस्य पितुर्नाम किम्?
   उत्तरम्- वीरसेनः।
8. प्रश्न- नलस्य चारित्रिकः गुणः कः?
   उत्तरम्- नीतिज्ञः।
9. प्रश्न- नलस्य मन्त्री नाम किम्?
   उत्तरम्- श्रुतशीलः।
10. प्रश्न- नलस्य वन-विहार-समये कः आगतः?
    उत्तरम्- सूकरः।
11. प्रश्न- नलचम्पू केषु विभक्तः?
    उत्तरम्- उच्छ्वासेषु।
12. प्रश्न- नलचम्पूकाव्ये कयोः प्रणयवर्णनमस्ति?
    उत्तरम्- नलदमयन्त्योः।
13. प्रश्न- नलचम्पूकाव्ये कति उच्छवासाः सन्ति?
    उत्तरम्- (7) सप्त।
14. प्रश्न- राजानलस्य राजधानी कुत्र आसीत्? निषधा-नगरी।
15. प्रश्न- मदालसा-चम्पूकाव्यं कः रचयामास?
    उत्तरम्- त्रिविक्रमभट्टः।
16. प्रश्न- श्रीहर्षस्य चम्पूकाव्यं किमस्ति?
    उत्तरम्- नवसाहसाङ्कचरितचम्पू।
17. प्रश्न- "उदयसुन्दरीकथा" केन विरचिता?
    उत्तरम्- सोड्ढलेन।
18. प्रश्न- नीलकण्ठविजयचम्पू काव्यस्य रचयिता कोऽस्ति?
    उत्तरम्- नीलकण्ठदीक्षितः।

19. प्रश्न-"जगद्गुरुविजयम्" इत्यस्य लेखकः कः?
उत्तरम्- श्रीकण्ठशास्त्रिणः।
20. प्रश्न- वेङ्कटाध्वरि द्वारा लिखितः चम्पूग्रन्थः कः?
उत्तरम्- विश्वगुणादर्शचम्पू।
21. प्रश्न- "पारिजातहरणचम्पूः" इत्यस्याः को निर्माता?
उत्तरम्- शेषश्रीकृष्णः।
22. प्रश्न- "नाथमुनि-विजयचम्पूः" इयं रचना विद्यते?
उत्तरम्- रामानुजदासस्य।
23. प्रश्न- "आचार्यविजयम्" कस्य रचना वर्तते?
उत्तरम्- वेदान्ताचार्यस्य।
24. प्रश्न- "वीरभद्रदेवचम्पूः" इत्यस्य लेखकः कः?
उत्तरम्- पद्मनाभ मिश्रः।
25. प्रश्न- जीवन्धरचम्पूः कस्य कृतिः अस्ति?
उत्तरम्- हरिश्चन्द्रस्य।
26. प्रश्न- "मत्स्यावतारप्रबन्धः" कस्य रचना विद्यते?
उत्तरम्- नारायणभट्टस्य।
27. प्रश्न- वेङ्कटाध्वरिः रचितौ चम्पूग्रन्थौ कौ स्तः?
उत्तरम्- 1. विश्वगुणादर्शः, 2. हस्तिगिरिचम्पूःच।
28. प्रश्न-शङ्कराचार्यचम्पूकाव्यस्य प्रणेता कः?
उत्तरम्- बलगोदावरी-महोदयः।
29. प्रश्न- भोजराजकृतं चम्पूकाव्यं किमस्ति?
उत्तरम्- रामायणचम्पू।
30. प्रश्न- मित्र मिश्रस्य का चम्पूः?
उत्तरम्- आनन्दकन्दचम्पूः।
31. प्रश्न- "राजसूयप्रबन्धः" केन विरचितः?
उत्तरम्- नारायण भट्टेन।
32. प्रश्न- अभिनवकालिदासकृतं चम्पूकाव्यं किमस्ति?
उत्तरम्- भागवतचम्पू।
33. प्रश्न- "आनन्द रंगविजयचम्पूः" इत्यस्याः रचना केन कृता?
उत्तरम्- श्रीनिवासेन।
34. प्रश्न-यशस्तिलकचम्पू इति कस्य रचनाकार्याणि अस्ति?
उत्तरम्- सोमदेवस्य।
35. प्रश्न- "मन्दारमन्दचम्पूः" अस्याः प्रणेता कः?
उत्तरम्- कृष्णकविः।

36. प्रश्न- "विद्वन्मोदतरङ्गिणी" ग्रन्थस्य लेखकः कः?
उत्तरम्- चिरञ्जीवभट्टाचार्यः।
37. प्रश्न- "गोपालचम्पूः" ग्रन्थस्य लेखकः कः?
उत्तरम्- जीवगोस्वामिनः।
38. प्रश्न- गद्यपद्यमिलितं काव्यं भवति?
उत्तरम्- चम्पूकाव्यम्।
39. प्रश्न- "आनन्दवृन्दावनचम्पूः" इत्यस्याः को लेखकः?
उत्तरम्- कविकर्णपूरः।
40. प्रश्न- चम्पूभारतस्य लेखकः कः?
उत्तरम्- अनन्तभट्टः।
41. प्रश्न- "आचार्य दिग्विजयचम्पूः" अस्य ग्रन्थस्य प्रणेता कः?
उत्तरम्- वल्ली सहायः।
42. प्रश्न- "विश्वगुणादर्शचम्पूः" इयं कस्य रचना विद्यते?
उत्तरम्- वेंकटाध्वरी महोदयस्य।
43. प्रश्न-"करोति कस्य नाह्लादं कथा कान्तेव भारती" इयं सूक्तिः कस्मात् ग्रन्थात् उद्धृतः?
उत्तरम्- नलचम्पूतः।
44. प्रश्न- "यात्राप्रबन्धचम्पूः" इति कस्याः रचना?
उत्तरम्- स्मरपुंगव दीक्षितस्य।
45. प्रश्न- सोमदेवविरचितं चम्पूकाव्यं किमस्ति?
उत्तरम्- यशस्तिलकचम्पूः।
46. प्रश्न- "वरदाम्बिकापरिणयचम्पूः" इत्यस्याः रचना कया कृता?
उत्तरम्- तिरुमलाम्बा महोदया।
47. प्रश्न- "चित्रचम्पूः" इत्यस्याः रचनाकारः कः?
उत्तरम्- बणेश्वरविद्यालंकारः।
48. प्रश्न- "नृसिंहचम्पूः" अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- सूर्यकविः।
49. प्रश्न- भारतचम्पूतिलकस्य प्रणेता कः?
उत्तरम्- लक्ष्मणसूरिः।
50. प्रश्न- त्रिविक्रमभट्टस्य पिता कः आसीत्?
उत्तरम्- नेमादित्यः।
51. प्रश्न- नवसाहसाङ्कचरितचम्पू इत्यस्य लेखकः कः?
उत्तरम्- श्रीहर्षः।
52. प्रश्न- "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इदं लक्षणं कः कृतवान्?
उत्तरम्- दण्डी।

(D) 4. नाटकम्- Drama परिचयः-ग्रन्थः-ग्रन्थकारः-

(क) नाटकस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- नाट्यस्य "आद्य" प्रवर्तकः कः?
   उत्तरम्- भगवान् नटराजः।
2. प्रश्न- ताण्डवं कः कृतवान्?
   उत्तरम्- रुद्रः।
3. प्रश्न- लास्यं का कृतवती?
   उत्तरम्- गौरी।
4. प्रश्न-रूपकस्य कति भेदाः सन्ति?
   उत्तरम्- (10) दश।
5. प्रश्न- नाट्यशास्त्रस्य प्रणेता कः?
   उत्तरम्- भरतमुनिः।
6. प्रश्न- कालिदासविरचितानि कति नाटकानि ?
   उत्तरम्- अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्।
7. प्रश्न- भासस्य कानि रचनाकार्यानि सन्ति?
   उत्तरम्-1. प्रतिमानाटकम्, 2. अभिषेक नाटकम्, 3. पञ्चरात्रः, 4. मध्यमव्यायोगः, 5. दूतघटोत्कच, 6. कर्णभारः, 7. दूतवाक्यम्, 8. ऊरुभङ्गः, 9. बालचरितम्, 10. चारुदत्तः, 11. अविमारकः, 12. प्रतिज्ञायौगन्धरायणः, 13. स्वप्नवासवदत्ता।
8. प्रश्न- शारिपुत्रप्रकरणम्" कस्येदं रूपकमस्ति?
   उत्तरम्- अश्वघोषस्य।
9. प्रश्न- "चारुदत्तम्" कस्य रचना अस्ति?
   उत्तरम्- भासस्य।
10. प्रश्न- मालविकाग्निमित्रम् कस्य कृतिरस्ति?
    उत्तरम्- कालिदासस्य।
11. प्रश्न- "प्रियदर्शिका" कस्य कृतिरस्ति?
    उत्तरम्- श्रीहर्षस्य।
12. प्रश्न- "नागानन्दनम्" कस्य कृतिरस्ति?
    उत्तरम्- श्रीहर्षस्य।
13. प्रश्न- "शारिपुत्रप्रकरणम्" कस्य कृतिरस्ति?
    उत्तरम्- अश्वघोषस्य।
14. प्रश्न- मुरारि-प्रणीतं नाटकं किमस्ति?
    उत्तरम्- अनर्घराघवम्।
15. प्रश्न- "विद्धशालभञ्जिका" कस्य कृतिरस्ति?
    उत्तरम्- दिङ्नागस्य।

16. प्रश्न- कर्पूरमञ्जरी कस्य रचना अस्ति?
उत्तरम्- राजशेखरस्य।
17. प्रश्न- आचार्य-धनञ्जयस्य कृतिरस्ति?
उत्तरम्- दशरूपकम्।
18. प्रश्न- "नाटकलक्षणरत्नकोषः" कस्य कृतिरस्ति?
उत्तरम्- सागरनन्द्याः।
19. प्रश्न- "नाट्यदर्पणः" कस्य कृतिरस्ति?
उत्तरम्- रामचद्र-गुणचन्द्रयोः।
20. प्रश्न- आश्चर्यचूडामणिः कस्य रचना?
उत्तरम्- शक्तिभद्रस्य।
21. प्रश्न- कुन्दमाला कस्य कृतिरस्ति?
उत्तरम्- दिङ्नागस्य।
22. प्रश्न- "प्रसन्नराधवम्" कस्य कृतिरस्ति?
उत्तरम्- जयदेवस्य।
23. प्रश्न- प्रबोधचन्द्रोदयं कस्य कृतिरस्ति?
उत्तरम्- कृष्णमिश्रस्य।
24. प्रश्न- उत्तररामचरितस्य लेखकः कः?
उत्तरम्- भवभूतिः।
25. प्रश्न- "वेणीसंहारम्" कस्य रचना अस्ति?
उत्तरम्- भट्टनारायणस्य।
26. प्रश्न- अश्वघोषविरचितं नाटकं किमस्ति?
उत्तरम्- शारिप्रुत्रप्रकरणम्।
27. प्रश्न- "अनर्घराघवम्" कः रचितवान्?
उत्तरम्- मुरारिः।
28. प्रश्न- "विद्धशालभंजिकाम्" कः रचितवान्?
उत्तरम्- राजशेखरः।
29. प्रश्न- "कुन्दमाला" इत्याख्यं नाटकं कः रचयामासः?
उत्तरम्- दिङ्नागः।
30. प्रश्न- प्रसन्नराघवस्य नाटककारः कः?
उत्तरम्- जयदेवः।
31. प्रश्न-पाणिनिविरचितं नाटकं किमस्ति?
उत्तरम्- जाम्बवती विजयम्।
32. प्रश्न- शूद्रकविरचितं नाटकं किमस्ति?
उत्तरम्- मृच्छकटिकम्।

33. प्रश्न- विशाखदत्तविरचितं नाटकं किमस्ति?
उत्तरम्- मुद्राराक्षसम्।
34. प्रश्न- "नाट्यशास्त्रम्" केन विरचितम्?
उत्तरम्- भरतमुनिना।
35. प्रश्न- "अभिज्ञानशाकुन्तलम्" इत्यस्य सर्वप्रथम-अंग्रेजी-अनुवादः केन कृतः?
उत्तरम्- विलियम जोन्स।
36. प्रश्न- "नाटकमथ प्रकरणम्" कस्मात् ग्रन्थात् उदधृतः?
उत्तरम्- साहित्यदर्पणात्।
37. प्रश्न- नाटकस्य उत्पत्ति-विषये कति मतानि?
उत्तरम्- (3) त्रीणि।
38. प्रश्न- दशरूपके कति अध्यायाः?
उत्तरम्- (4) चत्वारः।
39. प्रश्न- नाट्शास्त्रे कति श्लोकाः वर्तन्ते?
उत्तरम्- (5000) पञ्च सहस्राणि।
40. प्रश्न- रसस्य प्रवर्त्तकः कः?
उत्तरम्- भरतः।
41. प्रश्न- न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।
श्लोकोऽयं कस्य महत्त्वं प्रतिपादयति?
उत्तरम्-नाट्यशास्त्रस्य।
42. प्रश्न- काव्यं कतिविधम्, किञ्च तत्?
उत्तरम्- द्विविधम्-1. दृश्यं श्रव्यञ्च।
43. प्रश्न-रूपकस्य के दश भेदाः सन्ति ?
उत्तरम्-1. नाटकम्, 2. प्रकरणम्, 3. भाणः, 4. प्रहसनः, 5. डिमः, 6. वीथी, 7. अङ्कम्, 8. ईहामृगः, 9. व्यायोगः, 10. समवकारः।
44. प्रश्न- कति उपरूपकाणि कानि च तानि?
उत्तरम्- 18अष्टादश उपरूपकाणि सन्ति। तानि यथा-
1. नाटिका, 2. त्रोटकम्, 3. गोष्ठी, 4. सट्टकम् 5. नाट्यरासकम्, 6. प्रस्थानम्, 7. उल्लाप्यम्, 8. काव्यम्, 9. प्रेङ्खनम्, 10. रासकम्, 11. संलापकम्, 12. श्रीगदितम्, 13. शिल्पकम्, 14. विलासिका, 15. दुर्मल्लिका, 16. प्रकरणी, 17. हल्लीशः 18. भणिका, इति।
45. प्रश्न- नाट्यशास्त्रे कियन्तो रसभेदा भवन्ति?
उत्तरम्- 8, अष्ट।
46. प्रश्न- "डिमः" नाम इति कस्य प्रभेदः?
उत्तरम्- नाटकप्रभेदः।

49. प्रश्न- नाट्यशास्त्रे कियन्तः अंशाः, के च ते?
उत्तरम्- त्रयः-1. सूत्रभाष्यम्, 2. कारिका, 3. अनुवंश्यश्लोकाश्च।
50. प्रश्न- दृश्यकाव्यम्" किमस्ति?
उत्तरम्- नाटकम्।
51. प्रश्न- नाटके कति अवस्थाः भवन्ति?
उत्तरम्- पञ्च।
52. प्रश्न-रूपकस्य भेदः कः?
उत्तरम्- समवकारः।
53. प्रश्न- दृश्यकाव्यसामान्यस्य नामान्तरं किमस्ति?
उत्तरम्- रूपकम्।
54. प्रश्न- सर्वेषां रूपकाणां स्वरूपसामान्यं कीदृग् भवति?
उत्तरम्- नाटकवत्।
55. प्रश्न- दृश्यकाव्यस्य अपरं नाम किम्?
उत्तरम्- रूपकम्।
56. प्रश्न- काव्येषु किं रम्यम्भवति?
उत्तरम्- नाटकम्।
57. प्रश्न- कालिदासस्य कियन्ति नाटकानि?
उत्तरम्- (3) त्रीणि।
58. प्रश्न- भरतमुनेः नाट्यशास्त्रे कति अध्यायाः सन्ति?
उत्तरम्- (36) षट्त्रिंशत्।
59. प्रश्न- नाट्यशास्त्रे अलंकारशास्त्रस्य विवेचनं केष्वध्यायेषु मिलति?
उत्तरम्- (6, 7, 16,) षष्ठे, सप्तमे, षोडशे च।
60. प्रश्न- सम्प्रति काव्यशास्त्रे कति सम्प्रदायाः प्राप्यन्ते?
उत्तरम्- (06) षट्।
61. प्रश्न- रससूत्रस्य व्याख्याकर्तारः के आचार्याः?
उत्तरम्- चत्वारः, 1. भट्टलोल्लटः, 2. श्रीशङ्कुकः, 3. भट्टनायकः, 4. अभिनवगुप्तश्चेति।
62. प्रश्न- काव्यशास्त्रे रससम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्- भरतमुनिः।
63. प्रश्न- उपरूपकं कतिविधम्?
उत्तरम्- (18) अष्टादशः।
64. प्रश्न- नाट्यशास्त्रस्य प्रणेता कः?
उत्तरम्- भरतमुनिः।
65. प्रश्न- अविमारकस्य संकेतः कुत्र मिलति?
उत्तरम्- कामसूत्रे।

66. प्रश्न- प्रतिज्ञायौगन्धरायणस्य नायकः कः?
उत्तरम्- यौगन्धरायणः।
67. प्रश्न- उदयनवासवदत्तयोः प्रणयः कुत्र वर्णितः?
उत्तरम्- प्रतिज्ञायौगन्धरायणे।
68. प्रश्न-यौगन्धरायणः कस्य मन्त्री आसीत्?
उत्तरम्- उदयनस्य।
69. प्रश्न- भासविरचिते स्वप्नवासवदत्ते कति अंकाः सन्ति?
उत्तरम्- षट्।
70. प्रश्न- उदयनपद्मावत्योः विवाहवर्णनं कुत्रास्ति?
उत्तरम्- स्वप्नवासवदत्ते।
71. प्रश्न- ऊरुभङ्गं किमस्ति?
उत्तरम्- एकांकी नाटकमस्ति।
72. प्रश्न- प्रतिमानाटके कति अंकाः सन्ति?
उत्तरम्- सप्त।
73. प्रश्न- उदयन-कथाश्रिते के नाटके स्तः?
उत्तरम्- 1. स्वप्नवासवदत्ता, 1. प्रतिज्ञायौगन्धरायणञ्च।
74. प्रश्न- स्वप्नवासवदत्तयाः नायकः कः?
उत्तरम्- राजा उदयनः।
75. प्रश्न- स्वप्नवासवदत्तायाः का नायिका?
उत्तरम्- वासवदत्ता।
76. प्रश्न- "संगीतदर्पणः" इति कस्य ग्रन्थोऽस्ति?
उत्तरम्- पण्डितदामोदरस्य।
77. प्रश्न- त्यागराजस्य सम्बन्धोऽस्ति-?
उत्तरम्- शास्त्रीयसंगीतेन सह।
78. प्रश्न- "पद्या सुब्रह्मण्यम् कस्मिन् नृत्ये प्रसिद्धा अस्ति?
उत्तरम्- भरतनाट्यनृत्ये।
79. प्रश्न- "विस्मिल्ला खाँ" -कस्मिन् वाद्ये प्रसिद्धः?
उत्तरम्- शहनाई--वाद्ये।
80. प्रश्न- "सोनलमानसिंहस्य" -सम्बन्धोऽस्ति?
उत्तरम्- नृत्येन सह।
81. प्रश्न- श्रीमती बालसरस्वती कुत्र विख्याता?
उत्तरम्- गायने।
82. प्रश्न- केन नृत्येन सहनाटकमपि अभिनीयते?
उत्तरम्- कथकलीनृत्येन सह।

83. प्रश्न-यामिनी कृष्णमूर्तिः कस्मिन् नाट्ये प्रसिद्धाः-?
उत्तरम्- भरतनाट्ये।
84. प्रश्न- प्रतिमा नाटके कस्य प्रतिमायाः चर्चा विद्यते?
उत्तरम्- राज्ञः दशरथस्य।
85. प्रश्न- "मोहिनी आट्टम्" कस्य प्रदेशस्य प्रसिद्धं लोक नृत्यमस्ति?
उत्तरम्- केरलराज्यस्य।
86. प्रश्न- उत्तरप्रदेशस्य लोकनृत्यमिदम्?
उत्तरम्- नौंटकी।
87. प्रश्न- राजस्थानप्रदेशस्य लोकनृत्यं किम्?
उत्तरम्- घूमर।
88. प्रश्न- "यक्षगानम्" इति लोकनृत्यं कस्य प्रदेशस्य प्रसिद्धम्?
उत्तरम्- कर्नाटकप्रदेशस्य।
89. प्रश्न- बिहारराज्यस्य लोकनृत्येषु इदमप्येकम्?
उत्तरम्- घुमकुडिया।
90. प्रश्न- "मध्यमव्यायोगः" इत्यस्य कुत्र सम्बन्धः?
उत्तरम्- दृश्यकाव्येषु।
91. प्रश्न- भासनाटकस्य आविष्कारकः कोऽस्ति?
उत्तरम्- एस. गजाननशास्त्री।
92. प्रश्न- चारुदत्तस्य नायकः कः?
उत्तरम्- चारुदत्तः।
93. प्रश्न- चारुदत्तस्य नायिका का?
उत्तरम्- वसन्तसेना।
94. प्रश्न- "अभिषेकनाटकम्" कमाश्रित्य विनिर्मितम्?
उत्तरम्- रामकथाम्।
95. प्रश्न- इदं रामायणसम्बद्धमस्ति?
उत्तरम्- प्रतिमानाटकम्।
96. प्रश्न- महाभारतकथामवलम्ब्य भासविरचितं नाटकं किम्?
उत्तरम्- मध्यमव्यायोगः।
97. प्रश्न- "तत्र रम्या शकुन्तला" इति श्लोकवाक्ये "तत्र" इत्यस्य कोऽभिप्रायः?
उत्तरम्- नाटकेषु।
98. प्रश्न- "दूतघटोत्कचम्" कस्मिन् नाटकचक्रे आगच्छति?
उत्तरम्- भासनाटकचक्रे।
99. प्रश्न- "मत्तविलासप्रहसनम्" -कः रचितवान्?
उत्तरम्- श्रीमहेन्द्रविक्रम वर्मा।

100. प्रश्न- "दयावीर" रसप्रधानं हर्षवर्धनस्य नाटकं किम्?
उत्तरम्- नागानन्दम्।
101. प्रश्न- "शतसाहस्रीसंहिता" इति कस्य काव्यस्य प्रसिद्धिः?
उत्तरम्- महाभारतस्य।
102. प्रश्न- भवभूतिना कति नाटकानि रचितानि?
उत्तरम्- त्रीणि।
103. प्रश्न- अभिनवगुप्तप्रणीता "अभिनवभारती" व्याख्या केन ग्रन्थेनसम्बद्धा?
उत्तरम्- नाट्यशास्त्रग्रन्थेन।
104. प्रश्न- "कर्तारः सुलभा लभेशे विज्ञातारस्तु दुर्लभाः" कस्मिनन्नाटके वर्णितोक्तिः?
उत्तरम्- स्वप्नवासवदत्ते।
105. प्रश्न- "त्रोटकम्" इत्येतत् कस्य भेदोऽस्ति?
उत्तरम्- उपरूपकस्य।
106. प्रश्न- "उरुभङ्गनाटकं" सुखान्तं दुःखान्तम्वा?
उत्तरम्- दुःखान्तम्।
107. प्रश्न- भागवताश्रितं किन्नाटकम्?
उत्तरम्- बालचरितम्।
108. प्रश्न- लोककथाश्रिते के नाटके स्तः?
उत्तरम्- 1. दरिद्रचारुदत्तम् 2. अविमारकञ्च।
109. प्रश्न- भासविरचितानि कियन्ति नाटकानि सन्ति?
उत्तरम्- (13) त्रयोदशः।
110. प्रश्न- भासविरचितानि कति नाटकानि महाभारतकथामूलकानि सन्ति?
उत्तरम्- (7) सप्त।
111. प्रश्न- रामायणकथामूलकं नाटकं किमस्ति?
उत्तरम्- अभिषेकनाटकम्।
112. प्रश्न- "चारुदत्तम्" इत्यत्र कति अंकाः सन्ति?
उत्तरम्- (4) चत्वारः।
113. प्रश्न- "दूतवाक्यम्" इत्यत्र दूतकार्यं कः करोति?
उत्तरम्- कृष्णः।
114. प्रश्न- कृष्णजन्मवर्णनं कुत्र वर्णितमस्ति?
उत्तरम्- बालचरिते।
115. प्रश्न- राजकुमारस्य अविमारकस्य विवाहः केन सह जातः?
उत्तरम्- कुरङ्गया सह।
116. प्रश्न- विक्रमोर्वसीयं किमस्ति?
उत्तरम्- त्रोटकम्।

117. प्रश्न- उर्वशी का आसीत्?
उत्तरम्- अप्सरा।
118. प्रश्न- विक्रमोर्वसीये कति अङ्काः सन्ति?
उत्तरम्- (5) पञ्च।
119. प्रश्न- विक्रमोर्वसीयस्य नायकः कः?
उत्तरम्- पुरूरवा।
120. प्रश्न- विक्रमोर्वशीयस्य का नायिका?
उत्तरम्- उर्वशी।
121. प्रश्न- विक्रमोर्वसीयस्य उपजीव्ये के स्तः?
उत्तरम्- ऋग्वेदः शतपथ-ब्राह्मणञ्च।
122. प्रश्न- अग्निमित्रस्य प्रणयः कया सह जातः?
उत्तरम्- मालविकया।
123. प्रश्न- राज्ञः अग्निमित्रस्य महाराज्ञी काऽसीत्?
उत्तरम्- धारिणी।
124. प्रश्न- मालविकाग्निमित्रे कति अङ्काः सन्ति?
उत्तरम्- (5) पञ्च।
125. प्रश्न- मालविकाग्निमित्रस्य कः नायकः?
उत्तरम्- अग्निमित्रः।
126. प्रश्न- मालविकाग्निमित्रस्य नायिका का?
उत्तरम्- मालविका।
127. प्रश्न- उपरूपके प्रियदर्शिकायाः कीदृग्रूपकविद्या निश्चीयते?
उत्तरम्- नाटिका।
128. प्रश्न- दरिद्रचारुदत्तस्य उपजीव्यमस्ति?
उत्तरम्- लोककथा।
129. प्रश्न- भासकृतः"मध्यमव्यायोगः" कीदृग् रूपकमस्ति?
उत्तरम्- व्यायोगः।
130. प्रश्न- मध्ययमव्यायोगे "मध्यम" शब्दः कस्य बोधकः अस्ति?
उत्तरम्- भीमस्य।
131. प्रश्न- मालविकाग्निमित्रस्य प्रस्तावनायां कं नाटककारं स्मरति कालिदासः?
उत्तरम्- भासम्।
132. प्रश्न- भासप्रणीते नाटके दूतवाक्ये दूतः कः?
उत्तरम्- वासुदेवः।
133. प्रश्न- कालिदासप्रणीतस्य विक्रमोर्वशीयस्य नायकः कः?
उत्तरम्- पुरुरवा।

134. प्रश्न- मालविकाग्निमित्रस्य विदूषकः कः?
उत्तरम्- गौतमः।
135. प्रश्न- मालविकाग्निमित्रे नायकस्य अग्निमित्रस्य पट्टमहिषी का?
उत्तरम्- धारिणी।
136. प्रश्न- मालविकाग्निमित्रे अग्निमित्रस्य प्रेमिका का अस्ति?
उत्तरम्- मालविका।
137. प्रश्न- मालविकाग्निमित्रे धारिण्याः पुत्रः कः?
उत्तरम्- वसुमित्रः।
138. प्रश्न- मालविकाग्निमित्रे धारिण्याः पुत्री का?
उत्तरम्- वसुलक्ष्मी।
139. प्रश्न- "पुराणमित्येव न साधु सर्वम्" सूक्तिरियं कस्मिन् नाटके प्राप्यते?
उत्तरम्- मालविकाग्निमित्रे।
140. प्रश्न- कालिदासप्रणीतेविक्रमोर्वशीये विदूषकः कः?
उत्तरम्- माणवकः।
141. प्रश्न- अनर्घराघवे कति अंकाः विद्यन्ते?
उत्तरम्- (07) सप्त।
142. प्रश्न- विद्धशालभञ्जिकायाम् कति अंकाः सन्ति?
उत्तरम्- (04) चत्वारः।
143. प्रश्न- विद्धशालभञ्जिकायाःनाट्यशास्त्रीय विधा का?
उत्तरम्- नाटिका।
144. प्रश्न- कर्पूरमञ्जरी का अस्ति?
उत्तरम्- सट्टकम्।
145. प्रश्न- कर्पूरमञ्जर्यां कति अंकाः प्राप्यन्ते?
उत्तरम्- (04) चत्वारः।
146. प्रश्न- कर्पूरमंजर्याः भाषा का?
उत्तरम्- प्राकृतम्।
147. प्रश्न- आश्चर्यचूडामणौ कति अंकाः विद्यन्ते?
उत्तरम्- (07) सप्त।
148. प्रश्न- आश्चर्यचूडामणेः उपजीव्यमस्ति?
उत्तरम्- रामायणम्।
149. प्रश्न- प्रबोधचन्द्रोदये कति अंकाः सन्ति?
उत्तरम्- (06) षट्।
150. प्रश्न- प्रतीकात्मकनाटकं किमस्ति?
उत्तरम्- प्रबोधचन्द्रोदयम्।

151. प्रश्न- मालविकायाः नाट्याचार्यः कः?
उत्तरम्- गणदासः।
152. प्रश्न- प्रसन्नराघवे कति अंकाः समुपलभ्यन्ते?
उत्तरम्- (07) सप्त।
153. प्रश्न- कुन्दमालायां कति अंकाः प्रप्यन्ते?
उत्तरम्- (06) षट्।
154. प्रश्न- कुन्दमालायाः उपजीव्यमस्ति?
उत्तरम्- रामायणम्।
155. प्रश्न- दरिद्रचारुदत्तस्य विवाहः केन सह जातः?
उत्तरम्- वसन्तसेनया।
156. प्रश्न- वसन्तसेना काऽसीत्?
उत्तरम्- गणिका।
157. प्रश्न- शिंगभूपालस्य कृतिः किमस्ति?
उत्तरम्- नाटकपरिभाषा।
158. प्रश्न- "नाटकचन्द्रिका" कस्य कृतिः अस्ति?
उत्तरम्- रूपगोस्वामिनः।
159. प्रश्न- "वीथी" का अस्ति?
उत्तरम्- रूपकम्।
160. प्रश्न- किं नाम लीलामधुकरः?
उत्तरम्- भाणः।
161. प्रश्न- व्यामोहस्य उदाहरणं किमस्ति?
उत्तरम्- सौगन्धिकाहरणम्।
162. प्रश्न- किं नाम समवकारः?
उत्तरम्- समुद्रमन्थनम्।
163. प्रश्न- त्रिपुरदाहः कस्योदाहरणमस्ति?
उत्तरम्- डिमस्य।
164. प्रश्न- किं नाम शर्मिष्ठाययातिः?
उत्तरम्- अंकः।
165. प्रश्न- प्रहसनस्य उदाहरणमस्ति?
उत्तरम्- कन्दर्पकेलिः।
166. प्रश्न- "स्वप्नवासवदत्तम्" कस्योदाहरणमस्ति?
उत्तरम्- नाटकस्य।
167. प्रश्न- नाट्यसन्धयः कति संख्यकाः सन्ति?
उत्तरम्- (05) पञ्च।

168. प्रश्न- नाट्यसन्धिः किमस्ति?
उत्तरम्- मुखः।
169. प्रश्न- प्रहसनस्य उदाहरणं किम्?
उत्तरम्- मत्तविलासः।
170. प्रश्न- प्रकरणस्य प्रधान-रसः किं भवति?
उत्तरम्- शृंगारम्।
171. प्रश्न- प्रकरणे अङ्कानां संख्या का:?
उत्तरम्- (10) दश।
172. प्रश्न- भाणे कति अङ्काः भवन्ति?
उत्तरम्- (1) एकः।
173. प्रश्न- विट कुत्र भवति?
उत्तरम्- भाणे।
174. प्रश्न- "भाणस्य" वृत्तिः किं भवति?
उत्तरम्- भारती।
175. प्रश्न- भाणस्य कथावस्तु किं भवति?
उत्तरम्- कविकल्पितम्।
176. प्रश्न- व्यामोहस्य कथावस्तु किं भवति?
उत्तरम्- इतिहास-प्रसिद्धम्।
177. प्रश्न- समवकारे सन्धेरभावो भवति?
उत्तरम्- विमर्शस्य।
178. प्रश्न- समवकारे कुल कति अङ्काः भवन्ति?
उत्तरम्- (3) त्रयोऽङ्काः।
179. प्रश्न- समवकारस्य प्रथमाङ्के कति सन्धिः भवन्ति?
उत्तरम्- (2) द्वे।
180. प्रश्न- समवकारे कुल नायकानां संख्याः कति भवन्ति?
उत्तरम्- (12) द्वादश।
181. प्रश्न- समवकारे मुख्य-रसः कः भवति?
उत्तरम्- वीर-रसः।
182. प्रश्न- डिमस्य कथावस्तुः कीदृशः भवति?
उत्तरम्- इतिहास-प्रसिद्धः।
183. प्रश्न- डिमस्य प्रधान-रसः कः भवति?
उत्तरम्- रौद्रः।
184. प्रश्न- डिमे कति अङ्काः भवन्ति?
उत्तरम्- (4) चत्वारः।

185. प्रश्न- डिमे नायकानां संख्या: कति भवन्ति?
उत्तरम्- (16) षोडस:।
186. प्रश्न- ईहामृगस्य सन्धीनां का: संख्या:?
उत्तरम्- (3) तिस्र:।
187. प्रश्न- ईहामृगस्य नायक: कीदृक् भवति?
उत्तरम्- धीरोदात्त:।
188. प्रश्न- ईहामृगस्य अङ्कानां का: संख्या:भवन्ति ?
उत्तरम्- (4) चतस्र:।
189. प्रश्न- अङ्कस्य नायक: कीदृश: भवति?
उत्तरम्- साधारण-पुरुष:।
190. प्रश्न- अङ्कस्य रस: क: भवति?
उत्तरम्- करुण-रस:।
191. प्रश्न- वीथी इत्यस्या का वृत्ति: भवति?
उत्तरम्- कैशिकी।
192. प्रश्न- निन्दनीय-पुरुषाणां कविकल्पित-वृत्तान्तं किं कथ्यते?
उत्तरम्- प्रहसनम्।
193. प्रश्न- प्रहसनस्य मुख्य-रस: क:?
उत्तरम्- हास्य-रस:।
194. प्रश्न- प्रकरणस्य नायक: क: भवति?
उत्तरम्- धीर-प्रशान्त।
195. प्रश्न- दूतवाक्यम् कस्या: विधाया: ग्रन्थ:?
उत्तरम्- नाटकस्य।
196. प्रश्न- नेपथ्यस्य समानार्थी-शब्द: क:?
उत्तरम्- रंगमंच:।
197. प्रश्न- नाट्य-सन्धि: कति भवति?
उत्तरम्- (5) पञ्च।
198. प्रश्न- नाटकस्य वृत्ति: किं भवेत्?
उत्तरम्- ख्यात:।
199. प्रश्न- प्रकरणस्य किमुदाहरणम्?
उत्तरम्- मालतीमाधवम्।
200. प्रश्न- "मैत्रेय" केन नाटकेन सम्बद्ध:?
उत्तरम्- दरिद्रचारुदत्तेन।
201. प्रश्न- बृहत्नाट्यशास्त्रस्य प्रणेता क:?
उत्तरम्- बृद्धभरत:।

202. प्रश्न- वृहत्नाट्यशास्त्रस्य सम्पूर्ण-श्लोक-संख्या का:?
उत्तरम्- (12000) द्वादशसहस्राणि।
203. प्रश्न- आचार्य भामहस्य निवासस्थानं कुत्र आसीत्?
उत्तरम्- कश्मीरे।
204. प्रश्न- आश्चर्यचूडामणि: इत्यस्य लेखक: क:?
उत्तरम्- शक्तिभद्र:।

4. नाटकम्- Drama

[(क) वेणीसंहारम्, (ख) रत्नावली(ग) नागानन्दम्, (घ) प्रियदर्शिका- (ङ) उत्तररामचरितम्, (च) अभिज्ञानशाकुन्तलम् (छ) मुद्राराक्षसम्, (ज) मृच्छकटिकम्(झ) शारिपुत्रप्रकरणम् (ञ) मालविकाग्निमित्रम्, (ट) विक्रमोर्वशीयम् (ठ) स्वप्नवासवदत्तम्, (ड) अन्यान्य-]

(ख) वेणीसंहारस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न-रूपकभेदेषु "वेणीसंहारम्" किमस्ति?
उत्तरम्- नाटकम्।
2. प्रश्न- भट्टनारायणो मूलत: कस्य स्थानस्य निवासी आसीत्?
उत्तरम्- कान्यकुब्जस्य।
3. प्रश्न- वेणीसंहारे नाटके युधिष्ठिरस्य कञ्चुकी क:?
उत्तरम्- जयन्धर:।
4. प्रश्न- वेणीसंहारे दौत्यकार्यं क: करोति?
उत्तरम्- भगवान् श्रीकृष्ण:।
5. प्रश्न- वेणीसंहारस्य नायक: क:?
उत्तरम्- भीम:।
6. प्रश्न- वेणीसंहारे दुर्योधनस्य कञ्चुकी क:?
उत्तरम्- विनयन्धर:।
7. प्रश्न- वेणीसंहारे दुर्योधनस्य मित्रमस्ति?
उत्तरम्- चार्वाक:।
8. प्रश्न- धृतराष्ट्रस्य सारथी क:?
उत्तरम्- संजय:।
9. प्रश्न- पाण्डवपक्षपाती राक्षस: क:?
उत्तरम्- रुधिरप्रिय:।
10. प्रश्न-याज्ञसेनी का?
उत्तरम्- पाण्डववधू पाञ्चाली।
11. प्रश्न- भीमस्य पत्नी काऽसीत्?
उत्तरम्- हिडिम्बा।

12. प्रश्न- "वेणीसंहार:" इत्यत्र कतिपया अंका: सन्ति?
उत्तरम्- (6) षट्,
13. प्रश्न- वेणीसंहारे कोरसोऽङ्गीरसोऽस्ति?
उत्तरम्- वीररस:।
14. प्रश्न- भीमदुर्योधनयो: मध्ये केन आयुधेन युद्ध: भवति?
उत्तरम्- गदयायुद्ध:।
15. प्रश्न- वेणीसंहारस्य उपजीव्यं किमस्ति?
उत्तरम्- महाभारतम्।
16. प्रश्न- दुर्योधनस्य पत्नी काऽसीत्?
उत्तरम्- भानुमती।
17. प्रश्न- भानुमत्या: सखी का?
उत्तरम्- सुवदना।
18. प्रश्न- द्रौपद्या: सखी का वेणीसंहारे?
उत्तरम्- बुद्धिमतिका।
19. प्रश्न- किं नामदुर्योधनस्य भगिनी धृतराष्ट्रसुता?
उत्तरम्- दु:शला।
20. प्रश्न- कृपाचार्यस्य भगिनीपुत्र: क:?
उत्तरम्- अश्वत्थामा।
21. प्रश्न- कौन्तेयेषु ज्येष्टतम: क:?
उत्तरम्- कर्ण:।
22. प्रश्न-"दैवायत्तं कुलेजन्म महायत्तं तु पौरुषम्" वेणीसंहारे तृतीये अंके कस्येयमुक्ति:?
उत्तरम्- कर्णस्य।
23. प्रश्न- "न युक्तमनभिवाय गुरुन् गन्तुम्" वेणीसंहारे चतुर्थे अंके कस्येयमुक्ति:?
उत्तरम्- भीमस्य।
24. प्रश्न- "पुण्यवन्तो हि दु:खभाजो भवन्ति" वेणीसंहारे चतुर्थे अंके कस्येयमुक्ति:?
उत्तरम्- दुर्योधनस्य।
25. प्रश्न- "वक्तुं सुकरमिदं दुष्करमध्यवसितुम्" सूक्तिरियं कस्मिन् नाटके समुपलभ्यते?
उत्तरम्- वेणीसंहारे।
26. प्रश्न- "मधुरापि हि मूर्च्छयते विषविटपिसमाश्रितावल्ली" सूक्तिरियं कस्मिन् नाटकेसमुपलभ्यते?
उत्तरम्- वेणीसंहारे।
27. प्रश्न- वेणीसंहारस्य नायिका का?
उत्तरम्- द्रौपदी।
28. प्रश्न-"न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेप्तव्या" वेणीसंहारे पंचमे अंके कस्येयमुक्ति:?
उत्तरम्- संजयस्य।

29. प्रश्न- वेणीसंहारे नाटके द्रोणहन्ता कः?
उत्तरम्- धृष्टद्युम्नः।
30. प्रश्न- वेणीसंहारस्य नाटकस्य भरतवाक्यं किम्?
उत्तरम्- अकृपणमरुक्श्रान्तं जीव्याज्जनःपुरुषायुषम्।
31. प्रश्न- "वेणीसंहारम्" इत्यस्मिन् पदे "वेणी" कस्याः वेण्याः बोधिका अस्ति?
उत्तरम्- द्रौपद्या।
32. प्रश्न- वेणीसंहारे नाटके संहार-शब्दस्य कोऽर्थः?
उत्तरम्- प्रसाधनम्(सँवारनम्)
33. प्रश्न- "उत्तंसयिष्यति कचांस्तव देवि भीमः" इति केन नाटकेन सम्बद्धः?
उत्तरम्- वेणीसंहारेन।
34. प्रश्न- "मथ्नामि कौरवशतं समरे न कोपात्" इति केन नाटकेन सम्बद्धः?
उत्तरम्- वेणीसंहारेन।
35. प्रश्न- "गुरुः खेदं खिन्नेमयि भजति नाद्यापि कुरुषु" वेणीसंहारे कस्येयमुक्तिः?
उत्तरम्- भीमसेनस्य।
36. प्रश्न- "धिक-सानुजं कुरुपति धिगजातशत्रुम्" वेणीसंहारे कस्येयमुक्तिः?
उत्तरम्- कृपस्य।

(ग) रत्नावल्ल्याः वस्तुनिष्ठप्रश्नोत्तराणि-

37. प्रश्न- श्रीहर्षविरचितानि नाटकानि कति?
उत्तरम्- त्रीणि, 1. प्रियदर्शिका, 2. रत्नावली, 3. नागानन्दम्।
38. प्रश्न- प्रख्यातस्य "उदयनस्य" प्रणयसम्बद्धा शृङ्गाररसप्रधाना नाटिका का?
उत्तरम्- रत्नावली।
39. प्रश्न- रत्नावल्यां कियन्तोऽङ्काः सन्ति?
उत्तरम्- (4) चत्वारः।
40. प्रश्न- "दुरवगाहा गतिर्दैवस्य" रत्नावल्यां चतुर्थे अंके कस्येयमुक्तिः?
उत्तरम्- राज्ञः उदयनस्य।
41. प्रश्न- "आनीय झटिति घटयति विधिरभिमतभिमुखीभूतः" रत्नावल्यां नाटिकायां प्रथमांके कस्येयमुक्तिः?
उत्तरम्- सूत्रधारस्य।
42. प्रश्न- "अचिन्त्यो हि मणि-मन्त्रौ औषधीनां प्रभावः इति सूक्तिविशिष्टः ग्रन्थविशेषः कः?
उत्तरम्- रत्नावली।
43. प्रश्न- रत्नावल्याः नायकःउदयनः नाट्यशास्त्रदृष्ट्या कीदृग् नायकः?
उत्तरम्- धीरललितः।
44. प्रश्न- प्रश्न- रत्नावल्याः मंगलाचरणे पूर्वरंगे कस्य स्तुतिः प्राप्यते?
उत्तरम्- शिवस्य।

45. प्रश्न- रत्नावल्यां नाटिकायां रत्नावल्याः सहचरी का अस्ति?
उत्तरम्- सुसंगता।
46. प्रश्न- रत्नावली-नाटिकायाः विदूषकः कः?
उत्तरम्- वसन्तकः।
47. प्रश्न- रत्नावली" नाटिकायां कयोः प्रणयवर्णनमस्ति?
उत्तरम्- उदयनसागरिकयोः।
48. प्रश्न- रत्नावल्याः पिता कः?
उत्तरम्- विक्रमबाहु।
49. प्रश्न- रत्नावली-नाटिकायाः नायकः कः?
उत्तरम्- कौशाम्बीनरेशः उदयनः।
50. प्रश्न- रत्नावल्यां नाटिकायां रत्नावली केनाभिधानेन छद्मवेषेण स्वभूमिकां उपचरति?
उत्तरम्- सागरिका।
51. प्रश्न- रत्नावली कस्य रचना अस्ति?
उत्तरम्- हर्षस्य।
52. प्रश्न- रत्नावली-नाटिकायां कति अंकाः विद्यन्ते?
उत्तरम्- (04) चत्वारः।
53. प्रश्न- रत्नावल्याः उपरूपकविधा का अस्ति?
उत्तरम्- नाटिका।
54. प्रश्न- "रत्नावली" कस्य देशस्य राजकन्या अस्ति?
उत्तरम्- सिंहलदेशस्य।
55. प्रश्न- "रत्नावली" इति ग्रन्थे उदयनस्य रानी का आसीत्?
उत्तरम्- वासवदत्ता।
56. प्रश्न- प्रकृष्टस्य प्रेणः स्खलितमविषयस्य हि भवति" इयमुक्तिः रत्नावल्या केन अङ्केन सम्बद्धः?
उत्तरम्- तृतीयाङ्केन।

(घ) नागानन्दस्य वस्तुनिष्ठप्रश्नोत्तराणि-

57. प्रश्न- नागानन्दस्य नायिका का?
उत्तरम्- मलयवती।
58. प्रश्न- नागानन्दनाटकस्य उपजीव्यः ग्रन्थः कः ?
उत्तरम्- बौद्धावदानम्।
59. प्रश्न- नागानन्दे गरुडः कीदृशीं प्रतिज्ञां करोति?
उत्तरम्- "नागान् न भक्षयिष्यामि" इति प्रतिज्ञाम्।
60. प्रश्न- शंखचूडसर्पं कः रक्षति?
उत्तरम्- जीमूतवाहनः।

61. प्रश्न- नागानन्दे कति अंकाः विद्यन्ते?
उत्तरम्- (05) पञ्च।
62. प्रश्न- नागानन्दस्य नायकः कः?
उत्तरम्- जीमूतवाहनः।
63. प्रश्न- "नागानन्दनाटकं सुखान्तं दुःखान्तं वा?
उत्तरम्- सुखान्तम्।
64. प्रश्न- हर्षवर्धनस्य पितुर्नाम किमस्ति?
उत्तरम्- प्रभाकरवर्धनः।
65. प्रश्न- हर्षवर्धनस्य मातुर्नाम किमस्ति?
उत्तरम्- यशोमती।
66. प्रश्न- नागानन्दे नायकस्य जीमूतवाहनस्य प्राणरक्षकः कः?
उत्तरम्- शंखचूडः।
67. प्रश्न-"लब्धं सुखं मयाऽस्या बध्यशिलाया यदुत्सङ्गे" नागानन्दे कस्येयमुक्तिः?
उत्तरम्- जीमूतवाहनस्य।

(ङ) प्रियदर्शिकायाः वस्तुनिष्ठप्रश्नोत्तराणि-

68. प्रश्न- "प्रियदर्शिका" कीदृशी नाटिका विद्यते?
उत्तरम्- प्रणयनाटिका।
69. प्रश्न- प्रियदर्शिका-नाटिकायां प्रियदर्शिका का अस्ति?
उत्तरम्- आरण्यिका।
70. प्रश्न- प्रियदर्शिका नाटिकायां कति अंकाः प्राप्यन्ते?
उत्तरम्- (04) चत्वारः।
71. प्रश्न- प्रियदर्शिकानाटिकायाः नायकः कः?
उत्तरम्- उदयनः।
72. प्रश्न- प्रियदर्शिकानाटिकायाः नायिका का?
उत्तरम्- प्रियदर्शिका।
73. प्रश्न- मनोरमा प्रियदर्शिकायाः का विद्यते?
उत्तरम्- सखी।
74. प्रश्न- "प्रियदर्शिका" इत्यस्य केन नाटकेन सर्वाधिक-साम्यो विद्यते?
उत्तरम्- रत्नावली-नाटकेन।

(च) उत्तररामचरितम्-मालतीमाधवम्-महावीरचरितानां वस्तुनिष्ठप्रश्नोत्तराणि-

75. प्रश्न- भवभूतिविरचितानि नाटकानि कानि सन्ति?
उत्तरम्- मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितम्।
76. प्रश्न- महाकवेः भवभूतेः कतिरूपकाः समुपस्थितः, के च ते?श
उत्तरम्-(03) त्रयः, 1. उत्तररामचरितम्, 2. मालती-माधवम्, 3. महावीर-चरितम्।

77. प्रश्न- भवभूतेः पितुर्नाम किम्?
उत्तरम्-(नीलकण्ठः।
78. प्रश्न- भवभूतेः मातुर्नाम किम्?
उत्तरम्- जतुकर्णी।
79. उत्तरम्- भवभूतेः पितामहस्य नाम किम्?
उत्तरम्- गोपालभट्टः।
80. उत्तरम्- उत्तररामचरितम् इत्यस्य सर्वाधिक-प्रयुक्त-छन्दः कः?
उत्तरम्- अनुष्टुप-छन्दः।
81. प्रश्न- भवभूतिः कस्य शिष्यः?
उत्तरम्- कुमारिल भट्टस्य।
82. प्रश्न- भवभूतिः कस्य राज्याश्रितः?
उत्तरम्- यमोवर्मणस्य।
83. प्रश्न- उत्तररामचरिते अङ्गीरसः कः?
उत्तरम्- करुणरसः।
84. प्रश्न- उत्तररामचरिते कति अंकाः सन्ति?
उत्तरम्- (7) सप्त।
85. प्रश्न- रामायणस्योत्तरकाण्डकथाधारितं नाटकं किमस्ति?
उत्तरम्- उत्तररामचरितम्।
86. प्रश्न- चन्द्रकेतुः कस्य पुत्रः आसीत्?
उत्तरम्- लक्ष्मणस्य।
87. प्रश्न- जृम्भकास्त्रं केन प्रयुक्तम्?
उत्तरम्- लवेन।
88. प्रश्न- रामेण कः यागः विहितः?
उत्तरम्- अश्वमेधः।
89. प्रश्न- उत्तररामचरितं दुःखान्तं सुखान्तं वा?
उत्तरम्- सुखान्तम्।
90. प्रश्न- उत्तररामचरितस्य कं अङ्कं छायांकं कथ्यते?
उत्तरम्- तृतीयः।
91. प्रश्न- चन्द्रकेतोः सारथिः कः आसीत्?
उत्तरम्- सुमन्त्रः।
92. प्रश्न- उत्तररामचरितस्य नायिका का अस्ति?
उत्तरम्- सीता।
93. प्रश्न- उत्तररामचरितस्य नायकः कः अस्ति?
उत्तरम्- रामः।

94. प्रश्न- सीता गर्भावस्थायां कुत्राऽऽसीत्?
उत्तरम्-वाल्मीकेराश्रमे।
95. प्रश्न- कस्य नाटके विदूषकस्य सर्वथा अभावः दरीदृश्यते?
उत्तरम्- भवभूतेः।
96. प्रश्न- उत्तररामचरिते" पंचवटीप्रवेशः" कस्यांकस्य अभियानमस्ति?
उत्तरम्- द्वितीयस्य।
97. प्रश्न- उत्तररामचरिते किं नाम तृतीयोऽङ्कः?
उत्तरम्- छायाङ्कः।
98. प्रश्न- भवभूतेः उत्तररामचरितस्य चतुर्थांकस्य का संज्ञा?
उत्तरम्- कौशल्याजनकयोगः।
99. प्रश्न- उत्तररामचरितस्य कस्मिन् अंके "कुमारविक्रमः" प्रदर्शितः?
उत्तरम्- पंचमे।
100. प्रश्न- उत्तररामचरिते षष्ठांकस्य प्रतिपाद्यविषयः कः?
उत्तरम्- कुमारप्रत्यभिज्ञानम्।
101. प्रश्न- उत्तररामचरिते किं नाम सप्तमः अंकः?
उत्तरम्- (गर्भाङ्कः) सम्मेलनम्।
102. प्रश्न- उत्तररामचरितानुसारं राज्ञः दशरथस्य पुत्री का अस्ति?
उत्तरम्- शान्ता।
103. प्रश्न- उत्तररामचरितानुसारं राजा दशरथः अपत्यकृतिकां शान्तां कस्मै ददौ?
उत्तरम्- लोमपादाय।
104. प्रश्न- राजा लोमपादःअपत्यकृतिका-शान्तायाः विवाहःकेन सह कृतवान्?
उत्तरम्- ऋष्य श्रृंगेण सह।
105. प्रश्न- "अष्टावक्रः" कस्य पात्रविशेषः?
उत्तरम्- उत्तररामचरितस्य।
106. प्रश्न- "ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति" उत्तररामचरिते कस्येयमुक्तिः?
उत्तरम्- रामस्य।
107. प्रश्न- सीताविषयकः लोकापवादः रामाय कः निवेदयति?
उत्तरम्- दुर्मुखः।
108. प्रश्न- रामस्य कौ पुत्रौ आस्ताम्?
उत्तरम्- लवकुशौ।
109. प्रश्न- शम्बूकवधः कस्मिन् नाटके प्राप्यते?
उत्तरम्- उत्तररामचरिते।
110. प्रश्न- "पुटपाकप्रतीकाशो रामस्य करुणो रसः" उत्तररामचरिते तृतीये अंके कस्येयमुक्तिः?
उत्तरम्- मुरलाया।

111. प्रश्न- "पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति" उत्तररामचरिते चतुर्थे अंके कस्येयमुक्तिः?
उत्तरम्- अरुन्धत्याः।

112. प्रश्न- उत्तररामचरिते गर्भांकाभिधानः अंकविशेषः कः?
उत्तरम्- सप्तमः अंकः।

113. प्रश्न- "एको रसः करुण एव" इति सूक्तिसम्बद्धग्रन्थविशेषः कः?
उत्तरम्- उत्तररामचरितम्।

114. प्रश्न- उत्तररामचरितस्य तृतीयांके श्रीरामः स्वमनोव्यथां कस्यै निवेदयति?
उत्तरम्- वासन्त्यै।

115. प्रश्न- "गुणाः पूजास्थानं गुणिषु न च लिंगं न च वयः" सूक्तिरियं कस्मिन् नाटके विद्यते?
उत्तरम्- उत्तररामचरिते।

116. प्रश्न- "अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्" उत्तररामचरिते प्रथमांके कस्येयमुक्तिः?
उत्तरम्- लक्ष्मणस्य।

117. प्रश्न- ."हृदयं त्वेव जानाति प्रीतियोगं परस्परम्" उत्तररामचरितस्य षष्ठांके कस्येयमुक्तिः?
उत्तरम्- कुशस्य।

118. प्रश्न- "शोकक्षोभे च हृदयं प्रलापैरेव धार्यते" कुत्रशोभितोक्तिः?
उत्तरम्- उत्तररामचरिते।

119. प्रश्न- संस्कृतनाटकजगति करुणरसप्रधानं नाटकं किम्?
उत्तरम्- उत्तररामचरितम्।

120. प्रश्न- गर्भांकः कस्मिन् नाटके विद्यते?
उत्तरम्- उत्तररामचरिते।

121. प्रश्न- भवभूतेः उत्तररामचरिते नाटके प्रमुखः छन्दः कः?
उत्तरम्- अनुष्टुप-शिखरिणी च।

122. प्रश्न- "त्वं जीवितं त्वमसि मे हृदयं द्वितीयं" इयं सूक्तिः कुतः उद्धृतः?
उत्तरम्- उत्तररामचरितं ग्रन्थात्।

123. प्रश्न- भवभूतेः उत्तररामचरिते किं नाम प्रथमोऽङ्कस्य?
उत्तरम्- चित्रदर्शनम्।

124. प्रश्न- "कालोह्ययं निरविधिर्विपुला च पृथ्वी" उत्तररामचरिते कस्येयमुक्तिः?
उत्तरम्- भवभूतिः।

125. प्रश्न- "अविदितगतयामा रात्रिरेवं व्यरंसीत्" उत्तररामचरिते कस्येयमुक्तिः?
उत्तरम्- रामस्य।

126. प्रश्न- "वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे" इयमुक्तिः केन नाटकेन सम्बद्धः?
उत्तरम्- उत्तररामचरितेन।

127. प्रश्न- मालतीमाधवयोः मकरन्दमदयन्तिकयोश्च प्रणयाधारितं प्रकरणनाटकं किमस्ति?
उत्तरम्- मालतीमाधवम्।

128. प्रश्न- महावीरचरिते कति अंकाः सन्ति?
उत्तरम्- (6) षट्।
129. प्रश्न- महावीरचरितस्य नायकः कः?
उत्तरम्- रामः।
130. प्रश्न- "महावीर" पदं कं बोधयति?
उत्तरम्- रामम्।
131. प्रश्न- महावीरचरितस्य अङ्गीरसः कः?
उत्तरम्- वीररसः।
132. प्रश्न- मालती-माधवे कियन्तोऽङ्काः?
उत्तरम्- (10) दश।
133. प्रश्न- मालतीमाधवस्य नायकः कः?
उत्तरम्- माधवः।
134. प्रश्न- मालतीमाधवस्य नायिका का?
उत्तरम्- मालती।
135. प्रश्न- मालतीमाधवे को रसोऽङ्गी विद्यते?
उत्तरम्- शृङ्गारः।

(छ) अभिज्ञानशाकुन्तलम् इत्यस्य वस्तुनिष्ठप्रश्नोत्तराणि-

136. प्रश्न- नाटकेषु कं नाटकं रम्यम्?
उत्तरम्- अभिज्ञानशाकुन्तलम्।
137. प्रश्न- शकुन्तलायाः माता का अस्ति?
उत्तरम्- मेनका।
138. प्रश्न- शकुन्तलायाः धर्मपिता कः अस्ति?
उत्तरम्- महर्षिकण्वः।
139. प्रश्न- अभिज्ञानशाकुन्तले "अभिज्ञान" शब्दस्य संकेतग्रहः कस्मिन् अस्ति?
उत्तरम्- अंगुलीयके।
140. प्रश्न- "उपमा कालिदासस्य" सूक्तिरियं केन सम्बद्धा?
उत्तरम्- कालिदासेन।
141. प्रश्न- राज्ञः दुष्यन्तस्य पत्नी का अस्ति?
उत्तरम्-हंसपदिका।
142. प्रश्न- दुष्यन्तस्य प्रेमिका का अस्ति?
उत्तरम्- वसुमती।
143. प्रश्न-अभिज्ञानशाकुन्तलस्यानुसारं दुष्यन्तस्य तृतीयापत्नी प्रेमिका वा का अस्ति?
उत्तरम्- शकुन्तला।
144. प्रश्न- अभिज्ञानशाकुन्तलस्य मंगलाचरणे कालिदासः कं स्तौति?
उत्तरम्- शिवम्।

145. प्रश्न- शकुन्तलाया: सख्यौ के स्त:?
उत्तरम्- अनसूया प्रियंवदा च।
146. प्रश्न- कण्वशिष्य: क:?
उत्तरम्- शार्ङ्गरव:।
147. प्रश्न- प्रियंवदा कस्य सहचरी अस्ति?
उत्तरम्- शकुन्तलाया:।
148. प्रश्न- अभिज्ञानशाकुन्तलस्य विदूषकस्य नाम?
उत्तरम्- माधव्य:।
149. प्रश्न-"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करणप्रवृत्तय: उक्तिरियं कस्यास्ति?
उत्तरम्- दुष्यन्तस्य।
150. प्रश्न- अभिज्ञानशाकुन्तलस्य सर्वोत्तम: अंक: क:?
उत्तरम्- चतुर्थ:।
151. प्रश्न- नाटकेषु रम्यं किमस्ति?
उत्तरम्- अभिज्ञानशाकुन्तलम्।
152. प्रश्न- शाकुन्तलस्य उपजीव्यं किमस्ति?
उत्तरम्- महाभारतम्(आदिपर्व:)।
153. प्रश्न- शाकुन्तलस्य नायक: क:?
उत्तरम्- दुष्यन्त:।
154. प्रश्न- अभिज्ञान-शाकुन्तलस्य का नायिका?
उत्तरम्- शकुन्तला।
155. प्रश्न- अभिज्ञानशाकुन्तले कति अंका: सन्ति?
उत्तरम्- (7) सप्त।
156. प्रश्न- शकुन्तला कस्य पुत्री आसीत्?
उत्तरम्- विश्वामित्रस्य।
157. प्रश्न-दुष्यन्तशकुन्तलयो: विवाह: कीदृश:?
उत्तरम्- गन्धर्वविवाह:।
158. प्रश्न- शकुन्तलायै क: शापं ददाति?
उत्तरम्- दुर्वासा।
159. प्रश्न- इन्द्रस्य सारथि: क:?
उत्तरम्- मातलि:।
160. प्रश्न- शाकुन्तले प्रधानरस: क:?
उत्तरम्- शृङ्गार:।
161. प्रश्न- अभिज्ञानशाकुन्तले कयो: रसयोरपूर्व-सम्मेलनं विद्यते?
उत्तरम्- श्रृङ्गार-करुणयो:।

162. प्रश्न- शकुन्तलया सह हस्तिनापुरं यावत् का गच्छति?
उत्तरम् गौतमी।

163. प्रश्न- अभिज्ञानशाकुन्तले अग्निगर्भा शमी इव का अस्ति?
उत्तरम्- शकुन्तला।

164. प्रश्न- "तेजो द्वयस्य युगपद्व्यसनोद्याभ्यां लोको नियम्यत इवात्म दशान्तरेषु" सूक्तिरियं कुत्र समुपलभ्यते?
उत्तरम्- अभिज्ञानशाकुन्तले।

165. प्रश्न- "किमिव हि मधुराणां मण्डनं नाऽकृतीनाम्" उक्तिरियं कस्यास्ति?
उत्तरम्- दुष्यन्तस्य।

166. प्रश्न- "न प्रभातरलं ज्योतिरुदेति वसुधातलात्" सूक्तिरियं अभिज्ञानशाकुन्तलस्य कस्मिन् अंके विद्यते?
उत्तरम्- प्रथमे अंके।

167. प्रश्न- "गण्डयोपरि पिटकः संवृत्तः" अभिज्ञानशाकुन्तले द्वितीयांके कस्येयमुक्तिः?
उत्तरम्- विदूषकस्य।

168. प्रश्न- "अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते" कस्येयमुक्तिः?
उत्तरम्- दुष्यन्तस्य।

169. प्रश्न- "कामी स्वतां पश्यति" दुष्यन्तस्येयमुक्तिः शाकुनतलस्य कस्मिन् अंके विद्यते?
उत्तरम्- द्वितीये अंके।

170. प्रश्न- "गान्धर्वेण विवाहेन बहव्यो राजर्षिकन्यकाः श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः" उक्तिरियं कस्यास्ति अभिज्ञानशाकुन्तले?
उत्तरम्- दुष्यन्तस्य।

171. प्रश्न-ययातेः पत्नी का आसीत्?
उत्तरम्- शर्मिष्ठा।

172. प्रश्न- अभिज्ञानशाकुन्तले पुत्रकृतकः श्यामाकमुष्टिपरिवर्धितकः कः?
उत्तरम्- मृगः।

173. प्रश्न- ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः" कस्येयमुक्तिः?
उत्तरम्- शार्ङ्गरवस्य।

174. प्रश्न- "गुर्वपि विरहदुःखम् आशाबन्धः साहयति" अभिज्ञानशाकुन्तले कस्येयमुक्ति?
उत्तरम्- अनसूयायाः।

175. प्रश्न- "अर्थो हि कन्या परिकीय एव" शाकुन्तले कस्येयमुक्तिः?
उत्तरम्- कण्वस्य।

176. प्रश्न- "स्त्रीणामशिक्षितपटुत्वममानुषीषु" सूक्तिरियं कुत्र समुपलभ्यते?
उत्तरम्- अभिज्ञानशाकुन्तले।

177. प्रश्न- दुष्यन्तपरित्यक्ता शकुन्तला कस्याश्रमं निवसति?
उत्तरम्- मरीचाश्रमम्।

178. प्रश्न- शकुन्तलापुत्र: क:?
उत्तरम्- (भरत:) सर्वदमन:।
179. प्रश्न- दुष्यन्तप्रदत्तं शकुन्तलाया: अंगुलीयकं कुत्र स्खलितम्?
उत्तरम्- शचीतीर्थे।
180. प्रश्न- दुष्यन्तस्य मन:स्थितिपरिज्ञानाय मेनका काम् अप्रेषयत्?
उत्तरम्- सानुमतीम्।
181. प्रश्न- शाकुन्तलस्य कस्मिन् अंके दुष्यन्तेन शकुन्तलापरित्याग: प्राप्यते?
उत्तरम्- पंचमे अंके।
182. प्रश्न- "भवितव्यानां द्वाराणि भवन्ति सर्वत्र" सूक्तिरियं कुत्र प्राप्यते?
उत्तरम्- अभिज्ञानशाकुन्तलस्य प्रथमे अंके।
183. प्रश्न- स्वर्गात् हस्तिनापुरं आगच्छति सन्देहवाहक: क:?
उत्तरम्- मातलि:।
184. प्रश्न- "अत: परीक्ष्य कर्तव्यं विशेषात् संगतं रह:" अभिज्ञानशाकुन्तले कस्येयमुक्ति:?
उत्तरम्- शार्ङ्गरवस्य।
185. प्रश्न- "आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्" अभिज्ञानशाकुन्तले कस्येयमुक्ति:?
उत्तरम्- सूत्रधारस्य।
186. प्रश्न- अभिज्ञानशाकुन्तलस्य भरतवाक्यं किमस्ति?
उत्तरम्- प्रवर्ततां प्रकृतिहिताय पार्थिव:, सरस्वती श्रुतिमहतां महीयताम्।
187. प्रश्न- "गुर्वपि विरहदु:खमाशाबन्ध: साहयति" कस्मादुद्धृत:?
उत्तरम्- अभिज्ञानशाकुन्तले।
188. प्रश्न- "अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्" एषोक्ति: कुत्राऽस्ति?
उत्तरम्- अभिज्ञानशाकुन्तले।
189. प्रश्न- अभिज्ञानशाकुन्तले कति पात्राणि सन्ति?
उत्तरम्- 12 द्वादश पात्राणि।
190. प्रश्न- अभिज्ञानशाकुन्तले कति छन्दानां प्रयोगो भवति?
उत्तरम्- 24 चतुर्विंशति:।
191. प्रश्न- अभिज्ञान-शाकुन्तलस्य चतुर्थेऽङ्के कियन्त: प्रसिद्धा: श्लोका: सन्ति?
उत्तरम्- (4) चत्वार:।
192. प्रश्न- "अचेतनं नाम गुणं न लक्षयेत्" इयं उक्ति: कस्य केन प्रति?
उत्तरम्- दुष्यन्तस्य मुद्रिकां प्रति।
193. प्रश्न- अभिज्ञानशाकुन्तले मधुकारिका का?
उत्तरम्- दुष्यन्तस्य परिचायिका।
194. प्रश्न-"अहो राग परिवाहिणी गीति:" राजा दुष्यन्तस्य कथनं कस्या: प्रशंसायां ह्रियते?
उत्तरम्- हंसपदिकाया: गीतोपरि।

195. प्रश्न- कालिदासस्य नाटके कस्य छन्दस्य प्रमुखता विद्यते?
उत्तरम्- आर्या-छन्दस्य।
196. प्रश्न- कालिदासस्य शैली का?
उत्तरम्- ध्वन्यात्मिका।
197. प्रश्न- "अभिज्ञानशाकुन्तलम्" नाटके के गुणाः विद्यते?
उत्तरम्- प्रसाद-गुणः।
198. प्रश्न- शकुन्तला पत्युः चिन्तने कुत्र उपविशति स्म?
उत्तरम्- कुटिया-पार्श्वे।
199. प्रश्न- शकुन्तलायाः विदाई इत्यस्य वर्णनं कस्मिन् अङ्के अस्ति?
उत्तरम्- चतुर्थ- अङ्के।
200. प्रश्न- शकुन्तला राजा दुष्यन्तोपरि केन कारणेन मोहितो अभूत्?
उत्तरम्- वस्त्र-कारणेन।
201. प्रश्न- दुष्यन्तः शकुन्तलायाः कया रक्षां करोति स्म?
उत्तरम्- भ्रमरेन।
202. प्रश्न- "अभिज्ञानशाकुन्तलम्" नाटके विदूषकः कः?
उत्तरम्- माढव्यः।
203. प्रश्न- शकुन्तलायाः विदा-समये रेशमी वस्त्रं कः प्रदत्तः?
उत्तरम्- वृक्षः।
204. प्रश्न- शकुन्तलायाः मुद्रिका कुत्र अपतत्?
उत्तरम्- तडागे।
205. प्रश्न- दुष्यन्तस्य मनस्स्थितिः ज्ञातुं मेनका कां सखीं प्रेषिता?सानुमतीम्।
206. प्रश्न- "स्त्रीणामशिक्षित-पटुत्वममानुषीषु" इयं उक्तिः कस्य नाटकस्य विद्यते?
उत्तरम्- अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य।
207. प्रश्न-अभिज्ञानशाकुन्तलस्य कस्मिन् अङ्के "विषकम्भक" इत्यस्य समाप्तिः भवति?
उत्तरम्- तृतीयाङ्के।
208. प्रश्न- नाटके अश्रवणयोग्यां वार्तां किं कथ्यते?
उत्तरम्- आत्मगतम्।
209. प्रश्न- नाटकेषु भरतवाक्यस्य प्रयोगः कदा भवति?
उत्तरम्- नाटकान्ते।
210. प्रश्न- अभिनेतादि यत्र वेशभूषायाः धारयति तं स्थानं किं कथयति?
उत्तरम्- नेपथ्ये।
211. प्रश्न- नाटके सूत्रधारस्य किं कर्त्तव्यं भवति?
उत्तरम्- अभिनयस्य निर्देशनं नियन्त्रणञ्च।
212. प्रश्न- नाट्यशास्त्रे नान्दी इत्यनेन किं अभिप्रेतोऽस्ति?
उत्तरम्- मंगलाचरणम्।

213. प्रश्न- अभिज्ञानशाकुन्तलस्य सर्वप्रथम-आंग्लभाषायामनुवादः केन कृतः?
उत्तरम्- शेक्सपीयरः।
214. प्रश्न- "सर्वः कान्तमात्मीयं पश्यति" कस्या इयमुक्तिः?
उत्तरम्- दुष्यन्तस्य।
215. प्रश्न- कालिदासस्य नाटकाणां प्रतिपाद्य-विषयः कः?
उत्तरम्- शृंगारपरकः।
216. प्रश्न- कालिदासस्य सर्वे नाटकस्यान्तः किं भवति?
उत्तरम्- सुखान्तः।
217. प्रश्न- कालिदासस्य कथा विन्यासः किदृशः?
उत्तरम्- श्रेष्ठः।
218. प्रश्न- महर्षि कण्वस्य आश्रमः कुत्रासीत्?
उत्तरम्- मालिनी नद्याः तटे।
219. प्रश्न- दुष्यन्तः यदा आश्रमे प्रविशत् तदा महर्षिः कण्वः कुत्र अगच्छत्।
उत्तरम्- सोमतीर्थे।
220. प्रश्न- मारीचि ऋषिः कुत्र निवसति स्म?
उत्तरम्- हेमकूटे।
221. प्रश्न- "तत्राऽपि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्" कस्य ग्रन्थस्योक्तिः?
उत्तरम्- अभिज्ञानशाकुन्तलम्।
222. प्रश्न- "कोऽन्यो हुतवहाद्दगधुं प्रभवति" इयं सूक्तिः कुत्रात् उद्धृतः?
उत्तरम्- अभिज्ञानशाकुन्तलम् ग्रन्थात्।
223. प्रश्न- अभिज्ञानशाकुन्तले चतुर्थ-अङ्कस्य रसः कः?
उत्तरम्- विप्रलम्भ-रसः।
224. प्रश्न- अभिज्ञानशाकुन्तलम् केषु विभक्तः?
उत्तरम्- अङ्केषु।
225. प्रश्न- "स्नेहपापशङ्की" एषोक्तिः कुत्राऽस्ति?
उत्तरम्- अभिज्ञानशाकुन्तले।
226. प्रश्न-"यास्यत्यद्य शकुन्तलेति हृदयम्" कस्येयमुक्तिः?
उत्तरम्- कण्वस्य।
227. प्रश्न- "अचेतनं नाम गुणं न लक्षयेत्" इयं पंक्तिः कः केन कथितः?
उत्तरम्- दुष्यन्तः धीवरेन कथितः।
228. प्रश्न- "हृदये गृह्यते नारी" इयं सूक्तिः कस्य ग्रन्थस्य विद्यते?
उत्तरम्- अभिज्ञानशाकुन्तलस्य।
229. प्रश्न- "स्मरिष्यति त्वां न स बोधितोऽपि सन्-" कस्येयमुक्तिः?
उत्तरम्- दुर्वासायाः।

(ज) मुद्राराक्षसस्य वस्तुनिष्ठप्रश्नोत्तराणि-

230. प्रश्न- विशाखदत्तस्य मुद्राराक्षसे कति अंकाः सन्ति?
उत्तरम्- (7) सप्त।

231. प्रश्न- विशाखदत्तस्य पितामहः कः आसीत्?
उत्तरम्- वटेश्वरदत्तः।

232. प्रश्न- विशाखदत्तस्य पिता कः आसीत्?
उत्तरम्- भास्करदत्तः।

234. प्रश्न- केषां शास्त्राणां पण्डितो विशाखदत्तः आसीत्?
उत्तरम्- अर्थशास्त्र-शुक्रनीति-दर्शनशास्त्र-ज्यौतिषाम्।

235. प्रश्न- मुद्राराक्षसं किं विषयकमस्ति?श
उत्तरम्- राजनीतिविषयकम्।

236. प्रश्न- मुद्रिकया कः गृहीतः?
उत्तरम्- राक्षसः।

237. प्रश्न- राक्षसस्य मित्रं कः अस्ति?
उत्तरम्- चन्दनदासः।

238. प्रश्न- चन्द्रगुप्तस्य मंत्री कः आसीत्?
उत्तरम्- चाणक्यः।

239. प्रश्न- नन्दस्य अमात्यः कः?
उत्तरम्- राक्षसः।

240. प्रश्न- नन्दस्य पराजयानन्तरं को राजा बभूव?
उत्तरम्- चन्द्रगुप्त मौर्यः।

241. प्रश्न- मुद्रया को गृहीतः?
उत्तरम्- राक्षसः।

242. प्रश्न- चन्द्रगुप्तः कीदृशो नायकः?
उत्तरम्- धीरोदात्तः।

243. प्रश्न- मलयकेतोः पिता कः आसीत्?
उत्तरम्- पर्वतकः।

244. प्रश्न- मुद्राराक्षसस्य अङ्गीरसः कः?
उत्तरम्- वीरः।

245. प्रश्न- मुद्राराक्षसे मंगलाचरणे पूर्वरङ्गे कस्य स्तुतिः प्राप्यते?
उत्तरम्- शिवस्य।

246. प्रश्न- राज्ञश्चन्द्रगुप्तस्य राज्यशासनकाले महामात्यः कः?
उत्तरम्- चाणक्यः।

247. प्रश्न- "मुद्रालाभाख्यः" अंकविशेषः मुद्राराक्षसे कः?
उत्तरम्- प्रथमः।

248. प्रश्न- मुद्राराक्षसस्यद्वितीयांकस्य का संज्ञा?
उत्तरम्- राक्षसविचार:।
249. प्रश्न- मुद्राराक्षसे किं नाम तृतीयोऽङ्क:?
उत्तरम्- कृतकलह:।
250. प्रश्न- मुद्राराक्षसे "राक्षसोद्योगनामक:" अंक: क:?
उत्तरम्- चतुर्थ:।
251. प्रश्न- मुद्राराक्षसे राक्षसनिकारो नाम अंक: क:?
उत्तरम्- पंचम:।
252. प्रश्न- मुद्राराक्षसस्य षष्ठांकस्य का संज्ञा?
उत्तरम्- राक्षसनिर्वेद:।
253. प्रश्न- मुद्राराक्षसस्य सप्तम: अंक: केन अभिधानेन अभिधीयते?
उत्तरम्- राक्षसनिग्रह:।
254. प्रश्न- चाणक्यस्य पितृप्रदत्तनाम किम् अस्ति?
उत्तरम्- विष्णुगुप्त:।
255. प्रश्न- नन्दसाम्राज्ये कुसुमपुरे नन्दस्य महामात्य: क: आसीत्?
उत्तरम्- राक्षस:।
256. प्रश्न- मुद्राराक्षसे "शार्ङ्गरव:" क:?
उत्तरम्- चाणक्यशिष्य:।
257. प्रश्न- मुद्राराक्षसे यमपटचर: निपुणक: क:?
उत्तरम्- चाणक्यचर:।
258. प्रश्न- मुद्राराक्षसे सिद्धार्थक: क:?
उत्तरम्- चाणक्यस्य गुप्तचर:।
259. प्रश्न- मुद्राराक्षसे किं नाम मणिकारश्रेष्ठी राक्षसस्य मित्रम्?
उत्तरम्- चन्दनदास:।
260. प्रश्न- मुद्राराक्षसे "पर्वतक:" क:?
उत्तरम्- मलयकेतो: पिता।
261. प्रश्न- कौटिल्यप्रयुक्तेन विषकन्याप्रयोगेण मृत्युलाभमभत्?
उत्तरम्- पर्वतक:।
262. प्रश्न- कौटिल्यस्य कूटनीतिप्रयोगेण पञ्चत्वं गत: पर्वतकस्य भ्राता क:?
उत्तरम्- वैरोधक:।
263. प्रश्न- वराकस्य सर्वार्थसिद्धे: वधमकारयत्?
उत्तरम्- चाणक्य:।
264. प्रश्न- चाणक्यचर: मलयकेतो: छद्ममित्रं च क: अस्ति मुद्राराक्षसे?
उत्तरम्- भृगुरायण:।

265. प्रश्न- राक्षसस्य परिवार: कस्यगृहे न्याससरूपेण संरक्षित: मुद्राराक्षसे?
उत्तरम्- चन्दनदासस्य।

266. प्रश्न- चाणक्ययोजनानुसारं सिद्धार्थकप्रयासेन कपटलेख: केन लिखित: स्वहस्तेन?
उत्तरम्- शटकदासेन।

267. प्रश्न- राक्षसस्य मुद्रा कुत: प्राप्यते?
उत्तरम्- चन्दनदासगृहत:।

268. प्रश्न- किं नाम आहितुण्डिक: राक्षसचर:?
उत्तरम्- विराधगुप्त:।

269. प्रश्न- किं नाम मलयकेतो: कञ्चुक्या:?
उत्तरम्- जाजलि:।

270. प्रश्न- मुद्राराक्षसे किं नाम शटकदास:?
उत्तरम्- राक्षसस्य मित्रम्।

271. प्रश्न- मुद्राराक्षसे क्षपणकजीवसिद्धि: क:?
उत्तरम्- चाणक्यमित्रम् इन्दुंशर्मा।

272. प्रश्न- किं नाम चन्द्रगुप्तस्य कञ्चुक्या:?
उत्तरम्- वैहीनर:।

273. प्रश्न- चन्द्रगुप्तमौर्यभ्रान्त्या वैरोधकस्य हन्ता क:?
उत्तरम्- दारुवर्मा।

274. प्रश्न- विषप्रदानेन चन्द्रगुप्तमौर्यवधाय राक्षसेण नियुक्त:क: आसीत्?
उत्तरम्- वैद्य: अभयदत्त:।

275. प्रश्न- प्राणदण्डेन दण्डितस्य शकटदासस्य प्राणरक्षक: क:?
उत्तरम्- सिद्धार्थक:।

276. प्रश्न- स्वर्गगतस्य पर्वतकस्य आभूषणान् कस्मै प्रददाति चन्द्रगुप्तमौर्य:?
उत्तरम्- विश्वावसवे।

277. प्रश्न- मुद्राराक्षसे किं नाम वृषल:?
उत्तरम्- मुरापुत्र चन्द्रगुप्तमौर्य:।

278. प्रश्न- मुद्राराक्षसे भेदनीतिनिपुण: स्तनकलश: क:?
उत्तरम्- चन्द्रगुप्तचर:।

279. प्रश्न- कौमुदीमहोत्सवस्य निषेध: केन कृत: कुसुमपुरे?
उत्तरम्- चाणक्येन।

280. प्रश्न- मुद्राराक्षसे किं नाम "कुटुम्बिनी"?
उत्तरम्- चन्दनदासस्य पत्नी।

281. प्रश्न- मुद्राराक्षसे विदूषक: अस्ति वा न वा?
उत्तरम्- नास्ति।

282. प्रश्न- मुद्राराक्षसस्य नायिका का?
उत्तरम्- न कापि।
283. प्रश्न- मुद्राराक्षसे विश्वावसोः पर्वतकाभूषणान् कः क्रीणाति?
उत्तरम्- राक्षसः।
284. प्रश्न- "नहि सर्वः सर्वं जानाति" सूक्तिरियं कुत्र समुपलभ्यते?
उत्तरम्- मुद्राराक्षसे।
285. प्रश्न- "उपरि धनं धनरहितंदूरे दयिता" कस्मादुद्धृतः?
उत्तरम्- मुद्राराक्षसात्।
286. प्रश्न-एकमेव "स्त्रीपात्रं" कस्मिन् नाटके वर्तते?
उत्तरम्- मुद्राराक्षसे।
287. प्रश्न- मुद्राराक्षसस्य नायकः कः?
उत्तरम्- चन्द्रगुप्तः।
288. प्रश्न- चाणक्यस्य चन्द्रगुप्तः कः आसीत्?
उत्तरम्- शिष्यः।
289. प्रश्न- विशाखदत्तस्य द्वितीया नाट्यकृतिः काऽस्ति?
उत्तरम्- देवीचन्द्रगुप्तम्।
290. प्रश्न- विशाखदत्तस्य तृतीया नाट्यकृतिः काऽस्ति?
उत्तरम्- अभिसारिका-वञ्चितकम्।
291. प्रश्न- "ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते" इति केन नाटकेन सम्बद्धः?
उत्तरम्- मुद्राराक्षसेन।
292. प्रश्न- "पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी" मुद्राराक्षसे कस्योक्तिः?
उत्तरम्- राक्षसस्य।
293. प्रश्न- "नन्दोन्मूलनदृष्टिवीर्यमहिमा बुद्धिस्तु मा गान्मम्" इति केन नाटकेन सम्बद्धः?
उत्तरम्- मुद्राराक्षसेन।

(झ) मृच्छकटिकस्य वस्तुनिष्ठप्रश्नोत्तराणि-

294. प्रश्न- शूद्रकस्य मृच्छकटिके कयोः प्रणयवर्णनमस्ति?
उत्तरम्- चारुदत्तवसन्तसेनयोः।
295. प्रश्न- शर्वलिकस्य प्रेयसी काऽस्ति?
उत्तरम्- मदनिका।
296. प्रश्न- चारुदत्तस्य पुत्रः कः?
उत्तरम्- रोहसेनः।
297. प्रश्न- चारुदत्तस्य भृत्यः कः आसीत्?
उत्तरम्- संवाहकः।
298. प्रश्न- नृपं पालकं हत्वा कः राज्यं प्राप?
उत्तरम्- आर्यकः।

299. प्रश्न- मृच्छकटिकस्य नायकः कः?
उत्तरम्- चारुदत्तः।
300. प्रश्न- मृच्छकटिकस्य नायिका का?
उत्तरम्- गणिका वसन्तसेना।
301. प्रश्न- मृच्छकटिकस्य अङ्गीरसः कः?
उत्तरम्- शृङ्गारः।
302. प्रश्न- मृच्छकटिकस्य रूपकविधा किमस्ति?
उत्तरम्- प्रकरणम्।
303. प्रश्न- मृच्छकटिके प्रकरणे कति अंकाः विद्यते?
उत्तरम्- (10) दश।
304. उत्तरम्- "मृच्छकटिकम्" कीदृशं प्रकरणम्?
उत्तरम्- सामाजिकम्।
305. प्रश्न- मृच्छकटिकस्य विदूषकः कः?
उत्तरम्- मैत्रेयः।
306. उत्तरम्- मृच्छकटिके कस्य शकटस्य चर्चा विद्यते?
उत्तरम्- मृत्तिकायाः शकटस्य।
307. प्रश्न- मृच्छकटिकस्य नान्दी-संज्ञके पूर्वरङ्गे कस्य स्तुतिः विद्यते?
उत्तरम्- शिवस्य।
308. प्रश्न- कस्मिन् ब्राह्मणनायकः प्राप्यते?
उत्तरम्- मृच्छकटिके।
309. प्रश्न- "शून्यमपुत्रस्य गृहं, चिरशून्यं नास्ति यस्य सन्मित्रम्। मूर्खस्य दिशः शून्याः, सर्वं शून्यं दरिद्रस्य।।" कस्येयमुक्तिः मृच्छकटिके प्रथमाङ्के?
उत्तरम्- सूत्रधारस्य।
310. प्रश्न- मृच्छकटिकम् इत्यस्य कोऽर्थः?
उत्तरम्- मृदः शकटिका यस्मिन् तद् मृच्छकटिकम्।
311. प्रश्न- "अल्पक्लेशं मरणं दारिद्र्यम् अनन्तकं दुःखम्" मृच्छकटिके प्रथमाङ्के कस्येयमुक्तिः?
उत्तरम्- चारुदत्तस्य।
312. प्रश्न- लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। असत्पुरुषसेवेव दृष्टिर्विफलतां गता।। सूक्तिरियं कस्मिन् ग्रन्थे समुपलभ्यते?
उत्तरम्- मृच्छकटिके।
313. प्रश्न- आलाने गृह्यते हस्ती, वाजी वल्गासु। हृदये गृह्यते नारी, यदीदं नास्ति गम्यताम् सूक्तिरियं कस्मिन् रूपके विद्यते?
उत्तरम्- मृच्छकटिके।
314. प्रश्न- "वहुदोषा हि शर्वरी" मृच्छकटिके प्रथमांके कस्येयमुक्तिः?
उत्तरम्- चारुदत्तस्य।

315. प्रश्न- प्रकरणे मृच्छकटिके चारुदत्तस्य किं नाम सेवकः द्यूतकरः सञ्जातः?
उत्तरम्- संवाहकः।
316. प्रश्न- चारुदत्तस्य विवाहिता पत्नी का अस्ति?
उत्तरम्- धूता।
317. प्रश्न- चारुदत्तस्य गृहे भित्तौ सन्धिं कृत्वा कः आभूषणान् चोरयितः?
उत्तरम्- शर्विलकः।
318. प्रश्न- मृच्छकटिके "मदनिका" कस्य प्रेमिका अस्ति?
उत्तरम्- शर्विलकस्य।
319. प्रश्न- शकारताडितां बसन्तसेनां मृत्युमुखात् कः मोचयति?
उत्तरम्- संवाहकः।
320. प्रश्न- मृच्छकटिके कस्य राज्ञः हत्या क्रियते?
उत्तरम्- राज्ञः पालकस्य।
321. प्रश्न- पालके मृते सति कः राजा भवति?
उत्तरम्- आर्यकः।
322. प्रश्न- मृच्छकटिके प्रकरणे मृच्छकटिकां स्वकीयैः स्वर्णाभूषणैःका पूरयति?
उत्तरम्- बसन्तसेना।
323. प्रश्न-रूपके मृच्छकटिके किन्नाम प्रथमोऽङ्कः?
उत्तरम्- अलंकारन्यासः।
324. प्रश्न- मृच्छकटिके प्रकरणे किं नाम द्वितीयः अंकः?
उत्तरम्- द्यूतकरसंवाहक।
325. प्रश्न- मृच्छकटिके सन्धिच्छेदनामकः अंकविशेषः कः?
उत्तरम्- तृतीयः।
326. प्रश्न- प्रकरणे मृच्छकटिके कस्य अंकस्य नाम "मदनिकाशर्विलकः" अस्ति?
उत्तरम्- चतुर्थांकस्य।
327. प्रश्न-रूपके मृच्छकटिके पंचमः अंकः?
उत्तरम्- दुर्दिनः।
328. प्रश्न- मृच्छकटिके प्रकरणे किं नाम षष्ठांकः?
उत्तरम्- प्रवहणविपर्ययः।
329. प्रश्न- मृच्छकटिकस्य सप्तमांकस्य प्रतिपाद्यविषयः कः अस्ति?
उत्तरम्- आर्यकापहरणम्।
330. प्रश्न- शूद्रकविरचिते वसन्तसेनामोचकनामकः अंकः कः?
उत्तरम्- अष्टमः।
331. प्रश्न- मृच्छकटिके "व्यवहार" -नामकः अंकविशेषः कः?
उत्तरम्- नवमः।

332. प्रश्न- शूद्रकविरचितस्य मृच्छकटिकाख्यप्रकरणस्य दशमांकस्य संज्ञा अस्ति?
उत्तरम्- संहार:।

333. प्रश्न- "न पर्वताग्रे नलिनी प्ररोहति, न गर्दभा: वाजिपुरं वहन्ति" इति सूक्तिसम्बद्धः ग्रन्थविशेष: क:?
उत्तरम्- मृच्छकटिकम्।

334. प्रश्न- "न भीतो मरणादस्मि केवलं दूषितं यश:" कस्मिन् ग्रन्थेऽस्ति?
उत्तरम्- मृच्छकटिकम्।

335. प्रश्न- शुद्रककविरचितमिदं "मृच्छकटिकम्" किमिति व्यपदिश्यते?
उत्तरम्- प्रकरणम्।

336. प्रश्न- "चारुदत्तकथामाश्रित्य शूद्रककवि रचितमिदं दृश्यकाव्यम्?
उत्तरम्- मृच्छकटिकम्।

337. प्रश्न- अधस्तनयुग्मानां समीचीनां तालिकां पश्यन्तु?
उत्तरम्-1. भवभूति:-उत्तररामचरितम्, 2. कालिदास:-अभिज्ञानशाकुन्तलम्, 3. भट्टनारायण:-वेणीसंहार:, 4. भास:-स्वप्नवासवदतम्।

338. प्रश्न- चारुदत्तस्य निवासस्थानं कुत्र आसीत्?
उत्तरम्- उज्जयिनीनगरे।

339. प्रश्न- नाट्यशास्त्रस्य प्रख्यात-टीका का अस्ति?
उत्तरम्- अभिनवगुप्तस्य अभिनव-भारती।

340. प्रश्न- अधोनिर्दिष्टान् दृश्य श्रव्य-स्तोत्रादिकाव्यनिर्देशनं पूर्वकं दर्शयत?
उत्तरम्-1. दशकण्ठवधम्-काव्यम्। 2. नलचरित्रम्-नाटकम्। 3. युधिष्ठिरविजयम्-यमककाव्यम्। 4. मेघदूतम्-गीतिकाव्यम्। 5. नैषधीयचरितम्-महाकाव्यम्। 6. सौन्दर्यलहरी- स्तोत्रकाव्यम्। 7. रत्नावली-नाटिका।

341. प्रश्न- "हृदये गृह्यते नारी" इयं सूक्ति: कस्मात् ग्रन्थात् उद्धृत:?
उत्तरम्- मृच्छकटिकात्।

342. प्रश्न- शूद्रक: क: आसीत्?
उत्तरम्- राजा।

343. प्रश्न- मृच्छकटिकम् इति ग्रन्थे कति श्लोका: विद्यन्ते?
उत्तरम्- 380 श्लोका:।

344. प्रश्न- मृच्छकटिकम् इत्यस्य प्रतिनायक: क:?
उत्तरम्- शकार:।

345. प्रश्न- "सर्वत्रार्जवं शोभने" अनया सूक्त्या: सम्बद्धा: रचना का?
उत्तरम्- मृच्छकटिकम्।

346. प्रश्न- मृच्छकटिकम् नाटके चारुदत्तस्य क: सेवक: द्यूतकरोऽभूत्?
उत्तरम्- संवाहक:।

347. प्रश्न- चारुदत्तस्य गृहे आभूषणानां चौरः कः?
उत्तरम्- शर्विलकः।
348. प्रश्न- श्यालकः(शकारः) कां प्राप्तुमिच्छति?
उत्तरम्- बसन्तसेनाम्।
349. प्रश्न- श्यालकः(शकारः) अन्धरात्रौ बसन्तसेनायाः कैः सह अनुगच्छन्?
उत्तरम्- विट-चिटाभ्यां सह।
350. प्रश्न- अन्धरात्रौ बसन्तसेना कस्य गृहे प्रविष्टा?
उत्तरम्- चारुदत्तस्य गृहे।
351. प्रश्न- द्यूतस्य व्यसनेन त्रस्तः कः बौद्ध-भिक्षुकः अभूत्?
उत्तरम्- संवाहकः।
352. प्रश्न- बसन्तसेनायाः कः ग्रीवां घोटयति स्म?
उत्तरम्- शकारः।
353. प्रश्न- राजानं पालकं हत्वा कः राजा अभूत्?
उत्तरम्- आर्यकः।
354. प्रश्न- चारुदत्तस्य स्थानोपरि कं मृत्युदण्डस्य आज्ञा बभूवः?
उत्तरम्- शकारम्।
355. प्रश्न- मृच्छकटिकम् नाटकस्य प्रारम्भः केन भवति?
उत्तरम्- नान्दीपाठेन।
356. प्रश्न- मृच्छकटिकम् नाटकस्य अन्तः केन भवति?
उत्तरम्- भरतवाक्येन।
357. प्रश्न- चारुदत्तः कीदृशः नायकः?
उत्तरम्- धीरप्रशान्तः।
358. प्रश्न- वसन्तसेनां कः जानाति स्म?
उत्तरम्- संवाहकः।
359. प्रश्न- शकारस्य प्रणयनिवेदनं का अस्वीकरोतिस्म?
उत्तरम्- बसन्तसेना।
360. प्रश्न- मृच्छकटिकम् नाटके हत्यायाः आरोपःकस्योपरि सिद्धो भवति?
उत्तरम्- चारुदत्तोपरि।
361. प्रश्न- मृच्छकटिकम् नाटके शर्विलकस्य प्रेमिका का?
उत्तरम्- मदनिका।
362. प्रश्न- बसन्तसेनायाः दासी का?
उत्तरम्- मदनिका।
363. प्रश्न- चारुदत्तं गृहीत्वा श्मशाने के गच्छन्ति?
उत्तरम्- चाण्डाल-जनाः।

364. प्रश्न- बसन्तसेनाया: विवाह: केन सह भवति?
उत्तरम्- चारुदत्तेन सह।

(ञ) शारिपुत्रप्रकरणस्य वस्तुनिष्ठप्रश्नोत्तराणि-

365. प्रश्न- अश्वघोषस्य आश्रयदाता क: आसीत्?
उत्तरम्- सम्राट कनिष्क:।

366. प्रश्न- अश्वघोषस्य माता का आसीत्?
उत्तरम्- सुवर्णाक्षी।

367. प्रश्न- शारिपुत्रम् इति किम्?
उत्तरम्- प्रकरणम्।

368. प्रश्न- "बालवाल्मीकि:" क: आसीत्?
उत्तरम्- मुरारि:।

369. प्रश्न- अनर्घराघवस्य उपजीव्यं किम्?
उत्तरम्- रामायणम्।

370. प्रश्न- राजशेखरविरचितानि नाटकानि कानि सन्ति?
उत्तरम्- बालरामायणम्, बालभारतम्, कर्पूरमंजरी।

371. प्रश्न- आद्य: नाटककार: क:?
उत्तरम्- भास:।

372. प्रश्न- "छन्दहीनो न शब्दोऽस्ति, न छन्द: शब्दवर्जितम्" कस्य उक्तिरियम्?
उत्तरम्- भरतमुने:।

(ट) मालविकाग्निमित्रस्य वस्तुनिष्ठप्रश्नोत्तराणि-

373. प्रश्न- मालविकाग्निमित्रम् अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- कालिदास:।

374. प्रश्न- मालविकाग्निमित्रम् अस्य ग्रन्थस्य नायक: क:?
उत्तरम्- अग्निमित्र:।

375. प्रश्न- मालविकाग्निमित्रम् ग्रन्थे मालविकाया: नाट्याचार्य: क:?
उत्तरम्- गणदास:।

376. प्रश्न- मालविकाग्निमित्रम् इत्यस्य ग्रन्थस्य विदूषक: क:?
उत्तरम्- गौतम:।

377. प्रश्न- मालविकाग्निमित्रम् इत्यस्य पट्टमहिषी का?
उत्तरम्- धारिणी।

378. प्रश्न- कालिदासस्य धारिणी इत्यस्या: पुत्र: क:?
उत्तरम्- वसुमित्र:।

379. प्रश्न- अग्निमित्रस्य द्वितीया भार्या का?
उत्तरम्- इरावती।

380. प्रश्न-"पुराणमित्येव न साधु सर्वम्, न चापि काव्यं नवमित्यवद्यम्।" कुत्र उद्धृतोऽस्ति?
उत्तरम्- मालविकाग्निमित्रात्।

381. प्रश्न- "मालविकाग्निमित्रम्" अस्मिन् ग्रन्थे कति अङ्काः सन्ति?
उत्तरम्- (5) पञ्चाङ्काः।

382. प्रश्न- "मालविकाग्निमित्रम्" अस्मिन् ग्रन्थे परिव्राजिकायाः रूपे काऽस्ति?
उत्तरम्- कौशिकी।

383. प्रश्न- "मालविकाग्निमित्रम्" अस्मिन् ग्रन्थे धारिणीइत्यस्याः कान्या का?
उत्तरम्- वसुलक्ष्मी।

384. प्रश्न- श्लिष्टाक्रिया कस्य चिदात्मसंस्था संक्रान्तिरूपस्य विशेषयुक्ता" इयमुक्तिः मालविकाग्निमित्रस्य कस्मिन् अङ्केन सम्बद्धोऽस्ति?
उत्तरम्- प्रथमाङ्के।

(ठ) विक्रमोर्वशीयस्य वस्तुनिष्ठप्रश्नोत्तराणि-

385. प्रश्न- विक्रमोर्वशीयम् अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- कालिदासः।

386. प्रश्न- विक्रमोर्वशीयम् अस्य ग्रन्थस्य नायकः कः?
उत्तरम्- पुरुरवा।

387. प्रश्न- विक्रमोर्वशीयम् ग्रन्थे कति अङ्काः सन्ति?
उत्तरम्- (5) पञ्च।

388. प्रश्न- विक्रमोर्वशीयम् इत्यस्याः का विधा अस्ति?
उत्तरम्- त्रोटकः।

389. प्रश्न- विक्रमोर्वशीयम् अस्य ग्रन्थस्य विदूषकः कः?
उत्तरम्- माणवकः।

(ड) स्वप्नवासवदत्तस्य वस्तुनिष्ठप्रश्नोत्तराणि-

390. प्रश्न- उदयनस्य (स्वप्नवासवदत्ते) शत्रुः कोऽस्ति?
उत्तरम्- आरुणिः।

391. प्रश्न- वासवदत्तायाः मातुरभिधानं किमस्ति?
उत्तरम्- अंगारवती।

392. प्रश्न- "वासवदत्ता" विक्रमबाहोः सिंहलेश्वरस्य का अस्ति?
उत्तरम्- मातुलपुत्री।

393. प्रश्न- उदयनस्य प्रथमविवाहिता पत्नी का अस्ति?
उत्तरम्- वासवदत्ता।

394. प्रश्न- वत्सराज-उदयनस्य कञ्चुकी कः?
उत्तरम्- वाभ्रव्यः।

395. प्रश्न- कौशाम्बीनरेशस्य वत्सराज-उदयनस्य मन्त्री कः?
उत्तरम्- यौगन्धरायणः।

396. प्रश्न- सिंहलेश्वरस्य विक्रमवाहोः मन्त्री कः?
उत्तरम्- वसुभूतिः।

397. प्रश्न- वासवदत्तायाः धात्री काऽस्ति?
उत्तरम्- वसुन्धरा।

398. प्रश्न- घोषवती वीणायाः सम्बन्धः केन सह विद्यते?
उत्तरम्- स्वप्नवासवदत्तेन सह।

399. प्रश्न- नाटके कति अंकाः भवन्ति?
उत्तरम्- (5-10)

400. प्रश्न- नाटके एक एव भवेदङ्गी किम्?
उत्तरम्- शृंगारो वीर एव वा।

401. प्रश्न-रूपकस्य कति भेदाः भवन्ति?
उत्तरम्- (10) दश।

402. प्रश्न- स्वप्नवासवदत्तस्य नायकः कः?
उत्तरम्- उदयनः।

403. प्रश्न- स्वप्नवासवदत्तस्य नायिका का?
उत्तरम्- वासवदत्ता।

404. प्रश्न- वसन्तकयुतं नाटकं किमस्ति?
उत्तरम्- स्वप्नवासवदत्तम्।

405. प्रश्न- स्वप्नवासवदत्तस्य नाटकस्य स्वप्नांकः कः?
उत्तरम्- पञ्चमः।

406. प्रश्न- वत्सराज-उदयनस्य मन्त्री कः अस्ति?
उत्तरम्- यौगन्धरायणः।

407. प्रश्न- "पद्मावती" कस्य पुत्री आसीत्?
उत्तरम्- मगधनरेशस्य।

408. प्रश्न- "वासवदत्ता" कस्य पुत्री अस्ति?
उत्तरम्- महासेन-प्रद्योतस्य।

409. प्रश्न-घोषवती वीणा कस्मिन् नाटके प्राप्यते?
उत्तरम्- स्वप्नवासवदत्ते।

410. प्रश्न- स्वप्नवासवदत्ते नाटके अवन्तिका-वेशधारी का अस्ति?
उत्तरम्- वासवदत्ता।

411. प्रश्न- महासेन-प्रद्योतस्य कञ्चुकी कः?
उत्तरम्- रैम्यः।

412. प्रश्न- "दु:खं न्यासस्य रक्षणम्" इति सूक्तियुतं नाटकं किम्?
उत्तरम्- स्वप्नवासवदत्तम्।
413. प्रश्न- "भर्तृस्नेहाद् सा विदग्धात्मदग्धा" उक्तिरियं कुत्र प्राप्यते?
उत्तरम्- स्वप्नवासवदत्ते।
414. प्रश्न- "प्रद्वेषो बहुमानो वा संकल्पादुपजायते" उक्तिरियं कुत्र प्राप्यते?
उत्तरम्- स्वप्नवासवदत्ते।
415. प्रश्न- स्वप्नवासवदत्तम इति ग्रन्थे कस्य अभावो विद्यते?
उत्तरम्- नान्दे:।
416. प्रश्न- लावणक-ग्राम: कुत्र प्राप्यते?
उत्तरम्- स्वप्नवासवदत्ते।
417. प्रश्न- स्वप्नवासवदत्तम इति ग्रन्थे कति अङ्का: सन्ति?
उत्तरम्- (6) षडाङ्का:।

(ढ) अन्य नाटकस्य वस्तुनिष्ठप्रश्नोत्तराणि-

418. प्रश्न- नाटके "प्रवेशकस्य" प्रयोग: कुत्र भवति?
उत्तरम्- द्वयो: अङ्कयो: मध्ये।
419. प्रश्न- "मृगनयना" अत्र त्रिलुप्ता-उपमा दर्शनाय उपर्युक्त विग्रह: क:?
उत्तरम्- मृगस्य नयने इव चञ्चले नयने यस्या: सा "मृगनयना"।
420. प्रश्न- विक्रमोर्वशीयम् इति ग्रन्थे अङ्कानां संख्या का?
उत्तरम्- (5) पञ्च।
421. प्रश्न- अनर्घराघव इत्यस्य लेखक: क:?
उत्तरम्- मुरारि।
422. प्रश्न- अनर्घराघव ग्रन्थे कति अङ्का: सन्ति?
उत्तरम्- (7) सप्त अङ्का:।
423. प्रश्न- अनर्घराघवस्य सप्तमाङ्के रामस्य अयोध्याप्रत्यावर्तनप्रसङ्गे कस्य अनुकरणं कृतं स्यात्?
उत्तरम्- रघुवंशस्य।
424. प्रश्न- भासस्य नाटक: का दृष्ट्या सफलो भवति?
उत्तरम्- कथोपकथन-दृष्ट्या।
425. प्रश्न- "प्रतिज्ञायौगन्धरायण" ग्रन्थे कति अङ्का: सन्ति?
उत्तरम्- (4) चत्वार: अङ्का:।
426. प्रश्न- विद्धशालभञ्जिका" केन रचित:?
उत्तरम्- दिङ्नाग:।
427. प्रश्न- "विद्धशालभंजिकायां कति अङ्का: सन्ति?
उत्तरम्- (4) चत्वार:।

428. प्रश्न- शास्त्रीय-दृष्ट्या "विद्धशालभंजिकायाः का श्रेणी?
उत्तरम्- नाटिका।

5. छन्दः- Metre (Prosody)

(ण) छन्दसः वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- उपलभ्यमानेषु प्राचीनच्छन्दो ग्रन्थः कः?
उत्तरम्- पिङ्गलच्छन्दश्शास्त्रम्।
2. प्रश्न- छन्दसः व्युत्पत्तिजन्यार्थः किमस्ति?
उत्तरम्- "छाद्यतेऽनेनेति च्छन्दः" (आवरणम्)।
3. प्रश्न- वेदपुरुषस्य पादौ कं मन्यते?
उत्तरम्- छन्दः (छन्दः पादौ तु वेदस्य।)
4. प्रश्न- छन्दोवेदाङ्गस्य आधारग्रन्थः कः?
उत्तरम्- छन्दसूत्रम्।
5. प्रश्न- "श्रीकण्ठः" इति कस्य कवेः नाम वर्तते?
उत्तरम्- भवभूतेः।
6. प्रश्न- वृहती छन्दे कति अक्षराणि भवन्ति?
उत्तरम्- 36 षट्त्रिंशत्।
7. प्रश्न- छन्दः सूत्रं कति अध्याये विभक्तः अस्ति?
उत्तरम्- अष्टाध्यायेषु।
8. प्रश्न- छन्दसः सूत्रे कति सूत्राणि सन्ति?
उत्तरम्- (329 सूत्राणि)
9. प्रश्न- छन्दसः सूत्रे कियत पर्यन्तं वैदिकछन्दानां विवेचनमस्ति?
उत्तरम्- प्रथमतः चतुर्थाध्यायस्य सप्तमसूत्रपर्यन्तम्।
10. प्रश्न- वैदिक-छन्दानां प्रतिपादक सूत्राणि कानि?
उत्तरम्- -119 सूत्राणि।
11. प्रश्न- पिङ्गलाचार्यद्वारा केषां छान्दसिकाणां उल्लेखः कृतं स्यात्?
उत्तरम्-(8 अष्ट) 1. क्रौएटुकि, 2. यास्क, 3. ताण्डिक, 4. सैतव, 5. काश्यप, 6. शाकय, 7. माण्डव्य, 8. रात।
12. प्रश्न-येषु के के मूलरूपेण छन्दसः प्रवक्ता सन्ति?
उत्तरम्-1. यास्कः, 2. काश्यपः, 3. ताण्डी, 4. माण्डव्यः।
13. प्रश्न- वैदिक छन्दः विधानानुसारं छन्दसः कति मुख्यभेदाः?
उत्तरम्-त्रयः, 1. गद्यम्, 2. पद्यम्, 3. गीतिछन्दः।
14. प्रश्न- समस्त-वैदिकछन्दसः का संख्या?
उत्तरम्- (26) षड्विंशतिः।

15. प्रश्न- प्रसिद्ध"गायत्री छन्दे" कति अक्षराणि भवन्ति?
उत्तरम्-(24 चतुर्विंशतिः अक्षराणि।)
16. प्रश्न- कतिपय वैदिक-छन्दानां अक्षरविवरणम्?
उत्तरम्-1. गायत्री(24 अक्षराणि) 2. उष्णिक्(28) 3. अनुष्टुप्(32) 4. बृहती(36) 5. पङ्क्त(40) 6. त्रिष्टुप् (44), 7. जगती(48)।
17. प्रश्न- नियत-वर्णव्यवस्थान्विता छन्दं किं कथ्यते?
उत्तरम्- वृत्त।
18. प्रश्न- नियत-मात्रा-व्यवस्थान्विता छन्दं किं कथ्यते?
उत्तरम्- जाति।
19. प्रश्न- ऋग्वेदे कतीनां छन्दानां प्रयोगो भवति?
उत्तरम्- (13 त्रयोदश छन्दानाम्)
20. प्रश्न- ऋग्वेदे त्रयोदश छन्दानां कानि नामानि?
उत्तरम्-1. गायत्री, 2. उष्णिक्, 3. अनुष्टुप, 4. बृहती, 5. पङ्क्ति, 6. त्रिष्टुप, 7. जगती, 8. अति जगती, 9. शक्वरी, 10. अतिशक्वरी, 11. अष्टि, 12. अत्यष्टि, 13. धृति।
21. प्रश्न-यजुर्वेदे कति छन्दांसि प्रयुक्तव्यः?
उत्तरम्-(8 अष्ट) 1. अतिधृति, 2. कृति, 3. प्रकृति, 4. आकृति, 5 विकृति, 6. सङ्कृति, 7. अभिकृति, 8. उत्कृति।
22. प्रश्न- अथर्ववेदे कति छन्दांसि प्रयुक्ते?
उत्तरम्-(5पञ्च) 1. उक्ता, 2. अत्युक्ता, 3. मध्या, 4. प्रतिष्ठा, 5. सुप्रतिष्ठा।
23. प्रश्न- "वक्रोक्तिरेव काव्यस्य जीवितमिति" कस्य मतम्?
उत्तरम्- राजानककुन्तकस्य।
24. प्रश्न- वंशस्य वृत्तस्य प्रत्येकस्मिन् पादे वर्णा भवन्ति?
उत्तरम्- 12 द्वादश।
25. प्रश्न-यस्मिन् छन्दसि प्रतिचरणं चतुर्दशवर्णाः भवन्ति तत्?
उत्तरम्- वसन्ततिलका।
26. प्रश्न- "गङ्गावतरणम्" इति कस्य कवेरस्ति?
उत्तरम्- नीलकण्ठदीक्षितस्य।
27. प्रश्न- कस्मिन् छन्दसि"अष्टमे" तथा "सप्तमे" (वर्णेषु) यतिर्भवति?
उत्तरम्- मालिनी।
28. प्रश्न- "नगणस्य" उदाहरणं किम्?
उत्तरम्- नभसि।
29. प्रश्न- "मगणस्य" उदाहरणे दर्शयत-?
उत्तरम्- काश्मीरः।
30. प्रश्न- वेदपुरुषस्य चलनात्मकं कार्यं केन प्रचलति?
उत्तरम्- छन्दोवेदांगेन।

31. प्रश्न- छन्दोवेदाङ्गस्य आधारग्रन्थः किमस्ति?
उत्तरम्- छन्दसूत्रम्।
32. प्रश्न- सात्त्विक भावेषु किं न गण्यते?
उत्तरम्- विभावः।
33. प्रश्न-यमकानुप्रासयोः समानता अस्ति?
उत्तरम्- द्वयोः वर्णानामावृत्तिर्भवति।
34. प्रश्न- "गतहिमेरिव चित्रविभावरी" -के गणाःअत्र?
उत्तरम्- नगण-भगण-भगण-रगणाः।
35. प्रश्न- "चित्तस्य नो विस्मयमादधाति" अत्रगणान् निर्दिशत?
उत्तरम्- तगणः तगणःजगणः गुरुद्वयम् च।
36. प्रश्न- "पुष्पैः शंसत्यादरं त्वत्प्रयत्ने" अत्र गणाःसन्ति?
उत्तरम्- मगणः तगणः तगणः गुरुद्वयम्।
37. प्रश्न- "नभौ भरौ" -इति कस्य छन्दसः गणसूचनम्?
उत्तरम्- द्रुतविलम्बितम्।
38. प्रश्न- "यमनसभला गः" -कस्य छन्दसःगणनिर्देशनमिदम्?
उत्तरम्- शिखरिणी।
39. प्रश्न- तगण-भगण-जगण-जगण-गुरु-गुरु" एते गणाःकस्मिन् छन्दसि भवन्ति?
उत्तरम्- वसन्ततिलका।
40. प्रश्न- जगण-तगण-जगण-रगणाः- कस्य छन्दसः भवन्ति?
उत्तरम्- वंशस्थ।
41. प्रश्न- "त्रिमुनियतियुता" -अत्र "त्रिमुनि" इत्यनेन का संख्या?
उत्तरम्- 7+7+7=21
42. प्रश्न- "सूर्याश्वैः" -इत्यस्य का संख्या?
उत्तरम्- 12+7=19।
43. प्रश्न- "षड्वेदैर्हयैर्हरिणी" -अत्र "हरिणी" छन्दसः यति संख्या?
उत्तरम्- 6+4+7=17ए
44. प्रश्न- रसैरुद्रैश्चिच्छन्ना-शिखरिणी छन्दसः यति संख्या?
उत्तरम्- 8+11=19ए
45. प्रश्न- वसुग्रहयति- इत्यत्र यतिसंख्यां निर्दिशत-?
उत्तरम्- 8+9=17ए
46. प्रश्न- "छन्द" शब्दस्य यास्कसम्मता व्युत्पत्तिः कास्ति?
उत्तरम्- छन्दांसि छादनात्।
47. प्रश्न- छन्दोवेदांगस्य प्रतिनिधिग्रन्थः" छन्दसूत्रम्" केन प्रणीतम् अस्ति?
उत्तरम्- पिंगलेन।

48. प्रश्न- सर्वाधिक-प्रयुक्तः ऋग्वैदिक-गायत्री-छन्दःकति पदाः विद्यते?
उत्तरम्- त्रिपदाः।
49. प्रश्न- "अनुष्टुप" छन्दसि कति अक्षराणि सन्ति?
उत्तरम्- (32) द्वात्रिंशतिः।
50. प्रश्न- "त्रिष्टुप्" छन्दसि कति अक्षराणि सन्ति?
उत्तरम्- (44) चतुर्चत्वारिंशत्।

6. अलङ्कार-

(त) अलङ्कारस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- "काव्यालंकारसूत्रम्" कस्य कृतिरस्ति?
उत्तरम्- आचार्यवामनस्य।
2. प्रश्न- क्षेमेन्द्रस्य कृतिः किमस्ति?
उत्तरम्- कविकण्ठाभरणम्।
3. प्रश्न- काव्यालंकारसूत्रवृत्तिकारः कः?
उत्तरम्- वामनः।
4. प्रश्न- "अलंकारसर्वस्वम्" कस्य कृतिरस्ति?
उत्तरम्- रुय्यकस्य।
5. प्रश्न- "काव्यालंकारः" कस्य कृतिरस्ति?
उत्तरम्- रुद्रटस्य।
6. प्रश्न- "वाग्भटालंकारः" कस्य कृतिरस्ति?
उत्तरम्- वाग्भट्टस्य।
7. प्रश्न- ध्वन्यालोकः किमस्ति?
उत्तरम्- अलंकारशास्त्रम्।
8. प्रश्न- अभिहितान्वयवादस्य प्रवर्त्तकः कः?
उत्तरम्- कुमारिलः।
9. प्रश्न- "उपमा-उत्प्रेक्षा" -अनयोः समानता का?
उत्तरम्- द्वावपि सादृश्यमूलकौ-अलङ्कारौ।
10. प्रश्न- कस्मिन्नलङ्कारे "मिथ्याज्ञानं" भवति?
उत्तरम्- भ्रान्तिमान्।
11. प्रश्न- "चक्रवालकम्" - इत्यस्य कोऽभिप्रायः?
उत्तरम्- क्षुद्रप्रबन्धइति।
12. प्रश्न- "त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी" -अत्रालङ्कारः कः?
उत्तरम्- उत्पेक्षा।
13. प्रश्न-"पङ्कजं पश्यतस्तस्य मुखं मे गाहते मनः" इति कस्यालङ्कारस्योदाहरणमिदम्?
उत्तरम्- स्मृतिमतः।

14. प्रश्न- "नायं सुधांशुः किं तर्हि? व्योमगङ्गासरोरुहम्" -अत्र कोऽलङ्कारः?
उत्तरम्- अपह्नुतिः।
15. प्रश्न- अलंकारसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्- भामहः।
16. प्रश्न- भामहस्य काव्यशास्त्रीयग्रन्थविशेषः कः?
उत्तरम्- काव्यालंकारः।
17. प्रश्न- आचार्य-भामहस्य निवासस्थानं कुत्रास्ति?
उत्तरम्- कश्मीरः।
18. प्रश्न- काव्यालंकारसूत्रे आचार्यभामहेन वर्णिताः अलंकाराःकति सन्ति?
उत्तरम्- (23) त्रयोविंशतिः।
19. प्रश्न- रीतिसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्- वामनः।
20. प्रश्न- "भावप्रकाशनम्" -किम्? इदम्?
उत्तरम्- अलङ्कारग्रन्थः।
21. प्रश्न- वक्रोक्तिसम्प्रदायस्य प्रवर्तकः कः?
उत्तरम्- कुन्तकः।
22. प्रश्न- काव्यादर्शे कति अलंकाराः विवेचिताः सन्ति?
उत्तरम्- (35) पञ्चत्रिंशत्।
23. प्रश्न- औचित्यसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्- क्षेमेन्द्रः।
24. प्रश्न- "औचित्यविचारचर्चा" कस्य कृतिरस्ति?
उत्तरम्- क्षेमेन्द्रस्य।
25. प्रश्न- वक्रोक्तेः समस्तालङ्कारमूलवम् इति केन प्रतिपादितम्?
उत्तरम्- भामहेन।
26. प्रश्न- ध्वनिसम्प्रदायस्य प्रवर्तकः आचार्यः कः?
उत्तरम्- आनन्दवर्धनः।
27. प्रश्न- आचार्यवरस्य आनन्दवर्धनस्य उपाधि किम्?
उत्तरम्- राजानकः।
28. प्रश्न- अलङ्कारशास्त्रस्य समस्तसिद्धान्तानां सूत्रात्मकः ग्रन्थोऽस्ति-?
उत्तरम्- काव्यालङ्कारसूत्रम्।
29. प्रश्न- करुणरसस्य वर्णः कः?
उत्तरम्- कपोतः।
30. प्रश्न- "यत्र कारणं विना कार्योत्पत्तिर्भवति" -तत्र कोऽलङ्कारः?
उत्तरम्- विभावना।

31. प्रश्न- वीररसस्य स्थायीभाव: क:?
उत्तरम्- उत्साह:।
32. प्रश्न- वाच्यार्थप्रतिपादिका शक्ति: का भवति?
उत्तरम्- अभिधा।
33. प्रश्न- काव्यं ग्राह्यमलंकारात्" कस्येदं वचनम्?
उत्तरम्- आचार्य वामनस्य।
34. प्रश्न- वामनस्य दृष्टिये अलंकार: क:?
उत्तरम्- सौन्दर्यमलङ्कार:।
35. प्रश्न- वामनस्य "रीतिरात्मा काव्यस्य" इति वचने रीति: इत्यस्य कोऽर्थ:?
उत्तरम्- विशिष्टा पदरचना रीति:।
36. प्रश्न- भोजराज: स्व "सरस्वतीकण्ठाभरण" ग्रन्थे कति अलंकारा: वर्णितमस्ति?
उत्तरम्- (72) द्विसप्तति अलंकारा:।
37. प्रश्न- प्रश्न शृंगारप्रकाश" कस्य रचना अस्ति?
उत्तरम्- भोजराजस्य।
38. प्रश्न- मम्मट: शब्दालंकारा: कति स्वीकरोति?
उत्तरम्-5 पञ्च-अलंकारा:, 1. अनुप्रास:, 2. यमक:, 3. वक्रोक्ति:, 4. श्लेष:, 5. चित्रम्, 6. पुनरुक्तवदाभास:।
39. प्रश्न मम्मट: उभयालंकारा: कति स्वीकरोति?
उत्तरम्- 1 एकम्।
40. प्रश्न मम्मट: अर्थालंकारा: कति स्वीकरोति?
उत्तरम्- (67) सप्तषष्टि:।
41. प्रश्न मम्मटेन केषां चित्रालंकारानां वर्णनं क्रियते?
उत्तरम्-(4 चत्वार:) 1. खड्बन्धमुरजबन्ध:, 3. पद्यबन्ध:, 4. सर्वतोभद्र:।
42. प्रश्न काव्यालंकारसंग्रह इत्यस्य लेखक: क:?
उत्तरम्- उद्भट्ट:।
43. प्रश्न- आचार्य राधावल्लभ त्रिपाठीमहोदयेन काव्यात्मा कां मन्यते?
उत्तरम्- अलंकारम्।
44. प्रश्न- आचार्य राधावल्लभ त्रिपाठीमहोदयेन कस्मिन् रूपे अलंकारं मन्यते?
उत्तरम्- "अलंभूषणवारणपर्याप्तिषु"।
45. प्रश्न- भूषणरूपे अलंकारं केन लोकेन सह सम्बद्ध:?
उत्तरम्- अधिभौतिक जगतेन।
46. प्रश्न- "सिद्धान्तलेशसंग्रह:" इति वेदान्तग्रन्थं क आलङ्कारिक: रचितवान्?
उत्तरम्- अप्पयदीक्षित:।
47. प्रश्न- वारणरूपे अलंकारं केन लोकेन सह सम्बद्ध:?
उत्तरम्- अधिदैविकलोकेन।

48. प्रश्न- बीभत्सस्य स्थायी भाव:किम्?
उत्तरम्- जुगुप्सा।
49. प्रश्न- जातकालंकारस्य लेखक: क:?
उत्तरम्- गणेश:।
50. प्रश्न- "निर्वास्यत: प्रदीपस्यशिखेव जरतो मति:" अत्र क: अलंकार:?
उत्तरम्- उपमा- अलंकार:।
51. प्रश्न-काव्यप्रकाशस्य नवमोल्लासस्य किं नाम?
उत्तरम्-शब्दालङ्कारनिर्णयात्मक:।
52. प्रश्न- "लिम्पतीव तमोऽङ्गानि, वर्षतावाञ्जनं नभ:। असत्पुरुषेवेव, दृष्टिर्विफलतां गता।।"
अस्मिन् श्लोके क: अलंकार:?
उत्तरम्- उत्प्रेक्षा- अलंकार:।
52. प्रश्न- "सुरभिं सुरभिं सुमनोहरै:" अत्र क: अलंकार:?
उत्तरम्- "यमक" अलंकार:।
53. प्रश्न-"प्रतिकूलतानुपगते हि विधौ, विफलत्वमेति बहुसाधनता" अस्मिन् वाक्ये क: अलंकार:?
उत्तरम्- श्लेषालंकार।
54. प्रश्न-"क्व सूर्य प्रभवो वंश:क्व चाल्पविषयामति:" इदं उदाहरणं कस्य अलंकारस्य विद्यते?
उत्तरम्- निदर्शना-अलंकारस्य।
55. प्रश्न- श्लेषस्य कति भेदा: भवन्ति?
उत्तरम्- (2) द्वौ।
56. प्रश्न-य: उपमा दातुं योग्यं स्यात्, स: क: भवति?
उत्तरम्- उपमेय:।
57. प्रश्न-यत्र एक-पदे एकाधिकार्थ: बोधयति स: क: अलंकार:?
उत्तरम्- श्लेषालंकार:।
58. प्रश्न-यदा हेतु भविते सति फलाभाव-अभिलक्षित:, तत्र को अलंकार:?
उत्तरम्- विशेषोक्ति:।
59. प्रश्न- शब्दपरिवृत्ति असहिष्णुत्व कुत्र प्राप्तो भवति?
उत्तरम्- शब्दालंकारे।
60. प्रश्न- शब्दशक्ति: कति भवति?
उत्तरम्- (3) तिस्र:।
61. प्रश्न- विश्वनाथ: वक्रोक्तिं कस्मिन् रूपे मन्यते?
उत्तरम्- अलंकाररूपे।
62. प्रश्न- "तद्रूपकमभेदो य उपमानोपमेययो:" कस्य अलंकारस्यलक्षणम्?
उत्तरम्- रूपकस्य।

63. प्रश्न- "सन्देह प्रकृतेऽन्यस्य संशय:प्रतिभोत्थित:" कस्य अलंकारस्य लक्षणमिदम्?
उत्तरम्- सन्देहस्य।
64. प्रश्न- आचार्य उद्भट द्वारा विवेचित अलंकाराणां का: संख्या?
उत्तरम्- (41) एकचत्वारिंशत्।
65. प्रश्न- "अलंकार-सम्प्रदायस्य प्रवर्तक: क:?
उत्तरम्- अग्निपुराणकार:।
66. प्रश्न- कति सूत्राणि सन्ति "काव्यालंकारसूत्रम्" नामक ग्रन्थे?
उत्तरम्- 319 सूत्राणि।

TOTAL- 1793

• • •

4
ज्योतिषाम्

(क) ज्योतिष-शास्त्रस्य परिचय-

कालात् प्रसूतमिदं विश्वं काले एव परिवर्द्धितं परिचालितञ्च। कालं विहाय कोऽपि जीवः जगति स्थातुं न शक्नोति। तादृशस्य कालस्य ज्ञानं ज्योतिशास्त्रं विना न भवितुमर्हति, अतः भास्कराचार्येण ज्योतिशास्त्रस्य व्याख्यानावसरे "कालतन्त्रं जगुः" इत्थं परिभाषितम्। ज्योतिष-शास्त्रं भारतीय-विद्यायाः महत्त्वपूर्णम् अङ्गमस्ति। "ज्योतिषां सूर्यादि ग्रहाणां बोधकं शास्त्रम्" वर्तते। "नभोमण्डले स्थित-ज्योतिः पिण्डसंवद्धाः विद्याः ज्योतिर्विद्याः" इति मन्यते। वेदाङ्गज्योतिषे आचार्य-लगमेनापि उक्तं यत्-वेदाः यज्ञार्थमभिप्रयुक्ताः, यज्ञादयः कालमपेक्षन्ते, कालो ज्योतिषशास्त्रस्य विषयः। अतः कालविधानशास्त्रं ज्योतिषम् इति नाम्ना प्रसिद्धम्। यथा अथर्ववेदे-

पूर्णः कुम्भोऽधिकालः अहिस्तत् पश्यामो बहुधा नो सन्तः।
य इमा विश्वानि भुवनानि प्रत्यङ्गकालस्तमाहुः परमे व्योमन्।।

कालज्ञापकमिदं शास्त्रं मयूराणां शिखा, नागानां मणिरिव वेदाङ्गेषु मूर्ध्नि स्थितम्, इति सोमाकरभाष्ये प्रतिपातिम्। यथा-

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनिस्थितम्।

(वेदाङ्ग-ज्योतिषम्)

ज्योतिषं ज्ञान(वेद) शरीरस्य नयनं वर्तते। नेत्राभावे शरीरस्य अपूर्णता व्यर्थता च भवति। इदं ज्योतिष-शास्त्रं कालविज्ञापकं शास्त्रम्। मुहूर्त्तं शोधयित्वा क्रियमाणा-यज्ञादिक्रिया- विशेषाः सत् फलाय कल्पन्ते। अतोऽस्य ज्यौतिष-शास्त्रस्य वेदाङ्गत्वं स्वीकृतम्। यथा-

वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं काल विधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्।।

(वेदाङ्गज्योतिषः)

ज्योतिःशास्त्रं तु वेदस्य नेत्रस्थानीयमस्ति, यथोक्तं पाणिनीयशिक्षायां "ज्योतिषामनयनं चक्षु"। ज्योतिषज्ञानं विना अहोरात्र-पक्ष-मास-ऋतु-संवत्सराणां शुभत्वाशुभत्वज्ञानमपि सम्भवं नास्ति।

किम्बहुना यज्ञसम्पादनाय यात्रादिकसम्पादनाय चापि ज्योतिषः आवश्यकता भवत्येव। वैदिकसंहितासु कालविभागः सर्वत्र समुपलभ्यते एव।

(ख) ज्योतिषशास्त्रस्य निर्वचनानि-

1. "सूयादिग्रहचारेणाधारीकृत्य निर्मितं शास्त्रं ज्योतिषम्" -नृसिंहदैवज्ञः।
2. "ज्योर्तीषि ग्रहनक्षत्राण्यधिकृत्य कृतो ग्रन्थो ज्योतिषम्" सिद्धान्तशिरोमणिटीकायाम्।
3. "ज्योतिष्=पिण्डानि प्रतिपाद्यन्ते यस्मिन् तत् ज्योतिषमिति" आचार्यमुरलीधरः।
4. "ज्योर्तीषि ग्रहनक्षत्रादीनधिकृत्य कृतो ग्रन्थो ज्योतिष इति" अमरकोषः।
5. वेद अस्माकं ज्ञानमूलं कर्ममूलञ्च, तत्रोक्तज्ञानादयः यज्ञादयाश्च कालाश्रिताः, अतः ज्योतिषशास्त्रं कालविधानशास्त्रम् अस्ति। (आचार्यलगमेन प्रोक्तम्)
6. "यो ज्योतिषं वेत्ति नरःस सम्यक् धर्मार्थकामान् लभते यशश्च" (भास्करेण प्रोक्तं सि. शिरो.)

(ग) ज्योतिषशास्त्रस्य वैदिकभेदाः-

ज्योतिषवेदाङ्गस्य द्वौ ग्रन्थौ उपलभ्येते। चतुर्णामपि वेदानां पृथक्-पृथक् ज्योतिष-शास्त्रमासीत्। यथा-

(1) ऋग्वेदस्य ज्योतिषशास्त्रम्-आर्च ज्योतिषम्, षट्त्रिंशत्पद्यात्मकम्।

(2) यजुर्वेदस्य ज्योतिषशास्त्रम्-याजुष-ज्योतिषम्, ऊनचत्वारिंशत् पद्यात्मकम्।

(3) सामवेदस्य ज्योतिषशास्त्रम्--नोपलभ्यते।

(4) अथर्ववेदस्य ज्योतिषशास्त्रम्-आथर्वण ज्योतिषम्, द्विषष्ट्युत्तरशत पद्यात्मकम्।

एतेषां त्रयाणामपि ज्योतिषाणां प्रणेता लगधो नामाचार्यः। तत्र याजुषज्योतिषस्य प्रामाणिकं भाष्यद्वयमपि प्राप्यते। एकं सोमाकर विरचितम्, द्वितीयं सुधाकर द्विवेदी कृतम्। एतस्य ज्योतिषशास्त्रस्य वर्त्मत्रयं वर्तते। तदिदं शास्त्रं त्रिस्कन्धमुच्यते। तदुक्तम्-

सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।
वेदस्यनिर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम्।।

(घ) ज्योतिषशास्त्रस्योत्पत्ति-

संस्कृतवाङ्मयान्तरस्येव ज्योतिषशास्त्रस्योत्पत्तिरपि ब्रह्मण एवाभूदिति सर्वथा विश्वस्यते। ब्रह्मा हि पितामहोऽस्य जगतः यज्ञसाधननिमित्तं चतुर्भ्यो मुखेभ्यश्चतुर एव वेदान् प्रावोचत्। तेन हि वेदानां यज्ञात्मकत्वम्। ते च यज्ञाः कालाश्रयेणैव सिद्ध्यन्ति इति तत्सिद्ध्यर्थं ब्रह्मा कालावबोधकं ज्योतिषशास्त्रं विनिर्माय नारदाय प्रोवाच। नारदश्च शास्त्रस्यास्य महत्त्वमङ्गीकृत्य लोके प्रपर्तयामासेदम्।

ज्योतिषशास्त्रप्रवर्त्तकाः अष्टादशाचार्या-

सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः,
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।

लोमशःपौलिशश्चैव च्यवनो यवनो भृगुः,
शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्त्तकाः।।

(आचार्यकश्यपः, भा. ज्यो.)

(ङ) ज्योतिषशास्त्रस्य प्रयोजनानि-

मानवस्य बहुविधकार्यस्य सिद्धिर्जायते। कृषिकर्मणि बीजवपननादारभ्य सस्यकर्त्तनं यावज्ज्योतिषशास्त्रस्य आवश्यकता पदे-पदे अनुभूयते। एवं च ग्रहग्रहणसंक्रान्ति-यज्ञव्रतोद्वाहादि-क्रियाणां सिद्धिः निर्णयश्च ज्योतिषशास्त्रेणैव सम्भवति। यथा-

ग्रहग्रहणसंक्रान्तिर्यज्ञाध्ययनकर्मणाम् ।
प्रयोजनं व्रतोद्वाहक्रियाणां कालनिर्णयः।।

(ज्योतिषबोधे पं. कमलाकान्तठाकुरः)

नारदेन प्रोक्तं यत् सर्वाः श्रौतस्मार्तक्रियाः ज्योतिषं विना न सिद्ध्यन्ति। यथा-

वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमकल्मषम्।
विनैतदखिलं कार्यं श्रौतस्मार्तं न सिद्ध्यति।।

(नारदसंहिता-1/6)

आचार्यभटोत्पलेनापि बृहत्संहितायां प्रयोजनावसरे सर्वमपि समुपस्थापितम्। यथा-

सर्वारम्भश्च जगतो लोके च विविधाः क्रियाः।

आर्यभट्ट, वराहमिहिर, भास्कराचार्य, इत्यादिभिःपुरुषप्रणीतग्रन्थैश्च शास्त्रमिदं समृद्धं वर्त्तते। अत्र प्रश्नशकुनजातकताजिकमुहूर्त्तादि विषयकप्रतिपादकाः ग्रन्थाः अस्य शास्त्रस्य पोषकाः एव।

(1) गणितफलितयोः विज्ञानस्य समन्वयः वर्त्तते।

(2) खगोल-ज्ञानस्य चर्चा वर्त्तते।

धर्म-अर्थ-कामसाधकम् इदं ज्योतिषशास्त्रं नूनं लोके महत्त्वपूर्णमिति। "धर्मार्थकामाः सममेव सेव्या यो ह्येकभक्तः स नरो जघन्यः" इति। धर्मानुरोधेनार्थस्यानुरोधेन कामस्य मोक्षानुरोधेन सर्वेषामुपयोग एवास्य परमः संदेशः। न केवलम् इदं शास्त्रमेव लोकोपकारकम् अपितु ज्योतिषशास्त्रस्य दर्शनम् अपि पापनाशकं भवति। यथा-

दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता, त्रिदिवजनितदोषं तन्त्रविज्ञः स एव।
करणभगणवेत्ता हन्त्यहोरात्रदोषं, जनयति च ह्यघमास्तत्र नक्षत्रसूचीः।।

अर्वाचीनज्योतिर्विज्ञानस्य मतमति यत् ज्योतिषशास्त्रेण लोकोपरि महत् उपकारः कृतः, अङ्कगणितबीजगणित-रेखागणित-दशमलवादीनामाकारप्रकाराः पाश्चात्यदेशेषु विभिन्नरूपेण अगच्छन्, तेन ज्योतिषशास्त्रम् आयुर्वेदश्च विशेषरूपेण प्रभावितौ बभूवतुः।

(च) ज्योतिषशास्त्रस्य भेदा-

ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं।
तत्कात्स्न्योंपनयनस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।।

स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ।
होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।।

(बृहत्संहिता-919)

गणितं जातकं शाखा यो वेतिद्विजपुङ्गवः।
त्रिस्कन्धो विनिर्दिष्टः संहितापारगश्च सः।।

(बृहत्संहिता भटोत्पल टीकायाम्)

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।
केरलिः शकुनञ्चेति ज्योतिः शास्त्रमुदीरितम्।।

(ज्योतिर्निबन्धानली)

(1) स्कन्धत्रयं-"होरा, सिद्धान्त, संहिता" वर्त्तते।

प्राचीनकालतः ज्योतिषशास्त्रे स्कन्धत्रयं भेदमुपस्थापितम् आचार्यैः। वराहमिहिरेणापि स्कन्धत्रयं बहुषु भेदेषु स्वीकृतम्। आचार्यगर्गेणाऽपि गणित-जातक-संहितेति भेदाः गृहीताः। नारदेनाऽपि स्कन्धत्रयं स्वीकृतम्। केषाञ्चिन्मतमिदं यत् ज्योतिषस्य न केवलं त्रय एव स्कन्धा अपितु शास्त्रमिदं पञ्चस्कन्धात्मकमपि। तत्र अधिक स्कन्धद्वयं केरलिः शुकुनञ्चेति। एतेषां स्कन्धानां विश्लेषणेन इदानीं काले मनोविज्ञानं, जीवविज्ञानं, पदार्थविज्ञानं, रसायनविज्ञानं, चिकित्सा-शास्त्रम् इत्यादयः अस्मिन् स्कन्धत्रये अन्तर्भूताः भवन्ति। आदिकालस्यान्ते ज्योतिषशास्त्रस्य "गणित, सिद्धान्त, फलित" इति त्रयोभेदाः स्वतन्त्र-रूपेण प्रस्फुटिताः संजाताः। ग्रहाणां गति-स्थिति-अयनांश-पातादि गणितज्योतिष- शास्त्रस्य एवंच शुभाशुभ-समयस्य निर्णय-विधायकः यज्ञ-यागादि-कार्यार्थं समयस्य स्थानस्य च निर्धारणं फलित-ज्योतिषशास्त्रस्य च विषयोऽस्ति।

(2) विराट स्कन्धपञ्च-

"होरा, सिद्धान्त, संहिता, प्रश्न, शकुन" रूपं वर्त्तते।

विराटपंचस्कन्धात्मकस्य विवेचनम्-

(क) होरा-(जातकशास्त्रम्)

होरा शब्दस्य उत्पत्तिः "अहोरात्र" शब्द द्वारा भवति। आदौ अकारस्य अन्ते त्रकारस्य लोपे सति "होरा" इति शब्दः आद्यन्तवर्णलोपाद्घोराभवत्यहोरात्रदिति वराहमिहिरस्य वचनेन सिद्ध्यति। "कललघनाङ्कुरास्थि" इत्यादितः आरम्भ मृत्युपर्यन्तं मानवस्य सर्वाऽपि शुभाशुभकालकलना अत्रोपलभ्यते। इदं होराशात्रं प्रतिक्षणं लोकोपकारः करोति। रुग्णजनानां ग्रहचिकित्सामाध्यमेन उपचारः, अरिष्टग्रस्तानाम् अरिष्टशमनोपायः, विविध-अशुभयोगस्य निर्धारणं होराशास्त्रमाध्यमेन क्रियते। अस्मिन् शास्त्रे जन्मकुण्डलीयस्थ-द्वादशभावगत- ग्रहाणां स्थितिः, युति दृष्ट्यादीनां विस्तृतविवेचनं दृश्यते। मानवजीवनस्य सुख-दुःख- इष्ट-अनिष्ट-उन्नति अवनति-भग्योदयानां चर्चा अस्मिन् स्कन्धे भवति।

ज्योतिर्विद्भिः होराशास्त्रं पञ्चभेदाः निर्धारयन्ति। 1. जातकं, 2. ताजिकं, 3. रमलं, 4. प्रश्नः, 5. स्वप्नश्चेति।

1. जातकम्–सर्वातिशयित्वेन जातकस्यैव प्राधान्याद्यदा कदा होराशास्त्रमेव जातकशब्देनाऽप्यभिधीयते। यत्र तत्र जन्मकालग्रहनक्षत्रतिथिराश्यादीनाधारीकृत्य भूतवर्तमानभाविशुभाशुभफलादेशःक्रियते तज्जातकम्। जातकसम्बद्धग्रन्थाश्च बृहज्जातकादयः।

2. ताजिकम्–यथा हि जातकं होराशास्त्रस्य प्रथमो भागस्तथैव ताजिकमस्यापरो भागः। यत्र च गोचरमाधारीकृत्य फलादेशः क्रियते तत्ताजिकम्। ताजिकतित्यपेक्षायामुच्यते ताजिकं नाम वार्षिकादिनानाविधफलादेशफलकशास्त्रमेव। ताजिकग्रन्थाश्च ताजिकनीलकण्ठीप्रभृतयः। यथोक्तं पाराशरशास्त्रे–

आकाशे यानि दृश्यन्ते ज्योतिर्विम्बान्यनेकशः।
तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित्।।
तानि नक्षत्रनामानि स्थिरस्थानानि यानि वै।
गच्छन्तो भानि गृह्णन्ति सततं ये तु खेचराः।।

(3/2-4)

सामान्यतस्ताजिकशास्त्रे संज्ञातन्त्रं वर्षतन्त्रं प्रश्नतन्त्रञ्चेति त्रीणि विषयाणि निरूपितानि दृश्यन्ते। समरसिंहप्रणीतो गन्थ्रः "ताजिकतन्त्रसारः" विद्यते। अस्य 1356 शके लिखिता प्रतिलिपिर्लभ्यते।

3. सामुद्रिकशास्त्रम्– सामुद्रिकशास्त्रमपि होराशास्त्रस्य प्रसिद्धमङ्गान्तरम्। समुद्रे प्रोक्तं लक्षणं सामुद्रमिति भट्टोत्पलः। यत्र हि नराणामङ्गादिवशात् फलादेशः क्रियते तत्सामुद्रिकमिति। तत्रोक्तं यज्ज्ञानमिदं श्रीमता सामुद्रेण मुनिना प्रवर्तितं नारदगग्रपराशरादिभिर्व्याख्यातं विस्तारितञ्च।

4. प्रश्नतन्त्रम्–प्रश्नतन्त्रं हि होराशास्त्रस्यापरमङ्गम्। प्रश्नलग्नमाधारीकृत्य फलादेशकशास्त्रमेव प्रश्नशास्त्रमित्युच्यते। वस्तुतस्त्वयं तात्कालिकशास्त्रम्। एकतः प्रश्नतन्त्रं हि जातकशास्त्रे ताजिकशास्त्रे च परिशिष्टरूपेणापि विवेचितं दृश्यतेऽपरतः सन्त्यस्यापि स्वतन्त्रग्रन्था अपि। अस्योत्पत्तिमादाय ताजिकनीलकण्ठ्यामुक्तम्–

दैवज्ञस्य हि दैवेन सदसत्फलवाञ्छया।
अवश्यं गोचरे मर्त्यः सर्वः समुपनीयते।।
अश्रौषीच्च पुरा विष्णोर्ज्ञानाय समुपस्थितः।
वचनं लोकनाथोऽपि ब्रह्मा प्रश्नादिनिर्णयम्।।

अथैतद्विषयस्य कतिपये ग्रन्था अत्र सारतः स्मर्यन्ते। नारदप्रणीत-प्रश्ननारदी, भट्टोत्पलप्रणीत-प्रश्नज्ञानम्, नृसिंहप्रणीत-प्रश्नसारः 1550 शके, 1670 शके परमानन्दपाठकेन प्रणीतः प्रश्नमाणिक्यमाला इति।

5. ग्रहाणां मानवजीवने प्रभावः-"यत् पिण्डे तद् ब्रह्माण्डे" इति सिद्धान्तेन न खलु दार्शनिकपक्षाणामेव सिद्धिर्भवति अपितु ज्योतिर्पिण्डानां ब्रह्माण्डान्तर्गतानां प्रभावानामपि सिद्धिर्भवति। केनापि सत्यमुक्तं यत् -"ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्"। खस्थानां पिण्डानां भूस्थितजनैः सह सम्बन्धः सहसा न प्रतीतिमायाति परं तयोरविच्छिन्नः सम्बन्धोऽस्त्येव यथार्थतः शास्त्रप्रमाणात्। "यः गतिमान् स ग्रहः" आकाशस्थसमस्य ज्योतिर्पिण्डानां प्रभावः अशेषचराचराणामुपरि स्वाभाविकः एव।

(6) **भावफलविचार:**-भारतीयज्योतिषशास्त्रस्य फलितविभागे फलादेशार्थम् एका सरणिबद्धा परम्परा विधिश्च वर्तते, यै: न केवलं मानवस्यैवापितु चराचरस्य जगति कीदृशं कदा च किम् फलं भविष्यतीति सर्वं विचार्यते। अत्र मानवजीवनस्य प्रमुखतात्त्विकविषया: द्वादशभावेषूपनिबद्धा: सन्ति। अयं भाव: स्थिररूपेण शास्त्रेऽस्मिन् परिगण्यते, यस्य गणना लग्नात् भवति अर्थात् यस्मिन् लग्ने कोऽपि जातक: जन्म गृह्णाति तदेव प्रथमो भावनाम्ना ख्यात:।



(ख) सिद्धान्तशास्त्रम्-

अस्मिन् स्कन्धे गणितसिद्धान्तयो: प्रतिपादनं भवति। खगोलीयज्योतिष्पिण्डानां गति-स्थितिकक्षा-युगादिव्यवस्था-नवविधकालमानानि च इदानीमपि लोकव्यवस्थाया: कृते महत्त्वपूर्ण: विद्यते। लोके चमत्कृति: सूर्य-चन्द्रयो: ग्रहणं, तज्जन्यशुभाशुभनिर्धारणं लोकोपकारकमेव। सूर्योदय सूर्यास्तयो:परिगणना चराचराणां कृते महदुपकारी दृश्यते। एवं भूतमिदं शास्त्रं खगोलीयपिण्डानां प्रत्येकक्षणस्य वैशिष्ट्यं जगति विशेषेणोपस्थापयति। यथा-

(1) व्यक्त-अव्यक्त-गणितस्य प्रतिपादनम्।

(2) विविध-प्रश्नोत्तरविधि:।

(3) ग्रह-नक्षत्राणां स्थिति:।

(4) तुरीय-नालिकादि यन्त्राणां वर्णनम्।

(5) दिग्-देश-काल-ज्ञानस्य उपाया:।

(6) अक्षक्षेत्र-सम्बन्धि-अक्षज्या, लम्बजा, द्युज्या, कुज्या, तदधृति, समशंकु इत्यादीनां साधनम्।

(7) गणितस्य-सिद्धान्त:, तन्त्र:, करणम् इति त्रयो भेदा: सन्ति।

(छ) सिद्धान्तज्योतिषस्य तात्त्विक-समीक्षणम्-

(क) देशान्तरसंस्कार:-देशयो: अन्तरं देशान्तरमिति। अत्र कयो: देशयो:? इत्यत्र रेखादेशस्वदेशयो: पूर्वापरमन्तरं देशान्तरपदेनाभिधीयते। सीताराम झा महाभागै: कथितं यत्-"भूमौ

तिष्ठति यो यत्र पृष्ठस्थानं तदुच्यते। स्वदेशोऽपि स एवास्य" कपिलेश्वरः उक्तं यत्-रेखादेशस्वदेशयोः पूर्वापरमन्तरमेव योजनात्मकं देशान्तरम्।

(ख) अधिमासः-अधिको मासः इत्यधिमासः। अर्थात् चैत्रादिद्वादशमासेभ्योऽतिरिक्तत्वात् अधिमासः वक्तव्यः। अस्य अपरो नाम मलमासः मलमासोऽयं सौरचान्द्रमानयोः विकारः इति। "मलं वदन्ति कालस्य मासं कालविदोऽधिकम्" इति गृहीतम्। त्याज्यकर्माणि-

माङ्गल्यमभिषेकश्च मलमासे विवर्जयेत्।
त्यजेद्दानं महादानं व्रतं देवविलोकनम्।।
वापीकूपतडागादिप्रतिष्ठां यज्ञकर्म च।

(ग) क्षयमासविचारः-क्षयो मास इति अर्थात् यस्मिन् चान्द्रमासे रवेः द्विसंक्रान्तिः जायते स क्षयाख्यः मासः भवतीति, अत्र क्षयाख्यः संज्ञा भवतीति। भास्करेण प्रोक्तम्-

असंक्रान्तिमासोऽधिमासः स्फुटः स्यात्।
द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्।।
क्षयः कार्तिकादित्रये नान्यतः स्यात्,
तदा वर्षमध्येऽधिमासद्वयञ्च।।

(घ) अहर्गणः-अह्नां गणः अहर्गण इति। सिद्धान्तज्योतिषशास्त्रस्य मूलभूतप्रयोजनानि ग्रहाणां साधनानि एव अस्माकं महर्षयः दिव्यज्ञानेन सततावेक्षणपद्धत्या (वेधेन) च ग्रहाणाम् आनयनं कृतमस्ति।

(ङ) मध्यमग्रहः-मध्यममानेनागतो ग्रहः मध्यमग्रहः। ग्रहाः स्वस्वप्रतिवृत्ते भ्रमन्ति। तत्र गणितेनानीतफलं कक्षावृत्तीयं भवति। एवमत्र मध्यमः ग्रहः कक्षाप्रमाणकालप्रमाणाभ्यां सिध्यति। एवमेव ग्रहाः कन्दुकः इव मध्यममानात् स्पष्टमानं धारयन्ति।

(च) मन्दफलम्-ग्रहप्रभावस्य भूकेन्द्रातिरिक्तकेन्द्रस्य स्थितिः सम्भवात् फलोत्पत्तिर्भवतीति। गणितागतो मध्यमग्रहो मन्दोच्चेन अपकृष्टो यावदन्तरितो भवति तत् फलं मन्दफलमिति। वस्तुतस्तु ग्रहभमणवृत्तस्य केन्द्रं भूगर्भादन्यत्र भवति। भूस्थो द्रष्टा दृष्ट्युपलब्धं ग्रहं गणितागततुल्यं न पश्यति, तयोरन्तरमेव मन्दकर्मणि मन्दफलमिति।

(छ) शीघ्रफलम्-ग्रहाणां योजनात्मिका गतिः समाना भवति, तद्-तद् गतिवशात् ग्रहा कल्पे युगे वा पूर्वाभिमुखगत्या भ्रमन्ति, तावदेव कल्पभगणं युगभगणं वा। वस्तुतस्तु अहर्गणानुपातेनागतग्रहाः मध्यमाः भवन्ति, तत्र ग्रहाणां स्पष्टीकरणार्थं संस्कारविशेष ज्योतिर्विद्भिः उक्तमस्ति। तत्तु मन्दफलं शीघ्रफलमेव मुख्यरूपेण प्राप्यते। स्पष्टग्रहाः स्वकक्षायां मध्यमग्रहेभ्यो पृथक् भवन्ति, ते कियत् अन्तरं गृह्णन्ति इति फलमेव शीघ्रफलं मन्दफलं च।

(ज) स्पष्टग्रहः-अस्पष्टाः स्पष्टाः क्रियन्ते, तेन फलसंस्कारेण कर्मणा वा तत् स्पष्टकर्म इति। वस्तुतस्तु मध्यमग्रहाः आकाशे प्रत्यक्षतः दृष्टे सति नोपलभ्यन्ते, अतोऽत्र येन संकारविशेषेण मध्यमग्रहाः दृश्ययोग्याः भवेयुः, तदेव स्पष्टसंस्कारः स्पष्टकर्म वा उच्यते। सर्वेऽपि ग्रहाः स्वस्वकक्षावृत्ते प्रतिक्षणं समागतियोजनैः भ्रमन्ति। परन्त्वत्र भूवासिभिः यदा प्रत्यक्षतः दृश्यन्ते

तदेव गणितस्योपादेयतां सिध्यति। यथा भास्करैः-"भ्रमन्ग्रहस्वप्रतिमण्डले नृभिः स यत्र कक्षावलये विलोक्यते। स्फुटो हि तत्र"।

(झ) चरसंस्कारः-"चर् गतिभक्षणे" धातुत्वात् गत्यर्थे चरशब्दस्य प्रयोगः ज्योतिषशास्त्रे कृतमस्ति सिद्धान्ते उच्यते यत्-निरक्षक्षितिजस्वक्षितिजयोरन्तरं चरमिति। यथा-भास्करः-

उन्मण्डलक्ष्मावलयान्तराले द्यूरात्रवृत्ते चरखण्डकालः।
तज्या कुज्या चरशिञ्जिनि स्याद् व्यासार्धवृत्ते परिणामिता सा।।

(ञ) उदयान्तरसंस्कारः-उदयोः अन्तरम् उदयान्तरम् इति, एवमत्रोच्यते यत् मध्यमसावन स्फुटसावनयोःअन्तरम् उदयान्तरं वा विषुवांश-भुजांशयोःअन्तरम् उदयान्तरम् अथवा रविगतिकलातुल्यासुनाक्षत्रषष्टिघटिका-रविगतिकलोत्पन्नासुनाक्षत्रषष्टिघटिकयोः अन्तरम् उदयान्तरम्।

(ट) पञ्चाङ्गसाधनम्-तिथि-वार-नक्षत्र-योग-करणानां (पञ्चानां) साधनमेव पञ्चाङ्गसाधनम् उच्यते। तिथ्यादीनामानयनं पञ्चाङ्गकार्योपकारकं विद्यते, यत्र पञ्चाङ्गमाध्यमेन श्रौतस्मार्त्तनां व्रत-पर्व-तिथ्युत्सवादीनां सारल्येन ज्ञानं सम्भवति।

(ज) संहिताशास्त्रम्-

ज्योतिषशास्त्रस्य संहितास्कन्धः सर्वाधिकं लोकोपकारकं वर्तते। ग्रहाणां सामूहिकप्रभावो येन ज्ञायते स संहितास्कन्धः। संहिताशास्त्रोक्ता प्रक्रिया समस्तभूमण्डलस्योपरि सञ्जातग्रहप्रभावस्य मूल्याकनं करोति। सकलेयं भूमिः कृतिकादिनवखण्डानि विभज्य तत्-तद् भूभागस्य तत्-तत् सम्बन्धिनी नक्षत्राणि प्रतिनिधिकारकरूपाणि भवन्ति। तन्नक्षत्राधारेण भूमण्डलस्य स्थितिं ज्ञातुं शक्यते। संहितायाः स्कन्धे भूशोधनं, जलाशयनिर्माणम्, मांगलिक-कार्याणां षोडशसंस्कार मुहूर्तः, उल्कापातः, बृष्टिः, ग्रहाणां उदयास्त फलम्, ग्रहचारस्य फलम्, ग्रहण-फलम्, इत्यादीनां निरूपणं विस्तारपूर्वकं क्रियते। जीवनेन सम्बद्धाः सर्वेऽपि शुभाशुभ-लौकिक-विषयाः अस्यान्तर्गता सन्ति।

(झ) प्रश्नशास्त्रंनिमित्तशास्त्रञ्च-

यत्र प्रश्नलग्नमाश्रित्य फलादेशः क्रियते तत्प्रश्नशास्त्रम्। प्रश्नग्रन्थाश्च प्रश्नसारादयः। इदं तत्काल-फलादेशात्मकं शास्त्रमस्ति। यत्र प्रश्नकर्तृणाम् उच्चारित-अक्षरोपरि-फलस्य प्रतिपादनं क्रियते। अस्मिन् शास्त्रे- (1) प्रश्नाक्षर-सिद्धान्तः। (2) प्रश्नलग्न-सिद्धान्तः। (3) स्वरविज्ञान-सिद्धान्तः। इति त्रयाणां सन्निवेशो भवति। अस्मिन् शास्त्रे-चर्चा, चेष्टा, हाव-भाव इत्यादि माध्यमेन मनोगत-भावानां वैज्ञानिक-दृष्ट्या विश्लेषणं कृत्वा फलादेशः क्रियते।।

अस्य शास्त्रस्य विषयसीमायां प्रत्येक-कार्यस्य पूर्वं शुभाशुभयोः ज्ञान-प्राप्तिः मुख्यं लक्ष्यं वर्त्तते। तत्र पशुपक्षिमनुष्यादीनां हाव-भाव-चेष्टादिभिः प्राकृतिक-परिस्थितिवशेन च परीक्षणं शुभाशुभफलज्ञानाय भवति। शकुनः(निमित्तशास्त्रम्)

अस्य शास्त्रस्य विषयसीमायां प्रत्येक-कार्यस्य पूर्वं शुभाशुभयोः
ज्ञान-प्राप्तिः मुख्यं लक्ष्यं वर्त्तते। तत्र पशुपक्षिमनुष्यादीनां हाव-भाव-चेष्टादिभिः प्राकृतिक-परिस्थितिवशेन च परीक्षणं शुभाशुभफलज्ञानाय भवति।

(ञ) रमलशास्त्रम्-

रमलशास्त्रं हि पाशकविद्याऽप्युच्यते। निर्दिष्टकोष्केष्वन्यतमस्य स्पर्शे वा वरणे या स्थितिर्घटते तदनुसारेण फलकथनमेव रमलशास्त्रविषयः। यत्र च प्रस्तारद्वारा शुभाशुभफलं कथ्यते तद्रमलशास्त्रम्। अस्य शास्त्रस्य प्रचार- प्रसारस्तु वैदेशिक-संसर्गेन भारते भवति स्म। संस्कृतभाषायां "रमलनवरत्नम्" नाम्ना ग्रन्थे पाशानिर्माणविधिः उपलभ्यते। यथा-

वेदतत्त्वोपरिकृतं रम्लशास्त्रं च सूरभिः।
तेषां भेदाःषोडशैव न्यूनाधिक्यं न जायते।।

अर्थात्-अग्नि, वायु, जल, पृथ्वी इति चत्वारि तत्त्वानि रमलशास्त्रस्य विशिष्टता वर्त्तते। इति चतुष्टय तत्त्वाणां षोडषन् भेदाः कथ्यन्ते। अतः रमलस्य पाशे 16 षोडषाकृतिःकृतम्। संज्ञा-बलाबल-प्रश्नापकरण-प्रश्नकथन-अवधिकथन-मुष्टिकथन-मूकप्रश्न-चौरनामकथन-वर्षपत्रकथनेति नवरत्नानि निरूपितानि सन्ति। इत्थं हि रमलशास्त्रमपि शास्त्रान्तरवत् समृद्धं लोकोपकारि च।

रमलनवरत्नशास्त्रस्य मङ्गलाचरणे-

नत्वाश्रीरमलाचार्यान् परमाद्यसुखाभिधैः। उद्धृतं रमलाम्भोधेर्नवरत्नं सुशोभनम्।

अर्थात् प्राचीन-रमलाचार्यान् प्रणम्य परमसुख नामकःग्रन्थकर्ता रमलशास्त्रसमुद्रात् सुन्दरं नवरत्नं निष्कासितवान्। उक्तञ्च स्वग्रन्थे-

यदा मुस्तरी कर्कटे वा कमाने यदाचर्मखोरा जमी वासमाने।

तदा ज्योतिषी क्या कहै क्या पढ़ेगा? हुआ बालका बादशाही करेगा।।

अत्र मुस्तरी (वृहस्पति) कर्कटे(कर्क राशि) कमाने (धनु) चश्मखोर(शुक्र) बोधव्यः।

कवि रहीमः स्व-कवितायाम्-

दृष्ट्वा तत्र विचित्रतां तरुलतां मैं था गया बाग में।
काचित्तत्र कुरङ्गशावनयना गुल तोड़ती थी खड़ी।।

स्वप्नशास्त्रम्-सुप्तस्य मनसश्चेष्टा स्वप्नः। स्वप्नमादाय फलादेशकं हि स्वप्नशास्त्रम्। स्वप्नशास्त्रं हि शास्त्रान्ताङ्गत्वेन बहुधा विकसितं दृश्यते स्वतन्त्रशास्त्रम्।

(ट) ज्योतिषशास्त्रस्य लोकोपकारकत्वम्-

प्राचीनभारतवर्षे शास्त्रद्वयमेव बहुविश्रुतम् आसीत्। अनयोः प्रत्यक्षसम्बन्धः लोकेन सह आसीदिति। यत्र आयुर्वेदशास्त्रं मानवस्य शारीरिकव्याधिं मानसिकव्याधिं च दूरीकरणार्थं प्रयतमानः दृश्यतेस्म। तत्रैव ज्योतिशास्त्रं रोगातिरिक्तमानवस्य सर्वविश्व- कल्याणार्थं सर्वासां स्थितीनां घटनानां च शुभाशुभनिर्धारणं करोतिस्म। इमे द्वे शास्त्रे लोकोपकारकदृष्ट्या एव आचार्यप्रवरैः प्रस्थितौ जातौ। ज्योतिषायुर्वेदशास्त्रं प्रयोगिकं शास्त्रं वर्तते, यतो हि अनयोःद्वयोः शास्त्रयोः परिणामं सर्वाशतया लोके प्रभावयति। अतएव प्रोक्तं "ज्योतिर्वैद्यौ निरन्तरौ ज्ञेयौ" इति।

ज्योतिष-शास्त्रस्य विषये प्रसिद्धि-

अन्यानि शास्त्राणि विनोदमात्रं न किञ्चिदेषा भुवि दृष्टमस्ति।
चिकित्सितं ज्योतिषमन्त्रवादा पदे-पदे प्रत्ययमावहन्ति।।

सत्संस्कारस्य कृते शुभमुहूर्तादि-निर्धारणं पञ्चाङ्गमाध्यमेन तिथ्यादिनिरुपणं, व्रतोत्सवादीनां विधानं धर्मसाधनोपाया इत्यादय:बहव: विषया:स्वयमेव ज्योतिष-शास्त्रस्य लोकोपकारकत्वं प्रस्तौति।

(ठ) ज्योतिषशास्त्रसम्मतप्रमाणानि-

केवलं ज्योतिषशास्त्रमेव प्रत्यक्षशास्त्रमस्ति, अन्यानि शास्त्राणि अप्रत्यक्षाणि सन्ति। अस्मिन् शास्त्रे त्रीणि प्रमाणानि गृहितानि सन्ति। प्रमाणस्य विवेचना ज्योतिषपरम्परायाः पाश्चात्य-ग्रन्थकार: कमलाकरभट्टमहोदयेन कृतमस्ति। सिद्धान्ततत्त्वविवेके उक्तं- "प्रत्यक्ष-आगम-युक्तिशालि तदिदं शास्त्रम्" अर्थात् ज्योतिषशास्त्रे त्रीणि प्रमाणानि गृहितानि सन्ति, तत्र 1. प्रत्यक्ष:, 2. आगम:, 3. युक्ति:।

1. प्रत्यक्षप्रमाणम्- ज्योतिषशास्त्रस्य अपर नाम प्रत्यक्षशास्त्रमपि अस्ति। अन्यानि सर्वाण्यपि शास्त्राणि अप्रत्यक्षाणि सन्ति। ज्योतिषशास्त्रे सूर्योदय: पञ्चवादने आयाति, परन्तु प्रत्यक्षदृष्टे सत्यपि यदि पञ्चवादने सूर्योदय: परिलक्ष्यते तदैव तस्य गणनाया महत्त्वमङ्गी- क्रियते अस्माभि:। ग्रहाणां स्पष्टीकरणविचारे परममन्दफल- परमसिद्धफल- साधने प्रत्यक्षप्रमाणमेव कारणं भवति। आचार्य-आर्यभट्टादारम्भ कमलाकरभट्टं यावत् सर्वैरेकस्वरेण प्रत्यक्षप्रमाणस्य एव सर्वाधिकं ग्रहणं समर्थनं च कृतमिति।

2. आगमप्रमाणम्-" आगमम्" अस्य शब्दस्य भाव: " आर्षवचनान्येव प्रमाणम्" इति वर्तते। आचार्य वराहमिहिरेण प्रोक्तं यत् ज्योतिशास्त्रम् आगमनम् इति। यथा-

ज्योतिषमागमं शास्त्रं विप्रतिपत्तौ नहि योग्यमस्माकम्। (बृहत्संहिता)

ज्योतिषशास्त्रे बहुषु स्थानेषु आगमप्रमाणस्योदाहरणं प्राप्यते। ग्रहादिभगणानाम् आगमप्रमाणमेव मत्वा गणितक्रिया कुर्यादिति विदां मतम्। (सू. सि.) अयनांशचलनावसरे आगमप्रमाणस्यैवोपलब्धि: भवति। भास्कराचार्यस्तु ग्रहाणां मन्दोच्चानां च भगणकथनावसरे वासनाभाष्ये उक्तमस्ति यत्-ग्रहमन्दशीघ्रोच्चपाता: स्वमार्गेषु गच्छन्त एतावत: पर्य्ययान् कल्पे कुर्वन्ति इत्यत्रागम एव प्रमाणम्।

3. युक्तिप्रमाणम्-युक्तिप्रमाणं अर्थात् उपपत्तिप्रमाणम्। ज्योतिषशास्त्रे युक्तिप्रमाणस्यैव सर्वाधिकं महत्त्वं विद्वद्भि: स्वीक्रियते। विशेषरूपेण इदं प्रमाणं सिद्धान्तज्योतिषे अङ्गीक्रियते, यतो हि तत्रोक्तग्रह-गति-स्थिति-कक्षा-दिनमानादि व्यवस्था-आदिस्थितय: च उपपत्तिबलेनैव सिद्ध्यन्ति। प्रायश: सर्वेऽपि ग्रन्थकारा: स्व-स्वग्रन्थे अस्यैव प्रमाणस्य वर्णनं प्रदत्तमस्ति। आचार्यकमलाकरस्तु सर्वेष्वपि प्रमाणेषु युक्तियुक्तोपाय: एवाङ्गीकृत:, यथोक्तं सिद्धान्ततत्त्वविवेके यत्-

युक्तियुक्तमुपादेयं वचनं बालकादपि।
अन्यत्तृणमिव त्याज्यं ब्राह्मोक्तमपि हि ध्रुवम्।।

(ड) ज्योतिषमेव विज्ञानम्-

ज्योतिषं सूर्यादिग्रहाणां बोधकं शास्त्रमस्ति। आकाशे यान्यपि ज्योति: पिण्डानि सन्ति तानि सर्वाण्येव ज्योतिष्पदवाच्यानि भवन्ति। तत्राकाशे समेषां ज्योति: पिण्डानां गणना पृथक्-पृथक्

रीत्या ज्योतिषशास्त्रे एका विशिष्टप्रक्रियया विहिताऽस्ति। न केवलं गतिमान् ग्रह एव स्वकीयं प्रभावं भूमौ ददति, अपितु नक्षत्राणां विविध उल्कादीनां प्रभावोऽपि भूमौ दृश्यते। वेदेभ्यः निःसृतमिदं शास्त्रं वैदिककालादारभ्य इदानीं यावद् स्वकीयं वैज्ञानिकत्वं विशिष्टत्वं च पदे-पदे स्फुटयति। इदानीं विज्ञानशब्दस्य ग्रहणं Science पदेन क्रियते। Science इत्यस्य कृते आक्सफोर्ड नाम्नि शब्दकोशे वर्णितमस्ति यत्-यस्य ज्ञानस्योत्पत्तिः प्रयोगिकाधारेण भवति एवञ्च एकया सरणिबद्धपरम्परया सह नियतसूत्रवशात् सर्वदा फलैकरूपता स्यात् तदेव विज्ञानम्। एवमत्र मूलं प्रयोगिकमेवोपलभ्यते। वैदिककाले विज्ञानस्य अन्वेषणं क्रियते चेत्तदा तत्राऽपि द्विविधं विज्ञानं प्राप्यते तच्चायुर्वेदज्योतिर्विज्ञानम्। आयुर्वेदविज्ञानेनात्र मानवस्य चिकित्सासम्बन्धिनः सर्वेऽपि निदानोपचारा विशदी क्रियते तथा ज्योतिर्विज्ञानेन खगोलीयपिण्डानां वर्णनपूर्वकं गृहनिर्माण-आन्तरिक्षोत्पातप्रभृतिविषयाणाम् उपस्थापनं समासेनात्रोपपाद्यते।

1. **वैदिककाले**-किञ्चिदंशात्मकः खगोलविज्ञानम्, वर्षाविज्ञानम्, वास्तुविज्ञानं च।
2. **पौराणिके काले**-अस्मिन् काले विषयस्य बाहुल्यं बहुनां भेदोपभेदानां चर्चा उपलभ्यते। रामायणेमहाभारतादावपि बहवो ज्योतिषसम्बद्धप्रसङ्गाः स्मृता दृश्यन्ते। रामायणे मुहूर्तादि-कमधिकृत्य प्रासङ्गिकं पर्णनं लभ्यते। महाभारतं तु भारतीयपरम्परायाः विश्वकोष एव।
3. **आर्ष-काले**-खगोलविज्ञानम्, भौतिकविज्ञानम्, वर्षाविज्ञानम्, वास्तुविज्ञानम्, ऋतुविज्ञानम्, भूगर्भविज्ञानं च। आर्षपरम्पराऽनन्तरं सर्वप्रथमम् आचार्यार्यभट्टेन तृतीयशताब्द्याम् एका विशिष्टा सारणिबद्धा ज्योतिर्विज्ञानस्य परम्परा सिद्धान्तश्च स्वकीयार्यभट्टीयतन्त्रे प्रतिपादितः। वराहमिहिरस्य बृहत्संहितायां बहुविज्ञानरत्नानि प्रतिपादितानि सन्ति, एवं स्कन्धत्रयेषु समाना लेखनी वाराहेण चालिता। अत्र वराहकालीनविज्ञानस्य उल्लेखः क्रियते-
   1. सिद्धान्ते-खगोलविज्ञानम्, गतिविज्ञानम्।
   2. फलिते-फलादेशविज्ञानम्, मनोविज्ञानम्, चिकित्साविज्ञानम्।
   3. संहितायाम्-अन्तरिक्षविज्ञानम्, खगोलविज्ञानम्, वर्षाविज्ञानम्, रत्नविज्ञानम्, वास्तुविज्ञानम्, वाणिज्यविज्ञानम्, सामुद्रिकविज्ञानम्, वृक्षायुर्वेदविज्ञानं च।

(ढ) ज्योतिषशास्त्रस्य प्रसिद्धाः ग्रन्थाः

सिद्धातस्कन्धे	होरास्कन्धे	संहितास्कन्धे
सूर्यसिद्धान्तः (आर्षः)	बृहज्जातकम् (वराहमिहिरस्य)	गर्गसंहिता (आर्षः)
आर्यभट्टीयम् (आर्यभट्टस्य)	होरारत्नम् (बलभद्रस्य)	वसिष्ठसंहिता (आर्षः)
शिष्यधीबृद्धिदतन्त्रम्(लल्लस्य)	जातकपारिजातः(वैद्यनाथस्य)	भृगुसंहिता (आर्षः)
पञ्चसिद्धान्तिका(वराहमिहिरस्य)	ताजिकनीलकण्ठी (नीलकण्ठस्य)	कश्यपसंहिता (आर्षः)
ब्राह्मस्फुटसिद्धान्तः(ब्रह्मगुप्तस्य)	भावकुतूहलम्(जीवनाथस्य)	नारदसंहिता (आर्षः)
श्राजमृगाङ्कम् (भोजस्य)	जातकालङ्कारः(गणेशस्य)	बृहत्संहिता(वराहमिहिरस्य)
सिद्धान्तशेखरः(श्रीपतेः)	जातकपद्धतिः(केशवस्य)	लघुपाराशरी (आर्षः)
करणप्रकाशः(ब्रह्मदेवस्य)		सारावली (कल्याण वर्मणः)

भास्वती (शतानन्दस्य)	स्फुटग्रन्थाः	रमलनवरत्नम् (परमसुखस्य)
सिद्धान्तशिरोमणिः(भास्करस्य)	1. गणकतरङ्गिणी(सुधाकरस्य)	मुहूर्तमार्तण्डः(नारायणस्य)
सिद्धान्तदर्पणः(नीलकण्ठस्य)	2. भारतीयज्योतिषम्(शंकरबाल-कृष्णस्य)	मुहूर्तचिंतामणिः(रामस्य)
ग्रहलाघवम्(गणेशदैवस्य)	3. भारतीयज्योतिषेतिहासः (गोरक्षप्रसादस्य)	नरपतिजयचर्यास्वरोदयः (नरपते)
सिद्धान्ततत्त्वविवेकः (कमलाकरस्य)	4. हिदूगणितशास्त्रेतिहासः	
लीलावती (फाटीगणिते) भास्करस्य	5. भारतीयज्योतिषम् (नेमिचन्द्रस्य)	
चापीयत्रिकोणगणितम् (बीजगणिते) नीलाम्बर) सरलत्रिकोणमितिः	6. संस्कृतशास्त्रेतिहासः (बलदेवस्य)	

(ण) विशिष्टज्योतिर्विदां सङ्क्षिप्तः परिचय-

अथाऽत्र परिचाय्यन्ते कतिपये विशिष्टाः ज्योतिषाचार्याः। स्नम्भेऽस्मिन् लगधादारभ्य सुधाकरपर्यन्तं ये हि खलु मूलग्रन्थप्रणेतारो वा विशिष्टव्याख्याग्रन्थप्रणेतारस्त एव सादरमुपस्थापिताः।

ग्रन्थप्रणेता	परिचयः	ग्रन्थः
1. लगधाचार्यः	1410 वर्षमित-शक पूर्वकालः,	वेदाङ्गज्योतिषाख्यः
2. स्फुजिध्वजः	अस्य कालः शकानन्तरं144 वषाणि,	यावनहोराशास्त्रम्
3. आर्यभट्टः (प्रथमः)	कुसुमपुर-निवासिनः, कलिगतवर्षे 397 शकाब्दः जन्मः	आर्यभट्टीयं तन्त्रम्
4. वराहमिहिरः	427 शकवर्षे, कापित्थ आदित्य-दासस्य पुत्रः,	त्रिस्कन्धादि14 ग्रन्थाः
5. पृथुयशा	वराहमिहिरस्य पुत्रः, 490 शाके, काम्पिल्लक-वास्तव्यः	फलितज्यो. टीका
6. कल्याणवर्मा	500 शके,	सारावली

क्रमशः .....

ग्रन्थप्रणेता	परिचयः	ग्रन्थः
	देवग्राम (व्याघ्र-पल्ली)	
7. लल्लाचार्यः	525 शाके, शाम्बाख्यस्य पौत्रः, त्रिविक्रमस्य सुतः	शिष्यधी-रत्नकोष, जातकसार
8. भास्करः (प्रथम)	530 शाके,	महाभास्करीयं, लघुभास्करीयम्
9. ब्रह्मगुप्तः	550 शाके, जिष्णुसुतः,	ब्राह्मस्फुटसि०, खण्डखाद्यककरणम्
10. समरसिंह	600 शाके,	ताजिकतन्त्रसारः
11. पद्मनाभः	700 शाके,	व्यवहारप्रदीप, बीजगणितम्
12. श्रीधराचार्यः	725 शाके,	त्रिशतिका व्यक्तगणितम्, जातकपद्धतिः
14. महावीरः	775 शाके,	सारसङ्ग्रहः
15. मनुः	780 शाके,	बृहन्मानसकरणम्
16. बलभद्रः	800 शाके,	ग्रहगणितादि सप्त-ग्रन्थाः
17. वित्तेश्वरः	821 शाके,	करणसारः
18. मुञ्जालः	854 शाके,	लघुमानसम्
19. आर्यभट्ट (द्वितीयः)	875 शाके,	महासिद्धान्तः
20. पृथुदकः	880 शाके,	ब्राह्मस्फुटसि०टीका, खण्डखाद्यटीका
21. भट्टोत्पलः	888 शाके,	बृहज्जा-लघुजातकटीकादि 12 ग्रन्थाः
22. विजयनन्दी	888 शाके,	करणतिलकम्
23. भानुभट्टः	900 शाके,	तिलककरणम्, रसायनकरणम्
24. श्रीपतिः	961 शाके,	सिद्धान्तशेखरः, बीजगणितादि 7 ग्रन्थाः
25. वरुणः	962 शाके	खण्डखाद्यटीका,
26. भोजदेवः	964 शाके	राजमृगाङ्कः, राजमार्तण्डादि 5 ग्रन्थाः
27. दशबलः	980 शाके	करणकमलमार्तण्डः
28. ब्रह्मदेवः	1014 शाके	करणप्रकाशः
29. शतानन्दः	1021 शाके	भास्वतीकरणम्
30. उत्तमः	1038 शाके	करणोत्तमः

क्रमशः .....

ग्रन्थप्रणेता	परिचयः	ग्रन्थः
31. महेश्वरः	1040 शाके	शेखरः, फलितज्योतिषमादि 5 ग्रन्थाः
32. सोमेश्वरः	1041 शाके	अभिलषितार्थचिन्तामणिः
33. माधवः	1060 शाके	सिद्धान्तचूडामणिः
34. विष्णुदेवः	1075 शाके	बीजगणितम्
35. भास्कराचार्यः	1082 शाके	सिद्धान्तशिरोमणिः, करणकु0, विवाहपटलः
36. बल्लालसेनः	1090 शाके	अद्भुतसागरः
37. नरपतिः	1090 शाके	नरपतिजयचर्या
38. अनन्तदेवः	1120 शाके	बृहज्जातकटीका, ब्रह्मसिद्धान्तटीका
39. कालिदासदैवज्ञः	1135 शाके	ज्योतिर्विदाभरणम्
40. केशवार्कः	1200 शाके	करणकण्ठीरवः, विवाहवृन्दाभरणम्
41. महादेवः	1238 शाके	ग्रहसिद्धिः
42. महेन्द्रसूरिः	1260 शाके	यन्त्रराजः
43. महादेवः	1289 शाके	कामधेनुकरणम्
44. नार्मदः	1300 शाके	सूर्यसिद्धान्त टीका
45. तेजःसिंह	1300 शाके	दैवज्ञालङ्कृतिः
46. पद्मनाभः	1320 शाके	यन्त्ररत्नावली
47. दामोदरः	1339 शाके	भटतुल्यकरणम्
48. वैद्यनाथः	1350 शाके	जातकपारिजातः
49. गङ्गाधरः	1356 शाके	चान्द्रमानतन्त्रम्, लीलावतीटीका
50. मकरन्दः	1400 शाके	मकरन्दकरणम्, मकरन्दसारिणी
51. शार्ङ्गधरः	1400 शाके	विवाहपटलः
52. केशवः (द्वितीयः)	1418 शाके	ग्रहकौतुकम्, मुहूर्ततत्त्वम्तिथिसिद्धिःआदि 13ग्रन्थाः
53. रामचन्द्रः	1420 शाके	कल्पद्रुमकरणम्
54. लक्ष्मीदासः	1422 शाके	गणिततत्त्वचिन्तामणिः
55. ज्ञानराजः	1425 शाके	बीजगणितम्, सिद्धान्तसुन्दरम्, ज्ञानराजजातकम्
56. गणेशदैवज्ञः	1442 शाके	ग्रहलाघवम्, श्राद्धविधिः आदि 13 ग्रन्थाः
57. पीताम्बरः	1444 शाके	विवाहपटलः
58. हरिभट्टः	1445 शाके	ताजकसारः
59. शिवदासः	1446 शाके	ज्योतिर्निबन्धः
60. अनन्तः	1447 शाके	अनन्तसुधारसः

क्रमशः .....

ग्रन्थप्रणेता	परिचयः	ग्रन्थः
61. ढुण्ढिराजः	1460 शाके.	जातकाभरणम्, पञ्चाङ्गफलम्, कुण्डलकल्पलतादि 6ग्रन्थाः
62. सूर्यः	1463 शाके	सूर्यप्रकाशः, बीजगणितम्, ग्रहविनोदादि 14 ग्रन्थाः
63. कञ्चपल्लूः	1479 शाके	ज्योतिषदर्पणः
64. नृसिंहः	1480 शाके	मध्यमग्रहसिद्धिः
65. गणेशः	1480 शाके	ताजिकभूषणपद्धतिः
66. रघुनाथः	1484, 1487 शाके	सुबोधमञ्जरी, मणिप्रदीपः,
67. कृपारामः	1490 शाके	सवार्थचिन्तामणिः, पञ्चपक्षीटीकादि 7 ग्रन्थाः।
68. नारायणः	1493 शाके	मुहूर्तमार्तण्डः,
69. दिनकरः	1500 शाके	खेटकसिद्धिः
70. नृहरिः	1505 शाके	जतकसारः
71. गङ्गाधरः	1508 शाके	ग्रहलाघवटीका
72. नीलकण्ठः	1509 शाके	तोडलरानन्दः, ताजिकनीलकण्ठी,
73. श्रीनाथः	1512 शाके	ग्रहचिन्तामणिः
74. रामभट्टः	1522 शाके	रामविनोदकरणम्, मुहूर्तचिन्तामणिः, यन्त्रप्रकाशः
75. मल्लारिः	1524 शाके	ग्रहलाघवटीका
76. गणेशः	1525 शाके	जातकालङ्कारः,
77. गोविन्ददैवज्ञः	1525 शाके	मुहूर्तचिन्तामणिटीका-पीयूषधाराटीका
78. दिवाकरः	1528 शाके	पद्मजातकम्, मकरन्दविवरणादि 5 ग्रन्थाः,
79. विष्णुः	1530 शाके	विष्णुकरणम्
80. कृष्णः	1540 शाके	बीजनवाङ्कुरः, जातकपद्धतिटीका,
81. नारायणः	1540 शाके	केशवपद्धतिटीका,
82. शिवः	1540 शाके	मुहूर्तचूडामणिः, अनन्तसुधारसटीका,
83. नागेशः	1541 शाके	ग्रहप्रबोधः
84. गोविन्दः	1541 शाके	रसालाटीका-(नीलकण्ठी)
85. विश्वनाथः	1550 शाके	तजिकनीलकण्ठीटीका, ग्रहनार्थप्रकाशिकादि 19 टीका ग्रन्थाः।
86. मुनीश्वरः	1550 शाके	सिद्धान्तसार्वभौमः, पाटीसारादि 5 टीका ग्रन्थाः।
87. कमलाकरभट्टः	1550 शाके	सिद्धान्ततत्त्वविवेकः,
88. माधवः	1555 शाके	शिशुबोधिनीटीका(नीलकण्ठी)
89. सोमदैवज्ञः	1559 शाके	पद्धतिभूषणम्, कल्पलता,

क्रमशः .....

ग्रन्थप्रणेता	परिचयः	ग्रन्थः
90. रङ्गनाथः	1560 शाके	सिद्धान्तचूडामणिः, पलभागखण्डनम् इत्यादि 4 ग्रन्थाः।
91. नित्यानन्दः	1561 शाके	सर्वसिद्धान्तराजः,
92. बालकृष्णः	1671 शाके	ताजिककौस्तुभः,
93. बलभद्रः	1564 शाके	होरारत्नम्, हायनरत्नम्,
94. कृष्णः	1575 शाके	करणकौस्तुभः, तन्त्ररत्नम्,
95. रत्नकण्ठः	1580 शाके	पञ्चाङ्गकौतुकम्
96. रधुनाथः	1582 शाके	मुहूर्तमाला
97. विद्दणः	1582 शाके	वार्षिकतन्त्रम्
98. महादेवः	1583 शाके	मुहूर्तदीपकः
99. गोविन्दः	1600 शाके	होराकौस्तुभः, बृहज्जातकटीका,
100. गण्पतिः	1607 शाके	मुहूर्तगणपतिः
101. चिन्तामणिः	1607 शाके	रमलचितामणिः
102. जटाधरः	1626 शाके	फत्तेशाहप्रकाशः,
103. दादाभटः	1641 शाके	किरणावलीटीका
104. नारायणः	1660 शाके	होरासारसुधानिधिः, स्वरसागरः, इत्यादि 5 ग्रन्थाः।
105. परमानन्दः	1660 शाके	प्रश्नमाणिक्यमाला,
106. जगन्नाथः	1660 शाके	सिद्धान्तसम्राट्,
107. नयनसुखोपाध्यायः	1660 शाके	कटरः,
108. राधवः	1662, 1732 शाके	पद्धतिचन्द्रिका, खेटकृतिः, पञ्चाङ्गार्कः,
109. जयरामः	1667 शाके	रमलामृतम्
110. शङ्करः	1688 शाके	वैष्णवकरणम्
111. मणिरामः	1696 शाके	ग्रहगणितचिन्तामणि
112. मूला	1703 शाके	ब्रह्मसिद्धान्तसारः,
113. मथुरानाथः	1704 शाके	यन्त्रराजघटनम्,
114. चिन्तामणिदीक्षितः	1705 शाके	सूर्यसिद्धान्तसारिणी, गोलानन्दः,
115. दिनकरः	1734 शाके	ग्रहविज्ञानसारिणी, मासप्रवेशसारिणी, लग्नसारिणी-आदि 9 ग्रन्थाः,
116. शिवः	1737 शाके	तिथिपारिजातः,
117. सुवाजी बापू	1740 शाके	सिद्धान्तशिरोमणिप्रकाशः

क्रमशः .....

ग्रन्थप्रणेता	परिचयः	ग्रन्थः
118. यज्ञेश्वरः	1740 शाके	ज्योतिषपुराणविरोधमर्दनम्, अनुभाविका, इत्यादि 6 ग्रन्थाः,
119. नृसिंहः (बापूदेवः)	1743 शाके	रेखागणित, त्रिकोणमितिः, अङ्कगणितादि 9 ग्रन्थाः।
120. जीवनाथः	1744 शाके, पिता-शम्भु	भास्करीयबीजटीका, भावप्रकाशः,
121. नीलाम्बरः	1745 शाके	गोलप्रकाशः,
122. रघुनाथलेलेः	1749 शाके	सायनपञ्चाङ्गम्,
123. रघुनाथाचार्यः	1750 शाके	ज्योतिषचिन्तामणिः
124. कृष्णशास्त्री	1753 शाके	ज्योतिषशास्त्रस्येतिहासः, ज्योतिषशास्त्रम्,
125. गङ्गाधरः	1780 शाके	मुहूर्तसिधुः,
126. वेङ्कटेशकेतकरः	1800 शाके	ज्योतिषर्गणितम्,
127. वामनकृष्णः	1803 शाके	बृहत्पञ्चाङ्गसाधनोदाहरणम्,
128. बालगङ्गाधरतिलकः	1810 शाके	आर्यायणम् (Orion)
129. विनायक-पाण्डुरङ्गः	1820 शाके	वैनायकी द्वादशाध्यायी, कुण्डसारः, सिद्धान्तसारादि 4 ग्रन्थाः।
130. सुधाकरः	1820 शाके	दीर्घवृत्तलक्षणम्, विचित्रप्रश्नः, प्रतिभाबोधकमादि 13 ग्रन्थाः।
131. शङ्करबालकृष्णः	1830 शाके	भारतीयज्यौतिषम्,
132. गङ्गाधर मिश्रः	1861 शाके	तजिकनीलकण्ठी, प्रतिभाबोधकमादि 4 ग्रन्थाः।
133. सीताराम झा	1866 शाके	गोलपरिभाषा, रेखागणितम्, स्त्रीजातकम्, लीलावत्यादि 28 व्याख्यातग्रन्थाः।
134. हरिकृष्णः	1866 शाके	बृहज्ज्योतिषार्णवः,
135. अच्युतानन्द झा	1867 शाके	बृहज्जातकम्, ज्योतिषप्रश्नफलगणनादि 10 व्याख्यातग्रन्थाः।
136. कपिलेश्वरः	1869 शाके	मुहूर्तमार्तण्डः, जातकपारिजातः, सूर्यसिद्धान्तः, मुहूर्तचिन्तामणिः
137. गणेशदत्तः	1894 शाके	जातकालङ्कारः, हस्तसञ्जीवनम्, नरपतिजयचर्या,
138. मुरलीधर-चतुर्वेदी	1899 शाके	सरावली, होरारत्नम्,
139. लषणलालः	1905 शाके	लीलावती, जातकालङ्कारः, लघुजातकम्, जन्मपत्रविधानम्,
140. देवचन्द्र झा		बृहत्पाराशरहोरा, वीजगणितम्

(त) पञ्चसंवत्सरयुगस्याधिवाद-

संवत्सराः	उत्तरायणारम्भे तिथयः रविभानि चन्द्रभानि	दक्षिणायनारम्भे तिथयः रविभानि चन्द्रभानि
1. संवत्सरः	माघशुक्ल घनिष्ठा घनिष्ठाप्रतिपत्	श्रावणशुक्ल अश्ले-चित्रा सप्तमी षार्धा
2. परिवत्सरः	माघशुक्ल घनिष्ठा आर्द्रा त्रयोदशी	श्रावणशु०आश्ले पूर्वभाद्रचतुर्थी षार्धा पदा
3. इदावत्सरः	माघकृष्ण घनिष्ठा अनुराधा दशमी	श्रावणशु०आश्ले-आश्लेषा प्रतिपत् षार्धा
4. अनुवत्सरः	माघशुक्ल घनिष्ठा अश्विनी सप्तमी	श्रावणशु०आश्ले-पूर्वाषाढा त्रयोदशी षार्धा
5. इद्वत्सरः	माघकृष्ण घनिष्ठा उत्तरा चर्तुर्थी फाल्गुनी	श्रावणशु०आश्ले-रोहिणी दशमी षार्धा

(थ) वैदिकसाहित्ये दिवसस्य पञ्चभागा-

अस्मिन् प्रकरणे सूर्यस्य उदयास्तमयावच्छिन्नः काल एव दिवसः। दिवसस्य प्रातः-सङ्गव-मध्याह्न-अपराह्न-सायं भेदात् पञ्च भागाः निर्दिष्टाः। प्रयोजनानुसारं यत्र तत्र दिवसस्य त्रयो विभागाश्चत्वारो वाऽपि कृता अपि दृश्यन्ते। मूलतस्तु दिवसस्य चत्वार एव भागाः "पूर्वाह्न-मध्याह्न-अपराह्न- सायाह्न" भेदात्। वैदिक साहित्ये सूर्योदयादारभ्य सूर्यास्तपर्यन्तमहः पञ्चषु भागेषु विभक्तं दृश्यते। यथा-

उतायातं सङ्गवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य।
दिवानक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान।।

(ऋ० 5.76.3)

पूर्वाह्नो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणाम्। (शत० 2.4. 2.8)

(द) वैदिकदृष्टयानक्षत्रसूची-

वेदेषु या नक्षत्रसूची प्रदत्ता साऽत्र यथावदुद्धियते-

सं०	तैत्तिरीय-संहितायाम्	मैत्रायणी-संहितायाम्	काठक-संहितायाम्	अथर्व-संहितायाम्	तैत्तिरीय-ब्राह्मणे
1.	कृत्तिकाः	कृत्तिकाः	कृत्तिकाः	कृत्तिकाः	कृत्तिकाः
2.	रोहिणी	रोहिणी	रोहिणी	रोहिणी	रोहिणी
3.	मृगशीर्षम्	इन्वगा	इन्वका	मृगशिरम्	इन्वका
4.	आर्द्रा	बाहुः	बाहुः	आर्द्रा	बाहुः
5.	पुनर्वसू	पुनर्वसुः	पुनर्वसुः	पुनर्वसुः	पुनर्वसुः
6.	तिष्यः	तिष्यः	तिष्यः	पुष्यः	तिष्यः
7.	आश्लेषाः	आश्लेषाः	आश्लेषाः	आश्लेषाः	आश्लेषाः
8.	मघाः	मघाः	मघाः	मघाः	मघाः
9.	फल्गुन्यौ	फल्गुन्यः	फल्गुन्यः	पूर्वे फल्गुन्यौ	पूर्वे फल्गुन्यौ

क्रमशः .....

सं०	तैत्तिरीय-संहितायाम्	मैत्रायणी-संहितायाम्	काठक-संहितायाम्	अथर्व-संहितायाम्	तैत्तिरीय-ब्राह्मणे
10.	फल्गुन्यौ	फल्गुन्यः	उत्तराःफल्गुन्यौ	–	उत्तरे फल्गुन्यौ
11.	हस्तः	हस्तः	हस्तौ	चित्राहस्तः	हस्तः
12.	चित्रा	चित्रा	चित्रा	चित्रा	चित्रा
13.	स्वातिः	निष्ट्यम्	निष्टया	स्वातिः	निष्टया
14.	विशाखे	विशाखम्	विशाखा	विशाखा	विशाखे
15.	अनुराधाः	अनुराधाः	अनुराधाः	अनुराधाः	अनुराधाः
16.	रोहिणी	ज्येष्ठा	ज्येष्ठा	ज्येष्ठा	रोहिणी
17.	विवृतौ	मूलम्	मूलः	मूलः	मूलबर्हिणी
18.	अषाढाः	अषाढाः	अषाढाः	पूर्वाषाढे	पूर्वाषाढा
19.	अषाढाः	अषाढाः	अषाढाः	उत्तराषाढे	उत्तराषाढा
20.	–	अभिजित्	अभिजित्	अभिजित्	–
21.	श्रोणा	श्रोणः	अश्वत्थः	श्रवणम्	श्रोणा
22.	श्रविष्ठाः	श्रविष्ठाः	श्रविष्ठाः	श्रविष्ठाः	श्रविष्ठाः
23.	शतभिषज्	शतभिषज्	शतभिषज्	शतभिषज्	शतभिषज्
24.	प्रोष्ठपदाः	प्रोष्ठपदाः	प्रोष्ठपदाः	पूर्वा प्रोष्ठपदाः	पूर्व प्रोष्ठपदे
25.	प्रोष्ठपदाः	प्रोष्ठपदाः	प्रोष्ठपदाः	उत्तरा प्रोष्ठपदाः	उत्तरा प्रोष्ठपदे
26.	रेवती	रेवती	रेवती	रेवती	रेवती
27.	अश्वयुजौ	अश्वयुजौ	अश्वयुजौ	अश्वयुजौ	अश्वयुजौ
28.	अपभरण्यः	अपभरण्यः	अपभरण्यः	भरण्यः	अपभरण्यः

(ध) दिक्शूल-सिद्धयोग-अर्द्धप्रहरादिविवेचनम्-

(1) दिक्शूलविचारस्तत्परिहारश्च-

दिङ्निर्धारणं न केवलं ज्योतिषशास्त्रस्यैव महत्त्वपूर्णतथ्यं विद्यते अपितु वेदविहित-कार्यनिर्धारणेऽपि अस्य महत्त्वं सर्वथा सनदृश्यते। यतो हि कम्रकाण्डान्तर्गते अग्निस्थापनार्थं कुण्डनिर्माणे, वेदीनां निर्माणे च दिक्ज्ञानम् अतीव विचारणीयं विषयं भवति।

(1) उदाहरणम्-

दिनम्	दिशा	परिहारः
रविवासरे	पश्चिमायाम्	घृतम्
सोमवासरे	पूर्वस्याम्(अग्निकोणे)	पयः(दुग्धं/जलम्)
मंगलवासरे	उत्तरस्याम्	गुडः
बुधवासरे	उत्तरस्याम् (ऐशानकोणे)	तिलः

क्रमशः .....

दिनम्	दिशा	परिहारः
वृहस्पतिवासरे	दक्षिणस्याम्	दधि
शुक्रवासरे	पश्चिमायाम् (वायुकोणे)	यवः
शनिवासरे	पूर्वस्याम्	माष (उरीद)

(1) दिक्शूलविचारस्तत्परिहारश्च-

(1) सिद्धान्तम्-"शनौ चन्द्रे त्यजेत्पूर्वां दक्षिणस्यां गुरौ बुधे।

रवौ-शुक्रे पश्चिमायां बुधे भौमे तथोत्तराम्।।" शनौ पूर्वे चन्द्रेऽग्निकोणे, गुरौ याम्यां, बुधे नैर्ऋत्यां, सूर्ये प्रतीच्यां, शुक्रेवायुकोणे, उत्तरस्यां मंगले, बुधे ऐशान्यां बुधमन्दयोर्न गन्तव्यम्। दिक् शूलत्वात् गमनं निषिद्धम्। परिहारस्तु- रव्यादिवासरेषु क्रमेण घृतपयोगुडतिलदधियवमाषान्नं भुक्त्वा शूलदोषोपशान्तिं कृत्वा च गच्छेत्।

(2) सिद्धयोगस्य उदाहरणम्-

वार	शुक्र	शनि	रवि	सोम	मंगल	बुध	गुरु
तिथयः	1	4	3	1	3	2	5
""	6	9	8	6	8	7	10
""	11	14	13	11	13	12	15

सिद्धान्तम्-

शुक्रे नन्दा बुधे भद्रा शनौरिक्ता कुजे जया।
गुरौ पूर्णा तिथिर्ज्ञेया सिद्धियोग उदाहृतः।।

जया रवौ च नन्दापि सोमे सिद्धिप्रदामताः।। अत्र नन्दापदेन-प्रतिपत, षष्ठी, एकादशी, भद्रापदेन-द्वितीया, सप्तमी, द्वादशी, जयापदेन-तृतीया, अष्टमी, त्रयोदशी, रिक्तापदेन-चतुर्थी, नवमी, चतुर्दशी, पूर्णापदेन-पञ्चमी, दशमी, पञ्चदशी, अमावास्या तिथयो बोध्याः।

(क) तिथिर्वारश्च नक्षत्रं योगः करण एव च, पञ्चस्वेतेषु शुद्धेषु समयः शुद्ध उच्यते।

(ख) **अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः।**
अर्द्रा पुनर्वसू पुष्यस्तथाश्लेषा मघा ततः।।
पूर्वाफाल्गुनिका चैव उत्तराफाल्गुनी ततः।
हस्तचित्रा तथा स्वाती विशाखा तदनन्तरम्।।
अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते।
पूर्वोषाढोत्तराषाढ त्वभिजिच्छ्रवणा ततः।।
धनिष्ठा शततताराख्यं पूर्वाभाद्रपदा ततः।
उत्तराभाद्रपदा चैव रेवत्येतानि भानि च।।

(ग) मेषो-(1) वृषोऽथ (2) मिथुनं (3) कर्कटः (4) सिंह (5) कन्यके (6) तुलौऽथ (7) बृश्चिको (8) धन्वी (9) मकरः (10) कुंभ (11) मीनकौ (12)

(1) अर्द्धप्रहरस्य उदाहणम्

दिने-रवौवर्य्यांश्चतुष्पञ्च सोमेसप्तद्वयं तथा, कुजेषष्ठद्वयञ्चैव बुधेवाणतृतीयकम्।
गुरौसप्ताष्टकं ज्ञेयं त्रिचत्वारि च भार्गवे शनावाद्यन्त षष्ठं च वर्ज्यार्धप्रहराबुधैः
रात्रौ-रवौरसाब्धि हिमगौहयाब्धि, द्वयं महीजे बिधुजेशरागौ।
गुरौशराष्टौ भृगुजे तृतीयं शनौरसाद्यन्तमितिक्षपायाम्।।

रवौ-रविदिने, रसः-षट्, अब्धि(समुद्र) चतुर्, हिमगौ-सोमदिने, ह्य-घोड़ा-सप्त, अब्धि-4, महीजे-मंगलवारे-द्वयं-2, बिधुजे-बुध-शर-पञ्च, अगः-पर्वतः-सप्त गुरौ-शर-5/8, शुक्रवासरे-तृतीय, शनौ-रस-6 आदि-1अन्त-8, एवं क्षपायाम्-रात्रौ, अर्धप्रहरं, त्याज्यम् इति।

अर्द्धप्रहरबोधकचक्रम्-

दिन	रवि	सोम	मंगल	बुध	वृहस्पति	शुक्र	शनि
दिने	4/5	2/7	2/6	3/5	7/8	3/4	1/6/8
रात्रौ	4/6	4/7	0/2	5/7	5/8	0/3	1/6/8

4. ज्योतिषाम्- 2. (ज्योतिषशास्त्रस्य प्रश्नोत्तरी)

(न) ज्योतिषशास्त्रस्य वस्तुनिष्ठानि-

1. प्रश्न-"राशयः कति भवन्ति, के च ते?
   उत्तरम्- 12 द्वादश। 1. मेषः, 2. वृषः, 3. मिथुन, 4. कर्कः, 5. सिंहः, 6. कन्या, 7. तुला, 8. वृश्चिकः, 9. धनुः, 10. मकरः, 11. कुम्भः, 12. मीनः
2. प्रश्न-जन्मकुण्डल्यां कति भावा भवन्ति?
   उत्तरम्- 12-द्वादश।
3. प्रश्न-"सिद्धान्तशिरोमणिः" कस्य शास्त्रस्य ग्रन्थः?
   उत्तरम्- ज्योतिषशास्त्रस्य।
4. प्रश्न-भास्कराचार्यस्य लीलावतीग्रन्थस्य प्रतिपाद्यो विषयः कः?
   उत्तरम्- व्यक्तगणितम्।
5. प्रश्न-"गणचक्रचूडामणिः" इति नाम्ना विख्यातः गणितज्ञः कः?
   उत्तरम्- ब्रह्मगुप्तः।
6. प्रश्न-आचार्यः लगधः केन शास्त्रेण सम्बद्धः?
   उत्तरम्- ज्योतिषेण।
7. प्रश्न-ज्योतिषशास्त्रे कति नक्षत्राणि भवन्ति?
   उत्तरम्- 27 सप्तविंशतिः।
8. प्रश्न-भुवनानां सङ्ख्या का?
   उत्तरम्- 14-चतुर्दश।
9. प्रश्न-चतुर्दशरत्नानि कस्मादुद्गतानि?
   उत्तरम्- क्षीरसमुद्रात्।

10. प्रश्न-"आदित्याः" कति प्रसिद्धाः?
उत्तरम्- द्वादश (12)
11. प्रश्न-शुक्रग्रहः कयोः राश्योःस्वामी?
उत्तरम्- वृष-तुलयोः।
12. प्रश्न-खगोल-ज्ञानस्य बींज किम्?
उत्तरम्- ज्योतिषशास्त्रम्।
13. प्रश्न-वराहमिहिरस्य कति पुस्तकानि सन्ति?
उत्तरम्-पञ्च, 1. वृहत्संहिता, 2. वृहज्जातक, 3. लघुजातक, 4. पञ्चसिद्धान्तिका, 5. योगयात्रा।
14. प्रश्न-"आर्चज्योतिष" नामके ज्योतिषवेदांगे कति संख्यकाः श्लोकाः सन्ति?
उत्तरम्- (36)
15. प्रश्न-वेदपुरुषस्य नेत्ररूपेण किं स्वीक्रियते?
उत्तरम्- ज्योतिषाम्।
16. प्रश्न-तिलक-महोदयस्य वैदिककालनिर्धारणस्य आधारः कः?
उत्तरम्- ज्योतिषशास्त्रम्।
17. प्रश्न-वर्तमाने कस्य वेदस्य वेदाङ्गज्योतिषः अनुपलब्ध?
उत्तरम्- सामवेदस्य।
18. प्रश्न-याजुष ज्यौतिषे कति पद्यानि सन्ति?
उत्तरम्- (49 पद्यानि)
19. प्रश्न-आथवर्ण ज्यौतिषे कति पद्यानि सन्ति?
उत्तरम्- (162 पद्यानि।)
20. प्रश्न-ज्यौतिषशास्त्रस्य किं प्रयोजनम्?
उत्तरम्-यज्ञेषु समयशुद्धिः(मुहूर्त-विचार)
21. प्रश्न-पञ्चाङ्गस्य पञ्च-अङ्गानि कानि सन्ति?
उत्तरम्- 1. तिथिः, 2. वारः, 3. नक्षत्रम्, 4. योगः, 5. करणम्।
22. प्रश्न सौर-मन्त्रीमण्डले बुधस्य स्थानं किमस्ति?
उत्तरम्- युवराजस्य।
23. प्रश्न-ज्यौतिष-वेदाङ्गस्य कति भागाः सन्ति?
उत्तरम्- (3त्रीणि) 1. संहिता, 2. जातकः, 3. गणितम्।
24. प्रश्न-ज्यौतिष-वेदाङ्गे कति ग्रहाःभवन्ति?
उत्तरम्-(9 नवग्रहाः) 1. सूर्यः, 2. चन्द्रः, 3. मङ्गलः, 4. बुध, 5. गुरुः, 6. शुक्रः, 7. शनि, 8. राहुः, 9. केतुः।
25. प्रश्न-कौ ग्रहौ "छायाग्रह" इति कथ्यते?
उत्तरम्- राहु-केतौ।

26. प्रश्न-सर्वैः मन्दगतिः कः ग्रहः वर्तते?
उत्तरम्- शनैश्चरः(शनैश्शनैः चरति इति शनैश्चरः)
27. प्रश्न-प्रथित ज्यौतिषिकाःविद्वांसः के?
उत्तरम्- 1. आर्यभट्टः, 2. वराहमिहिरः, 3. ब्रह्मगुप्तः, 4. भास्कराचार्यः।
28. प्रश्न-आत्मायाः कारक-ग्रहः कः?
उत्तरम्- सूर्यः।
29. प्रश्न-चन्द्रमसः कस्य कारकः मन्यते?
उत्तरम्- मनसः।
30. प्रश्न-न्यायदर्शने अध्यात्मेन कस्य ग्रहस्य सम्बन्धः अस्ति?
उत्तरम्- शनैश्चरस्य।
31. प्रश्न- ब्रह्मगुप्त रचित "खण्डखाद्यक" ग्रन्थे कस्य निरूपणं अस्ति?
उत्तरम्- खण्डखाद्यके गणितीय-समस्या-सिद्धान्तानाञ्च निरूपणम्।
32. प्रश्न-ब्रह्मगुप्तः "ध्यानग्रहोपदेश" ग्रन्थे कस्य सूत्राणि कथितः?
उत्तरम्- कलनगणितस्य(कैल्युकसस्य) सूत्राणि।
33. प्रश्न-गोविन्दकृतिग्रन्थे कस्या चर्चा अस्ति?
उत्तरम्- 1. अङ्कगणितः, 2. मापकविद्या, 3. खगोलविद्या।
34. प्रश्न-वासनाभाष्ये किं विवेचितमस्ति?
उत्तरम्- खगोलीय-पिण्डानां गतिः।
35. प्रश्न-वैदिक मेथेमेटिक्स इति ग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्- 16 षोडष् श्लोकाः।
36. प्रश्न-ज्यामिति इत्यस्य 29 तम प्रमेयः केन नाम्ना अस्माकं देशे पाठयति स्म?
उत्तरम्-पाइथोगोरेस प्रमेयस्य नाम्ना।
37. प्रश्न-पाइथोगोरेस-प्रमेयस्य कस्मिन् सूत्रे उल्लेखोऽस्ति?
उत्तरम्- शुल्बसूत्रे।
38. प्रश्न-वर्गमूल-धनमूल प्राप्ति-पद्धतेः यूरोपियान् कदा ज्ञानं अभूवन्?
उत्तरम्- 1613 ईस्वीये।
39. प्रश्न-आर्यभट्टस्य नियमः किमस्ति?
उत्तरम्- "भागं हरेद्वर्गान्नित्यं द्विगुणेन वर्गमूलेन।
वर्गाद्ववर्गे शुद्धे लब्धं स्थानान्तरे मूलम्।।"
40. प्रश्न-आर्यभट्टः कदा अभूत्?
उत्तरम्- 499 ईस्वीये।
41. प्रश्न-बीजगणितस्य अन्य नाम किमस्ति?
उत्तरम्- 1. कुट्टकगणितम्, 2. अव्यक्तगणितम्।
42. प्रश्न-आर्यभट्टःपाई "इत्यस्य मानस्य विषये किं कथ्यते?
उत्तरम्-"चतुरधिकं शतम्-अष्टगुणं द्विषष्टिस्तथा सहस्राणाम्।
अयुतद्वयविष्कम्भस्यासन्नो वृन्नो वृत्तपरिग्रहः।।

43. प्रश्न-आर्यभट्टेन कति मानं निर्धारितं क्रियते?
उत्तरम्- (=3.1416)
44. प्रश्न-आधुनिकमानं किं कथ्यते?
उत्तरम्- ("ञ3.1416926)
45. प्रश्न-भारतीय-मनीषिन: समयस्य सूक्ष्म-अंशं कं मन्यते?
उत्तरम्- त्रुटिम्।
46. प्रश्न-त्रुटि:सैकेण्डयोर्मध्ये किम् अन्तरमस्ति?
उत्तरम्- त्रुटि:1एकसैकेण्डस्य 33750वाँ अश: अस्ति।
47. प्रश्न-भारतीय-वैज्ञानिकानां सूक्ष्ममापकपरिमाणं किमस्ति?
उत्तरम्- त्रयसरेणु:।
48. प्रश्न-त्रयसरेणु: इञ्चयोर्मध्ये किम् अन्तरमस्ति?
उत्तरम्- त्रयसरेणु: इञ्चस्य 346525 वाँ अंश:अस्ति।
49. प्रश्न-क: सर्वप्रथमं अवबोधयत् यत् प्रकाश-उष्णता च एकेव तत्त्वस्य भिन्नं-भिन्नंरूपं वर्तते?
उत्तरम्- महर्षि कणाद:।
50. प्रश्न-उष्मा व प्रकाशस्य किरणेषु अपि अतिसूक्ष्म-परमाणु:स्यात् इति वार्ता: केन कथ्यते?
उत्तरम्- महर्षि वाचस्पति:।
51. प्रश्न-ऋषि:उदयन: विश्वस्य समस्त उष्णताया: मूलभण्डार: कं कथ्यते?
उत्तरम्-सूर्यम्।
52. प्रश्न- भास्कराचार्य: कस्मिन् ग्रन्थे पृथिव्या:गोलत्वमिति स्वीकृत:?
उत्तरम्-सिद्धान्तशिरोमणे: गोलाध्याये।
53. प्रश्न- भरद्वाज:यन्त्रसर्वस्वस्य वैमानिक प्रकरणे कतिप्राचीनग्रन्थानामुल्लेख: कृतमस्ति?
उत्तरम्-(25 पञ्चविंशति: ग्रन्थानाम्।
54. प्रश्न-विज्ञानग्रन्थ: "अंशुबोधिनीये" कति सूत्राणि सन्ति?
उत्तरम्- (1000) एकसहस्र सूत्राणि।
55. प्रश्न-अंशुबोधिनी ग्रन्थे कुल कति अध्याया: सन्ति?
उत्तरम्- 12 द्वादशाध्याया:।
56. प्रश्न-महर्षिपराशर: कृषि-विषये कं ग्रन्थं विरचित:?
उत्तरम्- कृषि-पराशरम्।
57. प्रश्न-आचार्य सारण:सूर्यकिरणस्य गतिं किं मन्यते?
उत्तरम्- 2202योजन अर्धनिमेष:(186413.22 मीला:)।
58. प्रश्न- तद्विषयक-सारणस्योक्ति:किम्?
उत्तरम्- तथा च स्मर्यते योजनानां सहस्रे द्वे द्वे च योजने।
एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते।।
59. प्रश्न-साम्प्रतिक-वैज्ञानिकै:प्रकाशस्य स्वीकृतिगति: किमस्ति?
उत्तरम्- (186300 मीला:)

60. प्रश्न- आर्यभट्टस्य कृति आर्यभटीयः कति पादेषु विभक्तोऽस्ति?
उत्तरम्-चत्वारः, 1. दशगीतिकापादः, 2. गणितवादः, 3. कालक्रियापादः, 4. गोलपादः।
61. प्रश्न- आर्यभट्टद्वितीयस्य "महासिद्धान्त" ग्रन्थे कस्य विवेचनमस्ति?
उत्तरम्- ज्यौतिष-गणितयोश्च।
62. उत्तरम्- ब्रह्मगुप्तस्य निवासस्थानं कुत्र वर्तते?
उत्तरम्- भीनमाले(श्रीमाले)
63. प्रश्न- ब्रह्मगुप्तस्य कौ द्वौ ग्रन्थौ स्तः?
उत्तरम्- 1. ब्राह्मस्फुटसिद्धान्तः, 2. खण्डखाद्यकः।
64. प्रश्न-गणततिलकम् इति ग्रन्थे कति पद्यानि सन्ति?
उत्तरम्- 125 पद्यानि।
65. प्रश्न- म. म. पं. सुधाकर द्विवेदी महोदयस्य जन्म कदा अभूत्?
उत्तरम्- ईसवीय संवत्सर 1860 वर्षे।
66. प्रश्न- वृक्षायुर्वेदे पादपानां जन्मं कतिविधिं मन्यते?
उत्तरम्- त्रिविधः, 1. बीजात्, 2. काण्डात्, 3. कन्दात्।
67. प्रश्न- वृक्षायुर्वेदे पादपानां कति भेदाः मन्यते?
उत्तरम्- चत्वारः, 1. वनस्पतिः, 2. द्रुमः, 3. लता, 4. गुल्म।
68. प्रश्न-वैशेषिकाः पादपानां कति भेदाः मन्यन्ते?
उत्तरम्- षड्, 1. तृणम्, 2. औषधिः, 3. लता, 4. अवतान, 5. वृक्ष, 6. वनस्पतिः।
69. प्रश्न-अमरकोषानुसारं पादपानां स्वीकृत भेदाः के सन्ति?
उत्तरम्- 1. वृक्षः, 2. क्षुपः, 3. लता, 4. औषधिः, 5. तृणम्, 6. द्रुमः।
70. प्रश्न-प्राचीन भारतीय-विज्ञानं केन नाम्ना ज्ञायते?
उत्तरम्- ज्योतिष-विज्ञानम्।
71. प्रश्न-वेदपुरुषस्य नेत्रं कं मन्यते?
उत्तरम्- ज्योतिषशास्त्रम्।
72. प्रश्न-वर्तमाने कस्य वेदस्य वेदाङ्ग-ज्योतिषमनुपलब्धोऽस्ति?
उत्तरम्- सामवेदस्य।
73. प्रश्न-सूर्यादि ग्रह-कालश्च बोधकशास्त्रं किं कथ्यते?
उत्तरम्- ज्योतिषशास्त्रम्।
74. प्रश्न-ज्योतिषशास्त्रं कान् व्यक्तयितुं शास्त्रमस्ति?
उत्तरम्- सृष्टेःप्रकृत्याश्च रहस्यम्।
75. प्रश्न-कालवर्गीकरणदृष्ट्या जयोतिषस्य इतिहासं कति भागेषु विभाज्यते?
उत्तरम्- 6 षड्भागेषु।
76. प्रश्न-एक कल्प-कालेषु कति वर्षाः भवन्ति?
उत्तरम्- 4320000000 वर्षाः।

77. प्रश्न-ज्योतिषशास्त्र-इतिहासस्य प्रथमयुगं किमस्ति?
उत्तरम्- अन्धकारकाल:।
78. प्रश्न-ई. पू. दशसहस्रवर्षपूर्वस्य ज्योतिषस्य समय: किमासीत्?
उत्तरम्- अन्धकारयुग:।
79. प्रश्न-ज्योतिषशास्त्रस्य उदयकालस्य आरम्भ:कदात: मन्यते?
उत्तरम्- 1000 त: ई. पू. 500 पर्यन्तम्।
80. प्रश्न-ऋग्वेदे वर्षं कति चान्द्रमासेषु विभाजितोऽस्ति?
उत्तरम्- 12 द्वादशचान्द्रमासेषु।
81. प्रश्न-तैतरीयसंहितायां अधिमास: कस्य द्योतक: अस्ति?
उत्तरम्- संसर्पस्य।
82. प्रश्न-तैतरीयसंहितायां बृहस्पति कस्य द्योतक: अस्ति?
उत्तरम्- क्षयमासस्य।
83. प्रश्न-ऋग्वेदे चान्द्र-सौरवर्षस्य च समन्वयस्थापयितुं कस्या कल्पना क्रियते?
उत्तरम्- अधिमासस्य कल्पना।
84. प्रश्न-ऋग्वेदे वर्षस्य वाचकशब्द: किमस्ति?
उत्तरम्- शरद:-हेमन्तश्च।
85. प्रश्न-गोपथब्राह्मणे वर्षाय कस्य शब्दस्य प्रयोगो भवति?
उत्तरम्- हायन:।
86. प्रश्न-बाजसनेयी-संहितायां समा शब्द: कस्मै प्रयुक्तोऽस्ति?
उत्तरम्- वर्षाय।
87. प्रश्न-कस्य वेदस्यानुसारं वसन्तारम्भत: वर्षारम्भो भवति?
उत्तरम्- यजुर्वेदस्यानुसारम्।
88. प्रश्न-उदयकाले ज्योतिषस्य प्रसिद्धग्रन्थ:कोऽस्ति?
उत्तरम्- प्रश्नव्याकरणं समवायांग:।
89. प्रश्न-ज्योतिषस्य आदिकाल: कदात:प्रारम्भो भवति?
उत्तरम्- ई. पू. 501त: ई. 500 पर्यन्तम्।
90. प्रश्न-अदिकाले ज्योतिषस्य प्रसिद्ध: ग्रन्थ: कोऽस्ति?
उत्तरम्- वेदाङ्ग-ज्योतिषम्।
91. प्रश्न-फलितस्य दृष्ट्या आदिकालस्य प्रसिद्ध: ग्रन्थ: कोऽस्ति?
उत्तरम्- अथर्व- ज्योतिषम्।
92. प्रश्न-आदिकालस्य जैन ज्योतिषग्रन्था: के सन्ति?
उत्तरम्-1. सूर्य-प्रज्ञप्ति:, 2. चन्द्र-प्रज्ञप्ति:, 3. जम्बूद्वीप प्रज्ञप्ति:, 4. ज्योतिष करकण्डक।
93. प्रश्न-आदि वेदाङ्ग-ज्योतिषज्ञानं कं प्राप्नुवन्ति?
उत्तरम्- पितामह-ब्रह्मम्।

94. प्रश्न-आदिकाले ज्योतिषस्य प्रवर्तक-आचार्याणां संख्या: का:?
उत्तरम्- 18 अष्टादश संख्या:।
95. प्रश्न-ईसवी सन् पञ्चमसदीये प्रसिद्धज्योतिर्विदस्य नाम किमस्ति?
उत्तरम्- आर्यभट्ट:।
96. प्रश्न-आदिकालस्य ज्योतिषाचार्या: के सन्ति?
उत्तरम्- 1. ऋषिपुत्र:, 2. चन्द्रबाहु:, 3. कालकाचार्य:।
97. प्रश्न-आदिकाले के: प्रसिद्धसिद्धान्तग्रन्थाणां रचनाकारा: अभूवन्?
उत्तरम्-1. पितामह:, 2. वाशिष्ठ:, 3. रोमक:, 4. पोलिश:, 5. सूर्य:, 6. पराशर:, इत्यादय: सिद्धान्तग्रन्थानाम्।
98. प्रश्न-आदिकाले ज्योतिषस्य विशालतमग्रन्थ: कोऽस्ति?
उत्तरम्- अंगविज्या।
99. प्रश्न-लल्लाचार्यस्य गुरु क: आसीत्?
उत्तरम्- आर्यभट्ट:।
100. प्रश्न-"शिष्यधीवृद्धि" ज्योतिषग्रन्थस्य लेखक: क: आसीत्?
उत्तरम्- लल्लाचार्य:।
101. प्रश्न-पूर्वमध्यकालस्य समय: क:?
उत्तरम्- ई. 501 त: 1000 पर्यन्तम्।
102. प्रश्न-उत्तरमध्यकालस्य समय: कोऽस्ति?
उत्तरम्- ई. 1001 त: 1600 पर्यनतम्।
103. प्रश्न- उत्तरमध्यकालस्य सुप्रसिद्ध-ज्योतिर्विद: क:?
उत्तरम्- भास्कराचार्य:।
104. प्रश्न-आधुनिककालस्य समय: कोऽस्ति?
उत्तरम्- 1601 त: अद्यपर्यन्तम्।
105. प्रश्न- आधुनिककालस्य गणितज्योतिषस्य प्रसिद्ध:ग्रन्थ: कोऽस्ति?
उत्तरम्- सिद्धान्ततत्त्वविवेक:।
106. प्रश्न-जयसिंह: वेधशाला कदा स्थापिता?
उत्तरम्- (ई. सन् 1780)
107. प्रश्न-आधुनिक ज्योतिषस्य कौ द्वौ भेदौ स्त:?
उत्तरम्- पाश्चात्य-भारतीयौ।
108. प्रश्न-लोक-व्यवहार-हेतु ज्योतिषस्य क्रियात्मक-सिद्धान्ता: के सन्ति?
उत्तरम्- 1. गणित सिद्धान्त:, 2. फलित सिद्धान्त:।
109. प्रश्न-गणित-ज्योतिषस्य के त्रिभेदा:?
उत्तरम्- 1. करणम्, 2. तन्त्रम्, 3. सिद्धान्त:।
110. फलित ज्योतिषस्य के पञ्चभेदा:?
उत्तरम्- 1. जातक:, 2. ताजिक:, 3. मुहूर्त:, 4. प्रश्न:, 5. शकुन:।

111. प्रश्न-"पचांगम्" कानि कथ्यते?
उत्तरम्- पंचानाम् अंगानाम् समाहारः इति पचांगम्।
112. प्रश्न-तिथेः पञ्चसंज्ञकाः काः सन्ति?
उत्तरम्- 1. नन्दा, 2. भद्रा, 3. जया, 4. रिक्ता, 5. पूर्णा।
113. प्रश्न-एकस्मिन् मासे कति पक्षाः भवन्ति?
उत्तरम्- द्वौ पक्षौ, 1. शुक्लपक्षः, 2. कृष्णपक्षः।
114. प्रश्न-एकपक्षे कति तिथयः भवन्ति?
उत्तरम्- 15 पञ्चदशतिथयः।
115. प्रश्न-तिथीनां गणना कस्मात् पक्षतः भवति?
उत्तरम्- शुक्लपक्षस्य प्रतिपदातः।
116. प्रश्न-नक्षत्राणि कानि कथ्यन्ते?
उत्तरम्- आकाशे असंख्य-ताराणां समूहान्।
117. प्रश्न-अष्टविंशति तमं नक्षत्रं किमस्ति?
उत्तरम्- अभिजित्।
118. प्रश्न-अभिजित् नक्षत्रं कदा भवति?
उत्तरम्- उत्तराषाढ़ायाःअन्तिम-पञ्चदशघटी एवं श्रावणनक्षत्रस्य प्रारम्भस्य चतुष्घटी कुल ऊनविंशतिः घटी।
119. प्रश्न-पंचकः कं कथ्यते?
उत्तरम्- पञ्चनक्षत्राणां समूहान्।
120. प्रश्न-पंचके कानि नक्षत्राणि आगच्छन्ति?
उत्तरम्- 1. घनिष्ठा, 2. शतभिषा, 3. पूर्वभाद्रपद, 4. उत्तराभाद्रपद, 5. रेवती।
121. प्रश्न-मूल-संज्ञकानि नक्षत्राणि कानि सन्ति?
उत्तरम्- 1. ज्येष्ठा, 2. आश्लेषा, 3. रेवती, 4. मूल, 5. मघा, 6. अश्विनी।
122. प्रश्न-एक-नक्षत्रे कति चरणाः भवन्ति?
उत्तरम्- चत्वारः।
123. प्रश्न-ज्योतिषशास्त्रे कति योगाः सन्ति?
उत्तरम्- 27 सप्तविंशतिः।
124. प्रश्न-पञ्चसिद्धान्तिकायां केषां पञ्चसिद्धान्तानां संग्रहः अस्ति?
उत्तरम्- 1. पितामहः, 2. वसिष्ठः, 3. रोमकः, 4. पौलिशः, 5, सूर्यः सिद्धान्तानां संग्रहः।
125. प्रश्न-कस्मिन् सिद्धान्तग्रन्थे केवल सूर्य-चन्द्रमसोः गणितमस्ति?
उत्तरम्- पितामहसिद्धान्ते।
126. प्रश्न-"बृहत्पाराशरी" ग्रन्थे कति अध्यायाः सन्ति?
उत्तरम्- 17 सप्तदशाध्यायाः।
127. प्रश्न-ऋषिपुत्रः कस्य धर्मस्य अनुयायिनःआसीत्?
उत्तरम्- जैनधर्मस्य।

128. प्रश्न-आर्यभट्टीय ग्रन्थस्यानुसारं पृथिव्या:परिधि: किमस्ति?
उत्तरम्- (4967 योजनम्।
129. प्रश्न-सूर्य एवं चन्द्रग्रहणयो: वैज्ञानिककारणस्य व्याख्या क: कृतवान्?
उत्तरम्- आर्यभट्ट:।
130. प्रश्न-कस्मिन् स्थानोपरि आर्यभट्टीयग्रन्थं रचितवान्?
उत्तरम्- पटनायाम् (बिहारे)
131. प्रश्न-कस्मिन् शास्त्रे प्राचीन अंगविद्याया: नियम:संकलितोऽस्ति?
उत्तरम्- अंगविज्जा।
132. प्रश्न-"महा आर्यभट्टीय" ग्रन्थस्य अपर नाम किमस्ति?
उत्तरम्- "महा आर्यसिद्धान्त:"।
133. प्रश्न-"महा आर्यभट्टीय सिद्धान्ते" कति अध्याया: सन्ति?
उत्तरम्- 19 अध्याया: तथा 625 आर्य उपगीति: सन्ति।
134. प्रश्न-लल्लाचार्यस्य "शिष्यधीवृद्धि" ग्रन्थे अध्यायस्य संख्या का, का: च ता:?
उत्तरम्- द्वे, 1. गणिताध्याय:, 2. गोलाध्याय:।
135. प्रश्न-क: ज्योतिर्विद: लल्लाचार्यस्य सिद्धान्तानां खण्डणं कृतवान्?
उत्तरम्- भास्कराचार्य:।
136. प्रश्न-वराहमिहिरस्य जन्म कदा अभूत्?
उत्तरम्- ईसवी सन् 505 वर्षे।
137. प्रश्न-ज्योतिषशास्त्रे गणितस्य प्रवर्तक: कं मन्यते?
उत्तरम्- ब्रह्मगुप्तम्।
138. प्रश्न-बीजगणितस्य नवीन-नियमानां आविष्कार: क: कृतवान्?
उत्तरम्- ब्रह्मगुप्त:।
139. प्रश्न-ब्रह्मगुप्त: पृथिव्या: स्थिति: कीदृश: मन्यते?
उत्तरम्- स्थिर:।
140. प्रश्न-पृथिव्या: चलन सिद्धान्त: कस्य वर्तते?
उत्तरम्- आर्यभट्टस्य।
141. प्रश्न-"लघुमानस" ग्रन्थे कस्य शकाब्दस्य अहर्गण-सिद्धं कृतवान्?
उत्तरम्- 584 शकाब्दस्य।
142. प्रश्न-महावीराचार्य: कस्य सम्प्रदायस्य गणितज्ञ: अभूत्?
उत्तरम्- जैन सम्प्रदायस्य।
143. प्रश्न-"ज्योतिषपटल" स्य विषय: किमस्ति?
उत्तरम्- ग्रह, नक्षत्र, ताराणाञ्च स्थानं, स्थिति: संख्यादि इत्यस्य च प्रतिपादनम्।
144. प्रश्न-वराहमिहिरस्य कृते: सिद्धहस्त-टीकाकार: कोऽस्ति?
उत्तरम्- भट्टोत्पल:।

145. प्रश्न-वराहमिहिरस्य पुत्रः कोऽस्ति?
उत्तरम्- पृथुयशाकृतः।
146. प्रश्न-"प्रश्नज्ञान" ग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्- 700 सप्तशतम् आर्या श्लोकाः।
147. प्रश्न-भट्टोत्पलस्य जन्मसमयः किमस्ति?
उत्तरम्- (ईसवीं सन् 888)
148. प्रश्न-"सिद्धान्तशेखर" ग्रन्थस्य लेखकः कः?
उत्तरम्- श्रीपतिः।
149. प्रश्न-श्रीपतेः गणितग्रन्थस्य प्रमुख-विशेषता का अस्ति?
उत्तरम्- सः ज्या खण्डेन विना एव चापमानेन ज्यां सिद्धं कृतवान्।
150. प्रश्न-श्रीपतेः जन्म समयः किमस्ति?
उत्तरम्- (ईसवी सन् 999)
151. प्रश्न-"जातकतिलक" कस्यां भाषायां लिखितमस्ति?
उत्तरम्- कन्नड़ भाषायाम्।
152. प्रश्न-दक्षिण भारते प्रामाणिकः जातकग्रन्थः कोऽस्ति?
उत्तरम्- श्रीधरस्य जातकतिलकः।
153. प्रश्न-नरपतिजयचर्या कदा अलिखत्?
उत्तरम्- वि. स. 1232 तमे।
154. प्रश्न-स्वर-विज्ञान द्वारा शुभाशुभफलं कस्मिन् ग्रन्थे अस्ति?
उत्तरम्- नरपतिजयचर्या ग्रन्थे।
155. प्रश्न-"अद्भुत सागर" ग्रन्थस्य लेखकः कः?
उत्तरम्- मिथिलायाः राजा लक्ष्मण सेनस्य पुत्रः बल्लालसेनः।
156. प्रश्न-"अद्भुत सागर" नाम्नः संग्रहग्रन्थः कस्मिन् काले अलिखत्?
उत्तरम्- श. सं. 1092 वर्षे।
157. प्रश्न-भास्कराचार्यस्य जन्म कदा तथा कुत्र अभूत्?
उत्तरम्- ईसवी सन् 1114 तमे वर्षे, विज्जड़विड़ नामक ग्रामे।
158. प्रश्न-भास्कराचार्यस्य पिता कः आसीत्?
उत्तरम्- महेश्वर उपाध्यायः।
159. प्रश्न-भास्कराचार्यः कस्य आचार्यस्य मतस्य खण्डनं कृतवान्?
उत्तरम्- आर्यभट्टः, लल्लः, ब्रह्मगुप्तः।
160. प्रश्न-भास्कराचार्यस्य प्रमुखविशेषता किमस्ति?
उत्तरम्- ज्योतिर्विदेन सह श्रेष्ठकवित्वम्।
161. प्रश्न-अद्भुतसागरग्रन्थस्य का विशेषता अस्ति?
उत्तरम्- गद्य-पद्ययोः ज्योतिषेन सह इतिहासस्य वर्णनम्।

162. प्रश्न-"बेड़ा जातक वृत्तिः" इति ग्रन्थस्य का विशेषता अस्ति?
उत्तरम्- लग्न-चन्द्राभ्यां एव समस्त फलस्य ज्ञानम्।
163. प्रश्न-यन्त्रराजस्य परमक्रान्तिः कति सन्ति?
उत्तरम्- 23 अंशः 35 कला।
164. प्रश्न-यन्त्रराजस्य रचना कदा अभूत्?
उत्तरम्- शक संवत् 1192 वर्षे।
165. प्रश्न-यन्त्रराजे कति अध्यायाः सन्ति?
उत्तरम्- पञ्चाध्यायाः, 1. गणितध्यायः, 2. यंत्रघटनाध्यायः, 3. यन्त्ररचनाध्यायः, 4. यन्त्रशोधनाध्यायः, 5. यन्त्र विचारणाध्यायः।
166. प्रश्न-मकरन्दः कस्य ग्रन्थस्याधारे तिथ्यादि साधन-सारिणी निर्मितः?
उत्तरम्-सूर्यसिद्धान्तस्याधारे मकरन्द सारिणी वाराणस्यां शक सं. 1400 वर्षे निर्मितः।
167. प्रश्न-मकरन्द-सारिणी इत्यस्य उपयोगः किमस्ति?
उत्तरम्- वर्तमाने पचांग निर्माणम्।
168. प्रश्न-गणेश दैवज्ञस्य माता-पितरौ कौ आस्ताम्?
उत्तरम्- माता-लक्ष्मी, पिता-केशवदेवः।
169. प्रश्न-गणेशदैवज्ञस्य जन्म कदा अभूत्?
उत्तरम्- ईसवी सन् 1517 तमे वर्षे।
170. प्रश्न-ग्रहलाघवस्य रचनाकाले लेखकस्य आयुः कियत् आसीत्?
उत्तरम्- 13 त्रयोदश वर्षस्य।
171. प्रश्न-"जातकाभरणम्" इत्यस्य ढुण्ढ़िराजस्य जन्म समयः किमस्ति?
उत्तरम्- ई. सन् 1541 वर्षे।
172. प्रश्न-"जातकाभरणम्" ग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्- 2000 श्लोकाः।
173. प्रश्न-नीलकण्ठस्य माता-पित्रोः किं नाम आसीत्?
उत्तरम्- माता-पद्मा, पिता-अनन्तदेवज्ञः।
174. प्रश्न-ताजिकनीलकण्ठी ग्रन्थस्य आधारः किमस्ति?
उत्तरम्- अरबी-फारसी इत्यस्य (ज्योतिषग्रन्थः)।
175. प्रश्न-नीलकण्ठी ग्रन्थे कति तन्त्राणि सन्ति?
उत्तरम्- त्रीणि, 1. संज्ञातन्त्रम्, 2. वर्षतन्त्रम्, 3. प्रश्नतन्त्रम्।
176. प्रश्न-मुहूर्त्तचिन्तामणिः ग्रन्थस्य रचना कदा अभूत्?
उत्तरम्- शक संवत् 1522 तमे वर्षे।
177. प्रश्न-रामदैवज्ञस्य करण ग्रन्थः कोऽस्ति?
उत्तरम्- रामविनोदः।
178. प्रश्न-लेखकः रामविनोदः कया आज्ञया कदा अलिखत्?
उत्तरम्- सम्राट अकबरस्य आज्ञया शक संवत् 1512 तमे वर्षे अलिखत्।

179. प्रश्न-सूर्यसिद्धान्तस्य "गूढ़ार्थ प्रकाशिका" नाम्नी टीका केन विरचिता?
उत्तरम्- रंगनाथेन।
180. प्रश्न-मुहूर्त्तचिन्तामणि इत्यस्य "पीयूषधारा" व्याख्या केन लिखिता?
उत्तरम्- गोविन्द दैवज्ञेन।
181. प्रश्न-महाराज जयसिंह: वेधशाला कदा कुत्र च निर्मितवान्?
उत्तरम्- ई. सन् 1780 तमे वर्षे काश्यां-जयपुरे-देहल्याम्।
182. प्रश्न-सूर्यसिद्धान्तस्य आधुनिकसिद्धान्तानामाधारोपरि किम् अरचयत्?
उत्तरम्- विज्ञानभाष्यम्।
183. प्रश्न-गणित-ज्योतिषस्य सिद्धान्तानां वैज्ञानिक-विवेचनं कदा अभूत्?
उत्तरम्- आधुनिकयुगे।
184. प्रश्न-मुनिश्वरस्य पितु: नाम किमस्ति?
उत्तरम्- रंगनाथ:।
185. प्रश्न-नृसिंहस्य पुत्रस्य नाम किमासीत्?
उत्तरम्- दिवाकर:।
186. प्रश्न-कस्यामवस्थायां दिवाकर: जातकपद्धति: इत्यस्य रचना कृतवान्?
उत्तरम्- 19 वर्षस्यावस्थायाम्।
187. प्रश्न-दिवाकरस्य भ्रातु: नाम किमासीत्?
उत्तरम्- कमलाकर भेट्ट:।
188. प्रश्न-भास्कराचार्यस्य सिद्धान्तानां खण्डनं क: अकुर्वत्?
उत्तरम्- कमलाकर भट्ट:।
189. प्रश्न-"सिद्धान्ततत्त्वविवेक:" इत्यस्य रचना कस्मिन् शकसंवत्सरे अभूत्?
उत्तरम्- 1580 शकसंवत्सरे।
190. जगन्नाथ-सम्राट् क: आसीत्?
उत्तरम्- तैलंग ब्राह्मण:।
191. प्रश्न-जगन्नाथ-सम्राट् कस्या; सभाया: पण्डित: आसीत्?
उत्तरम्- जयपुर-नरेश-जयसिंह महाराजस्य।
192. प्रश्न-बापूदेवशास्त्रीमहोदयस्य जन्म कदा कुत्र च अभूत्?
उत्तरम्- ई. सन् 1821 वर्षे पूना नगरे।
193. प्रश्न- बापूदेवशास्त्रीमहोदय: कस्य ग्रन्थस्य संशोधनं कृतवान्?
उत्तरम्- सिद्धान्तसिरोमणिग्रन्थस्य।
194. प्रश्न-नीलाम्बर झा कस्य राज्ञ: आश्रित: आसीत्?
उत्तरम्- अलवरस्य राजा शिवदाससिंहस्य।
195. प्रश्न-वर्तमान ज्योतिषशास्त्रस्य उद्धारक: कं मन्यते?
उत्तरम्- सुधाकर द्विवेदी महोदयम्।

196. प्रश्न-प्राचीन जटिल ग्रन्थस्य प्रकाशनं द्विवेदी महोदयः कथं कृतवान्?
उत्तरम्- ग्रन्थानां भाष्य, उपपत्ति, टीकादि लिखित्वा।

197. प्रश्न-बृहत्संहितायां कति अध्यायाः सन्ति?
उत्तरम्- 107 अध्यायाः।

198. प्रश्न-अधिमासः कथं जायते?
उत्तरम्-यस्मिन् चान्द्रमासे सूर्यस्य संक्रान्ति न भवति, तं अधिमासः कथ्यते। (असंक्रान्ति मासोऽधिमासः)

199. प्रश्न-चान्द्रमासे द्वे संक्रान्तिःभविते सति किं निर्माति?
उत्तरम्- क्षयमासः। (द्वि संक्रानितमासःक्षयाख्यः)

200. प्रश्न-आदिकालस्य अन्ते ज्योतिषस्य कति भेदाः कथ्यते?
उत्तरम्- त्रयोभेदाः, 1. गणितम्, 2. सिद्धान्तः, 3. फलितम्।

201. प्रश्न-पूर्वकालस्य प्रारम्भे ज्योतिषस्यार्थः कस्मिन् रूपे गृह्यते?
उत्तरम्- स्कन्धत्रये, 1. सिद्धान्तः, 2. संहिता, 3. होरा रूपे।

202. प्रश्न-वर्तमानयुगे ज्योतिषं कस्मिन् रूपे मन्यते?
उत्तरम्- पञ्चरूपात्मकम्, 1. होरा, 2. गणित/सिद्धान्तः, 3. संहिता, 4. प्रश्नः, 5. शकुनम्।

203. प्रश्न-उत्तरमध्यकाले प्रकटभावे गणितस्य कति भेदाः कथ्यन्ते?
उत्तरम्- त्रयोभेदाः, 1. सिद्धान्तः, 2. करणम्, 3. तन्त्रम्।

204. प्रश्न-सिद्धान्तग्रन्थः कं कथ्यते?
उत्तरम्-येषु सृष्टयादितः इष्टदिन पर्यन्तं अहर्गणं साध्यते।

205. प्रश्न-तन्त्रग्रन्थः कं कथ्यते?
उत्तरम्-येषु युगादितः इष्टदिनपर्यन्तम् अहर्गणं निर्मित्वा ग्रह-गणितं क्रियते, सैव तन्त्रग्रन्थं कथ्यते।

206. प्रश्न-करणग्रन्थः कं कथ्यते?
उत्तरम्-येषु कल्पित-इष्टवर्षं युगं स्वीकृत्य तस्य युगस्यान्तर्गत एव कश्चित् अभीष्टदिनस्य अहर्गणं निर्मित्वा ग्रहानयनं क्रियते तं करणग्रन्थं कथ्यते।

207. प्रश्न-संहिताशास्त्रस्य जन्म कस्मिन् काले अभूत्?
उत्तरम्- आदिकाले।

208. प्रश्न-संहितायाः परिभाषा का?
उत्तरम्- संहितायाःपरिभाषा होरा, गणित, शकुनानां मिश्रितरूपे मन्यते।

209. प्रश्न-प्रश्नशास्त्रस्य कति सिद्धान्ताः सन्ति?
उत्तरम्- त्रयो सिद्धान्ताः, 1. प्रश्नाक्षर-सिद्धान्तः, 2. प्रश्नलग्न-सिद्धान्तः, 3. स्वरविज्ञान-सिद्धान्तः।

210. प्रश्न-ज्योतिषस्य उद्भवस्थानं किमस्ति?
उत्तरम्- आर्यावर्तः।

211. प्रश्न-ज्योतिषशास्त्रस्य अपरनाम किमस्ति?
उत्तरम्- ज्योतिःशास्त्रम्।
212. प्रश्न-ज्योतिषशास्त्रस्यार्थः किमस्ति?
उत्तरम्-यस्मिन् शास्त्रे संसारस्य मर्म, जीवन-मरणस्य रहस्यं, जीवनस्य सुख-दुःखानां सम्बन्धे पूर्णप्रकाशं प्राप्यये, तत् एव ज्योतिषशास्त्रम्।
213. प्रश्न-ज्योतिषशास्त्रस्य लक्ष्यं किमस्ति?
उत्तरम्-प्राकृतिक-पदार्थानाम् अणु-अणु इत्यस्य परिशीलनं विश्लेषणञ्च करणम्।
214. प्रश्न-ज्योतिषशास्त्रे प्रधानग्रहाः कान् मन्यन्ते?
उत्तरम्- सूर्य-चन्द्रमसौ।
215. प्रश्न-पञ्चतत्त्वरूपे के ग्रहाः सन्ति?
उत्तरम्- 1. भौमः, 2. बुधः, 3. गुरु, 4. शुक्र, 5. शनि।
216. प्रश्न-भारतीय-ज्योतिषशास्त्रं कीदृशं शास्त्रम्?
उत्तरम्- विज्ञानशास्त्रम्।
217. प्रश्न-आवान्तरस्य ज्योतिषकाले वर्षानां कति भेदाः कथ्यन्ते?
उत्तरम्- नवभेदाः।
218. प्रश्न-वैदिककाले दिनं कति भागेषु विभाज्यन्ते?
उत्तरम्- चतुर्षु भागेषु, 1. पूर्वाह्नः, 2. मध्याह्नः, 3. अपराह्नः, 4. सायाह्नः।
219. प्रश्न-वैदिकदर्शनेषु कर्मणः कति भेदाः कथ्यन्ते?
उत्तरम्- त्रयः, 1. सम्वित, 2. प्रारब्धः, 3. क्रियमाणम्।
220. प्रश्न-मानवशरीराणि भौतिकशरीराणि च कति उप-शरीरेषु विभक्तोऽस्ति?
उत्तरम्- त्रीणि, 1. ज्योतिः, 2. मानसिकः, 3. पौद्गलिकः।
221. प्रश्न-ज्योतिषशास्त्रे कालं किं मन्यते?
उत्तरम्- पुरुष-ब्रह्म।
222. प्रश्न-कस्मिन् ग्रन्थे पृथिव्याः गुरुत्वाकर्षणस्य उल्लेखोऽस्ति?
उत्तरम्- भास्कराचार्य कृत सिद्धान्त-शिरोमणिः ग्रन्थे।
223. प्रश्न-वृत्तस्य परिधेः कियत् भागः समतलं दृश्यन्ते?
उत्तरम्- 100 शततम् भागः।
224. प्रश्न-यवनानां कारणात् भारतीय ज्योतिषे कस्याः पद्धतेः समावेशः अभूत्?
उत्तरम्- ताजिक-पद्धतेः।

फलित-ज्योतिष-विज्ञानम्-

225. प्रश्न-ज्योतिष-विज्ञानस्य कः पक्षः लोक-प्रसिद्धोऽस्ति?
उत्तरम्- फलित-ज्योतिषः।
226. प्रश्न-फलित-ज्योतिषस्य आधारः कोऽस्ति?
उत्तरम्- गणित-ज्योतिषाम्।

227. प्रश्न-कति वर्णाः भवन्ति?
उत्तरम्- चत्वारः, (1. ब्राह्मणः, 2. क्षत्रियः, 3. वैश्यः, 4. शूद्रः।)
228. प्रश्न-ज्योतिषशास्त्रं कीदृशः शास्त्रम्?
उत्तरम्- काल-बोधकम्।
229. प्रश्न-ज्योतिषशास्त्रस्य आन्तरिक-मर्मः कोऽस्ति?
उत्तरम्- चिन्तनेन जीवनेन च सम्बद्ध-सत्यस्य विश्लेषणम्।
230. प्रश्न-भारतीयज्योतिषे बिन्दुः कस्य प्रतीकः मन्यते?
उत्तरम्- मायायाः प्रतीकः।
231. प्रश्न-भारतीयज्योतिषशास्त्रस्य प्राणः कः?
उत्तरम्- गणितशास्त्रम्।
232. प्रश्न-पंचसंवत्सरात्मक-युगस्य कति भेदाः?
उत्तरम्- पञ्चभेदाः, 1. नक्षत्रम्, 2. युगम्, 3. प्रमाणम्, 4. लक्षणम्, 5. शनिः।
233. प्रश्न-ज्योतिषशास्त्रे ग्रहाणां कति बलानि प्राप्यन्ते?
उत्तरम्- षड्बलानि, 1. स्थानबलम्, 2. दिग्बलम्, 3. कालबलम्, 4. चेष्टाबलम्, 5. नैसर्गिकबलम्, 6. दृगबलम्।
234. प्रश्न-भारतीयज्योतिषस्य कालवर्गीकरणं कति भागेषु विभक्तोऽस्ति?
उत्तरम्- षड्भागेषु।
235. प्रश्न- भारतीयज्योतिषस्य प्राचीनतम-इतिहासः कस्मिन् रूपे वर्तते?
उत्तरम्- खगोलविद्यायाःरूपे।
236. प्रश्न- भारतीयज्योतिषस्य कानि त्रीणि स्कन्दानि?
उत्तरम्- 1. सिद्धान्तः, 2. होरा, 3. संहिता।
237. प्रश्न-ज्योतिषस्य आधुनिक-पञ्चस्कन्दानि कानि सन्ति?
उत्तरम्-1. मनोविज्ञानम्, 2. जीवविज्ञानम्, 3. पदार्थविज्ञानम्, 4. रसायनविज्ञानम्, 5. चिकित्साविज्ञानम्।
238. प्रश्न-ज्योतिषे तत्काल-फलं ज्ञानात्मकं शास्त्रं किमस्ति?
उत्तरम्- प्रश्नशास्त्रम्।
239. प्रश्न-तिथिः कं कथ्यते?
उत्तरम्- चन्द्रमसः एकां कलां तिथिः कथ्यते।
240. प्रश्न-तिथिः कति भवन्ति?
उत्तरम्- तिथिः पञ्चदश(15) भवन्ति।
241. प्रश्न-प्रतिपदायाःस्वामी कोऽस्ति?
उत्तरम्- अग्निः।
242. प्रश्न-द्वितीया-तिथेः स्वामी कोऽस्ति?
उत्तरम्- ब्रह्मा।

243. प्रश्न-तृतीया-तिथे: स्वामी कोऽस्ति?
उत्तरम्- गौरी(पार्वती)।
244. प्रश्न-चतुर्थी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- गणेश:।
245. प्रश्न-पञ्चमी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- शेषनाग:।
246. प्रश्न-षष्ठी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- कार्तिकेय:।
247. प्रश्न-सप्तमी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- सूर्य:।
248. प्रश्न-अष्टमी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- शिव:।
249. प्रश्न-नवमी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- दुर्गा।
250. प्रश्न-दशमी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- काल:।
251. प्रश्न-एकादशी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- विश्वदेव:।
252. प्रश्न-द्वादशी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- विष्णु:।
253. प्रश्न-त्रयोदशी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- कामदेव:।
254. प्रश्न-चतुर्दशी- तिथे: स्वामी कोऽस्ति?
उत्तरम्- शिव:।
255. प्रश्न-पूर्णिमा- तिथे: स्वामी कोऽस्ति?
उत्तरम्- चन्द्रमा।
256. प्रश्न-अमावस्या- तिथे: स्वामी कोऽस्ति?
उत्तरम्- पितर:।
257. प्रश्न-अमावस्या कां कथ्यते?
उत्तरम्-यस्मिन् दिनं सूर्य: चन्द्र-राशे:/कलायां/अंशे/विकलायां समं भवति, तद् दिनस्य समयं अमावास्या कथ्यते।
258. प्रश्न-चान्द्रदिनं कं कथ्यते?
उत्तरम्- एक:चन्द्रोदयत: द्वितीय-चन्द्रोदयपर्यन्तस्य समयं चान्द्रदिनम्।
259. प्रश्न-चन्द्रमासस्य समय: कति भवन्ति?
उत्तरम्-शुक्लपक्षस्य प्रतिपदात: कृष्णपक्षस्य अमावस्या-पर्यन्तचन्द्रमास: भवति।

260. प्रश्न-अमावस्यायां कस्य ग्रहणं भवति?
उत्तरम्- सूर्यग्रहणम्।
261. प्रश्न-पूर्णिमायां कस्य ग्रहणं भवति?
उत्तरम्- चद्रग्रहणम्।
262. प्रश्न-अमावस्याया: संक्षिप्त नाम किम्?
उत्तरम्- अमा।
263. प्रश्न-वेदाङ्गज्यौतिषस्य रचयिता क:?
उत्तरम्- लगधाचार्य:।
264. प्रश्न-क्षयमास: कं कथ्यते?
उत्तरम्- द्वि संक्रानितमास:क्षयाख्य:।
265. प्रश्न-शुद्धमास: कं कथ्यते?
उत्तरम्- यस्मिन् चान्द्रमासे सूर्यस्य सक्रान्ति: स्यात् स: मास: शुद्धमास:।
266. प्रश्न-आर्यभट्ट: कस्य शास्त्रस्य विद्वान् आसीत्?
उत्तरम्- ज्यौतिषशास्त्रस्य।
267. प्रश्न-पृथ्वीत:निकटतमो ग्रह: कोऽस्ति?
उत्तरम्- बुध:।
268. प्रश्न-सूर्यस्य सक्रान्ति: कदा भवति?
उत्तरम्- सूर्यस्यैकराशितोऽपरराशिगमनं संक्रान्ति:।
269. प्रश्न-योगा: कति भवन्ति?
उत्तरम्- 27 सप्तविंशति:।
270. प्रश्न-करणानि कति भवन्ति, कानि च तानि?
उत्तरम्- 11 एकादश, 1. बव, 2. बालव, 3. कौलव, 4. तैतिल, 5. गर, 6. वणिज:, 7. विष्टि:, 8. शकुनि, 9. चतुष्पद:, 10. नाग:, 11. किंस्तुघन।
271. प्रश्न-चर-करणानि कति भवन्ति?
उत्तरम्- 7 सप्त।
272. प्रश्न-स्थिर-करणानि कति भवन्ति?
उत्तरम्- 4 चत्वारि।
273. प्रश्न-एक-तिथौ कति करणानि भवन्ति?
उत्तरम्- 2 द्वे।
274. प्रश्न-बव-करणस्य स्वामी कोऽस्ति?
उत्तरम्- इन्द्र:।
275. बालव-करणस्य स्वामी कोऽस्ति?
उत्तरम्- ब्रह्मा।
276. प्रश्न-कौलव- करणस्य स्वामी कोऽस्ति?
उत्तरम्- सूर्य:।

277. प्रश्न-तैतिल- करणस्य स्वामी कोऽस्ति?
उत्तरम्- सूर्यः।
278. प्रश्न-गर- करणस्य स्वामी कोऽस्ति?
उत्तरम्- पृथ्वी।
279. प्रश्न-वणिज- करणस्य स्वामी कोऽस्ति?
उत्तरम्- लक्ष्मी।
280. प्रश्न-विष्टि- करणस्य स्वामी कोऽस्ति?
उत्तरम्- यमः।
281. प्रश्न-शकुनि- करणस्य स्वामी कोऽस्ति?
उत्तरम्- कलियुगः।
282. प्रश्न-चतुष्पद- करणस्य स्वामी कोऽस्ति?
उत्तरम्- रूद्रः।
283. प्रश्न-नाग- करणस्य स्वामी कोऽस्ति?
उत्तरम्- सर्पः।
284. प्रश्न- किंस्तुध्न- करणस्य स्वामी कोऽस्ति?
उत्तरम्- वायुः।
285. प्रश्न-मंगलः कस्य राशेः स्वामी अस्ति?
उत्तरम्- मेष व वृश्चिक राशयोः।
286. प्रश्न-शुक्रः कस्य राशेः स्वामी अस्ति?
उत्तरम्- वृष व तुला राशयोः।
287. प्रश्न-बुधः कस्य राशेः स्वामी अस्ति?
उत्तरम्- कन्या व मिथुन राशयोः।
288. प्रश्न-चन्द्रमा कस्य राशेः स्वामी अस्ति?
उत्तरम्- कर्क राशेः।
289. प्रश्न-सूर्यः कस्य राशेः स्वामी अस्ति?
उत्तरम्- सिंह राशेः।
290. प्रश्न-वृहस्पतिः कस्य राशेः स्वामी अस्ति?
उत्तरम्- मीन व धनु राशयोः।
291. प्रश्न-शनिः कस्य राशेः स्वामी अस्ति?
उत्तरम्- मकर व कुंभ राशयोः।
292. प्रश्न-राहुः कस्य राशेः स्वामी अस्ति?
उत्तरम्- कन्या राशेः।
293. प्रश्न-केतुः कस्य राशेः स्वामी अस्ति?
उत्तरम्- मिथुन राशेः।

294. प्रश्न-एक-विपले कति प्रतिपलः भवन्ति?
उत्तरम्- 60 प्रतिपलः।
295. प्रश्न-एक-पले कति विपलः भवन्ति?
उत्तरम्- 60 विपलः।
296. प्रश्न-एका घटीके कति पलाः भवन्ति?
उत्तरम्- 60 पलाः।
297. प्रश्न-एक-घटीके कति मिनटाः भवन्ति?
उत्तरम्- 24 मिनटाः।
298. प्रश्न-एक-मिनटे कति पलाः भवन्ति?
उत्तरम्- 2.5 पलाः।
299. प्रश्न-एक-सैकण्डे कति विपलाः भवन्ति?
उत्तरम्- 2. 5विपलाः।
300. प्रश्न-राशिः केन रचयते?
उत्तरम्- नक्षत्रेण।
301. प्रश्न-एक-राशौ कति नक्षत्राणि भवन्ति?
उत्तरम्- 2. 25 नक्षत्राणि।
302. प्रश्न-एक-होरायां कति घटिका भवन्ति?
उत्तरम्- 2. 5 घटिका।
303. प्रश्न-एक-अहोरात्रे कति घटिका भवन्ति?
उत्तरम्- 60 घटिका।
304. प्रश्न-एक-विकलायां कति प्रतिविकला भवन्ति?
उत्तरम्- 60 प्रतिविकला।
305. प्रश्न-एक-कलायां कति विकला भवन्ति?
उत्तरम्- 60 विकला।
306. प्रश्न-एक-अंशे कति कला भवन्ति?
उत्तरम्- 60 कला।
307. प्रश्न-एक-राशौ कति अंशाः भवन्ति?
उत्तरम्- 30 अंशाः।
308. प्रश्न-एक-भगणे कति राशयः भवन्ति?
उत्तरम्- 12 राशयः।
309. प्रश्न-एक-अंगुले कति यवाः भवन्ति?
उत्तरम्- 8 यवाः(जौं)
310. प्रश्न-एक-हस्ते कति अंगुलानि भवन्ति?
उत्तरम्- 24 अंगुलानि।

311. प्रश्न-चत्वार: हस्ते कति दण्डानि (बाँसा:) भवन्ति?
उत्तरम्- एक-दण्ड:।
312. प्रश्न-एक-कोशे कति दण्डा: (बाँसा:) भवन्ति?
उत्तरम्- 2000बाँसा:।
313. प्रश्न-एक-होरायां कति अंशा: भवन्ति?
उत्तरम्- 15 अंशा:।
314. प्रश्न-एक-राशौ कति होरा: भवन्ति?
उत्तरम्- 2 होरा:।
315. प्रश्न-होरा शब्दस्य अपरनाम किमस्ति?
उत्तरम्- जातक-शास्त्रम्।
316. प्रश्न-होरा शब्दस्य उत्पत्ति:केन शब्देन भूयते?
उत्तरम्- अहोरात्र शब्देन।
317. प्रश्न-एक-घटीके कति प्राणा: भवन्ति?
उत्तरम्- चत्वार: प्राणा:।
318. प्रश्न-के ग्रहा: एकैक राशे: स्वामी अस्ति?
उत्तरम्- सूर्य:, चन्द्र:। (सूर्य:-सिंह:, चन्द्र:-कर्क राशे:।
319. प्रश्न-शक काल: कदा निर्माति?
उत्तरम्- संवते 135 घटिते सति शक मानं निर्माति।
320. प्रश्न-प्राण: कं कथ्यते?
उत्तरम्- पल-समयं प्राण: कथ्यते।
321. प्रश्न-नवमांशस्य मानं किं वर्तते?
उत्तरम्- एक राशे: नवमोभाग: नवांश: कथ्यते।
322. प्रश्न-नवांश:कति अंशानां व कलाया: भवन्ति?
उत्तरम्- 3अंशानां व 20 कलाया:।
323. प्रश्न-एक-राशौ कति दशमांशा: भवन्ति?
उत्तरम्- 10 (दश।)
324. प्रश्न-एक-दशमांश: कति अंशस्य भवति?
उत्तरम्- 3 (त्रयांशस्य)।
325. प्रश्न-एक-राशौ कति द्वादशांश: भवन्ति?
उत्तरम्- 12 (द्वादशांशा:)।
326. प्रश्न-राशौ कति अंशस्य एक-द्वादशांश: भवति?
उत्तरम्- 2.5 अंशस्य।
327. प्रश्न-एक-राशौ कति षोडशांशा: भवन्ति?
उत्तरम्- 16 षोडशांश:।

328. प्रश्न-षोडशांशस्य मानं वर्तते?
उत्तरम्- 1अंश:52कला30विकला। (1+52" 30")
329. प्रश्न-एक-राशौ कति षष्टयंशा: भवन्ति?
उत्तरम्- 60 (षष्टयंशा:)।
330. प्रश्न-एक-षष्टयंश: कति कलाया: भवन्ति?
उत्तरम्- 30 कलाया:।
331. प्रश्न-कालस्य भेदा: कति जायन्ते ?
उत्तरम्- (9) नव।
332. प्रश्न-एक द्रेष्काण: कति अंशस्य भवति?
उत्तरम्- 10 अंशस्य।
333. प्रश्न-एक-राशौ कति द्रेष्काणा: भवन्ति?
उत्तरम्- त्रय: द्रेष्काणा:।
334. प्रश्न-विंशोत्तरी दशायां कति वर्षानां आयु: स्वीकृत्वा ग्रहाणां विभाजनं कृतं स्यात्?
उत्तरम्-120 वर्षानाम्।
335. प्रश्न-योगिनी दशा कति वर्षेषु पूर्णो भवन्ति?
उत्तरम्- 36 वर्षेषु।
336. प्रश्न-संवत-मानं कथं ज्ञायन्ते?
उत्तरम्- शक-काले 135 युक्ते सति संवतमानं भवन्ति।
337. प्रश्न-ईसवीय सन् कथं निर्मीयते?
उत्तरम्- संवत्सर-माने 57 शोधितेसति।
338. प्रश्न-सिनीवाली कं कथ्यते?
उत्तरम्- प्रात: कालात् रात्रिपर्यन्तं व्यतीतां अमावस्याम्।
339. प्रश्न-दर्श: कं कथ्यते?
उत्तरम्- चतुदर्शीत:विद्ध पर्यन्तं व्यतीतां अमावस्याम्।
340. प्रश्न-कुहू कं कथ्यते?
उत्तरम्- प्रतिपदेन युक्ताम् अमावस्याम्।
341. प्रश्न-नक्षत्रं कं कथ्यते?
उत्तरम्- अनेक-ताराणां समुदायम्।
342. प्रश्न-भावेश: कं कथ्यते?
उत्तरम्-यस्मिन् भावे य: राशि:स्यात्, तस्य राशे: स्वामी एव भावेश:।
343. प्रश्न-कस्मिन् स्थाने शुभ ग्रहाणां वास: शुभकरोऽस्ति?
उत्तरम्- (1/4/5/7/9/10)
344. प्रश्न-कस्मिन् भावे पाप-ग्रहाणां वास: शुभकरोऽस्ति?
उत्तरम्- (3/6/11)

345. प्रश्न-वर्ष-संवत्सर: कं कथ्यते?
उत्तरम्- संवसन्ति ऋतव: यत्र।
346. प्रश्न-गुलिक: कं कथ्यते?
उत्तरम्- शने: खण्डम्।
347. प्रश्न-कति भावा: के च ते?
उत्तरम्- द्वादश, 1. तनु:, 2. द्रव्यम्, 3. सहज:, 4. सुखम्, 5. सुतम्, 6. शत्रु:, 7. कलत्रम्, 8. रन्ध्र:, 9. तप:, 10. पिता, 11. आय:, 12. व्यय:।
348. प्रश्न-सन्धि: कं कथ्यते?
उत्तरम्- द्वयो: भावयो: योगार्धम्।
349. प्रश्न-पञ्चाङ्गानि कानि?
उत्तरम्- 1. तिथि:, 2. नक्षत्रं, 3. योग:, 4. करणं, 5. वारम्।
350. प्रश्न-पंचांग कं कथ्यते?
उत्तरम्- पंचानाम् अंगानां समाहार: इति पंचांग:। (तिथि:, नक्षत्रं, योग:, करणं, वारम्।)
351. प्रश्न-संवत्सर: कति भवन्ति?
उत्तरम्- प्रभवादि 60 संवत्सराणि भवन्ति।
352. प्रश्न-अष्टकूटेन क: अभिप्राय:अस्ति?
उत्तरम्- विवाहे गुण-मेलापकस्य प्रक्रिया।
353. प्रश्न-कस्या: तिथे: संज्ञा नन्दा अस्ति ?
उत्तरम्- (1/6/11)
354. प्रश्न- कस्या: तिथे: संज्ञा भद्रा अस्ति?
उत्तरम्- (2/7/12)
355. प्रश्न-कस्या: तिथे: संज्ञा जया अस्ति?
उत्तरम्- (3/8/13)
356. प्रश्न- कस्या: तिथे: संज्ञा रिक्ता अस्ति?
उत्तरम्- (4/9/14)
357. प्रश्न- कस्या: तिथे: संज्ञा पूर्णा अस्ति?
उत्तरम्- (5/10/15)
358. प्रश्न-ईसा पूर्व 1000 वर्षस्य पूर्व समयं किं कथ्यते?
उत्तरम्- अन्धकारकाल:।
359. प्रश्न-भारतीयज्योतिषस्य प्राचीनतम-इतिहास: कस्मिन् रूपे अस्ति?
उत्तरम्- खगोलविद्याया: रूपे।
360. प्रश्न-होरा शास्त्रस्य प्राचीनाऽऽचार्य: कोऽस्ति?
उत्तरम्- वराहमिहिर:।
361. प्रश्न-सिद्धान्त-शास्त्रस्य अपरनाम किमस्ति?
उत्तरम्- गणितशास्त्रम्।

362. प्रश्न-सिद्धान्तः कं कथ्यते?
उत्तरम्- येषु सृष्ट्यादितः इष्टदिन पर्यन्तं अहर्गणं-कृत्वा ग्रहाणयनं क्रियते तं सिद्धान्तं कथ्यते।
363. प्रश्न-तन्त्रः कं कथ्यते?
उत्तरम्-यत्र युगादितः इष्टदिन-पर्यन्तं अहर्गणं कृत्वा ग्रहाणयनं क्रियते तं तन्त्रं कथ्यते।
364. प्रश्न-संहिताशास्त्रस्य विषयः किमस्ति?
उत्तरम्- 1. भूशोधनम्, 2. दिक् शोधनम्, 3. मेलापकः।
365. प्रश्न-प्रश्नशास्त्रस्य के त्रयो सिद्धान्ताः?
उत्तरम्- 1. प्रश्नाक्षरसिद्धान्तः, 2. प्रश्नलग्नसिद्धान्तः, 3. स्वरविज्ञानसिद्धान्तः।
366. प्रश्न-प्रश्नशास्त्रस्य प्रमुखग्रन्थाः के सन्ति?
उत्तरम्- 1. केवल-ज्ञानप्रश्नचूड़ामणि, 2. चन्द्रोन्मीलनप्रश्नः, 3. आयज्ञानतिलकः।
367. प्रश्न-भारतस्य कस्मिन् राज्ये प्रश्नशास्त्रं प्रचलितम्?
उत्तरम्- केरलराज्ये।
368. प्रश्न- विशेषदृष्टि इत्यस्य को अभिप्रायः?
उत्तरम्- मंगल-4/8, गुरू-5/9, शनि-3/10, इति भावं पूर्णदृष्ट्या दृश्यन्ति।
369. प्रश्न-भूमिशयनं कदा भवति?
उत्तरम्- सूर्य-सङ्क्रांतितः 5/7/9/12/19/26 दिनम्।
370. प्रश्न-शकुनशास्त्रस्य अपरनाम किमस्ति?
उत्तरम्- निमित्तशास्त्रम्।
371. प्रश्न-भारतीयज्योतिषशास्त्रस्य प्राणः किमस्ति?
उत्तरम्- अंकविद्या(गणितम्)
372. प्रश्न-भारतीयज्योतिषशास्त्रस्य आविष्कारः कदा अभूत्?
उत्तरम्- ई. सन् तः 10000 वर्षपूर्वम्।
373. प्रश्न-बाह्य-व्यक्तित्वस्य प्रथमरूपविचारस्य प्रतीकग्रहः किमस्ति?
उत्तरम्- बृहस्पति।
374. प्रश्न-आन्तरिक-व्यक्तित्वस्य प्रथमरूपस्य प्रतीकग्रहःकिमस्ति?
उत्तरम्- शुक्रः।
375. प्रश्न-बौद्धिक-शारीरिक-उन्नतेः प्रतीकग्रहःकिमस्ति?
उत्तरम्- सूर्य-चन्द्रमा।
376. प्रश्न-शरीरचक्रं ग्रहकक्षावृत इति कः ऋषिःमन्यते?
उत्तरम्- वराहमिहिरः।
377. प्रश्न-आत्माकारंक ग्रहः कोऽस्ति?
उत्तरम्- सूर्यः।
378. प्रश्न-मनसः सम्बन्धः केन ग्रहेण अस्ति?
उत्तरम्- चन्द्रेण।

379. प्रश्न-धैर्यप्रदाताग्रह: कोऽस्ति?
उत्तरम्- मंगल।
380. प्रश्न-बुध: कारक: वर्तते?
उत्तरम्- वाणी।
381. प्रश्न-भारतीयज्योतिषशास्त्रनिर्माताणां द्वे लक्ष्यं किमस्ति?
उत्तरम्- 1. व्यावहारिक:, 2. पारमार्थिक:।
382. प्रश्न-व्यावहारिक-लक्ष्येन किं तात्पर्यम्?
उत्तरम्- ग्रहस्थिते:गणनं कृत्वा दिक्, देश-कालानां परिज्ञानकरणम्।
383. प्रश्न-विप्रवर्णौ ग्रहौ स्त:?
उत्तरम्- गुरूशुक्रौ।
384. प्रश्न-क्षत्रियग्रहा: के सन्ति?
उत्तरम्- सूर्य व मंगल:।
385. प्रश्न-ज्योतिषशास्त्रे क्रमिक वाराधिपति:के सन्ति?
उत्तरम्- शिव:, पार्वती, स्कंद:, विष्णु:, इन्द्र:, रूद्र:।
386. प्रश्न-चौघड़िया इत्यनेन को अभिप्राय:?
उत्तरम्- चतस्र: घटिका=96 मिनटस्य समय:।
387. प्रश्न-वैश्यवर्णस्य स्वामी कोऽस्ति?
उत्तरम्- बुध:।
388. प्रश्न-शूद्रवर्णस्य स्वामी कोऽस्ति?
उत्तरम्- शनि।
389. प्रश्न-भारतीय ज्योतिषस्य आन्तरिक-मर्म: किमस्ति?
उत्तरम्- चिरन्तन-जीवनसत्यस्य च विश्लेषणकरणम्।
390. प्रश्न-भारतीय-ज्योतिषस्य ज्ञानं कथं अस्ति?
उत्तरम्- आगमज्ञानम्।
391. प्रश्न-बिन्दु-रेखा इत्यस्य च संयोगेन केषां त्रयाणां निर्माणमभूत्?
उत्तरम्- 1. रेखागणितम्, 2. बीजगणितम्, 3. अंकगणितम्।
392. प्रश्न-भारतीय ज्योतिषस्य प्राण: अस्ति?
उत्तरम्- गणितशास्त्रम्।
393. प्रश्न-भारतीय-ज्योतिष: मानवस्य पथ-प्रदर्शक: कथं स्यात्?
उत्तरम्- दीपकस्य सदृश:।
394. प्रश्न-पुरुष: एवं प्रकृतिरूपे क्रमिक ग्रहा:के सन्ति?
उत्तरम्- सूर्य एवं चन्द्रमा।
395. प्रश्न-कानि पञ्चतत्वानि?
उत्तरम्- 1. पृथ्वी, 2. जलम्, 3. तेज:, 4. वायु:, 5. आकाश:।

396. प्रश्न-पृथिव्याः सम्बन्धः केन ग्रहेण सह अस्ति?
उत्तरम्- मंगलेन।
397. प्रश्न-जल-तेजाभ्यां सम्बन्धितः ग्रहः कौ स्तः?
उत्तरम्- बुध व गुरु।
398. प्रश्न-करणं कं कथ्यते?
उत्तरम्- तिथेः अर्ध भागं करणं कथ्यते। (तिथेरर्धम्)
399. प्रश्न-एकस्यां तिथौ करणस्य कियती संख्या?
उत्तरम्- 2 द्वे।
400. प्रश्न-भद्रायाः अपरनाम किमस्ति?
उत्तरम्- विष्टि-करणम्।
401. प्रश्न-गणाः कति भवन्ति?
उत्तरम्- त्रयः, (1. देवः, 2. मनुष्यः, 3. राक्षसः।)
402. प्रश्न-नाडी कति भवन्ति?
उत्तरम्- त्रयः, (1. आदिः, 2. मध्यः, 3. अन्त्यः।)
403. प्रश्न-इष्टकालेन को अभिप्रायः?
उत्तरम्- स्थानीय-जन्म-समयःघटी पलात्मकः।
404. प्रश्न-इष्टकालः कं कथ्यते?
उत्तरम्- सूर्योदयतः जन्मसमयपर्यन्तं इत्यस्य अन्तरकालं इष्टकालं कथ्यते। (सूर्योदयाद्यात् कालं सावनेष्टं प्रकीर्तितम्)
405. प्रश्न-द्वादश राशीणां काःसंज्ञा अस्ति?
उत्तरम्- 1. चरः, 2. स्थिरः, 3. द्विस्वभावः।
406. प्रश्न-भयातं कं कथ्यते?
उत्तरम्- जन्मकाले नक्षत्रस्य व्यतीतमानम्।
407. प्रश्न-भभोगः कं कथ्यते?
उत्तरम्- जन्मनक्षत्रस्य पूर्णभोगकालः।
408. प्रश्न-लग्नं कं कथ्यते?
उत्तरम्- एक राशेः उदयकालं लग्नं कथ्यते। (राशीनामुदयो लग्नम्)
409. प्रश्न-भभोगस्य मानः अधिकतमः कति भवति?
उत्तरम्- 67 घटी।
410. प्रश्न-पलभा कां कथ्यते?
उत्तरम्-सूर्यःयदा शून्य राशौ, अंश, कला, विकला मध्याह्न समये द्वादश अंगुलस्य छायां पलभा कथ्यते।
411. प्रश्न-अयनांशानयनस्य आधारः कः ?
उत्तरम्- वर्तमान शक-444/60 =अयनांशः।

412. प्रश्न-प्राण-पद-साधनं किमस्ति?
उत्तरम्- इष्टकालं शुद्धकरणस्य प्रकार:।
413. प्रश्न-जन्म-पत्रीकाया: कति भागा: भवन्ति?
उत्तरम्- 12 द्वादश।
414. प्रश्न-भावसाधनाय कस्या: सहायता भवन्ति?
उत्तरम्- नतकालस्य।
415. प्रश्न-नतकाल: कति प्रकाराणां भवन्ति?
उत्तरम्- द्वे, 1. पूर्व-नतम्, 2. पश्चिम-नतम्।
416. प्रश्न-सन्धि: कां कथ्यते?
उत्तरम्- द्वयो: भावयो: योगं सन्धि: इति कथ्यते। (सन्धिर्द्वियोगोर्धित:)
417. प्रश्न-ग्रहाणां बलं ज्ञातुं कस्या: आवश्यकता अस्ति?
उत्तरम्- द्वादश वर्गस्य।
418. प्रश्न-द्वादश-वर्गा: के सन्ति?
उत्तरम्-1. राशि:, 2. होरा, 3. द्रेष्काण:, 4. चतुर्थांश:, 5. पंचमांश:, 6. षष्ठांश:, 7. सप्तमांश:, 8. अष्टमांश:, 9. नवमांश:, 10. दशमांश:, 11. एकादशांश:, 12. द्वादशांश:।
419. प्रश्न-एक-होरा कति अंशस्य भवन्ति?
उत्तरम्- 15 पञ्चदश-अंशस्य। (राशेरर्धं भवेद् होरा)
420. प्रश्न-अयन: कति भवन्ति?
उत्तरम्- द्वौ, 1. उत्तरायण:, 2. दक्षिणायन:।
421. प्रश्न-एक-राशौ कति होरा भवन्ति?
उत्तरम्- 2 द्वे।
422. प्रश्न-समराशौ प्रथमा-होरा कस्य भवन्ति?
उत्तरम्- चन्द्रमस:।
423. प्रश्न-विषम-राशौ प्रथमा-होरा कस्य भवन्ति?
उत्तरम्- सूर्यस्य।
424. प्रश्न-ग्रहाणां मित्रता कति प्रकारस्य भवन्ति?
उत्तरम्- द्वि प्रकारस्य, 1. नैसर्गिक:, 2. तात्कालिक:।
425. प्रश्न-आत्मकारक: ग्रह: कोऽस्ति?
उत्तरम्- सूर्य:।
426. प्रश्न- विंशोत्तरी दशा कति वर्षस्य भवन्ति?
उत्तरम्- 120 वर्षस्य।
427. प्रश्न-अष्टोत्तरी दशा विशेषस्य प्रचलनं कुत्र वर्तते?
उत्तरम्- दक्षिण-भारते।
428. प्रश्न- अष्टोत्तरी महादशा कति वर्षस्य भवन्ति?
उत्तरम्- 108 वर्षस्य।

429. प्रश्न-योगनी दशा कति वर्षस्य भवन्ति?
उत्तरम्- 36 वर्षस्य।
430. प्रश्न-ज्योतिषशास्त्रे ग्रह-बलं कति प्रकारस्य भवन्ति?
उत्तरम्-6 षड्, (1. स्थानम्, 2. दिक्, 3. कालः, 4. चेष्टा, 5. स्वाभाविकः, 6. दिक्बलम्।)
431. प्रश्न-अहर्गणः कं कथ्यते?
उत्तरम्- दिनानां गणनम् अहर्गणः।
432. प्रश्न-अहर्गणस्य का आवश्यकता अस्ति?
उत्तरम्- मध्यमग्रहाणयनकरणाय।
433. प्रश्न-गोचर-विधिः कं कथ्यते?
उत्तरम्- जन्म-राशिः द्वारा फलादेशकथनस्य विधिम्।
434. प्रश्न-कस्मिन् भावे ग्रहः शुभफलं दीयते?
उत्तरम्- एकादशभावे।
435. प्रश्न-कस्य भावस्य फलं शुभं भवति?
उत्तरम्-यस्य स्वामी मूल, त्रिकोण, स्वक्षेत्र, मित्र, ग्रह, उच्चस्य स्यात्।
436. प्रश्न-कालपुरुषस्य आत्मा काः?
उत्तरम्- सूर्यः।
437. प्रश्न-विशोंतरी दशा केन नक्षत्रेण प्रारम्भो भवति?
उत्तरम्- कृतिका नक्षत्रेण।
438. प्रश्न-योगिनी-दशायाः प्रारम्भः केन नक्षत्रेण भवति?
उत्तरम्- आर्द्रा-नक्षत्रेण।
439. प्रश्न-भयात कं कथ्यते?
उत्तरम्- जन्मकाले नक्षत्रस्य व्यतीतं मानम्।
440. प्रश्न-विशोंत्तरी-दशा क्रमसूत्रं किम्?
उत्तरम्- "आचंभौराजीशबुकेशु।"
441. प्रश्न-कालपुरुषस्य मनकारकःग्रहः वर्तते?
उत्तरम्- चन्द्रमसम्।
442. प्रश्न-कालपुरुषस्य वाणीकारकः ग्रहः वर्तते ?
उत्तरम्- बुधम्।
443. प्रश्न-रात्रि-गण्डः कं कथ्यते?
उत्तरम्- आश्लेषायाः अन्त एवं मघायाः प्रारम्भकालम्।
444. प्रश्न-दिवागण्डः कं कथ्यते?
उत्तरम्- ज्येष्ठामूलनक्षत्रयोः समयः।
445. प्रश्न-संध्यागण्डेन किं तात्पर्यम्?
उत्तरम्- रेवती-अश्वनी-नक्षत्रयोः दोषयुक्तकालम्।

446. प्रश्न-रज्जु-योग: किमस्ति?
उत्तरम्- जन्मकुण्डल्यां सम्पूर्णग्रहा: चर-राशौ भवनम्।
447. प्रश्न-मूसलयोग: कदा भवति?
उत्तरम्- जन्मकुण्डल्यां सम्पूर्णग्रहा: स्थिर-राशौ भवनम्।
448. प्रश्न-भारतीय-द्वादश मासानां कानि नामानि?
उत्तरम्- 1. चैत्र:, 2. वैशाख:, 3. ज्येष्ठ:, 4. आषाढ़:, 5. श्रावण:, 6. भाद्रपद:, 7. आश्विन:, 8. कार्तिक:, 9. मार्गशीष:, 10. पौष:, 11. माघ:, 12. फाल्गुन:।
449. प्रश्न-भगण: कं कथ्यते?
उत्तरम्- द्वादश-राशीनां समूहं एक भगण: कथ्यते।
450. प्रश्न-एक सौरमासे कति दिनानि भवन्ति?
उत्तरम्- 30 त्रिंशत् दिनानि।
451. प्रश्न-एक सावन-दिनेन को अभिप्राय:?
उत्तरम्- इनोदय द्वयान्तरम्। (सूर्योदयत: अग्रिमसूर्योदय पर्यन्तस्य समय:।)
452. प्रश्न-नाक्षत्रदिनं कथं निर्माति?
उत्तरम्- नक्षत्रेण। (एकनक्षत्रस्य उदयत:द्वितीयनक्षत्रस्य उदयपर्यनतम्।)
453. प्रश्न-एकतिथि: भोगकालं किं कथ्यते?
उत्तरम्- चान्द्रदिनम्।
454. प्रश्न-ग्रहाणां गति: कति प्रकारस्य भवति?
उत्तरम्- 8 अष्टप्रकारस्य।
455. प्रश्न-विंशोत्तरी इत्यस्य पञ्चभेदा: के सन्ति?
उत्तरम्- 1. महादशा, 2. अन्तर्दशा, 3. प्रत्यन्तर्दशा, 4. सूक्ष्मदशा, 5. प्राणदशा।
456. प्रश्न-योगिनीदशाया:कानि क्रमिक-नामानि?
उत्तरम्-1. मङ्गला, 2. पिङ्गला, 3. धान्या, 4. भ्रामरी, 5. भद्रिका, 6. उल्का, 7, सिद्धा, 8. संकटा।
457. प्रश्न-कस्यां तिथौ सूर्य-चन्द्रमा एकैव राशौं भवति?
उत्तरम्- अमावस्यायाम्।
458. प्रश्न-शल्य-क्रियायै उत्तम वार: कोऽस्ति?
उत्तरम्- शनिवार:।
459. प्रश्न-विद्यारम्भ: कस्मिन् दिने उत्तमोऽस्ति?
उत्तरम्- गुरुवारम्।
460. प्रश्न-ज्योतिषस्यानुसारं ग्रहकक्षाक्रम: कोऽस्ति?
उत्तरम्- चन्द्र-बुध-शुक्र-रवि-मंगल-बृहस्पति-शनि।
461. प्रश्न-पृथ्वीत: सर्वाधिक-दूर: कस्य ग्रहस्य कक्षा अस्ति?
उत्तरम्- शने:।

462. प्रश्न-आकाशे नक्षत्रचक्रं कति अंशस्य अस्ति?
उत्तरम्- 360 अंशस्य।
463. प्रश्न-एकस्मिन् अंशे कति समयः भवन्ति?
उत्तरम्- चत्वारः मिनटस्य।
464. प्रश्न-ज्योतिषशास्त्रस्य अष्टादश-प्रवर्तकाचार्याः के सन्ति?
उत्तरम्- 1. सूर्यः, 2. पितामहः, 3. व्यासः, 4. वसिष्ठः, 5. अत्रिः, 6. पराशरः, 7. कश्यपः, 8. नारदः, 9. गर्गः, 10. मरीचिः, 11. मनु, 12. अंगिरा, 13. लोमशः, 14. पुलिशः, 15. च्यवनः, 16. यवनः, 17. भृगुः, 18. शौनकः।
465. प्रश्न- ज्योतिषशास्त्रस्य अन्याचार्याः के सन्ति?
उत्तरम्- 1. लगधमुनिः, 2. कौटिल्यः, 3. ऋषिपुत्रः, 4. आर्यभट्ट प्रथमः, 5. कालकाचार्यः, 6. आर्यभट्ट द्वितीयः, 7. लल्लाचार्यः।

(प) ज्योतिषशास्त्रे परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-

466. प्रश्न-वेदांग-ज्योतिषशास्त्रस्य लेखकः कः?
उत्तरम्- लगधमुनिः।
467. प्रश्न-पंचसिद्धान्तिका इत्यस्य लेखकः कः?
उत्तरम्- वराहमिहिराचार्यः।
468. प्रश्न-वसिष्ठ सिद्धान्तस्य कर्त्ता कोऽस्ति?
उत्तरम्- विष्णुचन्द्रः।
469. प्रश्न-सूर्य सिद्धान्तस्य लेखकः कः?
उत्तरम्- सूर्यः।
470. प्रश्न-"रोमन सिद्धान्त" ग्रन्थस्य व्याख्याता कः?
उत्तरम्- लाटदेवः।
471. प्रश्न-ब्रह्मसिद्धान्त इत्यस्य लेखकः कः?
उत्तरम्- ब्रह्मगुप्तः।
472. प्रश्न-बृहत्पाराशरहोराशास्त्र इत्यस्य लेखकः कः?
उत्तरम्- पराशर मुनिः।
473. प्रश्न-बृहज्जातक इत्यस्य लेखकः कः?
उत्तरम्- वराहमिहिरः।
474. प्रश्न-"निमित्तशास्त्र" इत्यस्य लेखकः कः?
उत्तरम्- ऋषिपुत्रः।
475. प्रश्न-ऋषिपुत्रः कस्य शास्त्रस्य निर्माणं कृतम्?
उत्तरम्- शकुनशास्त्रम्।
476. प्रश्न-कालकसंहिता इत्यस्य लेखकः कः?
उत्तरम्- कालकाचार्यः।

477. प्रश्न-"महा आर्यभट्टीय" सिद्धान्तस्य रचयिता कः?
उत्तरम्- आर्यभट्ट द्वितीयः।
478. प्रश्न-"शिष्यधीवृद्धि" ग्रन्थस्य लेखकः कः?
उत्तरम्- लल्लाचार्यः।
479. प्रश्न-लल्लाचार्यः कस्य संहिताशास्त्रस्य रचना कृतम्?
उत्तरम्- रत्नकोषस्य।
480. प्रश्न-"कुवलयमाला" ग्रन्थस्य ग्रन्थकारःकः?
उत्तरम्- उद्योतन सूरि।
481. "बृहत्संहिता" इत्यस्य लेखकः कः?
उत्तरम्- वराहमिहिर।
482. प्रश्न-सारावली जातक ग्रन्थस्य लेखकः कः?
उत्तरम्- कल्याण वर्मा।
483. प्रश्न-"ब्रह्मस्फुट सिद्धान्त" इत्यस्य लेखकः कः?
उत्तरम्- ब्रह्मगुप्तः।
484. प्रश्न-ब्रह्मगुप्तस्य करण-ग्रन्थः कोऽस्ति?
उत्तरम्- खण्डखाद्यकः।
485. प्रश्न-लीलावती गणितम्" -केन रचितम्?
उत्तरम्- भास्कराचार्येण।
486. प्रश्न-"लघुमानस" करण ग्रन्थस्य लेखकः कः?
उत्तरम्- मुंजालः।
487. प्रश्न-आर्यभट्टः कं ग्रन्थं रचितवान्?
उत्तरम्- आर्यभट्टीयम्।
488. प्रश्न- खगोलग्रन्थः"गर्गसंहितायाः" प्रणेता कोऽस्ति?
उत्तरम्- महर्षि गर्गः।
489. प्रश्न-आर्यसिद्धान्त" इत्यस्य लेखकः कः?
उत्तरम्- आर्यभट्ट(प्रथम)
490. प्रश्न-भास्कराचार्यस्य अन्ये ग्रन्थाः के सन्ति?
उत्तरम्- 1. बीजगणितम्, 2. वासनाभाष्यः,।
491. प्रश्न-सिद्धान्तशिरोमणिः कस्या रचना वर्तते?
उत्तरम्- भास्कराचार्यस्य (1114 ईसवीये)
492. प्रश्न-महावीराचार्यस्य प्रसिद्ध-ग्रन्थः कोऽस्ति?
उत्तरम्- 1. ज्योतिषपटलः, 2. गणितसारसंग्रहः।
493. प्रश्न-षट्पंचाशिका इत्यस्य लेखकः कः?
उत्तरम्- पृथुयशा।

494. प्रश्न-"प्रश्नज्ञान" इत्यस्य लेखकः कः?
उत्तरम्- भट्टोत्पलः।
495. प्रश्न-आर्यभट्ट द्वितीयस्य ग्रन्थाः के?
उत्तरम्- 1. महासिद्धान्तम्, 2. महाभास्करीयः।
496. प्रश्न-गणिताचार्य-श्रीधराचार्यस्य कृतिः किमस्ति?
उत्तरम्- त्रिशती(त्रिशतिका) अथवा गणितसार(नामान्तरम्)
497. प्रश्न-त्रिशती ग्रन्थमाधारमनुश्रित्य भास्कराचार्यद्वितीयः कं विश्वप्रसिद्धग्रन्थं अलिखत्?
उत्तरम्- लीलावती।
498. प्रश्न-महाराष्ट्रे उत्पन्नः श्रीपतिभट्टस्य रचना का?
उत्तरम्- 1. बीजगणितम्, 2. गणिततिलकम्।
499. प्रश्न-सर्वाधिक-प्रसिद्धः भास्कराचार्य द्वितीयः कति ग्रन्थाः विरचयत्?
उत्तरम्- 1. लीलावती, 2. मुहूर्त्तपटलम्, 3. विवाहपटलम्, 4. सिद्धान्तशिरोमणिः, 5. करणकुतूहलम्, 6. बीजगणितम्।
500. प्रश्न-वोपदेवशास्त्री महोदयस्य कानि रचनाकार्यानि?
उत्तरम्- रेखागणितम्, अङ्कगणितम् मापनवादस्तत्त्वविवेकपरीक्षा इत्यादि।
501. प्रश्न-अङ्कगणितविषयकग्रन्थः"पाटीसार" इत्यस्य लेखकःकोऽस्ति?
उत्तरम्- मुनीश्वर(विश्वरूपः)
502. प्रश्न-म. म. पं. सुधाकर द्विवेदी महोदयःसूर्यसिद्धान्तोपरि का टीका अलिखत्?
उत्तरम्- सुधावर्षिणी।
503. प्रश्न-प्रसिद्ध "गणकतरङ्गिणी" इत्यस्य रचयिता कोऽस्ति?
उत्तरम्- पं. सुधाकर द्विवेदी।
504. प्रश्न-"आर्चज्योतिष" इत्यस्य ज्योतिषवेदांगस्य प्रणेता कः?
उत्तरम्- लगधाचार्यः।
505. प्रश्न-वराहमिहिरस्य कानि रचनाकार्याणि वर्तन्ते?
उत्तरम्-1. बृहज्जातकः, 2. लघुजातकम्, 3. पञ्चसिद्धान्तिका, 4. योगयात्रा, इत्यादयः।
506. प्रश्न-केरलस्य गोविन्दस्वामी कं ग्रन्थं विरचितः?
उत्तरम्- गोविन्दकृतिग्रन्थः।
507. प्रश्न-गणितसारसङ्ग्रहस्य लेखकः कः?
उत्तरम्- भास्कराचार्यः(भास्करद्वितीयः)
508. प्रश्न-सिद्धान्तशिरोमणि इत्यस्य लेखकः कः?
उत्तरम्- भास्कराचार्यः(भास्करद्वितीयः)
509. प्रश्न-चन्द्रसेनः कस्य ग्रन्थस्य रचना कृतवान्?
उत्तरम्- केवलज्ञानहोरा।
510. प्रश्न-श्रीपति महोदयस्य प्रमुख फलित-गणितज्योतिष ग्रन्थाःके सन्ति?
उत्तरम्- 1. पाटीगणित, 2. सिद्धान्तशेखरः, 3. बीजगणित, 4. श्रीपतिपद्धतिः, 5. रत्नावली, 6. रत्नसागरः, 7. रत्नमाला।

511. प्रश्न-गणितसार ग्रन्थस्य लेखक: क:?
उत्तरम्- पण्डित श्रीधर:।
512. प्रश्न-"ज्योतिर्ज्ञानविधि:" ग्रन्थस्य लेखक: क:?
उत्तरम्- पण्डित श्रीधर:।
513. प्रश्न-"आयज्ञानतिलक" कस्या: रचना अस्ति?
उत्तरम्- भट्टवोसरि।
514. प्रश्न-ताजिक ग्रन्थस्य ग्रन्थकार: क:?
उत्तरम्- यवनाचार्य:।
515. प्रश्न-"रमलसार" ग्रन्थस्य लेखक: क:?
उत्तरम्- पं. सीताराम:।
516. प्रश्न-"मुहूर्त्त तत्त्व" ग्रन्थस्य लेखक: क?
उत्तरम्- पं. केशवाचार्य:।
517. प्रश्न-"मुहूर्त्त मार्तण्ड" इत्यस्य लेखक: क:?
उत्तरम्- पं. नारायण:।
518. प्रश्न-"मुहूर्त्त-चिन्तामणि:" इत्यस्य लेखक: क:?
उत्तरम्- श्रीरामाचार्य:।
519. प्रश्न-"मुहूर्त्त कल्पद्रुम" इत्यस्य रचनाकार: क:?
उत्तरम्- विट्ठल दीक्षितस्य।
520. प्रश्न-नरपतिजयचर्या ग्रन्थस्य लेखक: क:?
उत्तरम्- अहिलपट्ठणस्य नरपति।
521. प्रश्न-"व्यवहारचर्या" ग्रन्थस्य लेखक: क:?
उत्तरम्- उदयप्रभदेव:।
522. प्रश्न-"आर्यसद्भाव" ग्रन्थस्य लेखक: क:?
उत्तरम्- मल्लिषेण:।
523. प्रश्न-राजादित्यस्य प्रमुख-रचना का:सन्ति?
उत्तरम्- 1. व्यवहारगणितम्, 2. क्षेत्रगणितम्, 3. व्यवहाररत्नम्।
524. प्रश्न-ग्रहभावप्रकाश ग्रन्थस्य लेखक: क:?
उत्तरम्- पद्मप्रभसूरि:।
525. प्रश्न- पद्मप्रभसूरि महोदयस्य अन्य रचना का?
उत्तरम्- भुवन-दीपक:।
526. प्रश्न-"ज्योतिषप्रकाश" ग्रन्थस्य लेखक: कोऽस्ति?
उत्तरम्- नरचन्द्र उपाध्याय:।
527. प्रश्न-नरचन्द्र उपाध्यायस्य अन्य-रचना: का: सन्ति?
उत्तरम्- 1. प्रश्नशतक:, 2. बेडाजातकवृत्ति:, 3. ज्ञानदीपिका, 4. प्रश्नचतुर्विंशतिका।

528. प्रश्न-"यंत्रराज" ग्रन्थस्य लेखकः कः?
उत्तरम्- महेन्द्र सूरि।
529. प्रश्न-"ग्रह कौतुक" ग्रन्थस्य लेखकः कः?
उत्तरम्- केशवदेवः।
530. प्रश्न-केशवदेवस्य प्रमुख-ग्रन्थाः के सन्ति?
उत्तरम्- 1. वर्षग्रहसिद्धिः, 2. तिथिसिद्धिः, 3. जातकपद्धतिः, 4. ताजिक पद्धतिः, 5. मुहूर्त्त तत्त्वः, 6. कुण्डाष्टक लक्षणः, 7. गणित दीपिका।
531. प्रश्न-गणेश दैवज्ञस्य कानि प्रमुख-रचनाकार्यानि सन्ति?
उत्तरम्- 1. ग्रहलाघवम्, 2. लघुतिथिचिन्तामणिः, 3. वृहत्तिथि चिन्तामणिः, 4. श्राद्धादिनिर्णयः, 5. सुधीरंजनी, 6. तर्जनीयन्त्रम्, 7. होलिकानिर्णयः।
532. प्रश्न-"जातकाभरणम्" ग्रन्थस्य लेखकः कः?
उत्तरम्- ढुण्ढिराजः।
533. प्रश्न-"ताजिक नीलकण्ठी" इत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- नीलकण्ठः।
534. प्रश्न-सिद्धान्त शिरोमणि इत्यस्य वासनावार्तिकः ग्रन्थस्य लेखकः कः?
उत्तरम्- नृसिंह देवज्ञः।
535. प्रश्न-"सिद्धान्त तत्त्व विवेकः" अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- कमलाकर भट्टः।
536. प्रश्न-"केतकी" करण ग्रन्थस्य लेखकः कः?
उत्तरम्- वेकंटेश्वरः।
537. प्रश्न-"सौर परिवार" ग्रन्थस्य लेखकः कः?
उत्तरम्- डॉ. गोरख प्रसादः।
538. प्रश्न-ज्योति विनोद ग्रन्थस्य लेखकः कः?
उत्तरम्- श्री सम्पूर्णानन्दः।
539. प्रश्न-"विज्ञानभाष्य" ग्रन्थस्य लेखकः कः?
उत्तरम्- श्री महावीर प्रसादः।
540. प्रश्न-"सिद्धान्तसार्वभोम" इत्यस्य लेखकः कः?
उत्तरम्- मुनीश्वरः।
541. प्रश्न-"जातक पद्धति" इत्यस्य लेखकः कः?
उत्तरम्- नृसिंह पुत्र दिवाकरः।
542. प्रश्न-सिद्धान्तराज ग्रन्थस्य लेखकः कः?
उत्तरम्- इन्द्रप्रस्थपुरस्य नित्यानन्दः।
543. प्रश्न-"ज्योतिष रत्नाकर" एवं "पंचांगानयनविधिः" ग्रन्थयोः लेखकः कः?
उत्तरम्- महिमोदयः।

544. प्रश्न-मेघविजयगणि: महोदयस्य कानि रचनाकार्यानि सन्ति?
उत्तरम्- 1. वर्षप्रबोध:, 2. उदयदीपिका, 3. हस्तसंजीवन:।
545. प्रश्न-"चमत्कारचिन्तामणि" एवं "विवाह-पटल" कयो: रचना स्त:?
उत्तरम्- उभयकुशलस्य।
546. प्रश्न-जन्मपत्री पद्धति ग्रन्थ:कदा एवंच क:रचितवान्?
उत्तरम्- विक्रम संवत् 1051 कार्तिकमासे लब्धिचन्द्रगणि:।
547. प्रश्न-अरबी भाषया: रेखागणितस्य अनुवाद: जगन्नाथ सम्राट:कदा कृतवान्?
उत्तरम्- शक संवत् 1640 तमे संस्कृतभाषायाम्।
548. प्रश्न-रेखागणिते कति अध्याया: सन्ति?
उत्तरम्- 15 पञ्चदशाध्याया:।
549. प्रश्न-बापूदेव शास्त्री महोदयस्य प्रसिद्धा:ग्रन्था: के सन्ति?
उत्तरम्- 1. त्रिकोणमिति, 2. बीजगणितम्, 3. अव्यक्त गणितम्।
550. प्रश्न- "गोलप्रकाश:" इत्यस्य लेखक: क:?
उत्तरम्- नीलाम्बर झा।
551. प्रश्न-सिद्धान्त-दर्पण ग्रन्थस्य लेखक: क:?
उत्तरम्- सामन्त चन्द्रशेखर:।
552. प्रश्न- सुधाकर द्विवेदी महोदयस्य प्रमुख-ग्रन्था: एवं टीका-ग्रन्था: के सन्ति?
उत्तरम्-ग्रन्था:-1. चलनकलन:, 2. दीर्घवृत्त, 3. गणकतरंगिणी, 4. प्रतिभाबोधक:।
टीका-ग्रन्था:-1. पंचासिद्धान्तिका, 2. सूर्यसिद्धान्त:, 3. ग्रहलाघव, 4. ब्रह्मस्फुट सिद्धान्त:, आदि।
553. प्रश्न-"करण प्रकाश:" ग्रन्थस्य लेखक: क:?
उत्तरम्- ब्रह्मदेव:।
554. प्रश्न-भास्वती करण ग्रन्थस्य लेखक: क:?
उत्तरम्- शतानन्द:।
555. प्रश्न-कामधेनु इति ग्रन्थस्य लेखक: क:?
उत्तरम्- श्री महादेव:।
556. प्रश्न-"चान्द्रमानाभिधान" अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- गंगाधर:।
557. प्रश्न-सिद्धान्त सुन्दर इति ग्रन्थस्य लेखक: क:?
उत्तरम्- ज्ञानराज:।
558. प्रश्न-"सौरपक्षीय" करण ग्रन्थस्य लेखक: क:?
उत्तरम्- विष्णुदैवज्ञ:।
559. प्रश्न-मणिप्रदीप नाम्न: करण-ग्रन्थस्य लेखक: क:?
उत्तरम्- रघुनाथ शर्मा।

560. प्रश्न-"मुहूर्त-चूड़ामणि" करणग्रन्थस्य लेखकः कः?
उत्तरम्- शिवदैवज्ञः।

561. प्रश्न-कल्पलता अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- सोमदैवज्ञः।

562. प्रश्न-वैष्णवकरण ग्रन्थस्य लेखकः कः?
उत्तरम्- श्रीशंकरः।

563. प्रश्न-प्रश्नमाणिक्यमाला अस्य ग्रन्थस्य लेखकः कोऽस्ति?
उत्तरम्- परमानन्द पाठकः।

564. प्रश्न-जैमनिसूत्रम् अस्य ग्रन्थस्य लेखकः कोऽस्ति?
उत्तरम्- जैमनि।

565. प्रश्न-जन्मपत्रदीपकः अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- विन्ध्येश्वरी प्रसादः।

566. प्रश्न-शीघ्रबोधस्य लेखकः कोऽस्ति?
उत्तरम्- पं. काशीनाथः।

567. प्रश्न-त्रिकोणमिति अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- बापूदेव शास्त्री।

568. प्रश्न-चतुर्दश-मन्वन्तराः के सन्ति?
उत्तरम्-1. स्वायम्भुवः, 2. स्वारोचिषः, 3. औत्तमि, 4. तार्मासि, 5. रैवतः, 6. आयुषः, 7. वैवस्वतः, 8. सावर्णि, 9. दक्षसावर्णि, 10. ब्रह्मसावर्णि, 11. धर्मसावर्णि, 12. रौद्रसावर्णि, 13. रौच्यसावर्णि, 14. भौत्यसावर्णि।

569. प्रश्न-काः सन्ति सप्तमृतिका?
उत्तरम्- 1. अश्वशाला, 2. गजशाला, 3. बांबी, 4. सरित्सङ्गमः, 5. तालाबः, 6. राजद्वारः, 7. वैश्यालयः।

570. प्रश्न-काः दशदिशा सन्ति?
उत्तरम्- 1. पूर्व, 2. आग्नेय, 3. दक्षिण, 4. नैऋत्यः, 5. पश्चिम, 6. वायव्यः, 7. उत्तर, 8. ईशान, 9. ऊर्ध्व, 10. अधोदिशा।

571. प्रश्न-दिक्शूलस्य विवेचनं किमस्ति?
उत्तरम्-

दिनम्	दिशाशूलम्	परिहारः
रविवासरे	पश्चिमस्याम्, नैऋत्यम्,	घृतदानम्
सोमवासरे	पूर्वस्याम्(अग्निकोणे) आग्नेये,	पयः(दुग्धं/जलम्)"
मंगलवासरे	उत्तरस्याम्, वायव्ये,	गुडः"

बुधवासरे	उत्तरस्याम् (ऐशानकोणे) ईशाने	तिलः"
वृहस्पतिवासरे	दक्षिणस्याम्, आग्नेये,	दधि"
शुक्रवासरे	पश्चिमस्याम्(वायुकोणे) नैऋत्ये,	यवः"
शनिवासरे	पूर्वस्याम्, ईशानकोणे	माष (उरीद)"

572. प्रश्न-यामार्धः कं कथ्यते?
उत्तरम्- अर्धपहरम्(चतुर्घटिका मुहूर्त्तम्)

573. प्रश्न-चतुर्घटी मुहूर्त्तेन कः आशयः अस्ति?
उत्तरम्- चौघड़िया मुहूर्त्तज्ञानम्।

574. प्रश्न-राशेःअनुसारं ग्रह, रत्न, धातु धारण विवरणी किमस्ति?
उत्तरम्-

राशिः	ग्रहः	रत्नम्	धातु	धारणमासः
मेष, वृश्चिक	मंगलः	मूंगा	स्वर्णम्	आषढ़
वृष, तुला	शुक्र	हीरा	चांदी	वैशाख, कार्तिक
मिथुन, कन्या	बुध	पन्ना	स्वर्णम्	ज्येष्ठ
कर्क	चन्द्रमा	मोती	चांदी	श्रावण
सिंह	सूर्यः	मणिक्य	स्वर्ण, तांबा	चैत्र
धनु, मीन	गुरु	पुखराज	स्वर्ण	मार्गशीर्ष
मकर, कुंभ	शनि	नीलम	लोहा, पंचधातु	आश्विन, फाल्गुन

575. प्रश्न-अहर्गणः केन मासेन सिद्धं भवति?
उत्तरम्- सावनमासेन।

576. प्रश्न-सावन वर्षे कति दिनानि भवन्ति?
उत्तरम्- 360 दिनानि।

577. प्रश्न-त्रिकोणेशःपञ्चमेशश्च कदा राजयोगकारकः भवन्ति?
उत्तरम्- 10 दश भावेन सह।

578. प्रश्न-सर्वेग्रहाः कं गृहं दृश्यन्ति?
उत्तरम्- सप्तमम्।

579. प्रश्न-सपिण्डतायाः निवृत्ति कस्मिन् (पीढ़ीय) पुस्ते भवति?
उत्तरम्- 8 अष्टमी पुस्ते।

580. प्रश्न उदयान्तर इत्यस्य प्रवर्तकः कः?
उत्तरम्- भास्कराचार्यः।

581. प्रश्न-दक्षिणायनः कदा भवति?
उत्तरम्- कर्क-संक्रान्तेः।

582. प्रश्न-सौरमासे कति दिनानि भवन्ति?
उत्तरम्- 30 त्रिंशतिःदिनानि।
583. प्रश्न-ग्रहानां पूर्णदृष्टिः कस्मिन् भावे भवन्ति?
उत्तरम्- सप्तमभावे।
584. प्रश्न-पराशर-मते शुभफलदायकः कः?
उत्तरम्- त्रिकोणेशः।
585. प्रश्न-एक-चान्द्रवर्षे दिनानां संख्या कति सन्ति?
उत्तरम्- 360 दिनानाम्।
586. प्रश्न-बुधस्य उच्चराशिः कोऽस्ति?
उत्तरम्- कन्या।
587. प्रश्न-जातकशास्त्रे का दृष्टिः?
उत्तरम्- प्रत्यक्ष-स्नेहदाश्च दृष्टिः।
588. प्रश्न-एक-कल्पे महायुगाणां संख्याः काः?
उत्तरम्- 1000 वर्षम्।
589. प्रश्न-बालारिष्टस्य शमनं केन भवति?
उत्तरम्- शुभग्रहयुक्तेन।
590. प्रश्न-सूर्यः कस्मिन् राशौ उच्यः भवति?
उत्तरम्- मेषः।
591. प्रश्न-ज्योतिषशास्त्रे कति स्कन्धाः भवन्ति?
उत्तरम्- स्कन्धत्रयज्योतिषम्।
592. प्रश्न-आयु इत्यस्य विचारः केन स्थानेन भवति?
उत्तरम्- 3 एवं 8 स्थानेन।
593. प्रश्न-चान्द्रमासे कति दिनानि भवन्ति?
उत्तरम्- 30 त्रिंशतिःदिनानि।
594. प्रश्न-उपाकर्मं कस्मिन् कार्ये भवति?
उत्तरम्- वेदारम्भे (उपनयन कार्ये।)
595. प्रश्न अरिष्ट-शमनं कथं भवति?
उत्तरम्- शुभग्रहदृष्ट्या।
596. प्रश्न-एक सौरवर्षे कति सावनदिनानि भवन्ति?
उत्तरम्- 365 दिनानि।
597. प्रश्न-ग्रहानां गतिः कुत्रदिशिः भवति?
उत्तरम्- पूर्वाभिमुखम्।
598. प्रश्न-एक मन्वन्तरे कति महायुगानि भवन्ति?
उत्तरम्- 71 महायुगानि।

599. प्रश्न-द्वयोर्देशयोर्मध्ये देशान्तरं किं भवति?
उत्तरम्- पूर्वाक्षरम्।
600. प्रश्न-सूर्यस्य मित्रग्रहा: के?
उत्तरम्- मंगल, गुरु।
601. प्रश्न-वार-प्रवृत्ति: कस्मिन् समये भवति?
उत्तरम्- सूर्योदयात्।
602. प्रश्न-पराशरमते सर्वाधिक:पापफलदायक: कोऽस्ति?
उत्तरम्- त्रिपडायेश:।
603. प्रश्न-चन्द्रं स्पष्टकरणाय संस्कारं क: करोति?
उत्तरम्- उदयान्तर:।
604. प्रश्न शुल्वसूत्रस्य अपरं नाम किम्?
उत्तरम्- भारतीय-ज्यामितिशास्त्रम् (रेखागणितम्)।
605. प्रश्न ग्रहानां बलं कति प्रकारका: भवन्ति?
उत्तरम्- 6 षट् प्रकारका:।
606. प्रश्न वसंत-ऋतौ सूर्य: कस्मिन् राशौ भवति?
उत्तरम्- मीन-मेष राशयो:।
607. प्रश्न- पञ्चागस्य चतुर्थाङ्ग-योग: कति भवन्ति?
उत्तरम्- 27 सप्तविंशति:।
608. प्रश्न- चन्द्रमा यदा कुम्भ या मीन राशयो: भवत: तं मुहूर्तं किं कथ्यते?
उत्तरम्- पंचक:।

TOTAL- 608

• • •

5

शिक्षा-(शिक्षा घ्राणं तु वेदस्य)

(क) शिक्षाशास्त्रविवेचनम्

(The Science of Rules for Correct Pronunciation of Vedic Mantras.)

शिक्ष् भाव अ +टाप्=आ शिक्षा। तच्छास्त्रं शिक्षानाम येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्येत। वेदे स्वरस्य प्राधान्यं सर्वविदितम्। स्वरज्ञानं च शिक्षाऽऽयत्तम्। अतएवेदं शिक्षाशास्त्रं वेदाङ्गम्। येन प्रकारेण पुरुषः सर्वेषामङ्गानां यथाविधि विनिवेशितेऽपि मुखसौन्दर्यादिभिः परिपुष्टेऽपि घ्राणेन विना चमत्कृतिं न दधाति, गर्हणीयतामेव भजते तथैव वेदपुरुषस्य स्वरूपं वेदाङ्गेन शिक्षारूपघ्राणेन विना नितान्तमशोभनं विकृताकारं वा परिलक्ष्यते। सायणाचार्याः कथयन्ति यत्- "स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा" इति। एतदवबोधनमेव शिक्षायाः प्रयोजनम्। "शिक्षयति या सा शिक्षा" "शक्तुं शक्तो भवितुमिच्छा शिक्षा" इति द्वे व्युत्पत्ती शिक्षाशब्दस्य प्रदर्शिते। शब्दोऽयं योगरूढः। शिक्षाशास्त्रस्य प्रयोजनमुक्तमस्ति तैत्तिरीयोपनिषदि यथा- "अथ शिक्षां व्याख्यास्यामः- वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तःशिक्षाऽध्यायः। तत्र वर्ण इति पदेनाकारादेः ग्रहणम्, "स्वर" इत्यनेन उदात्तादेः, मात्रया ह्रस्व-दीर्घ-प्लुतानां, बलेन स्थानप्रयत्नौ गृह्येते, साम्ना निषादादिः, सन्तानेन विकर्षणादिः" इति शिक्षा-प्रयोजनम्। अर्थात् "आदौ गुरुः कस्यापि मन्त्रस्योच्चारणं स्वरविज्ञानसहितं स्वयमेव करोति पश्चाच्च तदुच्चारणं सावधानतया शिष्यः श्रुत्वा अवधारणञ्च कृत्वा तदनुसरणं करोति।" भगवतः पाणिनेः शिक्षायामुक्तः। तथा हि-

गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।

उदात्तानुदात्तस्वरितभेदैः त्रयः स्वराः भवन्ति। उच्चस्वरेणोच्चरितत्वात् उदात्तः, मन्दस्वरेणोच्चरितत्वात् अनुदातः, द्वयोश्च समाहारेणोच्चरितत्वात् स्वरित इति सूत्राणि निर्दिश्य पाणिनिना प्रोक्तम्। वेदस्य प्रत्येकस्मिन् शब्दे उदात्तस्वरोऽवश्यमेव भविष्यति, शेषाः स्वराश्चानुदात्ता भवन्ति। उदात्तस्वरस्य स्थानेऽनुदात्तस्वरस्योच्चारयितुः शिष्यस्य मुखे चपेटिकां दत्वा शुद्धोच्चारणं कारयति स्म। प्रत्येकस्य वेदस्योच्चारणार्थं स्वीया शिक्षा विद्यते। यस्यां शिक्षायां तत्तद् वेदानुकूलमुच्चारणविधानं विद्यते। अत एव पाणिनीयशिक्षायां स्पष्टमुद्घोषितं पाणिनिना

महावैयाकरणेन-

मन्त्रो हीनः स्वरतो वर्णतो व मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपरांघात्"।।

(ख) वेदाङ्गेषु प्रातिशाख्यम्

प्रातिशाख्यस्य स्थानं वेदाङ्गेषु महत्त्वपूर्णमस्ति। प्रातिशाख्ये शिक्षा, छन्दः, व्याकरणञ्च सामान्यनियमानां वर्णनं करोति। अत एव नियमास्तद्वैदिकी-शाखायां कथं सन्त्येतदेव प्रतिपादनं प्रातिशाख्यस्य मुख्यं प्रयोजनमस्ति। "प्रातिशाख्यम्" व्याकरणस्यैको ग्रन्थः, यस्मिन् स्वरसन्धेस्तथान्यवर्णपरिवर्तनानां नियमानामुल्लेखो वर्तते। ये नियमा वेदस्य कस्यामपि शाखायां प्राप्यन्ते, येषु च स्वराघातसहितोच्चारणपद्धतिर्निर्दिष्टा विद्यते।

वेदाभ्यासः पञ्चधा भवति, यथा-1. अध्ययनम्, 2. विचारः, 3. अभ्यासः, 4. जपः, 5. अध्यापनञ्च। पञ्चानामध्ययनादीनां ऋक्प्रातिशाख्यसूत्रेषु यथाविधिवर्णनमुपलभ्यते। यो हि वैदिको वेदमधीत्य तदर्थं न विजानाति स उपहासास्पदो भारवाही स्थाणुरिव, शुष्कवृक्ष इव वृषभ इव वा भवति। यो हि पद-पदार्थ विजानाति, स एव समस्तं श्रेयस्त्वं प्राप्नोति। लौके परलोके च यशस्वी भवति। प्राचीने भारते संस्कृतभाषायाः व्याकरणनेभ्यः प्रातिशाख्येभ्यः प्रारभ्यते। प्रातिशाख्यस्य शास्त्रेषु स्वतन्त्रा सत्ता विद्यते। प्रातिशाख्यग्रन्थेषु व्याकरणसमर्थितानामनेकानां विषयाणां प्रतिपादनमस्ति।

1. ऋक्प्रातिशाख्यम्-प्रातिशाख्यग्रन्थेषु ऋक्प्रातिशाख्यं प्राचीनतायाः प्रमाणिकतायाश्च विषये स्वमहत्त्वपूर्णं स्थानं निर्धारयति। इदं प्रातिशाख्यं पार्षदं पारिषदं सूत्रं वेति नाम्ना प्रख्यातमस्ति। प्रतिशाख्यमिदं शिक्षाविषयप्राधान्यात् शिक्षाशास्त्रमिति नाम्नाऽपि व्यवह्रियते। अस्मिन् प्रातिशाख्ये ऋग्वेदस्यैकमात्रोपलब्धायाः शाखायाः शैशिरीयोपशाखायाः साङ्गोपाङ्गं विवेचनमस्ति, तेनास्य रचयितुः शौनकस्य भाषाशास्त्रीयमध्ययनं प्रमाणितं भवति।

2. वाजसनेयि प्रातिशाख्यम्-मुनिना कात्यायनेन विरचितं शुक्लयजुर्वेदस्य प्रातिशाख्यं विद्यते। अस्मिन् प्रातिशाख्ये अष्टावध्याया गुम्फिताः सन्ति। येषु परिभाषा-स्वर-संस्काराणां त्रयाणां विषयाणां विस्तृत-सर्वाङ्गीणं विवेचनमस्ति। भाषाविज्ञानदृष्ट्या वाजसनेयि- प्रातिशाख्यस्य महत्त्वपूर्णं वैशिष्ट्यं विद्यते।

3. तैत्तिरीयं प्रातिशाख्यम्-तैत्तिरीय(शाखाया) संहितया सम्बद्धमिदं प्रातिशाख्यं प्रश्नद्वये खण्डद्वये च विभक्तमस्ति। प्रत्येकस्मिन् प्रश्ने द्वादश अध्यायाः सन्ति। इत्थं सूत्रात्मकोऽयं ग्रन्थः चतुर्विंशत्यध्यायेषु विभक्तोऽस्ति। विषयाणां प्रतिपादनं सुव्यबस्थितं प्रामाणिकञ्च विद्यते। तत्र प्रथमे प्रश्ने-वर्णसमाम्नायस्य, शब्दस्थानस्य शब्दोत्पत्तिप्रकारस्य, विविधस्वर- विसर्गसन्धीनां, मूर्द्धन्यविधानादिविषयाणां सुस्पष्टं विवेचनमस्ति। द्वितीये प्रश्ने- नकारस्य णत्वविधानस्य, अनुस्वारस्य-अनुनासिकस्य, अनुनासिकभेदस्य, स्वरितभेदस्य, संहिता-

स्वरूपादेरनेकोपादेयविषयाणाञ्च प्रतिपादनमत्र विद्यते। स्वरसंहितया सम्बद्धत्वात् सम्पूर्णान्युदाहरणानि तैत्तिरीयसंहितागतान्येव सन्ति। खण्डद्वये तु प्रथमः प्रकृतपाठः द्वितीयश्च विकृतिपाठः।

प्रथमपाठे संहिता-पदक्रमपाठाश्च भवन्ति। तथा च द्वितीयपाठे शिखा-माला-घनाद्यष्ट विकृतिपाठ्य भवन्ति।

4. समवेदीयं प्रातिशाख्यम्- सामवेदस्यानेकानि प्रातिशाख्यानि प्रकाशितानि सन्ति, तेष्वेतानि मुख्यानि सन्ति-1. पुष्पसूत्रम्-इदं प्रातिशाख्यं ऋषिणा पुष्पेण प्रणीतमस्ति। अस्मिन् दश प्रपाठकाः सन्ति। सङ्गीतोपयोगिसामग्रीणां सङ्कलनेन सूत्रमिदं नितरामुपयोगितां विभर्ति। 2. ऋक्तन्त्रम्-इदं पुस्तकम् सामवेदस्य काथुमशाखायाः प्रातिशाख्यमस्ति। अस्मिन् तन्त्रे 280 सूत्रेषु पञ्चप्रपाठकेष्वध्यायेषु वा विभक्तमिदं ऋक्तन्त्रम्। अस्य रचयितारः सन्ति सुप्रसिद्धा वैयाकरणाः शाकटायननामधेयाः। अक्षरोदयज्ञानवैशिष्ट्यमत्र वर्णितमस्ति।

5. अथर्ववेदीयं प्रातिशाख्यम्-वैदिकवाङ्मयेऽथर्ववेदस्य प्रातिशाख्यद्वयं प्रख्यातमस्ति। चतुर्ष्वध्यायेषु विभक्तमिदं प्रातिशाख्यम्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये -सरस्वतीभवने सुरक्षिते हस्तलेखे कौत्सव्याकरणमिति नाम्ना विज्ञापितमिदं प्रातिशाख्यम्। सन्धेः, स्वरस्य पदपाठस्य च नियमा अत्र प्रदर्शिताः सन्ति।

(ग) शिक्षासाहित्यविवरणम्

1. भारद्वाज शिक्षा-भरद्वाजेन प्रणीता शिक्षा भरद्वाजशिक्षा, भरद्वाजः सप्तर्षिष्वेको महनीयः ऋषिः वर्तते। अस्य शिक्षा-ग्रन्थस्य सम्बन्धः तैत्तिरीयसंहिताया सह प्रतीयते। इयं च शिक्षा "संहिता शिक्षा" अस्याः प्रधानं लक्ष्यं संहितापदानां विशुद्धिः वर्तते। अक्षरक्रमेण ग्रन्थस्य सङ्कलनमस्ति।

2. पाणिनीयशिक्षा-अध्ययनाध्यापनयोः शैक्षणिके जगति पाणिनीयशिक्षा सुप्रसिद्धाऽस्ति। इयं पाणिनीयशिक्षा अतिशयेन प्रसिद्धा लोकप्रिया च अस्ति। सा च लौकिक-वैदिकोभय-शास्त्रोपकारकत्वात् अत्यधिका महत्त्वपूर्णा च विद्यते। वर्णानां विधिपूर्वकमुच्चारणविधिः, तेषां समीक्षितानां वर्णानां संख्यानिर्धारणम्, कण्ठ-ताल्वादिस्थानानि, आभ्यन्तरा बाह्याश्च प्रयत्नाः, अनुस्वारस्य यमानां चोच्चारणे विशेषाः, रङ्गस्योच्चारणे विशेषः, हकारनिरूपणम्, जिह्वामूलीयोपध्मानीययोर्विमर्शः, वर्णोच्चारणे गुणदोषसमीक्षणम्। वैदिकानां वेदाध्ययनरीतिः,

अथ शिक्षां प्रवक्ष्यामि पाणिनीय मतं यथा।
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः।।

3. चान्द्रशिक्षा-व्याकरणशास्त्रस्येतिहासे आचार्यचन्द्रगोभिनश्चर्चा भूयसी वर्तते। इमे प्राचीना बौद्धवैयाकरणा आसन्। तत्र प्रथमं सूत्रं "स्थानकरणप्रयत्नेभ्यो वर्णा जायन्ते" अन्तिमञ्च सूत्रम् "अन्तः स्थाद्विप्रभेदा रेफवर्जिताः सानुनासिकाः निरनुनासिका श्च" विद्यन्ते।

4. याज्ञवल्क्यशिक्षा-इयं प्राचीना शिक्षा महर्षिणा याज्ञवल्क्येनप्रणीता विद्यते। याज्ञवल्क्य-स्मृतौ" "मिथिलास्थः स योगीन्द्र" इति चर्चितत्वादयं योगिनामप्यग्रगण्य आसीत्। अत्र श्लोकानां संख्या 232 विद्यन्ते। अस्याः शिक्षायाः सम्बन्धः शुक्लयजुर्वेदस्य वाजसनेयीसंहितया वर्तते। "अस्यां शिक्षायां वर्णसमूहं चतुर्धा विभज्य स्वराः, स्पर्शाः, अन्तःस्थाः, ऊष्माणः, इत्येवं रीत्या वर्णाः प्रतिपादिताः।

युक्तियुक्तं वचो ग्राह्यं न ग्राह्यं गुरु गौरवात्।
सर्वशास्त्ररहस्यं तद् याज्ञवल्क्येन भाषितम्।।

5. वाशिष्ठीशिक्षा

अथ शिक्षां प्रवक्ष्यामि वशिष्ठस्य मतं यथा।
सर्वानुक्रममुद्धृत्य ऋग्यजुषोस्तु लक्षणम्।।

इति श्लोकानुसारमेव इयं शिक्षा ऋग्यजुर्विभागात्मिका वाशिष्ठी शिक्षा कथ्यते। अस्याः शिक्षायाः सम्बन्धो वाजसनेयी संहितया सह विद्यते। अस्यां संहितायां समागतानां ऋक्मन्त्राणां यजुर्मन्त्राणां च पार्थक्यम् महता विस्तरेण कृतमस्ति।

6. कात्यायनी शिक्षा-महर्षिणा कात्यायनेन प्रणीता इयं शिक्षा कात्यायनी शिक्षा कथ्यते। अस्यां शिक्षायां केवलं त्रयोदश श्लोकाः सन्ति।

यदुदात्तात्परं नीचं स्वार्थं तत्परतो न चेत्।
उदात्तात्स्वरितं वा स्याद्यत्र स्यात्स्वरितं वदेत्।।

7. पाराशरीशिक्षा-महर्षिणा पाराशरेण विरचिता इयं शिक्षा पाराशरी-शिक्षा कथ्यते। सर्वशास्त्रेषु अस्याः शिक्षायाः महत्त्वं गीयते। यथा-

यथा देवेषु विश्वात्मा यथा तीर्थेषु पुष्करम्।
तथा पाराशरी शिक्षा सर्वशास्त्रेषु गीयते।।

इयं शिक्षा महर्षिणा पाराशरेण विप्राणां हितकाम्यया, शिष्याणामुपकाराय परलोकहिताय च प्रोक्ता।

पठित्वा चतुरो वेदान् सर्वशास्त्रमनेकधा।
यो हि ब्रह्म न जानाति मूर्खः पाठे शठो यथा।।

8. माण्डव्यशिक्षा-महर्षिणा माण्डव्येन प्रणीतेयं शिक्षा माण्डव्यशिक्षा कथ्यते। अस्यां शिक्षायां विशेषतः ओष्ठ्यवर्णानां विवेचनमस्ति। तद्यथा ग्रन्थारम्भे-

अथातः सम्प्रवक्ष्यामि शिष्याणां हितकाम्यया।
माण्डव्येन यथा प्रोक्ता ओष्ठ्यसंख्या समाहृता।।

अतः इयं शिक्षा सोद्देश्या परोत्कृष्टा च विद्यते। अस्यां शिक्षायां चत्वारिंशन्मन्त्रमिताः (40) शिक्षाः सन्ति।

9. अमोघानन्दिनी शिक्षा-इयं शिक्षा यथार्थनाम्नी वर्तते। अत्र ग्रन्थकर्त्रा यथा प्रतिज्ञातं तदनुसारेण इयममोघानन्दकारिणी शिक्षा विद्यते।

अथ शिक्षां प्रवक्ष्यामि ह्यमोघानन्दकारिणीम्।
यस्याः श्रवणमात्रेण सर्वत्र विजयी भवेत्।।

अस्यां शिक्षायां त्रिंशदुत्तरशतश्लोकाः(130) श्लोकाः सन्ति। येषु स्वराणां वर्णानाञ्च सूक्ष्मातिसूक्ष्मो विचारो वर्तते।

10. माध्यन्दिनी शिक्षा-माध्यन्दिनमहर्षिणा विरचित इयं शिक्षा माध्यन्दिनी शिक्षा निगद्यते। अस्यां शिक्षायां विशेषतः द्वित्वनियमानां विचारः प्रवर्त्तते। तथा च आह ग्रन्थकारः-

स्वराद् द्वित्वमवाप्नोति व्यञ्जनं व्यञ्जने परे।
हरौ न यद्यचः पूर्वौ निमित्तं व्यञ्जनस्य च।।

अत्र सप्तविंशत्युत्तरशतद्वय(227) श्लोकाः विराजन्ते। तेषु श्लोकेषु वर्णानां स्वराणां सन्धीनाञ्च साङ्गोपाङ्गं विस्तरेण विवेचनमस्ति। इयं शिक्षा प्रातिशाख्यानुसारिणी वर्तते तथा च बालानां वर्णज्ञानादिहेतवे पाठशुद्ध्यर्थञ्च विरचिताऽस्ति।

11. केशवी शिक्षा-इयं शिक्षा प्रतिज्ञासूत्रानुसारिणी विद्यते। अस्याः शिक्षायाः रचयिता मुनेः आस्तीकस्य वंशजस्य गोकुलदैवज्ञस्य पुत्रः केशवदैवज्ञः आसीत्। इयं शिक्षा प्रकारद्वये उपलब्धा भवति। प्रथमायां प्रतिज्ञासूत्रस्य नवसंख्यकानां सूत्राणां व्याख्यानं सन्निविष्टमस्ति। अस्य द्वितीया शिक्षा च पद्यात्मिका वर्तते, यस्याम् एकविंशतिपद्यैः स्वरस्य विस्तृतः विचारः विद्यते।

12. मल्लशर्मशिक्षा-श्रीमता मल्लशर्मणा वेदाध्ययनस्य प्रक्रिया-सुदृढीकरणाय हस्तस्वर-प्रक्रियादीनां योजनां विधायेयं शिक्षा विनिर्मिता। तथा च उक्तं तत्र शिक्षायाम्-

श्रीमतां कान्यकुब्जेन ह्युपमन्यवग्निहोत्रिणा।
श्रीमद्वेदस्वरूपाणां श्रीमद्वाक्पतिशर्म्मणाम्।।
सूनुना पितृभक्तेन मल्लबिप्रेण धीमता"।

अस्यां शिक्षायां पद्यानां संख्या पञ्चषष्टिमिता(65) विद्यते। तथा च अस्याः शिक्षायाः रचनाकालः 1781 वैक्रमे वर्षे प्रमाणितो भवति।

13. स्वराङ्कुश-शिक्षा-अस्यां शिक्षायामादितः समाप्तिपर्यन्तम् उदात्तादिस्वराणामेव प्राधान्येन विवेचनमस्ति। पञ्चविंशति(25) पद्येषु ग्रथितेयं शिक्षा श्रीमता जयन्तस्वामिना विरचिता। उक्तमस्ति यत्-

जयन्तस्वामिना प्रोक्ताः श्लोकानामेकविंशतिः।
स्वराङ्कुशेति विख्याता बह्वृचां स्वरसिद्धये"।।

14. षोडशश्लोकी शिक्षा-श्रीमता रामकृष्णेनेयं शिक्षा विरचिताऽस्ति। अस्यां शिक्षयां त्रिषष्टि वर्णाः परिसंख्याताः सन्ति। तेषु 22 संख्यकाःस्वराः, 33 संख्यकानि व्यञ्जनानि, चतुस्संख्काः यमाः, अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीयाश्च सम्मिलिता भवन्ति।

15. अवसाननिर्णयशिक्षा-अस्याः शिक्षायाः लेखकः "अनन्तदेवः" अस्ति। अस्याः शिक्षायाः निर्माणकालः 1946 मिते वर्षे भवति।

16. स्वरभक्तिलक्षणपरिशिष्टशिक्षा-द्विचत्वारिंशत् पद्येषु ग्रथितेयं शिक्षा यथार्थ नाम्नी स्वरभक्तिलक्षणपरिशिष्टशिक्षा कथ्यते। अस्याः शिक्षायाः लेखकः कात्यायनः अस्ति।

17. प्रातिशाख्यप्रदीपशिक्षा-अस्याः शिक्षायाः लेखकः सदाशिवतनयः "बालकृष्णः" अस्ति।

18. नारदीयशिक्षा-अस्याः शिक्षायाः लेखकः देवर्षिः नारदः अस्ति। इयं शिक्षा वस्तुतः सर्वेषां वेदानां स्वरोच्चारणविधिं प्रतिपादयति किन्तु सामवेदस्य प्राधान्यं विद्यते। कण्डिकासु विभक्तेयं शिक्षा द्वितीयप्रपाठके पूर्णा भवति।

19. गौतमीशिक्षा-महर्षिणा गौतमेन प्रवर्त्तितत्वाद् इयं शिक्षा गौतमी शिक्षेति नाम्ना कथयन्ति सामवैदिकाः। अस्यां शिक्षायां प्रपाठकद्वयं वर्तते। प्रथमे प्रपाठके अष्टौ नव वा द्वितीये प्रपाठके च सप्तसंख्यका अवान्तरनियमाः सन्ति।

20. लोमशी शिक्षा-अस्यां शिक्षायामष्टौ खण्डाः सन्ति, तत्र प्रथमे खण्डे नव श्लोकाः. द्वितीये खण्डे षड् श्लोकाः, तृतीये सप्त श्लोकाः, चतुर्थे नव श्लोकाः, पञ्चमे एकादश श्लोकाः, षष्ठे सप्त श्लोकाः, सप्तमे चतुर्दश श्लोकाः, अष्टमे च एकादश श्लोकाः, सम्मेल्य 74 श्लोकाः सन्ति।

21. माण्डूकीशिक्षा-महर्षिणा मण्डूकाचार्येण शिक्षितेयं शिक्षा"माण्डूकी शिक्षा" निगद्यते। इयं शिक्षा च विशेषतः अथर्ववेदेन सम्बन्धिता विद्यते। अस्यां शिक्षायाम् एकाशीत्युत्तरं शतमेकं (181) श्लोकानां संख्या विद्यते। अस्याः फलश्रुतिश्च यथा-

मण्डूकेन कृतां शिक्षां विदुषां बुद्धिदीपिनीम्।
यो हि तत्त्वेन जानाति ब्रह्मलोकं स गच्छति।।

22. क्रमसन्धानशिक्षा-यजुर्वेदसंहितायां चत्वारिंशदध्यायाः सन्ति। सैषा संहिता लोके वेदे च सुप्रसिद्धाऽस्ति। तथा च ग्रन्थकर्त्रा प्रतिज्ञातमस्ति-

यथा समाम्नातङ्क्रमावसानं सङ्क्रमेषु।
क्रमशास्त्रानुसारेण सन्धानं प्रोच्यतेऽधुना।।

23. गलदृक् शिक्षा-गलत् ऋचः शिक्षा -इति गलदृक् शिक्षा कथ्यते। अस्याः शिक्षयाः प्रतिपाद्यविषयोऽस्ति-शुल्कयजुर्वेदसंहिताभागे कियत्संख्यकाः ऋचः गलिताःपथभ्रष्टाः सन्ति-इत्येतस्व समीचीनं विवरणमस्ति।

24. मनः स्वार-शिक्षा-शिक्षा-संग्रहे मध्ये चर्चितेयं शिक्षा यजुर्वेदसंहितया सम्बद्धा वर्तते। अस्याः शिक्षायाः लेखकः याज्ञवल्क्यः अस्ति। यथा-

मनः स्वारं प्रवक्ष्यामि, ब्रह्मणा निर्मितं पुरा।
भगवद्याज्ञवल्क्येन भाषितंल्लोकहेतवे।।

इत्थं भारते पुरा या शिक्षा प्रचलिता आसीत् सा निश्चयेन प्राचीनभारतीयसंस्कृतिः-परिपुष्टाऽऽसीत्। तस्मात्तदानीं शिक्षाया गोरवपूर्णं सर्वाधिकं महत्त्वं सुप्रतिष्ठितमासीत्।

25. व्यासशिक्षा-वैदिकसाहित्यस्येतिहासे यत्र क्वापि "व्यासशिक्षा" नामकस्य ग्रन्थस्य चर्चा तु विद्यते, व्यासशब्दस्यार्थो भवति-"विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः" अतः व्यासशिक्षेयं वै विषयिका शिक्षा वर्तते।

26. लौकिकी-शिक्षा-शिक्षा हि नाम विद्योपादानस्य मूलकारणम्। शिक्षायां चारित्रिक-शिक्षणस्यैव प्राधान्यमासीत्। यथोक्तं मनुस्मृतौ-

एतद्देशप्रसूतस्य सकाशादग्रजन्मतः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

समाजिकदृष्ट्या शिक्षा मनुष्याणां प्रारम्भिको विकासः, तस्या इहलोक-परलोकयोश्च कृतेऽतिशायिन्यपेक्षाऽऽसीदिति। एवञ्च कस्यापि देशस्य जनस्य च प्राणदायिनी शिक्षैव भवति। शिक्षाशब्दस्यार्थं एवास्ति प्राणिनामाभ्यन्तरस्थितं ज्ञानं बहिर्विकसनम्।

आभ्यन्तरस्य वस्तुनो बाह्यप्रकटनम्। प्रचीन शिक्षापद्धतौ न केवलमर्थार्जनमेव लक्ष्यमपि तु मानसिकः, शारीरिकः, बौद्धिकः आत्मिकश्च विकास एव शिक्षाया मुख्यं लक्ष्यमासीत्। आधुनिककालवत् प्राचीनकालेऽपि शिक्षाविद्भिर्भारतीयैः "शिक्षा" शब्दप्रयोगो विस्तृत-संङ्कुचितयोः अर्थयोः कृतः। तत्र "विस्तृतार्थे सर्वांशेन स्वात्मानं सुसंस्कृतीकरणमेव शिक्षा" , सङ्कुचितार्थे च-आजीविकाप्राप्तिपूर्वकम् अध्ययनम्। शिक्षोद्भूतं ज्ञानं मनुष्यस्य तृतीयं नेत्रं येन समस्तजीवनोपयोगि-तत्त्वानामधिगमो भवति। उक्तञ्च-

ज्ञानं तृतीयं मनुजस्य नेत्रं समस्ततत्त्वार्थविलोकिदक्षम्।
तेजोऽनपेक्षं विगतान्तरायं प्रवृत्तिमत् सर्वजगत्त्रयेऽपि।।
नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः।

प्राचीनभारतीयशिक्षाया अधिगमस्त्रेधा विभक्तोऽस्ति। मातृ-पितृआचार्यप्रभावैः। धर्मसूत्रे-

आचार्यः श्रेष्ठो गुरुणां (पित्रादीनां) मातेत्येके।

तत्रैव महर्षिवशिष्ठमतेन तु-

उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता।
पितुर्दशगुणं माता गौरवेणातिरिच्यते।।

(घ) आचार्यादीनां लक्षणानि

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
संकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते।।

(क) उपनीय कृत्स्नं वेदमध्यापयेत् स आचार्यः।

(ख) यस्मात् धर्मान् आचिनोति स आचार्यः।

प्राचीनशिक्षायाम् आचार्यस्य महत्त्वपूर्णं विशिष्टञ्च स्थानमासीत्। आचार्यः पूर्वरूपम्, अन्तेवासी उत्तररूपं, विद्यासन्धिः प्रवचनं सन्धानमिति। धर्मसूत्रे-1. प्राचार्यः, 2. आचार्यः, 3. उपाध्यायः। जैनागमसूत्रेषु-1. कलाचार्यः, 2. शिल्पाचार्यः, 3. धर्माचार्यश्चेति त्रिविधानाम् आचार्याणाम् उल्लेखो मिलति।

(ङ) शिक्षायाः वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- "शिक्षासूत्र" किमस्ति?
   उत्तरम्- ब्राह्मणग्रन्थस्य पूरकः।
2. प्रश्न-शिक्षा वेदस्य किं निरूपयति?
   उत्तरम्- उच्चारणम्।
3. प्रश्न-केचन अध्यापकाः संस्कृतमाध्यमेन न पाठयन्ति तत्र कारणम्?
   उत्तरम्- आत्मविश्वासाभावः।

4. प्रश्न-ब्राह्मणाधीना शिक्षाऽऽसीत्?
   उत्तरम्- वैदिककाले।
5. प्रश्न-वेदपुरुषस्य घ्राणात्मकं वेदांगं किमस्ति?
   उत्तरम्- शिक्षा।
6. प्रश्न-स्वरवर्णाद्युच्चारणप्रकारबोधकं वेदांगं किम्?
   उत्तरम्- शिक्षा।
7. प्रश्न-शिक्षावेदाङ्गस्य किमुद्देश्यम्?
   उत्तरम्- वैदिक-ऋचानां उच्चारण-शिक्षणम्।
8. प्रश्न-सायणाचार्यः शिक्षायाः व्युत्पत्तिजन्यमर्थं किं प्रतिपादितवान्?
   उत्तरम्- "स्वर्वर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते-उपदिश्यते सा शिक्षा"।
9. प्रश्न-शिक्षां का उपमा प्रदीयते?
   उत्तरम्- शिक्षा घ्राणं तु वेदस्य।
10. प्रश्न-ऋग्वेदेन सम्बन्धित-शिक्षाग्रन्थाः कति के च ते?
    उत्तरम्- 1. शौनकीय शिक्षा, 2. वाशिष्ठ शिक्षा, 3. पाणिनीय शिक्षा।
11. प्रश्न-कस्य वैयाकरणस्य शिक्षां सर्ववेदसम्बद्धाम् अपि केचन् विद्वासः मन्यन्ते?
    उत्तरम्- पाणिनिशिक्षाम्।
12. प्रश्न-शुक्लयजुर्वेदस्य कः शिक्षाग्रन्थः अधिकप्रसिद्धः वर्तते?
    उत्तरम्-याज्ञवल्क्य शिक्षा।
13. प्रश्न-कृष्णयजुर्वेदस्य कति शिक्षाग्रन्थाः उपलब्धाः सन्ति?
    उत्तरम्- 1. भरद्वाजशिक्षा, 2. व्यासशिक्षा।
14. प्रश्न-भरद्वाजशिक्षा कृष्णयजुर्वेदस्य कया शिक्षया सम्बद्धा अस्ति?
    उत्तरम्- तैत्तिरीयशाखया।
15. प्रश्न-भरद्वाजशिक्षायाः द्वितीयं नाम किमस्ति?
    उत्तरम्- संहिताशिक्षा।
16. प्रश्न-सामवेदस्य शिक्षाग्रन्थाः के सन्ति?
    उत्तरम्- 1. नारदीयशिक्षा, 2. गौतमशिक्षा, 3. लोमशशिक्षा।
17. प्रश्न-सामवेदस्य यथार्थोच्चारणार्थं केषां ग्रन्थानां रचना कृता?
    उत्तरम्- 1. ऋक्तन्त्र, 2. सामतन्त्र, 3. अक्षरतन्त्र, 4. पुष्पसूत्रम्।
18. प्रश्न-ऋक्तन्त्रे कस्य अध्ययनं भवति?
    उत्तरम्- ऋचायाः।
19. प्रश्न-ऋक्तन्त्रः कति प्रपाठकेषु खण्डेषु च विभक्तः अस्ति?
    उत्तरम्- पञ्चप्रपाठकेषु त्रिंशतिःखण्डेषु च।
20. प्रश्न-प्रकृतिगान-स्वरस्य अध्ययनं कुत्र भवति?
    उत्तरम्- सामतन्त्रे।

21. प्रश्न-सामतन्त्रं कति प्रपाठकेषु विभक्तामस्ति?
उत्तरम्- त्रयोदश प्रपाठकेषु।
22. प्रश्न-स्तोमस्य निरूपणं कस्मिन् भवति?
उत्तरम्- अक्षरतन्त्रे।
23. प्रश्न-अक्षरतन्त्रं कति प्रपाठकेषु विभाजितमस्ति?
उत्तरम्- द्वयोः प्रपाठकयोः।
24. प्रश्न-अक्षरतन्त्रं कस्याङ्गं मन्यते?
उत्तरम्- सामतन्त्रस्य।
25. प्रश्न-ऊह-ऊह्यगानस्य विवेचनं कस्मिन् वर्तते?
उत्तरम्- पुष्पसूत्रे।
26. प्रश्न-पुष्पसूत्रं कति प्रपाठकेषु खण्डेषु च विभाजितमस्ति?
उत्तरम्- दश प्रपाठकेषु शतंखण्डेषु।
27. प्रश्न-अथर्ववेदस्य कः शिक्षाग्रन्थः उपलब्धोऽस्ति?
उत्तरम्- माण्डूकी शिक्षा।
28. प्रश्न-आचार्य पं. बलदेव उपाध्यायः कति शिक्षाग्रन्थान् उल्लेखयति?
उत्तरम्- विंशतिशिक्षाग्रन्थानाम्।
29. प्रश्न-"संहिता शिक्षायाः प्रवर्तकः कः?
उत्तरम्- भारद्वाजः।
30. प्रश्न-अध्ययनाध्यापनविषयकाः शिक्षा का आसीत्?
उत्तरम्- पाणिनीयशिक्षा।
31. प्रश्न- चान्द्रशिक्षायाः प्रवर्तकः कः?
उत्तरम्- आचार्यचन्द्रगोभिलः।
32. प्रश्न-याज्ञवल्क्यशिक्षायां कति श्लोकाः सन्ति?
उत्तरम्- 232 श्लोकाः।
33. प्रश्न-याज्ञवल्क्यशिक्षा केन वेदेन सम्बद्धा?
उत्तरम्-यजुर्वेदेन
34. प्रश्न-ऋग्यजुर्विभागात्मिका शिक्षायाः लेखकः कः?
उत्तरम्- वशिष्ठः।
35. प्रश्न- कात्यायनी शिक्षायां कति श्लोकाः सन्ति?
उत्तरम्- त्रयोदश श्लोकाः।
36. प्रश्न-कात्यायनी शिक्षायाः प्रवर्तकः कः?
उत्तरम्- महर्षि कात्यायनः।
37. प्रश्न-प्रातिशाख्यस्य परं रूपं किम्?
उत्तरम्- शिक्षा।

38. प्रश्न- पाराशरीशिक्षायाः प्रवर्तकः कः?
उत्तरम्- महर्षि पाराशरः।
39. प्रश्न-तैत्तिरीय-प्रातिशाख्येन सम्बद्धा शिक्षा का?
उत्तरम्- व्यासशिक्षा।
40. प्रश्न- ओष्ठ्यवर्णानां विवेचनं कस्यां शिक्षायामस्ति?
उत्तरम्- माण्डव्यशिक्षायाम्।
41. प्रश्न- माण्डव्यशिक्षायां कति श्लोकाः सन्ति?
उत्तरम्- 40श्लोकाः।
42. प्रश्न- अमोघानन्दिनी शिक्षायां कति श्लोकाः सन्ति?
उत्तरम्-त्रिंशदुत्तरशतश्लोकाः(130) श्लोकाः।
43. प्रश्न- माध्यन्दिनी शिक्षायां कति श्लोकाः सन्ति?
उत्तरम्- सप्तविंशत्युत्तरशतद्वय(227) श्लोकाः।
44. प्रश्न- केशवी शिक्षायां कति सूत्राणि, कति पद्यानि च सन्ति?
उत्तरम्- नवसंख्यकानि सूत्राणि, एकविंशतिपद्यानि सन्ति।
45. प्रश्न- मल्लशर्मशिक्षायां पद्यानां संख्या कति?
उत्तरम्- पञ्चषष्टिमिता(65) विद्यन्ते।
46. प्रश्न-मल्लशर्मशिक्षायाः रचनाकालः कः?
उत्तरम्- 1781 वैक्रम वर्ष।
47. प्रश्न- उदात्तादिस्वराणां विवेचनं कस्यां शिक्षायामस्ति?
उत्तरम्- स्वराङ्कुश-शिक्षायाम्।
48. प्रश्न- स्वराङ्कुश-शिक्षायां कति पद्यानि सन्ति?
उत्तरम्- पञ्चविंशति(25) पद्यानि।
49. प्रश्न- स्वराङ्कुश-शिक्षायाः प्रवर्तकः कः?
उत्तरम्- श्रीमन् जयन्तस्वामी।
50. प्रश्न-षोडशश्लोकी शिक्षायाः प्रवर्तकः कः?
उत्तरम्- श्रीमन् रामकृष्णः।
51. प्रश्न- अवसाननिर्णयशिक्षायाः लेखकः कः?
उत्तरम्- अनन्तदेवः।
52. प्रश्न- अवसाननिर्णयशिक्षायाः निर्माणकालः कः?
उत्तरम्- 1946 मितः वर्षः।
53. प्रश्न- स्वरभक्तिलक्षणपरिशिष्टशिक्षायाः लेखकः कः?
उत्तरम्- कात्यायनः।
54. प्रश्न- स्वरभक्तिलक्षणपरिशिष्टशिक्षायां कति श्लोकाः सन्ति?
उत्तरम्- 32 द्वात्रिंशत्।

55. प्रश्न- प्रातिशाख्यप्रदीपशिक्षाया: लेखक: क:?
उत्तरम्- बालकृष्ण:।
56. प्रश्न- नारदीयशिक्षाया: लेखक: क:?
उत्तरम्- देवर्षि: नारद:।
57. प्रश्न- गौतमीशिक्षाया: लेखक: क:?
उत्तरम्- महर्षि गौतम:।
58. प्रश्न- लोमशी शिक्षाया: लेखक: क:?
उत्तरम्- लोमश:।
59. प्रश्न- लोमशी शिक्षायां कति श्लोका: सन्ति?
उत्तरम्- 74 श्लोका:।
60. प्रश्न- माण्डूकीशिक्षाया: प्रवर्तक: क:?
उत्तरम्- महर्षि मण्डूकाचार्य:।
61. प्रश्न- माण्डूकीशिक्षायां कति श्लोका: सन्ति?श्ण
उत्तरम्- 181एकाशीत्युत्तरं शतमेकम्।
62. प्रश्न- क्रमसन्धानशिक्षा कस्या:संहिताया:विवेचक:?
उत्तरम्-यजुर्वेदसंहिताया:।
63. प्रश्न- गलदृक् शिक्षाया: प्रतिपाद्यविषय: क:?
उत्तरम्- शुल्कयजुर्वेदसंहिता।
64. प्रश्न- मन: स्वार-शिक्षाया: प्रतिपाद्यविषय: क:?
उत्तरम्-यजुर्वेदसंहिता।
65. प्रश्न- प्रातिशाख्यस्य परं रूपं किम्?
उत्तरम्- शिक्षा।
66. प्रश्न- "संस्कृत वाङ्मये ध्वनि-विज्ञानस्य प्राचीन नाम किम्?
उत्तरम्- शिक्षा।
67. प्रश्न- "परिषद" संज्ञा-युक्त: शिक्षा-ग्रन्थ: अस्ति?
उत्तरम्- ऋक्प्रातिशाख्यम्।
68. प्रश्न- "ऋक्प्रातिशाख्य" ग्रन्थे प्रकरणं किं कथ्यते?
उत्तरम्- पटलम्।
69. प्रश्न- "ऋक्प्रातिशाख्यम्" कति पटलेषु विभक्तम्?
उत्तरम्- (18) अष्टादश पटलेषु।
70. प्रश्न- ऋक्प्रातिशाख्यस्य रचनाकार: क:?
उत्तरम्- शौनक:।
71. प्रश्न- "ऋक्प्रातिशाख्य-प्रथम-पटलस्य विषयवस्तु किमस्ति?
उत्तरम्- संज्ञा।

72. प्रश्न- वाजसनेयि-प्रातिशाख्येन सम्बद्धः वेदः कः?
उत्तरम्- शुक्लयजुर्वेदः।
73. प्रश्न- वाजसनेयि-प्रातिशाख्यस्य प्रणेता कः?
उत्तरम्- कात्यायनः।
74. प्रश्न- वाजसनेयि-प्रातिशाख्ये कति अध्यायाः सन्ति?
उत्तरम्- (08) अष्टाध्यायाः।
75. प्रश्न- पुष्पसूत्र-प्रातिशाख्येन सम्बद्धः वेदः कः?
उत्तरम्- सामवेदः।

TOTAL- 75

• • •

6

निरुक्तः

(क) निरुक्तस्य परिचय

षट्सु वेदाङ्गेषु निरुक्तं चतुर्थंस्थानं भजते। तच्च वेदपुरुषस्य श्रोत्रमुच्यते। "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्" इति। निःशेषादुक्तमिति निरुक्तम्। निरुक्तं वेदविज्ञानस्य आन्तरिकं स्वरूपं स्पष्टतः उद्घाटयति। निघण्ट्वाख्यस्य वैदिककोशस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदांगम्। निरुक्तस्यारम्भे निघण्टुं समाम्नाय इति कथितो वर्तते। निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति, परन्तु निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं करोति। "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।" अन्यानि वेदांगानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदस्य अन्तर्भूतानि तत्त्वानि व्याकरोति। अस्य शब्दस्य च या व्याख्या दुर्गाचार्यमहाभागेन कृता, तया व्याख्यया तु अस्य प्राचीनत्वमेव सिद्ध्यति। महाभारतस्य मोक्षधर्मपर्वणि उक्तं यथा-

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम्।।
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्मात् वृषाकपिं प्राह कश्यपो मां प्रजापतिः।।

(ख) निर्वचनस्य सिद्धान्त

निरुच्यते निःशेषेणोपदिश्यते निर्वचनविधया तत्तदर्थबोधनाय पदजालं यत्र तन्निरुक्तम्। शिक्षाया वर्णोच्चारणप्रकारे व्याकरणेन च पदसाधुत्वज्ञाने सञ्जाते मन्त्रघटक-पदानाम् अर्थज्ञानाकांक्षायां मन्त्रघटकार्थज्ञानाय भगवता यास्केन निरुक्तं प्रणीतम्। निरुक्तस्य पञ्चविधयः भर्तृहरिणा कथिताः-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थाभिनयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।

मानवस्वभावोऽयं वर्तते, यत् शब्दोच्चारणे सारल्यं सौविध्यं प्रति स्वाभाविकरुचिर्भवति। अस्माद् कारणादेव- 1. वर्णागमः-, 2. वर्णविपर्ययः, 3. वर्णविकारः, 4 वर्णलोपः, 5. धात्वर्थातिशयः निर्वचनानि क्रियन्ते। पदानां निर्वचनविषये यास्काचार्यस्तु स्वच्छन्दप्रवृत्तिशीलः दृश्यते, तस्य मते येन-केन प्रकारेण निर्वचनमवश्यमेव भवेत्। यथोक्तम्-

"न त्वेव न निर्ब्रूयात। न संस्कारमादियेत्। विषयवत्यो हि वृत्तयो भवन्ति। यथार्थं विभक्ततारः सन्नमयेत।।"

निर्वचनम्

गौः-गौरिति पृथिव्या नामधेयम्। यद् दूरङ्गता भवति। यच्चास्यां भूतानि गच्छन्ति। गातेर्वा गाङ्गतौ इत्यस्य धातोः ओकारो नामकरणः प्रत्ययः।

आचार्यः-आचार्यः आचारं ग्राहयति, आचिनोत्यर्थान् आचिनोति बुद्धिम् इति वा।

वैश्वानरः-विश्वान् नरान् नयति। विश्वः एनं नरा नयन्तीति वा अपि वा विश्वानरः एव स्यात्। इत्यादयः।

वेदागतकठिनशब्दसंग्रहरूपो निघण्टुग्रन्थश्चिरादागच्छति स्म। तत्रैव यास्केन तद् व्याख्याभूतं निरुक्तं विरचितम्। निघण्टवो वेदा एव न वेदाङ्गानि तद् व्याख्या- भूतं यास्कप्रणीतं निरुक्तमेव वेदाङ्गमिति सम्प्रदायः। पाणिनेः प्राचीनोऽयं यास्कः। अत्र यास्कनिरुक्ते चतुर्दशाध्यायाः। ऋहवस्तु द्वादशाध्यायात्मकमेवेदं शास्त्रम्। अन्तिमौ द्वावध्यायौ तु प श्चाद्योजितावित्याहु। निघण्टौ पञ्चाध्यायाश्च "दैवतकाण्ड" मिति च कथ्यते। प्रथमतस्त्रिष्वध्यायेषु तु पृथ्व्यादिबोधकानामनेकानां पदानामेकत्र संग्रहो विद्यते। द्वितीयं काण्डम् "ऐकपदिक" मित्यपि कथयन्ति। "नैगम" स्य तात्पर्यमिदमस्ति यत्- एषां प्रकृति-प्रत्ययोः यथार्थावगमनं न भवति। यथोक्तमस्ति अनवगतसंस्काराँश्च निगमान्। दैवतकाण्डे देवानां स्वरूपस्य स्थानस्य च निर्देशो विद्यते।

(ग) निरुक्तकारः निघण्टोः व्याख्याकारश्च

निघण्टोः एक एव व्याख्या साम्प्रतं समुपलब्धा र्. .ति। तस्य व्याख्याकारः देवराजयज्वा वर्तते। "निघण्टुनिर्वचनमेतस्य भाष्यस्य नाम विद्यते। भाष्यकारेण देवराजयज्वना स्वप्रतिज्ञानुसारं नैघण्टुकाण्डस्य एव निर्वचनमधिकेन विस्तरेण कृतम्। सैषा व्याख्या महत्त्वपूर्णा प्रामाणिकी च उपादेया विद्यते। सुप्रसिद्धेन तान्त्रिकेन भास्करारायेण विरचितः एकः स्वल्पाकारः ग्रन्थः समुपलब्धो भवति। यस्मिन् निघण्टोः शब्दाः अमरकोशस्य शैल्यां श्लोकबद्धाः कृताः सन्ति।

ऐतिहासिकदृष्ट्या निघण्टुकालानन्तरं निरुक्तानां समयस्य शुभारम्भो भवति। अयमेव कालो निरुक्तयुगस्य। अस्मिन्नेव युगे निरुक्तस्य वेदाङ्गत्वं सिध्यति। निरुक्तानां संख्या चतुर्दश आसीत्। यास्कस्य उपलब्धे निरुक्ते द्वादश निरुक्तकाराणां नामानि मतानि च निर्दिष्टानि सन्ति। अकारादिक्रमेण तेषां नामानि चेमानि सन्ति-

1. अग्रायणः	2. औपमन्यवः,	3. औदुम्बरायणः,	4. और्णनाभः,
5. कास्थक्य,	6. कौष्टुकिः,	7. गार्ग्यः,	8. गालवः,
9. तैटीकिः,	10. वाष्यायणि,	11. शाकपूणिः,	12. स्थौलाष्ठीविः,
13. यास्कः,	14. शाकपूणि पुत्र कौत्सव्यः।		

निरुक्ते द्वादशाध्यायाः सन्ति, अवसाने च परिशिष्टरूपौ द्वौ अध्यायौ स्तः। अनेन प्रकारेण समग्रः ग्रन्थः चतुर्दशाध्यायेषु विभक्तोऽस्ति। यास्कस्य कालः वैक्रमात् सप्तम-अष्टम वा शतकात्

पूर्वमासीत्। विद्वत्सु ख्यातमस्ति यत् यास्कसदृशो भाषावैज्ञानिको विश्वस्मिन् दुर्लभ एवेति। सर्वे भाषावैज्ञानिकाः यास्कस्य ग्रन्थस्य महत्त्वं स्वीकुर्वन्ति। ग्रन्थस्यारम्भे यास्केन निरुक्तसिद्धान्तस्य वैज्ञानिकं प्रदर्शनं कृतम्। एषां काले वेदार्थस्यानुशीलनाय अनेके पक्षाः आसन्, येषां नामानि अधोलिखितानि सन्ति। तच्च यथा-

1. अधिदैवतम्, 2. अध्यात्मम्, 3. आख्यानसमयः, 4. ऐतिहासिकाः, 5. नैदानाः, 6. परिव्राजकाः, 8. याज्ञिकाः। अत एव विद्वत्सु ख्यातमस्ति यत् यास्कसदृशो भाषावैज्ञानिको विश्वस्मिन् दुर्लभ एवेति। सर्वे भाषावैज्ञानिकाः यास्कस्य ग्रन्थस्य महत्त्वं स्वीकुर्वन्ति।

पदचतुष्टयम्

यास्काचार्यस्तु पदानां भेदचतुष्टयं स्वीकरोति। ते च नामाख्यातोपसर्गनिपाताः सन्ति।

1. नामजातिः-"सत्त्वप्रधानानि नामानि", नाम्नः चत्वारोऽर्था भवन्ति, सत्त्व-द्रव्य-संख्या-लिङ्गानि। यथा-घटः, पटः, धनम् इत्यादयः। 2. आख्यातजातिः- "भावप्रधानमाख्यातम्" इयमेव च साध्यत्वेनाभिधीयमाना "क्रिया" इत्युच्यते। आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि अनेनेत्याख्यातम्। तदिदमाख्यातं चतुष्प्रकारकं भवति। 1. कर्तरि- तत्र "पचति देवदत्तः" इति कर्तरि। 2. भावे-"भूयते देवदत्तेन" इति भावे। 3. कर्मणि-"पच्यते ओदनो देवदत्तेन" इति कर्मणि। 4. कर्मकर्तरि -"पच्यते ओदनः स्वयमेव" इति कर्मकर्तरि। यथा-पठति, व्रजति, करोति, भूयते, पच्यते इत्यादि। 3. उपगृह्याख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः प्रादयः। उपसर्गाः नानाविधानर्थान् अभिव्यंजयन्ति इति। 4. उच्चावचेषु निपतन्तीति निपाताः इव, आ, अह, ह, किल, हि, ननु, खलु, शश्वतम्, नूनम् इत्यादयः।

षड्भाव-विकारा

भवतीति भावः, तद्विकाराः एव भावविकाराः। ते च भावविकाराः- 1. जायते, 2. अस्ति, 3. विपरिणमते, 4. वर्धते, 5. अपक्षीयते, 6. विनश्यतीति षड्विधाः भवन्ति।

(घ) निरुक्तस्य सामान्योद्देश्यानि

निरुक्तं विना वेदार्थज्ञानं दुःसम्पाद्यं भवति। अर्थात् निरुक्तेन वेदार्थानामवगमे सौविध्यं भवति।

1. "समाम्नाय समाम्नातः स व्याख्यातव्यः" निघण्टोर्व्याख्या वर्तते।
2. "इदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते" इति निरुक्तं वेदमन्त्राणामर्थनिर्णयं करोति।
3. "तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्र्यम्" व्याकरणस्य पूर्णता निरुक्तेनैव भवति।
4. "अथापीदमन्तरेण पदविभागो न विद्यते" निरुक्तं विना पदविभागं कर्तुं न शक्यते।
5. "ज्ञानप्रशंसा अज्ञाननिन्दा च" अर्थज्ञानस्य प्रशंसा तथा अज्ञानस्य निन्दा च श्रूयते।

(ङ) निरुक्तस्य टीकाकारा

साम्प्रतं निरुक्तस्योपरि सर्वाभ्यो विस्तृता सम्पूर्णा च या टीका उपलब्धा भवति सा विद्यते

दुर्गाचार्यवृत्तिः। निरुक्तं भाष्यरूपमस्ति। निरुक्तवार्तिकस्य अस्तित्वमेकेनान्येन ग्रन्थेनापि प्रमाणिता भवति।

1. दुर्गाचार्यः-निरुक्तस्य प्रचीनोपलब्धष्टीकाकारो दुर्गाचार्य एवास्ति। एभिः निरुक्तस्य व्याख्यायां सूक्ष्मानुसन्धानेन कार्यं सम्पादितम्। ऋग्वेदस्य भाष्यकाराः उद्गीथमहाशयाः दुर्गाचार्यस्य वृत्त्या परिचिताः प्रतीयन्ते। आचार्योद्गीथस्य कालः विक्रमस्य सप्तमशतको विद्यते। परिणामतो दुर्गाचार्यस्य कालः सप्तमशतकाद् अर्वाचीनो नैव स्वीकर्त्तव्यः।

2. स्कन्दस्वामी-एतेषां टीका निरुक्तस्यान्यटीकाकारेषु प्रकाशिता विद्यते। सेयं टीका प्रचीना पाण्डित्यविलसिता च विद्यते। एषां पितुर्नाम भर्तृध्रुव आसीत्। समयश्च वैक्रमाब्दस्य सप्तमशतकस्य उत्तरार्धो विद्यते।

3. वररुचिः-अस्य महोदयस्य टीकाग्रन्थः "निरुक्तनिचयः" विद्यते। निरुक्तसिद्धान्तानां प्रतिपादिका शतश्लोकानां स्वतन्त्रा व्याख्या विद्यते। निरुक्तस्यासां टीकानामनुशीलनेन वयं भाषाशास्त्रीयेष्वनेकज्ञातव्यविषयेषु प्राप्नुमः। सायणाचार्यास्तु यास्कस्य दुर्गाचार्यस्य च अन्य-व्याख्याकाराणाञ्चाधमर्णतां धारयन्ति।

(च) निरुक्तस्य महत्त्वम्

"अर्थाऽवबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्" अर्थात् अर्थज्ञानाय स्वतन्त्ररूपेण यः पदानां संग्रहः स एव निरुक्तमिति कथ्यते। "यथाशब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात् जायते तथैव शब्दार्थनिर्वचनपरिज्ञानं निरुक्ताद् भवति" इति। अत्र च अयं निष्कर्षः शब्दस्य लक्षणस्तु व्याकरणानुसारं क्रियते, परञ्च शब्दार्थयोश्च निर्वचनस्य ज्ञानं निरुक्तेनैव भवति। अनेन प्रकारेण निरुक्तं वेदार्थज्ञानाय नितान्तमावश्यकमिति। निरुक्ते वैदिकशब्दानां निरुक्तिर्विद्यते। प्रत्येकं शब्दः येन केनापि धातुना सहावश्यमेव सम्बद्धोऽस्ति। अतः निरुक्तकाराः शब्दानां व्युत्पत्तिं प्रदर्श्य धातुना सह विभिन्नप्रत्ययानां निर्देशं कथयन्ति। यथा-

स पितुः सकाशाद् दूरे स्थितायामेव तस्य हितं करोति(दुहिता -दूरे-दूरदेशस्थितायामेव, हिता-हित कारिणी)। अस्यैव नाम विद्यते भाषाविज्ञानम् इति।

(छ) निरुक्तस्य शैली

भाषाशास्त्रदृष्ट्या निरुक्तं एकमनुपमं रत्नमस्ति। निरुक्तस्य मान्यः सिद्धान्तोऽस्ति यत् -सर्वे शब्दाः नामधातोः उत्पन्नाः भवन्ति। एतत् तथ्यम् आधुनिकतुलनात्मकभाषाशास्त्रस्य मेरुदण्डमस्ति। यास्केन स्ववैज्ञानिकमतस्य प्रस्थपनायै अनेका सबलाः युक्तयः प्रदत्ताः। यथा-"सत्य" शब्दः प्रकारद्वयेण सिद्धयति। 1. तद्धितान्तः-सति यत्त्रसत्य, 2. कृदन्तः- सन्तम् एति अच् त्रसत्य। यथार्थस्य भानं करोति तदेव सत्यमस्ति। समस्तानि नामानि धातुजानि सन्ति, वर्तमानस्य भाषाशास्त्रस्य च अयमेव मान्यः सिद्धान्तो विद्यते।

(ज) निरुक्त-व्याकरणयोः सामञ्जस्यम्

यास्काचार्येण कथितं यत्-"तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्र्यम्" , अस्मात् कारणात्

एव वेदानां सम्यग् ज्ञानायाध्ययनाय च निरुक्त-व्याकरणयोरुभयोरपि साहचर्यरूपेणावश्यकता भवति। व्याकरणस्य द्विविधं प्रयोजनमुक्तम्। तत्र (क) बाह्यप्रयोजने-"शब्दानां व्युतपत्ति-लिङ्ग-वचन-कारकादीनां परिष्करणं समायाति। (ख) अन्तरंग-प्रयोजनन्तु "रक्षोहागमलघ्वसन्देहाः" सन्ति। निरुक्तञ्च पूर्वोक्तानि कार्याणि तु सम्पादयति एव अपि तु व्याकरणापेक्षया "शब्दार्थविवेचनस्यापि कार्यं विदधाति।" अपि च शब्दस्यार्थस्य च पारस्परिकोऽन्योन्याश्रयसम्बन्धाभावात् द्वयोः ऐक्यं सम्भवति। विशेषतः अर्थज्ञानाय निरुक्तं परमापेक्षितं भवति। धातूनां परिज्ञानाय निरुक्तमपि व्याकरणाधीनं भवति। अस्मिन् विषये यास्कस्य कथनमस्ति-"न संस्कारमाद्रियेत्। विशवत्यो हि वृत्तयो भवन्ति"। इतिहासविदां विदुषां कथनमस्ति यत्-यास्काचार्यस्य काले वैयाकरणानां महत्संघटनमासीत्, तेषु शाकटायन-गार्ग्य-गालव-शाकल्यादयः प्रमुखाः सन्ति। महामुनिना पाणिनिनाप्यष्टाध्याय्यां सूत्रेषु तेषां मतानामुद्धरणं कृतम्। तथैव यास्काचार्योऽपि वैयाकरणसम्मतपदभेदं स्वीकृत्य निरुक्ते चतुर्विधान् नामाख्यातोपसर्गनिपाताख्यान् स्वीचकार। अत्र परवर्तिकालिकः पाणिनिः पदानां भेदद्वयमेव "सुप्तिङन्तं पद" मिति सूत्रेऽङ्गीचकार। एतदतिरिक्तं यास्काचार्यः व्याकरणस्य पारिभाषिकशब्दानां व्युत्पत्तिविषयकं निर्वचनमपि करोति। यथा-"सर्वनाम्नः=सर्वाणि नामानि यस्य, सर्वेषु भूतेषु नमति=गच्छति वा। शेषावतारः पतञ्जलिरपि महाभाष्ये निरुक्तसाम्ग्याः स्थाने स्थाने सम्यगुपयोगं कृत्वा सामञ्जस्यभावं स्थापयति। यथा-

1. दुष्टः शब्दः

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।। इति।

2. चत्वारि

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश।। इति।

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।। इति।

3. सक्तुमिव

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रेषां लक्ष्मीर्निहिताऽधिवाचि।।

उपर्युक्तेन विवेचनेनेदं सुस्पष्टं भवति यन्निरुक्त-व्याकरणयोर्पूरकत्वं सामञ्जस्य-करत्वं च विद्यते।

(झ) निरुक्ते मन्त्रभेदाः

यत्काम ऋषिः यस्यां देवतायाम् आर्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद् दैवतः स मन्त्रो भवति। ते मन्त्राः त्रिविधा भवन्ति, तत्र परोक्षकृताः प्रत्यक्षकृताश्च मन्त्राः अल्पाः एव सन्ति।

1. **परोक्षकृता मन्त्राः**-परोक्षकृताः ऋचः सर्वाभिः नामविभक्तिभिः युज्यन्ते। आख्यातस्य प्रथमपुरुषैश्च युज्यते, यथा-"इन्द्रो दिवः इन्द्र ईशे पृथिव्याः।"
2. **प्रत्यक्षकृतामन्त्राः**-ये मन्त्राः मध्यमपुरुषेण आख्यातस्य संयुक्ताः भवन्ति ते प्रत्यक्षकृताः इत्युच्यन्ते। यथा-"त्वमिन्द्र बलादधि" "वि न इन्द्र मृधो जहि" "मा चिदन्यत् विशंसत।"
3. **आध्यात्मिकाः मन्त्राः**-आध्यात्मिक्यः ऋचस्ताः भवन्ति, यासु उत्तमपुरुषस्य प्रयोगो भवति। किंच तासु ऋक्षु अहमिति सर्वनाम्नः प्रयोगो भवति। यथा-लवसूक्तस्य "इन्द्रो वैकुण्ठः" इत्यादिका मन्त्राः।

(ञ) दैवतस्वरूपनिरूपणम्

दैवतस्वरूपनिरूपणे यास्काचार्यः चतुर्णां मतानां विचाराणां वा उल्लेखं करोति, यथा- 1. **पौरुषविध्यम्**, 2. अपौरुषविध्यम्, 3. नित्यमौभयविध्यम्, 4. कर्मार्थात्मोभयविध्यञ्च। स्तुतिप्रकरणे **देवतानां** बाह्वादीनाम् अंगानां वर्णनं कृतमस्ति। देवता-विषयकं विचारम् उपस्थापयन् यास्काचार्यः **निरुक्तकारः** आह-"तिस्र एव देवता इति नैरुक्ताः। यदेतदुक्तं कर्मपृथकत्वात् देवानां भेदः इति **अनैकान्तिक** एष दृष्टान्तः दृश्यते हि अनेके एकस्मिन् कर्मणि कर्मकर्तारो व्यापृता भवन्ति इति। **यथा**- पृथिव्यां मनुष्यः पशवो, देवाः इति स्थानैकत्वं सम्भोगैकत्वं च दृश्यते। अर्थात् येन प्रकारेण **पृथिवी** ओषध्युत्पत्तौ स्वकार्यारम्भे पर्जन्यवाय्वादित्यकृतामुपकारम् अपेक्षते। यथोक्तम्-"त्रयः **तपन्ति** पृथिवीमनूपाः" इति।

(ट) निरुक्तस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- श्रोत्ररूपेण प्रतिष्ठितं वेदांगं किम्?
   उत्तरम्- निरुक्तम्।
2. प्रश्न- दुर्गावृत्तिकारेण दुर्गाचार्येण कति निरुक्तकाराः उल्लिखिताः सन्ति?
   उत्तरम्- (12) द्वादश।
3. प्रश्न-यास्कविरचिते निरुक्ते कति अध्यायाः वर्तन्ते?
   उत्तरम्- (14) चतुर्दशाध्यायाः।
4. प्रश्न-यास्कमते "उषा" पदस्य निर्वचनं किमस्ति?
   उत्तरम्- उच्छति।
5. प्रश्न-यास्कमते निशीथादारभ्य सूर्योदयपर्यन्तं कस्य कालः वर्तते?
   उत्तरम्-अश्विनः।
6. प्रश्न- "ऋतावरी" कस्याः विशेषणम् अस्ति?
   उत्तरम्- उषसः।
7. प्रश्न- "यो अस्कभायदुत्तरं सधस्थं" इति मन्त्रांशेन सम्बद्धः दैवतः कः?
   उत्तरम्- विष्णुः।
8. प्रश्न- वृद्धं च्यवनं नवयुवकं कः अकरोत्?
   उत्तरम्- अश्विन्।

9. प्रश्न- "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च" कस्याः उक्तिरियम्?
उत्तरम्- यास्कस्य।
10. प्रश्न-यास्कमते आख्यातस्य लक्षणं किमस्ति?
उत्तरम्- भावप्रधानम्।
11. प्रश्न-यास्कमते पदानां कति विभागाः विद्यन्ते?
उत्तरम्- (04) चत्वारः।।
12. प्रश्न-यास्कमते नामलक्षणं किम्?
उत्तरम्-सत्वप्रधानम्।
13. प्रश्न- कति भावविकाराः विद्यन्ते?
उत्तरम्- (06) षट्
14. प्रश्न- निरुक्ते कः विधिः प्रयुक्तः?
उत्तरम्- वैदिकशब्दानां निर्वचनम्।
15. प्रश्न- निरुक्तस्य उपजीव्यग्रन्थविशेषः कः?
उत्तरम्- निघण्टुः।
16. प्रश्न- वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णविनाशः अनेकार्थधातुप्रयोग श्च कुत्र वरीवर्त्ति?
उत्तरम्- निरुक्ते।
17. प्रश्न- निघण्टौ कति अध्यायाः सन्ति?
उत्तरम्- (05) पञ्च।
18. प्रश्न- निरुक्ते कस्य विदुष उल्लेखो नास्ति?
उत्तरम्- व्याडेः।
19. प्रश्न-यास्कसम्मतं समुद्र-पदस्य निर्वचनं अस्ति?
उत्तरम्-समुद्यन्ति एनमापः।
20. प्रश्न- "विश्वान् नरान् नयति" कस्य निर्वचनम् अस्ति?
उत्तरम्- वैश्वानरस्य।
21. प्रश्न- "रक्षोहागमलध्वसन्देहाः प्रयोजनम्" कस्येयमुक्तिः?
उत्तरम्- पतञ्जलेः।
22. प्रश्न-"अर्थावबोधे निरपेक्षतया पदजातं यत्र उक्तं तत् निरुक्तम्" इति कस्येयमुक्तिः?
उत्तरम्-सायणाचार्यस्य।
23. प्रश्न-यास्कमते अग्नेः निवासस्थानमस्ति?
उत्तरम्- पृथ्वीलोके।
24. प्रश्न- विष्णोस्त्रीणि पदानि केन पूर्णानि भवन्ति?
उत्तरम्-मधुना।
25. प्रश्न- देवतानां स्थानानि कुत्र वर्णितानि सन्ति?
उत्तरम्- निरुक्ते।

26. प्रश्न- सदसद्भ्यामनिर्वचनीयं किम्?
उत्तरम्-अज्ञानम्।
27. प्रश्न- भूतानां केभ्योऽंशेभ्यः ज्ञानेन्द्रियाणि उत्पद्यन्ते?
उत्तरम्- सात्त्विकेभ्यः।
28. प्रश्न- यास्कमते कति पदजातानि सन्ति?
उत्तरम्-चत्वारि।
29. प्रश्न- निरुक्तस्य अर्थः किं भवति?
उत्तरम्-व्युत्पत्तिकारकः।
30. प्रश्न- दुर्गाचार्यः निरुक्तोपरि कं ग्रन्थं अलिखत्?
उत्तरम्- दुर्गावृत्तिः।
31. प्रश्न- सम्प्रति निरुक्त-साहित्यं केन नाम्ना अभिहितं भवति?
उत्तरम्-भाषा-विज्ञानेन।
32. प्रश्न- निरुक्तं कस्य भाष्यम् अस्ति?
उत्तरम्- निघण्टु इत्यस्य।
33. प्रश्न- निघण्टुः किमस्ति?
उत्तरम्-वैदिक-शब्दानां कोषग्रन्थः।
34. प्रश्न- निघण्टु इत्यस्य प्रथमाध्यायत्रयस्य किं नाम विद्यते?
उत्तरम्- नैघण्टुक-काण्डम्।
35. प्रश्न- चतुर्थोध्यायः किं कथ्यते?
उत्तरम्-नैगम काण्डम्, एकपदिक-काण्डम् वा।
36. प्रश्न- दैवतकाण्डस्य नाम्ना निघण्टु इत्यस्य कोऽध्यायः ज्ञायते?
उत्तरम्- पञ्चमोऽध्यायः।
37. प्रश्न- सायणाचार्यस्य निघण्टु-निरुक्तस्य विषये किं मतमस्ति?
उत्तरम्-उभयो मिलित्वा निरुक्तवेदाङ्गः अस्ति।
38. प्रश्न- के सन्ति चतुर्दशनिरुक्तकाराः?
उत्तरम्-1. औपमन्यवः, 2. औदुम्बरायणः, 3. वाष्यायणि, 4. गार्ग्यः, 5. आग्रायणः, 6. शाकपूणिः, 6. और्णनाभ, 8. तैटिकः, 9. गालव, 10. स्थैलाष्ठीवि, 11. कौष्टुकि, 12. कास्थक्य, 13. यास्क, 14. शाकपूणि पुत्र कौत्सव्यः।
39. प्रश्न- निघण्टु इत्यस्य प्रथमम् अध्यायत्रयं किं कथ्यते?
उत्तरम्- नैघण्टुक-काण्डम्।
40. प्रश्न-निरुक्तकार यास्कः स्थान-विभागस्य दृष्ट्या देवान् त्रिश्रेणीषु के विभाजितः?
उत्तरम्-1. पृथ्वी स्थानम्, 2. अन्तरिक्ष-स्थानम्, 3. द्यु-स्थानम्।
41. प्रश्न- निरुक्तस्य सर्वे शब्दाः कुत्रात् उत्पन्नाः भवन्ति?
उत्तरम्- नामधातोः।

42. प्रश्न- नैघण्टुककाण्डं तु कति सन्ति?
उत्तरम्-त्रयोऽध्याया:।
43. प्रश्न- नैगमकाण्डे कति अध्याया:?
उत्तरम्- चतुर्थाध्याया:।
44. प्रश्न- दैवतकाण्डम् इत्यत्र कति अध्याया:?
उत्तरम्- पञ्चमाध्याया:।
45. प्रश्न- औदुम्बरायणस्य पितु: नाम किम्?
उत्तरम्-औदुम्बर:।
46. प्रश्न- औदुम्बरायणस्य पितामह: क:?
उत्तरम्-उदुम्बर:।
47. प्रश्न- निरुक्तदर्शनस्य प्रणेता एवं विवेचक: क:?
उत्तरम्- औदुम्बरायण:।
48. प्रश्न- प्रश्न- शाकपूणि: निरुक्तकारस्य समय: क:?
उत्तरम्- 800 ई०पू०।
49. प्रश्न- यास्कस्य अपर नाम किम्?
उत्तरम्-पारस्कर:।
50. प्रश्न- निरुक्तस्य विशेष प्रयोजनं किम्?
उत्तरम्- शब्दार्थविवेचनम्।
51. प्रश्न- व्याकरणस्य बाह्यप्रयोजनं किम्?
उत्तरम्- शब्दानां व्युतपत्ति-लिङ्ग-वचन-कारकादीनां परिष्करणम्।
52. प्रश्न- व्याकरणस्य अन्तरंगप्रयोजनं किम्?
उत्तरम्- रक्षोहागमलघ्वसन्देहा:"
53. प्रश्न- निरुक्तस्य का परिभाषा?
उत्तरम्- अर्थाऽवबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्।
54. प्रश्न- निरुक्तस्य प्रतिपाद्यो विषय: कतिविध:?
उत्तरम्- (5) पञ्चविध:। "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन युक्तस्तदुच्यते पञ्चविधं निरुक्तम्।।"
55. प्रश्न- निर्वचनशब्दस्य निष्पत्ति: कथं भवति?
उत्तरम्- निर् वच् परिभाषणे ल्युट् प्रत्ययेन निष्पन्नो भवति।
56. प्रश्न- निरुक्तशब्दस्य निष्पत्ति: कथं भवति?
उत्तरम्- निर् वच् परिभाषणे क्त प्रत्ययेन निष्पन्नो भवति।
57. प्रश्न- व्युत्पत्तिशब्दस्य निष्पत्ति: कथं भवति?
उत्तरम्-(विशिष्ट-उत्पत्ति:) वि उत् पद क्तिन् प्रत्ययेन निष्पन्नो भवति।

58. प्रश्न- शास्त्रशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्-शास् अनुशिष्टौ इति धातोःष्ट्रन् प्रत्ययेन निष्पन्नो भवति।
(शिष्यते अनेन इति शास्त्रम्)
59. प्रश्न- भाषाशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्- भाष् व्यक्तायां वाचि इति धातोः अ एवं टाप् प्रत्ययाभ्यां निष्पन्नो भवति।
60. प्रश्न-यज्ञशब्दस्य निष्पत्तिः कथं भवति?
उत्तरम्-याज् धातोः नङ् प्रत्ययेन निष्पन्नो भवति।
61. प्रश्न- ध्वनिशब्दस्य सिद्धिः कथं भवति?
उत्तरम्- ध्वन् धातोः इ प्रत्ययेन भवति।
62. प्रश्न- दैवतस्वरूपनिरूपणे यास्काचार्यस्य कानि चत्वारि मतानि?
उत्तरम्-1. पौरुषविध्यम्, 2. अपौरुषविध्यम्, 3. नित्यमौभयविध्यम्, 4. कर्मार्थात्मोभय-विध्यञ्च।
63. प्रश्न- निरुक्ते त्रिविधा मन्त्राः के सन्ति?
उत्तरम्- 1. परोक्षकृतामन्त्राः, 2. प्रत्यक्षकृतामन्त्राः, 3. आध्यात्मिक्याः मन्त्राः,
64. प्रश्न- निरुक्ते षड्भावविकाराः के सन्ति?
उत्तरम्-1. जायते, 2. अस्ति, 3. विपरिणमते, 4. वर्धते, 5. अपक्षीयते, 6. विनश्यतीति।
65. प्रश्न- स्कन्दस्वामिनः पितुर्नाम किम्?
उत्तरम्- भर्तृध्रुवः।
66. प्रश्न-परोक्षकृता मन्त्राः के भवन्ति?
उत्तरम्-ये मन्त्राः आख्यातस्य प्रथमपुरुषैश्च युज्यते,
67. प्रश्न- प्रत्यक्षकृता मन्त्राः के भवन्ति?
उत्तरम्- ये मन्त्राः मध्यमपुरुषेण आख्यातस्य संयुक्ताः भवन्ति
68. प्रश्न-आध्यात्मिक्याः मन्त्राः के भवन्ति?
उत्तरम्-ये मन्त्राः उत्तमपुरुषेण आख्यातस्य संयुक्ताः भवन्ति
69. प्रश्न-नामजातिः का कथ्यते ?
उत्तरम्- "सत्त्वप्रधानानि नामानि"।
70. प्रश्न-आख्यातजातिः का कथ्यते?
उत्तरम्- "भावप्रधानमाख्यातम्"।
71. प्रश्न-उपसर्गाः किं कुर्वन्ति?
उत्तरम्- नानाविधानर्थान् अभिव्यंजयन्ति।
72. प्रश्न- निपातः कः कथ्यते?
उत्तरम्- उच्चावचेषु निपतन्तीति निपाताः।
73. प्रश्न- षट्सु वेदाङ्गेषु निरूक्तस्य स्थानं किम्?
उत्तरम्- चतुर्थंस्थानम्।

• • •

7

भाषाविज्ञानम्

(Linguistics)

(क) भाषाविज्ञानस्य परिचयः

भासयति या सा भाषा। मानवः केन प्रकारेण वक्ति? तस्योपभाषायाः विकासः केन प्रकारेण भवति? भाषासूपभाषासु च केन प्रकारेण, केन केन हेतुना कदा-कदा च भवति परिवर्तनमथवा विकासः?केन प्रकारेण काचनापि भाषा विकसिता सति कस्याश्चन स्वतन्त्रायाः भाषायाः स्वरूपं धत्ते? एतेषां समेषां विषयाणां विधिवद् अध्ययनं क्रियते भाषाविज्ञाननामके विषये शास्त्रेऽस्मिन् शब्दानामुत्पादितः रूपविकासः, वाक्यानां संरचना प्रभृतीनां विषयाणां विवेचनं क्रियते। भाषाविज्ञानं तु अनेकेषां प्राचीनानाम् अर्वाचीनानां च भाषाणां, तेषाम् अवयवानां च साङ्गोपांगमध्ययनं विधिविशेषमाश्रित्य क्रियते।

"वर्णनात्मक-ऐतिहासिक-तुलनात्मकान् अध्ययनानां माध्यमेन भाषायाः प्रकृतेः विकासस्योत्पत्तेः संरचनायाश्चाध्ययनपूर्वकम् एतेषां समेषां विषयाणां सैद्धान्तिकं निर्धारणमेव भाषाविज्ञानम्।" अर्थात् "भाषाविज्ञानं भाषयाः उत्पत्तेः, तस्याःसंरचनायाः, तस्याः विकासस्य तस्याः ह्रासस्य च अध्ययनं क्रियते। भाषाविज्ञान नामके विषये शास्त्रेऽस्मिन् शब्दानामुत्पादितः रूपविकासः, वाक्यानां संरचना प्रभृतिनां विषयाणां विवेचनं क्रियते। अनेन प्रकारेण भाषाविज्ञानस्य माध्यमेन कस्याश्चन भाषायाः वैज्ञानिकमध्ययनं क्रियते इति निश्चीयते।

संस्कृतवैदिकवाङ्मये वहूनि रूपाणि प्राप्यन्ते, येषां प्रयोगः सम्प्रति लौकिकसंस्कृते, भाषायां वा नैव दृश्यते। एतस्यामवस्थायां लौकिक-अलौकिकयोः संस्कृतयोः अध्ययनं करोति भाषाविज्ञानम्। भाषावैज्ञानिकानां प्रयोगेणैव सुनिश्चितं जातं यत् संस्कृत-पालि- प्राकृतानां भाषाणां मूलम् एकमेव आास्ते। संस्कृतसाहित्यस्य वैज्ञानिकम् अध्ययनं करोति भाषाविज्ञानम्। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सममस्ति। इत्थं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां, प्रकृति-प्रत्ययादीनां, संज्ञा-सर्वनाम-क्रिया-विशेषणादीनां, नामाख्यातोपसर्गनिपातानां, पदपदार्थविषयकानां विकारादीनां, विकारमूलककारकानाम् अन्येषां विविधविध-विषयाणाञ्च अध्ययनं क्रियते।

अर्थात् भाषा तु यादृच्छिकवाचिकध्वनिसंकेतस्य सा पद्धतिः अस्ति, यया मानवः पारस्परिकविचाराणां विनिमयं करोतीति। इत्थं भाषाविषयकाः विचारणीयाः विषयाः अधोखिताः सन्ति-

1. भाषा तु एका पद्धतिरस्ति।
2. भाषा संकेतात्मिका अस्ति।
3. वाचिकध्वनिसंकेत एव भाषाऽस्ति।
4. भाषायां यादृच्छिकसंकेतस्य समावेशः भवति।
5. उच्चारणावयवेभ्यः निःसृतः ध्वन्यात्मक-विचार एव भाषाऽस्ति। (प्लेटो)
6. "व्यक्ता वाचि वर्णा येषां त इमे व्यक्त वाचः"। (पतञ्जलि)

पाणिनीय शिक्षायाम्-(श्लोक-संख्या-षट्तः दशपर्यन्तम्) वर्णानां विभागः पञ्चधा कृतं स्यात्। यथा-(1) स्वरतः, (2) कालतः, (3) स्थानात्, (4) आभ्यन्तरप्रयत्नात्, (5) वाह्य-प्रयत्नात्। संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीव वैज्ञानिकं निरूपणं कृतम्।

(ख) भाषाविज्ञानानां वर्गीकरणम्

संस्कृतभाषायाः भाषाविज्ञानिक-वर्गीकरणं-संस्कृतभाषायाः वैज्ञानिकमध्ययनमेव भाषाविज्ञानमित्यभिधीयते। इदानीं भाषाविज्ञानस्य पञ्चैव प्रकारास्समुपलब्धाः सन्ति। प्रकाराः संक्षेपेण अत्र प्रस्तूयन्ते।

(1) ऐतिहासिकं भाषाविज्ञानम्-अस्मिन् भाषाविज्ञाने भाषायाः विकासस्य-अध्ययनं क्रियते। अस्मिन् अध्ययने कस्याश्चनैकस्या एव भाषायाः परिवर्तितानां रूपाणाम् अध्ययनं क्रियते। यथा-संस्कृतभाषायाः वैदिकलौकिकरूपयोः अध्ययनम्। ऐतिहासिकभाषावैज्ञानिकाः इदमपि प्रतिपादयन्ति यत् संस्कृत-पालि-प्राकृतानां भाषाणाम् एकमेव मूलमास्ते।

(2) प्रायोगिकं भाषाविज्ञानम्-भाषाविज्ञानस्यास्य विभागस्य सम्बन्धः विविध-क्षेत्रेषु भाषाविज्ञानस्य प्रयोगेण सह विद्यते। अन्यस्याः भाषायाः शिक्षा केन प्रकारेण प्रदेया? अनुवादः केन प्रकारेण करणीयः? उच्चारणस्य दोषा केन प्रकारेण अपाकरणीयाः? इत्यादीनां प्रभृतीनां विषयाणां विचारः अत्र क्रियते।

(3) संरचनात्मकं भाषाविज्ञानम्-अस्मिन् भाषाविज्ञाने भाषायां प्रयुक्तानां सर्वेषां तत्त्वानां पारस्परिके विशिष्टे सन्दर्भेऽध्ययनं क्रियते। संरचनात्मकभाषाविज्ञानस्य विषये पाश्चात्येषु देशेष्वत्यधिकं कार्यं भवति। संरचनात्मकेन भाषाविज्ञानेन निश्चिताः निष्कर्षाः समुपलभ्यन्ते।

(4) वर्णानात्मकं भाषाविज्ञानम्- भाषाविशेषस्य वक्तारः कस्मिनञ्चित् समयविशेषे येन प्रकारेण तस्याः भाषायाः व्याहरणं व्यवहरणं च कुर्वन्ति। तस्यैव विश्लेषणात्मकमध्ययनं वर्णनात्मकं च करोति भाषाविज्ञानम्। स च समयविशेषो भूतकालिको वर्तमानकालिको वा भवितुमर्हति। एतादृशीनामपि भाषाणामध्ययनं वर्णनात्मकेन भाषाविज्ञानेन क्रियते। एतादृशी व्याहारमात्राश्रिता संस्कृतभाषा अतीतकालविशेषे कीदृश्यासीत्?तस्यां कति ध्वनयः आसन्? पदानां रचना

कीदृश्यासीत्?वाक्यानि कीदृशान्यासन्? इत्यादीकानां विषयाणामध्ययनं वर्णनात्मकं भाषाविज्ञानं करोति।

(5) तुलनात्मकं भाषाविज्ञानम्-अस्मिन् भाषाविज्ञाने एकाधिकानां भाषाणां तुलनात्मकमध्ययनं विभिन्नान् कालानाश्रित्य क्रियते। कस्यचन परिवारविशेषस्य विभिन्नानां भाषाणाम् ऐतिहासिकस्य सम्बन्धस्य ज्ञानाय तासां तुलनात्मकमध्ययनं क्रियते। कदाचित् तासां साम्यवैषम्ययोर्ज्ञानाय चापि तुलनात्मकमध्ययनं क्रियते।

(ग) भाषाविज्ञानस्याङ्गानि

भाषाविज्ञानं साहित्यसम्पत्तिविरहिताया अपि भाषायाः वैज्ञानिकमध्ययनं करोति। भाषाविज्ञानस्य सम्बन्धः सर्वेषां कालानां भाषाविषयकाणां तत्त्वैः साकं भवति भाषायाः कस्याश्चन तत्वानि सङ्कलय्य तानि चाश्रित्य सिद्धान्तानामपि निर्धारणं करोति। अस्मिन् अध्ययने ध्वनीनामुच्चारणस्य, अक्षराणां शब्दानां पदानां वाक्यानां च संरचनायाः विवेचनं क्रियते।

(1) ध्वनिविज्ञान-सम्पूर्णा भाषा ध्वन्याश्रिता भवति। अत एव भाषाविज्ञानेऽपि ध्वनेरध्ययनस्य महत्वपूर्णस्थानं भवति। ध्वनिविज्ञाने मानवशरीरस्योच्चारणोपयोगिनाम् अवयवानां परिचयः क्रियते। तानि चाङ्गानि-यथा-(क) स्वरयन्त्रम्, (ख) मुखम्, (ग) जिह्वा, (घ) तालवादिकं च। तदनन्तरं ध्वनीनामुच्चाणस्थानस्य उच्चारणप्रयत्नस्य दृष्ट्यापि वर्गीकरणं क्रियते। अत एव ध्वनिविज्ञानस्य इमे विषयाः सन्ति-उच्चारणावयवाः, ध्वनीनां संख्या, ध्वनीनां वर्गीकरणम्, ध्वनिविकाराणां दिशः, तासां कारणानि ध्वनिनियमाश्च।

(2) पदविज्ञानम्-पदपदार्थ-निरुपयता महर्षिणा पाणिनिनाऽभिहितम्-"सुप्तिङन्तंपदम्"। तथाविधाः वर्णाः पदशब्देनाभिधीयन्ते येषां वर्णसमूहानामन्ते सुप्विभक्तीनामथवा तिङ्विभक्तीनां संयोगो भवति। आचार्यविश्वनाथेनाप्यभिहितम्-"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः" इति। अस्मिन् पद विज्ञाने नानाविधानां पदानामध्ययनं क्रियते। यथा-संज्ञा, सर्वनाम, क्रिया, क्रियाविशेषणादिकानां, धातुरूपाणां, शब्दरूपाणाम्। अनेनैव साकमस्मिन् विज्ञाने पदानां मूलम्, पदानां व्युत्पत्तिः, पदानां वाक्येषु प्रयोगाः, पदानां काले--काले सञ्जातं रूपपरिवर्तनम्, पदानां प्रयोगेषु देशकालानुसारेण विकारादिका विवेच्यन्ते। पदानि एव भाषायाः मूलभूतानि सन्ति। अत एव पदविज्ञानं भाषाविज्ञानस्य मूलभूतं विद्यते।

(3) वाक्यविज्ञानम्-अनेकेषां सार्थकानाम् अन्वितानाञ्च पदानां समूहो वाक्यमित्यभिधीयते। वाक्यस्य स्वरूपं निरूप्यता आचार्येण विश्वनाथेनाभिहितम्-"वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" इति। अयमाशयो यत् पदानां समूह एव वाक्यमित्यभिधीयते, परन्तु तस्मिन् पदसमूहे वैशिष्ट्यत्रयमपेक्षितं भवति वाक्यत्वाय- 1. योगयता-योग्यानां पदानां समूहो वाक्यमित्यभिधीयते। यथा-जलेन सिञ्चतीत्येव वाक्यम्। 2. आकांक्षा- साकाङ्क्षाणामेव पदानां समूहो वाक्यमभिधीयते। 3. आसतिः-अनेनैव प्रकारेण पदेषु वाक्यत्वायासत्तिरप्यावश्यकम्। सा चासत्तिरपि द्विप्रकारवती भवति-कालकृता स्थानकृता च।। अत्र वाक्यानाम् ऐतिहासिकं तुलनात्मकमध्ययनमपि प्रस्तूयते।

(4) अर्थविज्ञानम्-शब्दार्थयोः शब्दविदः अभेद-सम्बन्धं स्वीकुर्वन्ति। सर्वे शब्दाः सार्थकाः भवन्ति। येन प्रकारेणात्मानं विना शरीरं नश्यति, तेनैव प्रकारेण शब्दानामपि सार्थकता अर्थैरेव भवति। अत एवार्थविज्ञानं भाषाविज्ञानस्यातीव महत्त्वपूर्णमङ्गं वर्तते। अर्थविज्ञाने शब्दानामर्थनिर्धारणस्य प्रक्रिया अधीयते। इत्थं शब्दानाम् अर्थपरिवर्तनानि तेषामर्थ-परिवर्तनानां कारणानि प्रभृतयो विषयाः अर्थविज्ञानस्य विषयाः सन्ति।

(घ) भाषाणां वर्गीकरणम्

सम्प्रति अस्मिन् संसारे त्रीणि सहस्त्राणि भाषाः प्रचलन्ति। एतासां सर्वासा भाषाणां द्विधा वर्गीकरणं कृतमस्ति।

(1) आकृतिमूलकं वर्गीकरणम्-वर्गीकरणस्यास्याधारः सम्बन्धतत्त्वस्ति। वर्गीकरणेऽस्मिन् वाक्याणां पदानाञ्च अध्ययनं क्रियते। एतदनुसारेणात्र वर्गद्वयम् उपलभ्येते-(क) अयोगात्मिकाः भाषाः। (ख) योगात्मिकाः भाषाश्च। योगात्मिके भाषासंवर्गे पुनस्त्रिविधाः उपवर्गाः सन्ति-1. अश्लिष्टाः, 2..श्लिष्टाः, 3. प्रश्लिष्टाश्च।

(2) पारिवारिकं वर्गीकरणम्-भाषायाः पारिवारिकं वर्गीकरणमतीव वैज्ञानिकमस्ति। वर्गीकरणेऽस्मिन् रचनातत्त्वम्, अर्थतत्त्वञ्च समानरूपेण आलोच्येते। ध्वनिः, पदरचना, वाक्यरचना, अर्थः, शब्दसम्पत्तिः, स्थानसान्निध्यं च एतेषु षट्सु विषयेषु साम्ये सति भाषायाम् एकः परिवारः भवति।

डॉ. देवेन्द्रनाथशर्मा महोदयः वर्गीकरणेऽस्मिन् अष्टादशभाषापरिवाराणां नामानि निर्दिशति-

1.	भारोपीय-परिवारः,	2.	द्राविड्-परिवारः,	3.	बुरुशस्की-परिवारः,
4.	काकेशी-परिवारः,	5.	यूराल-अल्टाई-परिवारः,	6.	चीनी-परिवारः,
7.	जापानी-कोरियाई-परिवारः,	8.	अत्युत्तरी-परिवारः,	9.	बास्क-परिवारः,
10.	सामी-हामी-परिवारः,	11.	सूडानी-परिवारः,	12.	बान्तू-परिवारः,
13.	होतेन्तोत-बुशमैनी-परिवारः,	14.	मलय-पोलिनेशियाई-परिवारः,	15.	पापुई-परिवारः,
16.	आस्ट्रेलियन-परिवारः,	17.	द. पू. एशियाई परिवारः,	18.	अमरीकी-परिवारः,

(ङ) भारोपीय-भाषापरिवारस्य सामान्य-परिचयः

विश्वेऽस्मिन् सर्वेषु भाषा-परिवारेषु भारोपीयभाषापरिवारस्य सर्वातिशायी महत्त्वमस्ति। यतःभौगोलिकसाहित्यिक-सांस्कृतिक-वैज्ञानिक-भाषावैज्ञानिक-राजनैतिक-सामाजिको- त्कर्षेभ्यः विश्वस्य सवाः भाषाः भारोपीयभाषापरिवारस्य ऋणी सन्ति। सम्प्रति भाषा- परिवारोऽयं एशिया महाद्वीपादारभ्य यूरोप-महाद्वीपपर्यन्तं विस्तीर्णमस्मि। अध्ययन- सौकर्यदृष्ट्या ते वर्गीकृतानि सन्ति। यथोक्तं कपिलदेवद्विवेदि-महोदयेन-

ईरानी-भारती चैव बाल्टो-सुस्लाविकी।
आर्मीनी अल्बनी चैताः शतम्वर्गे समाश्रिताः।
इटालिकी च ग्रीकी च जर्मानिक केल्टिकी तथा।
हित्ती तोखरिकी चैताः केन्टुम्वर्गे प्रकीर्तिताः।।



(च) भारोपीय-भाषापरिवारस्य वैशिष्ट्यानि

आचार्यवरेण कपिलदेव-द्विवेदि-महोदयेन दशधा-वर्णितं वैशिष्ट्यं भारोपीय-भाषापरिवारस्य।

भारोपीयपरिवारवैशिष्ट्यं दशकं मतम्।
श्लिष्टयोगात्मकत्वं तु प्रकृतिप्रत्ययात्मता।।
एकाक्षरत्वं धातूनां सुप्-तिङौ कृच्च तद्धिता:।
स्वातन्त्र्यमुपसर्गाणां पदमूला च वाक्यता।।
प्रत्ययार्थानभिव्यक्ति: समासाभिरुचिस्तथा।
अपश्रुते: प्रयोगश्च, प्रत्ययाधिक्यमेव च।।

1. श्लिष्टयोगात्मकत्वम्, 2. प्रकृतिप्रत्ययात्मता, 3 धातूनाम् एकाक्षरत्वम्,
4. सुप्-तिङ-कृत्-तद्धित-प्रत्ययात्मकता, 5. उपसर्गाणां स्वातन्त्र्यम्,
6. पदमूलावाक्यता, 7. प्रत्ययार्थानभिव्यक्ति:, 8 समासाभिरुचि:,
9. अपश्रुतिप्रयोग:, 10. प्रत्ययाधिक्यम्।

(छ) ध्वनिवर्गीकरणम्

स्थान-प्रयत्न-करणै: एव मानव-वाग्यन्त्रस्य निर्मिति: समीवति। इमे सर्वे एव सम्मिलितरूपेण ध्वन्युत्पादका: सन्ति। अत एव एभि: साहाय्येन एव ध्वने: वर्गीकरणं कर्तुं शक्यते। इमे सर्वे भाषिक-ध्वन्याधारभूता: त्रिवर्गेषु वर्गीकृता: ध्वन्युत्पादका: अधोलिखिता: (क) स्थानम्- कण्ठच्छदादारभ्य ओष्ठपर्यन्तं स्थानसंज्ञका: अवयवा: अधोलिखिता: सन्ति-

(क) मुखगत-स्थान-बोधक-चक्रम्

कण्ठ:	तालु	ओष्ठ	मूर्धा	दन्ता:	कण्ठतालु	कण्ठोष्ठम्	दन्तोष्ठम्	जिह्वामूलम्
अ	इ	उ	ऋ	ऌ	ए	ओ	व्	ँक
क्	च्	प्	ट्	त्	ऐ	औ		ँख
ख्	छ्	फ्	ठ्	थ्	–	–	–	–
ग्	ज्	ब्	ड्	द्	–	–	–	–

घ्	झ्	भ्	ढ्	ध्	–	–	–	–
ङ्	ञ्	म्	ण्	न्	–	–	–	–
ह्	य्	ँ व	र्	ल्	–	–	–	–
: विसर्ग	श्	ँ फ	ष्	स्	–	–	–	–

(ख) आभ्यन्तरबाह्यप्रयत्नज्ञानार्थकं चक्रम्

आभ्यन्तरप्रयत्ना:	स्पृष्टा:			ईषत्स्पृष्टा:	ईषद्विवृता:		विवृता:	संवृता:
संज्ञा	स्पर्शा:			अन्त:स्था:	ऊष्माण:		स्वरा:	
वर्णा:	क ख	ग घ	ङ	य	श		अ इ उ	ह्रस्वोऽ-
	च छ	ज झ	ञ	र	ष		ऋ ऌ	कार
	ट ठ	ड ढ	ण	ल	स		ए ओ	प्रयोग:
	त थ	द ध	न	व		ह	ऐ औ	
	प फ	ब भ	म					
बह्यप्रयत्ना:	अल्पमहाप्राणा:	अल्पप्राणा:	म. प्रा.	अल्पप्राणा:	महाप्राणा:	महा.	उदात्तानुदात्तस्वरिता:	
	विवारा:	संवार:	संवार:	संवार:	विवार:	संव		
	श्वासा:	नादा:	नादा:	नादा:	श्वासा:	नाद.		
	अघोषा:	घोषा:	घोषा:	घोषा:	अघोषा:	घो.		

(ग) करणम्-करणं नाम तादृशानाम् इन्द्रियाणां संवर्गोऽस्ति, य: ध्वन्युच्चारणे भाषिक-ध्वनिनिष्पत्तौ वा सहायक: भवति। स्थान-करणयो: केवलं गत्यात्मकमन्तरमस्ति। अनया दृष्ट्या अधरोष्ठं, जिह्वां मृदुतालुं स्वरतन्त्रीं च करणमित्यभिधानेन अभिधीयते ध्वनि- वैज्ञानिकै:।

एतेषां व्यावहारिक-उपयोगिता इयमस्ति यद् अनेन साहाय्येन कस्यापि भाषा-विशेषस्य स्वराणाम् उच्चारण-प्रक्रियाया: सम्यक्-निर्धारणं कर्तुं शक्यते। पूर्णरूपेण कस्यामपि भाषायाम् इमे स्वरा: नोपलभ्यन्ते, परन्तु आंशिकरूपेण सर्वासु भाषासु प्राप्यन्ते।

(ज) ध्वनि-नियमा:

ध्वनिप्रवृत्तिरेव भाषावैज्ञानिकै: "ध्वनिनियम:" इत्युच्यते। सत्यं तु इदमस्ति यत् सवर्क ध्वनिनियमा: आदौ तु प्रवृत्तिस्वरूपा: एव भवन्ति, किन्तु यदा ते पूर्णतां यान्ति, तदा ध्वनिनियमा: इत्यभिधीयन्ते लोकै:। ध्वनि-नियमा: कालसापेक्षा: भवन्ति। भाषा-देश- कालेभ्य: सह सम्बद्धत्वात् इमे ध्वनिनियमा: सीमिता: भवन्ति।

अत्र प्रसिद्धा: त्रिविधा: ध्वनिनियमा: संक्षेपेण प्रस्तूयन्ते, ते सन्ति-

1. ग्रिम-नियम:-(Grimmi's Law) ग्रिमनियमस्तु ध्वनिनियमस्य सर्वाधिकं प्रसिद्धम् उदाहरणमस्ति। ग्रिम-महोदयस्यानुसारेण प्रथम-ध्वनिपरिवर्तनं मूलभारोपीय ध्वनय: संस्कृत-ग्रीक-लैटिनभाषासु सुरक्षिता: सन्ति, किन्तु व्यंजनानि तु संस्कृतभाषायामेव विशुद्धरूपेण उपलभ्यन्ते। एवमेव घोष-महाप्राणध्वनय: घोषाल्पप्राणा अभूवन्। परिवर्तनेऽस्मिन् घोषाल्पप्राणध्वनय: अघोषाल्पप्राणा: अभूवन्।

2. ग्रासमन-नियम:-(Grassmani's law) द्वौ सन्निकृष्टौ महाप्राणध्वनी (वर्णौ) साकं

नहि भवतः, अपितु तयोः द्वयोः वर्णयोः एकः (प्रक्रमः) अल्पप्राणो भवति। यथा- संस्कृतभाषायां "धा" धातोः "धधाति" इति निष्पन्ने पूर्वधकारस्य स्थाने दकारः (अल्पप्राणः) इति जाते" दधाति" इति निष्पन्नं भवति।

3. वर्नर-नियमः(Verneri's law) ग्रिम-नियमस्य अपवादपरिमार्जकोऽयं वर्नर-नियमः। यदि "क् त् प्" इत्येषां वर्णानां पूर्ववर्तिस्वरे बलाघातो भवति, तर्हि ग्रिमनियमानुसारेण क् त् प् इत्येतेषु स्थानेषु" ख् थ् पफ" इति परिवर्तनं भवत्येव।

(झ) भाषाविज्ञानस्य वस्तुनिष्ठप्रश्नोत्तराणि

1. प्रश्न- भाषायाः मूलतमः संघटकः कः अस्ति?
   उत्तरम्- ध्वनिः।
2. प्रश्न- आंगिक-भाषायाः सीमा कतिविधा?
   उत्तरम्- त्रिविधा।
3. प्रश्न- भाषायाः लघुतम-सार्थक-इकाई का अस्ति?
   उत्तरम्- स्वनिम।
4. प्रश्न- भाषाविज्ञानं किमस्ति?
   उत्तरम्- भाषाणामध्ययनम्।
5. प्रश्न- अपभाषायाः कियन्तो विशेषताः सन्ति?
   उत्तरम्- चतस्रः।
6. प्रश्न- कस्मिन् वेदांगे ध्वनिविज्ञानस्य विवेचना दरीदृश्यते?
   उत्तरम्- शिक्षावेदांगे।
7. प्रश्न- कूटभाषायाः कियन्ति रूपाणि?
   उत्तरम्- चत्वारि।
8. प्रश्न- आकृति-उच्चारणकालयोः मापकः यन्त्रविशेषः कः?
   उत्तरम्- स्पेक्ट्रोग्राफः।
9. प्रश्न- कृत्रिमभाषायाः अवलम्बने कियन्ति कठिनानि?
   उत्तरम्- चत्वारि।
10. प्रश्न- भाषा कस्य साधनं विद्यते?
    उत्तरम्- विचारविनिमयस्य।
11. प्रश्न- विभाषायाः स्वाभाविक-निर्बलता भवन्ति?
    उत्तरम्- (3) तिस्रः।
12. प्रश्न- भाषाया विकास-सोपानानि कियन्ति, कानि च तानि?
    उत्तरम्- चत्वारि, 1. आंगिकभाषा, 2. वाचिकभाषा, 3. लिखितभाषा, 4. यान्त्रिकभाषा।
13. प्रश्नं- विभाषाणां भाषा-पदग्रहणे कति साधनानि कारणानि वा?
    उत्तरम्- (9) नव।

14. प्रश्न-मध्य-भारतीय-आर्यभाषाया: समय: क:?
उत्तरम्- 500 ई0 पूर्वत: 1000 ई0 वर्षपर्यन्तम्।
15. प्रश्न- भाषोत्पत्ते: सिद्धान्ता: कतिसंख्यका:?
उत्तरम्-एकादश।
16. प्रश्न-आधुनिक-भारतीय-आर्यभाषाया: क: काल:?
उत्तरम्- 1000 ई0 वर्षात् वर्त्तमान-कालपर्यन्तम्।
17. प्रश्न- माहेश्वर-सूत्राणामुत्पत्ति: कस्माज्जाता?
उत्तरम्- शिवस्य डमरुनिनादात्।
18. प्रश्न-आधुनिक-भारतीय-आर्यभाषाणां कियन्तो विशेषता:?
उत्तरम्- (7) सप्त।
19. प्रश्न- भाषोत्पत्ति-विषये "प्लेटो" महोदयस्य क: सिद्धान्त:?
उत्तरम्- रणन-सिद्धान्त:।
20. प्रश्न- भाषाया: धातु-सिद्धान्तस्य प्रतिपादक: क:?
उत्तरम्- मैक्समूलर।
21. प्रश्न- "प्रकृति-सिद्धान्त:" केनाऽनुमत:?
उत्तरम्- जर्मनविदुषा "हर्डर" महोदयेन।
22. प्रश्न- आधुनिक-भारतीय-आर्यभाषा: योगात्मका-अयोगात्मका वा?
उत्तरम्-योगात्मका:।
23. प्रश्न- "अनुकरण-सिद्धान्त:" केन प्रदत्त:?
उत्तरम्- "मैक्समूलर" महोदयेन।
24. प्रश्न-पश्चिमी-हिन्दी कस्या: भाषाया: विकंषिता जाता?
उत्तरम्- शौरसेनीभाषाया:।
25. प्रश्न- संकेत-सिद्धान्ते कियत्योऽसङ्गतय:?
उत्तरम्- चतस्र:।
26. प्रश्न- पश्चिमी-हिन्दीभाषाया: प्रमुखा विभाषा: कियत्य:?
उत्तरम्- (5) पञ्च।
27. प्रश्न- आवेग-सिद्धान्ते कियन्तो दोषा:?
उत्तरम्- अष्टौ।
28. प्रश्न-राजस्थानी-भाषाया: अन्तर्गता: विभाषा: कियत्य:?
उत्तरम्- (4) चतस्र:।
29. प्रश्न- अनुकरण-सिद्धान्ते कियत्यो विप्रतिपत्तय:?
उत्तरम्- (5) पञ्च।
30. प्रश्न-"संस्कृतम्" कस्य परिवारस्य मुख्या भाषाऽस्ति?
उत्तरम्- भारत-यूरोपीय-परिवारस्य।

31. प्रश्न- समन्वय-सिद्धान्ते कियन्तस्तर्काः?
उत्तरम्- (3) त्रयः
32. प्रश्न-वैदिक-भाषायाः कति विशेषताः?
उत्तरम्- (5) पञ्च।
33. प्रश्न- भाषापरिवर्तने कति बाह्यकारणानि?
उत्तरम्- (6) षट्।
34. प्रश्न- भाषा-परिवर्तने कति आभ्यन्तरकारणानि भवन्ति?
उत्तरम्- (6) षट्।
35. प्रश्न- भाषा-परिवर्तने प्रयत्नलाघवस्य कति प्रक्रिया भवन्ति?
उत्तरम्- (7) सप्त।
36. प्रश्न- भारत-यूरोपीय-परिवारस्य कियत्यः शाखाः?
उत्तरम्- (10) दश।
37. प्रश्न- स्थानभेदेन आगमाः कतिविधाः, के च ते?
उत्तरम्- (3) त्रयः, 1. आदि, 2. मध्य, 3. अन्त्यः।
38. प्रश्न- "भाषाविज्ञान की भूमिका" इत्यस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- आचार्य देवेन्द्रनाथ शर्मा।
39. प्रश्न- देवेन्द्रनाथ शर्म्मणः पितुर्नाम किम्?
उत्तरम्- पं0 शिवशरण शर्मा।
40. प्रश्न- देवेन्द्रनाथ शर्म्मणः पत्न्याः नाम किम्?
उत्तरम्- श्रीमती कुसुम शर्मा।
41. प्रश्न-भारतयूरोपीयपरिवारस्य भाषाणां विशेषताः कतिसंख्यकाः?
उत्तरम्- (14) चतुर्दश।
42. प्रश्न- समीकरणस्य भेदः कतिविधः, कश्च सः?
उत्तरम्- (2) द्विविधः, 1. पुरोगामी समीकरणम्, 2. पश्चगामी-समीकरणम्।
43. प्रश्न- भाषाणां प्रमुख-वर्गीकरणाधारः कतिविधः, के च ते?
उत्तरम्- (2) द्विविधः, 1. अकृतिमूलकः, 2. पारिवारिकश्च।
44. प्रश्न- प्राचीनतमः भाषावैज्ञानिकः कोऽस्ति?
उत्तरम्- पाणिनि।
45. प्रश्न- "व्यक्ता वाचि वर्णा येषां त इमे व्यक्त वाचः" भाषायाः इयं परिभाषा कुतः उद्धृताऽस्ति?
उत्तरम्- महाभाष्यतः।
46. प्रश्न- आकृतितूलकस्य प्रमुखो भेदः कतिविधः, कश्च सः?
उत्तरम्- (2) द्विविधः, 1. अयोगात्मकः, 2. योगात्मकश्च।
47. प्रश्न- पारिवारिकं वर्गीकरणं किम्?
उत्तरम्- सम्मिलित-रचनातत्त्वमर्थतत्त्वज्ञाऽऽधारीकृत्य कृतं भाषावर्गीकरणं "परिवारिके वर्गीकरणम्"।

48. प्रश्न- मेरियो-पाई-महोदयस्य मते विश्वेऽस्मिन् कति भाषाः सन्ति?
उत्तरम्- 2776 भाषाः।
49. प्रश्न- वर्गीकरणदृष्ट्या सर्वासां भाषाणां न्यूनातिन्यूनः कति विभागः स्वीकृतः?
उत्तरम्- 02 द्वौ विभागौ।
50. प्रश्न- परिवारमूलके वर्गीकरणे डॉ. देवेन्द्रनाथशर्मा कति भाषापरिवारः स्वीकरोति?
उत्तरम्- 18 अष्टादश भाषापरिवाराः।
51. प्रश्न- वैज्ञानिक-सांस्कृतिकदृष्ट्या सर्वप्रमुख-भाषापरिवारः कः?
उत्तरम्- भारोपीयपरिवारः।
52. प्रश्न- सर्वाधिकभाषाः कस्मिन् परिवारे समुपलभ्यन्ते?
उत्तरम्- अमेरीकीपरिवारे।
53. प्रश्न- साहित्यिकदृष्ट्या सर्वाधिक-समृद्धः भाषा-परिवारः कः?
उत्तरम्- भारोपीयपरिवारः।
54. प्रश्न-एकाक्षरी-भाषा का अस्ति?
उत्तरम्- चीनी।
55. प्रश्न- प्राचीन नागरी लिपेः कया शैल्या उड़ियालिपेः विकसितः?
उत्तरम्- पूर्वी-शैल्या।
56. प्रश्न- भारोपीय-भाषा अस्ति?
उत्तरम्- लैटिन।
57. प्रश्न- कस्य भाषापरिवारस्य सर्वाधिक-प्रयोक्तारः सन्ति?
उत्तरम्-भारोपीयपरिवारस्य।
58. प्रश्न- कृष्ण-कैस्पियनसागरयोः मध्ये कः भाषापरिवारः विद्यते?
उत्तरम्- काकेसीपरिवारः।
59. प्रश्न- चीन-तिब्बत-वर्मा-स्यामपर्यन्तः व्याप्तः परिवारविशेषः कः?
उत्तरम्-चीनीपरिवारः।
60. प्रश्न- अरब-देशे मुख्यरूपेण का भाषा भाषते?
उत्तरम्- सामी।
61. प्रश्न- लीबिया-सोमालीत्यादिदेशेषु का व्यवह्रियते?
उत्तरम्- हामी।
62. प्रश्न- सुडानी-भाषापरिवारे कति भाषाः सन्ति?
उत्तरम्-425 भाषाः।
63. प्रश्न- बान्टू-परिवारस्य भाषा का?
उत्तरम्- काफिर।
64. प्रश्न- बान्टू-परिवारे कति भाषाः विद्यन्ते?
उत्तरम्- 150 भाषाः।

65. प्रश्न- पापुई-भाषापरिवारे कति भाषा: भाषन्ते?
उत्तरम्-132 भाषा:।
66. प्रश्न- आस्ट्रेलियाई-भाषापरिवारे कति भाषा: सन्ति?
उत्तरम्-100 भाषा:।
67. प्रश्न- सहस्रभाषात्मक: भाषापरिवार: क:?
उत्तरम्- अमरीकीपरिवार:।
68. प्रश्न- केन्टुम्-शतम्वर्गयो: विभक्त: भाषापरिवार: क:?
उत्तरम्- भारोपीयपरिवार:।
69. प्रश्न- कस्मिन् यन्त्रे कृत्रिमतालो: प्रयोग: क्रियते?
उत्तरम्-पैलेटोग्राफ।
70. प्रश्न- मानवस्वरतन्त्री प्रतिसेकेण्डे कतिचक्रं यावत् कम्पनं कर्तुं शक्नोति?
उत्तरम्- 42-2048 चक्र/ सेकेण्डे।
71. प्रश्न- मानवस्वरतन्त्री प्रतिसेकेण्डे कतिबारम् अनावृतं संवृतं च (Open & Closed) भवितुं शक्नोति?
उत्तरम्- 800 बारम्।
72. प्रश्न- सामान्यवार्तालापे पुरुषेषु स्वरतन्त्र्या: कम्पनगति: किमस्ति?
उत्तरम्- 109163 चक्र/सेकण्ड।
73. प्रश्न- सामान्यवार्तालापे स्त्रीषु स्वरतन्त्र्या: कम्पनगति: किमस्ति?
उत्तरम्- 228-326 चक्र/सेकण्ड।
74. प्रश्न-भाषाविज्ञाने स्वनिम (चैवदमउम) शब्दस्य प्रथमप्रयोग: केन कदा च कृत:?
उत्तरम्- प्रो. हैवेट-महोदयेन 1876 A.D.
75. प्रश्न- मानस्वर-चतुर्भुजस्य कल्पना केन कृता?
उत्तरम्- प्रो. डेनियल-जान्स-महोदयेन।
76. प्रश्न-कस्य कारणस्य प्रभावाद् "स्कूल" इत्यस्य "इस्कूल" इति उच्चारणं क्रियते?
उत्तरम्-आगमकारणस्य प्रभावाद्।
77. प्रश्न- कस्मात् कारणात् "स्थल" इति शब्दस्य "थल" इति उच्चारणं क्रियते?
उत्तरम्- लोपस्य।
78. प्रश्न- विकारकारणाद् "गम्भीर" इति शब्दस्य किमुच्चारणं क्रियते?
उत्तरम्- गहिर।
79. प्रश्न- "पिशाच" इति शब्दस्य "पिसाच" उच्चारणे किं कारणम्?
उत्तरम्- विपर्ययकारणम्।
80. प्रश्न- "अग्नि" इति शब्दस्य "आग" इति उच्चारणे किं कारणम्?
उत्तरम्- समीकरण:।
81. प्रश्न- "धर्म" इति शब्दस्य "धरम" इति उच्चारणे किं कारणम्?
उत्तरम्- स्वरभक्ति:।

82. प्रश्न- भाषिक-ध्वनीनां वर्गीकरणे मुख्यतया कति आधाराः स्वीक्रियन्ते?
उत्तरम्- 03 आधाराः।

83. प्रश्न- उ, ऊ, ओ, औ, इमे स्वराः कीदृशाः सन्ति?
उत्तरम्- वर्तुलाः।

84. प्रश्न- आकारः कीदृग् स्वरः अस्ति?
उत्तरम्- अर्धवर्तुलः।

85. प्रश्न- डेनियल-जॉन्स-महोदयः कस्मिन् विश्वविद्यालये प्रोफेसरः आसीत्?
उत्तरम्-लन्दन-विश्वविद्यालये।

86. प्रश्न- बानरः=बन्दरः इत्यत्र ध्वनिपरिवर्तनस्य हेतुः किमस्ति?
उत्तरम्- व्यञ्जनागमः।

87. प्रश्न- ग्रिम-नियमानुसारेण पूर्वजार्मनिक-गकारस्य/ठववा उच्चजर्मनरूपंकिमस्ति?
उत्तरम्- क् BUCH।

88. प्रश्न-ग्रिम-नियमानुसारेण निम्नजर्मनस्य "UP" इत्यस्य उच्चजर्मने किं भवति?
उत्तरम्-। UF.

89. प्रश्न-ग्रासमन-नियमस्य प्रतिष्ठापकः"हेर्मान-ग्रासमन" कस्य देशस्य निवासी आसीत्?
उत्तरम्- जर्मनदेशस्य।

90. प्रश्न- ग्रासमन-मते "दधामि" इत्यस्य मूलरूपं किम् आसीत्?
उत्तरम्- धधामि।

91. प्रश्न- ग्रासमन-मते "बभार" इत्यस्य मूलरूपं किम् आसीत्?
उत्तरम्- भभार।

92. प्रश्न-फेर्नर-नियमस्ये प्रतिष्ठापकः "कार्ल-फेर्नर" कस्य देशस्य निवासी आसीत्?
उत्तरम्- जर्मनदेशस्य।

94. प्रश्न- फेर्नर-मते संस्कृतभाषायाः "सप्तम्" गाथिकभाषायां किं भवति?
उत्तरम्- सिबुन्।

95. प्रश्न- फेर्नर-मते "शतम्" इत्यस्य गाथिकरूपं किमस्ति?
उत्तरम्- हुन्द।

96. प्रश्न- खरोष्ठी-लिपेः प्राचीनतमः लेखः कुत्र मिलति?
उत्तरम्- मनसेरा।

97. प्रश्न- अन्तर्राष्ट्रीयलिपौ अलिजिह्वीय-नासिक्य-ध्वनिः किमस्ति?
उत्तरम्- छ ण

98. प्रश्न- रोमनलिपिः कीदृग् लिपिरस्ति?
उत्तरम्- ध्वनिलिपिः।

99. प्रश्न- अरबी-लिपेः उपजीव्यलिपिः का अस्ति?
उत्तरम्- सामी-लिपेः।

100. प्रश्न-यूरोपीय-लिपयः कस्याः रूपान्तराणि सन्ति?
उत्तरम्- ग्रीकलिपेः।
101. प्रश्न- प्राचीन-नागरीलिपिः ब्राह्मीलिपेः कस्याः शाखायाः विकृतिरस्ति?
उत्तरम्- उत्तरीशाखायाः।
102. प्रश्न-अन्तर्राष्ट्रीय-ध्वन्यात्मक-लिपिचिह्ननिर्माणे सर्वाधिक योगदानं कस्यास्ति?
उत्तरम्-डेनियल-जॉन्स-महोदयस्य।
103. प्रश्न- "भरसि" इत्यस्य संस्कृत-शब्दस्य अवेस्तारूपं किमस्ति?
उत्तरम्- बरहि।
104. प्रश्न- "अहुर" "बवइति" इत्यस्य अवेस्ता-रूपस्य संस्कृतरूपं किमस्ति?
उत्तरम्- असुर, भवति।
105. प्रश्न- संस्कृत-भकारस्य अवेस्तायां किं भवति?
उत्तरम्- ब।
106. प्रश्न- अवेस्तायाः "बवइति" इत्यस्य संस्कृतरूपं किं भवति?
उत्तरम्- भवति।
107. प्रश्न- संस्कृतस्य "भरन्ति" इत्यस्य अवेस्तारूपं किमस्ति?
उत्तरम्- बरइन्ति।
108. प्रश्न-संस्कृतस्य "क्रतु" इत्यस्य अवेस्तारूपं किमस्ति?
उत्तरम्- खतुम्।
109. प्रश्न-अवेस्तायाः "हथ्थ" इत्यस्य संस्कृतरूपं किम्?
उत्तरम्- हत्थ।
110. प्रश्न-अवेस्तायाः "फ" इत्यस्य संस्कृतरूपं किम्?
उत्तरम्- प।
111. प्रश्न-अवेस्तायाः "ए इति" इत्यस्य संस्कृतरूपं किम्?
उत्तरम्- एति।
112. प्रश्न-संस्कृतस्य "प्रोक्तः" इत्यस्य अवेस्तारूपं किमस्ति?
उत्तरम्- प्रफाओख्तो।
113. प्रश्न- प्राचीन-लिपीषु वर्णमाला-रहित-लिपिः किमस्ति?
उत्तरम्- सिन्धुघाटीलिपिः , हिटाइटलिपिः, चीनीलिपिः, रोमनलिपिः।
114. प्रश्न- वर्णमालायुक्त-लिपिः का अस्ति?
उत्तरम्- ब्राह्मीलिपिः, अरबीलिपिः, --।
115. प्रश्न- अरबी-लिपेः अभिधानं किमस्ति?
उत्तरम्- नस्खी।
116. प्रश्न- अरबी-लिपौ कति अक्षराः विद्यन्ते?
उत्तरम्- 28 अक्षराः।

117. प्रश्न- उर्दू-लिपेः किं नाम अस्ति?
उत्तरम्- अरबी।
118. प्रश्न- ग्रीक-लिपौ कति अक्षराः सन्ति?
उत्तरम्- 24 अक्षराः।
119. प्रश्न- ग्रिम-नियमानुसारेण भारतीय-गकारस्य परिवर्तितं जर्मनरूपं किमस्ति?
उत्तरम्- क्।
120. प्रश्न-ग्रिम-नियमानुसारेण मूलभारोपीय-बकारस्य परिवर्तितं जर्मनरूपं किमस्ति?
उत्तरम्- प्।
121. प्रश्न- माध्यन्दिनशाखायां टवर्गीयध्वनिभिन्न-षकारस्य उच्चारणं किमस्ति?
उत्तरम्- ख्।
122. प्रश्न- गुरुमुखी-लिपेः उपजीव्यलिपिः का अस्ति?
उत्तरम्- शारदालिपिः।
123. प्रश्न- प्रो. ब्लूलर-मतानुसारेण ब्राह्मीलिपौ कति वर्णाः आसन्?
उत्तरम्- 41 वर्णाः।
124. प्रश्न- बौद्धग्रन्थे ललितविस्तरे कति लिपीनामुल्लेखः प्राप्यते?
उत्तरम्- 64 लिपीनाम्।
125. प्रश्न- जैनग्रन्थे समवांगसूत्रे कति लिपीनां नामोल्लेखः प्राप्यते?
उत्तरम्- 16 लिपीनाम्।
126. प्रश्न- संस्कृत-वाङ्मये भाषाविज्ञानस्य प्राचीन-नाम किमस्ति?
उत्तरम्- शिक्षा।
127. प्रश्न- स्वरयन्त्राणां तेषां कार्याणां च प्रदर्शकः यन्त्रविशेषः कः?
उत्तरम्- लैरिंगोस्कोप।
128. प्रश्न- प्राचीन-भारतीय-आर्यभाषाकालः कोऽस्ति?
उत्तरम्- 1500 B.C. 500 B.C.
129. प्रश्न- मध्यकालीन-आर्यभाषाकालः कोऽस्ति?
उत्तरम्- 500 B.C-100 B.C.
130. प्रश्न- आधुनिक-भारतीय-आर्यभाषाकालः कोऽस्ति?
उत्तरम्- 1000। B.C.- अद्यावधिपर्यन्तम्।
131. प्रश्न- वैदिकसंस्कृतवत् ईरानीभाषा का अस्ति?
उत्तरम्- अवेस्ता।
132. प्रश्न- वैदिकसंस्कृते एव मिलति नान्यत्र लकारोऽयम्?
उत्तरम्- लेट् लकारः।
133. प्रश्न- पालिभाषायां सन्धिरियं नास्त्येव?
उत्तरम्- विसर्गसन्धिः।

134. प्रश्न- अयोगात्मक-भाषा का अस्ति?
उत्तरम्- तिब्बती।
135. प्रश्न-योगात्मकभाषा काऽस्ति?
उत्तरम्- तुर्की।
136. प्रश्न- आकृतिमूलकवर्गीकरणे अश्लिष्टयोगात्मकभाषा काऽस्ति?
उत्तरम्- तेलुगू।
137. प्रश्न- भाषाया: आकृतिमूलकवर्गीकरणविषयकं क: विकल्प: समीचीन:?
उत्तरम्- अयोगात्मक:, अश्लिष्ट:, श्लिष्ट:, प्रश्लिष्ट:।
138. प्रश्न- "अवेस्ता" कस्य देशस्य भाषा अस्ति?
उत्तरम्- ईरानी।
139. प्रश्न- पालिभाषायां कतिविधा विशेषताऽवलोक्यते?
उत्तरम्- (9) नवविधा।
140. प्रश्न- प्रकृतानां कियत्य: संख्या:, काश्च ता:?
उत्तरम्- (5) पञ्च, 1. महाराष्ट्री, 2. शौरसेनी, , 3. मागधी, 4. अर्द्धमागधी, 5. पैशाची च।
141. प्रश्न- महाराष्ट्रीयभाषाया: कियत्यो विशेषता: सन्ति?
उत्तरम्- (4) चतस्र:।
142. प्रश्न- मागधी भाषाया: कियत्यो विशेषता: सन्ति?
उत्तरम्- (3) तिस्र:।
143. प्रश्न- अर्द्धमागधी भाषाया: कियत्यो विशेषता: सन्ति?
उत्तरम्- (3) तिस्र:।
144. प्रश्न- पैशाची भाषाया: कियत्यो विशेषता: सन्ति?
उत्तरम्- (3) तिस्र:।
145. प्रश्न- शौरसेनी भाषाया: कियत्यो विशेषता: सन्ति?
उत्तरम्- (3) तिस्र:।
146. प्रश्न-अपभ्रंशस्य कियत्यो विशेषता: सन्ति?
उत्तरम्- (12) द्वादश।
147. प्रश्न-"मैथिलीभाषा" कस्या अपभ्रंशभाषाया: अन्तर्गता?
उत्तरम्- मगधीभाषाया: अन्तर्गता।
148. प्रश्न-भोजपुरीभाषा कस्या अन्तर्गता?
उत्तरम्- मगधीभाषाया: अन्तर्गता।
149. प्रश्न-संस्कृत-भाषया साम्यं कस्या: भाषाया: विद्यते?
उत्तरम्- अवेस्ता-भाषाया:।
150. प्रश्न-"तोषारी" भाषा कस्य परिवारस्य कस्य वर्गस्य च विद्यते?
उत्तरम्- भारत-यूरोपीय-परिवारस्य, "केतुम्" वर्गस्य च।

151. प्रश्न-काकेशी-परिवारस्य कियत्यो विशेषताः सन्ति?
उत्तरम्- (5) पञ्च।
152. प्रश्न अमेरिकी-परिवारे प्रायः भाषाणां सङ्ख्या कियत्यः?
उत्तरम्- (1000) सहस्रम्।
153. प्रश्न-रुक्षताया दूरीकरणं किं कथ्यते?
उत्तरम्- परिमार्जनम्।
154. प्रश्न-अद्यत्वे ज्ञानक्षेत्रं कतिधा विभक्तम्, तच्च किम्?
उत्तरम्- (3) त्रिधा, 1. भौतिकविज्ञानम्, 2. समाजविज्ञानम्, 3. मानविकी च।
155. प्रश्न-व्याकरणस्य भाषाविज्ञानयोः कः सम्बन्धः?
उत्तरम्- उपकार्योपकारकभाव-सम्बन्धः।
156. प्रश्न-शास्त्ररूपे भाषाविज्ञानस्य विशेषताः कतिसङ्ख्यकाः?
उत्तरम्- (5) पञ्च।
157. प्रश्न-भाषाविज्ञानस्य प्रयोजनानि कियन्ति?
उत्तरम्- (7) सप्त।
158. प्रश्न-भाषाविज्ञानस्य अङ्गानि कियन्ति?
उत्तरम्- (6) षड्।
159. प्रश्न-भाषाविज्ञानस्य शाखाः कियत्यः सन्ति, काश्च ताः?
उत्तरम्- (3) तिस्रः, 1. वर्णनात्मक, 2. ऐतिहासिक, 3. तुलनात्मकाः।
160. प्रश्न-कतिविधा वाक्, का च सा?
उत्तरम्- (4) चतुर्विधा, 1. परा, 2. पश्यन्ति, 3. मध्यमा, 4. वैखरी च।
161. प्रश्न-भाषाविज्ञानस्य ज्ञानस्य काभिः शाखाभिः साकं सम्बन्धोऽस्ति?
उत्तरम्-(क) मनोविज्ञानेन, (ख) शरीर-विज्ञानेन, (ग) भौतिक-विज्ञानेन, (घ) व्याकरणेन, (ङ) साहित्येन, (च) इतिहासेन, (छ) भूगोलेन, (ज) मानवविज्ञानेन, (झ) समाज-विज्ञानेन, (ञ) दर्शनेन च साकं सम्बन्धो विद्यते।
162. प्रश्न-ध्वनेः प्रसिद्धो भेदः कतिविधः, कश्च सः?
उत्तरम्- (2) द्विविधः, 1. स्वरः, 2. व्यञ्जनञ्च।
163. प्रश्न-को नाम स्वरः?
उत्तरम्-(क) यासामुच्चारणे निःश्वासे यत्र न कुत्राप्यवरोधो भवति तत्र ताः ध्वनयः "स्वरः" नाम्ना व्यवह्रियन्ते। (ख) स्वयं राजन्ते स्वरा वा।
164. प्रश्न-किं नाम व्यञ्जनम्?
उत्तरम्-यासां ध्वनीनामुच्चारणे निःश्वासे कुत्राऽप्यवरोधो जायते ता ध्वनयो "व्यञ्जन" नाम्ना व्यवह्रियन्ते।
165. प्रश्न-मुखविवरस्याऽनुसारेण स्वराणां कियन्तो भेदाः, के च ते?
उत्तरम्- (4) चत्वारो भेदाः, 1. विवृतम्, 2. अर्धविवृतम्, 3. अर्धसंवृतम्, 4. संवृतञ्च।

166. प्रश्न-स्वरप्रधाना का भाषा?
उत्तरम्- वैदिकभाषा।
167. प्रश्न-कर्ण-नेत्रयोर्भाषायां कियन्ति अन्तराणि?
उत्तरम्- (5) पञ्च।
168. प्रश्न-ध्वनिविज्ञानस्य कतिविधः प्रमुखः पक्षः, कश्च सः?
उत्तरम्- (2) द्विविधः, 1. औच्चारणिकः, 2. ध्वानिकश्च।
169. प्रश्न-स्वनिमस्य कियत्यो विशेषता विद्यते?
उत्तरम्- उच्चरित-भाषायाः।
170. प्रश्न-"संस्कृतम्" कीदृशी भाषा विद्यते?
उत्तरम्- "श्लिष्ट-योगात्मका भाषा"।
171. प्रश्न-भाषाविज्ञानदृष्टया भाषायाः अङ्गं किम्?
उत्तरम्- वाक्यम्।
172. प्रश्न-भाषाविज्ञानदृष्ट्या संस्कृते कियन्ति कारकाणि?
उत्तरम्- (7) सप्त।
173. प्रश्न-वाच्यं कतिविधम्, किञ्च तत्?
उत्तरम्- (3) त्रिविधम्, 1. कर्तृवाच्यम्, 2. कर्मवाच्यम्, 3. भाववाच्यञ्च।
174. प्रश्न-कालः कतिविधः, कश्च सः?
उत्तरम्- (3) त्रिविधः, 1. भूतकालः, 2. वर्तमानकालः, 3. भविष्यत्कालश्च।
175. प्रश्न-भूतकालस्य कियन्तो भेदाः, के च ते?
उत्तरम्- (3) त्रयो भेदाः, 1. अद्यतनम्, 2. अनद्यतनम्, 3. परोक्षश्च।
176. प्रश्न-अथाऽनुसारेण वाक्यस्य कियन्तो भेदाः, के च ते?
उत्तरम्- (8) अष्टौ भेदाः, 1. विधि वाक्यम्, 2. निषेध वाक्यम्, 3. प्रश्न- वाक्यम्, 4. अनुज्ञा-वाक्यम्, 5. इच्छार्थक-वाक्यम्, 6. सन्देहार्थक- वाक्यम्, 7. संकेतार्थक-वाक्यम्, 8. विस्मयादिबोधक-वाक्यञ्च।
177. प्रश्न-शब्दः कतिविधः, कश्च सः?
उत्तरम्- (3) त्रिविधः, 1. वाचकः, 2. लक्षकः, 3. व्यञ्जकश्च।
178. प्रश्न-अर्थः कतिविधः, कश्च सः?
उत्तरम्- (3) त्रिविधः, 1. वाच्यः, 2. लक्ष्यः, 3. व्यङ्ग्यश्च।
179. प्रश्न-शब्दस्य कति वृत्तयः, काश्च ताः?
उत्तरम्- (3) तिस्रः, 1. अभिधा, 2. लक्षणा, 3. व्यञ्जना।
180. प्रश्न-पाठकस्य कियन्तो गुणाः?
उत्तरम्- (6) षड्।
181. प्रश्न- पाठकस्य कियन्तो दोषाः?
उत्तरम्- (6) षड्।

182. प्रश्न-तुलनात्मक-भाषाविज्ञानस्य जनकः कः?
उत्तरम्- पाणिनिः।

183. प्रश्न-समास-कारकप्रकरणयोः मूलाधारौ कौ स्तः?
उत्तरम्- (2) द्वौ, 1. वाक्यविज्ञानम्, 2. अर्थविज्ञानञ्च।

184. प्रश्न- भाषाविज्ञानस्य निर्माणयुगः कः उच्यते?
उत्तरम्- अष्टादश-शताब्दी।

185. प्रश्न-आधुनिक-भाषाविज्ञानस्य जनकः कः आसीत्?
उत्तरम्- "फर्दिनान्द द सोसूर" महोदयः।

186. प्रश्न-लिपेः सम्बन्धः केन विद्यते?
उत्तरम्- सभ्यतायाः विकासेन।

187. प्रश्न-मुख्यतो लिपेः विकास-सोपानानि कियन्ति, कानि च तानि?
उत्तरम्-(3) त्रीणि, 1. चित्रलिपिः, 2. भावलिपिः, 3. ध्वनिलिपिः।

188. प्रश्न-लिपेः प्राचीनतमं रूपं किम्?
उत्तरम्- चित्रात्मकम्।

189. प्रश्न-भारतस्य सर्वाः लिपयः कुतो निःसृताः?
उत्तरम्- ब्राह्मीलिपितः।

190. प्रश्न-उत्तरी-शैलीतो विकसिताः कियत्यो लिपयः, काश्च ताः?
उत्तरम्-(5) पञ्च, 1. गुप्तलिपिः, 2. कुटिललिपिः, 3. प्राचीन-नागरी, 4. शारदा, 5. बँगलालिपि च।

191. प्रश्न-भाषा-भूगोलस्य उपयोगितायाः कियन्ति कारणानि?
उत्तरम्- (6) षट्।

192. प्रश्न-प्रत्येक-विज्ञानस्य कियन्तः पक्षाः, के च ते?
उत्तरम्-(3) त्रयः, 1. सिद्धान्त-पक्षः, 2. अनुप्रयोग-पक्षः, 3. व्यावहारिकोपयोगश्च।

193. प्रश्न-भाषा-विश्लेषणस्य कियन्तः स्तराः, के च ते?
उत्तरम्- (4) चत्वारः, 1. पदम्, 2. स्वनम्, 3. वाक्यम्, 4. अर्थश्च।

194. प्रश्न-कस्यापि संगणकस्य कौ मुख्यावयवौ?
उत्तरम्- 1. हार्डवेयर, 2. सॉफ्टवेयर।

195. प्रश्न-"हार्डवेयर" इत्यस्य कार्यं किम्?
उत्तरम्- संगणके अभियान्त्रिकपक्षस्य ज्ञानम्।

196. प्रश्न-संगणके विभिन्न-कार्यनिष्पादन-क्षमता केन आगच्छति?
उत्तरम्- "सॉफ्टवेयर" इत्यस्य।

197. प्रश्न-आधुनिक-व्यक्तिगतसंगणके कियन्तोऽवयवाः, के च ते?
उत्तरम्-(3) त्रयोऽवयवाः, 1. क्रेन्द्रप्रसारविभागः. {C.P.U.} 2. जवनिका [Monitor, 3. कुड्जकामण्डलम् [Keyboard]

198. प्रश्न-भाषाया: आकृतिमूलक-वर्गीकरण-विषय: क:?
उत्तरम्- अयोगात्मक:, अश्लिष्ट:, प्रश्लिष्ट:, विश्लिष्ट:।
199. प्रश्न-"उष्ट्र" इत्यस्य "ऊँट" इति ध्वनि: परिवर्तनस्य क: प्रकार:?
उत्तरम्- अनुनासिकता।
200. प्रश्न-अनुनासिक-वर्णानां का संख्या?
उत्तरम्- (5) पञ्च।
201. प्रश्न कस्मिन् यन्त्रे कृत्रिम-तालु: इत्यस्य प्रयोगो भवति?
उत्तरम्- पैलेटोग्राफस्य।
202. प्रश्न-आवृत्ति एवं उच्चारण-समयस्य बोधक-यन्त्रं किम्?
उत्तरम्- स्पैक्ट्रोग्राफ:।
203. प्रश्न-"ध्वनिपरिवर्तनस्य आन्तरिक-कारणं किम्?
उत्तरम्- ध्वने:परिवेश:।
204. प्रश्न-"शाक" -"साग" अस्य ध्वनि-परिवर्तनस्य कारणं किम्?
उत्तरम्- घोषीकरणम्।
205. प्रश्न-"स्वरतन्त्रिनां मध्ये प्रस्फुटित-अंशस्य किं नाम?
उत्तरम्- काकल:।
206. प्रश्न-"पाणिनीय-शिक्षा" यां ध्वनि: कति वर्गेषु विभक्त:?
उत्तरम्- (5) पञ्च।
207. प्रश्न-"अ" इति कीदृश: स्वर:?
उत्तरम्- केन्द्रीय-स्वर:।
208. प्रश्न-"ऊ" अत्र कीदृश: स्वर:?
उत्तरम्- पश्च-स्वर:।
209. प्रश्न-"ऐ" अत्र कीदृश: स्वर:?
उत्तरम्- अर्धविवृत-स्वर:।
210. प्रश्न-वैदिक-संस्कृते प्रयुक्त-लकार: क:?
उत्तरम्- लेट् लकार:।
211. प्रश्न-लौकिक-संस्कृते कति ध्वनय: सन्ति?
उत्तरम्- (48) अष्टचत्वारिंशत्।
212. प्रश्न-आंग्लभाषा भारोपीय-परिवारस्य कस्या: भाषया सम्बद्ध:?
उत्तरम्- इटालिक।
213. प्रश्न-"रोमन-लिपि" इत्यस्मिन् ग्रीकात् कौ द्वौ अक्षरौ गृहीत:?
उत्तरम्- र्ल् ण
214. प्रश्न-विसर्गस्य (:) उच्चारण-स्थानं किम्?
उत्तरम्- कण्ठ:।

215. प्रश्न-वैदिक-ध्वनि-समूहेषु स्वारानां का: संख्या:?
उत्तरम्- (13) त्रयोदशन्।
216. प्रश्न्-ब्राह्मी-लिपि: कीदृश: अस्ति?
उत्तरम्- वैज्ञानिक-लिपि:।
217. प्रश्न-भरत मुने: अनुसारं प्राकृत-भाषा कति सन्ति?
उत्तरम्- (7) सप्त।
218. प्रश्न-"भतृजाय त्रावज" अत्र ध्वनिपरिवर्तनस्य नियम: क:?
उत्तरम्- स्वर-व्यञ्जनलोप:।
219. प्रश्न-"भाण्डागार=भण्डार" अत्र ध्वनिपरिवर्तनस्य नियम: क:?
उत्तरम्- स्वर-व्यञ्जनलोप:।
220. प्रश्न-"समुद्र=समुन्दर" अत्र ध्वनिपरिवर्तनस्य नियम: क:?
उत्तरम्- स्वर-व्यञ्जनलोप:।
221. प्रश्न-प्राचीन-नागरीलिपे:कया शाखया बाँगला-लिपे: विकास: अभूत्?
उत्तरम्- पूर्वी।
222. प्रश्न-अन्तर्राष्ट्रीय स्पर्श-ओष्ठ्य लिपि: क:?
उत्तरम्- Pb
223. प्रश्न-अन्तर्राष्ट्रीय लिपे: स्पर्श-अलिजिह्वीय-लिपि: क:?
उत्तरम्- aG
224. प्रश्न- अन्तर्राष्ट्रीय लिपे: ओष्ठ्य-नासिक्य लिपि: क:?
उत्तरम्- M
225. प्रश्न-प्राचीन-नागरी-लिपि: "ब्राह्मीलिपे:" कया शैल्या विकसिता अभूत्?
उत्तरम्- उत्तरी-शैल्या।
226. प्रश्न- अन्तर्राष्ट्रीय कण्ठ्य-नासिक्य-लिपि: क:?
उत्तरम्- N
227. प्रश्न- अन्तर्राष्ट्रीय-लिपे: पार्श्विवक-संहर्षहीन-मूर्धन्य: क:?
उत्तरम्- I
228. प्रश्न- अन्तर्राष्ट्रीय उत्क्षिप्त मुर्धन्य-लिपि: क:?
उत्तरम्- R
229. प्रश्न-V इयं का अन्तर्राष्ट्रीय-लिपि: अस्ति?
उत्तरम्- दन्तोष्ठ्य-संहर्षहीन अर्धस्वर:।
230. प्रश्न-Ce Ze इयं का अन्तर्राष्ट्रीय-लिपि: अस्ति?
उत्तरम्- संहर्षी वत्स्र्य तालव्य:।
231. प्रश्न- अन्तर्राष्ट्रीय संवृत-स्वर-लिपि: का?
उत्तरम्- Iu

232. प्रश्न-आरोही-अवरोही-भेदयो: केषां स्वराणां द्विधा विभक्तुं शक्यते?
उत्तरम्- संयुक्तस्वर:।
233. प्रश्न- अन्तर्राष्ट्रीय-लिपौ स्पर्शतालव्यलिपिरस्ति?
उत्तरम्- C J .
234. प्रश्न- अन्तर्राष्ट्रीय-लिपौ दन्त्य-वर्त्स्य-स्पर्श-लिपि: किमस्ति?
उत्तरम्- T D.
235. प्रश्न- अन्तर्राष्ट्रीय-लिपौ "ञ्" इत्यस्य ध्वनिसंवर्ग: क:?
उत्तरम्- स्पर्शकण्ठ्य:।
236. प्रश्न- नेपाली-भाषाया: लिपि: का अस्ति?
उत्तरम्- नेवारीलिपि:।

स्थान-प्रयत्न-विवेचनम्-

237. प्रश्न- भाषिक-ध्वनि-वर्गीकरणस्य आधारा: का: सन्ति?
उत्तरम्- स्थान-प्रयत्न-कारणानि।
238. प्रश्न-कियन्ति-उच्चारण-स्थानानि?
उत्तरम्- (7) सप्त।
239. प्रश्न- अनुनासिकवर्णोच्चारणे सहायकौ स्त:?
उत्तरम्- मुख-नासिके।
240. प्रश्न- दन्त्यवर्णा: के सन्ति?
उत्तरम्- लृ त थ द ध न ल स।
241. प्रश्न- अकारस्य उच्चारणस्थानं किमस्ति?
उत्तरम्- कण्ठ:।
242. प्रश्न- हक्यो:(ह कु) उच्चारणस्थानं किमस्ति?
उत्तरम्- कण्ठ:।
243. प्रश्न- इकारस्य उच्चारणस्थानं किमस्ति?
उत्तरम्- तालु:।
244. प्रश्न-यच्वो:(य चु) उच्चारणस्थानं किमस्ति?
उत्तरम्- तालु:।
245. प्रश्न- ऋकारस्य उच्चारणस्थानं किम्?
उत्तरम्- मूर्द्धा।
246. प्रश्न- टवर्गस्य रकारस्य उच्चारणस्थानं किमस्ति?
उत्तरम्- मूर्द्धा।
247. प्रश्न- लृकारस्य उच्चारणस्थानं किम्?
उत्तरम्- दन्ता:।
248. प्रश्न- तवर्ग-लकारयो: उच्चारणस्थानं किम्?
उत्तरम्- दन्ता:।

249. प्रश्न- उकार-पवर्गयोः उच्चारणस्थानं किम्?
उत्तरम्- ओष्ठौ।
250. प्रश्न- ञमङणननाम् उच्चारणस्थानं किम्?
उत्तरम्- नासिका।
251. प्रश्न- एकारस्य उच्चारणस्थानं किम्?
उत्तरम्- कण्ठतालुः।
252. प्रश्न- औकारस्य उच्चारणस्थानं किम्?
उत्तरम्- कण्ठोष्ठ्यम्।
253. प्रश्न- वकारस्य उच्चारणस्थानं किम्?
उत्तरम्- दन्तोष्ठ्यम्।
254. प्रश्न- "स्" कारस्य उच्चारणस्थानं किम्?
उत्तरम्- दन्त्यः।
255. प्रश्न- "ष्" कारस्य उच्चारणस्थानं किम्?
उत्तरम्- मूर्धन्यः।
256. प्रश्न- "र" "ल" "य" इति वर्णानां का संज्ञा?
उत्तरम्- अन्तःस्थ।
257. प्रश्न- आभ्यन्तरप्रयत्न-ईषत्स्पृष्टं कं कथ्यते
उत्तरम्- अन्तःस्थ।
258. प्रश्न- श् ष् स् ह" एतेषां वर्णानां का संज्ञा?
उत्तरम्- ऊष्माणः।
259. प्रश्न-आभ्यन्तर-प्रयत्नमाधारीकृत्य व्यञ्जनस्य कति भेदाः जायन्ते?
उत्तरम्- (8) अष्टौ।
260. प्रश्न-"श" इत्यस्य ध्वनि-वर्ग कः?
उत्तरम्- संघर्षी।
261. प्रश्न-अन्तःस्थस्य अपर नाम किम्?
उत्तरम्- अर्द्धस्वरः।
262. प्रश्न- महाप्राणीकरणस्य उदाहरणं किमस्ति?
उत्तरम्- बाष्प-भाप।
263. प्रश्न-घोष-अघोषध्वन्योः सुस्पष्टमापकः यन्त्रविशेषः कः?
उत्तरम्- काइमोग्राफ।
264. प्रश्न- श्वासग्रहणकाले स्वरतन्त्रीणां कीदृग् स्थितिः भवति?
उत्तरम्- पूर्णविवृतः।
265. प्रश्न- ध्वन्युच्चारणे सर्वाधिकोपयोगी इन्द्रियं किमस्ति?
उत्तरम्- जिह्वा।

266. प्रश्न- कस्योच्चारणे वायु: निर्बाधगत्या वहि: नि:सरति?
उत्तरम्- स्वरस्य।
267. प्रश्न- वर्गाणां तृतीयवर्णस्य बाह्यप्रयत्नं किमस्ति?
उत्तरम्- अल्पप्राण:।
268. प्रश्न- खकारस्य बाह्यप्रयत्नं किमस्ति?
उत्तरम्- विवार:।
269. प्रश्न- स्वराणाम् आभ्यन्तरप्रयत्नं किमस्ति?
उत्तरम्- विवृतम्।
270. प्रश्न- शकारस्य ध्वनिसंवर्ग: कोऽस्ति?
उत्तरम्- संघर्षी।
271. प्रश्न- संघर्षी-ध्वनिसंवर्गे क: परिगणित: अस्ति?
उत्तरम्- य्।
272. प्रश्न- संस्कृतभाषायां "स" कारस्य ध्वनिसंवर्ग: कोऽस्ति?
उत्तरम्- अन्तस्थ:।
273. प्रश्न- संस्कृतभाषायाम् अन्तस्थवर्णा: कति सन्ति?
उत्तरम्- 04 चत्वार:।
274. प्रश्न- रकार: कस्मिन् ध्वनिसंवर्गे-परिगणित: वैयाकरणै:?
उत्तरम्- अन्तस्थसंवर्गे।
275. प्रश्न- अर्धस्वरा: के सन्ति?
उत्तरम्- अन्तस्था:।
276. प्रश्न- ककारस्य घोषरूपं किमस्ति?
उत्तरम्- ग्।
277. प्रश्न- तकारस्य घोषरूपं किमस्ति?
उत्तरम्- द्।
278. प्रश्न- चकारस्य महाप्राणभूत: क:?
उत्तरम्- छ्।
279. प्रश्न- फकारस्य अल्पप्राणभूत: क:?
उत्तरम्- प्।
280. प्रश्न- "प" महाप्राणभूत: क:?
उत्तरम्- फ्।
281. प्रश्न- "प" कारस्य घोष-रूपं किम्?
उत्तरम्- ब्।
282. प्रश्न- "त" कारस्य महाप्राणरूपं किम्?
उत्तरम्- थ्।

283. प्रश्न- "ट" कारस्य ध्वनिवर्ग: क:?
उत्तरम्- अघोष-महाप्राण-मूर्धन्य-स्पर्श।
284. प्रश्न- अल्पप्राणसंज्ञका: के सन्ति?
उत्तरम्- प् त् च्।
285. प्रश्न- महाप्राणसंज्ञका: के सन्ति?
उत्तरम्- घ् झ् ध्।
286. प्रश्न- तालव्यवर्ण: कोऽस्ति?
उत्तरम्- श्।
287. प्रश्न- मानस्वरेषु पञ्चस्वरा: के सन्ति?
उत्तरम्- उ, ऊ, ओ, औ, आ।
288. प्रश्न- डेनियल-जॉन्स-महोदयस्य मानस्वरे अग्रस्वरा: के सन्ति?
उत्तरम्- इ, ई, ए, ऐ।
289. प्रश्न-डेनियल-जॉन्स-महोदयस्य स्वरचतुर्भुजं मानस्वरं वा अभिलक्ष्य अर्धसंवृतस्वरान् निर्दिशतु?
उत्तरम्- ए, ओ।
290. प्रश्न- अर्धविवृतस्वरा: के सन्ति?
उत्तरम्- ऐ, औ।
291. प्रश्न- संवृतस्वरा: कस्मिन् विकल्पे प्रदर्शिता: सन्ति?
उत्तरम्- इ, ओ।
292. प्रश्न- विवृतस्वरा: के सन्ति?
उत्तरम्- अ, आ।
293. प्रश्न- खर्-वर्णा: किं भवन्ति?
उत्तरम्- श्वासा: अघोषाश्च।
294. प्रश्न- हश्-वर्णा: किं भवन्ति?
उत्तरम्- नादा: घोषाश्च।
295. प्रश्न- वर्गाणां प्रथम-तृतीय-पञ्चमा: यणश्च किं भवन्ति?
उत्तरम्- अल्पप्राणा:।
296. प्रश्न- वर्गाणां द्वितीय-चतुर्थौ शलश्च किं भवन्ति?
उत्तरम्- महाप्राणा:।
297. प्रश्न- आभ्यन्तरप्रयत्ना: कति प्रकारका: भवन्ति?
उत्तरम्- 05 पञ्चप्रकारका:।
298. प्रश्न- स्पृष्टं प्रयत्नं किं भवति?
उत्तरम्- स्पर्शानाम्।
299. प्रश्न- ईषत्स्पृष्टं प्रयत्नं किं भवति?
उत्तरम्- अन्तस्थानाम्।

300. प्रश्न- ईषद्विवृतं प्रयत्नं किं भवति?
उत्तरम्- ऊष्माणाम्।
301. प्रश्न- वकाराणां प्रयत्नं किं भवति?
उत्तरम्- विवृतम्।
302. प्रश्न- हस्वस्य अवर्णस्य प्रयोगे किं भवति?
उत्तरम्- संवृतम्।
303. प्रश्न- बाह्यप्रयत्ना: कतिविधा: भवन्ति?
उत्तरम्- 11 एकादशधा:।
304. प्रश्न- अल्पवायु यत्र प्रयोग:स्यु तत्र बाह्यप्रयत्न: क:?
उत्तरम्- संवार:।
305. प्रश्न- अधिकवायुयत्र प्रयोग:स्यु तत्र बाह्यप्रयत्न: क:?
उत्तरम्- महाप्राण:।
306. प्रश्न- "श्वास" बाह्यप्रयत्नस्य अपर नाम किमस्ति?
उत्तरम्- अघोष:।
307. प्रश्न- संस्कृते "स" वर्णं का ध्वनि: कथ्यते?
उत्तरम्- ऊष्म:।
308. प्रश्न- संस्कृते अनुस्वारस्य ध्वनिवर्ग: क:?
उत्तरम्- नासिक्य्।
309. प्रश्न- विसर्ग: कस्य पश्चात् प्रयुक्तो भवति?
उत्तरम्- सामान्य स्वरस्य।
310. प्रश्न- कस्या: ध्वने: नि:श्वास: मुखविवरेन सह नासिकाविवरणात् निस्सरति?
उत्तरम्- अनुनासिक- ध्वने:।
311. प्रश्न- "ओ" इति क: स्वर:?
उत्तरम्- अर्धसंवृत:।
312. प्रश्न- "उ" इति क: स्वर:?
उत्तरम्- संवृत:।
313. प्रश्न- "ल" इति कस्य वर्गस्य अस्ति?
उत्तरम्- पार्श्विक।
314. प्रश्न- ग्रिमनियमस्य प्रतिष्ठाता -याकोबग्रिम" कस्य देशस्य निवासी आसीत्?
उत्तरम्- जर्मन।
315. प्रश्न-"ग्रिम" महोदयस्यानुसारं मूलभारोपीय घोष-महाप्राणस्य जर्मनिके किं परिवर्तनम्?
उत्तरम्- घोष-अल्पप्राण:।
316. प्रश्न-"ग्रिम" महोदयस्यानुसारं मूलभारोपीयघोष-अल्पप्राणस्य जर्मनिके किं परिवर्तनम्?
उत्तरम्- अघोष अल्पप्राण।

317. प्रश्न- "ग्रिम" महोदयस्यानुसारं निम्न जर्मन "क" उच्च जर्मने किं रूपम्?
उत्तरम्- ख्।

318. प्रश्न-"ग्रिम" महोदयस्यानुसारं निम्न जर्मन "THREE" इत्यस्य उच्च जर्मने किं रूपम्?
उत्तरम्- DREI

319. प्रश्न-माध्यन्दिन शाखानुसारं ट-वर्गीय ध्वनै भिन्नः "ष" इत्यस्य उच्चारणं कीदृशः?
उत्तरम्-ख्।

320. प्रश्न-ब्राह्मी लिप्यै विकसिता शारदा लिपेः प्रचारः भारतस्य कस्मिन् प्रान्ते अभूत्?
उत्तरम्- पंजाव, कश्मीर।

• • •

8

कल्पशास्त्रम् (हस्तौ कल्पोऽथ पठ्यते)

The Science of Detailing of Religious Ceremonies

(क) कल्पशास्त्रस्य परिचय-

विपुले वेदाङ्गसाहित्ये कल्पस्य द्वितीयं स्थानमस्ति। कल्पस्य वैदिकसाहित्येऽतिशयं महत्त्वपूर्णं स्थानमस्ति। "कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पना शास्त्रम्" वेदेषु विस्तीर्णं कर्मकाण्डं सूत्रबद्धं कर्तुमेव कल्पस्याविर्भावः। अर्थात् वेदविहितानां कर्मणां व्यवस्थापकं शास्त्रं "कल्पः" इत्यभिधीयते। यथोक्तं विष्णुमित्रेण "कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्" इति। येषां यज्ञयागादिविहितानां विवाहोपनयनादिकर्मणाञ्च महत्त्वपूर्णं प्रतिपादनं वैदिकग्रन्थेषु कृतमस्ति तेषां सूत्रग्रन्थानामभिधानमस्ति कल्पः। ब्राह्मणकाले यागस्य तावान् प्रचारो जातो यत्तेषां यथावज्ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानामावश्यकताऽनुभूयते स्म। तामेवावश्यकतां स्वल्पेन शब्देन पूरयितुं कल्पसूत्राणि विरचितानि। कल्पसूत्राणि द्विविधानि–1. श्रौतसूत्राणि 2. स्मार्त्तसूत्राणि च। श्रुत्युक्तयागविधि- प्रकाशकानि श्रौतसूत्राणि, अर्थात् श्रुत्युक्तदर्शपौर्णमासादियज्ञानां विधानबोधकानि श्रौतसूत्राणि। इत्थं श्रौतसूत्रेषु ब्राह्मणग्रन्थवर्णितानां दर्श-पौर्णमासाग्निहोत्रादि श्रौताग्नि-यज्ञानां क्रमबद्धविवेचनमुपलभ्यते। स्मार्त्तसूत्राणि अपि द्विधा–गृह्यसूत्राणि धर्मसूत्राणि च। धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्तव्यानां वर्णनमस्ति। गृह्यसूत्रेषु त्रैवर्णिकैरवश्यानुष्ठेया- नामनुष्ठानानां यागविशेषाणां वर्णनं विद्यते। षोडशसंस्काराणां विशिष्टं वर्णनं च वर्तते। वेदानां कल्पसूत्राणाम् आध्यात्मिक विचारधारायाः वर्णनं वर्तते। शुल्वसूत्रेषु तु वेदीनिर्माणप्रकारस्य एव प्राधान्यमस्ति। शुल्वसूत्राणि केवलं यजुर्वेद एव उपलभ्यन्ते। अर्थात् येषां यज्ञयागादि- विहितानां विवाहोपनयनादिकर्मणाञ्च महत्त्वपूर्णं प्रतिपादनं वैदिकग्रन्थेषु कृतमस्ति, तेषां सूत्रग्रन्थानामभिधानमस्ति कल्पः। कल्पग्रन्था वेदाङ्गस्य प्राचीनतमा ग्रन्थास्सन्ति।

स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

उपर्युक्तेन सूत्रलक्षणेन विज्ञायते यत् –धर्मशास्त्रीयविधिविधानानां, कर्मानुष्ठानानां, नीतिनियमानां,

व्यवहृत-व्यवहाराणां धर्मस्य प्रवर्तनानाञ्च सङ्क्षेपतमं, सारयुतं, संशीतिरहितं कल्पसूत्रस्य विवेचनमिति।

(ख) कल्पसूत्ररचनाया उद्देश्यानि-

वैदिकवाङ्मयस्येतिहासे कल्पसूत्राणामाविर्भावो नव्ययुगस्य सूत्रपात इव लक्ष्यते। एतदपि विशिष्टमुद्देश्यमासीद्यत्-प्राक्तने वैदिके युगे तत्साहित्यस्य विस्तरत्वात्, दुर्गमत्वात् रहस्यमयत्वाच्च यथास्थितिबोधने दुस्तरं कार्यमासीत्। वशिष्ट्यञ्चैषां न्यूनातिन्यूनशब्देषु-अधिकादधिकं भावप्रकटनमस्ति। तथाहि-भावस्य, भाषायाः, विचारस्य, शैल्याः, रचनाविधानस्य च दृष्ट्याऽपि परिवर्तनं दरीदृश्यते।

(ग) कल्पसूत्रस्य मुख्यो विषयः, भेदः, विषयविभागश्च-

कल्पसूत्रे वैदिककर्मणां प्रतिपादनं संस्काराणां व्याख्यानं यज्ञानाञ्च विधानवर्णनं प्राधान्यरूपेण विवेचितं विद्यते। यज्ञादीनां वैशिष्ट्यस्य प्रतिपादनं वेदेभ्यो ब्राह्मणेभ्यश्चोपलभ्यते। प्राचीन-कालादारभ्याधुनापर्यन्तं कल्यसूत्रस्येमे ग्रन्थाः कर्मकाण्डजुषां सामाजिकानां सात्त्विकजीवनस्य परिचायकाः सन्ति। कल्पसूत्रणां मुख्यतस्त्रयो भेदा भवन्ति। केषाञ्चन मते चतुर्भेदा भवन्ति। यथा-

1. श्रौतसूत्रम्, 2. गृह्यसूत्रम्, 3. धर्मसूत्रम्, 4. शुल्वसूत्रम्।

1. श्रौतसूत्रम्—श्रुतिप्रतिपादितदर्शपौर्णमासादियज्ञानां विधानबोधकानि श्रौतसूत्राणि। वेदोक्ते कर्मकाण्डे सनातनहिन्दूसमाजस्य सुदीर्घकालात् नैष्ठिकभावेन सुदृढो विश्वासः प्रचलति। वैदिकसंहितासु वर्णितानि यानि यज्ञ-यागादिविधानानि सन्ति तानि श्रौतसूत्रेषु साररूपेण सङ्कलितानि सन्ति। तेषां मुख्यं कार्यं वैदिकहविर्विधानस्य सोमयज्ञस्य च धार्मिकानुष्ठा- नानां प्रतिपादनमस्ति। आश्वलायनश्रौतसूत्रे द्वादशाध्यायाः सन्ति। शाङ्खायन-श्रौतसूत्रञ्चाष्टादशाध्यायेषु विभक्तं विविध-यज्ञ-यागादीनां प्रतिपादकमस्ति। समुपलब्धश्रौतसूत्रेषु-

(क) आश्वलायनश्रौतसूत्रम्, (ख) शाङ्खायनश्रौतसूत्रम्,
(ग) मानवश्रौतसूत्रम्, (घ) बौधायनश्रौतसूत्रम्,
(ङ) आपस्तम्बश्रौतसूत्रम्, (च) हिरण्यकेशीश्रौतसूत्रम्,
(छ) जैमिनीयश्रौतसूत्रम्, (ज) कात्यायनश्रौतसूत्रम्,
(झ) वैतानश्रौतसूत्रम्, (ञ) लाट्यायनश्रौतसूत्रम्,
(ट) द्राह्यायणश्रौतसूत्रम्,

(घ) शुक्लयर्जुवेदीय-कल्पसूत्राणां वैशिष्ट्यम्-

प्रथमाध्यायः कात्यायनस्य मूलभूतानां विचाराणां निर्देशकोऽस्ति। अपि च- द्वितीयाध्यायात्-एकविंशत्यध्यायपर्यन्तस्थिताः वर्ण्यविषयाः शतपथब्राह्मणस्य भिन्न- भिन्नकाण्डानामाधारमाधृत्य विरचिताः सन्ति। द्वाविंशत्यध्यायात् चतुर्विंशत्यध्यायपर्यन्तानां वर्ण्यविषयाः-एकाह-अहीन-सत्रसम्बद्धाः सन्ति। इति तु सुविदितमस्ति यत् उत्पातानां शमने यज्ञे च विहितानां त्रुटीनां परिमार्जनं प्रायश्चित्तेनैव भवति। यद्यपि ब्राह्मणग्रन्थेष्वपि यज्ञ-यागादीनां विधानं समुपलब्धं भवति। श्रौतसूत्राणां मुख्यमुद्देश्यं श्रौतयागानां सङ्क्षेपेण सुव्यवस्थितं क्रमवद्धं प्रतिपादनमस्ति।

1. कात्यायनश्राद्ध-सूत्रम्–प्रस्तुतमिदं सूत्रं श्राद्धविषयस्य वर्णनं विस्तरेण सम्पादयति। अस्मिन् सूत्रसंवलिताः नव कण्डिकाः सन्ति। अस्योपरि तिस्रष्टीकाः विद्यन्ते। यथा- कर्काचार्यस्य, गदाधरस्य, कृष्णमिश्रस्य च श्राद्धकाशिका।

अथर्ववेदस्यैकमात्रकल्पसूत्रं "वैतानश्रौतसूत्रम" स्ति, यद्धि गोपथब्राह्मणस्योपरि आधारितमस्ति। अस्मिन् अष्टाध्यायाः सन्ति, ये कण्डिकासु विभक्ताः सन्ति। धर्मसूत्रेषि कल्पस्याविभाज्यान्यङ्गानि सन्ति। संविधानतः प्रत्येकस्याः शाखयाः स्वविशिष्टं धर्मसूत्रं भवितव्यम्। धर्मसूत्रे विवाहोत्पन्नपुत्राणां मध्ये सम्पद्विभाजनस्य मुख्यः प्रश्नः। दायभागस्य विचारः, स्त्रीणां पारतन्त्र्यम्, व्यभिचाराय प्रायश्चित्तम्, नियोगस्य नियमः, गृहस्थस्य नित्य-नैमित्तिककर्मणां वर्णनं सर्वेषु धर्मसूत्रेषु नियमतः स्वल्पमात्रामथवाऽधिकमात्रमुपलभ्यते।

2. गृह्यसूत्रम्–गृह्यसूत्रेषु त्रैवर्णिकवैदिकवाङ्मये आश्वलायनगृह्यसूत्रस्य पारस्करगृह्यसूत्रस्य च प्रसिद्धिर्वर्तते। आश्वलायनगृह्यसूत्रं कारिकाबद्धमपि प्राप्यते। शाङ्खायनगृह्यसूत्रे षडध्यायाः सन्ति। तेषु विषयाणां समावेशः यथा-विविधसंस्काराणां वर्णनं, गृहनिर्माण-गृहप्रवेशयोश्च यथास्थानं वर्णनं विद्यते। कौषीतकिगृह्यसूत्रस्य च रचना शाम्भव्येन कृताऽस्ति। इदं सूत्रं शाम्भव्यगृह्यसूत्र नाम्नाऽपि प्रख्यातमस्ति। अस्मिन् गृह्यसूत्रे पञ्चाध्यायाः सन्ति। येषु विवाहसंस्कारः, कृषिकर्मणः, शिशोः प्रारम्भिकसंस्काराणां सामान्यपरिचयः, श्राद्धवर्णनादिकञ्च विद्यते।

शुक्लयजुर्वेदस्य गृह्यसूत्रम्-पारस्कर-गृह्यसूत्रमिति नाम्ना जगति सुविख्यातमस्ति। अस्य त्रिषु काण्डेषु प्रथमेकाण्डे-आवसथ्याग्नेराधानम्, विवाहकार्यम्, गर्भाधानादारभ्यान्नप्राशनं यावत् वर्णितमस्ति। द्वितीय काण्डे-चूडाकरणोपनयन-समावर्तन-पञ्चमहायज्ञ-श्रवणकर्म-सीता- यज्ञादीनां महत्त्वपूर्णं विवरणमस्ति। अन्तिमे तृतीयेकाण्डे च श्राद्धकृत्यानन्तरम् अवकीर्णि- प्रायश्चित्तदीनां विविधविधानानां गूढं प्रतिपादनमस्ति।

3. धर्मसूत्रम्–धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्तव्यानां विस्तृततम् वर्णनम् उपलभ्यते। चतुर्णां वर्णानां चतुर्णाम् आश्रमाणाम् च पूर्णतया धार्मिकनिरूपणं वर्ततेऽस्मिन् कल्पप्रकारे। धर्मसूत्रग्रन्थेषु पारलौकिक-लौकिक-सामाजिक-नैतिकक्रियाणां सुष्ठुरूपेण प्रतिपादनं कृतमस्ति। अ श्वलायनधर्मसूत्रमपि द्वाविंशत्यध्यायेषूपलब्धं भवति।

1. **गौतमधर्मसूत्रम्**-प्राप्तधर्मसूत्रेषु प्राचीनतमोऽयं ग्रन्थः स्वीक्रियते। यस्य सम्बन्धः कुमारिलभट्टस्य प्रामाण्ये सामवेदेन सह विद्यते। अनेनैव प्रकारेण वशिष्ठ- धर्मसूत्रस्य द्वादशाध्यायो गौतमस्यैकोनविंशतितमादध्यायात् गृहीतोऽस्ति।

2. **बौधायनधर्मसूत्रम्**-बौधायनधर्मसूत्रे चत्वारः प्रश्नाः खण्डानि वा सन्ति।

3. **आपस्तम्बकल्पसूत्रम्**-अस्य द्वौ प्रश्नौ आपस्तम्ब-धर्मसूत्रयोर्नाम्ना विख्यातौ स्तः। प्राचीनधर्मस्योपरि दशग्रन्थकाराणां नाम्नां मतानां च उल्लेखः कृतः। येषु काण्व-कुणिक-कुत्स-कौत्स-पुष्करसादिवार्ष्यायणि-श्वेतकेतु-हारीतादयो मुख्याः सन्ति।

4. **हिरण्केशिधर्मसूत्रम्**-धर्मसूत्रमापस्तम्बधर्मसूत्रस्यैव सङ्क्षिप्तं प्रवचनमस्ति। एभिः आपस्तम्बात् शतशः सूत्रणि अक्षरशः स्वग्रन्थे समुद्धृतानि सन्ति।

5. वशिष्ठ-धर्मसूत्रम्—रघुवंशकुलगुरोर्महर्षेर्वशिष्ठस्य धार्मिकजगति महत्त्वपूर्णं स्थानमस्ति। सुप्रसिद्धमीमांसकाः कुमारिलभट्टाः स्वीये तन्त्रवार्तिके वशिष्ठधर्मशास्त्रस्य समबन्धः ऋग्वेदेन सह कथयन्ति। वशिष्ठधर्मशास्त्रस्य अनेकानि सूत्राणि ऋग्वेदस्य त्रिभिर्गृह्यैः साङ्ख्यायन-आश्वलायन-कौषीतक्यादिभिः सहाश्चर्यजनिकां समतां स्थापयन्ति। त्रिंशत् अध्याययुक्तोऽयं ग्रन्थः अद्यत्वे प्रमाणभूतः सर्वत्रोपलब्धो भवति।

आचारः परमो धर्मः सर्वेषामिति निश्चयः।
हीनाचारपरीतात्मा प्रेत्य चेह च नश्यति।।

आचारहीनस्य तु ब्राह्मणस्य वेदाः षडङ्गास्त्वखिलाः सयज्ञाः।
कां प्रीतिमुत्पादयितुं समर्था अन्धस्य दारा इव दर्शनीयाः।।

वशिष्ठस्यैतत् कथनं समीचीनं वर्तते यत्-आचारहीनाय जनाय लोकद्वयं नष्टं भवति। चतुराश्रम-स्नातकानां गृहस्थानाञ्च नियमानां विवेचनमतिसरलतया कृतमस्ति। भारतीय-राजनीतेः मूलसिद्धान्तोऽस्ति यत् -राष्ट्रस्य परिचालने क्षात्रतेजसा सह ब्रह्मणत्वस्य पूर्णे सहयोगे प्राप्ते सति प्रदेशस्य राष्ट्रस्य च समृद्धिः सुनिश्चिता भवति। वशिष्ठस्य इयं शिक्षा समस्तमानवानां कल्याणाय प्रवर्तते।

6. वैखानसधर्मसूत्रम्-इदं धर्मसूत्रं वैखानस-स्मृतिसूत्रस्याष्टमो नवमो दशमश्च प्रश्नो विद्यते। वानप्रस्थ-संन्यास-गृहस्थाश्रमाणामवान्तरभेदानामियत् विशदं वर्णनमत्रोपलब्धं भवति यदितर धर्मशास्त्रेषु प्राप्यं नास्ति।

7. विष्णुधर्मसूत्रम्-अत्र गद्यात्मक-सूत्राणां पद्यानाञ्चैकत्र सन्निवेशो विद्यते। अस्य धर्मसूत्रस्य 160 श्लोकाः"मनुस्मृतौ" अक्षरशः प्राप्यन्ते। तथा च अस्य अनेकानि सूत्राणि स्वविषयविवेचनस्य निमित्तं मनुस्मृति-पद्यैः साम्यं धारयन्ति।

(ङ) कल्पशुल्बसूत्रम्-

मापक्रियायाः सामान्य-नाम शुल्बम् अस्ति। अतः मापविषयकं वेदीनिर्माणप्रकारबोधकं शुल्बसूत्रम् इति बोधव्यम्। भारतवर्षे रेखागणितस्य प्राचीनेतिहासस्य ज्ञानाय शुल्वसूत्राणाम्- ध्ययनं नितान्तमावश्यकमस्ति। शुल्वसूत्रं वेदाङ्गान्तर्गतं कल्पसूत्रस्यान्यतममङ्गमस्ति। कल्पसूत्रस्य मुख्यो विषयो वैदिकं कर्मकाण्डम्। कर्मकाण्डस्य प्रधानतया द्वौ प्रकारौ स्तः-गृह्यसूत्रं, श्रौतसूत्रञ्च। द्वयोः सूत्रयोः मुख्यो विषयो विवाहादिसंस्काराणां विस्तृतं वर्णनम्। श्रौतसूत्रेषु श्रुतिप्रतिपादितानां विविधयज्ञ-यागानां विशदं विवरणं प्रस्तुतमस्ति। शुल्वसूत्रमेषां श्रौतसूत्राणां महत्त्वपूर्णः एकोंऽशो विद्यते। शुल्वशब्दस्यार्थोऽस्ति रज्जुः, अतो रज्जुना प्रमापिताया वेद्याः रचना शुल्वसूत्रस्य प्रतिपाद्यो विषयः। शुल्वसूत्रस्य त्रयः परिच्छेदाः सन्ति। तत्र प्रथमे परिच्छेदे 116 सूत्राणि सन्ति। द्वितीये परिच्छेदे 86 सूत्राणि सन्ति। तृतीय परिच्छेदे 323 सूत्राणि सन्ति।

(क) कात्यायनशुल्बसूत्रम्, (ख) मानवशुल्बसूत्रम्,
(ग) वाराहशुल्बसूत्रम्, (घ) वौधायनशुल्बसूत्रम्,
(ङ) आपस्तम्वशुल्बसूत्रम्, (च) मैत्रायणीशुल्बसूत्रम्,
(छ) वाधूलशुल्बसूत्रम्, इत्यादीनि प्रधानानि शुल्बसूत्राणि सन्ति।

(च) कल्पशास्त्रस्य टीकाकारा-

1. बौधायनशुल्वस्य टीकाकाराः-

(क) द्वारकानाथयज्वा-इमे आर्याट्टस्य पश्चाद्वर्तिनो निश्चितरूपेण प्रतीयन्ते।

(ख) वेङ्कटेश्वरदीक्षितः-अस्य टीकाया नाम "शुल्वमीमांसा" विद्यते।

2. आपस्तम्बशुल्वस्य टीकाकाराः-

(क) **कपर्दिस्वामी**—अस्यग्रन्थाः सन्ति-आपस्तम्बश्रौतसूत्रम्, आपस्तम्बसूत्रपरिभाषा, दर्शपौर्णमाससूत्रम्, भरद्वाजगृह्यसूत्रमित्यादि।

(ख) **करविन्दस्वामी**—एभिर्महाभागैः आपस्तम्बस्य सम्पूर्णे श्रौतसूत्रे स्वव्याख्या लिखिता।

(ग) **सुन्दरराजः**-अस्य टीकाया नाम "शुल्वप्रदीप" इत्यस्ति। अस्य कालः वै0सं0 1638 वर्तते।

(घ) **गोपालः**-अस्य व्याख्याया नाम विद्यते-आपस्तम्बीयशुल्वभाष्यम्। अस्य पितुर्नाम" गातर्य नृसिंह सोमसुत्" विद्यते। इमे कर्मकाण्डदीक्षिते वैदिकपरिवारे समुत्पन्नाः कर्मकाण्डीयपरम्पराताः पूर्णपरिचिताः आसन्।

कात्यायनशुल्वसूत्रस्य प्रसिद्धं नाम विद्यते-कात्यायनशुल्वपरिशिष्टम् अथवा कातीयशुल्वपरिशिष्टम्। इदं भागद्वये विभक्तमस्ति। तत्र प्रथमो भागः सूत्रात्मकः, सप्त कण्डिकासु च विभक्तेऽस्मिन् नवति (90) सूत्राणि सन्ति। कात्यायनेन वेदिनिर्माणस्यावश्यकानां समस्तानां रेखागणितीयविषयाणां विवरणं विशेषक्रमवद्धरूपेणात्र प्रस्तुतमस्ति। अस्योपरि टीकाद्वयमुपलभ्यते।

(ङ) **रामः रामवाजपेयो वा**—अस्य मुख्याः ग्रन्थाः सन्ति-क्रमदीपिका, कुण्डाकृतिः, शुल्ववार्तिकः, सांङ्ख्यायनगृह्यपद्धतिः, समरसारः, समरसारसङ्ग्रहः, शारदातिलकतंत्रस्य व्याख्या, कात्यायनशुल्वसूत्रस्य टीका च। अतः रामस्य आविर्भावकालः पञ्चदशशतकस्य मध्यभागः सिद्ध्यति।

(च) **महीधरः**-महीधरमहाशयाः काशीनिवासिनः प्रकाण्डवैदिका आसन्। वेदस्य तन्त्रस्य च विषये एषामनेकानि प्रोढग्रन्थरत्नानि अद्यापि प्राप्यन्ते। एभिः स्व "मन्त्रमहोदधेः" समापनं 1589 ईसवीये विष्णुभक्तिकल्पलताप्रकाशस्य च रचना 1597 ईसवीये वत्सरे कृतेति।

(छ) **महामहोपाध्याय-पण्डित**-विद्याधरगौडेनापि-कात्यायनश्रौतसूत्रे कातीयशुल्वे च स्वसरलायाः सुबोधाया व्याख्याया रचनां विधायैतत्प्रमुखविषयान् साधारणजनानां कृतेऽपि बोधगम्यं कृतम्। विद्याधरगौडस्य कालः 1943 वैक्रमाब्देऽभूत। विद्याधरगौडस्य रचना कात्यायनश्रौतसूत्राणां "सरला" नाम्नी व्याख्या अस्ति।

(ज) **कर्कः**-कात्यायनस्य श्रौतसूत्रे पारस्करस्य गृह्यसूत्रे चोभयत्रापि सारगर्भिता टीका वर्तते।

(झ) **जयरामः**-मेवारस्य निवासिनः, दामोदरस्य पौत्रः, बलभद्रस्य पुत्रः जयरामः आसीत्। एभिः कृतभाष्यस्य नाम-सज्जनवल्लभः विद्यते।

(ञ) **आचार्यो हरिहरः**-एषां समयो द्वादशशतकान्तरालवर्ती। गृह्यसूत्रस्य सर्वतोऽधिका लोकप्रिया व्याख्या "गृह्यसूत्रव्याख्यानम्" हरिहरस्य वर्तते।

(ट) **आचार्यो गदाधरः**-गदाधरस्याभिरुचिः ज्योतिषतत्त्वविषयेऽधिका विद्यते। एषां पितुर्नाम वामनदीक्षितः आसीत्। अस्य कालः पञ्चाशदुत्तरचतुर्दशशतकं विद्यते।

(ठ) **विश्वनाथः**-इमे नन्दपुरस्य काश्यपगोत्रिणो नागरब्राह्मणा आसन्। पितुर्नाम नरसिंहो मातुश्च गङ्गादेवी। एषां व्याख्यायाः नाम "गृह्यसूत्रप्रकाशिका" विद्यते। कालःषोडश शताब्द्याः उत्तरार्धः सिद्ध्यति।

7. कल्प (हस्तौ कल्पोऽथ पठ्यते)

(छ) कल्पशास्त्रस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- वेदपुरुषस्य हस्तरूपेण प्रशस्तं वेदांगं किम्?
   उत्तरम्-कल्पवेदांगम्।
2. प्रश्न- कल्पसूत्रं कतिविधं वर्तते? कानि च तानिश
   उत्तरम्- चतुर्विधम्। 1. श्रोतसूत्रम्, 2. गृह्यसूत्रम्, 3. धर्मसूत्रम्, 4. शुल्वसूत्रञ्चेति।
3. प्रश्न- कल्पवेदांगस्य कति विभागाः विद्यन्ते?
   उत्तरम्- (04) चत्वारः।
4. प्रश्न- धर्मसूत्रं कुत्र सम्बद्धम्?
   उत्तरम्- कल्पे।
5. प्रश्न- कल्पशास्त्रस्य प्रयोजनं किम्?
   उत्तरम्-याज्ञिक-विधानानां प्रतिपादनम्।
6. प्रश्न- कल्पशास्त्रं कस्मिन् साहित्ये आयाति?
   उत्तरम्-सूत्र-साहित्ये।
7. प्रश्न- कल्पसूत्राणि कानि, कानि च तानि?
   उत्तरम्-चत्वारि, 1. श्रौतसूत्रम्, 2. गृह्यसूत्रम्, 3. धर्मसूत्रम्, 4. शुल्वसूत्रम्।
8. प्रश्न- श्रौतसूत्राणां प्रतिपाद्यविषयः कोऽस्ति?
   उत्तरम्-चतुर्दश वैदिक-यज्ञानां कर्त्तव्यविधानम्।
9. प्रश्न- ऋग्वेदस्य श्रौतसूत्रं कति विधम्?
   उत्तरम्-द्विविधम्, 1. आश्वलायनश्रौतसूत्रम्, 2. शाङ्खायनसूत्रम्।
10. प्रश्न- आश्वलायनश्रौतसूत्रे कति अध्यायाः सन्ति?
    उत्तरम्- (12) द्वादशाध्यायाः।
11. प्रश्न- शाङ्खायनश्रौतसूत्रे कति अध्यायाः सन्ति?
    उत्तरम्- (18) अष्टादशाध्यायाः।
12. प्रश्न- शुक्लयजुर्वेदस्य कानि श्रौतसूत्राणि उपलब्धानि सन्ति?
    उत्तरम्-कात्यायनश्रौतसूत्रम्।

13. प्रश्न- कृष्णयजुर्वेदस्य कानि श्रौतसूत्राणि उपलब्धानि सन्ति?
उत्तरम्- (7 सप्त) 1. बौधायनः, 2. आपस्तम्ब, 3. सत्याषाढ, 4. मानवः, 5. वैखानसः, 6. भारद्वाजः, 7. वाराहः।
14. प्रश्न- सामवेदस्य कति श्रौतसूत्राणि प्राप्यन्ते?
उत्तरम्- (द्वौ) 1. द्राह्यायण, 2. लाट्यायनः।
15. प्रश्न- अथर्ववेदस्य श्रौत्रसूत्रं किमस्ति?
उत्तरम्- वैतान-सूत्रम्।
16. प्रश्न- वैतानसूत्रस्य सम्बन्धः कया आथर्वणशाखया अस्ति?
उत्तरम्-शौनकशाखया।
17. प्रश्न- वैतानसूत्रे कति अध्यायाःसन्ति?
उत्तरम्- (8) अष्टाध्यायाः।
18. प्रश्न- ऋग्वेदीय-गृह्यसूत्रे आश्वलायने कति अध्यायाः सन्ति?
उत्तरम्- (4) चत्वारोऽध्यायाः।
19. प्रश्न- ऋग्वेदीय-गृह्यसूत्र-शाङ्खायने कति अध्यायाः सन्ति?
उत्तरम्- (6) षष्ठाऽध्यायाः।
20. प्रश्न- शुक्लयजुर्वेदीय-गृह्यसूत्राणि काति?
उत्तरम्-द्वे, 1. पारस्कर गृह्यसूत्रम्, 2. बैजवापगृह्यसूत्रम्।
21. प्रश्न- पारस्करगृह्यसूत्राणि केषु काण्डेषु विभक्तानि?
उत्तरम्- (3) त्रिषु काण्डेषु।
22. प्रश्न- कृष्णयजुर्वेदस्य गृह्यसूत्राणि कानि?
उत्तरम्- (5 पञ्च) 1. बौधायनः, 2. आपस्तम्ब, 3. सत्यापाढ़ः, 4. मानवः, 5. काठकः।
23. प्रश्न- सामवेदीय गृह्यसूत्राणि कानि?
उत्तरम्- (2) 1. खादिर, 2. गोभिलः।
24. प्रश्न- कौशिक-गृह्यसूत्रस्य सम्बन्धः केन वेदेन अस्ति?
उत्तरम्- अथर्ववेदेन।
25. प्रश्न- कौशिक गृह्यसूत्रे कति अध्यायाःसन्ति?
उत्तरम्- (14) चतुर्दशाध्यायाः।
26. प्रश्न- कौशिक गृह्यसूत्रे कति कण्डिकाः सन्ति?
उत्तरम्- (141 कण्डिकाः)
27. प्रश्न- द्वाविंशाति-अध्याय-युक्तानि आश्वलायनगृह्यसूत्राणि केन वेदेन सम्बद्धानि?
उत्तरम्-ऋग्वेदेन।
28. प्रश्न- कात्यायन धर्मसूत्रं केन वेदेन सम्बन्धितम् अस्ति?
उत्तरम्-शुक्लयजुर्वेदेन।
29. प्रश्न- कृष्णयजुर्वेदेन सम्बन्धित-धर्मसूत्राणि कानि?
उत्तरम्-त्रीणि1. बौधायनः, 2. आपस्तम्ब, 3. मानवः।

30. प्रश्न- सामवेदीय-धर्मसूत्रं वर्तते?
उत्तरम्- गौतमधर्मसूत्रम्।
31. प्रश्न- गौतम-धर्मसूत्रेषु कति अध्यायाः सन्ति?
उत्तरम्- (28) अष्टविंशतिः।
32. प्रश्न- शुल्बसूत्रस्य किं प्रयोजनम्?
उत्तरम्-यज्ञवेद्यादि निर्माणस्य ज्यामितीयप्रक्रिया तथा तत्सम्बद्धं विवेचनम्।
33. प्रश्न- कति कल्पाःसन्ति?
उत्तरम्- सप्त, 1. पार्थिव, 2. कौर्म, 3. अनन्त, 4. नृसिंह, 5. प्रिया, 6. श्वेतवराहः, 7. अमरः।
34. प्रश्न- श्रौतसूत्रेषु श्रुतिप्रोक्तानां कानि षोडश यज्ञानि?
उत्तरम्-1. दर्शः, 2. पौर्णमासः, 3. पिण्डपितृयागः, 4. आग्रयणेष्टिः, 5. चातुर्मास्यः, 6. निरूढपशुः, 7. सोमयागः, 8. सत्रः, 9. गवामयनम्, 10. वाजपेयः, 11. राजसूयः, 12. सौत्रामणी, 13. अश्वमेघयागः, 14. पुरुषमेघः, 15. एकाहयागः, 16. अहीनयागश्च।
35. प्रश्न- शौनकऋषेः शिष्यः कः आसीत्?
उत्तरम्- आश्वलायनः।
36. प्रश्न- शाङ्खायन-श्रौतसूत्राणि कति अध्यायेषु विभक्तानि?
उत्तरम्- अष्टादश अध्यायेषु।
37. प्रश्न- गृह्यसूत्रे कति अध्यायाः सन्ति?
उत्तरम्-चत्वारोऽध्यायाः।
38. प्रश्न- कल्पे हरदत्तस्य का टीका वर्तते?
उत्तरम्- अनाविला टीका।
39. प्रश्न- कौपीतक-गृह्यसूत्रे कति अध्यायाः सन्ति?
उत्तरम्- पञ्चाध्यायाः
40. प्रश्न- सौत्रसूत्रस्य रचनाकारः कः?
उत्तरम्-कात्यायनः।
41. प्रश्न- श्रोत्रसूत्रे कति अध्यायाः सन्ति?
उत्तरम्-षड्विंशतिः।
42. प्रश्न- श्रौतसूत्रस्योपरि कस्य सुविस्तृतं भाष्यं वर्तते?
उत्तरम्- कर्काचार्यस्य।
43. प्रश्न- श्रौतसूत्रस्योपरि सरलावृत्तिः कस्य वर्तते?
उत्तरम्- म. म. विद्याधरगौडस्य।
44. प्रश्न- शुक्लयजुर्वेदीय-गृह्यसूत्रस्य अपरं नाम किमस्ति?
उत्तरम्- पारस्कर-गृह्यसूत्रम्।
45. प्रश्न- पारस्करगृह्यसूत्राणि कति काण्डेषु विभक्तानि?
उत्तरम्-त्रिषु काण्डेषु।

46. प्रश्न- कात्यायन-श्राद्धसूत्रसंवलितायां कति कण्डिकाः वर्तन्ते?
उत्तरम्- नव कण्डिकाः।
47. प्रश्न- कात्यायन-श्राद्धसूत्रोपरि तिस्रष्टीकाकाराः के सन्ति?
उत्तरम्- 1. कर्काचार्यः, 2. गदाधरः, 3. 4कृष्णमिश्रः।
48. प्रश्न- पारस्कर-सूत्राणां टीकाकाराः के सन्ति?
उत्तरम्-1. कर्कः, 2. जयरामः, 3. हरिहरः, 4. गदाधरः, 5. विश्वनाथः।
49. प्रश्न- कृष्णयजुर्वेदीय षड्श्रौतसूत्राणि कानि?
उत्तरम्-1. बौधायनश्रौतसूत्रम्, 2. आपस्तम्बः, 3. हिरण्यकेशी वा सत्याषाढः, 4. बैखानसः, 5. भारद्वाजः, 6. मानवश्रौतसूत्रम्।
50. प्रश्न- कृष्णयजुर्वेदीयगृह्यसूत्राणि कानि?
उत्तरम्- नव, 1. बौधयनगृह्यसूत्रम्, 2. भारद्वाजगृह्यसूत्रम्, 3. आपस्तम्बगृह्यसूत्रम्, 4. हिरण्यकेशिगृह्यसूत्रम्, 5. बैखानसगृह्यसूत्रम्, 6. अग्निवेश्यं गृह्यसूत्रम्, 7. मानवगृह्यसूत्रम्, 8. वराहगृह्यसूत्रम्, 9. काठकगृह्यसूत्रम्।
51. प्रश्न- सामवेदीय-कल्पसूत्राणि कानि?
उत्तरम्-1. गोभिलगृह्यसूत्रम्, 2. खादिरगृह्यसूत्रम्, 3. जमिनीयगृह्यसूत्रम्।
52. प्रश्न- सोमयागस्य कति प्रकाराः के च ते?
उत्तरम्- त्रयः, 1. एकाह, 2. अहीन, 3सत्र।
53. प्रश्न- एकाह इत्यस्य का परिभाषा?
उत्तरम्- यः यागः एकस्मिन् दिवसे एव सम्पन्नो भवति।
54. प्रश्न- अहीन इत्यस्य का परिभाषा?
उत्तरम्- द्वाभ्यां दिवसाभ्यामारभ्यैकादशदिवसपर्यन्तं यावत् प्रचलति।
55. प्रश्न- सत्र इत्यस्य का परिभाषा?
उत्तरम्-द्वादश-दिवसैः प्रारभ्य वषमेकं यावत् ततोऽप्यधिककालपर्यन्तं प्रचलन्ति यागाः।
56. प्रश्न- अथर्ववेदीय-कल्पसूत्राणि कानि?
उत्तरम्- अथववेदस्यैकमात्रं "वैतानश्रौतसूत्रमेव" कल्पसूत्रम्।
57. प्रश्न- कल्पे कति धर्मसूत्राणि कानि च तानि?
उत्तरम्- सप्तसूत्रणि, 1. गौतमधर्मसूत्रम्, 2. बौधायनधर्मसूत्रम्, 3. आपस्तम्बधर्मसूत्रम्, 4. हिरण्यकेशिधम्रसूत्रम्, 5. वशिष्ठ-धर्मसूत्रम्, 6. वैखानसधम्रसूत्रम्, 7. विष्णुधर्मसूत्रम्।
58. प्रश्न- शुल्वसूत्रे कति परिच्छेदाः सन्ति?
उत्तरम्- त्रयः परिच्छेदाः।
59. प्रश्न- शुल्वसूत्रस्य प्रथमपरिच्छेदे कति सूत्राणि?
उत्तरम्-116 सूत्राणि।
60. प्रश्न- शुल्वसूत्रस्य द्वितीयपरिच्छेदे कति सूत्राणि?
उत्तरम्- 86 सूत्राणि।

61. प्रश्न- शुल्वसूत्रस्य तृतीयपरिच्छेदे कति सूत्राणि?
उत्तरम्- 323 सूत्राणि।
62. प्रश्न- बौधायनशुल्वस्य टीकायाः शुल्वदीपिकायाः रचनाकारः कः?
उत्तरम्- द्वारकानाथयज्वा।
63. प्रश्न- बौधायनशुल्वस्य टीका शुल्वमीमांसायाः रचनाकारः कः?
उत्तरम्- वेङ्कटेश्वर दीक्षितः।
64. प्रश्न- कपर्दिस्वामी महोदयस्य विरचिताः ग्रन्थाः के सन्ति?
उत्तरम्-चत्वार, 1. आपस्तमबश्रौतसूत्रम्, 2. आपस्तम्बसूत्रपरिभाषा, 3. दर्शपौर्णमाससूत्रम्, 4. भरद्वाजगृह्यसूत्रमित्यादि।
65. प्रश्न- शूलपाणेः समयः कः?
उत्तरम्-1950 ईसवीयः।
66. प्रश्न- शुल्वप्रदीपकायाः रचनाकारः कः?
उत्तरम्- करबिन्दस्वामी।
67. प्रश्न- "शुल्वप्रदीप" इत्यस्य रचनाकारः कः?
उत्तरम्- सुन्दरराजः।
68. प्रश्न- "आपस्तम्बीयशुल्वभाष्यम्" इत्यस्य रचनाकारः कः?
उत्तरम्- गोपालः।
69. प्रश्न- रामवाजपेयेन कति ग्रन्थाः विरचिता?
उत्तरम्-सप्त, 1. क्रमदीपिका, 2. कुण्डाकृतिः, 3. शुल्ववार्तिकः, 4. सांङ्ख्यायनगृह्यपद्धतिः, 5. समरसारः, 6. समरसारसंग्रह, 6. शारदातिलंकतन्त्रस्य व्याख्या, 7. कातीयशुल्वसूत्रस्य टीका च।
70. प्रश्न- रामस्य समयः कोऽस्ति?
उत्तरम्- पञ्चदशशतकस्य मध्यभागः।
71. प्रश्न- "मन्त्रमहोदधेः" इत्यस्य लेखकः कः?
उत्तरम्- महीधरः।
72. प्रश्न- विद्याधरगोडस्य प्रमुखा रचना काः ?
उत्तरम्- कात्यायनश्रौत्रसूत्राणां "सरला" व्याख्या।
73. प्रश्न- श्रीमता शिवदासेन विरचिता ग्रन्थाः के सन्ति?
उत्तरम्- मानव-मैत्रायणीशुल्वेषु टीका।
74. प्रश्न- मैत्रायणीयशुल्वोपरि टीका केन विरचिता?
उत्तरम्- शिवंदासस्यानुजेन शङ्करभट्टेन।
75. प्रश्न- वशिष्ठ-धर्मसूत्रे कति अध्यायाः सन्ति?
उत्तरम्- द्वादशाध्यायाः।
76. प्रश्न- गौतम-धर्मसूत्रे कति अध्यायाः सन्ति?
उत्तरम्- एकोनविंशतितमाध्यायाः।

TOTAL-76

• • •

9

दर्शनशास्त्रम्

(Philosophical Treatise)

(क) दर्शनशब्दस्यार्थ-

दर्शन-शब्दोऽयं संस्कृतस्य प्रेक्षणार्थकाद् दृश् धातोः(दृशिर् प्रेक्षणे) ल्युट् प्रत्यये अनादेशे च कृते दर्शनम् इति सिद्धम्। "दृश्यते अनेन इति दर्शनम्" उपनिषत्सु सत्यस्य दर्शनाय दृश् धातोः प्रयोगोऽभवत्। अर्थात् ज्ञानचक्षुषा यद् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम्। अलोकिकं आत्मादितत्त्वं (आत्मा, स्वर्ग, मुक्ति, प्रभृत्ति वस्तु) येन तद् दर्शनम्।

(क) येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च, याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च यत्र तद् दर्शनम्।"

(ख) समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शन-शब्दान्तर्गतं भवति।

(ग) दर्शनम् इत्यस्य आङ्गलपदं भवति Philosophy इति। इदं च Philosophy इति पदं यूनानी (Greek) Philos, Sophia इति पदद्वयेन निष्पन्नम्। यस्य च अर्थः- Philos=Love,Sophia= Wisdom भवति। एवञ्च सारांश रूपेण वदामः चेत् "Love of Wisdom" "विद्यानुरागः" इति दर्शनस्य अर्थः भवति।

(घ) केचन दार्शनिकाः वदन्ति यत्-Philosophy इति पदं लैटिन (Latin) भाषातः Philosophy इति पदद्वयं स्वीकृत्य आगतम् अस्ति। यस्यार्थः-Phil= Principle तत्त्वम्, Sophy=Science शास्त्रम् इति भवति। एवञ्च Philosophy इत्यस्य अर्थः "तत्त्वशास्त्रम्/तत्त्वविज्ञानम् Principles of Science इति।

(ङ) दृश्यते तत्त्वम् आत्मरूपम्, ब्रह्मरूपं वा तत्त्वं येन तद् दर्शनम्। तच्चाऽऽत्म दर्शन-ब्रह्मदर्शनरूपतत्त्वदर्शनमध्यात्मदृष्ट्यैव भवितुमर्हति नातोऽन्यथा इति। यथोक्तम्-

आत्मा वाऽरे द्रष्टयः श्रोतव्यः मन्तव्यो निदिध्यासितव्यः
मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्

(बृहदारण्यकोप०)

तस्मादात्माऽक्षरः शुद्धो बुद्धो नित्यः सर्वगतोऽव्ययः।
उपासितव्यो मन्तव्यः श्रोतव्यश्च मुमुक्षुभिः।।
(अद्भुतरामा०)

1. किं ब्रह्म? 2. तस्य किं स्वरूपम्? 3. कः ईश्वरः? 4. के च तस्य प्राप्तेरुपायाः? 5. अस्मिन् जगति किं शाश्वतं तत्त्वम्? 6. इयं सृष्टिः कुतः आविर्वभूव? 7. जीवात्मनः किं स्वरूपम्? 8. कः पुनर्जायते? 9. किं लिङ्गशरीरम्?10. जीवनस्य कुत उद्भूतिः? 11. किं तस्य लक्ष्यम्? 12. कथं मोक्षावाप्तिः? 13. आत्मा चेतनोऽचेतनो वा? 14. कः सृष्टेः कर्ता? 15. किं जीवनस्य कर्त्तव्यम्? 16. कश्च जीवनस्य साधिष्ठः पन्थाः? 17. किं श्रेयः किञ्चप्रेय? इत्यादयोऽनुयोगाः सूक्ष्मातिसूक्ष्मेण यत्र विविच्यन्ते तद् दर्शनम्।

(च) ऋषयः स्वाऽलौकिक चक्षुभिरवलोकितानां तत्त्वानां यान् उपदेशग्रन्थान् निर्मिमिरे, तेषामेव नाम दर्शनम्।

(छ) दर्शनं सामाजिक चेतनायाः रूपमस्ति। अत्र व्यक्तित्वस्य बोधस्य च, साधारण-विधीनां विषये, चिन्तनानां व्यक्तीनां च सम्बन्धे संकल्पाः सन्ति। इदं दर्शनम् एक प्रकारकं विज्ञानमस्ति, परमिदं विशिष्टप्रकारकं विज्ञानं वर्त्तते। यः प्रकृतेः समाजस्य च, विचारणीयविधीनाञ्च अध्ययनं करोति एतदर्थम् अस्य मुख्यानि सामाजिक प्रकरणानि, विशिष्टैः विज्ञानैः सह तुलनां कृत्वा सम्यक् प्रकारेण विचारणीयानि सन्ति।

(ज) दर्शनशास्त्रस्य अध्ययनेन जगतः ईश्वरस्य, जीवस्य, मायायाः प्रकृतेश्च ज्ञानं भवति। एतदतिरिक्तं सत्यासत्ययोः शरीरस्य, इन्द्रियसमूहस्यापि अनेन ज्ञानं भवति। एवं च पदार्थेषु संसारस्य मूर्ताऽमूर्त दृष्टाऽदृष्टादयः सर्वेऽन्तर्भवन्ति। इदं जगत् पदार्था वा जीवानां कृते दुःखानां कारणम् अस्ति। एभ्यो दुःखेभ्यो मोक्षो मुक्त्या सर्वदुःख-निवारणेन वा सम्भवति। कार्यकारणयोः तत्त्वज्ञानं दर्शनेनैव भवितुं शक्यते।

(झ) मनुष्यः स्वभावतो मननशीलः प्राणी विद्यते, मत्या कर्माणि सीव्यतीति तन्निरुक्तिरपि पूर्वोक्तानुकूला, सा हि कोऽहं कस्मादहमित्यादि समस्याः सततं भावयित्वा "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति दर्शनवीजमुदभावितवती। दर्शनस्योदयो वेदकालाद् एव अजायत। दर्शनं द्विविधं आस्तिकं नास्तिकं चेति। (1) तत्र अस्ति दिष्टम्, अस्ति वेदप्रामाण्यम्, अस्ति ईश्वरो वा, इति मतिर्यस्य सः आस्तिकः। (2) नास्ति दिष्टम्, नास्ति वेदप्रामाण्यम्, नास्ति ईश्वरो वा, इति मतिर्यस्य सः नास्तिकः। आस्तिक विचारपराणि वैदिकानि दर्शनानि, नास्तिक विचारपराणि अवैदिकानि दर्शनानि इति व्यवहियते।

(ख) दर्शनशास्त्रस्य परिभाषा (Definition of Philosophy)

1. आत्मज्ञानसाधनं भवति दर्शनम्- साक्रेटिस्।
2. दर्शनशास्त्रं यथार्थस्य तत्त्वदर्शनं भवति।
   Philosophy is the mathephysics of things.
3. ज्ञानस्य विज्ञानं भवति दर्शनशास्त्रम्- फिक्टे।
   Philosophy is the Science of knowledge- Fichre.

4. समस्तवैज्ञानिकज्ञानस्य योगः भवति दर्शनशास्त्रम्-पॉल्सन्।
Philosophy is the sum total of all scientific knowledge- Paulsen.
5. विज्ञानानां विज्ञानं भवति दर्शनशास्त्रम्-कॉम्टे।
Philosophy is the Science of Sciences- Kamte.
6. यथार्थस्वरूपस्य तार्किकविवेचनं भवति दर्शनम्-एस्. राधाकृष्णन्।
Philosophy is a logical inguing in to the nature of reality
Dr. S.Radhakrishnan.

(ग) दर्शनशास्त्रस्य प्रकारा-

(1) वैदिक (आस्तिक) दर्शनानि षट्-(क) न्यायदर्शनम्, (ख) वैशेषिक दर्शनम्, (ग) सांख्य-दर्शनम्, (घ) योग-दर्शनम्, (ङ) पूर्वमीमांसा-दर्शनम्, (च) उत्तर मीमांसा-दर्शनम्।

(2) अवैदिक (नास्तिक) दर्शनानि त्रीणि-(छ) चार्वाकदर्शनम्, (ज) बौद्ध दर्शनम्, (झ) जैन दर्शनम्, (नास्तिको वेद निन्दकः) तत्र नास्तिकेषु जयन्याश्चार्वाकाः ते मन्यन्ते-"त्रयोवेदस्य कर्तारो भण्ड-धूर्त-निशाचराः) (ञ) पाश्चात्यदर्शनम्।

(घ) न्यायदर्शनम्-

नीयते=प्राप्यते, अयनम्=मोक्षो, येनासौ न्यायः। अथवा नीयते=अधिगम्यते विवक्षितार्थ-सिद्धिरनेनाऽसौ न्यायः। तस्य न्यायस्य यद् दर्शनमनुभवस्तदेव न्यायदर्शनम्=न्यायशास्त्रमित्यर्थः। न्यायशास्त्रस्य महत्त्वन्तु सर्वशास्त्रेपकारकत्वेन सर्वत्रैव प्रसिद्धमस्ति। तथा चोक्तम्-

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।।
सम्यक् दर्शनसम्पन्नः कर्मभिर्न निबध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते।।

न्यायशास्त्रं अतिप्राचीनम्, अस्य प्रवर्त्तकः सूत्रकार गौतमः 500 ई०पू० समयेऽज्ञायत। अयञ्च महर्षिस्त्रेताकालीनः सन् प्रजापतेः श्रीमहर्षेरङ्गिरसः प्रपौत्रो दीर्धतमसः पुत्रो महान् तपस्वी, तेजस्वी चासीन्न्यायशास्त्रप्रणेता मनस्वी मनीषी। अस्य महर्षि गोतमस्य धर्मपत्नी" अहल्या" चासीत्। अस्य महर्षि गोतमस्य" शतानन्द" नामा पुत्रः श्रीमिथिलेश्वरस्य पुरोहितोऽप्यासीदिति श्रूयते। अयञ्च महर्षि-गोतमोऽष्टादशपुराणानां ब्रह्मसूत्राणाञ्च रचयितुः श्रीव्यासस्य समकालीन आसीत्। श्रीगौतमस्य अपरं नाम अक्षपादोऽप्यासीत्। गौतम प्रवर्तितं न्यायशास्त्रं पदार्थ-मीमांसाशास्त्रम्। षोडश-पदार्थाश्चाभ्युपगताः प्रमाणप्रमेयाद्याः। वात्स्यायनस्योदयकाले ब्राह्मणधर्म-बौधधर्मयोः सङ्घर्षस्य समयः आसीत्। वाचस्पतिमिश्रः न्यायवार्तिकतात्पर्ये तदीयमपि मतं विस्तरेण गर्हयामास। उदयनोऽपि "न्यायवार्तिकतात्पर्य-परिशुद्धि" नामकेन व्याख्याग्रन्थेन वाचस्पतेर्ग्रन्थं परिष्कृतवान्। तत्र-प्रमाणप्रमेय संशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क-निर्णयवाद जल्पवितण्डाहेत्वा-भासच्छलजातिनिग्रहस्थानानां तत्त्व-ज्ञानान्निःश्रेयसाधिगम इति तत्सिद्धान्तः। वैशेषिकस्य समानतन्त्रत्वात् परमाणुकारणतावादोऽस्य विशिष्यध्यानमाकर्षति दार्शनिकानाम्। सुखदुःखात्मकमनोवृत्त्योर्नाशे जाते मनः साम्यावस्थां

प्रतिपद्यते। तदा आत्यन्तिकदु:खनिवतिर्भवति, सैवमुक्ति:। ईश्वरोऽनुमानगम्य:। जीवन्मुक्तिरपरनि:श्रेयसशब्देन विदेहमुक्तिश्च परनि:श्रेयस शब्देन प्रतिप्राद्यते।

न्यायशास्त्रस्य महत्त्वम्-

"प्रमाणप्रमेयसंशयप्रयोजने" त्यारभ्य "हेत्वाभासाश्च यथोक्ता:" इत्येतत् पर्यन्तं तदिदं पञ्चाऽध्यायात्मकं न्यायशास्त्रम्। तत्र प्रत्यध्यायमान्हिकद्वयमस्ति। न्यायशास्त्रेतराणि यानि व्याकरण-वेदान्त-प्रभृतीनि शास्त्राणि तानि सर्वाण्येव शास्त्राणि सन्ति न्यायशास्त्रं समपेक्षमाणानीति तानि सर्वथोपकारकत्वेन न्यायशास्त्रमपेक्षन्ते इति। यथोक्तम्-

"कणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्"। (श्रुतमात्रम्)

"मानाधीना मेयसिद्धि:" एवम् "लक्षणप्रमाणाभ्यां वस्तुविनिर्णय:" इत्यनेनापि प्रमाणभूतेन वाक्यद्वयेन न्यायशास्त्रस्य महदेव महत्त्वं समुद्गीयमानं भवति। अत्र वाक्यद्वयघटकी- भूतयोश्च मान-प्रमाण-पदयोरैक्येन अर्थात् एकार्थकत्वेन, समानार्थकत्वेनेत्यर्थ:, न्यायशास्त्ररूपत्वम्। अत: न्यायशास्त्रमेव प्रमाणशास्त्रं मन्यते लोकै:।

आर्षं धर्मोपदेशञ्च वेदशास्त्राऽविरोधिना।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतर:।।

(श्रुतमात्रमेव)

(ङ) वैशेषिकदर्शनम्-

वैशेषिकदर्शनजन्मदातृत्वेन कणादेन पित्रा लालितं पालितं पुत्रवच्च परिवर्धितं वैशेषिकं दर्शनमिदं सर्वेभ्यो दर्शनेभ्योऽतीव श्रेष्ठं सर्वथा प्रशस्तं प्राचीनतमञ्चेति गीयते। प्रणेता कणाद: कश्यपवंशोत्पन्नतया काश्यप शब्देनोक्त:। विशेषपदार्थस्वीकारमूलकमेवास्य दर्शनस्य वैशेषिकमिति नामकरणम्। वैशेषिके त्रयो हेत्वाभासा: स्वीकृता:। दश अध्याये: 370 सूत्रैश्च निबद्धमिदं दर्शनम्। (1) प्रथमाऽध्याये समवेताशेषपदार्थ कथनम्। (2) द्वितीये-द्रव्यम्, (3) तृतीये-आत्मान्त: करणनिरूपणम्, (4) चतुर्थे-शरीरभेद- निरूपणम्, (5) पञ्चमे-कर्मनिरूपणम्, (6) षष्ठे-श्रौतधर्मनिर्वचनम्, (7) सप्तमे-गुणसम्वायौ, (8) ज्ञानोत्पत्ति-तन्निदाने। नवमे-प्रागभावादिनिरूपणम्, दशमे-आत्मगुणनिरूपणञ्च।

इदं दर्शनं सर्वशास्त्रोपकारकम्। अत्र दर्शने रावणेन भाष्यं प्रणीतम्, यन्नोपलभ्यते। तदनन्तरं भारद्वाजवृत्ति:, प्रशस्तपादभाष्यम्, शंकरमिश्रस्योपस्कार:। जगनारायणभट्टस्य काणाद सूत्रवृत्ति:, चन्द्रकान्तभट्टस्य-वैशेषिक भाष्यञ्च। आदिमं सूत्रं-"धर्मविशेषप्रसूतात् द्रव्यगुणकर्म सामान्य विशेषसमवायानां पदार्थानां साधर्म्य वैधर्म्याभ्यां तत्त्वज्ञानान्नि:श्रेयसाधिगम:।" अस्मिन् दर्शने परमात्मा तु ईश्वरापरनामा जीवात्मनो भिन्न एव। तत्त्वज्ञानेन मिथ्यावासनायां निवर्त्तितायां रागाभावात् प्रवृत्यभावे कर्माभावात् सुखदु:खापगम:, स एव च मोक्ष इति शास्त्रस्यास्य तत्त्वम्। शास्त्रं द्विविधम्1. पदशास्त्रम्, 2. पदार्थशास्त्रञ्च। तत्र पदशास्त्रं व्याकरणशास्त्रम्, पदार्थशास्त्रं काणादशास्त्रम् (वैशेषिकंशास्त्रम्, न्यायशास्त्रम्)। यद्यपि व्याकरण-वेदान्त-प्रभृतीना-मन्येषामपि शास्त्राणां

विद्यमानत्वेन शास्त्रत्वकथनं साधु सङ्गच्छते। वैशेषिक-दर्शनस्य पदार्थशास्त्रत्वेन सप्तैव पदार्थाः। तथाहि-

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः।।

(भाषापरिच्छेदः)

इदमेव काणाददर्शनम्(वैशेषिकदर्शनम्) औलूक्यदर्शनमप्युच्यते। प्रमाणानां विचारचर्चाऽवसरे तत्र प्रमाणद्वयमेव मान्यं भवति। यतः "सर्वप्रमाणसिद्धत्वात्" अर्थात् सर्वेषं प्रत्यक्षाऽनुमान-प्रमाणातिरिक्तनां प्रमाणानाम्, अत्रैवानयोरेव प्रत्यक्षानुमानप्रमाणयोरन्तर्भावात्। तथा चोक्तम्-

शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते।
अनुमानगतार्थत्वादिति वैशेषिकं मतम्।।

(भाषापरिच्छेदः)

(च) सांख्य-दर्शनम्-

सांख्यदर्शनस्याद्य आचार्यः कपिलः, सिद्धान्तस्तु प्रकृतिःपुरूषश्चेति द्वे मूलतत्त्वे, अनयोरेव सम्बन्धाज्जगदुत्पद्यते। प्रकृतिर्जडा, पुरूषश्चेतनः, पुरूषसम्बन्धात्प्रकृतौ क्रिया। सत्कार्यवादोऽत्र समर्थितः।

नास्ति सांख्यसमं ज्ञानं, नास्ति योगसमं बलम्।
अत्र वः संशयो मा भूत, ज्ञानं सांख्यं परं स्मृतम्।।
संख्यां प्रकुर्वते चैव, प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशति, तेन सांख्यं प्रकीर्तितः।।

सम्यक्प्रकारेण क्रमपूर्वकं ख्यानं कथनं यस्याः सा "संख्या" क्रमपूर्वकविचारणा। पञ्चविंशतितत्त्वानां विचार एव सांख्यम्, तमधिकृत्य कृतो ग्रन्थः" सांख्यम्" इत्युच्यते। अर्थात् प्रकृतिपुरुषयोः पृथक्-पृथक् संख्यानम् एव साख्यम्। "सांख्य" शब्दः सम् उपसर्गपूर्वकं "चक्षिङ्" ख्याञ् धातोः अण् प्रत्ययेन निष्पन्नः। अस्यार्थः सम्यक् ख्यानम् इति निश्चीयते। सत्त्वादिगुणानां महदादिकरणानां प्रकृतिपुरुषयोश्च वर्णनं उपनिषत्सु अनेकेषु स्थलेषु समुपलभ्यते, पुराणेतिहासादिषु च भूयो भूयः प्रशंसितमस्ति सांख्यदर्शनम्। अत्र मते पञ्चविंशतिस्तत्त्वानि-

1. मूलप्रकृति, 2. महान्, 3. अहङ्कार, 4. रूप, 5. रस, 6. शब्द, 7. स्पर्श, 8. गन्ध इति पञ्चतन्मात्राणि तथा च पञ्चकर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, एकं मनः, 8+11=19ए पञ्चमहाभूतानि-क्षिति, जल, पावक, गगन, समीर, 19+5=24+1 पुरूषश्च=25. वर्त्तते।

सृष्टिक्रममुपस्थापयन् आह, श्रीमदीश्वरकृष्णः-

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।।



(छ) योगदर्शनम्-

अस्य प्रवर्त्तकः महर्षि पतञ्जलिः, योगदर्शनम् प्राचीन-दर्शनम्, नानासिद्धीनां जनकमित्यत्रापि च नास्ति विवादः। अयञ्च महर्षिप्रवरः श्रीपतञ्जलिः शेषावतारभूतः विद्वान् व्याकरण-महाभाष्यकारश्चासीत्। षड्दर्शनाचार्यः श्रीवाचस्पतिमिश्रोऽपि योगभाष्यस्योपरि "तत्त्ववैशारदी" ति नाम्नीं टीकां रचितवान्। एवं योगसूत्राणामुपरि चास्त्येका "राजमार्तण्डे" त्याख्या टीका श्रीभोजराजविरचिताऽतीव प्रशस्तेति गीयते। विज्ञानभिक्षुः 1600ईसवीये "योगवार्त्तिकम्" नामकं खल्वेकंयोगदर्शनस्य ग्रन्थं लिखितवान्। तदनन्तरञ्च यतिप्रवरः श्रीरामानन्दः 1700 ईसवीये" मणिप्रभा" नाम्नीं टीकामकरोत्। "प्रदीपम्" इति च भावागणेशो विरचितवांस्तदुपरि टीकाम्। तथैव महापण्डितः श्रीनागेशोऽपि 1700 ईसवीये वर्षे योगसूत्रवृत्तिं लिखितवान्। तदननतरञ्च श्रीअनन्तदेवो महामनीषी 1800 ई0योगसूत्राणामुपरि "चन्द्रिका" नाम्नीं टीकां विहितवान्।

इदं योगदर्शनं पादचतुष्ट्यात्मकम्। यथा-

(1) प्रथमेपादे-योगस्वरूपस्यविस्तृतं निरूपणम्।

(2) द्वितीयपादे-क्रियायोगः तत्साधनानि यमादीनि च।

(3) तृतीयेपादे-अन्तरङ्गं साधनजातं ध्यानधारणासमाधिरूपं संयमपदव्यपदेश्यम्।

(4) चतुर्थे च पादे-जन्मौषधि मन्त्रतपः समाधिजसिद्धिपञ्चकं, तत्सम्बद्धं कैवल्यरूपं परमप्रयोजनं च निरूपितम्। षड्विंशतिस्तत्त्वानि-साख्यस्य-25+ईश्वरः=26। स चायमीश्वरः- "क्लेषकर्मविपाकाशयैरपरामृष्टः पुरूषविशेषः।"

(ज) पूर्वमीमांसा-दर्शनम्-

वेदस्य पूर्वभागे योऽस्ति विषयो विचारितस्तादृशविषयको विचार एव "पूर्वमीमांसा" शब्देनाऽभिधीयते। सच विचारः "कर्म" विषयको विचारः। यथोक्तम्-

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः"। (ईशोपनिषद्-2)

"शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्"। (गीता-4/21)

पूर्वमीमांसादर्शनस्य कृते जन्मदातृजैमिनिनये कर्मणा एवाऽभ्युदयनिःश्रेयसयोः समवाप्ति-जनकत्वेव तस्यैव कर्मणः प्राधान्येन निरूपणीयत्वात् इति। मीमांसायाः चर्चा वेदस्य संहिताया-मुपनिषदि ब्राह्मणग्रन्थेषु च प्राप्यते। कुमारिलः श्लोकवार्तिके-" धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्" इति। वारदायणेन-कर्मफलदातेश्वरो मन्यते। जैमिनिना-कर्मण एव फलदातृत्वं प्रदर्शितम्। अतएव मीमांसका निरीश्वरवादिनो घुष्यन्ते। जैमिनिना 700 ई०पूर्व० समये मीमांसा सूत्राणि प्रणीतानि। कुमारिलात् परतोजातः मण्डनमिश्रो विधिविवेक भावना विवेक विभ्रमविवेकादीन् ग्रन्थान् जग्रन्थ। विधिविवेकस्य टीका वाचस्पति मिश्रेण न्यायकणिका नाम्ना कृता। प्रभाकरेण "बृहती" नामकेन भाष्यव्याख्याग्रन्थेन स्वसिद्धान्तः प्रचारितः। गङ्गेशोपाध्यायेन न्यायतत्त्वचिन्तामणौ मुरारिमत-मुल्लिखितमतोऽयं द्वादशशतके ततः पूर्वं वा जातो मन्तुं शक्यते। "मुरारेस्तृतीयः पन्था" इति मिथिलायां प्रसिद्ध्यति, तेन मन्येऽयं मैथिलः आसीत्।

(झ) उत्तरमीमांसा-दर्शनम्-(वेदान्तदर्शनम्)

वेदान्तो वेदस्य अन्तिमोभागः अवसानभागः इति विग्रहेण उपनिषद् उच्यते। उपनिषद एव प्राचीनैर्वेदान्तशब्देनोक्ताः। वेदान्तसारे-वेदान्तोनाम उपनिषत्प्रमाणमित्युक्तम्। उपनिषदोऽनेकाः, तासु विरोधोऽपि प्रतिभासते। तस्यैव विरोधस्य दूरीकरणाय व्यासेन ब्रह्मसूत्राणि रचितानि। एतानि सूत्राणि पाणिनेरपि प्राचीनानि। इमे सर्वेऽपि वेदान्त सिद्धान्ताः। निम्नलिखितविषयेषु मतैक्यं धारयन्ति-

1. अनादिरनुवर्त्तमानोऽयं संसारोऽपास्य एव।
2. ज्ञानापेक्षया कर्मणो गौणत्वम्।
3. ब्रह्मादीन्द्रियातीतवस्तुनिरूपणे वेदाः प्रधानतया प्रमाणानि।
4. उपनिषदो गीता ब्रह्मसूत्राणि चेति प्रस्थानत्रयी मतसाधनायावलम्बनम्।
5. ब्रह्म व्यापकं नित्यञ्चेतनञ्च।
6. ब्रह्मैव जगज्जन्मस्थितिप्रलयकारणं नान्यदचेतनं प्रकृत्यादि।

तदेदं सङ्क्षिप्य वर्णितो वेदान्त समुदायः। भारतीयं दर्शनं वेदान्तपर्यवसायि, यतोऽत्र सर्वत्र दर्शनेषु क्रमविकास इव प्रतीयते। प्रथमं कणादस्यारम्भवादः तदनन्तरं गौतमस्य परमाणुवादः, तत्परोऽपि सांख्यस्य परिणामवादः, सर्वान्ते वेदान्तस्य विवर्त्तवादः। सोऽयं विकासो वेदान्त-पर्यवसायितां बोधयति दर्शनानाम्। अज्ञाननाशे सति सर्वं जगद् ब्रह्ममयं सदेवाऽनुभवगोचरीभूतं भवति। यथोक्तम्-

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्।
तद्वत्सत्यमविज्ञाय जगत् पश्यति मूढधीः।।

रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति।
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते।।

(नादविन्दूपनिषद् 40/26.27)

(ञ) चार्वाकदर्शनम्-

चारू वाक इति निर्वचनं चार्वाक शब्दस्य, वृहस्पति प्रणीतमिदं दर्शनम्। चारुः (सुन्दरम्) वाको (वचनम्) यस्येति यौगिकव्युत्पत्त्या सुन्दरवचनप्रतिपादनपरं दर्शनमित्यर्थो लभ्यते इति। लोकायतदर्शनमप्यस्यास्ति नामान्तरम्, इदञ्चास्त्यन्वर्थकं नाम, यतो लोकेषु (जगत्सु) सर्वत्र आयतम् (विस्तीर्णम्) इति च तदर्थः। इदानीन्तनकालावच्छेदेन सर्वोऽपि लोकः चार्वाकमतं सिद्धान्तञ्चानुसरति। प्रमाणदृष्ट्या विचार्यमाणे प्रत्यक्षप्रमाणस्यैव प्रमाण्यं स्वीकरोति लोकोऽपि। व्यवहारदर्शनेन तु सर्वेऽपि सन्ति प्रायः चार्वाका एव, प्रतीयन्तेऽपि च तथैवेति। येषां पदार्थानां प्रत्यक्षप्रमाणातिरिक्ताऽनुमानशब्दादिभिः प्रमाणैः सिद्धिः क्रियते चार्वाकमते सन्ति ते पदार्था मिथ्याभूता स्वास्तित्वविहीनाश्चेति मन्तव्यम्। चार्वाकदर्शने पृथिवी-जल-तेजो-वायवश्चेति सन्ति केवलं चत्वारि द्रव्याणि प्रत्यक्षप्रमाणजन्यज्ञानविषयीभूतानि। प्रत्यक्षमेव केवलं प्रमाणम्, इन्दियार्थ सन्निकर्षोत्पन्नं ज्ञानं हि तत्। शरीरमेव जीवः, सृष्टिः स्वभावत एष जायते। न तत्रेश्वरापेक्षा। ईश्वरो नास्त्येव। पतञ्जलि समये अस्मिन् दर्शने ग्रन्थाः प्राप्यन्ते स्म, सम्प्रति नोपलभ्यन्ते। सम्प्रति तु दर्शनग्रन्थेषु यत्र तत्र उद्धरणमात्रं पूर्वपक्षरूपेण दृश्यते। यथा-

यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिवेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।
त्रयोवेदस्य कर्तारो भाण्डधूर्तनिशाचराः।

प्रकृतिवादः (Naturalism) यस्य अर्थः Nature= प्रकृतेः, Iism=वादः भवति। अस्यवादस्य प्रवर्त्तकाः रूसो (Rousseau) वर्त्तते। भारतीयमतानुसारं नायं अतिरिक्तः कश्चन् वादः अपि तु चार्वाकदर्शनान्तर्भूतः जडवादः एव। जडतत्त्वस्य अधीनं मनः भवति। प्रकृतेः महत्त्वं यः वादः ददाति सः प्रकृतिवादः। अद्यतने दिने अस्य शाखात्रयं विद्यते। यथा-

1. भौतिक-जगतः प्रकृतिवादः (Naturalism of physical world)
2. यान्त्रिक- प्रकृतिवाद (Mechanical Naturalism)
3. जैविक प्रकृतिवादः- (Biological Naturalism)

(ट) बौद्धदर्शनम्-

बौद्धदर्शनं जैनदर्शनादुत्तरकाले प्रचरितमभवत्। बौद्धदर्शनस्य भाग द्वयं-

(1) धार्मिको-भागः, धार्मिकभागेआध्यात्मिक तत्त्ववर्णनम् आचारनिरूपणं च प्रपञ्चितम्,

(2) दार्शनिक-भागः, दार्शनिकभागे तु तार्किकदृष्ट्या बौद्धसिद्धान्तस्य सूक्ष्मं विवेचनं प्रस्तुतम्। बौद्धानां मते जीवो जगच्चेत्युभयमपि अनित्यं प्रतिक्षणपरिणामशालि च। बौद्धदर्शनस्य प्रस्थानं चतुर्धाविभज्यते-

(क) वैभाषिका:-"बाह्यार्थप्रत्यक्षमङ्गीकुर्वन्ति।

(ख) सौत्रान्तिकाबाह्यर्थमनुमेयमाहु।

(ग) योगचाराविज्ञानवादिन:।

(घ) माध्यमिका: शून्यवादिन:।

(क) बौद्धदर्शने त्रीणि रत्नानि- "शीलं, समाधि:, प्रज्ञा चेति।"

(ख) बौद्धदर्शने पञ्च बोधिवृक्षम्-"क्षमा-रूपिणी-जटा, धैर्यरूपि-दृढ़मूलम्, चरित्र-रूपि-पुष्पम्, बुद्धिरूपिणीशाखा, धर्मरूपिफलम्।

(ग) बौद्धदर्शने पञ्च अविद्या-आलस्य, जन्म-मृत्यु, काम, क्रोध, विषादा:।

(घ) बौद्धदर्शने अष्टाङ्गमार्गा:-सम्यक्दृष्टि:-संकल्प-वाणी-कर्म-आजीविका- उद्योग-स्मृति-समाधिरिति।

(ङ) बौद्धदर्शने पञ्चशीलत्वम्-(1) जीव हिंसा न करणीया, (2) चौरकार्यात् विरक्ति:, (3) व्यभिचारात् विरक्ति:। (4) असत्यभाषणात् विरक्ति:, (5) मद्यपानत: विरक्तिश्चेति।

(ठ) जैन दर्शनम्-(आर्हतदर्शनम्)

अर्हत इमे आर्हता:(जैना:)। इमे चाऽऽर्हता जैनपदजन्यबोधविषयतावन्त: सन्त: "अर्हत्" पदसम्बोध्यं तं स्वीयं देवं समुपासते इति। तथा चोक्तम्-

"अर्हन्नित्यथ जैनशासनरता:" (सर्वद०सं०जैन प्रकरणे)

बौद्धदर्शनात् पूर्वतनम्। महावीरेण रागादिरिपवो जिता इत्यसौ जिन् शब्देनोक्तस्तदीयतया दर्शनमिदं जैनदर्शननाम्नाप्यभिहितम्। तीर्थङ्करेष्वाद्य: ऋषभदेवनामाऽऽसीत्, महावीरश्चान्तिम:। दिगम्बर-श्वेताम्बराख्य सम्प्रदाय द्वयस्येदमेव बीजम्। तत्र "हेमचन्द्र"-नामको जैनदार्शनिक आप्तनिश्चयाऽलङ्कारे आह-

सर्वज्ञ: जितरागादि: सर्वथा लोकपूजित:।
यथा स्थितार्थवादी च देवोऽर्हन् परमेश्वर:।।

(सर्वद०सं०आर्हतद०प्रकरणे)

केवलं "वेदानङ्गीकारात्" इत्यनेन हेतुना, "नास्तिको वेदनिन्दक:" इति न्यायेन च "नास्तिक" -पदजन्यबोधविषयतावत्त्वेन नास्तिकता-"अर्हत" -निष्ठा सती, आर्हतमतनिष्ठा सती वा "नास्तिके" ति शब्देन व्यपदिश्यमाना अवश्यमेव खलु भवन्ति जैनाश्चार्वाकबौद्ध- दार्शनिकवत्। जैनदर्शने "मा हिंस्यात् सर्वाभूतानि"। इत्यनया श्रुत्या पुष्टीकृत:" अहिंसापरमो धर्म:" अयमेवोपनिषत्सु वर्णित: सिद्धान्त: परमसिद्धान्तत्वेन मान्यत्वेन चाऽङ्गीकृतो वर्तते। अत एवाऽत्र दर्शने पिपीलिकाजीवमारणम्, पिपीलिकाण्डमारणम्, एवं तत्समवृश्चिकादि- वधोऽपि तथाविध एवेति विचारयन्तु शास्त्रशास्त्रिण इति।

(क) जैनदर्शने नव तत्त्वानि-

जीव:, अजीव:, आस्रव:, बन्ध:, संवर:, निर्ज्जर:, मोक्ष:, पुण्यम् पापश्चेति।

(ख) जैनदर्शने त्रीणि रत्नानि-

सम्यक् दर्शनम्, सम्यक् ज्ञानम्, सम्यक्चारित्रम्,

(ग) जैनदर्शने सदाचारस्य पञ्चनियमाः-

अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहश्चेति,

(ङ) पाश्चात्यदर्शनम्-

इदं दर्शनं सर्वेष्वपि क्षेत्रेषु-Philosophy of biology, Education, History, Law, Religion, Science आदिषुव्याप्तमस्ति।

असंख्यानां दर्शनं निर्वचनं यद्यपि वर्तते, तथापि स्थालीपुलाकन्यायेन कानिचन अत्र प्रदर्शितानि।

डॉ० रामशकल पाण्डेयमहोदयानुसारं दर्शनस्य तिस्रः मुख्यशाखाः भवन्ति। ताः-

दर्शनम् (Philosophy)

(क) तत्त्वज्ञानम् Metaphysics	(ख) ज्ञानशास्त्रम् Epistemology	(ग) मूल्यमीमांसा Axiology
1. आत्मसम्बन्धितत्त्वज्ञानम् (Metaphysics of the soul)		1. नीतिशास्त्रम् (Ethics)
2. ईश्वरसम्बन्धितत्त्वज्ञानम (Theology)		2. सौन्दर्यशास्त्रम् (A esthetics)
3. सृष्टिशास्त्रम् (Osmology)		3. तर्कशास्त्रम् (Logic)
4. विश्वविज्ञानम्/सृष्टि-विज्ञानम् (Cosmology)		
5. सत्ताशास्त्रम् (Ontology)		

(ढ) दर्शनशास्त्रस्य प्रयोजनानि-

1. आत्मसम्बन्धितत्त्वज्ञानम् (Metaphysics of the soul)—अत्र आत्मविषये जीवविषये च विचारः भवति। पुनश्च कं नाम आत्मा ? किं नाम जीवः ? आत्म-शरीरयोः सम्बन्धः कीदृशः? संकल्पःस्वतन्त्रः परतन्त्रो वा? इत्यादि विषये चर्चा भवति।

2. ईश्वरसम्बन्धितत्त्वज्ञानम् (Theology)—अत्र मुख्यरूपेण ईश्वरविषये विचारः क्रियते। ईश्वरः अस्ति न वा?यदि अस्ति तर्हि अस्तित्वे किं प्रमाणम्? ईश्वरः एकः उत अनेकः? ईश्वरस्वरूपम् कीदृशम्?इत्यादि विषये चर्चा क्रियते।

3. सृष्टिशास्त्रम् (Osmology)—अस्मिन् शास्त्रे सृष्टेः-उत्पत्तिसम्बन्धिनां प्रश्नानां विचारो भवति, यथा सृष्टेःउत्पत्तिः अभवत् वा इयम् अनादिः अस्ति? सृष्टिनिर्माणस्यप्रक्रियायाः विवेचनमपि सृष्टिशास्त्रे एव भवति।

4. विश्वविज्ञानम्/सृष्टि-विज्ञानम् (Cosmology) (Origin,Development and Nature of Cosmos)—अस्मिन् शास्त्रे सृष्टेः संरचना तथा तस्य विकासस्य विषये विचारः

भवति, यथा किं ब्रह्माण्डः एकः ? किं ब्रह्माण्डः अनेकः भवितुं शक्नोति ? ब्रह्माण्डस्य संरचना भौतिकतत्त्वानां योगेन जाता अथवा ब्रह्माण्डस्य संरचना आध्यात्मिकतत्त्वानां योगेन जाता इत्यादि।

5. सत्ताशास्त्रम् (Ontology)—सत्ताशास्त्रे ब्रह्माण्डस्य नश्वरतत्त्वानि कानि? ब्रह्माण्डस्य अक्षरतत्त्वं किं? ब्रह्माण्डस्य सादित्वं सान्ततत्त्वं च किमस्ति? ब्रह्माण्डे स्थितानां तत्त्वानां पारस्परिकः सम्बन्धः कीदृशः वर्त्तते इत्यादि विषये विचारः भवति।

6. ज्ञानशास्त्रम् (Epistemology)—अस्मिन् शास्त्रे ज्ञानस्य स्वरूपं ज्ञानस्य विवेचनं च मुख्यरुपेण क्रियते। तथाच ज्ञानसम्बन्धिनां प्रश्नानां विचारो भवति, यथा-किं मनुष्यस्य बुद्धिः वास्तविकं ज्ञानं प्राप्तुं शक्नोति? मनुष्यः कियत्पर्यन्तं परमसत्तायाः ज्ञानं प्राप्स्यति। ज्ञानप्राप्तेः साधनं किं? सत्यं किम्? असत्यं किम्? किं नाम प्रमा? भ्रमज्ञानं किम् इत्यादि।

7. नीतिशास्त्रम् (Ethics)—नीतिशास्त्रे मनुष्यस्य आचरणं विविच्यते। अत्र मानवः किं कुर्यात् किं न कुर्यात् इत्यादीनां विश्लेषणं क्रियते। इदं शास्त्रम् उचितम्, अनुचितं, शुभम् इत्यादीन् मानदण्डान् च विवेचयति।

8. सौन्दर्यशास्त्रम् (Aesthetics)—अस्मिन् शास्त्रे सुन्दरं किम्? असुन्दरं किं? सौन्दर्यस्य मानदण्डः कः? इत्यादि विषये च विचारः प्रचलति।

9. तर्कशास्त्रम् (Logic)—अस्मिन् शास्त्रे चिन्तनप्रक्रियायाः प्राधान्यं भवति। आगमननिगमनतर्कविधीनां च विश्लेषणं क्रियते। तर्कशास्त्रस्य वैज्ञानिकं रूपं कीदृशं भवति इति विषये प्रतिपादनं भवति। तथा च तर्कवादानां स्वरूपं तत् परिकल्पना, व्याख्या, परिभाषा इत्यादि विचाराणां मौलिकनियमानां विश्लेषणमेव अस्य शास्त्रस्य कार्यम् भवति।

(ण) पदार्थनिरूपणम्

पदस्यार्थः पदार्थः इति व्युत्पत्या अभिधेयत्वं पदार्थसामान्यलक्षणम्। तत्र "द्रव्यगुणकर्म-सामान्यविशेषसमवायाभावाः सप्तपदार्थाः।" तेषां प्रतिपाद्यविषयाणां सम्यक्प्रकारेण ग्रहः ग्रहणं निश्चयात्मकं ज्ञानं यस्मादसौ तर्कसंग्रहः इति।

पदार्था रेखाचित्र (क्र० अग्रिम पृ०).....



(त) दर्शनस्य प्रमुखग्रन्थाः, ग्रन्थकाराःसमयश्च-

क्र.	ग्रन्थाः	ग्रन्थकाराः	समयः
1.	(न्यायदर्शन) न्यायसूत्रम्	गौतमः(अक्षपाद)	वि. पूर्व चत्वारितम शतकम्
2.	न्यायभाष्यम्	वात्स्यायनः	वि. पूर्व प्रथम शतकम्
3.	न्यायवार्तिकः	उद्योतकरः	षष्ठ शतकम्
4.	तात्पर्यटीका	वाचस्पति मिश्रः	नवम् शतकम्
5.	न्याय मञ्जरी	जयन्त भट्टः	
6.	न्यायसारः	भासर्वज्ञः	
7.	न्यायकुसुमाञ्जलिः	उदयनाचार्यः	दशम शतकम्
8.	आत्म तत्त्वविवेकः	उदयनाचार्यः	दशम शतकम्
9.	तात्पर्य परिशुद्धिः	उदयनाचार्यः	दशम शतकम्
10.	तत्त्वचिन्तामणिः	गंगेश उपाध्यायः	त्रयोदश शतकम्
11.	दीधितिः	रघुनाथ शिरोमणिः	
12.	शब्दशक्तिप्रकाशिका	जगदीश भट्टाचार्यः	
13.	व्युत्पत्तिवादः		
14.	शक्तिवादः	गदाधर भट्टाचार्यः	
15.	न्यायसिद्धान्त मुक्तावली	विश्वनाथ पञ्चानन भट्टाचार्यः	कारिकावली

क्रमशः .....

क्र.	ग्रन्थाः	ग्रन्थकाराः	समयः
16.	तर्कसंग्रहः	अन्नभट्टः	
17.	तर्कामृतम्	श्री जगदीश तर्कालङ्कारः	
18.	किरणावली	उदयनाचार्यः	
19.	(वैशेषिक) कणाद रहस्य	शंकर मिश्र	(15 शतकम्)
20.	वैशेषिक भाष्य	आत्रेयः	
21.	पदार्थ धर्मसंग्रहः	प्रशस्तपादः	
22.	न्यायकन्दली	श्रीधराचार्यः	
23.	न्याय लीलावती	वल्लभाचार्यः।	
24.	न्याय सूत्रवृत्तिः	विश्वनाथ पंचाननः	
25.	न्याय बोधिनी	गोवर्द्धन मिश्रः।	
26.	भारद्वाज वृत्तिभाष्यम्	गंगाधर कविरत्नः।	
27.	(सांख्य) सांख्य सूत्रम्	कपिलः	(14) शतकम्।
28.	तत्त्वसमासः	कपिलः	(14) शतकम्।
29.	षष्टितन्त्रम्	पञ्चशिखः।	
30.	सांख्यकारिका	ईश्वरकृष्णः	
31.	सांख्य तत्त्व कौमुदी	वाचस्पति मिश्रः।	
32.	सांख्य प्रवचनभाष्य/ योगवार्तिकम्	विज्ञान भिक्षुः	
33.	(योग) योगसूत्रम्	पंतजलिः	
34.	व्यासभाष्यम्	व्यासः।	
35.	तत्त्व वैशारदी	वाचस्पति मिश्रः	
36.	योगवार्तिकम्	विज्ञान भिक्षुः।	
37.	राज मार्त्तण्डः	भोजराजः।	
38.	(मीमांसा) शावरभाष्यम्	शवर स्वामी	
39.	श्लोक वार्तिकम्	कुमारिलभट्टः	
40.	तन्त्रवार्तिकं/टुण्टीका	कुमारिलभट्टः	
41.	बृहट्टीका	गुरु प्रभाकर5।	
42.	न्याय रत्नाकरः/ शास्त्रदीपिका	पार्थ सारथि मिश्रः	
43.	जैमिनीय न्यायमाला	माधवाचार्यः	
44.	मीमांसा न्याय प्रकाशः	टापदेवः।	
45.	अर्थसंग्रहः	लौगाक्षि भास्करः।	

क्रमशः .....

क्र.	ग्रन्थाः	ग्रन्थकाराः	समयः
46.	नयविवेक	भवनाथः (भवदेव)	
47.	मीमांसा परिभाषा	कृष्ण यज्वा।	
48.	विधिविवेकः, स्फोटसिद्धिः, विभ्रम विवेकः, भावनाविवेकः	मण्डन मिश्रः	
49.	न्यायकणिका, तत्त्वबिन्दुः	वाचस्पति मिश्रः	
50.	विधिरसायनम्, उपक्रमः पराक्रमः	अप्पय दीक्षितः	
51.	भाव चिन्तामणिः	विश्वेश्वर भट्टः	
52.	भाट्ट कौस्तुभः	खण्डदेव मिश्रः	
53.	(वेदान्त) ब्रह्मसूत्रम्, गीताभाष्यम्, उपनिषद्भाष्यम्	शंकराचार्यः	
54.	ब्रह्मसिद्धिः	मण्डन मिश्रः	
55.	पञ्चीकरणवार्तिक	सुरेश्वराचार्यः	
56.	सर-संग्रहः	मधुसूदन सरस्वती	
57.	भामती	वाचस्पति मिश्रः	
58.	खण्डन खण्डनखाद्य	महाकवि श्री हर्षः	
59.	न्याय मकरन्द	आनन्दबोधः	
60.	पञ्चदशी	माधवाचार्यः	
61.	अद्वैत सिद्धिः	मधुसूदन सरस्वती	
62.	वेदान्त परिभाषा	धर्मराजाध्वरीन्द्रः	
63.	वेदान्त सार	सदानन्दः।	
64.	(विशिष्टाद्वैत) श्रीभाष्य, वेदान्त सार, वेदार्थ संग्रहः,	रामानुजाचार्यः	
65.	न्याय परिशुद्धिः, तत्त्वटीका	वेदान्ताचार्य वेंकटनाथः	अधिकरण सरावली (द्वैत) माध्वमत
66.	ब्रह्मसूत्र भाष्य, प्रपञ्चमिथ्यात्त्वनिर्णयः	मध्वाचार्यः	
67.	वदावली तत्त्वप्रकाशिका	जयतीर्थः	
68.	न्यायामृत	व्यासतीर्थः	
69.	मध्वसिद्धान्तसारः	पद्मनाभः	

क्रमशः .....

क्र.	ग्रन्थाः	ग्रन्थकाराः	समयः
70.	(द्वैताद्वैत) वेदान्त पारिजात सौरभ	निम्बाचार्यः	निम्बार्कमत(द्वैताद्वैत)
71.	वेदान्त रत्न मन्जूषा	श्री पुरुषोत्तमाचार्यः	
72.	(शुद्धाद्वैत) ब्रह्मसूत्र (अणुभाष्य)	वल्लभाचार्यः	
73.	शुद्धाद्वैत मार्तण्ड	विट्ठलनाथः	
74.	प्रमेयरत्नार्णव	बलकृष्णभट्टः	
75.	(जैन) तत्त्वार्थसूत्र	उमा स्वातिः	
76.	सरचतुष्टय	कुन्दकुन्दाचार्यः	
77.	आत्म मीमांसा	समन्तभद्रः	
78.	न्यायावतारः	सिद्धसेन दिवाकरः	
79.	प्रमाणनयतत्त्वालोकालंकारः	देवसूरिः।	
80.	प्रमाण मीमांसा	हेमचन्द्रः	
81.	(बौद्ध) अभिधर्मज्ञान प्रस्थान शास्त्र	कात्यायनीपुत्रः	
82.	अभिधर्मकोशः	वसुबन्धुः।	
83.	कल्पना मण्डितिका	कुमारलातः	(प्रवर्त्तक सौत्रान्तिक)
84.	मध्यान्त विभागः	मैत्रेयः	
85.	महायान सूत्रालंकारः	असङ्गः	
86.	प्रमाणसमुच्चयः	दिङ्नागः	
87.	प्रमाणवार्तिकम्	धर्मकीर्तिः	
88.	मध्यमिक-शास्त्रम्	नार्गार्जुनः।	
89.	तत्त्व संग्रहः	शान्तरक्षितः	
90.	शारीरिक भाष्यम्	शंकरः(778-820 ई.)	अद्वैत निर्विशेषाद्वैत
91.	भास्कर भाष्यम्	भास्करः (1000)	भेदाभेद
92.	श्रीभाष्यम्	रामानुजः(1140)	विशिष्टाद्वैत
93.	पूर्णप्रज्ञभाष्यम्	माध्वाचार्यः(1238)	द्वैत
94.	वेदान्तपारिजातः	निम्बाकाचार्यः(1250)	द्वैताद्वैत
95.	शैव भाष्यम्	श्रीकण्ठः(1270)	शैव-विशिष्टाद्वैत
96.	श्रीकर भाष्यम्	श्रीपतिः (1400)	बीरशैव विशिष्टाद्वैत
97.	अणुभाष्यम्	वल्लभाचार्यः(1479-1544)	शुद्धाद्वैत
98.	विज्ञानामृतम्	विज्ञानभिक्षुः(1600)	अविभागाद्वैत

क्रमशः .....

क्र.	ग्रन्थाः	ग्रन्थकाराः	समयः
99.	गोविन्द भाष्यम्	बलदेवः(1725)	अनित्य भेदाभेद
100.	श्रीवैष्णव सम्प्रदायः	रामानुज	विशिष्टाद्वैत
101.	ब्रह्म सम्प्रदायः	माध्वाचार्यः(आनन्दतीर्थः)	द्वैत
102.	रुद्र सप्रदायः	विष्णु स्वामी/वल्लभाचार्यः	शुद्धाद्वैत
103.	स्नक सम्प्रदायः	निम्बार्कः	द्वैताद्वैत

(थ) तालिका द्वारा आस्तिक/नास्तिक दर्शनस्य प्रमाण/पदार्थ/द्रव्य निरूपणम्-

क्र. सं.	प्रमाणम्	पदार्थः	द्रव्यम्
1.	जैन-3	जैन-7	
2.	बौद्ध-3	बौद्ध-1	
3.	वैशेषिक-3	वैशेषिक-6	
4.	सांख्य-3	सांख्य-25	
5.	योग-3	योग-26	
6.	मध्व-3	मध्व-10	मध्व-20
7.	चार्वाक-1	चार्वाक-4	
8.	न्याय-4	न्यायसूत्र-16	न्याय-9
9.	प्रभाकर-5		
10.	कुमारिल-6	कुमारिल-5	कुमारिल-11
11.	वेदान्त-6	वेदान्त-1	
12.	पुराण-8	प्रसस्तपाद-7	
13.	तन्त्र (आगम) -8	तन्त्र आगम-36	

आत्मा सर्वेषां भूतानां स्वामी वर्तते, एष एव सर्वेषां भूतानां पालकोऽस्ति, एष एव भवसागरतस्तारकः सेतुः, एष एव लोकानां संरक्षणाय तेषां धारकः, अत एव ब्रह्मजिज्ञासवो मुमुक्षवो ब्राह्मणा अनाशकेन, यज्ञेन, दानेन, तपसा, वेदानुवचनेन (ज्ञानद्वारा) ब्रह्मलक्षणलक्षितमात्मानं विविदिषन्ति अर्थात् आत्मदर्शनं विधातुमिच्छन्ति, इदमस्ति सर्वं दर्शनस्यैव माहातम्यम् इति निश्चप्रचं विज्ञेयम्। दर्शनदृष्टिस्वरूपज्ञानप्लवेनैव भवसागरं सन्तरन्तीत्यत्र नास्ति लेशतोऽपि सन्देहाध्यवसायावसरः।

(द. न्यायदर्शन, ध. वैशेषिकदर्शन, न. सांख्य-योगदर्शन, प. मीमांसादर्शन, फ. वेदान्त दर्शन, ब. चार्वाक दर्शन, भ. बौद्ध दर्शन, म. जैन दर्शन, य. दर्शनग्रन्थाःग्रन्थकाराश्च।)

(द) न्यायदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- चत्वारि प्रमाणानि कस्मिन् दर्शने अङ्गीकृतानि?
   उत्तरम्- न्यायदर्शने।
2. प्रश्न- "नाग-कूर्म-कृकल-देवदत्त-धनञ्जय" इति केषां नामान्तराणि?
   उत्तरम्- पञ्चवायूनाम्।
3. प्रश्न-नव्यन्यायप्रवर्तकोऽस्ति?
   उत्तरम्- गङ्गेशोपाध्यायः।
4. प्रश्न- प्रचीनन्यायदर्शने कति पदार्थाः प्रतिपादिताः?
   उत्तरम्- षोडश पदार्थाः।
5. प्रश्न- "परमार्थसारः" -इति ग्रन्थस्य लेखकः कः?
   उत्तरम्- अभिनवगुप्ताचार्यः।
6. प्रश्न- क्षर-अखर-अवययपुरुषा इति त्रयः पुरुषाः कुत्र प्रतिपादिताः?
   उत्तरम्- विज्ञानविद्युदि।
7. प्रश्न- न्यायदर्शनस्य उपज्ञाता कः?
   उत्तरम्- गौतमः।
8. प्रश्न- महर्षेः गौतमस्य अपरं नाम किम्?
   उत्तरम्- अक्षपादः
9. प्रश्न- परामर्शजन्य-ज्ञानस्य का संज्ञा?
   उत्तरम्- अनुमिति।
10. प्रश्न- "अनुमितेः" किं कारणम्?
    उत्तरम्- अनुमानम्।
11. प्रश्न- चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि कानि सन्ति?
    उत्तरम्- ज्ञानेन्द्रियाणि।
12. प्रश्न- वाक्पाणिपादपायूपस्थानि कानि सन्ति?
    उत्तरम्- कर्मेन्द्रियाणि।
13. प्रश्न- संकल्पमिन्द्रियं किमस्ति?
    उत्तरम्- मनः।
14. प्रश्न- आलोचनमात्रं वृत्तिः कुत्रास्ति?
    उत्तरम्- ज्ञानेन्द्रियेषु।
15. प्रश्न- प्रत्ययसर्गः मूलतः कतिविधः?
    उत्तरम्- (04) चतुर्विधः।
16. प्रश्न- भेदोपभेदपूर्वकः प्रत्ययसर्गः कति?
    उत्तरम्- (50) पञ्चाशत्।
17. प्रश्न- विपर्ययस्य कति भेदाः सन्ति?
    उत्तरम्- (05) पञ्च।

18. प्रश्न- अशक्तिः कतिविधा भवन्ति?
उत्तरम्- (28) अष्टविंशति।
19. प्रश्न- तुष्टेः कति भेदाः सन्ति?
उत्तरम्- (09) नव।
20. प्रश्न- सिद्धेः कतिभेदाः सन्ति?
उत्तरम्- (08) अष्टौ।
21. प्रश्न- भेदप्रोयेदपूर्वकः विपर्ययः कतिविधः?
उत्तरम्- (62) द्विषष्टिविधः।
22. प्रश्न- तमसः कतिभेदाः भवन्ति?
उत्तरम्- (08) अष्टौ।
23. प्रश्न- मोहस्य कति भेदाः सन्ति?
उत्तरम्- (08) अष्टौ।
24. प्रश्न- महामोहस्य कति भेदाः सन्ति?
उत्तरम्- (10) दश।
25. प्रश्न- तामिस्रः कतिधा भवन्ति?
उत्तरम्- (18) अष्टादश।
26. प्रश्न- अन्धतामिस्रः कतिविधः?
उत्तरम्- (18) अष्टादश।
27. प्रश्न-"ईश्वर-सिद्धिः" कस्य दर्शनस्य प्रतिपाद्यो विषयः?
उत्तरम्- न्याय-दर्शनस्य।
28. प्रश्न- न्यायसूत्रे कियन्तोऽध्यायाः?
उत्तरम्- (5) पञ्च।
29. प्रश्न-"गुणवत्यगुणस्य सतस्तस्यार्थमपाश्रकं चरति" इत्यत्र "अगुणस्य" इति पदेन कस्य संकेतग्रहः भवति?
उत्तरम्- पुरुषस्य।
30. प्रश्न- "दृष्टाऽस्मीति" मत्वा का पुरुषस्य दर्शनं पुनर्न उपैति?
उत्तरम्- प्रकृतिः।
31. प्रश्न- पीलुपाकवादिनः के सन्ति?
उत्तरम्- नैयायिकाः।
32. प्रश्न- कारणभावाच्च इतयनेन कः वादः पुष्यते?
उत्तरम्- सत्कार्यवादः।
33. प्रश्न- कार्यं किं भवति?
उत्तरम्- प्रकृति सरूपमपि प्रकृति विपर्ययमपि।
34. प्रश्न- अकर्तृत्वं कस्य धर्मः?
उत्तरम्- पुरुषस्य।

35. प्रश्न- प्रकृतिर्वस्तुतो किं बध्नाति?
उत्तरम्- स्वात्मानम्।
36. प्रश्न- विहितकर्मणां विधिना परित्याग:क:?
उत्तरम्- उपरति:।
37. प्रश्न-न्यायदर्शनानुसारं कति प्रमाणानि कानि च तानि?
उत्तरम्-चत्वारि, 1. प्रत्यक्ष:, 2. अनुमानम्, 3. शब्द:, 4. उपमानम्।
38. प्रश्न- न्यायनये वाक्यं किम्?
उत्तरम्- आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूह:।
39. प्रश्न- परार्थानुमाने अवयवा: कति?
उत्तरम्- पञ्च।
40. प्रश्न- कार्योत्पत्ते: पूर्वं कारणभाव: कथ्यते?
उत्तरम्- असत्कार्यवाद:।
41. प्रश्न- परिमाणस्य किं लक्षणम्?
उत्तरम्- मानवव्यवहारासाधारणकारणं परिमाणम्।
42. प्रश्न- कारणस्य किं लक्षणम्?
उत्तरम्- कार्यनियतपूर्ववृत्ति:कारणम्।
43. प्रश्न- समवायिकारणस्य किं लक्षणम्?
उत्तरम्- यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्।
44. प्रश्न- न्यायदर्शनानुसारं कानि पञ्चावयवानि?
उत्तरम्- 1. प्रतिज्ञा, 2. हेतु, 3. दृष्टान्त, 4. उपनय, 5. निगमनम्।
45. प्रश्न- कार्य-कारण सम्बन्धविषये न्यायमते को वाद:?
उत्तरम्- आरम्भवाद:।
46. प्रश्न- असत्कारणवादविषये न्यायमतं किम् ?
उत्तरम्- कारणस्य नाशे सति कार्योत्पादनं भवति।
47. प्रश्न- न्यायानुसारं कानि षडैश्वर्यानि?
उत्तरम्- 1. अधिपत्य, 2. वीर्य, 3. यश, 4. श्री, 5. ज्ञान, 6. वैराग्य।
48. प्रश्न- "असत्कार्यवादस्य सिद्धान्त: कस्मिन् दर्शने प्राप्यते?
उत्तरम्- न्यायदर्शने।
49. प्रश्न- चत्वारिप्रमाणानि केन मन्यन्ते?
उत्तरम्- न्यायदर्शनेन।
50. प्रश्न- धर्मसूत्रस्य लेखक: क:?
उत्तरम्- गौतम:।
51. प्रश्न- न्यायस्य मूलोद्देश्यं किम्?
उत्तरम्- शास्त्रानुचिंतन द्वारा मोक्ष:।

52. प्रश्न- न्यायदर्शने कति पदार्था:?
उत्तरम्- (16 षोडश) 1. प्रमाण, 2. प्रमेय, 3. संशय, 4. प्रयोजन, 5. दृष्टान्त, 6. सिद्धान्त, 7. अवयव, 8. तर्क, 9. निर्णय, 10. वाद, 11. जल्प, 12. वितण्डा, 13. हेत्वाभास, 14. छल, 15. जाति, 16. निग्रहस्थानम्।
53. प्रश्न- कानि द्वादश प्रमेयानि?
उत्तरम्- 1. आत्मा, 2. शरीर, 3. इन्द्रियानि, 4. बुद्धि:, 5. अर्थ, 6. मन, 7. प्रवृति, 8. दोष, 9. प्रेत्यभाव, 10. फल, 11. दु:ख, 12. अपवर्ग।
54. प्रश्न- हेत्वाभासस्य के पञ्च भेदा:?
उत्तरम्- 1. सव्यभिचार:, 2. विरूद्ध:, 3. सत्प्रतिपक्ष:, 4. असिद्ध:, 5. बाधित:।
55. प्रश्न- वाक्यार्थ-बोधस्य कानि चत्वारि साधनानि?
उत्तरम्- 1. आकांक्षा, 2. योग्यता, 3. सन्निधि:, 4. तात्पर्यम्।
56. प्रश्न- न्यायदर्शने कति कारणानि कानि च तानि?
उत्तरम्- (3 त्रीणि) 1. समवायिकारण, 2. असमवायिकारण, 3. निमित्तकारणम्।
57. प्रश्न अक्षपाददर्शनेन किं दर्शनं गृह्यते?
उत्तरम्- न्यायदर्शनम्।
58. प्रश्न- न्यायदर्शनानुसारं ज्ञानं किम्?
उत्तरम्- अभिव्यक्तं प्रकाशितं वा विषयवस्तु।
59. प्रश्न- दर्शनस्य कौ द्वौ भेदौ स्त:?
उत्तरम्- 1. आस्तिकदर्शनम्, 2. नास्तिकदर्शनम्।
60. प्रश्न- षड् आस्तिकदर्शनानि कानि सन्ति?
उत्तरम्- 1. न्याय, 2. वैशेषिक, 3. सांख्य, 4. योग, 5. मीमांसा, 6. वेदान्त।
61. प्रश्न- न्यायदर्शनस्य प्रारम्भिकग्रन्था: के सन्ति?
उत्तरम्- 1. गौतमन्यायसूत्रम्, 2. वात्स्यायनभाष्य।
62. प्रश्न- न्यायदर्शनं कै: नामभि: ज्ञायन्ते?
उत्तरम्-1. प्रमाणशास्त्रम्, 2. आन्वीक्षिकी, 3. हेतुविद्या, 4. तर्कशास्त्रम्, 5. ऊह।
63. प्रश्न- नव्यन्यायस्य प्रमुख व्याख्याता कं मन्यते?
उत्तरम्- तत्त्वचिन्तामणि इत्यस्य प्रणेता गङ्गेश:।
64. प्रश्न- न्यायदर्शने कति तत्त्वानि मन्यन्ते?
उत्तरम्- 16 षोडष् तत्त्वानि।
65. प्रश्न- प्रथमतत्त्वं या साध्यतत्त्वं किमस्ति?
उत्तरम्- प्रमेय:।
66. प्रश्न- अवशिष्टानि तत्त्वानि किमस्ति?
उत्तरम्- प्रमेय सिद्धे:साधनम्।
67. प्रश्न- नैयायिकानुसारं मोक्षं किम्?
उत्तरम्- दु:खस्य आत्यन्तिकी-निवृत्ति: एव मोक्ष:।

68. प्रश्न- नैयायिकः आत्माविषये किं मन्यते?
उत्तरम्- आत्मा प्रतिशरीरे भिन्नं भिन्नं वर्तते।
69. प्रश्न- न्याये पदः किमस्ति?
उत्तरम्- वर्णसमूहः।
70. प्रश्न- न्याये पदार्थानां का संख्या?
उत्तरम्- सप्तपदार्थाः।
71. प्रश्न- न्यायदर्शने कति अध्यायाः सन्ति?
उत्तरम्- 5 पञ्च।
72. प्रश्न- सत्कार्यवादस्य कारिका किमस्ति?
उत्तरम्- असत्करनादुपादा.....।
73. प्रश्न- नव्य-न्यायानुसारं निर्विकल्पक-ज्ञानस्य विषयः किमस्ति?
उत्तरम्- प्रत्यक्षस्य।
74. प्रश्न- अभावं प्रमाणत्व कः स्वीकरोति?
उत्तरम्- भाट्ट।
75. प्रश्न- सादृश्यं पदार्थत्व कः स्वीकरोति?
उत्तरम्- नैयायिकः।
76. प्रश्न- नव्य-न्यायानुसारं समवायः कः?
उत्तरम्- (नाना) नित्यसम्बन्धः समवायः।
77. प्रश्न- शब्द-बोधः किमस्ति?
उत्तरम्- शब्दश्चासौ बोधः।
78. प्रश्न- स्वतः प्रमाण्यवादं कः स्वीकरोति?
उत्तरम्- भाट्ट।
79. प्रश्न- प्रभाकरानुसारं कति प्रमाणानि?
उत्तरम्- 5 पञ्च।
80. प्रश्न- भाट्टमतानुसारं कति प्रमाणानि?
उत्तरम्- 6 षट्।
81. प्रश्न- पद-पदार्थयोःकः सम्बन्धः ?
उत्तरम्- समवायस्य।
82. प्रश्न- आगमशास्त्रे मुक्तस्य स्वरूपं किमस्ति?
उत्तरम्- सर्वतन्त्र-स्वतंत्रः।
83. प्रश्न- न्यायदर्शनं कतिविधम्?
उत्तरम्- द्विविधम्।
84. प्रश्न- न्यायदर्शनस्य आदिप्रवक्ता कोऽस्ति?
उत्तरम्- महामुनि गौतमः।

85. प्रश्न- व्याप्ति इत्यस्य लक्षणं किम्?
उत्तरम्- सहचर्य-नियमः।
86. प्रश्न- "अनुमानं" कति विधम्?
उत्तरम्- (2) द्विविधम्।
87. प्रश्न- परार्थानुमाने प्रतिज्ञावाक्यं किम्?
उत्तरम्- पर्वतोवह्निमानम्।
88. प्रश्न- लिङ्गपरामर्शः किमस्ति?
उत्तरम्- अनुमानम्।
89. प्रश्न- "गो सदृशः गवयः" इदं वाक्यं कस्य प्रमाणस्य उदाहरणम्?
उत्तरम्- उपमानस्य।
90. प्रश्न- "आप्तवाक्यं" किम्?
उत्तरम्- शब्दः।
91. प्रश्न- "वह्निना सिञ्चति" अत्र को दोषः?
उत्तरम्- योग्यताभावः।
92. प्रश्न- "समवायः" किमस्ति?
उत्तरम्-पदार्थः सम्बन्धश्च।
93. प्रश्न- समवायस्य कति विधः?
उत्तरम्- (1) एकविधः
94. प्रश्न- "वायुः" पदार्थस्य कस्मिन् विभागे आगच्छति?
उत्तरम्- द्रव्ये।
95. प्रश्न- कर्मणो भेदाः कति? के च ते?
उत्तरम्-पञ्च, 1. उत्क्षेपण, 2. अपक्षेपण, 3. आकूञ्चन, 4. प्रसारण, 5. गमनादि।
96. प्रश्न- "कार्यनियतपूर्ववर्त्ति" किं भवति?
उत्तरम्-कार्योत्पत्तेः अव्यवहितपूर्वक्षणे यत् तिष्ठति तत् कारणम्।
97. प्रश्न- "पटरूपं" प्रति "तन्तुरूपं" कीदृशं कारणम्?
उत्तरम्- असमवायि-कारणम्।
98. प्रश्न- "इन्द्रियार्थसन्निकर्षजन्यंज्ञानं" किमस्ति?
उत्तरम्-प्रत्यक्षम्।
99. प्रश्न- "प्रत्यक्ष" प्रमाणं कति विधम्?
उत्तरम्- (2) द्विविधम्।
100. प्रश्न- "तुरी" इति पटस्य कीदृशं कारणम्?
उत्तरम्- निमित्त-कारणम्।
101. प्रश्न- "तुष्टि" अत्र कि अन्तर्निहिता विद्यते?
उत्तरम्- धर्मम्।

102. प्रश्न- "ज्ञानस्य अवसानं कुत्र भवति?
उत्तरम्- सिद्धौ।
103. प्रश्न- अज्ञानस्य कस्मिन् अन्तर्भावो भवति?
उत्तरम्-विपर्यये:।

(ध) वैशेषिकदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- वैशेषिकसूत्रप्रणेता क:?
उत्तरम्- कणाद:।
2. प्रश्न- औलुक्यदर्शनमिति अस्य नामान्तरमस्ति?
उत्तरम्- वैशेषिक दर्शनम्।
3. प्रश्न- क: समवाय:?
उत्तरम्- समवाय-सम्बन्ध:।
4. प्रश्न- तर्कसंग्रहकारेण प्रतिपादितं दर्शनं किमस्ति?
उत्तरम्- वैशेषिकदर्शनम्।
5. प्रश्न- तैलंगवंशीयस्य पण्डित-अन्नभट्टस्य काल: अस्ति?
उत्तरम्- सप्तदशशताब्दी ईसवी।
6. प्रश्न- वैशेषिकदर्शने कति पदार्था: सन्ति?
उत्तरम्- (07) सप्त।
7. प्रश्न- वैशेषिकदर्शने कानि सप्त पदार्थानि?
उत्तरम्- द्रव्यम्, गुण:, कर्मम्, अभाव:, सामान्यं, विशेष:, समवाय:।
8. प्रश्न- वैशेषिकदर्शने कति द्रव्याणि सन्ति?
उत्तरम्- (09) नव द्रव्याणि।
9. प्रश्न- पृथिव्या: विशिष्ट: गुण:क:?
उत्तरम्- गन्ध:।
10. प्रश्न- पृथिवी कतिविधा वर्तते?
उत्तरम्- (02) द्वे।
11. प्रश्न- नित्या पृथिवी काऽस्ति?
उत्तरम्- परमाणुरूपा।
12. प्रश्न- कार्यरूपा पृथिवी काऽस्ति?
उत्तरम्- अनित्या।
13. प्रश्न- अनित्या पृथिवी कतिविधा?
उत्तरम्- (03) त्रय:।
14. प्रश्न- पृथिव्या: विशिष्टं लक्षणं किमस्ति?
उत्तरम्- गन्धवती।
15. प्रश्न- जलस्य किं लक्षणम्?
उत्तरम्- शीतस्पर्शवत्।

16. प्रश्न- तेजसः किं लक्षणम्?
उत्तरम्- ऊष्णस्पर्शवत्तेजः।
17. प्रश्न- वह्न्यादिकं किम्?
उत्तरम्- भौमम्।
18. प्रश्न- अबिन्धनं दिव्यं किं भवति?
उत्तरम्- विद्युदादिः।
19. प्रश्न- भुक्तस्य परिणामहेतुः किम्?
उत्तरम्- उदर्यम्।
20. प्रश्न- वायेः किं लक्षणम्?
उत्तरम्- रूपरहितस्पर्शवान्।
21. प्रश्न- आकाशस्य किं लक्षणम्?
उत्तरम्- शब्दगुणकम्।
22. प्रश्न- आकाशः कतिविधः?
उत्तरम्- (01) एकः।
23. प्रश्न- कालस्य किं लक्षणम्?
उत्तरम्- अतीतादिव्यवहारहेतुः।
24. प्रश्न- कालः कति विधः?
उत्तरम्- (01) एकः।
25. प्रश्न- दिशः किं लक्षणम्?
उत्तरम्- प्राच्यादिव्यवहारहेतुः।
26. प्रश्न- आत्मनः किं लक्षणम्?
उत्तरम्- ज्ञानाधिकरणम्।
27. प्रश्न- आत्मा कतिविधः?
उत्तरम्- (02) द्वौ।
28. प्रश्न- मनसः किं लक्षणम्?
उत्तरम्- सुखाद्युपलिब्धसाधनम्।
29. प्रश्न- गुणस्य कति भेदाः सन्ति?
उत्तरम्- (24) चतुर्विंशतिः।
30. प्रश्न- वैशेषिकदर्शने कियन्ति कर्माणि सन्ति, कानि च तानि?
उत्तरम्-(05) पञ्च कर्माणि। 1. उत्क्षेपणम्, 2. अपक्षेपणम्, 3. आकुंचनम्, 4. प्रसारणम्, 5. गमनम्।
31. प्रश्न- कर्म-नामकः पदार्थः किमस्ति?
उत्तरम्- आकुंचनम्।
32. प्रश्न- किं नाम कर्म?
उत्तरम्- गमनम्।

33. प्रश्न- सामान्यं कति विधम्?
    उत्तरम्- (02) द्वयम्।
34. प्रश्न- सामान्यं किम्?
    उत्तरम्- अपरम्।
35. प्रश्न- सामान्यस्य पर्यायः किमस्ति?
    उत्तरम्- जातिः।
36. प्रश्न- कियन्तो विशेषः?
    उत्तरम्- अनन्ताः।
37. प्रश्न- समवायः कतिविधाः?
    उत्तरम्- (01) एकविधः।
38. प्रश्न- किं नाम अयुतसिद्धवृत्तिः?
    उत्तरम्- समवायः।
39. प्रश्न- अभावः कति विधः?
    उत्तरम्- (04) चत्वारः।
40. प्रश्न- प्रध्वंसाभावःकिम्?
    उत्तरम्- अभावः।
41. प्रश्न-रूपं केन इन्द्रियेण गृह्यते?
    उत्तरम्- चक्षुषा।
42. प्रश्न- रसः कति विधः?
    उत्तरम्- (06) षट्।
43. प्रश्न- के षट्रसाः?
    उत्तरम्- मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः।
44. प्रश्न- पृथिव्यां कति रसाः प्राप्यन्ते?
    उत्तरम्- (06) षट्।
45. प्रश्न- जले कति रसाः प्राप्यन्ते?
    उत्तरम्- (01) एकः।
46. प्रश्न-घ्राणग्राह्यो गुणःकः?
    उत्तरम्- गन्धः।
47. प्रश्न- गन्धः कति विधः?
    उत्तरम्- (02) द्विविधः।
48. प्रश्न- त्वगिन्द्रियमात्रग्राह्यो गुणःकः?
    उत्तरम्- स्पर्शः।
49. प्रश्न- स्पर्शः कति विधः?
    उत्तरम्- (03) त्रिविधः।

50. प्रश्न- आद्यपतना-समवायिकारणं किम्?
उत्तरम्- गुरुत्वम्।
51. प्रश्न- आद्यस्यदना-समवायिकारणं किम्?
उत्तरम्- द्रव्यत्वम्।
52. प्रश्न- चूर्णादिपिण्डीभावहेतुः गुणः कः?
उत्तरम्- स्नेहः।
53. प्रश्न- शब्दः केन गृह्यते?
उत्तरम्- श्रोत्रेण।
54. प्रश्न- सर्वव्यवहारहेतुः गुणः कः?
उत्तरम्- बुद्धिः।
55. प्रश्न- बुद्धिः न्यायमते कतिविधः?
उत्तरम्- (02) द्वे।
56. प्रश्न- संस्कारमात्रजन्यं ज्ञानं किम्?
उत्तरम्- स्मृतिः।
57. प्रश्न- अनुभवः कतिविधः?
उत्तरम्- (02) द्वौ।
58. प्रश्न-यथार्थानुभवः कतिविधः?
उत्तरम्- (04) चत्वारः।
59. प्रश्न- असाधारणं कारणं किं नाम?
उत्तरम्- करणम्।
60. प्रश्न- कार्यनियतपूर्ववृत्तिः किम्?
उत्तरम्- कारणम्।
61. प्रश्न- कारणं कति विधम्?
उत्तरम्- (03) त्रीणि।
62. प्रश्न- कारणं किं न भवति?
उत्तरम्- अन्यथासिद्धम्।
63. प्रश्न- प्रत्यक्षज्ञानकरणं किम्?
उत्तरम्- प्रत्यक्षम्।
64. प्रश्न- प्रमाकरणं किम्?
उत्तरम्- प्रमाणम्।
65. प्रश्न- इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं किम्?
उत्तरम्- प्रत्यक्षम्।
66. प्रश्न- प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः कतिविधः?
उत्तरम्- षड्विधः।

67. प्रश्न- चक्षुषा घटप्रत्यक्षजनने कः सन्निकर्षः?
उत्तरम्- संयोगः।
68. प्रश्न- घटरूप-प्रत्यक्षजनने कः सन्निकर्षः?
उत्तरम्- संयुक्तसमवायः।
69. प्रश्न-रूपत्वसामान्यप्रत्यक्षे कः सन्निकर्षः?
उत्तरम्- संयुक्तसमवेतसमवायः।
70. प्रश्न- श्रोत्रेण शब्दसाक्षाकारे कः सन्निकर्षः?
उत्तरम्- समवायः।
71. प्रश्न- शब्दत्वसाक्षात्कारे कः सन्निकर्षः?
उत्तरम्- समवेतसमवायः।
72. प्रश्न- अभाव-प्रत्यक्षे कःसन्निकर्षः?
उत्तरम्- विशेषणविशेष्य भावः।
73. प्रश्न- अनुमितिकरणं किम्?
उत्तरम्- अनुमानम्।
74. प्रश्न- परामर्शजन्यं ज्ञानं भवति?
उत्तरम्- अनुमितिः।
75. प्रश्न- व्याप्तिविशिष्टपक्षधर्मताज्ञानं भवति?
उत्तरम्- परामर्शः।
76. प्रश्न-यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमःकथ्यते?
उत्तरम्- व्याप्तिः।
77. प्रश्न- व्याप्यस्य पर्वतादिवृत्तित्वं भवति?
उत्तरम्- पक्षधर्मता।
78. प्रश्न- सन्दिग्धसाध्यवान् कः?
उत्तरम्- पक्षः।
79. प्रश्न- निश्चितसाध्याभाववान् कः?
उत्तरम्- विपक्षः।
80. प्रश्न- निश्चितसाध्यवान् किम्?
उत्तरम्- सपक्षः।
81. प्रश्न- हेत्वाभासाः कतिविधाः?
उत्तरम्- (05) पञ्च।
82. प्रश्न- अनैकान्तिक-हेत्वाभासः कतिविधः?
उत्तरम्- (03) त्रिविधः।
83. प्रश्न- पर्वतो वह्निमान् प्रमेयत्वात् इत्यत्र कः हेत्वाभासः?
उत्तरम्- साधारणः।

84. प्रश्न- "शब्दो नित्यः शब्दत्वात्" इत्यत्र कः हेत्वाभासः?
उत्तरम्- असाधारणः।
85. प्रश्न- अन्वयव्यतिरेकदृष्टान्तरहितः हेत्वाभासः?
उत्तरम्- अनुपसंहारी।
86. प्रश्न- "सर्वमनित्यं प्रमेयत्वाद्" इत्यत्र कःहेत्वाभासः?
उत्तरम्- अनुपसंहारी।
87. प्रश्न- साध्याभावव्याप्तो हेतुः कः?
उत्तरम्- विरुद्धः।
88. प्रश्न- "शब्दो नित्यः कृतकत्वाद्" इत्यत्र कःहेत्वाभासः?
उत्तरम्- विरुद्धः।
89. प्रश्न- साध्याभावसाधकं हेत्वन्तरं यस्य स भवति?
उत्तरम्- सत्प्रतिपक्षः।
90. प्रश्न-"शब्दो नित्यः श्रावणत्वाच्छब्दवत्, शब्दोऽनित्यः कार्यत्वात् घटवद्" इत्यत्र कः हेत्वाभासः?
उत्तरम्- सत्प्रतिपक्षः।
91. प्रश्न- सत्प्रतिपक्षः किं करोति?
उत्तरम्- अनुमितिं प्रतिबध्नाति।
92. प्रश्न- असिद्धहेत्वाभासः कतिविधः?
उत्तरम्- (03) त्रिविधः।
93. प्रश्न- "गगनारविन्दं सुरभिः अरविन्दत्वात्" इत्यत्र कःहेत्वाभासः?
उत्तरम्- आश्रयासिद्धः।
94. प्रश्न- "शब्दो गुणः चाक्षुषत्वात्" इत्यत्र कः हेत्वाभासः?
उत्तरम्- स्वरूपासिद्धः।
95. प्रश्न- "वह्निरनुष्णो द्रव्यत्वाद्" इत्यत्र कः हेत्वाभासः?
उत्तरम्- बाधितः।
96. प्रश्न- उपमितिकरणं किम्?
उत्तरम्- उपमानम्।
97. प्रश्न- संज्ञा-संज्ञिसम्बन्धज्ञानं किम्?
उत्तरम्- उपमितिः।
98. प्रश्न- आप्तवचनं किं नाम?
उत्तरम्- शब्दः।
99. प्रश्न- आप्तस्तु कः?
उत्तरम्- यथार्थवक्ता।
100. प्रश्न- अयथार्थानुभवः कतिविधः?
उत्तरम्- त्रिविधः।

101. प्रश्न- किं नाम सुखम्?
उत्तरम्- सर्वेषामनुकूलवेदनीयम्।
102. प्रश्न- किं नाम दु:खम्?
उत्तरम्- सर्वेषां प्रतिकूलवेदनीयम्।
103. प्रश्न- संस्कार: कतिविध:?
उत्तरम्- त्रिविध:।
104. प्रश्न- नित्यमनेकानुगतं किं नाम?
उत्तरम्- सामान्यम्।
105. प्रश्न- नित्यद्रव्यवृत्तयो व्यावर्तका भवन्ति?
उत्तरम्- विशेषा:।
106. प्रश्न- नित्यसम्बन्ध: क:?
उत्तरम्- समवाय:।
107. प्रश्न- परार्थानुमाने प्रतिज्ञावाक्यं किमस्ति?
उत्तरम्- पर्वतो वह्निमान्।
108. प्रश्न- उपनयवाक्यं किमस्ति?
उत्तरम्- तथा चाऽयम्।
109. प्रश्न- "तस्मात्तथा" कीदृशं वाक्यमस्ति परार्थानुमाने?
उत्तरम्- निगमनवाक्यम्।
110. परार्थानुमाने पंचावयववाक्ये धूममहानसम् इति कीदृशं वाक्यमस्ति?
उत्तरम्- हेतु:।
111. प्रश्न- "यो यो धूमवान् स स वह्निमान्" यथा महानसम्" इति कीदृशं वाक्यमस्ति परार्थानुमाने पंचावयववाक्येषु?
उत्तरम्- उदाहरणम्।
112. प्रश्न- वैशेषिक-मतानुसारं अन्योन्याभाव: क:?
उत्तरम्- परस्परनिषेध:।
113. प्रश्न- उपनिषद्महावाक्यस्य "तत्वमसि" इत्यस्य कोऽर्थ:?
उत्तरम्- जीवो ब्रह्मैव।
114. प्रश्न- "विशेषधर्म" इत्यस्य निर्धारणं केन भवति?
उत्तरम्- वर्णाश्रमेण।
115. प्रश्न- भारतीय-नीतिशास्त्रं अधिकांशत: कुत्र आश्रित:?
उत्तरम्- तत्व-मीमांसायाम्।
116. प्रश्न- धर्म: स्व-सामान्यतम-नैतिक-अर्थे किं व्यक्तं करोति?
उत्तरम्- सदाचारम्।
117. प्रश्न- क: परमपुरुषार्थ:?
उत्तरम्- मोक्ष:।

118. प्रश्न- वेदान्तदर्शने प्रस्थान-त्रयं किम्?
उत्तरम्- !. उपनिषद्, 2 ब्रह्मसूत्रम्., 3. गीता।
119. प्रश्न- वैशेषिकदर्शनानुसारं आणविक-द्रव्यं किम्?
उत्तरम्- जलम्।
120. प्रश्न- अद्वैत-वेदान्तानुसारं ज्ञानं किम्?
उत्तरम्- तत्त्व ज्ञानम्।
121. प्रश्न- वैशेषिकदर्शनानुसारं "समवायिकारणं" किम्?
उत्तरम्- द्रव्यम्।
122. प्रश्न- वैशेषिकदर्शनानुसारं "पदार्थः" कः?
उत्तरम्- ज्ञेयः अभिधेयः।
123. प्रश्न- "सामान्यं-नित्यपदार्थः" अस्य समर्थकः कः?
उत्तरम्- वैशेषिकः।
124. प्रश्न- "पदार्थधर्मसंग्रह" ग्रन्थस्य लेखकः कः?
उत्तरम्- प्रशस्तपादः।
125. प्रश्न- पदार्थाः कति कानि च तेषां नामानि?
उत्तरम्-सप्तपदार्थाः1. द्रव्य, 2. गुण, 3. कर्म, 4. सामान्य, 5. विशेष, 6. भाव, 7. अभावः।
126. प्रश्न- द्रव्याणि कति कानि च तानि?
उत्तरम्-नवद्रव्याणि, 1. पृथिवी, 2. अप, 3. तेज, 4. वायु, 5. आकाश, 6. काल, 7. दिशा, 8. आत्मा, 9. मन।
127. प्रश्न- कति गुणाः के च ते?
उत्तरम्-24चतुर्विंशतिः, 1. रूप, 2. रस, 3. गन्ध, 4. स्पर्श, 5. संख्या, 6. परिमाण, 7. पृथकत्व, 8. संयोग, 9. वियोग, 10. चरत्व, 11. अपरत्व, 12. गुरुत्व, 13. द्रव्यत्व, 14. स्नेह, 15. शब्द, 16. बुद्धिः, 17. सुख, 18. दुःख, 19. इच्छा, 20. द्वेष, 21. प्रयत्न, 22. धर्म, 23. अधर्म, 24. संस्कार।
128. प्रश्न- "परमाणु" इत्यस्य कति प्रकाराः के च ते?
उत्तरम्- चत्वारः, 1. पार्थिवः, तैजसः, 3. जलीयः, 4. वायवीयः।
129. प्रश्न- शब्दस्य कति भेदाः के च ते?
उत्तरम्- द्वौ, 1. ध्वन्यात्मकः, 2. वर्णात्मकः।
130. प्रश्न- समवायः कति भवति?
उत्तरम्- एकविधः।
131. प्रश्न-गुणगुणिनोःअवयवावयविनोःक्रियाक्रियावतोःजातिव्यक्त्योःनित्यद्रव्यविशेषयोश्च सम्बन्धः कः?
उत्तरम्- समवायः।

132. प्रश्न- कति "हेत्वाभास:" के च ते?
उत्तरम्- पञ्च, -सव्यभिचार विरुद्ध सत्प्रतिपक्षासिद्धवाधिता:।
133. प्रश्न- औलूक्य-दर्शनस्य अपरं नाम किम्?
उत्तरम्-वैशेषिक-दर्शनम्।
134. प्रश्न- औलूक्य-दर्शनस्य वैशेषिक-दर्शनस्य वा प्रवर्तक: क:?
उत्तरम्-महर्षि: कणाद:।
135. प्रश्न- महर्षि: कणाद: कस्यावतारो मन्यते?
उत्तरम्- शिवस्य।
136. प्रश्न- "विशेषं" पदार्थ: क: दर्शनं मन्यते?
उत्तरम्- न्यायवैशेषिक।

(न) सांख्य-योग-दर्शनयो: वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- सांख्यदर्शने कति प्रमाणानि स्वीकृतानि?
उत्तरम्- (03) त्रीणि।
2. प्रश्न- सांख्यदर्शनं किमस्ति?
उत्तरम्- आस्तिकदर्शनम्।
3. प्रश्न- "सांख्य" शब्दस्य निष्पत्तिमूलकधातु: कोऽस्ति?
उत्तरम्- चक्षिङ्।
4. प्रश्न- "सांख्य" शब्दस्य दार्शनिकं अभिप्राय:अस्ति?
उत्तरम्- सम्यक् ख्यानम्।
5. प्रश्न- "संख्या चर्चा विचारणा" इति कस्य वचनमस्ति?
उत्तरम्- अमरकोशस्य।
6. प्रश्न- "सत्त्वरजस्तमसां साम्यावस्था प्रकृति:" अनया परिभाषया सम्बद्ध:ग्रन्थविशेष:क:?
उत्तरम्- सांख्यसूत्रम्।
7. प्रश्न- "राग-विरागयोर्योग: सृष्टि:" इत्यत्र "राग" पदस्य कोऽभिप्राय:?
उत्तरम्- त्रिगुणात्मिका प्रकृति:।
8. प्रश्न- आयुर्वेदशास्त्रस्य कस्मिन् ग्रन्थे सांख्यसिद्धान्त: समुपवर्णित:?
उत्तरम्- सुश्रुतसंहितायाम्।
9. प्रश्न- सांख्यदर्शनस्य प्रवर्तक: क:?
उत्तरम्- कपिलमुनि:।
10. प्रश्न- पौराणिकमतानुसारं कपिलमुनि: कस्य अवतार: आसीत्?
उत्तरम्- अग्ने:।
11. प्रश्न- कपिलमुने: माता का आसीत्?
उत्तरम्- देवहूति:।
12. प्रश्न- कपिलमुने: पिता क: आसीत्?
उत्तरम्- कर्दम: ऋषि:।

13. प्रश्न- श्रीमद्भागवत-महापुराणे कपिलः कस्यावतारः?
उत्तरम्- विष्णोः।
14. प्रश्न- "सांख्यकारिका" इति ग्रन्थस्य नामान्तरं किमस्ति?
उत्तरम्- सांख्यसप्ततिः।
15. प्रश्न- परिणामवादस्य कः पोषकः?
उत्तरम्- संख्याचार्यः कपिलः।
16. प्रश्न- सांख्यकारिकायां कति कारिकाः सन्ति?
उत्तरम्- (70) सप्ततिः।
17. प्रश्न- सांख्यकारिकायाः कारिकाणां छन्दःशास्त्रीयविधा का?
उत्तरम्- आर्या।
18. प्रश्न- सांख्यसम्मत-समस्ततत्त्वसंख्या कति?
उत्तरम्- (25) पञ्चविंशतिः।
19. प्रश्न- सांख्यकारिकायाः प्रथमकारिकायां कति दुःखानि निर्दिष्टानि?
उत्तरम्- (03) त्रीणि।
20. प्रश्न- "दृष्टावदानुश्रविकः" इत्यत्र "अनुश्रविकः" इति पदेन कः बोद्धव्यः?
उत्तरम्- वैदिकः।
21. प्रश्न- "व्यक्ताव्यक्तज्ञविज्ञानात्" इत्यत्र "ज्ञ" इति शब्देन कः उच्यते?
उत्तरम्- पुरुषः।
22. प्रश्न- सांख्यदर्शने किं नाम अव्यक्तम्?
उत्तरम्- प्रकृतिः।
23. प्रश्न- सांख्यदर्शने "अविकृतिः" का?
उत्तरम्- मूलप्रकृतिः।
24. प्रश्न- महान्, अहंकारः, पञ्चतन्मात्राणि च सन्ति?
उत्तरम्- प्रकृतिविकृति तत्त्वानि।
25. प्रश्न-एकादशेन्द्रियाणि पञ्चमहाभूतानि च सन्ति?
उत्तरम्- विकृतितत्त्वानि।
26. प्रश्न- सांख्यदर्शने "पुरुषः" अस्ति?
उत्तरम्-न प्रकृतिः न विकृतिः।
27. प्रश्न- प्रमेयसिद्धिः कस्माद् भवति?
उत्तरम्- प्रमाणात्।
28. प्रश्न- सांख्यदर्शने भ्रमस्वरूपं किमस्ति?
उत्तरम्- सदसत्ख्यातिः।
29. प्रश्न- "लक्षणम्" कीदृग् भवेत्?
उत्तरम्- समानासमानजातीयव्यवच्छेदात्मकम्।

30. प्रश्न- किं नाम दृष्टप्रमाणम्?
उत्तरम्- प्रतिविषयाध्यवसायः।
31. प्रश्न- अनुमानसामान्यस्य किं लक्षणम्?
उत्तरम्- लिङ्गमलिङ्गिपूर्वकम्।
32. प्रश्न- अनुमानस्य का परिभाषा?
उत्तरम्- व्याप्यव्यापकभावपक्षधर्मताज्ञानपूर्वकम्।
33. प्रश्न- अनुमानं कतिविधम्?
उत्तरम्- त्रिविधम्।
34. प्रश्न- अतीन्द्रियाणां प्रतीतिः कस्माद् भवति?
उत्तरम्- सामान्यतोदृष्टादनुमानात्।
35. प्रश्न- प्रकृतेः अनुपलब्धिः कस्मात् भवति?
उत्तरम्- सौक्ष्म्यात्।
36. प्रश्न- कस्याः महदादि कार्यम्?
उत्तरम्- प्रकृतेः।
37. प्रश्न- बुद्धेः प्रकृतिः का?
उत्तरम्- मूलप्रकृतिः।
38. प्रश्न- अहंकारः कस्मादुत्पद्यते?
उत्तरम्- महत्तत्वात्(बुद्धेः)।
39. प्रश्न-एकादशेन्द्रियाणि कस्माद् समुद्भूतानि सन्ति?
उत्तरम्- अहंकारात्।
40. प्रश्न- पंचमहाभूतानि कस्मात्सकाशात् जायन्ते?
उत्तरम्- पंचतन्मात्रसकाशात्।
41. प्रश्न- विकृतयः कानि सन्ति?
उत्तरम्- 16 षोडश।
42. प्रश्न- स्पर्शतन्मात्रा कम् उद्भावयति?
उत्तरम्- वायुम्।
43. प्रश्न- आकाशस्य प्रकृतिः का अस्ति?
उत्तरम्- शब्दतन्मात्रम्।
44. प्रश्न-रूपस्य विकृतिः का अस्ति?
उत्तरम्- अग्निः।
45. प्रश्न- पृथिव्याः प्रकृतिः का?
उत्तरम्- गन्धः।
46. प्रश्न- जलस्य प्रकृतिः का अस्ति?
उत्तरम्- रसतन्मात्रा।

47. प्रश्न- सत्कार्यवादसाधने कति कारणानि प्रस्तूयन्ते?
उत्तरम्- (05) पञ्च।
48. प्रश्न- "योग-दर्शनानुसारेण पादः कतिविधः?
उत्तरम्- चतुर्विधः।
49. प्रश्न- सत्कार्यं कस्मात् अस्ति?
उत्तरम्- सर्वसम्भवाभावात्।
50. प्रश्न- त्रिगुणात्मकं किमस्ति?
उत्तरम्- प्रकृतिः।
51. प्रश्न- प्रीत्यात्मकं किमस्ति?
उत्तरम्- सत्वम्।
52. प्रश्न- रजोगुणः कीदृशः अस्ति?
उत्तरम्- अप्रीतिकारकः।
53. प्रश्न- विषादात्मक- कः अस्ति?
उत्तरम्- तमः।
54. प्रश्न- अन्योन्याभिभवाश्रयजननमिथुनवृत्तयः के सन्ति?
उत्तरम्- गुणाः।
55. प्रश्न- कः लघु प्रकाशकश्चास्ति?
उत्तरम्- सत्वम्।
56. प्रश्न- कः उपष्टम्भकं चलञ्चास्ति?
उत्तरम्- रजः।
57. प्रश्न- तमोगुणस्य लक्षणं किमस्ति?
उत्तरम्- गुरु आवरणकमेव।
58. प्रश्न- कं कारणगुणात्मकं भवति?
उत्तरम्- कार्यम्।
59. प्रश्न- संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् भोक्तृभावाच्च कःसिद्धयति?
उत्तरम्- पुरुषोऽस्ति।
60. प्रश्न- जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च सिद्धयति?
उत्तरम्- पुरुषबहुत्वम्।
61. प्रश्न- कैवल्यं माध्यस्थ्यं द्रष्टृत्वं साक्षित्वं च कस्य सिद्धम्?
उत्तरम्- पुरुषस्य।
62. प्रश्न- कस्याः संयोगाद् कर्तेव भवत्युदासीनः?
उत्तरम्- प्रकृतेः।
63. प्रश्न- सांख्यमते करणं कतिविधम्?
उत्तरम्- (13) त्रयोदश।

64. प्रश्न- अन्तःकरणं कतिविधं भवति?
उत्तरम्- त्रिविधम्।
65. प्रश्न- बाह्यकरणं कतिविधं भवति?
उत्तरम्- (10) दश
66. प्रश्न- पुरुषस्य अर्थं के प्रकाशयन्ति?
उत्तरम्- करणानि।
67. प्रश्न- ऊर्ध्वगमनं केन सिद्ध्यति?
उत्तरम्- धर्मेण।
68. प्रश्न- अधोगमनं केन सिद्ध्यति?
उत्तरम्- अधर्मेण।
69. प्रश्न- अपवर्गः केन सिद्ध्यति?
उत्तरम्- ज्ञानेन।
70. प्रश्न- बन्धः कस्माद् भवति?
उत्तरम्- विपर्ययाद्।
71. प्रश्न- का संसरति बध्यते मुच्यते च सांख्यमते?
उत्तरम्- प्रकृतिः।
72. प्रश्न-रूपैः सप्तभिरेव आत्मानम् आत्मना बध्नाति?
उत्तरम्- प्रकृतिः।
73. प्रश्न- बुद्धेः कति भेदाः सन्ति के च ते?
उत्तरम्- (08) अष्ट। (धर्म, अधर्म, ज्ञान, अज्ञान, वैराग्य, अवैराग्य, ऐश्वर्य, अनैश्वर्य,)
74. प्रश्न- न बध्यते न मुच्यते न संसरति कः?
उत्तरम्- पुरुषः।
75. प्रश्न- स्वच्छः प्रेक्षकवदवस्थितः प्रकृतिं कः पश्यति?
उत्तरम्- पुरुषः
76. प्रश्न- प्राप्ते शरीरभेदे ऐकान्तिकमायन्तिकमुभयं कैवल्यं कः आप्नोति?
उत्तरम्- पुरुषः।
77. प्रश्न- कपिलमुनेः शिष्यः कः आसीत्?
उत्तरम्- आसुरिः।
78. प्रश्न- आसुरेः शिष्यः कः आसीत्?
उत्तरम्- पञ्चशिखः।
79. प्रश्न- माठरवृत्ति-टीकायाः आधारग्रन्थः कः?
उत्तरम्- सांख्यकारिका।
80. प्रश्न- पुरुषः कः अस्ति?
उत्तरम्- द्रष्टा।

81. प्रश्न- अज्ञानस्य अन्तर्भावः कस्मिन् भवति?
उत्तरम्- विपर्यये।
82. प्रश्न- सिद्धौ कस्यान्तर्भावः स्वीक्रियते?
उत्तरम्- ज्ञानस्य।
83. प्रश्न- "तुष्टि" संज्ञके प्रत्ययसर्गे कः अन्तर्भूयते?
उत्तरम्- धर्मः।
84. प्रश्न- अशक्तौ कस्यान्तर्भावः विद्यते?
उत्तरम्- अधर्मस्य।
85. प्रश्न- चेतनः कोऽस्ति?
उत्तरम्- पुरुषः।
86. प्रश्न-योगस्य कियन्त्यङ्गानि बाह्यसाधनानि?
उत्तरम्- (5) पञ्च।
87. प्रश्न- योगशास्त्रे कति पक्षाः सन्ति?
उत्तरम्- चत्वारः।
88. प्रश्न- रामानुजाचार्यस्य भाष्यं किमस्ति?
उत्तरम्- श्रीभाष्यम्।
89. प्रश्न- शुद्धाद्वैतवादी कः?
उत्तरम्- वल्लभाचार्यः।
90. प्रश्न- वल्लभाचार्यस्य भाष्यं किमस्ति?
उत्तरम्- अणुभाष्यम्।
91. प्रश्न- शंकराचार्यस्य दीक्षागुरुः कः?
उत्तरम्- गोविन्दभगत्पादः।
92. प्रश्न- गोविन्दभगवत्पादस्य गुरुः आसीत्?
उत्तरम्- गौडपादः।
93. प्रश्न- सांख्यसम्मतं सूक्ष्मशरीरं कति अवयवात्मकं भवति?
उत्तरम्- (18) अष्टादशावयवात्मकम्।
94. प्रश्न- पुरुषस्य स्वरूपं किम्?
उत्तरम्- अपरिणामि।
95. प्रश्न- पञ्चतन्मात्राणि कुतः प्रादुर्भवन्ति?
उत्तरम्- अहङ्कारात्।
96. प्रश्न- कैवल्यं कस्माद् भवति?
उत्तरम्- विवेकख्यातेः।
97. प्रश्न- सांख्यनये प्रकृतिविकृतयः कति?
उत्तरम्- सप्त।

98. प्रश्न- सांख्यमते विकृतयः कति?
उत्तरम्- षोडश।
99. प्रश्न- सांख्यनये अन्तःकरणं कति विधम्?
उत्तरम्- त्रिविधम्।
100. प्रश्न- आसनं-प्रणायामश्च केन आविष्कृतौ?
उत्तरम्- पतंजलिना।
101. प्रश्न- गातञ्जले योगसूत्रस्य भाष्यकारः कः?
उत्तरम्- व्यासः।
102. प्रश्न- चित्त-वृत्ति-निरोध रूपं योगस्य कति अङ्गानि?
उत्तरम्- 8 अष्टाङ्गानि।
103. प्रश्न- सांख्यदर्शने कति तत्वानि सन्ति?
उत्तरम्- (26) षड्विंशतिः।
104. प्रश्न- पतञ्जलिः कस्य दर्शनस्य प्रणेता वर्तते?
उत्तरम्- योगदर्शनस्य।
105. प्रश्न- सत्कार्यस्य सिद्धान्तः कस्य दर्शनस्य?
उत्तरम्- साख्यदर्शनस्य।
106. प्रश्न- "साख्यकारिका" पुस्तकमिदं केन दर्शनेन सम्बद्धम्?
उत्तरम्- संख्यदर्शनेन।
107. प्रश्न- "अथ योगानुशासनम्" कस्य प्रतिज्ञावाक्यम्?
उत्तरम्- योगदर्शनस्य।
108. प्रश्न- शारदातिलकाऽनुसारेण कतिविधः संस्कारः?
उत्तरम्-(10) दशविधः।
109. प्रश्न- सांख्यदर्शनानुसारं कस्योत्पत्तिः प्रकृत्या भवति?
उत्तरम्- महत्तत्वस्य।
110. प्रश्न- सांख्यदर्शनानुसारं महत्तत्वेन कस्योत्पत्तिर्भवति?
उत्तरम्- अहंकारस्य।
111. प्रश्न- सांख्यदर्शनानुसारं कति तन्मात्राः सन्ति?
उत्तरम्- 5 पञ्च।
112. प्रश्न- सांख्यदर्शनानुसारं तन्मात्रायाः उत्पत्तेः कारणं किम्?
उत्तरम्- अहंकारः।
113. प्रश्न- सांख्य शब्दस्य कोऽर्थः?
उत्तरम्- संख्या-सम्यक् विचारः ज्ञानम्।
114. प्रश्न- सांख्यदर्शनस्य उपनिषदः कः?
उत्तरम्- श्वेताश्वतरोपनिषद्।

115. प्रश्न- कानि त्रिविध दु:खानि?
उत्तरम्- 1. आध्यात्मिक:, 2. आधिभौतिक:, 3. आधिदैविक:।
116. प्रश्न- कानि त्रिगुणानि-वर्णानि च?
उत्तरम्- 1. सत्वस्य श्वेत:, 2. रजस:-रक्त:, 3. तमस:-कृष्ण:।
117. प्रश्न- सुखस्य कारण-गुण: क:?
उत्तरम्- सत्वगुण:।
118. प्रश्न- दु:खस्य कारण-गुण: क:?
उत्तरम्- रजोगुण:।
119. प्रश्न- मोहस्य कारण-गुण: क:?
उत्तरम्- तमोगुण:।
120. प्रश्न- तत्वमीमांसाया: अवधारणा का?
उत्तरम्- यथार्थवाद:(त्मंसपेपउ)
121. प्रश्न- कानि तत्वानि व्यवहृतानि कानि च तानि?
उत्तरम्- प्रकृति:, बुद्धि:, अहंकार:, मन:, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि, पुरुष:।
122. प्रश्न- कानि पञ्चज्ञानेन्द्रियाणि?
उत्तरम्- 1. चक्षु:, 2. रसना, 3. घ्राणम्, 4. श्रोत्र:, 5. त्वक्।
123. प्रश्न- कानि पञ्चकर्मेन्द्रियाणि?
उत्तरम्- 1. वाक्, 2. पाणि:, 3. पाद:, 4. पायु, 5. उपस्थ:।
124. प्रश्न- कानि पञ्चतन्मात्राणि?
उत्तरम्- 1. रूप, 2. रस, 3. गन्ध, 4. स्पर्श, 5. शब्द।
125. प्रश्न- कानि पञ्चमहाभूतानि?
उत्तरम्- 1. पृथ्वी, 2. जलम्, 3. तेज:, 4. वायु:, 5. आकाश।
126. प्रश्न- सांख्ययोगदर्शने के पञ्चप्राणा:?
उत्तरम्- 1. प्राण:, 2. अपान:, 3. उदान:, 4. व्यान:, 5. समान:।
127. प्रश्न-योगसूत्राणां रचयिता कोऽस्ति?
उत्तरम्- पतञ्जलि:
128. प्रश्न- पातञ्जलयोगशास्त्रस्य कति अङ्गानि सन्ति?
उत्तरम्- 8 अष्ट,
129. प्रश्न- विपर्ययस्य के पञ्चभेदा:?
उत्तरम्- 1. तम, 2. मोह, 3. महामोह, 4. तामिस्त्र, 5. अन्धतामिस्त्र।
130. प्रश्न- "प्रकृति:" इत्यस्य कानि सप्तभावानि?
उत्तरम्-1. धर्म:, 2. अधर्म:, 3. वैराग्य:, 4. अवैराग्य:, 5. ऐश्वर्य:, 6. अनैश्वर्य:, 7. अज्ञानम्।

131. प्रश्न-योगदर्शनस्य आदिवक्ता कः?
उत्तरम्- हिरण्यगर्भः।
132. प्रश्न-योगसूत्रस्य कानि चतुष्पादानि?
उत्तरम्- 1. समाधिः, 2. साधना, 3. विभूतिः, 4. कैवल्यम्।
133. प्रश्न-योगस्य कोऽर्थः?
उत्तरम्- चित्तवृत्तिःनिरोधः।
134. प्रश्न- चित्तस्य कानि त्रिप्रकारकानि?
उत्तरम्- 1. प्रख्याशीलः, 2. प्रवृतिशीलः, 3. स्थितिशीलः।
135. प्रश्न- चित्तस्य काः पञ्चभूमिका?
उत्तरम्- 1. क्षिप्तः, 2मूढ़ः, 3. विक्षिप्तः, 4. एकाग्रः, 5. निरूद्धः।
136. प्रश्न- "चित्तवृति" इत्यस्य के पञ्चभेदाः?
उत्तरम्- 1. प्रमाणं, 2. विकल्पः, 3. विपर्ययः, 4. निद्रा, 5. स्मृतिः।
137. प्रश्न- के पञ्चक्लेशाः?
उत्तरम्- 1. अविद्या, 2. अस्मिता, 3. रागः, 4. द्वेषः, 5. अभिनिवेशः।
138. प्रश्न- कानि त्रीणि क्रियायोगानि?
उत्तरम्- 1. तपः, 2. स्वाध्यायः, 3. ईश्वरप्रणिधानः।
139. प्रश्न- कानि अष्टांग-योगानि?
उत्तरम्-1. यम, 2. नियम, 3. आसन, 4. प्राणयाम, 5. प्रत्याहारः, 6. धारणा, 7. ध्यान, 8. समाधिः।
140. प्रश्न- के पञ्च यमाः?
उत्तरम्- 1. अहिंसा, 2. सत्य, 3. अस्तेय, 4. ब्रह्मचर्यः, 5. अपरिग्रह।
141. प्रश्न- के पञ्चनियमाः?
उत्तरम्- 1. शौचः, 2. सन्तोषः, 3. तपः, 4. स्वाध्यायः, 5. ईश्वर-प्रणिधानम्।
142. प्रश्न- प्राणयामस्य के चत्वारो भेदाः?
उत्तरम्- 1. बाह्यवृत्तिरेचकः, 2. आभ्यन्तरवृत्तिपूरकः, 3. सतम्भवृत्तिकुम्भकः, 4. बाह्याीयन्तरविषयापेक्षीकुम्भकः।
143. प्रश्न-योगदर्शने के अष्टसिद्धयः?
उत्तरम्-1. अणिमा, 2. लघिमा, 3. महिमा, 4. प्राप्तिः, 5प्राकाम्य, 6. वशित्वम्, 7. ईशित्वम्, 8. यथाकामावासादित्वम्।
144. प्रश्न-योगिनां के चत्वारो भेदाः?
उत्तरम्-1. प्रथम कल्पिकः, 2. मधुभूमिकः, 3. प्रज्ञाज्योतिः, 4. अतिक्रान्त भावनीयः।
145. प्रश्न- कर्मणः काः चतुष्श्रेण्यः?
उत्तरम्-1. कृष्णकर्म, 2. शुकलकर्म, 3. शुक्ल-कृष्णमिश्रितकर्म, 4. अशुक्ल-अकृष्णकर्म।
146. प्रश्न- कानि त्रीणि-बन्धनानि?
उत्तरम्- 1. प्राकृतिकबन्धनम्, 2. दक्षिणबन्धनम्, 3. वैकारिकबन्धनम्।

147. प्रश्न- पङ्ग्वन्धन्याय: किमस्ति?
उत्तरम्- प्रकृतपुरुषसंयोग:।
148. प्रश्न-एकादशेन्द्रियाणि पंचतन्मात्राणि च कस्माद् प्रादुर्भवन्ति?
उत्तरम्- अहंकारात्।
149. प्रश्न- सात्विक-अहंकाराद् कानि प्रवर्तन्ते?
उत्तरम्- एकादशेद्रियाणि।
150. प्रश्न- वत्सविवृद्धिनिमित्तं क्षीरस्य इव पुरुषविमोक्षनिमित्तं कस्य प्रवृत्ति:भवति?
उत्तरम्- प्रधानस्य।
151. प्रश्न- आत्मानं प्रकाश्य नर्तकी इव का निवर्तते?
उत्तरम्- प्रकृति:।
152. प्रश्न- सांख्यकारिकाया: उपजीव्यग्रन्थ: क:?
उत्तरम्- षष्टितन्त्रम्।
153. प्रश्न- साङ्ख्यदर्शनस्य मूलभूत-ग्रन्थ: क:?
उत्तरम्- कपिलविरचित तत्त्वसमास:।
154. प्रश्न- तत्त्वसमासस्य विवेचनं कस्मिन् कृत्यां विशदरूपेण क्रीयते?
उत्तरम्- सांख्यप्रवचने।
155. प्रश्न- सांख्यदर्शन: कति मूलतत्त्वानि स्वीकुर्वन्ति?
उत्तरम्- द्वौ, प्रकृतपुरुषश्च।
156. प्रश्न- सांख्यस्य शाब्दिक-तात्पर्यं किमस्ति?
उत्तरम्- सम्यक् ख्यापनं(ख्याति:) यस्मिन् तत् सांख्यम्।
157. प्रश्न- सांख्यदर्शने कानि पञ्चविंशति: तत्त्वानि प्रतिपादितानि सन्ति?
उत्तरम्-1. प्रकृति, 2. महत्, 3. अहङ्कार, 4. शब्दतन्मात्र, 5. स्पर्शतन्मात्र, 6. रूपतन्मात्र, 7. रसतन्मात्र, 8. गन्धतन्मात्र, 9. श्रोत्र, 10. त्वक्, 11. चक्षु, 12. जिह्वा, 13. नासिका, 14. वाक्, 15. पाणि, 16. पाद, 17. पायु, 18. उपस्थ, 19. मन, 20. पृथ्वी, 21. जल, 22. तेज, 23. वायु, 24. आकाश, 25. पुरुष।
158. प्रश्न- सांख्यस्य प्रमुखा: आचार्या: के सन्ति?
उत्तरम्-1. पञ्चशिख:, 2. आसुरि, 3. विन्ध्यवास:, 4. ईश्वरकृष्ण, 5. विज्ञानभिक्षु, 6. वार्षगण्य:, 7. वाचस्पतिमिश्र:।
159. 22. प्रश्न- "अहङ्कार" इत्यस्मात् क: उत्पन्नो भवति?
उत्तरम्- षोडषक-गुणा:।
160. प्रश्न- पतञ्जले: मतानुसारं योगस्यार्थ: किमस्ति?
उत्तरम्- योगश्चित्त वृत्तिनिरोध:।
161. प्रश्न-योगे समस्त प्रमाणानां का संख्या?
उत्तरम्- 3 तिस्र:।

162. प्रश्न- अनुपलब्धं प्रमाणं कः स्वीकरोति?
उत्तरम्- मीमांसा।
163. प्रश्न- सांख्य-मते तत्त्वानां का संख्या?
उत्तरम्- 25 पञ्चविंशतिः।
164. प्रश्न- सांख्यमते प्रकृत-स्वरूपं किमस्ति?
उत्तरम्- जड़।
165. प्रश्न- गुणत्रय प्रतिपादनस्य कारिका का?
उत्तरम्- सांख्यः।
166. प्रश्न- माध्वाचार्यस्य बाल-नाम किमस्ति?
उत्तरम्- वासुदेवः।
167. प्रश्न- माध्वाचार्यस्यानुसारं जीवे कोऽस्ति?
उत्तरम्- ब्राह्मभेदः।
168. प्रश्न- शुद्धाद्वैतवादस्य प्रवर्तकः कः आसीत्?
उत्तरम्- वल्लभाचार्यः।
169. प्रश्न- माध्वाचार्यं सामान्यतः कस्य देवस्य अवतारः मन्यते?
उत्तरम्- वायु देवस्य।
170. प्रश्न- मध्वाचार्यस्य मते कति प्रमाणानि सन्ति?
उत्तरम्- 3 त्रीणि।
171. प्रश्न- सत्वगुणस्य स्वरूपं किमस्ति?
उत्तरम्- लघुः, प्रकाशकः।
172. प्रश्न- अनुमानं किमस्ति?
उत्तरम्- प्रमाणम्।
173. प्रश्न- स्पर्श-तन्मात्रं केन सम्बन्धितः अस्ति?
उत्तरम्- वायुः।
174. प्रश्न-"नासतो विधते भावो नाभावो विधते सतः" गीतायाः अयं सिद्धान्तः केनदर्शनेन सम्बद्धः?
उत्तरम्- संख्य-दर्शनेन।
175. प्रश्न-योगाङ्गाणां संख्या कति सन्ति?
उत्तरम्- 8 अष्ट।
176. प्रश्न- सांख्य प्रवचन भाष्यस्य प्रवर्त्तकः कः?
उत्तरम्- ईश्वरकृष्णः।
177. प्रश्न- सांख्य सम्मत गुणानां का संख्या?
उत्तरम्- 3 तिस्रः।
178. प्रश्न- पौराणिक-सांख्य-मते कति तत्त्वानि सन्ति?
उत्तरम्- 25 पञ्चविंशतिः।

179. प्रश्न- मोक्षः किमस्ति?
उत्तरम्- दुःख व दुःखकारणस्य विमुक्तिः एव मोक्षः।
180. प्रश्न- हीनयानस्य द्वौ दार्शनिक-सम्प्रदायौ कौ?
उत्तरम्-1. वैभाषिक(वाह्यार्थ प्रत्यक्षवादः) 2. सौत्रान्तिक(वाह्यार्थानुमेयवादः)
181. प्रश्न- "आकाशं" कस्याः तन्मात्रायाः विकृतिः ?
उत्तरम्- शब्दतन्मात्रायाः।
182. प्रश्न- "रसतन्मात्रा" कस्य प्रकृतिः?
उत्तरम्- जलस्य।
183. प्रश्न- "रूप" तन्मात्रात् उत्पन्न-पदार्थः कः?
उत्तरम्- तेजः।
184. प्रश्न- "पृथिवी" इति कस्याः विकृतिः वर्तते?
उत्तरम्- गन्धतन्मात्रायाः।
185. प्रश्न- स्पर्श-तन्मात्रा कं महाभूतं जनयति?
उत्तरम्- वायुम्।
186. प्रश्न- "सत्कार्यवाद" इत्यस्य कारणं किम्?
उत्तरम्- सर्वसम्भवाभावम्।
187. प्रश्न- "कैवल्यं" कः प्राप्नोति?
उत्तरम्- पुरुषः।
188. प्रश्न- ."सत्कार्यवाद" इत्यस्य समर्थने कति उल्लिखित-कारणानि?
उत्तरम्- (5) पञ्च।
189. प्रश्न- "अधर्म" इत्यस्य अन्तर्भावः केषु क्रियते?
उत्तरम्- अशक्तौ।
190. प्रश्न- "उपादान-ग्रहणस्य कारणं किम्?
उत्तरम्- सत्कार्यवादः।
191. प्रश्न- "पुरुषस्य लक्षणं किम्?
उत्तरम्- विवेकी-भवनम्।
192. प्रश्न- प्रकृतेः किं लक्षणम्?
उत्तरम्- त्रिगुणात्मिका।
193. प्रश्न- "न प्रकृतिर्न विकृतिः" को भवति?
उत्तरम्- पुरुषः।
194. प्रश्न- "अविकृतिः" कोऽस्ति?
उत्तरम्- प्रधाना।
195. प्रश्न- "भोक्तृभावः" कस्या सत्तायाः परिचायकः?
उत्तरम्- पुरुषस्य।

196. प्रश्न- "साक्षी" कः भवति?
उत्तरम्- चेतनः।
197. प्रश्न- महान् कस्य प्रकृतिः?
उत्तरम्- अहङ्कारस्य।
198. प्रश्न- "पञ्चमहाभूतानि" कैः उत्पन्नो भवति?
उत्तरम्- पञ्चतन्मात्रैः।
199. प्रश्न- "अतत्वतोन्यथा" इत्यस्याः प्रज्ञा का वर्तते?
उत्तरम्- विवर्तः।
200. प्रश्न- "असत्य" इत्यस्य "सत्यं" किं भवति?
उत्तरम्- विवर्तः।
201. प्रश्न- जीवन्मुक्तेन सम्बद्धः कः?
उत्तरम्- सचक्षुचक्षुरिव सकर्णोऽकर्ण इव।
202. प्रश्न- "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" केन सम्बद्धोऽयम्?
उत्तरम्- जीवन्मुक्तेन।
203. प्रश्न- "अखिलबन्धरहितो ब्रह्मनिष्ठः" कोऽस्ति?
उत्तरम्- जीवन्मुक्तः।
204. प्रश्न- "सुषुप्तवज्जाग्रतिः कस्य?
उत्तरम्- जीवन्मुक्तस्य।
205. प्रश्न- "अधिकारिविषय-सम्बन्धप्रयोजनानि" केन सम्बद्धोऽस्ति?
उत्तरम्- अनुबन्धेन।
205. प्रश्न- "सन्ध्यावन्दन" इत्यादि कीदृशं कर्म?
उत्तरम्- नित्य- कर्म।

(प) मीमांसादर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- अद्वैतसम्प्रदायप्रतिष्ठापकाः आचार्यः कः?
उत्तरम्- शङ्कराचार्यः।
2. प्रश्न- विधिविवेकग्रन्थः कस्य दर्शनस्य वर्तते?
उत्तरम्- मीमांसादर्शनस्य।
3. प्रश्न- न्यायशास्त्रे साहचर्यनियम-शब्देन किमुच्यते?
उत्तरम्- व्याप्तिः।
4. प्रश्न- इन्द्रियार्थसन्निकर्षः कतिविधः?
उत्तरम्- षड्विधः।
5. प्रश्न- अनुमितिः कस्माद् अनन्तरं जायते?
उत्तरम्- परामर्शात्।
6. प्रश्न- कारणं कतिविधम्?
उत्तरम्- त्रिविधम्।

7. प्रश्न- सादृश्यज्ञानकरणं ज्ञानं किम्?
   उत्तरम्- उपमितिः।
8. प्रश्न- अखिलशरीरवर्ती वायुः विद्यते?
   उत्तरम्- व्यानः।
9. प्रश्न- शब्दस्पशौ कम् अभिव्यञ्जयतः?
   उत्तरम्- पञ्चीकृतपृथिवीम्।
10. प्रश्न- कारणं तदुच्यते यत् कार्यात्-?
    उत्तरम्- नियतपूर्ववर्ति।
11. प्रश्न- "यत्र धूमस्तत्राग्निः" इति साहचर्यनियमः कः?
    उत्तरम्- व्याप्तिः।
12. प्रश्न- संज्ञासंज्ञिसम्बन्धज्ञानस्य कारणं किम्?
    उत्तरम्- उपमानप्रमाणम्।
13. प्रश्न- "अग्निना सिञ्चति" इति वाक्यं कथं न संगच्छते?
    उत्तरम्- योग्यताविरहात्।
14. प्रश्न- अनुबन्धः कति विधः?
    उत्तरम्- चतुर्विधः।
15. प्रश्न- अध्यारोपस्य किं लक्षणम्?
    उत्तरम्- वस्तुनि अवस्त्वारोपः।
16. प्रश्न- मीमांसा सम्प्रदायानुसारं मोक्षः केन प्राप्यते?
    उत्तरम्- कर्मणा।
17. प्रश्न- भारतीयदर्शनसम्प्रदायेषु "कर्म-सन्यासः" इत्यस्य पक्षधरः कः अस्ति?
    उत्तरम्- पूर्व मीमांसकः।
18. प्रश्न- प्रभाकरः किं स्वीकरोति?
    उत्तरम्- अख्यातिम्।
19. प्रश्न-यज्ञस्य कः समर्थनं करोति?
    उत्तरम्- पूर्व मीमांसा।
20. प्रश्न- विपरीत ख्यातिवादस्य समर्थकः कः?
    उत्तरम्- मीमांसा।
21. प्रश्न- कर्ममीमांसायाःमतं कस्य वर्तते?
    उत्तरम्- पूर्वमीमांसायाः।
22. प्रश्न- मीमांसासूत्रस्य लेखकः कः?
    उत्तरम्- महर्षि जैमिनिः।
23. प्रश्न- शवर भाष्यस्य रचनाकारः कः?
    उत्तरम्- शवर स्वामी।

24. प्रश्न- कुमारिल भट्टस्य कानि रचनाकार्यानि?
उत्तरम्- 1. श्लोकवार्तिकम्, 2. तन्त्रवार्तिकम्, 3. वृह् टीका, 4. मध्य टीका।
25. प्रश्न- "अथातो धर्मजिज्ञासा" सूत्रमिदं केन दर्शनेन सम्बद्धम्?
उत्तरम्- जैमिनिदर्शनेन।
26. प्रश्न- मीमांसादर्शनानुसारेण शब्दो नित्योऽनित्यो वा?
उत्तरम्- शब्दो नित्यः।
27. प्रश्न- पार्थ सारथि मिश्रस्य कानि रचना कार्यानि?
उत्तरम्- 1. न्याय रत्न माला, 2. शास्त्र दीपिका।
28. प्रश्न- मीमांसादर्शनस्य को विषयः?
उत्तरम्- धर्मः।
29. प्रश्न- मीमांसायाः कति सम्प्रदायः के च ते?
उत्तरम्- द्वौ, 1. भाट्ट सम्प्रदायः"तौततक मतं, (कुमारिलभट्ट)" 2. मिश्र सम्प्रदाय" गुरूमत" (प्रभाकरमिश्र)
30. प्रश्न- पूर्वमीमांसायाः प्रवर्तकः कः?
उत्तरम्- महर्षि जैमिनिः।
31. प्रश्न- मीमांसादर्शने कति अध्यायाः?
उत्तरम्- 12 द्वादश।
32. प्रश्न- अपौरूषेय वाक्यस्य के पञ्चभेदाः?
उत्तरम्- 1. विधिः, 2. मन्त्रम्, 3. नामधेयः, 4. निषेधः, 5. अर्थवादः।
33. प्रश्न- वृत्ति इत्यस्य कानि त्रिप्रकाराणि?
उत्तरम्- 1. अभिधा, 2. लक्षणा, 3. गौणी।
34. प्रश्न- अर्थापत्ति इत्यस्य कौ द्वौ भेदौ?
उत्तरम्- 1. दृष्टार्थापत्तिः, 2. श्रुतार्थापत्तिः।
35. प्रश्न- शरीरस्य चत्वारि प्रकाराणि कानि?
उत्तरम्- 1. जरायुजः, 2. अण्डजः, 3. स्वेदजः, 4. उद्भिज।
36. प्रश्न- कुमारिल भट्टस्य एकादश द्रव्याणि कानि?
उत्तरम्- 1. पृथ्वी, 2. जल, 3. अग्नि, 4. वायु, 5. आकाश, 6. दिक्, 7. काल, 8. आत्मा, 9. मन, 10. शब्द, 11. अन्धकारः।
37. प्रश्न- कुमारिल भट्टस्य के पञ्चपदार्थाः?
उत्तरम्- 1. द्रव्य, 2. गुण, 3. कर्म, 4. सामान्य, 5. अभावः।
38. प्रश्न- कुमारिल भट्टस्य सन्निकर्षविषये कौ द्वौ भेदौ?
उत्तरम्- 1. संयोगः, 2. संयुक्त तादात्म्य।
39. प्रश्न- प्रभाकरस्य सन्निकर्षविषये के त्रयो भेदाः?
उत्तरम्- 1. संयोगः, 2. समवायः, 3. संयुक्त-समवायः।

40. प्रश्न- "सर्वाणि ज्ञानानि यथार्थानि" इति कस्य मतम्?
उत्तरम्- प्रभाकरस्य।
41. प्रश्न- "साक्षात् प्रतीतिः प्रत्यक्षम्" इति कस्य कथनम्?
उत्तरम्- प्रभाकरस्य।
42. प्रश्न- अवयवानां कति संख्या?
उत्तरम्- त्रीणि, 1. प्रतिज्ञा, 2. हेतुः, 3. निगमनम्।
43. प्रश्न- शब्दस्य कौ द्वौ भेदौ?
उत्तरम्- 1. पौरूषेयोलौकिकः", 2. अपौरूषेयोवैदिक"।
44. प्रश्न- प्रभाकरमतानुसारं के अष्टपदार्थाः?
उत्तरम्-1. द्रव्य, 2. गुण, 3. कर्म, 4. सामान्य, 5. समवाय, 6. संख्या, 7. शक्तिः, 8. सादृश्य।
45. प्रश्न- प्रभाकरमतानुसारं कानि नवद्रव्यानि?
उत्तरम्-1. पृथ्वी, 2. जल, 3. अग्नि, 4. वायु, 5. आकाश, 6. दिक्, 7. काल, 8. आत्मा, 9. मन,
46. प्रश्न- प्रभाकरमतानुसारं एकविंशति गुणाः के?
उत्तरम्-1. रूप, 2. रस, 3. गन्ध, 4. स्पर्श, 5. संख्या, 6. परिमाण, 7. संयोग, 8. विभाग, 9. परत्व, 10. अपरत्व, 11. गुरूत्व, 12. द्रव्यत्व, 13. स्नेह, 14. बुद्धिः, 15. सुख, 16. दुःख, 17. इच्छा, 18. द्वेष, 19. प्राकट्य, 20. ध्वनिः, 21. संस्कारः।
47. प्रश्न- विशिष्टाद्वैतस्य उपज्ञाता आचार्यः कः?
उत्तरम्- रामानुजाचार्यः।
48. प्रश्न- जैमिनीयमीमांसासूत्रे कति अध्यायाः कति सूत्राणि च सन्ति?
उत्तरम्- 12अध्यायाः, 2, 644 सूत्राणि।
49. प्रश्न- जैमिन्यानुसारं पूर्वमीमांसायाः आचार्याः के सन्ति?
उत्तरम्- 1. शवरस्वामी, 2. कुमारिलभट्ट, 3. प्रभाकरः।
50. प्रश्न- पूर्वमीमांसायां प्रधानस्थानं कस्य अस्ति?
उत्तरम्- कर्मस्य।
51. प्रश्न- कर्मस्य कति प्रकारकानि भवन्ति?
उत्तरम्- त्रीणि, 1. नित्यनैमित्तिकः, 2. निषिद्धः, 3. काम्यकर्मम्।
52. प्रश्न- ब्रह्मसूत्रं कैः नामभिः ज्ञायते?
उत्तरम्-1. वेदान्तसूत्रम्, 2. शारीरिकसूत्रम्, 3. वादरायणसूत्रम्, 4. उत्तरमीमांसासूत्रम्।
53. प्रश्न- ब्रह्मसूत्रोपरि आचार्य शङ्करः किं भाष्यं अलिखत्?
उत्तरम्- शाङ्करभाष्यम्।
54. प्रश्न- शङ्करः सत्यस्य का परिभाषा प्रदत्तः?
उत्तरम्- "यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्।"

55. प्रश्न- "वेदस्याऽपौरुषेयत्वम्" केन दर्शनेन सिध्यति?
उत्तरम्- मीमांसादर्शनेन।
56. प्रश्न- अभिहितान्वयवादी कः?
उत्तरम्- प्रसिद्ध-मीमांसकः कुमारिलभट्ट।
57. प्रश्न- अन्विताभिधानवादी कः उच्यते?
उत्तरम्- गुरुः प्रभाकरः।
58. प्रश्न- मीमांसादर्शन कस्य अस्ति?
उत्तरम्- जैमिनि।
59. प्रश्न- मीमांसा-दर्शने के सन्ति नव विशेषगुणाः?
उत्तरम्-1. सुखम्, 2. दुःखम्, 3. इच्छा, 4. प्रयत्नः, 5. द्वेषः, 6. धर्मः, 7. अधर्मः, 8. संस्कारः, 9. बुद्धिः।
60. प्रश्न- "मीमांसा" दर्शनस्य कानि उद्देश्यानि सन्ति?
उत्तरम्- धार्मिक-कर्मस्य प्रवृत्तिः।

(फ) वेदान्तदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

वेदान्तदर्शनम्-उपनिषद् (UPANISAD)

1. प्रश्न- वेदान्तदर्शनस्य कः प्रवर्त्तकः?
उत्तरम्- आदिगुरुः शंकराचार्यः।
2. प्रश्न- द्वैतसम्प्रदायप्रतिपादकः कः?
उत्तरम्- मध्वाचार्यः।
3. प्रश्न- "अर्थसंग्रहः" कस्मिन् शास्त्रे प्रसिद्धः ग्रन्थः?
उत्तरम्- मीमासाशास्त्रे।
4. प्रश्न- शङ्कराचार्योऽद्वैतवादी द्वैतवादी वा?
उत्तरम्- अद्वैतवादी।
5. प्रश्न- "जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम्-" इति कुत्र उल्लिखितमस्ति?
उत्तरम्- वेदान्तसारे।
6. प्रश्न- अनुबन्धं कं कथ्यते?
उत्तरम्- अधिकारिविषयसम्बन्धप्रयोजनम्।
7. प्रश्न- प्रश्न- "पञ्चीकरणम्" -केन दर्शनेन सम्बद्धम्?
उत्तरम्- वेदान्तदर्शनेन।
8. प्रश्न- "आनुश्रविकः" कं कथ्यते ?
उत्तरम्- वैदिकोपायम्।
9. प्रश्न- "हृदयामृतम्" इत्ययं ग्रन्थः केन शास्त्रेण सह सम्बन्धं स्थापयति?
उत्तरम्- तन्त्रशास्त्रेण।
10. प्रश्न- ब्रह्मसिद्धान्त कुत्र?
उत्तरम्- त्रयीविद्यायाम्।

11. प्रश्न- चतुष्पादस्यात्मनः विवेचनं कुत्र उपलभ्यते?
उत्तरम्- माण्डूक्योपनिषदि।
12. प्रश्न- "अयमात्मा ब्रह्म" इति महावाक्यसम्बद्धा-उपनिषद् वर्तते?
उत्तरम्- माण्डूक्योपनिषद्।
13. प्रश्न- "सत्यमेव जयते" इति महावाक्यं कुत्र उल्लिखितमस्ति?
उत्तरम्- मुण्डकोपनिषदि।
14. प्रश्न- "कार ब्रह्म-विवेचकः उपनिषद्ग्रन्थः कः?
उत्तरम्- मुण्डकोपनिषद्।
15. प्रश्न- "ब्रह्मवेद ब्रह्मैव भवति" इति महावाक्यं कुतः उद्धृतमस्ति?
उत्तरम्- मुण्डकोपनिषदः।
16. प्रश्न- "द्वा सुपर्णा सयुजा" इति मन्त्रः कुत्र मिलति?
उत्तरम्- मुण्डकोपनिषदि।
17. प्रश्न- प्रश्नोपनिषदि प्रश्नकर्तारः ऋषयः कति सन्ति?
उत्तरम्- (06) षड्।
18. प्रश्न- प्रश्नोपनिषदि ब्रह्मनिष्ठः तत्त्ववेत्ता ऋषिःकः अस्ति?
उत्तरम्- पिप्पलादः।
19. प्रश्न- सत्यकामजाबालः कुत्र दरीदृश्यते?
उत्तरम्- छान्दोग्योपनिषदि।
20. प्रश्न- "सर्वं खल्विदं ब्रह्म" इत्यस्य महावाक्यस्य सन्दर्भग्रन्थः कः?
उत्तरम्- छान्दोग्योपनिषद्।
21. प्रश्न- "तत्त्वमसि" इति महावाक्यं कुत्र उल्लिखितमस्ति?
उत्तरम्- छान्दोग्योपनिषदि।
22. प्रश्न- "सनत्कुमार-नारद सम्बादः" कुत्र मिलति?
उत्तरम्- छान्दोग्योपनिषदि-सप्तम-आख्याने।
23. प्रश्न- हठयोगविवेचकः उपनिषद् ग्रन्थः वर्तते?
उत्तरम्- मैत्रायण्युपनिषद्।
24. प्रश्न- सांख्य-योग-शैवदर्शनप्रतिपादकः उपनिषद्ग्रन्थः कः?
उत्तरम्- श्वेता श्वतरोपनिषद्।
25. प्रश्न- अग्निविद्या-विवेचकः उपनिषद्ग्रन्थः कः?
उत्तरम्- कठोपनिषद्।
26. प्रश्न-यम-नचिकेतासम्वाद-सम्बद्धः उपनिषद्ग्रन्थः कः?
उत्तरम्- कठोपनिषद्।
27. प्रश्न- "अहं ब्रह्मास्मि" इति महावाक्यस्य सन्दर्भग्रन्थः कः?
उत्तरम्- बृहदारण्यकोपनिषद्।

28. प्रश्न- "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः" इति मन्त्रः कुत्र उल्लिखितमस्ति?
उत्तरम्- बृहदारण्यकोपनिषदि।
29. प्रश्न-याज्ञवल्क्य-गार्गी-सम्वादः कुत्र वर्तते?
उत्तरम्- बृहदारण्यकोपनिषदि।
30. प्रश्न- ज्ञानकर्मोपासनानां समन्वयः कुत्र समुपलभ्यते?
उत्तरम्- ईशावास्योपनिषदि।
31. प्रश्न-ऐतरेयोपनिषदि के वादाः सन्ति?
उत्तरम्- सृष्टिवादः, आदर्शवादः, प्रज्ञानवादश्चेति।
32. प्रश्न- कौषीतक्युपनिषदि किमस्ति?
उत्तरम्- प्राणतत्वोपस्थापना।
33. प्रश्न- सामवेदस्य कौथुमशाखया सम्बद्धः उपनिषद्ग्रन्थः कः?
उत्तरम्- छान्दोग्योपनिषद्।
34. प्रश्न- आकारदृष्ट्या बृहत्तमः उपनिषद्ग्रन्थः कः?
उत्तरम्- वृहदारण्यकोपनिषद्।
35. प्रश्न- "तेन त्यक्तेन भुञ्जीथाः" इति मन्त्रात्मकः उपनिषद् ग्रन्थः कः?
उत्तरम्- ईशावास्योपनिषद्।
36. प्रश्न- कठोपनिषदि कति अध्यायाः वर्तन्ते?
उत्तरम्- (02) द्वौ।
37. प्रश्न- "उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत" इति मन्त्रात्मकःउपनिषद्ग्रन्थःकः?
उत्तरम्- कठोपनिषद्।
38. प्रश्न- वेदान्त-शब्दस्य प्रथम-प्रयोगः कुत्र समुपलभ्यते?
उत्तरम्- मुण्डकोपनिषदि।
39. प्रश्न- मेत्रेयी-याज्ञवल्क्याख्यानं कुत्र उपलभ्यते?
उत्तरम्- बृहदारण्यकोपनिषदि।
40. प्रश्न- शैवधर्मप्रतिपादकः उपनिषद्विशेषः कः?
उत्तरम्- श्वेताश्वतरोपनिषद्।
41. प्रश्न- षोडशसंस्कारविधिः कस्मिन् कल्पसूत्रे प्राप्यते?
उत्तरम्- गृह्यसूत्रे।
42. प्रश्न- कौषीतकिगृह्यसूत्रं केन संस्कारेण प्रारभ्यते?
उत्तरम्- उद्वाहेन संस्कारेण।
43. प्रश्न- "वेदान्त" इत्यभिधानेनाभिहितः कः अस्ति?
उत्तरम्- उपनिषद् ग्रन्थः।
44. प्रश्न-प्रवाहणजैवलेः श्वेतकेतोरारुणेयस्य च दार्शनिकसम्वादमुपस्थापयति कः ग्रन्थः?
उत्तरम्- छान्दोग्योपनिषद् ग्रन्थः।

45. प्रश्न- उपनिषदां फारसी-भाषायां सर्वप्रथमं भाषान्तरं कदाऽभवत्?
उत्तरम्- अष्टादश-शताब्द्याम्।
46. प्रश्न-दाराशिकोहप्रेरणया सम्पन्न:फारसीग्रन्थ:"सिर्र-ए-अकवर" कस्यानुवाद: अस्ति?
उत्तरम्- उपनिषद:।
47. प्रश्न- ज्येष्ठाय पुत्राय अथर्वणे ब्रह्मणा प्रदत्तं ज्ञानं कुत्राऽस्ति?
उत्तरम्- मुण्डकोपनिषद्।
48. प्रश्न- माण्डूक्योपनिषदि कति खण्डा: सन्ति?
उत्तरम्- (12) द्वादश।
49. प्रश्न- इन्द्रविरोचनयो:कथा कस्यामुपनिषदि वर्णिताऽस्ति?
उत्तरम्- छान्दोग्योपनिषदि।
50. प्रश्न- "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्" इति मन्त्र:कस्यामुपनिषदि मिलति?
उत्तरम्- ईशावास्योपनिषदि।
51. प्रश्न-"अणोरणीयान्महतो महीयान् आत्माऽस्य जन्तोर्निहितो गुहायाम्" इति मन्त्रात्मक: उपनिषद् ग्रन्थ:क:?
उत्तरम्-कठोपनिषद्।
52. प्रश्न- "ततो श्रेय: आददानस्य साधु भवति" इति मन्त्र: कुत्र मिलति?
उत्तरम्- कठोपनिषदि।
53. प्रश्न-"एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूव" इति मन्त्र: कस्यामुपनिषदि?
उत्तरम्- कठोपनिषदि।
54. प्रश्न- "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभति" मन्त्रोऽयं कुत:उद्धृत:?
उत्तरम्- मुण्डकोपनिषद:।
55. प्रश्न-मातृदेवो भव, पितृदेवो भव, आचार्य देवो भव, यान्यनवद्यानि कर्माणि तानि सेवितव्यानि" उक्तिरियं कुत: उद्धृत:?
उत्तरम्- तैत्तिरीयोपनिषद:।
56. प्रश्न- "रसौ वै स:, रसं ह्येवायं लब्ध्याऽऽनन्दी भवति" सूक्तिरियं कुत:?
उत्तरम्- तैत्तिरीयोपनिषद:।
57. प्रश्न- "तिलेषु तैलं दधिनीय सर्पिराप: स्रोत: अरणीषु चाग्नि:" सूक्तिरियं कुत:?
उत्तरम्- श्वेता श्वतरोपनिषद्।
58. प्रश्न- "अजामेकां लोहितशुक्लकृष्णाम्" इति मन्त्रात्मक: उपनिषदग्रन्थ: अस्ति?
उत्तरम्- श्वेता श्वतरोपनिषद्।
59. प्रश्न-"शिक्षा-कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषामिति" अनेन मन्त्रेण षड्वेदांगानि कुत्र उपस्थापितानि?
उत्तरम्- मुण्डोपनिषदि।
60. प्रश्न-"असतो मा सद्गमय। तमसो मा ज्योतिर्गमय" इति मन्त्र:कुत्र उल्लिखित:?
उत्तरम्- बृहदारण्यकोपनिषदि।

61. प्रश्न- "सत्यं ज्ञानमनन्तं ब्रह्म" इदं महावाक्यं कुत्र उल्लिखितमस्ति?
उत्तरम्- तैत्तिरीयोपनिषदि।
62. प्रश्न- "पूर्णमदःपूर्णमिदं पूर्णात्पूर्णमुदच्यते" इति मन्त्रः कुत्र वर्तते?
उत्तरम्- बृहददारण्यकोपनिषदि।
63. प्रश्न- "विज्ञानमानन्दं ब्रह्म" इति महावाक्यं कुत्र उपस्थापितम्?
उत्तरम्- छान्दोग्योपनिषदि।
64. प्रश्न- "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व संशयाः" इति मन्त्रः कुत्र उपस्थापितम्?
उत्तरम्- मुण्डकोपनिषदि।
65. प्रश्न-"विद्या चाऽविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति मन्त्रः कुत्र वर्तते?
उत्तरम्- ईशावास्योपनिषदि।
66. प्रश्न- "वेदान्त" शब्दस्य प्रथमप्रयोगः कस्याम् उपनिषदि मिलति?
उत्तरम्- मुण्डकोपनिषदि।
67. प्रश्न- ईशावास्योपनिषदि कति मन्त्राः सन्ति?
उत्तरम्- (18) अष्टादश।
68. प्रश्न- ब्रह्मसूत्रस्य भाष्यकारः कः?
उत्तरम्- मध्वाचार्यः।
69. प्रश्न-योगीन्द्रसदाननदस्य गुरु कः आसीत्?
उत्तरम्- अद्वयानन्दः।
70. प्रश्न- वेदान्तसारस्य उपजीव्यग्रन्थः कः?
उत्तरम्- माण्डूक्योपनिषद्।
71. प्रश्न- अनुबन्धः कति विधः?
उत्तरम्- चतुर्विधः।
72. प्रश्न- "प्रयोजनं" कस्य भेदविशेषः अस्ति?
उत्तरम्- अनुबन्धस्य।
73. प्रश्न- "अधिकारी" कः अस्ति?
उत्तरम्- अनुबन्धविशेषः।
74. प्रश्न- "प्रमाता" कः अस्ति?
उत्तरम्- अधिकारी।
75. प्रश्न- फलोद्देश्येन क्रियमाणानि कर्माणि भवन्ति?
उत्तरम्- काम्यानि कर्माणि।
76. प्रश्न- नरकाद्यनिष्टसाधनानि ब्रह्मणहननादि कर्माणि भवन्ति?
उत्तरम्- निषिद्धानि।
77. प्रश्न- नित्या कर्मणि भवन्ति?
उत्तरम्- सन्ध्यावन्दनादीनि।।

78. प्रश्न- निमित्तमासाद्य अवश्यकर्तव्यानि पुत्रजन्माद्यनुबन्धीनि सन्ति?
उत्तरम्- जातेष्ट्यादीनि।
79. प्रश्न- पापक्षयसाधनानि चान्द्रायणादीनि किम्?
उत्तरम्- प्रयश्चित्त कर्माणि।
80. प्रश्न- सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि वर्तन्ते?
उत्तरम्- उपासनानि।
81. प्रश्न- कर्मणा किं प्राप्यते?
उत्तरम्- पितृलोकः।
82. प्रश्न- विद्यया किं प्राप्यते?
उत्तरम्- देवलोकः।
83. प्रश्न- उपासनानां परं प्रयोजनं किम्?
उत्तरम्- चित्तैकाग्र्यम्।
84. प्रश्न- साधनचतुष्टयेषु कस्य गणना न भवति?
उत्तरम्- काम्य कर्मणः।
85. प्रश्न- साधनचतुष्टयेषु परिगणितमस्ति?
उत्तरम्- इहामुत्रार्थफलभोगविरागः।
86. प्रश्न- किं नाम नित्यं वस्तुः?
उत्तरम्- ब्रह्म।
87. प्रश्न- अनित्यं किमस्ति?
उत्तरम्- जगत्सर्वम्।
88. प्रश्न- लौकिकालौकिकविषयेभ्यो नितरां विरतिः कथ्यते?
उत्तरम्- इहामुत्रार्फिफलभोगविरागः।
89. प्रश्न- तितिक्षोपरतिसमाधानश्रद्धाशमदमाः कथ्यन्ते?
उत्तरम्- शमादिषट्कम्।
90. प्रश्न- शमदमादिसम्पतिषु परिगणना कस्य नास्ति?
उत्तरम्- विवेकस्य।
91. प्रश्न- षट्कसम्पत्तिमध्ये कस्य गणना न भवति?
उत्तरम्- मुमुक्षुत्वस्य।
92. प्रश्न- श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहःकथ्यते?
उत्तरम्- शमः।
93. प्रश्न- बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं कथ्यते ?
उत्तरम्- दमः।
94. प्रश्न- निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्यः उपरनणं कथ्यते?
उत्तरम्- उपरतिः।

95. प्रश्न- विहितानां कर्मणां विधिना परित्यागः कथ्यते?
उत्तरम्- उपरतिः।
96. प्रश्न- शीतोष्णद्वन्द्वसहिष्णुता का?
उत्तरम्- तितिक्षा।
97. प्रश्न- निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः कथ्यते ?
उत्तरम्- समाधानम्।
98. प्रश्न- गुरूपदिष्टवेदान्तवाक्येषु विश्वासः कथ्यते ?
उत्तरम्- श्रद्धा।
99. प्रश्न- किं नाम विषयः प्रस्तुते वेदान्तसाराख्ये वेदान्तग्रन्थे?
उत्तरम्- जीवब्रह्मैक्यम्।
100. प्रश्न- तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च सम्बन्धः भवति?
उत्तरम्- बोध्यबोधकभावः।
101. प्रश्न- तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्चकिमुच्यते?
उत्तरम्- प्रयोजनम्।
102. प्रश्न- उपहारपाणिः कः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति?
उत्तरम्- अधिकारी।
103. प्रश्न- असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपः?
उत्तरम्- अध्यारोपः।
104. प्रश्न- सच्चिदानन्दानन्ताद्वयं ब्रह्म एव?
उत्तरम्- वस्तु।
105. प्रश्न- अज्ञानादिसकलजड़समूहः किम्?
उत्तरम्- अवस्तुः।
106. प्रश्न- सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं किम्?
उत्तरम्- अज्ञानम्।
107. प्रश्न- ईश्वर-प्राज्ञौ कथम् आनन्दमनुभवतः?
उत्तरम्- अज्ञानवृत्तिभिः।
108. प्रश्न- आवरणविक्षेपशक्तिद्वयात्मकं किमस्ति?
उत्तरम्- अज्ञानम्।
109. प्रश्न- शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया जगतःकिम्भवति?
उत्तरम्- निमित्तकारणम्।
110. प्रश्न- शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वोपाधिप्रधानतया जगतःकिम्भवति?
उत्तरम्- उपादानकारणम्।
111. प्रश्न- तमः शक्तिप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्याद् कः उत्पद्यते?
उत्तरम्- आकाशः।

112. प्रश्न- वायुः कस्माद् प्रादुर्भवति?
उत्तरम्- आकाशाद्।
113. प्रश्न- वायोः कस्योत्पत्तिर्जायते?
उत्तरम्- अग्नेः।
114. प्रश्न- अग्नेः विकृतिः किमस्ति?
उत्तरम्- जलम्।
115. प्रश्न- अद्भ्यः का उत्पद्यते?
उत्तरम्- पृथवी।
116. प्रश्न- सूक्ष्मशरीराणि लिंगशरीराणि वा कति अवयवानि धारयन्ति वेदान्तदर्शने?
उत्तरम्- (17) सप्तदश।
117. प्रश्न-वेदान्तमते तु दशेन्द्रियाणि बुद्धिमनसी वायुपञ्चकं च सम्मिलितरूपेण किम् उच्यते?
उत्तरम्- सूक्ष्मशरीरम्।
118. प्रश्न- नेत्रश्रोत्रत्वक्जिह्वा-घ्राणाख्यानि भवन्ति?
उत्तरम्- ज्ञानेन्द्रियाणि।
119. प्रश्न- निश्चयात्मिकाऽन्तः करणवृत्तिः कथ्यते?
उत्तरम्- बुद्धिः।
120. प्रश्न- संकल्पविकल्पात्मिकाऽन्तःकरणवृत्तिः कथ्यते?
उत्तरम्- मनः।
121. प्रश्न- ज्ञानेन्द्रियैः सह बुद्धिः एव उच्यते?
उत्तरम्- विज्ञानमयकोशः।
122. प्रश्न- ज्ञानेन्द्रियैः सह मनः किमुच्यते?
उत्तरम्- मनोमयकोशः।
123. प्रश्न- कर्मेन्द्रियैः सह वायुपंचकमेव उच्यते?
उत्तरम्- प्राणमयकोशः।
124. प्रश्न- वाक्पाणिपादपायूपस्थाख्यानि इन्द्रियाणि भवन्ति?
उत्तरम्- कर्मेन्द्रियाणि।
125. प्रश्न- प्राग्गमनवान्नासाग्रस्थानवर्ती कः?
उत्तरम्- प्राणः।
126. प्रश्न- अर्वाग्गमनवान्पाय्वादिस्थानवर्ती कः?
उत्तरम्- अपानः।
127. प्रश्न- विष्वग्गमनवान् अखिलशरीरवर्ती कः?
उत्तरम्- व्यानः।
128. प्रश्न- कण्ठस्थानीयः ऊर्ध्वगमनवान् उत्क्रमणवायुः कः?
उत्तरम्- उदानः।

129. प्रश्न- शरीरमध्यगताशितपीतान्नादिसमीकरणकरः वायुःकः?
उत्तरम्- समानः।
130. प्रश्न- उद्गिरणकरः वायुविशेषःकः?
उत्तरम्- समानः।
131. प्रश्न- किं नाम उन्मीलनकरः वायुः?
उत्तरम्- कूर्मः।
132. प्रश्न- क्षुत्कारः वायुः कः?
उत्तरम्- कृकलः।
133. प्रश्न- जृम्भणकरः वायुः उच्यते?
उत्तरम्- देवदत्तः।
134. प्रश्न- पोषणकरः वायुः उच्यते ?
उत्तरम्- धनञ्जयः।
135. प्रश्न- ज्ञानशक्तिवान् कर्तृरूपः कोशःकः?
उत्तरम्- विज्ञानमयकोशः।
136. प्रश्न- इच्छाशक्तिमान् करणरूपः कोशविशेषः कः?
उत्तरम्- मनोमयकोशः।
137. प्रश्न- क्रियाशक्तिमान् कार्यरूपः कोशःकः?
उत्तरम्- प्राणमयकोशः।
138. प्रश्न- आकाशेऽभिव्यज्यते कः?
उत्तरम्- शब्दः।
139. प्रश्न- वायौ तिष्ठतः?
उत्तरम्- शब्दस्पर्शौ।
140. प्रश्न- अग्नौ के गुणाः प्राप्यन्ते?
उत्तरम्- शब्दस्पर्शरूपाणि।
141. प्रश्न- अप्सु के गुणाः प्राप्यन्ते?
उत्तरम्- शब्दस्पर्शरूपरसा।
142. प्रश्न- पृथिव्यां के गुणाः समुपलभ्यन्ते?
उत्तरम्- शब्दस्पर्शरूपरसगन्धाः।
143. प्रश्न- आकाशाख्ये पंचीकृते स्थूलभूते आकाशस्य आनुपातिकं भागो भवति?
उत्तरम्- (1/2) अर्धभागः।
144. प्रश्न- पृथिवी-संज्ञके पंचीकृतेस्थूलभूते अग्नेः मात्रा का अस्ति?
उत्तरम्- (12. 5:)
145. प्रश्न-जलाख्ये पंचीकृते स्थूलभूते वायुपृथिव्योः द्वयो पदार्थयोः सम्मिलितमात्रा कति प्रतिशतमस्ति?
उत्तरम्- (37. 5:)

146. प्रश्न-वायौ पंचीकरणप्रक्रियायां वाय्वतिरिक्तानां चतुर्णा भूतानां सम्मिलितमात्रा कति प्रतिशतं यावत् भवति?
उत्तरम्- (50:)
147. प्रश्न- स्थूलशरीराणि कति विधानि?
उत्तरम्- (04) चतुर्विधानि।
148. प्रश्न- जरायुजानि भवन्ति?
उत्तरम्- मनुष्यपश्वादीनि।
149. प्रश्न- अण्डजानि भवन्ति?
उत्तरम्- पक्षिपन्नगादीनि।
150. प्रश्न- उद्भिज्जानि भवन्ति?
उत्तरम्- कल्पवृक्षादीनि।
151. प्रश्न- स्वेदजानि (स्वेदेभ्यो जातानि) भवन्ति?
उत्तरम्- यूकमशकादीनि।
152. प्रश्न- सत्तत्त्वतोऽन्यथा प्रथा उच्यते?
उत्तरम्- विकार:।
153. प्रश्न- अतत्त्वतोऽन्यथा प्रथा उच्यते?
उत्तरम्- विवर्त:।
154. प्रश्न- ब्रह्माण्डेऽस्मिन् कति भुवनानि विद्यन्ते?
उत्तरम्- (14) चतुर्दश।
155. प्रश्न- अज्ञानादनुपहितं चैतन्यरूपं तुरीयं तत्त्वं भवति?
उत्तरम्- ब्रह्म।
156. प्रश्न- "तत्त्वमसि" इति महावाक्ये अखण्डार्थप्रतीति: कया लक्षणया सम्भवति?
उत्तरम्- जहदजहल्लक्षणया।
157. प्रश्न- तत्त्वमसीति महावाक्ये अखण्डार्थप्रतीतिबोधिका का नास्ति?
उत्तरम्- जहल्लक्षणा।
158. प्रश्न- "गंगायां घोष:" अत्र का लक्षणा?
उत्तरम्- जहल्लक्षणा।
159. प्रश्न- "शोणो धांवति" इत्यत्र का लक्षणा?
उत्तरम्- अजहल्लक्षणा।
160. प्रश्न- षड्विधलिंगैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणं भवति?
उत्तरम्- श्रवणम्।
161. प्रश्न- श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम् उच्यते ?
उत्तरम्- मननम्।
162. प्रश्न- विजातीयदेहादि प्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो भवन्ति?
उत्तरम्- निदिध्यासनम्।

163. प्रश्न- उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्याख्यानि भवन्ति?
उत्तरम्- लिंगानि।
164. प्रश्न-योगस्य समाधेः वा कति अंगानि सन्ति?
उत्तरम्- (08) अष्टौ।
165. प्रश्न- अहिंसा-सत्यास्तेयब्रह्मचर्यापरिग्रहाः कथ्यन्ते?
उत्तरम्- यमाः।
166. प्रश्न- शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि भवन्ति?
उत्तरम्- नियमाः।
167. प्रश्न- कर-चरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकासनादीनि कथ्यते?
उत्तरम्- आसनानि।
168. प्रश्न- रेचक-पूरक-कुंभकलक्षणाः भवन्ति?
उत्तरम्- प्रणायामाः।
169. प्रश्न- इन्द्रियाणां स्वविषयेभ्यःप्रत्याहरणं भवति?
उत्तरम्- प्रत्याहारः।
170. प्रश्न- अद्वितीयवस्तुनि अन्तरिन्द्रियधारणमुच्यते?
उत्तरम्- धारणा।
171. प्रश्न- अद्वितीयवस्तुनि विच्छिद्य-विच्छिद्य अन्तरिन्द्रियप्रवृत्तिप्रवाहो भवति?
उत्तरम्- ध्यानम्।
172. प्रश्न-साध्यभूतस्य योगस्य निर्विकल्पकसमाधेः वा साधनस्वरूपात्मिका समाधिःकथ्यते?
उत्तरम्- सविकल्पकसमाधिः।
173. प्रश्न- समाधिविध्नस्य कतिभेदाः भवन्ति?
उत्तरम्- (04) चत्वारः।
174. प्रश्न- अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा उच्यते?
उत्तरम्- लयः।
175. प्रश्न- अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं भवति?
उत्तरम्- विक्षेपः।
176. प्रश्न- लयविक्षेपाभावे चित्तवृत्तेः रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कथ्यते?
उत्तरम्- रसास्वादः।
177. प्रश्न-यदा चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते तदा भवति?
उत्तरम्- निर्विकल्पकसमाधिः।
178. प्रश्न-भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यत्र कस्य लक्षणम् उक्तम्?
उत्तरम्- जीवन्मुक्तस्य।

179. प्रश्न- वेदान्तशब्दस्य पर्यायः कोऽस्ति?
उत्तरम्- उत्तरमीमांसा।
180. प्रश्न-योगीन्द्रसदानन्दस्य जन्मकालः अस्ति?
उत्तरम्- (1510 A.D.)
181. प्रश्न- वेदान्तसारस्य सुबोधिनी-टीकायाः प्रणेता कः?
उत्तरम्- नृसिंहसरस्वती।
182. प्रश्न- अखिलबन्धरहितो ब्रह्मनिष्ठः कः?
उत्तरम्- जीवन्मुक्तः।
183. प्रश्न- समष्ट्युपहितचैतन्यं किमस्ति?
उत्तरम्- ईश्वरः।
184. प्रश्न- व्यष्ट्युपहितचैतन्यं किमस्ति?
उत्तरम्- प्राज्ञः।
185. प्रश्न- समष्टिव्यष्ट्यभिप्रायेण एकमनेकमिति किं भवति?
उत्तरम्- अज्ञानम्।
186. प्रश्न- आवरण-विक्षेपौ कस्य शक्ती स्तः?
उत्तरम्- अज्ञानस्य।
187. प्रश्न- अज्ञानस्य शक्तिःकथ्यते?
उत्तरम्- विक्षेपः।
188. प्रश्न- हेमवत्या उपाख्यानं कुत्र उपलभ्यते?
उत्तरम्- केनोपनिषदि।
189. प्रश्न- रथरूपकं कुत्र विद्यते?
उत्तरम्- कठे।
190. प्रश्न- "न वै स्त्रैणानि सख्यानि सन्ति" इयमुक्तिर्भवति?
उत्तरम्- उर्वश्याः।
191. प्रश्न- अहङ्कारः कतिविधो भवति?
उत्तरम्- त्रिविधः।
192. प्रश्न- समन्वयात् किं भवति?
उत्तरम्- प्रकृतिः।
193. प्रश्न- वैराग्यात् किं भवति?
उत्तरम्- प्रकृतिलयः।
194. प्रश्न- विवर्तवादस्य समर्थकः कः?
उत्तरम्- शंकरः।
195. प्रश्न- केवलं शब्दादिगुणत्रयं कुत्र अभिव्यज्यते?
उत्तरम्- पंचीकृततेजसि।

196. प्रश्न- लिङ्गशरीरस्य कति अवयवा: सन्ति वेदान्तदर्शने?
उत्तरम्- (17) सप्तदश।
197. प्रश्न- अद्वैतवेदान्तमते मुक्ति: उच्यते?
उत्तरम्- ब्रह्मभाव:।
198. प्रश्न- विशेषगुण: कस्मिन् द्रव्ये नास्ति?
उत्तरम्- उत्तरम्- आकाशे।
199. प्रश्न- लौकिकसन्निकर्ष: कतिविध:?
उत्तरम्- षड्विध:।
200. प्रश्न- अज्ञाने कति गुणा:?
उत्तरम्- त्रय:।
201. प्रश्न- "मैत्रेयी-याज्ञवल्क्य-संवाद:" कस्यामुपनिषदि उपलभ्यते?
उत्तरम्- बृहदारण्यकोपनिषदि।
202. प्रश्न- कस्य देवस्य धारा प्रसिद्धा:?
उत्तरम्- वरुणस्य।
203. प्रश्न- वेदान्तो नाम भवति?
उत्तरम्- उपनिषत्प्रमाणम्।
204. प्रश्न- अद्वैतवेदान्ते जीवब्रह्मणो: स्वरूपं किम्?
उत्तरम्- जीवब्रह्मैक्यम्।
205. प्रश्न- अद्वैते सुषुप्ते: देवता क:?
उत्तरम्- प्राज्ञ:।
206. प्रश्न- शांकर-वेदान्तानुसारं साक्षी क:?
उत्तरम्- आत्मा।
207. प्रश्न- शांकर-वेदान्तानुसारं मोक्ष: कथ्यते?
उत्तरम्- आत्मानुभूति:।
208. प्रश्न- "अन्विताभिधानवाद:" इति कस्य मतम्?
उत्तरम्- गुरु प्रभाकरस्य
209. प्रश्न- रामानुजानुसारं चिरन्वितो ईश्वरस्य मध्ये क:सम्बन्ध:?
उत्तरम्- अपृथक्सिद्धिसम्बन्ध:।
210. प्रश्न- रामानुजानुसारं ईश्वरकृपा प्राप्तये सर्वश्रेष्ठ साधनं किम्?
उत्तरम्- पूर्णसमर्पणम्।
211. प्रश्न- शंकरस्य "मायावाद" सम्बन्धे रामानुजस्य मतं किम्?
उत्तरम्- तार्किकाधारेण मायावादास्वीकार:।
212. प्रश्न- परम सद्रूपेण शंकरवेदान्तानुसारं किं स्वीकृतम्?
उत्तरम्- पारमार्थिक-सत्ता रूपम्।

213. प्रश्न- "साधन-चतुष्टय-सम्पन्नः" कः भवति ?
उत्तरम्- अधिकारी।
214. प्रश्न- रामानुजानुसारं मोक्षस्य चरम साधनं किम्?
उत्तरम्- भक्तिः प्रपत्तिश्च।
215. प्रश्न- शंकरानुसारं माया का?
उत्तरम्- ब्रह्मणः उपाधिः।
216. प्रश्न- शांकरमतानुसारं ब्रह्म किम्?
उत्तरम्- सत्यं ज्ञानमयन्तम्
217. प्रश्न- "वेदार्थसंग्रह" ग्रन्थस्य कः रचनाकारः?
उत्तरम्- रामानुजः।
218. प्रश्न- कस्मिन् आश्रमे त्रिवर्गस्य प्राप्तिः भवति?
उत्तरम्- गृहस्थाश्रमे।
219. प्रश्न- अद्वैत दर्शनस्य प्रमुखपक्षधरः कः?
उत्तरम्- शंकराचार्यः।
220. प्रश्न- "विशिष्टाद्वैत" इत्यस्य प्रवर्तकः कः?
उत्तरम्- रामानुजाचार्यः।
221. प्रश्न- "अयमात्मा ब्रह्म" इति कस्य विचारः?
उत्तरम्- अद्वैतवेदान्तस्य।
222. प्रश्न- "ब्रह्म सदा विशिष्टः" अस्य मतस्य समर्थकः कः?
उत्तरम्- रामानुजः।
223. प्रश्न- "ब्रह्म सत्यं जगन्मिथ्या" अस्य मतस्य समर्थकः कः?
उत्तरम्- शंकरः।
224. प्रश्न- ब्रह्म परिणामवादस्य सिद्धान्तः कस्य वर्तते?
उत्तरम्- रामानुजस्य।
225. प्रश्न- "सर्वं खलु इदं ब्रह्म" इति वाक्यं वर्तते?
उत्तरम्- छान्दोग्य-उपनिषद् वाक्यम्।
226. प्रश्न- "अनिर्वचनीय ख्यातिः" इति कस्य मतम्?
उत्तरम्- अद्वैतवेदान्तस्य।
227. प्रश्न- चातुर्वर्ण्य व्यवस्था केन स्वीकृता?
उत्तरम्- शंकरेण।
228. प्रश्न- द्वैताद्वैतस्य प्रतिपादनं केन क्रियते?
उत्तरम्- निम्बार्केण।
229. प्रश्न- द्वैतवादस्य प्रतिपादनं केन क्रियते?
उत्तरम्- मध्वाचार्येण।

230. प्रश्न- शंकरानुसारं ब्रह्मः स्वरूपलक्षणं किम्?
उत्तरम्- सत्यंज्ञानम् अनन्तं ब्रह्म।
231. प्रश्न- सत्, चित्-आनंद इति कस्य स्वरूपलक्षणम्?
उत्तरम्- निर्गुण, निराकार, विज्ञानमय ब्रह्म स्वरूपलक्षणम्।
232. प्रश्न- त्रिविध-सत्ता कथ्यते?
उत्तरम्- 1. प्रातिभासिकः, 2. व्यावहारिकः, 3. पारमार्थिकः।
233. प्रश्न- ईश्वरस्य पञ्चरूपाणि सन्ति?
उत्तरम्- 1. पर, 2. व्यूह, 3. विभव, 4. अन्तर्यामी, 5. अर्चावतारः।
234. प्रश्न- पंचपादिका ग्रन्थस्य लेखकः कः?
उत्तरम्- पद्मम पादाचार्यः।
235. प्रश्न- पञ्चीकरण-प्रक्रिया कुत्र प्रस्तुतः?
उत्तरम्- वेदान्तसारे।
236. प्रश्न- नचिकेतः पिता कस्य यज्ञस्य अनुष्ठानं कृतवान्?
उत्तरम्- विश्वजित-यज्ञस्य।
237. प्रश्न- शंकराचार्यस्य भाष्येण युक्तः उपनिषदि का संख्या?
उत्तरम्- (10) दश।
238. प्रश्न- नासदीय-सूक्तस्य का प्रकृतिः?
उत्तरम्- दार्शनिकसूक्तम्।
239. प्रश्न- "नासदासीन्नो सदासीत्तदानी नासीद्रजो" इयं ऋचा कस्य सूक्तस्य?
उत्तरम्- नासदीयसूक्तस्य।
240. प्रश्न- "कामस्तदग्रे समवर्तताधि मनसो रेतः" इयं ऋचा कस्य सूक्तस्य?
उत्तरम्- नासदीयसूक्तस्य।
241. प्रश्न शुद्धाद्वैतवादस्य प्रवर्तकः कः?
उत्तरम्- वल्लभाचार्यः।
242. प्रश्न- "अधातो ब्रह्मजिज्ञासा" इदं मङ्गलवाक्यं कस्य सूत्रग्रन्थस्य वर्तते?
उत्तरम्- ब्रह्मसूत्रग्रन्थस्य।
243. प्रश्न- शङ्कराचार्यस्य ब्रह्मसूत्रे किं भाष्यम्?
उत्तरम्-शरीरिक-भाष्यम्।
244. प्रश्न- प्रस्थानत्रयी इत्यनेन किं ज्ञायते?
उत्तरम्- 1. उपनिषद, 2. गीता, 3. ब्रह्मसूत्रम् इति त्रितयम्।
245. प्रश्न- ब्रह्म द्वे लक्षणे के?
उत्तरम्- 1. स्वरूपलक्षणम्, 2. तटस्थ लक्षणम्।
246. प्रश्न- कानि चत्वारि महावाक्यानि सन्ति?
उत्तरम्- 1. तत्वमसि, 2. अहंब्रह्मास्मि, 3. प्रज्ञानं ब्रह्मं, 4. अयमात्माब्रह्म।

247. प्रश्न- जीवस्य तिस्रः अवस्था कथ्यते?
उत्तरम्- 1. जाग्रत, 2. स्वप्न, 3. सुषुप्तिः।
248. प्रश्न- जीवस्य कानि त्रीणि शरीराणि सन्ति?
उत्तरम्- 1. कारणशरीरम्, 2. सूक्ष्मशरीरम्, 3. स्थूलशरीरम्।
249. प्रश्न- ब्रह्मः पञ्चकोशाः के सन्ति?
उत्तरम्-1. प्राणमय, 2. विज्ञानमय, 3. आनन्दमय, 4. व्यष्टि रूप शरीर, 5. समष्टि रूप शरीरम्।
250. प्रश्न- आत्मानः चतस्रः अवस्था काः?
उत्तरम्- 1. जाग्रत्, 2. स्वप्न, 3. सुषुप्तिः, 4. तुरीया चेति।
251. प्रश्न- वेदानि मते कानि षट् प्रमाणानि?
उत्तरम्- 1. प्रत्यक्षः, 2. अनुमान, 3. शब्द, 4. उपमान, 5. अर्थापत्तिः, 5. अनुपलब्धिः।
252. प्रश्न- ज्ञानमार्गस्य त्रीणि सोपानानि कथ्यते?
उत्तरम्- 1. श्रवण, 2. मनन, 3. निदिध्यासनानि।
253. प्रश्न- साधन चतुष्टयं किम्?
उत्तरम्-1. नित्यानित्य वस्तु विवेकः, 2. इहामुत्रार्थभोगविराग, 3शम, दम, उपरति, तितिक्षा, श्रद्धा, समाधान, 4. मुमुक्षत्वम्।
254. प्रश्न- वेदान्तसूत्रस्य भाष्यकाराः कति आसन्?
उत्तरम्- अष्टौ।
255. प्रश्न- मीमांसादर्शनं कतिषु अध्यायेषु विभक्तमस्ति?
उत्तरम्- द्वादशाध्यायेषु।
256. प्रश्न- अद्वैतवेदान्तस्य प्रमुखा आचार्याः कतिसंख्याकाः सन्ति?
उत्तरम्- अष्टौ।
257. प्रश्न- अद्वैतवादस्थापनं कः कतवान्?
उत्तरम्- श्रीगौडपादाचार्यः।
258. प्रश्न- विशिष्टाद्वैतमतस्य प्रवर्तकः कः आसीत्?
उत्तरम्- रामानुजाचार्यः।
259. प्रश्न-वेदान्तदर्शने कियन्तोऽध्याया सन्ति?
उत्तरम्- (4) चत्वारः।
260. प्रश्न- वेदान्तस्य अपरं नाम किम्?
उत्तरम्- उपनिषद्।
261. प्रश्न- प्रणव वाचकः कोऽस्ति?
उत्तरम्- ईश्वरः।
262. प्रश्न- पाशानां संख्या कति सन्ति?
उत्तरम्- 4 चतस्रः।

263. प्रश्न-यामल शब्दस्यार्थः किं भवति?
उत्तरम्- भुक्ति-मुक्ति।
264. प्रश्न- अभिहितान्वयवादस्य प्रवर्त्तकः कोऽस्ति?
उत्तरम्- कुमारिलः।
265. प्रश्न- अन्विताभिधानवादस्य प्रवर्त्तकः कोऽस्ति?
उत्तरम्- प्रभाकरगुरु।
266. प्रश्न- आगमे मोक्षसय स्वरूपं किमस्ति?
उत्तरम्- आत्मस्वरूपशिवत्व प्राप्तिःभवनम्।
267. प्रश्न- विपर्ययः कति सन्ति?
उत्तरम्- 4 चत्वारः।
268. प्रश्न- "भेदस्तु पदार्थ-स्वरूपमेव" इति कस्य मतम्?
उत्तरम्- माध्वमतम्।
269. प्रश्न- माध्वमतानुसारं जीव-ब्रह्मयोःमध्येः कोऽस्ति?
उत्तरम्- भेदः।
270. प्रश्न- स्वतः प्रमाणवादं केन मन्यते?
उत्तरम्- माध्वाचार्यः।
271. प्रश्न- माध्वमतानुसारं वेदः कोऽस्ति?
उत्तरम्- अपौरुषेयः।
272. प्रश्न- माध्वमतानुसारं जीव-ब्रह्मयोःमध्येः कः सम्बन्धः?
उत्तरम्- बिम्ब-प्रतिबिम्बवादः।
273. प्रश्न- मध्वे विख्यात टीकाकारः कोऽस्ति?
उत्तरम्- जयतीर्थः।
274. प्रश्न- माध्वमतानुसारमयं जगत् किमस्ति?
उत्तरम्- सत्यमस्ति।
275. प्रश्न- "ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इयं सूक्तिः केन सम्बद्धा?
उत्तरम्- शङ्कराचार्येण।
276. प्रश्न- माध्ववेदान्ते परमतत्त्वः कः?
उत्तरम्- विष्णुः।
277. प्रश्न- माध्वस्य मते को भेदः?
उत्तरम्- भेदस्तु पदार्थस्वरूपमेव।
278. प्रश्न- "अभिनवान्यथाख्यातिवादकःकः?
उत्तरम्- मध्वः।
279. प्रश्न- कपिलस्य प्रथमः शिष्यः कः आसीत्?
उत्तरम्- आसुरीः।

280. प्रश्न-योगस्य वक्ता कोऽस्ति?
उत्तरम्- हिरण्यगर्भः।
281. प्रश्न- मीमांसादर्शनं कतिविधम्?
उत्तरम्- द्विविधम्।
282. प्रश्न- मीमासादर्शनं कतिविधम्?
उत्तरम्- द्विविधम्।
283. प्रश्न- वर्तमाने भारतीयदर्शनस्य प्रतिनिधिदर्शनं किमस्ति?
उत्तरम्- गीतादर्शनम्।
284. प्रश्न- गीतादर्शनस्य आचार्यः कः?
उत्तरम्- श्रीकृष्णः।
285. प्रश्न- उपनिषदानां काः संख्या मन्यन्ते?
उत्तरम्- (108)
286. प्रश्न- प्रसिद्ध-उपनिषदाः कैः सन्ति?
उत्तरम्- ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरि।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा।।
287. प्रश्न- "सत्यमेव जयते" कस्मिन् उपनिषदि अस्ति?
उत्तरम्- मुण्डकोपनिषदि।
288. प्रश्न- उपनिषदोपरि शाङ्करभाष्यं कः रचितवान्?
उत्तरम्- आचार्य शङ्करः।
289. प्रश्न- "असतो मा सद्गमय. . . " कस्मिन् उपनिषदि वर्तते?
उत्तरम्- बृहदारण्यकोपनिषदि।
290. प्रश्न-उत्तरमीमांसायाः प्रवर्तकः कः?
उत्तरम्- महर्षि बादरायणः।
291. प्रश्न- "प्रमाता" कस्य विशेषणम्?
उत्तरम्- अधिकारी इत्यस्य।
292. प्रश्न- "बोध्यबोधकभावलक्षणः" कया दिशा संकेतयति?
उत्तरम्- सम्बन्ध-दिशा।
293. प्रश्न- "समष्टिव्यष्ट्यभिप्रायेण एकमनेकमिति च" इति केन सम्बद्धः?
उत्तरम्- अज्ञानेन।
294. प्रश्न- केषु पञ्चीकृत-पदार्थेषु पञ्चगुणाः उपलभ्यते?
उत्तरम्- पृथिव्याम्।
295. प्रश्न- पञ्चीकरणेन वायोः अन्तर्गताः के उपलब्धते?
उत्तरम्- शब्द-स्पर्शयोः।
296. प्रश्न- "रज्जु" इत्यस्मिन् "सर्प" इत्यस्यारोपः कः?
उत्तरम्- अध्यारोपः।

297. प्रश्न- "प्रायश्चित-कर्म" किमस्ति?
उत्तरम्- चान्द्रयण-व्रतम्।
298. प्रश्न- "प्रयोजनम्" परिभाषित कारयितुं वाक्यांशः कः?
उत्तरम्- स्वस्वरूपानन्दावाप्तिः।
299. प्रश्न- "पञ्चीकृत भूतेन उत्पन्नः कः?
उत्तरम्- भ्वादिलोकः।
300. प्रश्न- "द्विधाविराम चैकैकं चतुर्धा प्रथमं पुनः" अनेन कस्याः दिशिः संकेतयति?
उत्तरम्- पञ्चीकरण-दिशिः।
301. प्रश्न- सूक्ष्मशरीरतः स्थूलब्रह्माण्डपर्यन्तं समस्त-जगत् कया शक्त्या उत्पन्नमस्ति?
उत्तरम्- विक्षेपेन।
302. प्रश्न- "वस्तुन्यवस्त्वारोपः" केन परिभाषितोऽस्ति?
उत्तरम्- अध्यारोपेन।
303. प्रश्न- संज्ञा-संज्ञि-सम्बन्धज्ञानस्य का संज्ञा?
उत्तरम्- उपमिति।
304. प्रश्न- "अभाव" इत्यस्य कति रूपानि?
उत्तरम्- (4) चत्वारि।
305. प्रश्न- "परिणामः" कीदृशः पदार्थः?
उत्तरम्- गुणः।
306. प्रश्न- लिङ्ग-परामर्शः कः?
उत्तरम्- अनुमानम्।
307. प्रश्न- काम्यानि कर्माणि भवन्ति?
उत्तरम्- स्वर्गादीष्टसाधनाानि।

(ब) चार्वाकदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- "यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिवेत्" इति कस्य दर्शनस्योक्तिः?
उत्तरम्- चार्वाकदर्शनस्य।
2. प्रश्न- लोकायतमिति कस्य दर्शनस्य नामान्तरम्?
उत्तरम्- चार्वकदर्शनस्य।
3. प्रश्न- अनुबन्ध-चतुष्टये कस्य गणना नास्ति?
उत्तरम्- ईश्वरस्य।
4. प्रश्न- "तत्वोपप्लब सिंह" इति रचनायाः सम्बन्धः केन मतेन वर्तते?
उत्तरम्- चार्वाक मतेन।
5. प्रश्न- चार्वाक-मतानुसारं सुख-दुःखस्य कारणं किम्?
उत्तरम्- स्वभावः।
6. प्रश्न- चार्वाकदर्शनानुसारं चैतन्यः कस्य गुणः अस्ति?
उत्तरम्- भौतिक-शरीरस्य।

7. प्रश्न- चार्वाक-दार्शनिकाः कं युग्मं स्वीकुर्वन्ति?
उत्तरम्- अर्थकामौ।
8. प्रश्न- चार्वाकविचारकाः कस्य आधारस्योपरि अनुमानं न मन्यन्ते?
उत्तरम्- हेतु-साध्ययोः अविनाभावसम्बन्धःन दृश्यन्ते।
9. प्रश्न- चार्वाकसम्प्रदायानुसारं किं तत्वं न वास्तविकम्?
उत्तरम्- आकाशतत्त्वम्।
10. प्रश्न- चार्वाकसम्प्रदायानुसारं कानि तत्वानि वास्तविकानि?
उत्तरम्- पृथिव्यापसतेजोवायुः(पृथ्वी, जल, अग्नि, वायु)
11. प्रश्न- चार्वाकसम्प्रदायानुसारं समस्तज्ञानप्राप्तिः केन भवति?
उत्तरम्- प्रत्यक्षेण।
12. प्रश्न- "देहात्मवादः" कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
13. प्रश्न- चार्वाकदर्शनस्य प्रमुखग्रन्थः कः?
उत्तरम्- बार्हस्पत्य-सूत्रम्।
14. प्रश्न-एकं प्रत्यक्षम् एव प्रमाणं कः स्वीकरोति ?
उत्तरम्- चार्वाकदर्शनम्।
15. प्रश्न- भारतीयदर्शनानां कः सम्प्रदायःभौतिकवादस्य(जड़वादस्य) संस्थापकः?
उत्तरम्- चार्वाकः।
16. प्रश्न- भारतीयदर्शनानां कति नास्तिक सम्प्रदायाः?
उत्तरम्- त्रयः, चार्वाक-जैन-बौद्धाश्च।
17. प्रश्न- भारतीयदर्शने सुखवादस्य समर्थकः कः?
उत्तरम्- चार्वाकः।
18. प्रश्न- "चतुर्भूतनि" कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
19. प्रश्न- "इन्द्रियात्मवादः" कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
20. प्रश्न- कतम भारतीयदर्शनानुसारं शरीरेण सह आत्मनःअन्तो भवति?
उत्तरम्- चार्वाकदर्शनानुसारम्।
21. प्रश्न- "देहात्मवादः" कस्य विचारः?
उत्तरम्- चार्वाकदर्शनस्य।
22. "मरणमेव मोक्षः" अस्य मतस्य समर्थकः कः?
उत्तरम्- चार्वाकः।
23. प्रश्न- "जड़वादः" केन दर्शनेन सम्बद्धः?
उत्तरम्- लोकायतेन(चार्वाकेण)

24. प्रश्न- केवलं "अर्थकामौ पुरुषार्थौ" इति कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
25. प्रश्न- "पुनर्जन्म न भवति" इति कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
26. प्रश्न- "चैतन्यविशिष्टदेह-एव आत्मा" इति कः स्वीकरोति?
उत्तरम्- चार्वाकः।
27. प्रश्न- "सुखं जीवनस्य परमलक्ष्यः" इति कः स्वीकरोति?
उत्तरम्- चार्वाकः।
28. प्रश्न- "सुखमेव स्वर्गम्, दुःखमेव नरकम्" इति केन मन्यते?
उत्तरम्- चार्वाकदर्शनेन।
29. प्रश्न- "जल बुद्बुद्वज्जीवा" इति कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
30. प्रश्न- "दण्डनीतिरेव विद्या" इति कः स्वीकरोति ?
उत्तरम्- चार्वाकः।
31. प्रश्न- कः नास्तिकः?
उत्तरम्- वेदनिन्दकः।
32. प्रश्न- चार्वाकदर्शनस्य प्रवर्तकः कः?
उत्तरम्- देवगुरूः बृहस्पति।
33. प्रश्न- चार्वाक" शब्दस्य मुख्यार्थः कः?
उत्तरम्- चारु वाक्(मधुर वाणी)
34. प्रश्न- नास्तिकाः कोंस्कान् पदार्थान् न स्वीकुर्वन्ति?
उत्तरम्- वेदम्, ईश्वरम्, आत्मानम्, परलोकाँश्च।
35. प्रश्न- चार्वाकमतेन कियन्ति तत्त्वानि?
उत्तरम्- (4) चत्वारि।
36. प्रश्न- चार्वाकदर्शने प्रत्यक्षप्रमाणस्य कति भेदाः, के च ते?
उत्तरम्-पञ्च। (रासन, चाक्षुषं, घ्राण, श्रोत्र, स्पर्शनानि)
37. प्रश्न- चार्वाकसम्प्रदायानुसारं "सत् तत्त्वं" किम्?
उत्तरम्- दृश्यमान-जड़ः अथवा भौतिकतत्वम्।
38. प्रश्न- देहात्मवादः वर्तते?
उत्तरम्- चैतन्य विशिष्टकायः पुरुषः।
39. प्रश्न- स्वभाववादस्य समर्थकः कः?
उत्तरम्- चर्वाकदर्शनम्।
40. प्रश्न-यादृच्छावादस्य समर्थकः कः?
उत्तरम्- चर्वाकदर्शनम्।

41. प्रश्न- चार्वाकसम्प्रदायानुसारं परमपुरुषार्थः कः?
उत्तरम्- कामः।
42. प्रश्न- चार्वाकदर्शने आत्म सम्बन्धि मतानि कानिः?
उत्तरम्-चत्वारि। (देहात्मवादः, इन्द्रियात्मवादः, प्राणात्मवादः, मन आत्मवादः)
43. प्रश्न- चार्वाकदर्शने आत्मानःस्वरूपं किम्?
उत्तरम्- 1. चेतनायुक्तः, 2. संघटनात्मकः, 3. स्वतंत्रः, 4. कर्ता।
44. प्रश्न- भौतिकवादी दर्शनं कं कथ्यते?
उत्तरम्- चार्वाकः।
45. प्रश्न- कानि नास्तिकदर्शनानि सन्ति?
उत्तरम्- 1. चार्वाक, 2. जैन, 3. बौद्ध।
46. प्रश्न- कस्मिन् दर्शने "मरणमेवापवर्गः" कथ्यते?
उत्तरम्- चार्वाकदर्शने।
47. प्रश्न- चार्वाकःवेदस्य कर्तृत्व विषये किं कथ्यते?
उत्तरम्-त्रयो वेदस्य कर्त्तारो धूर्त्तभण्डनिशाचराः। जर्मरीतुकेरीत्यादि पण्डितानां वचः स्मृतम्।।
48. प्रश्न- चार्वाकदर्शनं कैः नामभिः ज्ञायन्ते?
उत्तरम्- 1. लोकायत, 2. वार्हस्पत्यदर्शनम्।
49. प्रश्न- चार्वाकानुसारं कति पुरुषार्थाः सन्ति?
उत्तरम्- काम एवैकः पुरुषार्थः।
50. प्रश्न- चार्वाकदर्शनस्य प्रतिनिधिः श्लोकःकः?
उत्तरम्- यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिवेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।
51. प्रश्न- "अङ्गनाद्यालिङ्गनादिजन्यं सुखमेव पुरुषार्थ" इदं कस्य मतम्?
उत्तरम्- चार्वाकस्य।

(भ) बौद्धदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- बौद्धदर्शनस्य अष्टाङ्गिकमार्गेषु वर्तते अयमप्येकः?
उत्तरम्- सम्यगाजीवः।
2. प्रश्न- "प्रतीत्यसमुत्पादसिद्धान्तः" कस्य दर्शनस्य विद्यते?
उत्तरम्- बौद्धदर्शनस्य।
3. प्रश्न- बौद्धधर्मस्य पवित्रग्रन्थः कः?
उत्तरम्- त्रिपिटकम्।
4. प्रश्न- "त्रिशरणं" के सततं पठन्ति?
उत्तरम्- बौद्धाः।
5. प्रश्न- कः धर्मः वैदिककर्मकाण्डं, ब्रह्मण्यवादं च विरुध्य अहिंसामार्गे प्रवर्तते-?
उत्तरम्- बौद्धधर्मः।

6. प्रश्न- "उपसम्पदासंस्कार:" कस्मिन् धर्मे भवति?
   उत्तरम्- बौद्धधर्मे।
7. प्रश्न- पबज्जासंस्कारेण संस्कृत: बौद्धधर्मे किमिति कथ्यते?
   उत्तरम्- सामनेर्।
8. प्रश्न- बौद्धमतप्रचाराय "अशोक:" कं श्रीलङ्कां प्रेषयत्?
   उत्तरम्- महेन्द्रम्।
9. प्रश्न- प्रमाणं द्विविधमिति कस्य मतम्?
   उत्तरम्- बौद्धस्य।
10. प्रश्न- अष्टांगमार्गस्य कानि चरणानि सन्ति?
    उत्तरम्- प्रज्ञा, शीलम्, समाधि: इति त्रितयानि।
11. प्रश्न- "अहिंसा दु:ख निरोधस्य मार्ग:" इति कस्य दर्शनस्य उक्ति:?
    उत्तरम्- बौद्धदर्शनस्य।
12. प्रश्न- "आत्मदीपो भव" इति कस्योक्ति:?
    उत्तरम्- बुद्धस्य।
13. प्रश्न- चतुर्थ आर्य-सत्यं किमस्ति?
    उत्तरम्- अष्टांगिक-मार्ग:।
14. प्रश्न- बौद्धदर्शने कानि संघातानि?
    उत्तरम्- त्रीणि, 1. क्षणिकवाद:, 2. अनात्मवाद:, 3. प्रतीत्य समुत्पाद:।
15. प्रश्न- बौद्ध-अनात्मवाद: किं मन्यते?
    उत्तरम्- पञ्चस्कन्धात् भिन्नम् आत्मा नास्ति।
16. प्रश्न- बौद्धदर्शनानुसारं निर्माणस्य कोऽर्थ:?
    उत्तरम्- समस्त दु:खानां निरोध:।
17. प्रश्न- "बहुजनहिताय बहुजन सुखाय" इति कस्य आचरणम्?
    उत्तरम्- बोधिसत्वस्य।
18. प्रश्न- बौद्धदर्शने वाह्यार्थानुमेयवादस्य प्रतिपादक: क:?
    उत्तरम्- सौत्रान्तिक:।
19. प्रश्न- बुद्धानुसारं दु:खानां सर्वाधिक-महत्त्वपूर्ण-कारणं किम्?
    उत्तरम्- अविद्या।
20. प्रश्न- बौद्ध-पंचशील: कुत्र चरितार्थो भवति?
    उत्तरम्- सदैव-सर्वेषु जनेषु, सर्वेषु स्थानेषु।
21. प्रश्न- प्रतीत्य-समुत्पादानुसारं "तृष्णा" किम् उत्पादयति?
    उत्तरम्- उपादानम्।
22. प्रश्न- महात्माबुद्धानुसारं निर्माण-प्राप्तिकरणस्य साधनं किम्?
    उत्तरम्- अष्टांगमार्ग:।

23. प्रश्न- सम्यक् व्यायामस्य किं तात्पर्यम्?
उत्तरम्- अशुभविचारस्य त्यागः।
24. प्रश्न- धर्मी-धर्ममुभयं कः स्वीकरोति?
उत्तरम्- सौत्रान्तिकः।
25. प्रश्न- बोधिसत्वस्य अवधारणां कः स्वीकरोति?
उत्तरम्- योगाचारः।
26. प्रश्न- शून्यवादस्य संस्थापकः कः?
उत्तरम्- नागार्जुनः।
27. प्रश्न- अनात्मवाद-सिद्धान्तस्य प्रवर्तकः कः?
उत्तरम्- महात्माबुद्धः।
28. प्रश्न- केन अष्टांग-मार्गाः त्रिचरणेषु विभाजिताः?
उत्तरम्- बुद्धेन (1. प्रज्ञा, 2. शीलः, 3. समाधिः)
29. प्रश्न- ऋतस्य अवधारणा कुत्र प्रदत्तः?
उत्तरम्- वेदे।
30. प्रश्न- बौद्धदर्शनस्य कियन्तो भेदाः सन्ति?
उत्तरम्- (4) चत्वारः।
31. प्रश्न- "अष्टांगमार्गः" कस्य दर्शनस्य प्रतिपाद्यविषयाः?
उत्तरम्- बौद्धदर्शनस्य।
32. प्रश्न- "द्वादशनिदानानि" कस्य दर्शनस्य प्रतिपाद्यविषयः?
उत्तरम्- बौद्धदर्शनस्य।
33. प्रश्न- "विज्ञानवादः" कस्य दर्शनस्य प्रतिपाद्यविषयः?
उत्तरम्- बौद्धदर्शनस्य।
34. प्रश्न- "योगाचारः" कस्य दर्शनस्य प्रतिपाद्यविषयः?
उत्तरम्- बौद्धदर्शनस्य।
35. प्रश्न- प्रतीत्यसमुत्पाद-सिद्धान्तस्य सम्बन्धः केन दर्शनेन वर्तते?
उत्तरम्- बौद्धदर्शनेन।
36. प्रश्न- बौद्धदर्शने कः नैतिकनियमः मन्यते?
उत्तरम्- परार्थोन्मुख आदर्शः।
37. प्रश्न- "सर्वे क्षणिका, सर्वे दुःखमयाः" अस्य मतस्य समर्थकः कः?
उत्तरम्- बौद्धः।
38. प्रश्न- अपोहवादस्य सिद्धान्तः कस्य दर्शनस्य विषयः?
उत्तरम्-बौद्धदर्शनस्य।
39. प्रश्न- "आत्मख्यातिवादः" कस्य मतं वर्तते?
उत्तरम्- योगाचारस्य।

40. प्रश्न- "असत्-ख्यातिवादः" कस्य मतं वर्तते?
उत्तरम्- माध्यमिकस्य।
41. प्रश्न- "त्रिपिटकः" अस्य प्रवर्तकः कः?
उत्तरम्- बौद्धः।
42. प्रश्न- जातक शब्दस्य प्रयोगः कस्मिन् दर्शने दृश्यते?
उत्तरम्- बौद्धदर्शने।
43. प्रश्न- बौद्धदर्शने के मार्गाः प्रतिपादिताः?
उत्तरम्-अष्टांगमार्गाः, 1. सम्यक् दृष्टिः, 2. सम्यक् संकल्प, 3. सम्यक् वाक्, 4. सम्यक् कर्मान्त, 5. सम्यक् आजीवका, 6. सम्यक् व्यायाम्, 7. सम्यक् स्मृतिः, 8. सम्यक् समाधिः।
44. प्रश्न- मोक्षं कः निर्वाणं मन्यते?
उत्तरम्- बौद्धः।
45. प्रश्न- बौद्धदर्शने भावना कतिविधा?
उत्तरम्- चतुर्विधा।
46. प्रश्न- बौद्धदर्शने नागार्जुनस्य रचना वर्तन्ते?
उत्तरम्- 1. माध्यमिक त्रीणि कारिका, 2. शून्यप्राप्तिः।
47. प्रश्न- बौद्धदर्शने शान्तिदेवस्य कानि रचनाकार्यानि?
उत्तरम्-1. शिक्षा समुच्चयः, 2. सूत्र समुच्चयः, 3. बोधिचर्यावतारः।
48. प्रश्न- ज्ञानस्य कियन्ति कारणानि?
उत्तरम्- (4) चत्वारि।
49. प्रश्न- बौद्धदर्शनानुसारेण व्याप्तिज्ञानं सुगममस्ति न वा?
उत्तरम्- सुगमम्।
50. प्रश्न- स्कन्धः कतिविधः?
उत्तरम्- (5) पञ्चविधः।
51. प्रश्न- बौद्धदर्शनस्य जनकः कः?
उत्तरम्- भगवान् बुद्धः।
52. प्रश्न- अर्थः कतिविधः?
उत्तरम्- द्विविधः।
53. प्रश्न- "त्रिपिटक" इति पदेन कः गृह्यते?
उत्तरम्- 1. विनय पिटक, 2. सुत्तपिटक, 3. अभिधम्मपिटक।
54. प्रश्न- हीनयानस्य चरमलक्ष्यः कः?
उत्तरम्- अर्हत्।
55. प्रश्न- हीनयानस्य सम्प्रदायः कः?
उत्तरम्- वैभाषिकःसौत्रान्तिको वा।

56. प्रश्न- महायानस्य चरमलक्ष्यः कः?
उत्तरम्- बोधिसत्वः।
57. प्रश्न- महायानस्य कः सम्प्रदायः?
उत्तरम्- विज्ञानवादः शून्यवादो वा।
58. प्रश्न- वैभाषिकमतस्य कः प्रवर्तकः?
उत्तरम्- कात्यायनी पुत्रः।
59. प्रश्न- सौत्रान्तिकमतस्य प्रवर्तकः कः?
उत्तरम्- कुमारलातः।
60. प्रश्न-योगाचारमतस्य प्रवर्तकः कः?
उत्तरम्- मैत्रेयनाथः।
61. प्रश्न- कानि द्वादश निदानानि?
उत्तरम्-1. अविद्या, 2. संस्कारः, 3. विज्ञानम्, 4. षडायतन्, 5. स्पर्श, 6. वेदना, 7. तृष्णा, 8. उपादान, 9. भव, 10. जाति, 11. नामरूप, 12. जरामरण।
62. प्रश्न- के पञ्च स्कन्धाः?
उत्तरम्- 1. रूपम्, 2. वेदना, 3. संज्ञा, 4. संस्कार, 5. विाानम्।
63. प्रश्न- कानि त्रिरत्नानि सन्ति?
उत्तरम्- 1. शीलः, 2. प्रज्ञा, 3. समाधिः।
64. प्रश्न- संज्ञायाः के त्रयो भेदाः सन्ति?
उत्तरम्- 1. श्रुतमयी, 2. चिन्तामयी, 3. भावनामयी।
65. प्रश्न- बौद्धानां किं पञ्चशीलत्वम्?
उत्तरम्- 1. अहिंसा, 2. सत्यम्, 3. अस्तेजः, 4. ब्रह्मचर्य, 5. मद्यपाननिषेधः।
66. प्रश्न- "सत्" इत्यस्य का परिभाषा?
उत्तरम्- अर्थक्रियाकारित्वम्।
67. प्रश्न- बौद्धदर्शने कति कर्माणि कानि च तानि?
उत्तरम्- त्रीणि, 1. कायिकः, 2. वाचिकः, 3. मानसिकः।
68. प्रश्न- बौद्धदर्शने कति प्रत्यक्षप्रमाणानि, कानि च तानि?
उत्तरम्-चत्वारि, 1. इन्द्रिज्ञानम्, 2. मनोविज्ञानम्, 3. स्वसंवेदनम्, 4. योगिज्ञानम्।
69. प्रश्न- श्रावकस्य काः चतस्रः अवस्था?
उत्तरम्- 1. सोतापन्नः, 2. सकदागामी, 3. अनागामी, 4. अर्हत्।
70. प्रश्न- बौद्धदर्शने त्रिकायवादाः के सन्ति?
उत्तरम्- 1. धर्मकायः, 2. निर्माणकायः, 3. सम्भोगकायः।
71. प्रश्न- प्रवृति विज्ञानस्य के सप्तभेदाः सन्ति?
उत्तरम्-1. चक्षुविज्ञानम्, 2. श्रोत्रविज्ञानम्, 3. घ्राणविज्ञानम्, 4. रसनाविज्ञानम्, 5. कायविज्ञानम्, 6. मनोविज्ञानम्, 7. क्लिष्टमनोविज्ञानम्।

72. प्रश्न- महात्मा बुद्धस्य जीवनपरिचय: क:?
उत्तरम्- 563ई0पूर्वं, लुम्बिनी ग्रामे, शाक्य वंशे बुद्धो जात:।
73. प्रश्न-बौद्धदर्शने अभिधम्म पिटकाणां के भागा:सन्ति?
उत्तरम्-(7 सप्त) 1. धम्म संगाणि, 2. विभंग:, 3. कथावस्तु:, 4. पुग्गल पंजाति:, 5. धातुकथा, 6. यमक:, 7. पठ्ठान:।
74. प्रश्न- तृष्णाया: कति प्रभेदा: सन्ति?
उत्तरम्- त्रय:, 1. कामतृष्णा, 2. भव तृष्णा, 3. विभवतृष्णा।
75. प्रश्न- ज्ञानं कस्य धर्म:?
उत्तरम्- बुद्धे:।
76. प्रश्न- बौद्धदर्शने पञ्च बोधिवृक्षानि कानि सन्ति?
उत्तरम्-" क्षमा-रूपिणी-जटा, धैर्यरूपि-दृढ़मूल, चरित्र-रूपि-पुष्पम्, बुद्धिरूपिणीशाखा, धर्मरूपिफलम्।
77. प्रश्न- बौद्धदर्शने पञ्च अविद्या का: सन्ति?
उत्तरम्- आलस्य, जन्म-मृत्यु, काम, क्रोध, विशादा:।
78. प्रश्न- बौद्धदर्शने अष्टाङ्गमार्गा: के सन्ति?
उत्तरम्-सम्यक्दृष्टि:-संकल्प-वाणी-कर्म-आजीविका-उद्योग-स्मृति-समाधिरिति।
79. प्रश्न- बौद्धदर्शनस्य कति भेदा:?
उत्तरम्- द्वौ भेदौ।
80. प्रश्न- निर्माणमार्गस्य कति अङ्गानि?
उत्तरम्- अष्टौ अङ्गानि।
81. प्रश्न- बौद्धसम्प्रदाये कियन्ति आर्यतत्वानि?
उत्तरम्- (4) चत्वारि।
82. प्रश्न- बौद्धसम्प्रदाये कति वादा?
उत्तरम्- द्वौ वादा:।
83. प्रश्न-यानरूपेण बौद्धसम्प्रदायो कतिविध:?
उत्तरम्- द्विविध:।
84. प्रश्न- कति मतानि बौद्धसम्प्रदाये निर्दिष्टानि?
उत्तरम्- चत्वारि।
86. प्रश्न- प्रारम्भिकबौद्धदर्शने भगवतो बुद्धस्य कियन्ति अर्यसत्यानि?
उत्तरम्- बौद्धदर्शनस्याधारभूतानि चत्वारि आर्यसत्यानि सन्ति।
87. प्रश्न- बौद्धदर्शनस्य आधार:"चतुर्आर्यसत्यं" कानि सन्ति?
उत्तरम्-1. दु:खम्, 2. दु:ख-समुदाय:, 3. दु:खनिरोध:, 4. दु:खनिरोध-गामिनि-प्रतिपत्।
88. प्रश्न- बौद्ध: मोक्षाय कस्य शब्दस्य प्रयोग:अकुर्वत्?
उत्तरम्- निर्माणशब्दस्य।

89. प्रश्न- बौद्धदर्शन: कस्मिन् पिटके अस्ति?
उत्तरम्- अभिधंम्मपिटके।
90. प्रश्न- अभिधम्मपिटक: कस्मिन् भाषायां अस्ति?
उत्तरम्- पालि-भाषायाम्।
91. प्रश्न-बुद्धस्य आत्माया: नित्यता विषये किं मन्यते?
उत्तरम्- आत्माया:अनित्यता।
92. प्रश्न- क: मीमांसक: बोद्धाचार्यस्य शिष्यत्व स्वीकृत्वा तं पराजित:?
उत्तरम्- कुमारिलभट्ट:।
93. प्रश्न- बौद्धदर्शनस्य प्रथम-आचार्य: क: आसीत्?
उत्तरम्- महात्माबुद्ध:।
94. प्रश्न- बौद्धदर्शनस्य प्रसिद्ध-नाम किम्?
उत्तरम्- शून्यवाद:।
95. प्रश्न- बौद्धस्य कौ द्वौ उपसम्प्रदायौ?
उत्तरम्- 1. हीनयान:, 2. महायान:।
96. प्रश्न- विज्ञानवाद-शून्यवादे च काभ्यां नामभ्यां ज्ञायन्ते?
उत्तरम्- क्रमश: योगाचार: एवं च माध्यमिक नामाभ्याम्।
97. प्रश्न- शून्यवादी-माध्यमिक-सम्प्रदायस्य मूलप्रवर्तक कोऽस्ति?
उत्तरम्- आचार्य अश्वघोष:।
98. प्रश्न- माध्यमिक-सम्प्रदायं सम्प्रदायस्यरूपं क: प्रदत्त:?
उत्तरम्- आचार्य नागार्जुन:।
99. प्रश्न- महात्मा-बुद्धस्य जन्म कदा कुत्र च अभवत्?
उत्तरम्- ई०पू० 581 वर्षाणि, कपिलवस्तुनगरे।
100. प्रश्न- बुद्धस्य बाल्यकाले किन्नाम?
उत्तरम्- सिद्धार्थ:।
101. प्रश्न- सिद्धार्थस्य वंशनाम किम्?
उत्तरम्- साक्यवंश:।
102. प्रश्न- सिद्धार्थस्य का पत्नी?
उत्तरम्- यशोधरा।
103. प्रश्न- सिद्धार्थस्य पुत्रनाम किम्?
उत्तरम्- राहुल:।
104. प्रश्न- सिद्धार्थस्य घोटकस्य किन्नाम?
उत्तरम्- छन्दक:।
105. प्रश्न- बुद्धस्य ज्ञानप्राप्तिस्थानं किम्?
उत्तरम्- बोधगया।

106. प्रश्न- बुद्धस्य अपरं नाम किम्?
उत्तरम्- साक्यमुनिः।
107. प्रश्न- बुद्धस्य प्रथमोपदेशः कुत्र अभवत्?
उत्तरम्- सारनाथे।
108. प्रश्न- बौद्धधर्मस्य प्रमुखाः सिद्धान्ताः कियन्तः सन्ति?
उत्तरम्- (5) पञ्च।
109. प्रश्न- बौद्धमन्दिरस्य किन्नाम?
उत्तरम्- चैत्य-मण्डपम्।
110. प्रश्न- अष्टाङ्गमार्गस्य उपदेशकः कः?
उत्तरम्- बुद्धः।
111. प्रश्न- स्त्रीणां कृते समानाऽधिकारस्य उद्घोषकौ कौ?
उत्तरम्- बुद्धाऽऽनन्दौ।

(म) जैनदर्शनस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- "षट्खण्डागमः" इति कस्य दर्शनस्य प्रचीनतमः ग्रन्थः?
उत्तरम्- जैनदर्शनस्य।
2. प्रश्न- जैनदर्शनं कतिव्रतानि प्रतिपादयति?
उत्तरम्- द्वादश।
3. प्रश्न- रत्नत्रयं कस्मिन् धर्मे विश्रुतमस्ति?
उत्तरम्- जैनधर्मे।
4. प्रश्न- "मानवीयज्ञानम् आंशिकं सापेक्षं वा" इति कस्य दर्शनस्य मतम्?
उत्तरम्- जैनदर्शनस्य।
5. प्रश्न- जैनदर्शनानुसारं सर्वोच्च-सद्गुणः कः?
उत्तरम्- अहिंसा।
6. प्रश्न- "अहिंसा परमो धर्मः" इति के मन्यन्ते?
उत्तरम्- जैनाः।
7. प्रश्न-जैनदर्शनानुसारं "सप्तभंगीनय" सिद्धान्ते स्याद् अस्ति घटःइति निर्णयस्य कोऽर्थः?
उत्तरम्- सम्भवतः घटस्य अस्तित्वमस्ति।
8. प्रश्न- जैनदर्शनानुसारं द्रव्यं किम्?
उत्तरम्- नित्यं परिवर्तनशीलं च वस्तु।
9. प्रश्न- जैनदर्शनं नास्तिकः कथं मन्यते?
उत्तरम्- वेदनिन्दकत्वात्।
10. प्रश्न- जैनधर्मे गुण-स्थानस्य किमर्थः?
उत्तरम्- आत्मविकासस्य अवस्था।
11. प्रश्न- जैनधर्माणां "मोक्षमार्गः" कः?
उत्तरम्- त्रयाणां समन्वयः।

12. प्रश्न- जैनदर्शनानुसारं किं द्रव्यं नास्ति?
उत्तरम्- संख्या।
13. प्रश्न- जैनदर्शनस्य अपरं नाम किम्?
उत्तरम्- आर्हत-दर्शनम्।
14. प्रश्न- जैन-नैतिक-व्यवस्थायां कः वर्जितः?
उत्तरम्- अतिसारः।
15. प्रश्न- जैन-महाव्रतेषु कः सम्मिलितः न भवति?
उत्तरम्- बन्धः।
16. प्रश्न- "अणुव्रत आचार संहिता" इति केषां कृते वर्तते?
उत्तरम्- श्रावकानां कृते।
17. प्रश्न- जैनदर्शनानुसारं जीवः कोऽस्ति?
उत्तरम्- स्वदेहपरिणामः।
18. प्रश्न- जैनदर्शने बाधक-कर्म किं कथ्यते?
उत्तरम्- ज्ञानावरणम्।
19. प्रश्न- स्याद्वादस्य सिद्धान्तः कस्मिन् दर्शने वर्तते?
उत्तरम्- जैनदर्शने।
20. प्रश्न- जैनदर्शने मोक्षप्राप्तव्यक्ति किं कथ्यते?
उत्तरम्- कैवल्यम्।
21. प्रश्न- जैनदर्शने के पंचशीलसिद्धान्ताः?
उत्तरम्- 1. ब्रह्मचर्यः, 2. सत्यः, 3. अहिंसा, 4. अचौर्य, 5. अपरिग्रहः।
22. प्रश्न- जैनदर्शनस्य कति सम्प्रदायाः के च ते?
उत्तरम्- द्वौ, 1. दिगम्बरः, 2. श्वेताम्बरः।
23. प्रश्न- जैनदर्शने मोक्षस्य कानि त्रीणि-रत्नानि?
उत्तरम्- 1. सम्यक् दर्शनम्, 2. सम्यक् ज्ञानम्, 3. सम्यक् चारित्रम्।
24. प्रश्न- "अनेकान्तवादः" कस्य दर्शनस्य विषयः?
उत्तरम्- जैनदर्शनस्य।
25. प्रश्न- "सप्तभंगीन्यायः" कस्य दर्शनस्य विषयः?
उत्तरम्- जैनदर्शनस्य।
26. प्रश्न- "प्रत्येकज्ञानं सापेक्षमस्ति" अस्य मतस्य समर्थकः कः?
उत्तरम्- जैनः।
27. प्रश्न- अणुव्रतं तथा महाव्रतं च" कः स्वीकरोतिः?
उत्तरम्- महावीरः।
28. प्रश्न- जैनदर्शनस्य प्रवर्तकः कः?
उत्तरम्- ऋषभदेवः।

29. प्रश्न- जैन दार्शनिकमते तत्त्वानि कियन्ति?
उत्तरम्- (7) सप्त।
30. प्रश्न- महावीरस्य जन्मस्थानं किम्?
उत्तरम्- कुन्दग्रामः।
31. प्रश्न- भङ्गीन्यायः कतिविधः?
उत्तरम्- सप्तविधः।
32. प्रश्न- बन्धः कतिविधः?
उत्तरम्- चतुर्विधः।
33. प्रश्न- महावीरस्य पितुः किन्नाम?
उत्तरम्- सिद्धार्थः।
34. प्रश्न- सिद्धसेनस्य वार्तिककारानुसारेण कियन्तस्तर्काः?
उत्तरम्- (5) पञ्च।
35. प्रश्न- महावीरस्य मातुर्नामधेयं किम्?
उत्तरम्- त्रिशला।
36. प्रश्न- महावीरस्य भार्यायाः नाम किम्?
उत्तरम्- यशोदा।
37. प्रश्न- अर्हत् कस्य उपाधिः?
उत्तरम्- जैनस्य (निर्माण-प्राप्तिःजनानाम्)
38. प्रश्न- कियन्ति सम्यग् ज्ञानानि?
उत्तरम्- (5) पञ्च।
39. प्रश्न- जैनदर्शने कति तीर्थंकराः सन्ति?
उत्तरम्- (24) चतुर्विंशतिः।
40. प्रश्न- जैनदर्शने मूलसाहित्यस्य भाषा का?
उत्तरम्- प्राकृतभाषा।
41. प्रश्न- जैनदर्शने ज्ञानस्य कति भेदाः? के च ते?
उत्तरम्- द्वौ, 1. निराकारज्ञानम्, 2. साकारज्ञानम्।
42. प्रश्न- निराकारज्ञानस्य कति भेदाः? के च ते?
उत्तरम्- चत्वारः, 1. चक्षुः, 2. अचक्षुः, 3. अवधिः, 4. केवलम्।
43. प्रश्न- साकारज्ञानस्य कति भेदाः?के च ते?
उत्तरम्- द्वौ, 1. प्रत्यक्षम्, 2. परोक्षञ्च।
44. प्रश्न- "परोक्ष ज्ञानस्य कति भेदाः?के च ते?
उत्तरम्- द्वे, 1. मतिः, 2. श्रुतः।
45. प्रश्न- जैनदर्शने कति प्रमाणानि स्वीकृतानि?
उत्तरम्- त्रीणि, 1. प्रत्यक्षम्, 2. अनुमानम्, 3. शब्दः।

46. प्रश्न- प्रत्यक्षप्रमाणस्य कति भेदाः?
उत्तरम्- द्वौ, 1. पारमार्थिकप्रत्यक्षम्, 2. व्यावहारिकप्रत्यक्षम्।
47. प्रश्न- अनुमानस्य कति भेदाः?
उत्तरम्- द्वौ, 1. स्वार्थानुमानम्, 2. परार्थानुमानम्।
48. प्रश्न- शब्दस्य कति भेदाः?
उत्तरम्- द्वौ, 1. लौकिकः, 2. शास्त्रजः।
49. प्रश्न- जैनदर्शने ज्ञानस्य किं स्वरूपम्?
उत्तरम्- स्वपरभासित्वम्।
50. प्रश्न- विकलज्ञानस्य कति भेदाः, के च ते?
उत्तरम्- द्वौ, 1. अवधिज्ञानम्, 2. मनः पर्यायज्ञानम्।
51. प्रश्न- परार्थानुमानस्य के पञ्चावयवाः?
उत्तरम्- 1. प्रतिक्षा, 2. हेतुः, 3. दृष्टांतः, 4. उपनयः, 5. निगमनम्।
52. प्रश्न- नयस्य कति भेदाः के च ते?
उत्तरम्- द्वौ, 1. निश्चय नयः, 2. व्यवहार नयः।
53. प्रश्न- निक्षेपस्य कति प्रकाराः के च ते?
उत्तरम्- चत्वारः, 1. नामनिक्षेपः, 2. स्थापनानिक्षेपः, 3. द्रव्यनिक्षेपः, 4. भावनिक्षेपः।
54. प्रश्न- जैनदर्शने कानि सप्त तत्वानि?
उत्तरम्- 1. जीवः, 2. अजीवः, 3. आस्रवः, 4. संवरः, 5. निर्जरा, 6. बन्धः, 7. मोक्षः।
55. प्रश्न- जैनदर्शने कानि षड् द्रव्यानि?
उत्तरम्- 1. जीवः, 2. धर्मः, 3. अधर्मः, 4. पुद्गलः, 5. आकाशः, 6. कालः।
56. प्रश्न- जीवस्य कति भेदाः के च ते?
उत्तरम्- द्वौ, 1. बद्धः, 2. मुक्तः।
57. प्रश्न- द्रव्यस्य कति भेदाः के च ते?
उत्तरम्- द्वौ, 1. अस्तिकायः, 2. अनस्तिकायः।
58. प्रश्न- कर्मणः कति भेदाः के च ते?
उत्तरम्- द्वौ, 1. भावकर्म, 2. द्रव्यकर्म।
59. प्रश्न- कर्मणः अष्ट प्रकृतयः काः?
उत्तरम्-1. दर्शनावरणीयः, 2. मोहनीयअन्तराय, 3. ज्ञानावरणीयः, 4. वेदनीयः, 5. नाम, 6. गोत्रः, 7. आयुरूपम्, 8. अविद्या।
60. प्रश्न- बन्धस्य कानि पञ्च कारणानि?
उत्तरम्- 1. मिथ्यादर्शनम्, 2. अविरति, 3. प्रमादः, 4. कषायः, 5. योगः।
61. प्रश्न- के चत्वारः काषायाः ?
उत्तरम्- 1. लोभः, 2. मानः, 3. माया, 4. क्रोधः।
62. प्रश्न-योगस्य कति भेदाः के च ते?
उत्तरम्- त्रयः, 1. काययोगः, 2. वाग्योगः, 3. मनोयोगः।

63. प्रश्न- बन्धनस्य कौ द्वौ भेदौ?
उत्तरम्- 1. भावबन्धनम्, 2. द्रव्यबन्धनम्।
64. प्रश्न- मोक्षस्य कौ द्वौ भेदौ?
उत्तरम्- 1. भावमोक्षः, 2. द्रव्यमोक्षः।
65. प्रश्न- कानि पञ्च महाव्रतानि?श
उत्तरम्-1. अहिंसा, 2. सत्यम्, 3. अस्तेयः, 4. अपरिग्रहः, 5. ब्रह्मतेजः।
66. प्रश्न- पञ्चसमितिः कां?
उत्तरम्-1. ईर्ष्या, 2. भाषा, 3. एषणा, 4. आदाननिक्षेपणा, 5. प्रतिस्थापनासमितिः।
67. प्रश्न- के च दश धर्मा?
उत्तरम्-1. क्षमा, 2. मार्दवम्, 3. आर्जवम्, 4. सत्य, 5. शौचम्, 6. संयम, 7. तपः, 8. अकिंचनम्, 9. ब्रह्मचर्यः, 10. त्यागः।
68. प्रश्न- जैनदर्शने अनुप्रेक्षायाः संख्या काः, काः च ताः?
उत्तरम्-द्वादश, 1. अनित्यत्वम्, 2. अशरणत्वम्, 3. संसारः, 4. एकत्वम्, 5. अन्यत्वम्, 6. अशुचिः, 7. आस्त्रवः, 8. संवरः, 9. निर्जरा, 10. लोकः, 11. बोधि, 12. दुर्लभत्वम्, 13. धर्मानुप्रेक्षा।
69. प्रश्न- जैनदर्शने चारित्रानां संख्या काः, काश्च ताः?
उत्तरम्-पञ्च, 1. सामयिकः, 2. छेदोपस्थापना, 3. परिहारः, 4. विशुद्धिः, 5. सूक्ष्म संपरायः, 6. यथाख्यात्।
70. प्रश्न- जैनदर्शनस्य प्रवर्तकः कः?
उत्तरम्- महावीर स्वामी।
71. प्रश्न- स्याद्वादः कस्य दर्शनस्य अस्ति?
उत्तरम्- जैनदर्शनस्य।
72. प्रश्न- जैनदर्शने कति अस्तिकायः अस्ति?
उत्तरम्- 5 पञ्च।
73. प्रश्न- नास्तिकदर्शनानि कति संख्याकानि?
उत्तरम्- षट्,।
74. प्रश्न- जैनाः कतिविधाः?
उत्तरम्- द्विविधाः।
75. प्रश्न- जैन शब्दस्य किं तात्पर्यम्?
उत्तरम्- विकारानां जेता। (विजेता)
76. प्रश्न- प्रथमजैन तीर्थङ्करः कः?
उत्तरम्- ऋषभदेवः।
77. प्रश्न- अन्तिमजैन तीर्थङ्करः कः?
उत्तरम्- चतुर्विंशः तीर्थङ्करो महावीरः।
78. प्रश्न- जैनदर्शनस्य अनेकान्तवादः किमस्ति?

उत्तरम्- वस्तूनां अनन्तरूपं एवं अनन्तधर्मश्च।

79. प्रश्न- "आर्हत्" केषामीश्वरः?
उत्तरम्- जैनानाम्।

80. प्रश्न- जैनीनां महाविशालं केन्द्रं किम्?
उत्तरम्- चम्पानगरी।

81. प्रश्न- महावीरस्य प्रथमा शिस्या का?
उत्तरम्- पद्मावती।

82. प्रश्न- महावीरस्य कुत्र प्रथमोपदेशः?
उत्तरम्- राजगृहे।

83. प्रश्न- पञ्चानां जैनमन्दिराणां निर्माता कः?
उत्तरम्- चन्देल राजा।

84. प्रश्न- जैन-धर्मस्य उदयः कदा जातः?
उत्तरम्- ई0 पूर्वम्-षष्ठ-शताब्द्याम्।

85. प्रश्न- महावीरस्य बाल्यकाले नाम किम्?
उत्तरम्- वर्द्धमानः।

86. प्रश्न- महावीरस्य निर्वाणम्(मृत्युः) कदा कुत्र चाऽभवत्?
उत्तरम्- ई0 पूर्वम्-468 ई0 वर्षे, पावापुरीस्थाने।

(य) दर्शनस्य परिचयात्मकानि वस्तुनिष्ठप्रश्नोत्तराणि-(दर्शनग्रन्थाःग्रन्थकाराश्च)

1. प्रश्न- भारते कति विधानि दर्शनानि सन्ति?
उत्तरम्- द्वादशविधानि।

2. प्रश्न- कारिकावली केन निर्मिता?
उत्तरम्- विश्वनाथपञ्चाननेन।

3. प्रश्न- ब्रह्मसूत्रस्य रचयिता कः आसीत्?
उत्तरम्- वेदव्यासः।

4. प्रश्न- न्यायसूत्रस्य लेखकः कः?
उत्तरम्- गौतमः।

5. प्रश्न-योगसूत्रस्य लेखकः कः?
उत्तरम्- पतंजलि।

6. प्रश्न- न्यायभाष्यस्य लेखकः कः?
उत्तरम्- वात्सायनः।

7. प्रश्न- न्यायदर्शने उदयनाचार्यस्य कानि रचनाकार्यानि?
उत्तरम्- 1. न्यायकुसुमांजलिः, 2. परिशुद्धिः, 3. आत्मतत्वविवेकः।

8. प्रश्न- तापर्य टीका कस्य वर्तते?
उत्तरम्- वाचस्पतिमिश्रस्य।

9. प्रश्न- तत्वचिन्तामणे: ग्रन्थस्य लेखक: क:?
   उत्तरम्- गङ्गेशोपाध्याय:।
10. प्रश्न- न्यायमञ्जरी इत्यस्य लेखक: क:?
    उत्तरम्- जयन्त भट्ट:।
11. प्रश्न- उद्योतकरस्य का टीका वर्तते?
    उत्तरम्- न्यायवार्तिकम्
12. प्रश्न- "न्यायसिद्धान्तमुक्तावली" इत्यस्य लेखक: क:?
    उत्तरम्- विश्वनाथ पंचानन:।
13. प्रश्न न्यायतर्कभाषाया: रचनाकार: क:?
    उत्तरम्- केशव मिश्र:।
14. प्रश्न- प्रत्यभिज्ञा हृदयस्य लेखक: क:?
    उत्तरम्- क्षेमराज:।
15. प्रश्न- शिवदृष्टि: इति कस्य रचनाकार्य: ?
    उत्तरम्- सोमानन्द:।
16. प्रश्न- न्यायामृत इत्यस्य लेखक: क:?
    उत्तरम्- व्यासतीर्थ:।
17. प्रश्न- दीधिति इत्यस्य लेखक: क:?
    उत्तरम्- रघुनाथ शिरोमणि।
18. प्रश्न- प्रामाण्यवार्तिकस्य लेखक: क:?
    उत्तरम्- धर्मकीर्ति।
19. प्रश्न- प्रमाण निर्णय इत्यस्य लेखक: क:?
    उत्तरम्- धर्मकीर्ति।
20. प्रश्न- तन्त्रसारस्य रचनाकार: क:?
    उत्तरम्- अभिनवगुप्त:।
21. प्रश्न- श्लोकवार्तिक इत्यस्य लेखक: क:?
    उत्तरम्- कुमारिल:।
22. प्रश्न- तत्त्वचिन्तामणि इत्यस्य लेखक: क:?
    उत्तरम्- गङ्गेशोपाध्याय:।
23. प्रश्न- तत्त्व प्रकाशिकाया: लेखक: क:?
    उत्तरम्- जयतीर्थ:।
24. प्रश्न- प्रकरण पञ्जिकाया: लेखक: क:?
    उत्तरम्- शालीकनाथ:।
25. प्रश्न- न्यायसिद्धान्तमञ्जरी इत्यस्य लेखक: क:?
    उत्तरम्- जयन्तभट्ट:।

26. प्रश्न- परमार्थसारस्य रचनाकार: क:?
उत्तरम्- अभिनवगुप्त:।
27. प्रश्न- न्यायवार्तिक टीका कस्य वर्तते?
उत्तरम्- वाचस्पति मिश्रस्य।
28. प्रश्न- "किरणावली" कस्य रचना वर्तते?
उत्तरम्- उदयनाचार्यस्य।
29. प्रश्न- "न्यायकन्दली" इत्यस्य लेखक: क:?
उत्तरम्- श्रीधराचार्य:।
30. प्रश्न- "न्यायलीलावती" कस्य रचना वर्तते?
उत्तरम्- वल्लभाचार्यस्य।
31. प्रश्न- "न्यायमुक्तावली" अस्य ग्रन्थस्य रचनाकार: क:?
उत्तरम्- विश्वनाथ भट्टाचार्य:।
32. प्रश्न- वैशेषिक-भाष्यकार: क:?
उत्तरम्- आत्रेय:, प्रशस्तमति:।
33. प्रश्न- परमाणुवादस्य स्थापक: क:?
उत्तरम्- कणाद:।
34. प्रश्न- "तर्कभाषा" इति ग्रन्थस्य प्रणेता क:?
उत्तरम्- केशवमिश्र:।
35. प्रश्न- तर्कसंग्रहस्य प्रणेता क:?
उत्तरम्- अन्नंभट्ट:।
36. प्रश्न- तर्कसंग्रहस्य "दीपिका" टीकाया: प्रणेता कोऽस्ति?
उत्तरम्- अन्नंभट्ट:।
37. प्रश्न-योगवार्तिकस्य रचनाकार: क:?
उत्तरम्- विज्ञानभिक्षु:।
38. प्रश्न- "योगसूत्रस्य लेखक: क:?
उत्तरम्- पतञ्जलि:।
39. प्रश्न- सांख्य सूत्रस्य क: लेखक:?
उत्तरम्- महर्षि कपिल:।
40. प्रश्न- सांख्य तत्व कौमुदी अस्य ग्रन्थस्य क:लेखक:?
उत्तरम्- वाचस्पति मिश्र:।
41. प्रश्न- सांख्य प्रवचन भाष्यस्य रचनाकार: क:?
उत्तरम्- विज्ञान भिक्षु:।
42. प्रश्न- सांख्य सार इत्यस्य लेखक: क:?
उत्तरम्- विज्ञान भिक्षु।

43. प्रश्न- सांख्य वृत्तिसारस्य लेखक: क:?
उत्तरम्- महादेव वेदान्ती।
44. प्रश्न- तत्व समासस्य क: रचनाकार:?
उत्तरम्- महर्षि कपिल:।
45. प्रश्न- प्रकृति-पुरुषयो: रचयिता क:?
उत्तरम्- ईश्वर:।
46. प्रश्न- ब्रह्मसूत्रशारीरकभाष्यस्य प्रणेता क:?
उत्तरम्- शंकराचार्य:।
47. प्रश्न- ब्रह्मसूत्रस्य प्रणेता क:?
उत्तरम्- कृष्णद्वैपायन:।
48. प्रश्न- सांख्यकारिकाया: प्रणेता क:?
उत्तरम्- ईश्वरकृष्ण:।
49. प्रश्न- भट्ट दीपिका अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- खण्डदेव:।
50. प्रश्न- बृहती अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- प्रभाकर मिश्र:।
51. प्रश्न- मिताक्षराकार: कोऽस्ति?
उत्तरम्- हरदत्त:।
52. प्रश्न- वेदान्तकामधेनु: ग्रन्थस्य कर्ता क: आसीत्?
उत्तरम्- निम्बार्काचार्य:।
53. प्रश्न- भामतीटीका कस्य रचना वर्तते?
उत्तरम्- वाचस्पति मिश्र:।
54. प्रश्न- सुरेश्वराचार्यस्य कानि रचनाकार्यानि वर्तन्ते?
उत्तरम्- 1. नैष्कर्म्य सिद्धि:, 2. बृहदारण्यकोपनिषदभाष्य वार्तिक।
55. प्रश्न- संक्षेप शारीरक अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- सर्वज्ञात्ममुनि:।
56. प्रश्न- खण्डनखण्डखाद्य इत्यस्य क: रचनाकार:?
उत्तरम्- श्रीहर्ष:।
57. प्रश्न- विद्यारण्यस्य कानि रचनाकार्यानि वर्तन्ते?
उत्तरम्- 1. पंचदशी, 2. विवरण प्रमेय संग्रह:।
58. प्रश्न- शंकराचार्यस्य कानि रचनाकार्यानि वर्तन्ते?
उत्तरम्- 1. शारीरक भाष्य, 2. गीता भाष्य, 3. उपदेशसाहस्री।
59. प्रश्न- माण्डूक्यकारिका कस्य रचना वर्तते?
उत्तरम्- गौड़पादाचार्यस्य।

60. प्रश्न- अद्वैत सिद्धिः अस्य ग्रन्थस्य कः लेखकः?
उत्तरम्- मधुसूदन सरस्वती।
61. प्रश्न- वेदान्त-सिद्धान्त मुक्तावली कस्य रचना वर्तते?
उत्तरम्- प्रकाशनन्दस्य।
62. प्रश्न- वेदान्तसार अस्य ग्रन्थस्य लेखकः कः?
उत्तरम्- धर्मराजाध्वरीन्द्रः।
63. प्रश्न- ब्रह्मसूत्रस्य प्रणेता कः?
उत्तरम्- बादरायणः।
64. प्रश्न- वेदान्तसार-ग्रन्थस्य प्रणेता कः?
उत्तरम्- योगीन्द्र-सदानन्दः।
65. प्रश्न- वेदान्तसारस्य "प्रज्ञा" नाम्नी टीकायाः प्रणेता कः?
उत्तरम्- मिथिलेशपाण्डेयः।
66. प्रश्न- "सिद्धान्तविन्दुः" इति वेदान्तग्रन्थस्य लेखकः कः?
उत्तरम्- मधुसूदनसरस्वती।
67. प्रश्न- ब्रह्मसूत्रस्य कर्ता कः?
उत्तरम्- बादरायणः।
68. प्रश्न- "वेदान्तपारिजातसौरभामित्यस्य" ग्रन्थस्य कः रचनाकारः?
उत्तरम्- निम्बाकाचार्यः।
69. प्रश्न- "वेदान्तसारः" कस्य कृतिरस्ति?
उत्तरम्- सदानन्दयोगीन्द्रस्य।
70, प्रश्न- "चतुःशतकम्" कस्य रचना वर्तते?
उत्तरम्- आर्यदेवस्य।
71. प्रश्न- बौद्धदर्शने "चन्द्रकीर्ति" लेखकस्य रचना का?
उत्तरम्- 1. मध्यमकावतारः, 2. प्रसन्नपदा, चतुःशतक व्याख्या।
72. प्रश्न- बौद्धदर्शने शान्तिरक्षितस्य रचनाकार्याणि कानि?
उत्तरम्- 1. तत्व संग्रहः, 2. माध्यमिकालंकारः।
73. प्रश्न- "कमलशीलस्य ग्रन्थः कः?
उत्तरम्- तत्त्व संग्रहव्याख्या।
74. प्रश्न- असंगस्य कति रचनाः?
उत्तरम्-पञ्च, 1. अभिधर्म समुच्चयः, 2. पंचभूमि, 3. महायान संग्रहः, 4. प्रकरण-आर्यावाचा, 5. वज्रच्छेदिका।
75. प्रश्न- कणाद-भाष्यस्य रचयिता कः?
उत्तरम्-प्रशस्तपादः।
76. प्रश्न सांख्य-प्रवचनस्य रचना केन कृता?
उत्तरम्- भगवता पतञ्जलिना।

77. प्रश्न- शालिक नाथ मिश्रस्य कानि रचनाकार्यानि?
उत्तरम्- 1. दीपशिखा, 2. ऋजु विमलापंचिका।
78. प्रश्न- मीमांसासूत्राणि केन महर्षिणा रचितानि?
उत्तरम्- जैमिनिमहर्षिणा।
79. प्रश्न- "अद्वैतसिद्धि:" इत्यस्य लेखक: क:?
उत्तरम्- मधुसूदन सरस्वती।
80. प्रश्न- "तत्वोपप्लव सिंह" इति ग्रन्थस्य क: रचनाकार:?
उत्तरम्- जयराशि भट्ट:।
81. प्रश्न- "सर्वदर्शनसंग्रह" इति ग्रन्थस्य प्रणेता क:?
उत्तरम्- माधवाचार्य:।
82. प्रश्न- "प्रमाण मीमांसा" ग्रन्थस्य क:रचनाकार:?
उत्तरम्- हेमचन्द्र:।
83. प्रश्न- "जैन तर्कभाषा" ग्रन्थस्य क: रचनाकार:?
उत्तरम्- यशोविजय:।
84. प्रश्न- "सन्मति तर्क:" अस्य ग्रन्थस्य लेखक:क:?
उत्तरम्- सिद्धसेन दिवाकर:।
85. प्रश्न- तत्वार्थ वार्तिक" ग्रन्थस्य क: रचनाकार:?
उत्तरम्- अकलंक:।
86. प्रश्न- राजवार्तिकम्" ग्रन्थस्य क: रचनाकार:?
उत्तरम्- अकलंक:।
87. प्रश्न- "षड्दर्शनसमुच्चय:" इति ग्रन्थस्य लेखक:क:?
उत्तरम्- हरिभद्र सूरि:।
88. प्रश्न- "शास्त्रवार्तासमुचय:" अस्य ग्रन्थस्य लेखक:क:?
उत्तरम्- हरिभद्र सूरि:।
89. प्रश्न- "तत्वार्थाधिगम सूत्रम्" अस्य ग्रन्थस्य लेखक:क:?
उत्तरम्- उमास्वामी।
90. प्रश्न- "न्यायावतार:" अस्य ग्रन्थस्य लेखक:क:?
उत्तरम्- सिद्धसेन दिवाकर:।
91. प्रश्न- "द्रव्य संग्रह:" अस्य ग्रन्थस्य प्रणेता क:?
उत्तरम्- नेमिचन्द्र:।
92. प्रश्न- "अभिधर्म कोश" अस्य ग्रन्थस्य क: रचनाकार:?
उत्तरम्- वसुबन्धु:।

TOTAL- 1151

• • •

10
पुराणेतिहासौ-

(क) पुराणानामुद्भव-

पुराणशब्दो हि अथर्ववेदे ब्रह्मणेषु च सर्ग-विद्येत्यर्थे पठ्यते। महाभारते तु शब्दोऽयं पुरातनोपाख्यानबोधकत्वेन प्रयुज्यमानो दृश्यते। विष्णु-वायु-ब्राह्माण्ड-पुराणेभ्यो वयं सर्वपुराणेषु प्राचीनतमस्य पुराणस्य जन्मकथां विद्मः। "व्यासो हि वेदान् चतुर्धा विभज्य तानात्मनः चतुरः शिष्यानुपदिष्टवान्। धर्म्यान् मन्त्रान् संगृह्य पुराणनिर्माणम् अभवत्। पुराणानां धार्मिकदृष्ट्या महत्त्वमधिकम्। वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि। पुराणशब्दो हि अथर्ववेदे ब्रह्मणेषु च सर्ग-विद्येत्यर्थे पठ्यते। व्यासो हि वेदान् चतुर्धा विभज्य तानात्मनः चतुरः शिष्यान् उपदिष्टवान्। ततश्चासौ कथाः आख्यायिकाः उपाख्यानानि, गीतानि, लोकवादांश्च संगृह्य पुराणं नाम ग्रन्थविशेषं ग्रथितवान्, "इतिहासेन च साकममुं ग्रन्थं रोमहर्षणं(लोमहर्षणं वा) नाम पञ्चमं स्वशिष्यं पाठयामास।

(ख) पुराणसंवृद्धि-

व्यासप्रोक्तां पुराणसंहितां षोढा विभज्य रोमहर्षणः तासां षण्णां संहितानां प्रत्येकं क्रमेणात्मनः षट्शिष्यान् पाठयामास। तेषु च शिष्येषु त्रयः पृथक् पृथक् तिस्रः संहिता सम्पादयामासुः, याः खलु स्वस्वकर्तृनाम्ना प्रसिद्धिं जग्मुः, रोमहर्षणीयसंहितया च सार्द्धं मूलसंहिता इति लोके विदिताः बभूवुः। एताः सर्वाः चतुर्भिश्चतुर्भिः पादैः विभक्ताः, प्रतिपाद्येऽर्थे समानाः सन्त्योऽपि वचोभङ्ग्या विभिन्नाः आसन्।

इतिहासपुराणाभ्यां वेदंसमुपवृंहयेत्।
विभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति।।

यदा वेदोक्ता अर्थाः लोकानां बुद्धौ नारोढुं प्रवृत्तास्तदा वेदोक्तार्थस्य ज्ञानं सुलभं कर्तुं पुराणानि विरच्यन्ते स्म। समाजस्य तात्कालिकस्वरूपबोधनायापि पुराणानां महानुपयोगः पुराणेषु प्रचीनभारतीयेतिहासो निहितः। इतिहासा यदि राज्ञां वृत्तं प्राधान्येन बोधयन्ति तदा पुराणानि राज्ञां वृत्तैः सह ऋषीणामपि वृत्तं बोधयन्तीति परमोपयोगित्वं पुराणानाम्। पुराणानि भोगोलिकसामग्रीमपि प्रस्तुवन्ति। अतिशयोक्तिप्रणाली पुराणेषु आदृता। अस्यां प्रणाल्यां वर्णिता अर्था यथामति विविच्य

गृहीतव्या भवन्ति। पुराणानां तुलनात्मकमध्ययनं तदन्तस्तले प्रवेशनं च यदि क्रियेत तदा तत्रत्य इतिहासभागः समाजिकवर्णनारहस्यं च स्पष्टमवभासेत इति विदुषां विचारः। पुराणं पुरातनमाख्यानमुच्यते। संस्कृते पुराणशब्दः चिरन्तन पर्यायः। पुराणेषु भूत- वर्तमान-भविष्यदश्चार्था वर्ण्यन्ते।

(ग) पुराणानां प्रतिपाद्यार्था-

आख्यानानि, उपाख्यानानि, गाथाः, कल्पवाक्यानि च उपादाय पुराणानां सर्गः संजात इति पूर्वोक्तं स्मृत्वा प्राचीनतम- पुराणविषयः अनु मातुं न अशक्यः। पुराणस्य पञ्च- लक्षणमित्थमुक्तम्-

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्च लक्षणम्।।

इति श्लोकेन पुराणविषयो यो निर्देशितः स केवलं आदिमपुराणसम्बन्धको ज्ञेयः, यदा धर्मसिद्धान्ताः तीर्थमाहात्म्यानि धर्माङ्गान्तराणि चेति बहुविधं अर्थजातं न खलु पुराणनिक्षिप्तमभूत्। इदानीं तु पुराणेषु उपदेशप्रकरणानि सङ्ख्यया इतिहासप्रकरणानि अपिवर्तमानानि पश्यामः। तत्र च अनैतिहासिक्यः कथाः, विष्णुदशावतारवर्णनानि, देवपूजाविधयः, पर्व व्रतनियमाश्चेति नाना विषयाः उपलभ्यन्ते। वेदप्रामाण्येन पुराणप्रामाण्यं खलु प्रख्यायते। वायुपुराणे च वेदपुराणत्वमात्मनः उद्दिष्टम्। पुराणसंख्याविषये मतभेदो नास्ति, सर्ववादिसिद्धं तेषां अष्टादशत्वम्। कस्यापि मानवसमाजस्य इतिहासः तावन्न पूर्णो मन्यते, यावत्तस्य सृष्टेः प्रारम्भकालत इतिहासो न प्रस्तूयते। पाश्चात्य-शिक्षाप्रभाविता विद्वांसो नैतदनुमोदयन्ति स्म, अत एव ते पुराणानि सत्यानि न स्वीकुर्वन्ति स्म, परं सम्प्रति दृष्टिकोणपरिवर्तनं जातम्। सुसंस्कृतया दृष्ट्या भारतीयमितिहासं जिज्ञासमानानां कृते पुराणानि निधय इव। बहुषु पुराणेषु वेदसंहितानाम्ना तेषां व्यवहारो दृश्यते, वेदाध्ययनेन च यत् फलं तदेव, तदपि अतिशयानं वा, फलं पुराणाध्ययनेन निगदितम्।

(घ) पुराणेष्वितिहासांश-

मत्स्य-वायु-ब्रह्माण्डानि-अस्या पुराणत्रय्याः कथावर्णनेषु अद्भुतं खलु साम्यमालोक्यते। वायु-ब्रह्माण्डयोर्वर्णनेषु-महासाम्य-बलात् तयोरेकस्यैव पुराणस्य शाखाभेदेन द्विरूपत्वमनुमीयते। विष्णु-भागवते-एतत्पुराणद्वयं संक्षिप्ततरं वर्तते। गरुडपुराणम्-इक्ष्वाकूणां बृहद्रथानां च नृपाणां चरितैर्निबद्धभागवतापेक्षया संक्षिप्ततरं पुराणमेतत् पुराणानां परम्परायां चिरेण लब्धसत्तकं प्रतीयते। भविष्यम्-पुराणे निबद्धानि चरितानि प्रायोऽतिशयोक्ति- रञ्जितानि सन्ति। एषां पुराणानां वर्णनानि मुख्यतया भविष्यपुराणस्यापि उपजीव्यस्य कस्यचित् पुरातनस्य पुराणस्य वर्णनेभ्यो गृहीतानीत्यनुमीयते। अष्टादशसु पुराणेषु केवलं सप्तसु-वंश-वंशानुचरिते तावद् उपलभ्येते। अवशिष्टानि एकादशपुराणानि भारतीय- राजनीतीतिहासानुध्यायिनां निष्प्रयोजनानि एव खलु भवन्ति। साम्प्रतं तु "न हि पुराणगतः सर्वोऽपि इतिहासांशो मिथ्या भवितुमर्हति। प्राचीनानां सूर्याचन्द्रमसौ द्वौ पुरुषौ सर्वेषां भारतीयक्षत्रियवंशानां मूलप्रवर्तकत्वेन तावत् प्रसिद्धौ। अर्वाचीनानां शिशुनागानां, नन्दनां, शुङ्गानां, कण्वानाम्, आन्ध्राणां च, वर्णनस्योपलम्भात्, महत् तेषां गौरवमनुपश्यामः।

(ङ) पुराणरचनाकाल-

"वेदेभ्यो ब्राह्मणेभ्यश्च तं तमंशं सञ्चित्य तदा वै पुराण-पुनर्निर्माणमजायत यदा हि वेदाः ब्राह्मणानि च अर्नतिहासिकग्रन्थतया प्रसिद्धिम् आयन्" इति। तदिमानि सर्वाणि तत्त्वानि पुराणानां वैदिककालेऽप्यस्तित्वं समर्थयन्ते। ईसवीयशतकात् षट्शतक (600) पूर्वतनकाले पुराणानामस्तित्व-मासीदिति कल्पनाऽपि सत्यानुमोदिता। पुराणं कदाचिदेकत्र समये नारच्यत, समये समये तत्राध्याया योजिताः गुप्तकालपर्यन्तं तेषां वर्त्तमानरूपमु- पन्नमासीत्। विष्णु-वायु-ब्रह्माण्ड-भागवतपुराणानि इतिहासधारामिमाम् अग्रे गुप्ताना- मभ्युदयं यावन् नयन्ति।

निर्माणकालधिकृत्य तथ्यानि-

1. अथर्ववेदे पुराणस्य उल्लेखो दृश्यते-(11.7.24)
2. गोपथब्राह्मणे पुराणानि स्मर्यन्ते।
3. बाणभट्टः रचित हर्षचरिते वायवीयपुराणानां चर्चा दृश्यते। (620तमे ख्रीष्टाब्द)
4. धर्मसूत्रेषु पुराणानि स्मर्यन्ते। कौटिल्यकृतमर्थशास्त्रं पुराणानि निर्दिशति।
5. आपतम्बधर्मसूत्रे पुराणस्योल्लेखः दृश्यते।
6. 475 तमे ख्रीष्टाब्दनिकटं सम्पादितेषु राज्ञां भूदानपत्रेषु केचित् तादृशाः श्लोका लभ्यन्ते।
7. ख्रष्टतृतीयशताब्द्यां भविष्यपुराणं विद्यमानं वभूव इति। वायुब्रह्माण्डपुराणयोस्तु चतुर्थशताब्द्याम्।
8. शाङ्खायनश्रौतसूत्रे आश्वलायनसूत्रे च पुराणोल्लेख उपलभ्यते।
9. शतपथे ब्राह्मणे अन्वहम् इतिहासपुराणाध्ययनं विहितं विलोक्यते।
10. मत्यपुराणो आन्ध्राणां तत्पतनपर्यन्तं (236 ख्री०) तदनन्तरभाविनां किलकिलवंश्यनृपाणां च इतिहासो लभ्यते।
11. विष्णु-वायु-ब्रह्माण्ड-भागवतपुराणानि इतिहासधारामिमाम् अग्रे गुप्तानामभ्युदयं यावन् नयन्ति, समुद्रगुप्तस्य दिग्विजयवर्णनं तु तत्र नोपलभ्यते। इत्थमधिकाधिकं धारा एषा 330 तमं ख्रीष्टाब्दं यावत् प्रवर्तमाना सिध्यति।
12. चिन्तामणि-विनायकवैद्यमहाशया-नवमशताब्दीभवात्, श्रीशंकराचार्याद्, (1164 तमे ख्रीष्टाब्दे वर्तमानात्) मन्यन्ते।

(च) पुराणानां नामानि तत्प्रमाणञ्च-

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकुस्कानि पुराणानि प्रचक्षते।।

पुराणानि अष्टादश सन्ति, उपपुराणानि अपि अष्टादश सन्ति, अनन्तरमष्टादश उपोपपुराणान्यपि सन्ति। अतः तेषां संख्या 18×3=54 सन्ति। एतान्यपि शास्त्रभागेऽन्तर्भवन्ति। "पुराणं सर्वशास्त्राणां प्रमाणं ब्रह्मणा स्मृतम्" इति मत्स्यपुराणवाक्यमत्र प्रमाणम्।

(छ) पुराणानां श्लोकसंख्या-

1. मत्यपुराणे-14000 श्लोकाः, 2. मार्कण्डेयपुराणे-9000 श्लोकाः,

3. भविष्यपुराणे-24,500 श्लोकाः, 4. भागवतपुराणे-18,000 श्लोकाः,
5. ब्रह्माण्डपुराणे-12,200 श्लोकाः, 6. ब्रह्मपुराणे-13,000 श्लोकाः,
7. ब्रह्मवैवर्त्तपुराणे-18,000 श्लोकाः, 8. वामनपुराणे-10,000 श्लोकाः,
9. वराहपुराणे-24,000 श्लोकाः, 10. विष्णुपुराणे-23,000 श्लोकाः,
11. वायुपुराणे-24,000 श्लोकाः, 12. अग्निपुराणे-16,000 श्लोकाः,
13. नारदपुराणे-25,000 श्लोकाः, 14. पद्मपुराणे-55,000 श्लोकाः,
15. लिङ्गपुराणे-11,000 श्लोकाः, 16. गरुडपुराणे-18,000 श्लोकाः,
17. कूर्मपुराणे-18,000 श्लोकाः, 18. स्कन्धपुराणे-81,100 श्लोकाः,

(ज) अष्टादश-उपपुराणानि-

1. सनत्कुमार, 2. नारसिंह, 3. स्कान्द, 4. शिवधर्म, 5. आश्चर्य, 6. नारदीय, 7. कापिल, 8. वामन, 9. औशनस, 10. ब्रह्माण्ड, 11. वारुण, 12. कालिका, 13. माहेश्वर, 14. साम्ब, 15. सौर, 16. पराशर, 17. मारीच, 18. भार्गव।

(झ) ज्योतिर्लिंगविवरणी-

ज्योतिर्लिंगानां नाम	स्थानस्य नाम
1. सोमनाथः	सोमनाथ (गुजरात)
2. मल्लिकार्जुनः	श्रीशैल (आन्ध्र)
3. महाकालेश्वरः	उज्जैन (मध्यप्रदेशः)
4. ओंकारेश्वरः	अमलेश्वरः(मध्यप्रदेशः)
5. केदारनाथः	हिमालयः(उत्तरांचल)
6. भीमशंकरः	डाकिनी (महाराष्ट्र)
7. विश्वनाथः	वराणसी (उत्तरप्रदेशः)
8. त्र्यम्बकेश्वरः	गोतमीतट(नासिक महाराष्ट्र)
9. वैद्यनाथः	वैद्यनाथधाम(झारखण्डः)
10. नागेश्वरः	दारुकावने (गुजरातः)
11. रामेश्वरः	सेतुबन्धे (तमिलनाडु)
12. घुश्मेश्वरः	शिवालये (महाराष्ट्र)

(ञ) एकादश रुद्र-रुद्राणीनां नामावली-

रुद्रस्य नाम	रुद्राणीनाम
1. मन्युः	धी
2. मनुः	वृत्तिः
3. महिनसः	उशना
4. महानः	डमा
5. शिवः	नियुति
6. ऋतध्वजः	सर्पिः
7. उग्रेरेता	ठला
8. भवः	अम्बिका
9. कालः	इरावती
10. वामदेवः	सुधा
11. धृतव्रतः	दीक्षा

(ट) दशावतार एवं चतुर्विंशतिः अवताराणां विवरणम्-

1. मत्स्यः, 2. कच्छपः, 3. वाराहः, 4. नृसिंहः, 5. वामनः, 6. परशुरामः, 7. रामः, 8. कृष्णः, 9. बुद्धः, 10. कल्किः। 11. ब्रह्मा:, 12. नारदः, 13. नरनारायणः, 14. कपिलः, 15. दत्तात्रेयः, 16. यज्ञः, 17. ऋषभः, 18. पृथुः, 19. धन्वन्तरिः, 20. मोहिनी, 21. वेदव्यासः, 22. बलरामः, 23. हंसः, 24. हयग्रीवः।

(ठ) चतुर्युगानां चतुर्दशमन्वन्तराणां विवरणी-

1. सत्ययुग-अवधि:-17,28,000 वर्षाणि।	2. त्रेतायुग:-अवधि:-12,96,000 वर्षाणि।
3. द्वापर युग:-अवधि:-8,64,000 वर्षाणि।	4. कलियुग:-अवधि:-4,32,000 वर्षाणि।
1. स्वायम्भुव मन्वन्तर:	2. स्वारोचिष मन्वन्तर:
3. उत्तम मन्वन्तर:	4. तमस मन्वन्तर:
5. रैवत मन्वन्तर:	6. चाक्षुष मन्वन्तर:
7. वैवस्वत मन्वन्तर:	8. सावर्णिकमन्वन्तर:
9. दक्षसावर्णिकमन्वंन्तर:	10. ब्रह्मसावर्णिकमन्वन्तर:
11. धर्मसावर्णिकमन्वन्तर:	12. रुद्रसावर्णिकमन्वन्तर:
13. देवसावर्णिकमन्वन्तर:	14. इन्द्रसावर्णिकमन्वन्तर:

(ड) रामायणम्-

संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिद्ध्यति। भारतीयै रामायणम् आदिकाव्यं वाल्मीकिश्च तत्प्रणेतृतयाऽऽदिकवि: अभिधीयते। रामायणं महाभारतात् प्राचीनम्। रामायणस्य रचनाकाल: खीष्टपूर्वपञ्चमशतकात्पूर्वमेव मन्यते। भारतस्य काप्येतादृशी भाषा नास्ति यत्र रामायणस्यानुवादो न जात: स्यात्। वैदेशिक्यो भाषा अपि रामायणस्यानुवादेनात्मानं धन्यं मन्यते। श्रीरामचन्द: आदर्शभ्राता आदर्शपति: आदर्शपुत्र: आदर्शशासक:आदर्शमनुष्यश्चासीदिति समर्थयितुमेव रामायणं निरमीयत, यत्र लक्ष्ये तत्सफलमभूत्। रामायणे चतुर्विंशति:सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्री संहितापदेनाभिधीयते। यावत् पर्यन्तं कवे: समक्षं वर्णनीयं वस्तु नागतं तावदयं मौनमादधौ, यदैव क्रौञ्चवधं करुणरसं दृष्टवान्, तदैवाकस्मादेवास्य मुखात् काव्यप्रवाहो निर्गत:, तदस्य काव्ये करुण रस एव प्रधानत्वं भजते। कविताया लोकहितमुद्देश्यं स्यादिति वाल्मीकिना कदापि न विस्मृतम्। अत एव चरित्रसृष्टौ वर्णने वा सर्वत्र कविरुच्चमादर्श विचारं च व्यञ्जितवान्।

(ढ) महाभारतम्-

इदं प्राय: सर्वे भारतीया विद्वांसो मन्यन्ते यत् महाभारतं प्राग् जयनाम्ना ततो भारतनाम्ना तत: परतश्च महाभारतनाम्ना प्रसिद्धम्। प्रथमं महाभारतमितिहास: पुराणमाख्यानकञ्चेति नामभिराख्यायते स्म। साम्प्रतिकास्तु महाभारतम् आचारशास्त्रं नीतिशास्त्रं धर्मार्थकाममोक्षाख्य चतुर्वर्गसाधनं चामनन्ति। भारतं पञ्चमो वेद: इति सर्वत्र प्रचारितम्। एतत्प्रणेत्रा महर्षिणा व्यासेन अस्य "जयो" नामेतिहासोऽयम्" इति नाम चक्रे इति प्रवलं सम्भाव्यते। महाभारते 24,000 चतुर्विंशतिसहस्रंश्लोकानामासीत्। प्रथमं हि महाभारतम् इतिहास इति पुराणमिति आख्यानमिति च आख्यायते स्म। भारतीयानां मतेन पर्यायवाचिन: खल्वेते त्रय: शब्दा:। नीतिविद्यायाश्च महान् आकार: धर्मार्थकाममोक्षचतुर्वगस्य प्रापितसाधनं खलु महाभारतमिति आशास्यते। अनेन गीताज्ञानेन विश्वस्य भृशमुपकृतमिति सर्वसम्मतम्।

वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम्।
दुर्वृत्तं धार्तराष्ट्राणाम्, उक्तवान् भगवानृषि:।।

कथावस्तु-आदि-सभा-वन-विराट्-उद्योग-भीष्म-द्रोण-कर्ण-साल्व-सौप्तिक-स्त्री-शान्ति-अनुशासनाऽश्वमेघा-ऽऽश्रमवासि-मौसल-महाप्रस्थानिक-स्वर्गारोहणाख्यानि अष्टादशपर्वाणि।

महाभारतस्य रचनाकालस्तु 500 ई. पू. समयत:परतो न निर्मितं किन्तु कदाचित् पूर्वमेव निर्मितमिति प्रतीयते। व्यासस्य लक्ष्यं भौतिकजीवनस्यासारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्त्तनमेव व्यासस्य महाभारतप्रणयने उद्देश्यमासीत्। अत एवात्र शान्तो रस: प्रधानभूत:, वीरस्तु रसोङ्गभावं गत:।

चिन्तामणि-विनायकवैद्यमहाशया विस्तरेण भागवतनिर्माणकालं विचारयन्त: पर्यवसाययन्ति यत्-" भागवतं नाम पुराणं (नवमशताव्दीभवात्) श्री शङ्करचार्यात् (1164 तमे ख्रीष्टाब्दे वर्तमानात्) उर्ध्वं गीतगोविन्दकृत: जयदेवाच्च पूर्वं प्रायेण ख्रीष्टदशमशतकेरचितम् आसीत्। पुराणमेतत् लोकप्रसिद्धतया पुराणान्तराणि अतिवर्तते, सर्वासु च आधुनिकीषु भारतीयभाषासु अनूदितञ्चास्ति।

महाभारतस्य रचयिता कृष्णद्वैपायन वेदव्यास: आसीत्। अस्मिन् ग्रन्थे सर्वेषामादिकारण महति अन्तर्यामी नियन्ता विश्वरूपो भगवान् विष्णु: वर्णनमतिप्रसिद्धं वर्तते। यस्य देवस्यावाहन यज्ञादि कर्मणि तदुद्देश्येन हवनादि: हेतु भवति। यस्य ब्रह्मण: अनेक पुरुषै अनेकनामभि: स्तुति: कृता, यद् ऋतम्-पदवाच्यम् एकाक्षरब्रह्म, व्यक्ताव्यक्त स्वरूपं सनातन: अस्ति। असत् सत् इत्युभयरूपेण य: स्वयं विराजमान: वर्तते। तथापि यस्य वास्तविकं स्वरूपं सदसद्भ्यां विलक्षण: अस्ति। विश्वोऽयं येन अभिन्न: वर्तते, य: सम्पूर्ण जगत: स्रष्टा, पुराणपुरुष: सर्वोत्कृष्ट परमेश्वर:एव वृद्धि-क्षयादि विकारै: रहित: वर्तते। यं कदापि पाप: न स्पृशति य: सहज शुद्ध: अस्ति, स ब्रह्मरूप एव मङ्गलकारी मङ्गलमय: विष्णु: वर्तते। तं चराचरगुरुं हृषीकेशं श्रीहरिं नमस्कृत्य सर्वलोकपूजित: अद्भूतकर्मा महात्मा महर्षि-व्यासदेव: अस्य अन्त:करण शोधकामृतस्य वर्णनं कृतवान्।

अस्य महाभारतग्रन्थस्य त्रिषु लोकेषु परज्ञाननिधि रूपे प्रतिष्ठा विद्यते। अयं शुभ शब्दविन्यासेनालंकृत: वर्तते तथा लौकिक-वैदिक संस्कृत प्राकृत संकेतै: सुशोभितोऽयं महाभारत:। अनुष्टुप्-इन्द्रवज्रादि अनेक प्रकारकै छन्दोभिरावृत्त: अत: ग्रन्थोऽयं विदुष:अतिप्रिय: वर्तते। महाभारते अनेका: कथा: ग्रन्थिता सन्ति, यथा समस्तपञ्चक क्षेत्रस्य वर्णनं, जनमेजयं सरमाया: शाप वर्णनं, आरूणि गुरुभक्तिकथा, उपमन्युकथा, वेद, वेदोक्त तथा उत्तङ्कस्य गुरुभक्ति: उत्तङ्कस्य सर्पयज्ञस्य कृते जनमेजयम् प्रोत्साहनस्य चर्चा कौरवपाण्डवयो: मध्ये प्रचलित युद्धस्य वर्णनम् एतादृशनि-अनेकानि आख्यानायुपाख्यानि सन्ति महाभारते।

अनेन प्रकारेण वहव: वीरा:, नीतिज्ञा: सज्जनजना: अपि नायक:-खलनायकस्य अभिनय-कर्तृ: रूपे समाहिता: सन्ति। पञ्चकन्यकाया: अपि वर्णनं अस्मिन् महाभारते वर्तते।

(ण) पुराणानां वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- पुराणानां संख्या कियती?
   उत्तरम्- अष्टादश।

2. प्रश्न- कति उपपुराणानि, कानि च तानि ?
   उत्तरम्- 18-अष्टादश। 1. सनत्कुमारः, 2. नरसिंहः, 3. नन्दः, 4. शिवधर्मः, 5. दुर्वासरः, 6. नारदीयः, 7. कपिलः, 8. वामनः, 9. उशनसः, 10. मानवः, 11. वरुणः, 12. कलिः, 13. महेश्वरः, 14. साम्बः, 15. सौरः, 16. पराशरः, 17. मारीचः, 18. भार्गवः।
3. प्रश्न- "व" चतुष्टयं किम्?
   उत्तरम्- वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम्।
4. प्रश्न- "म" द्वयं किम्?
   उत्तरम्- मत्सयपुराणम्, माक्रण्डेयपुराणम्।
5. प्रश्न- "भ" द्वयं किम्?
   उत्तरम्-भविष्यपुराणम्, भागवतपुराणम्।
6. प्रश्न- "ब्र" त्रयं किम्?
   उत्तरम्- ब्रह्माण्डपुराणम्, ब्राह्मपुराणम्, ब्रह्मवैवर्त्तञ्च।
7. प्रश्न- "अ" एकं किम्?
   उत्तरम्- अग्निपुराणम्।
8. प्रश्न- "ना" एकं किम्?
   उत्तरम्-नारदपुराणमृ।
9. प्रश्न- "प" एकं किम्?
   उत्तरम्- पद्मपुराणम्।
10. प्रश्न- "लिं" एकं किम्?
    उत्तरम्- लिङ्गपुराणम्।
11. प्रश्न- "ग" एकं किम्?
    उत्तरम्- गरुड़पुराणम्।
12. प्रश्न- "कू" एकं किम्?
    उत्तरम्- कूर्मपुराणम्।
13. प्रश्न- "स्क" एकं किम्?
    उत्तरम्- स्कन्दपुराणम्।
14. प्रश्न- सर्वशास्त्राणां प्रथमंब्रह्मणा किं स्मृतम्?
    उत्तरम्- पुराणम्।
15. प्रश्न- "द्वादशस्कन्धाः" कस्मिन् पुराणे सन्ति?
    उत्तरम्- श्रीमद्भागवतपुराणे।
16. प्रश्न-कस्मिन् पुराणे"ब्रह्म-वैष्णव-शैव-सौर-प्रतिसर्ग" इति पञ्च पर्वाणि सन्ति?
    उत्तरम्- भविष्यपुराणे।
17. प्रश्न-ब्रह्म-प्रकृति-गणेश-श्रीकृष्णजन्मखण्डाश्चेति चत्वारःखण्डा कस्य पुराणस्य सन्ति?
    उत्तरम्- ब्रह्मवैवर्तपुराणस्य।

18. प्रश्न- सृष्टिः कतिविधा? कास्ताः?
उत्तरम्- चतुर्विधा। प्राकृतिकी, ब्राह्मी, मानसी, मैथुनीसृष्टिः।
19. प्रश्न- प्रलयः कतिविध इति विष्णुपुराणं निर्दिशति?
उत्तरम्- चतुर्विधः प्रलयः। (नित्यः, नैमितिकः, प्राकृतः आत्यन्तिकश्च।)
20. प्रश्न- भक्तिः कतिधा भवति?
उत्तरम्- नवधा।
21. प्रश्न- ऋषीणां सप्तभेदाः के?
उत्तरम्- ब्रह्मर्षिः, देवर्षिः, महर्षिः, परमर्षिः, काण्डर्षिः, श्रुतर्षिः, राजर्षिः।
22. प्रश्न- "कालमाधवः" - इति कस्य शास्त्रस्य ग्रन्थः?
उत्तरम्- धर्मशास्त्रस्य।
23. प्रश्न-श्रीमद्गीतायाः अनुसारं बुद्धेः परतः कः?
उत्तरम्- आत्मा।
24. प्रश्न- भगवद्गीतायां श्लोकसङ्ख्या कति?
उत्तरम्- 700 सप्तशतानि।
25. प्रश्न- महाभारतस्य कस्मिन् पर्वणि भगवद्गीताऽस्ति?
उत्तरम्- भीष्मपर्वणि।
26. प्रश्न- वैजयन्तीकोशग्रन्थस्य "अपरं प्रसिद्धं नाम" किम्?
उत्तरम्- यादवकोषः।
27. प्रश्न- अमरकोशस्य अपरं नाम किम्?
उत्तरम्- नामलिङ्गानुशासनम्।
28. प्रश्न- विष्णुसहस्रनामस्तोत्रं कुत्र वर्तते?
उत्तरम्- महाभारते।
29. प्रश्न- व्यासस्य पितामहः कः?
उत्तरम्- शक्तिः।
30. प्रश्न- "परोपकारः पुण्याय पापाय परपीडनम्" इति कस्य वचनद्वयम्?
उत्तरम्- व्यासस्य।
31. प्रश्न- "प्रस्थानत्रयम्" इति प्रसिद्धे ग्रन्थत्रयेकोऽयं ग्रन्थः नान्तर्भवति?
उत्तरम्- श्रीमद्भागवतम्।
32. प्रश्न- पुराणेषु "लक्ष्मीः" कतिभिः नामभिः वर्णिता?
उत्तरम्- 8 अष्टाभिः।
33. प्रश्न- भगवतः विष्णोः कति अवताराः प्रसिद्धाः?
उत्तरम्- 10 दश।
34. प्रश्न- मत्स्यावतारे "भगवान् विष्णुः" कं राक्षसम् उतवान्?
उत्तरम्- ह्यग्रीवम्।
35. प्रश्न- भगवान् विष्णुः कच्छपरूपंधृत्वा काम् अचलम् उत्थापितवान्?

उत्तरम्- मन्दराचलम्।

36. प्रश्न- समुद्रमन्थनात् कः मणिः उद्गतः?
उत्तरम्- कौस्तुभमणिः।

37. प्रश्न- समुद्रमन्थनात् उद्गतस्य अश्वस्य किं नाम?
उत्तरम्- उचैःश्रवा।

38. प्रश्न- जले निमग्नां पृथ्वीमुद्धर्तुं "भगवान् विष्णुः" कम् अवतारम् अजृजत्?
उत्तरम्- वराहावतारम्।

39. प्रश्न- वराहावतारे "भगवान् विष्णुः" कम् अहन्?
उत्तरम्- हिरण्याक्षम्।

40. प्रश्न- स्तम्भमध्यात् कोऽयं भगवान् प्रकटोऽभूत्?
उत्तरम्- नृसिंहः।

41. प्रश्न- रेणुका जमदम्न्योः ऋषिदम्पत्योः पुत्रः कः?
उत्तरम्- परशुराम

42. प्रश्न- इन्द्रस्य वाहनं किं तस्य नाम च किम्?
उत्तरम्- गजः-ऐरावतः।

43. प्रश्न- नलकूवेरः कस्य पुत्रः?
उत्तरम्- कुबेरस्य।

44. प्रश्न- अलकापुरी कस्य राजधानी?
उत्तरम्- कुबेरस्य।

45. प्रश्न-यमधर्मराजस्य पितरौ कौ?
उत्तरम्- संज्ञा-सूर्यौ।

46. प्रश्न- जीवानां शुभाशुभकर्मणोरङ्कनं कः करोति-?
उत्तरम्- चित्रगुप्तः।

47. प्रश्न- देवचिकित्सकौ सूर्यपुत्रौ कौ?
उत्तरम्- अश्विनीकुमारौ।

48. प्रश्न- देवसेनापतिः स्कन्दपुराणोपदेष्टा च कः?
उत्तरम्- कार्तिकेयः।

49. प्रश्न- शाल्वदेशस्य राज्ञः सत्यवतः पत्नी-का?
उत्तरम्- सावित्री।

50. प्रश्न- "सत्यवान्" कस्य पुत्रः?
उत्तरम्- द्युमत्सेनस्य।

51. प्रश्न-यमराजं प्रसाद्य स्वपत्युः प्राणान् का पुनः प्राप्तवती-?
उत्तरम्- सावित्री।

52. प्रश्न- कोऽयं महर्षि यः ब्रह्मा-विष्णु-महेश्वराणां चरित्रं परीक्षितुं गतः?
उत्तरम्- भृगुमहर्षिः।

53. प्रश्न- प्रसिद्धः "त्रिशङ्कुः-पुत्रः" कः?
उत्तरम्- हरिश्चन्द्रः।
54. प्रश्न- "कुम्भयोनिः, कुम्भजन्मा, घटोद्भवः, कलशयोनिः" इति कं कथयन्ति?
उत्तरम्- अगस्त्यमहामुनिम्।
55. प्रश्न- विदर्भराजपुत्री अगस्त्यमुनेश्च पत्नी का?
उत्तरम्- लोपामुद्रा।
56. प्रश्न- "दम-दान्त-दमन" इति त्रयः कस्याः भ्रातरः?
उत्तरम्- दमयन्त्याः।
57. प्रश्न- दमयंती पत्नीत्वेन प्राप्तुं के देवाः नलं दूतरूपेण विदर्भ देशं प्रेषितवन्तः?
उत्तरम्- इन्द्रः वरुणः यमः अग्निः इति चत्वारः।
58. प्रश्न- श्रीमद्भगवद्गीतायाः एकादशाध्यायस्य नाम किम्?
उत्तरम्- विश्वरूपदर्शनयोगः।
59. प्रश्न- "शर्मिष्ठा" कस्य पुत्री?
उत्तरम्- वृषपर्वणः।
60. प्रश्न- कार्तवीर्यः कस्य देशस्य राजा बभूव?
उत्तरम्- हैहयदेशस्य।
61. प्रश्न- कार्तवीर्यार्जुनं कः "अहनत्" ?
उत्तरम्- परशुरामः।
62. प्रश्न- कोऽयं सूर्यवंशीयो राजा, येन षष्ठिसहस्रं पुत्रा उत्पादिता?
उत्तरम्- सगरः।
63. प्रश्न- कोऽयं प्रयत्नः सगरस्य प्रपौत्रनाम्ना अद्यापि प्रसिद्धः?
उत्तरम्- भगीरथप्रयत्नः।
64. प्रश्न- रेणुका कस्य माता आसीत्?
उत्तरम्- परशुरामस्य।
65. प्रश्न- "यतोऽभ्युदय निःश्रेयससिद्धिःस धर्मः" इति पंक्तिरियं कुत्र लभ्यते?
उत्तरम्- वैशेषिकसूत्रसारे।
66. प्रश्न-"काम्यानां कर्मणां न्यासं सन्यासंकवयो विदुः" इति श्लोकवाक्यं केन कथितम्?
उत्तरम्- भगवता श्रीकृष्णेन।
67. प्रश्न- आचार्यः स्ववादानुगुणम् योजयन्-?
उत्तरम्-अद्वैतवादः-शङ्कराचार्यः, विशिष्टाद्वैतवादः-रामानुजाचार्यः, द्वैतवादः-मध्वाचार्यः, द्वैताद्वैतवादः-निम्बार्काचार्यः, शुद्धाद्वैतवादः-वल्लभाचार्यः।
68. प्रश्न- स्वकनिष्ठिकाङ्गुल्या भगवान् श्रीकृष्णः कं पर्वतम् उद्धृतवान्?
उत्तरम्- गोवर्धनपर्वतम्।
69. प्रश्न- अहिंसायाः अवतारः कः?
उत्तरम्- बुद्धः।

70. प्रश्न- धर्मशास्त्रेषु भगवतो विष्णोः दशमावतारः कः वर्णितः?
उत्तरम्- कल्कि-अवतारः।
71. प्रश्न- विश्वामित्रस्य तपस्याभङ्गं का कृतवती?
उत्तरम्- मेनका।
72. प्रश्न- समुद्रमन्थनात्परं विष्णुः किं रूपं धृत्वा अमृतं पायितवान्?
उत्तरम्- मोहनीरूपम्।
73. प्रश्न- भगवतः कृष्णस्य मातुः नाम किम्?
उत्तरम्- देवकी।
74. प्रश्न- "सूर्यदेवः" कतिभिः नामभिः पूज्यते?
उत्तरम्- 108 नामभिः।
75. प्रश्न- विष्णोः कति नामानि प्रसिद्धानि?
उत्तरम्- 1000 नामानि।
76. प्रश्न- हस्तस्य भूषणं किम्?
उत्तरम्- दानम्।
77. प्रश्न- केन शुद्धिः?
उत्तरम्- स्नानेन।
78. प्रश्न- केन तृप्तिः?
उत्तरम्- भोजनेन।
79. प्रश्न- केन मुक्तिः?
उत्तरम्- ज्ञानेन।
80. प्रश्न- परोपकाराय के फलन्ति?
उत्तरम्- वृक्षाः।
81. प्रश्न- कानि अष्टगन्धांनि?
उत्तरम्-1. अगरः, 2. तगरः, 3. चन्दनम्, 4. कस्तूरी, 5. रक्तचन्दनम्, 6. कुङ्कमः, 7. देवदारु, 8. केसरः।
82. प्रश्न- के सप्तर्षयः सन्ति?
उत्तरम्-1. मरीच, 2. अंगिरा, 3. अत्रिः, 4. पुलस्त्य, 5. पुलहः, 6. क्रतुः, 7. वशिष्ठः।
83. प्रश्न- का अष्टसिद्धयः सन्ति?
उत्तरम्-1. अणिमा, 2. महिमा, 3. गरिमा, 4. लघिमा, 5. प्राप्तिः, 6. प्राकाम्य, 7. ईशित्वः, वशित्वः।
84. प्रश्न- काः सप्तमृत्तिकाः सन्ति?
उत्तरम्-1. घोटकशाला, 2. गजशाला, 3. बांबी, 4. सरित्सङ्गमः, 5. तड़ाग, 6. राजद्वारः, 7. वैश्यालयः।
85. प्रश्न- कानि सप्तधान्यानि सन्ति?
उत्तरम्- 1. यवः, 2. धान्यम्, 3. तिलः, 4. कंगनी, 5. मुद्गः, 6. चणकः, 7. सोंवा।

86. प्रश्न- के नवनिधय: सन्ति?
उत्तरम्-1. महापद्म:, 2. पद्म, 3. शङ्ख:, 4. कच्छप:, 5. मुकुन्द:, 6. कुन्द:, 7. खर्व:,
87. प्रश्न- के पञ्चवायव: सन्ति?
उत्तरम्- 1. प्राण:, 2. अपान:, 3. व्यान:, 4. उदान:, 5. समान:।
88. प्रश्न- कामस्य के पञ्चशरा: सन्ति?
उत्तरम्-1. अरविन्दपुष्पम्(उन्मादक बाण) 2. अशोकपुष्पम् (तापक बाण) 3. चूतपुष्पम् (शोषकबाण) 4नवमल्लिका(स्तम्भकबाण) 5नीलोत्पलपुष्पम् (सम्मोहकबाण)
89. प्रश्न- के पञ्चदेवा:(वृक्षा:) सन्ति?
उत्तरम्-1. आम्रम्, 2. जम्बू, 3. कपित्थ:, 4. वट:, 5. बिल्व:।
90. प्रश्न- के सन्ति षोडशोपचारा:?
उत्तरम्-1. पाद्यम्, 2. अर्घ्यम्, 3. आचमनम्, 4. स्नानम्, 5. वस्त्रम्, 6. आभूषणम्, 7. गन्ध:, 8. पुष्प:, 9. धूप:, 10. दीप:, 11. नैवेद्यम्, 12. आचमनम्, 13. ताम्बूलम्, 14. स्तवपाठ:, 15. तर्पणम्, 16. नमस्कार:।
100. प्रश्न- देवाणां पञ्चवृक्षा: के सन्ति?
उत्तरम्-मन्दार:, 2. पारिजात:, 3. सनतान:, 4. कल्पवृक्ष, 5. हरिचन्दनम्।
101. प्रश्न- के षड्रसा: सन्ति?
उत्तरम्- 1. मधुरम्, 2. लवणम्, 3. कटु:, 4. तिक्त:, 5. कषाय:, 6. अम्ल:।
102. प्रश्न- के सप्तस्वरा:?
उत्तरम्-सा रे ग म प ध नि(संक्षेपाक्षर) 1. षड्ज:, 2. ऋषभ:, 3. गान्धार:, 4. मध्यम:, 5. पञ्चमम्, 6. धवैत:, 7. निषद:।
103. प्रश्न- कानि चतुर्विधवाद्यानि सन्ति?
उत्तरम्- 1. तत:, आनद्ध:, 3. सुषिर:, 4. धन:।
104. प्रश्न- के द्विविधनृत्ये स्त:?
उत्तरम्- 1. लास्य:, 2. ताण्डव:।
105. प्रश्न- के नवरसा: सन्ति?
उत्तरम्-1. शृंगार:, 2. वीर:, 3. करुण:, 4. हास्य:, 5. रौद्र:, 6. वीभत्स:, 7. भयानक:, 8. अद्भुत:, 9. शान्त:।
106. प्रश्न- के चतुर्दश-मन्वन्तरा: सन्ति?
उत्तरम्-1. स्वायम्भुव:, 2. स्वारोचिष:, 3. औत्तमि, 4. तामसि, 5. रैवत:, 6. आयुष:, 7. वैवस्वत:, 8. सावर्णि, 9. दक्षसावर्णि, 10. ब्रह्मसावर्णि, 11. धर्मसावर्णि, 12. रौद्रसावर्णि, 13. रौच्यसावर्णि, 14. भौत्यसावर्णि।
107. प्रश्न- के सप्तसमुद्रा: सन्ति?
उत्तरम्-1. क्षीरसागर:, 2. लवणसागर:, 3. दधिसागर:, 4. घृतसागर:, 5. मद्यसागर:, 6. इक्षुसागर:, 7. स्वादुसागर:।

108. प्रश्न- जम्बूदीपस्य नववर्षाः के?
उत्तरम्-1. भारतवर्षः, 2. किम्पुरुषः, 3. हरिवर्षः, 4. रम्यवर्षः, 5. हिरण्यवर्षः, 6. कुरुवर्षः, 7. भद्राश्ववर्षः, 8. केतुमालवर्षः, 9. इलावृत्तवर्षः।

109. प्रश्न- के पञ्चमहायज्ञाः सन्ति?
उत्तरम्-1. ब्रह्मयज्ञः, 2. देवयज्ञः, 3. अतिथियज्ञ, 4. पितृयज्ञः, 5. भूतयज्ञः।

110. प्रश्न- के त्रयः अग्नयः सन्ति?
उत्तरम्- दक्षिणाग्निः, 2. गार्हपत्याग्निः, 3. आहवनीयाग्निः।

111. प्रश्न- जपस्य का भेदत्रयी अस्ति?
उत्तरम्- 1. वाचिकजपः, 2. उपांशुजपः, 3. मानसिकजपः।

112. प्रश्न- का षाडगुण्य नीतयः?
उत्तरम्- 1. सन्धिः, 2. विग्रहः, 3. यानः, 4, आसनः, 5. द्वैधी, 6. आश्रयः।

113. प्रश्न- का चत्वारोपायाः सन्ति?
उत्तरम्- 1. सामः, 2. दामः, 3. दण्डम्, 4. भेदः।

114. प्रश्न- काः अक्षौहिणी सेना सन्ति?
उत्तरम्-गजाः-21, 870, रथिनः-21, 870, अश्वारोहिषा-65, 610, पदातयः-1, 09, 350, सर्वसैनिकाः=2,17,700,

115. प्रश्न- काः दशदिशः सन्ति?
उत्तरम्- 1. प्राची, 2. आग्नेयी, 3. अवाची, 4. नैर्ऋत्यम्, 5. प्रतीची, 6. वायव्यम्, 7. उदीची, 8. ऐशानम्, 9. ऊर्ध्व, 10. अधोदिशः।

116. प्रश्न- कति पञ्चरत्नानि?
उत्तरम्- 1. सुवर्णम्, 2. हीरकम्, 3. सौकिकम्, 4. पद्यरागः, 5. नीलरागः।

117. प्रश्न- "दुर्गासप्तशती" इत्यस्य वर्णनं कस्मिन् पुराणे वर्तते?
उत्तरम्- मार्केण्डेय-पुराणे।

118. प्रश्न- यज्ञस्य कति प्रकाराः के च ते?
उत्तरम्-5 पञ्चप्रकाराः (1. ऋषियज्ञः, 2. देवयज्ञः, 3. भूतयज्ञः, 4. अतिथियज्ञः, 5. पितृयज्ञः।)

119. प्रश्न- "तमसो मा ज्योतिर्गमय" इदं वाक्यं कस्याम् उपनिषदि?
उत्तरम्- बृहदारण्यकोपनिषदि।

120. प्रश्न- काः सन्ति चतुर्दश विद्याः?
उत्तरम्- अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश।। (वि. पु.)

121. प्रश्न- काः सन्ति अष्टादश विद्याः?
उत्तरम्- आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात्।
अर्थशास्त्रं परं तस्मात् विद्याह्यष्टादश स्मृताः।। (वि. पु. 9. 28, 29)

122. प्रश्न- कला कति प्रकारकाः भवन्ति?
उत्तरम्- 64 चतुष्षष्टिः प्रकारकम्।

123. प्रश्न- शिल्पम् कति प्रकारकम् भवति?
उत्तरम्- 18 अष्टादश प्रकारकम्।
124. प्रश्न- ब्रह्मकर्म कति प्रकारकं भवति?
उत्तरम्- 9 नव प्रकारकम्।
125. प्रश्न- क्षात्रकर्म कतिविधम् भवति?
उत्तरम्- 7 सप्त विधम्।
126. प्रश्न- प्रचीन-भारते का: तिश्र: लिपय: आसन्?
उत्तरम्-1. ब्राह्मीलिपि:, 2. खरोष्ठीलिपि:, 3. सिन्धुलिपि:।
127. प्रश्न- प्रचीन-भारते जाते: आधार: क: आसीत्?
उत्तरम्- "गुण: कर्म च।
128. प्रश्न- "पञ्चमवेद:" कं कथ्यते?
उत्तरम्- महाभारतम्।
129. प्रश्न- महाभारतस्य काभ्यां नामभ्यां प्रसिद्धिरभूत?
उत्तरम्- प्रथमम् जय:, द्वितीयम् भारतम्।
130. प्रश्न- कुम्भकेतुं क: हतवान्?
उत्तरम्- प्रद्युम्न:।
131. प्रश्न- कुम्भकेतुदैत्यस्य पत्नी का?
उत्तरम्- कामिनी।
132. प्रश्न- मायावती कस्य पत्नी आसीत्?
उत्तरम्- शमरासुरस्य।
133. प्रश्न-यदुवंशीविनाशाय कृष्णं का पतिव्रतानारी शापं प्रदत्तवती?
उत्तरम्- कुम्भकेतो: पत्नी कामिनी।
134. प्रश्न- महाभारतस्य खिलपर्वं किं कथ्यते?
उत्तरम्- हरिवंशम्।
135. प्रश्न- विष्णु-विषयक-पुराणं किं कथ्यते?
उत्तरम्- सात्विकम्।
136. प्रश्न- ब्रह्मविषयक-पुराणं किं कथ्यते?
उत्तरम्- राजसम्।
137. प्रश्न- शिवविषयकपुराणं किं कथ्यते?
उत्तरम्- तामसम्।
138. प्रश्न- अष्टादशपुराणेषु सर्वदीर्घ: पुराण: क:, तस्मिन् कति श्लोका: सन्ति?
उत्तरम्- स्कन्दपुराण:-81, 100 श्लोका:।
139. प्रश्न- अष्टादशपुराणेषु सर्वलघु पुराण: क:, तस्मिन् कति श्लोका: सन्ति?
उत्तरम्- मार्कण्डेयपुराण:-9000श्लोका:।

140. प्रश्न- पुराणस्य कानि पञ्चलक्षणानि?
उत्तरम्- 1. सर्गः, 2. प्रतिसर्गः, 3. वंशः, 4. मन्वतरः, 5. वंशानुचरित।
141. प्रश्न- पुराणेषु पंचदेवानां कानि नामानि सन्ति?
उत्तरम्- 1. ब्रह्मा, 2. विष्णुः, 3. शिवः, 4. गणेशः, 5. सूर्यः।
142. प्रश्न- कानि दशावतारनामानि सन्ति?
उत्तरम्-1. मत्स्यः, 2. कच्छपः, 3. वराहः, 4. नृसिहः, 5. वामनः, 6. परशुरामः, 7. रामः, 8. बलरामः, 9. बुद्धः, 10. कल्किः।
143. प्रश्न- कानि नवदुर्गानामानि सन्ति?
उत्तरम्-1. शैलपुत्री, 2. ब्रह्मचारिणी, 3. चन्द्रघण्टा, 4. कूष्माण्डा, 5. स्कन्दमाता, 6. कात्यायनी, 7. कालरात्रिः, 8. महागौरी, 9, सिद्धिदात्री।
144. प्रश्न- कानि पञ्चपाण्डवनामानि सन्ति?
उत्तरम्- 1. युधिष्ठिरः, 2. भीमः, 3. अर्जुनः, 4. नकुलः, 5. सहदेवः।
145. प्रश्न- भानामती कस्य धात्री-माता आसीत्?
उत्तरम्- प्रद्युम्नस्य।
146. प्रश्न- कानि द्वादशज्योतिर्लिङ्गनामानि सन्ति?
उत्तरम्-1. सोमनाथः, 2. मल्लिकार्जुनः, 3. महाकालेश्वरः, 4. ओङ्कारेश्वरः, 5. बैद्यनाथः, 6. भीमशङ्करः, 7. रामेश्वरः, 8. नागेश्वरः, 9. विश्वनाथः, 10. त्र्यम्बकेश्वरः, 11. केदारनाथः, 12. घृष्णेश्वरः।
147. प्रश्न- पुराणानां रचनाकारः कोऽस्ति?
उत्तरम्- वेदव्यासः।
148. प्रश्न-देवी-संतोषी कस्य पुत्री आसीत्?
उत्तरम्- गणेशस्य।
149. प्रश्न- गीतायां कति अध्यायाः सन्ति?
उत्तरम्- 18 अष्टाध्यायाः।
150. प्रश्न- श्रीमद्भागवतपुराणे कति स्कन्धाः सन्ति?
उत्तरम्- 12 द्वादश स्कन्धाः।
151. प्रश्न- धनं गृहीत्वा कृतोविवाहः कः कथ्यते?
उत्तरम्- प्राजापत्यः।
152. प्रश्न- अभिचाराः कति सन्ति?
उत्तरम्- चत्वारः।
153. प्रश्न- निर्णयसिन्धु इत्यस्य रचनाकारः कः?
उत्तरम्- कमलाकरः।
154. प्रश्न-गोयुग्मं दत्वा कः विवाहः भवति?
उत्तरम्- आर्ष-विवाहः।

155. प्रश्न- उपाकर्म कस्मिन् कार्ये भवति?
उत्तरम्- वेदारम्भे।
156. प्रश्न- धर्मशास्त्रस्य सामग्री कस्मिन् पुराणे अस्ति?
उत्तरम्- ब्रह्मपुराणे।
157. प्रश्न- राजा कः भवति?
उत्तरम्- क्षत्रियः।
158. प्रश्न- पुत्राः कति सन्ति?
उत्तरम्- 12 द्वादशः।
159. प्रश्न- मन्त्री कः भवति?
उत्तरम्- ब्राह्मणः।
160. प्रश्न- निम्बार्कमते एकादश्यां वेधः कदा भवति?
उत्तरम्- 52 घड़ी।
161. प्रश्न- "राजा कालस्य कारणम्" कस्मिन् ग्रन्थे कथितमस्ति?
उत्तरम्- महाभारते।
162. प्रश्न- राक्षसमाता का आसीत्?
उत्तरम्- दिति।
163. प्रश्न- "मामेकं शरणं व्रज" इति कस्मिन् ग्रन्थे अस्ति?
उत्तरम्- गीतायाम्।
164. प्रश्न- कस्मिन् पुराणे अलंकारस्य वर्णनमस्ति?
उत्तरम्- अग्निपुराणे।
165. प्रश्न- अग्निपुराणस्य रचनाकारः कः?
उत्तरम्- व्यासः।
166. प्रश्न- "योगः कर्मसु कौशलम्" इति कस्मिन् ग्रन्थे अस्ति?
उत्तरम्- गीतायाम्।
167. प्रश्न- भागवत-पुराणस्य रचनाकारः कः?
उत्तरम्- व्यासः।
168. प्रश्न- देवमाता का आसीत्?
उत्तरम्- अदितिः।
169. प्रश्न- गीतायाः उपदेशः कुत्र प्रदत्तवान्?
उत्तरम्- कुरुक्षेत्रे।
170. प्रश्न- काव्यशास्त्रस्य वर्णनं कस्मिन् पुराणे वर्तते?
उत्तरम्- अग्निपुराणे।
171. प्रश्न- "कर्मण्येवाधिकारस्ते" कस्य ग्रन्थस्य अस्ति?
उत्तरम्- गीतायाः।

172. प्रश्न- देवी भागवते कति स्कन्धा: सन्ति?
उत्तरम्- 12 द्वादश स्कन्धा:।
173. प्रश्न- विष्णुपुराणे कति अध्याया: कति श्लोकाश्च विद्यते?
उत्तरम्- 126 अध्याया:, 23ए000 श्लोका:।
174. प्रश्न- श्रीमद्भागवत् गीतायां कति अध्याया: सन्ति?
उत्तरम्- 18 अष्टदशाध्याया:।
175. प्रश्न- "नारदपुराणानुसारे "अध्यात्मरामायणस्य उपजीव्य-ग्रन्थ: क:?
उत्तरम्- ब्रह्माण्डपुराणम्।
176. प्रश्न- भागवत पुराणस्य प्रवक्ता कोऽस्ति?
उत्तरम्- शुकदेव।
177. प्रश्न- नाट्यशास्त्रस्य सामग्री कुत्र अस्ति?
उत्तरम्- अग्निपुराणे।
178. प्रश्न- रामानुज सम्प्रदायस्य सामग्री कुत्र प्राप्यते?
उत्तरम्- विष्णुपुराणे।
179. प्रश्न- मतान्तरेण नारदपुराणस्य स्थाने कस्य पुराणस्य गणना भवति?
उत्तरम्- शिवपुराणस्य।
180. प्रश्न- उद्धव-गीताया: प्रवक्ता कोऽस्ति?
उत्तरम्- वेदव्यास:।
181. प्रश्न- आत्मान: अनश्वरवादस्य वर्णनं कुत्र अस्ति?
उत्तरम्- गीतायाम्।
182. प्रश्न- अष्टादश-पुराणानां लेखक: क:?
उत्तरम्- वेद-व्यास:।
183. प्रश्न- श्रीमद्भागवतपुराणे कियन्त: श्लोका: सन्ति?
उत्तरम्- 18,00 अष्टादशसहस्राणि।
184. प्रश्न- "विद्यावतां भागवते परीक्षा" इति केन सम्बद्धा अस्ति?
उत्तरम्- श्रीमद्भागवतेन।
185. प्रश्न- "रास-पञ्चाध्यायी" इति कस्य पुराणस्य विषय:?
उत्तरम्- श्रीमद्भागवतस्य।
186. प्रश्न- "शोक: श्लोकत्वमागत:" इयं सूक्ति: केन सम्बद्धा?
उत्तरम्- महर्षिणा वाल्मीकिना।
187. प्रश्न- "ज्ञानकर्मसन्न्यासयोग:" इति भगवद्गीताया: कस्याध्यायस्य नाम?
उत्तरम्- चतुर्थोऽध्यायस्य।
188. प्रश्न- भक्तराजस्य प्रह्लादस्य पुत्र: क:?
उत्तरम्- विरोचन:।

189. प्रश्न- श्रीमद्भगवद्गीतायाः अनुसारम् आत्मा कुतः श्रेष्ठः?
उत्तरम्- बुद्धेः।

190. प्रश्न- गृह्यसूत्रेषु कति संस्काराणां वर्णनं विद्यते?
उत्तरम्- 42 द्विचत्वारिंशत्।

191. प्रश्न- कानि सन्ति सुभाषितानि/सूक्तानि वा?
उत्तरम्- पुराणेष्वितिहासेषु तथा रामायणादिषु।
वचनं सारभूतं यत् तत् सुभाषितमुच्यते।।

193. प्रश्न- स्वर्गीयाः देवाः के सन्ति?
उत्तरम्- द्यौः, वरुणः, मित्रः, आदित्यः, सूर्यः, सविता, पूषा, विष्णुः, अश्विन्, उषा, रात्र्यादिश्च।

194. प्रश्न- वायवीयाः देवाः के सन्ति?
उत्तरम्- इन्द्रः, रूद्रः, मरुतः, वायुः, अपानपात्, पर्जन्यः, आप आदयः।

195. प्रश्न- के सन्ति पार्थिवदेवाः?
उत्तरम्- पृथिवी, अग्निः, बृहस्पतिः, सोमादयश्च।

196. प्रश्न- व्यासाऽनुसारेण पुण्यं किम्?
उत्तरम्-परोपकारः।

197. प्रश्न- पापाम् किम् भवति?
उत्तरम्- परपीडनम्।

198. प्रश्न- सतां विभूतयः किमर्थं भवन्ति?
उत्तरम्- परोपकाराय।

199. प्रश्न- भारतीय-संस्कृतौ जनानां मध्ये समन्वयः कथं विलोक्यते?
उत्तरम्- आचारेण, व्यवहारेण, शीलेन, संस्कारादिना च।

200. प्रश्न-स्नानावसरे मानसपटले भारतवर्षस्य अखण्डरूपस्य चित्रं कस्मिन् मन्त्रे प्रस्तुतं भवति?
उत्तरम्- गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।। इति मन्त्रे।

201. प्रश्न- "गुरूणां चैव सर्वेषां मातैव परमो गुरुः" इम्ययं विचारः कस्य विद्यते?
उत्तरम्- व्यासस्य।

202. प्रश्न- सत्ययुगस्य परिमाणं किमस्ति?
उत्तरम्- 4800 दिव्यवर्षम्, मानवस्य-1728000।

203. प्रश्न- त्रेतायुगस्य परिमाणं किमस्ति?
उत्तरम्- 3600 दिव्यवर्षम्, मानवस्य-1296000।

204. प्रश्न- द्वापरयुगस्य परिमाणं किमस्ति?
उत्तरम्- 2400 दिव्यवर्षम्, मानवस्य-864000।

205. प्रश्न- कलियुगस्य परिमाणं किमस्ति?
उत्तरम्- 1200 दिव्यवर्षम्, मानवस्य-432000।

206. प्रश्न- नरकासुरः कस्या कुण्डलम् अपहृतवान्?
उत्तरम्- देवमातुः अदित्याः।
207. प्रश्न- नरकासुरं कः अमारयत्?
उत्तरम्- कृष्णः।
208. प्रश्न- नरकासुरस्य हनन समये कृष्णेन सह का आसीत्?
उत्तरम्- सत्यभामा।
209. प्रश्न- पाण्डवानां राजपुरोहितस्य किं नाम आसीत्?
उत्तरम्- धौम्यः।
210. प्रश्न- सर्वाधिक-दीर्धकालीन-युगः कः?
उत्तरम्- सत्ययुगः।
211. प्रश्न- गीतायां "ज्ञान-कर्म-भक्तिः" समन्वये कृष्णस्य का उक्तिः?
उत्तरम्- "मन्मना भव मद् भक्तो मद्याजी मां नमस्तुरु।
मामेवैष्यसि युक्तवैवमात्मानं मत्परायणः।।
212. प्रश्न- तन्त्रशास्त्रानुसारं यन्त्रः कति विधम्?
उत्तरम्- 2 द्विविधम्, 1. नित्य-यन्त्र, 2. भाव-यन्त्रम्।
213. प्रश्न- महापुराणस्य कानि दश लक्षणानि?
उत्तरम्- 1. सर्गः, 2. विसर्गः, 3. कृतिः, 4. रक्षा, 5. मन्वन्तरः, 6. वंशः, 7. वंशानुचरितम्, 8. संस्था, 9. हेतुः, 10. अपाश्रयः।
214. प्रश्न- मत्स्यपुराणे वास्तुशास्त्रस्य अष्टादश-उपदेष्टारः के सन्ति?
उत्तरम्- 1. भृगुः, 2. अत्रिः, 3. वसिष्ठः, 4. विश्वकर्मा, 5. मयः, 6. नारदः, 7. नग्नजितः, 8. शंकरः, 9. इन्द्रः, 10. ब्रह्मा, 11. कुमारः, 12. नन्दीश्वरः, 13. शौनकः, 14. गर्गः, 15. वासुदेवः, 16. अनिरुद्धः, 17. शुक्रः, 18. बृहस्पतिः।
215. प्रश्न- पद्मपुराणस्य चतुर्थे खण्डे कस्य लोकस्य वर्णनमस्ति?
उत्तरम्- पाताललोकस्य।
216. प्रश्न- चतुर्दश भुवनेषु पृथिव्या उपरि सप्तलोकाः?
उत्तरम्- ऊर्ध्वलोके।
217. प्रश्न- "ब्रह्मपुराणस्य" अपरं नाम किम्?
उत्तरम्- आदिपुराणम्।
218. प्रश्न- "मार्कण्डेय-पुराणे कति अध्यायाः सन्ति?
उत्तरम्- 138 अध्यायाः।
219. प्रश्न- कस्य पुराणस्य उत्तरखण्डं प्रेतखण्डं कथ्यते?
उत्तरम्- गरुड़पुराणस्य।
220. प्रश्न- कस्मिन् पुराणे रत्नस्य परीक्षणविधिः कथ्यते?
उत्तरम्- गरुड़पुराणे।

221. प्रश्न- कस्मिन् पुराणे सर्वेषां पुराणानां विषयसूचिः प्राप्यते?
उत्तरम्- नारदपुराणे।
222. प्रश्न- सूर्यस्य प्रथमकिरणं कस्या उन्नतेः विधायकानि सन्ति?
उत्तरम्- भौतिक-उन्नतेः।
223. प्रश्न- सूर्यस्य सप्ततिकिरणानि कस्या उन्नतेः विधायकानि सन्ति?
उत्तरम्- आध्यात्मिक-उन्नतेः।
224. प्रश्न- सूर्यः अश्वस्य रूपं गृहीत्वा याज्ञवल्क्यं कस्य उपदेशं दत्तवान्?
उत्तरम्- शुक्ल-यजुर्वेदस्य।
225. प्रश्न- उज्जैने प्रकट-ज्योतिर्लिंगस्य किं नाम?
उत्तरम्- महाकालेश्वरः।
226. प्रश्न- शिवस्य मुख्य-उपासना विग्रहः अस्ति?
उत्तरम्- लिङ्गमूर्तिः।
227. प्रश्न- सम्पूर्ण जलराशिः केन प्रकटी भूतः?
उत्तरम्- विष्णुना।
228. प्रश्न- विष्णोः निःश्वासेन प्रकटनम् कस्य अभूत्?
उत्तरम्- श्रुतेः।
229. प्रश्न- विष्णोः लोकस्य किं नाम?
उत्तरम्- वैकुण्ठः।
230. प्रश्न- गणेशस्य भार्याः कति ?
उत्तरम्- 2 द्वे।
231. प्रश्न- गणेशस्य वाहनः क?
उत्तरम्- मूषकः।
232. प्रश्न- पितुराज्ञया परशुरामः केषां शिरश्छेदनं कृतवान्?
उत्तरम्- मातुः रेणुकायाः, ज्येष्ठत्रिभ्रातृणाम् च।

(त) रामायणस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- रामनवमी कस्मिन् मासे कस्यां च तिथौ भवति?
उत्तरम्- चैत्रशुक्लनवम्याम्।
2. प्रश्न- इक्ष्वाकुवंशस्य "राजगुरुः" कः?
उत्तरम्- वसिष्ठः।
3. प्रश्न- उर्मिला-लक्ष्मणयोः कति पुत्राः?
उत्तरम्- द्वौ।
4. प्रश्न- रावणस्य मातुलः लङ्कातद्वीपस्य प्रथमः पालकश्च कः?
उत्तरम्- माल्यवान्।
5. प्रश्न- रामायणे सञ्जीवनौषधिना को वैद्यः लक्ष्मणं पुनरुज्जीवितवान्?
उत्तरम्- सुषेणः।

6. प्रश्न- "एडम्सब्रिज्" इत्यस्य रामायणे केन नाम्ना प्रसिद्धिरासीत्?
   उत्तरम्- रामसेतु नाम्ना।
7. प्रश्न- सीता "लवकुशौ" कुत्र प्रसूतवती?
   उत्तरम्- वाल्मीकेराश्रमे।
8. प्रश्न- इन्द्रजित् मायया केन अस्त्रेण वानरप्रमुखान् रामलक्ष्मणौ च मूर्छितान्?
   उत्तरम्- ब्रह्मास्त्रेण।
9. प्रश्न- सीतामपहृत्य गच्छता रावणेन सह प्रथमं कः युद्धमकरोत्?
   उत्तरम्- जटायुः।
10. प्रश्न- वाल्मीकेः पूर्वतनं नाम किमासीत्?
    उत्तरम्- रत्नाकरः।
11. प्रश्न- दशरथस्य पुत्र्याः नाम किम्?
    उत्तरम्- शान्ता।
12. प्रश्न- दशरथस्य तृतीयायाः पुत्रवध्वाः नाम किम्?
    उत्तरम्- माण्डवी।
13. प्रश्न- दशरथः कस्यां पत्न्यां पुत्रद्वयं प्राप्तवान्?
    उत्तरम्- कनिष्ठायाम्(सुमित्रा)
14. प्रश्न- अशोकवनविध्वंसकः कः?
    उत्तरम्- हनुमान्।
15. प्रश्न- कुम्भनिकुम्भौ कस्य पुत्रौ?
    उत्तरम्- कुम्भकर्णस्य।
16. प्रश्न- कुम्भः केन हतः?
    उत्तरम्- सुग्रीवेण।
17. प्रश्न- निकुम्भः केन हतः?
    उत्तरम्- हनुमता।
18. प्रश्न- ऋष्य शृङ्गमहर्षिः कस्य जामाता?
    उत्तरम्- दशरथस्य।
19. प्रश्न- कैकश्याः कति पुत्राः, के च ते?
    उत्तरम्- त्रयः, 1. रावणः, 2. कुम्भकर्णः, 3. विभीषणः।
20. प्रश्न- कैकश्याः ज्येष्ठपुत्रवधूः का?
    उत्तरम्- मन्दोदरी।
21. प्रश्न- "रावणस्य नाभिमण्डले अमृतभाण्डोऽस्ति" इति कः कथयति?
    उत्तरम्- विभीषणः।
22. प्रश्न- सीताप्रतिकृत्या रामः कं यज्ञं करोति?
    उत्तरम्- अश्वमेधयज्ञम्।

23. प्रश्न- आदिकविः कः?
उत्तरम्- वाल्मीकिः।
24. प्रश्न- कस्य महर्षेः पत्न्यां "इन्द्र" आसक्तः?
उत्तरम्- गौतमपत्न्याम् "अहल्यायाम्"।
25. प्रश्न- इन्द्रं कः राक्षसपुत्रो जितवान्?
उत्तरम्- मेघनादः।
26. प्रश्न- दशरथस्य कुलगुरु कः आसीत्?
उत्तरम्- वशिष्ठः।
27. प्रश्न- रामायणे कति स्कन्धाः सन्ति?
उत्तरम्- 7 सप्त।
28. प्रश्न- वाल्मीकि-रामायणे कस्य रसस्य प्रधानता वर्तते?
उत्तरम्- करुण-रसस्य।
29. प्रश्न- लौकिकसंस्कृत-साहित्यस्य आदिकाव्यं किम्?
उत्तरम्- वाल्मीकिकृतं रामायणम्।
30. प्रश्न- वाल्मीकिकृत रामायणे कति श्लोकाः सन्ति?
उत्तरम्- 24, 000श्लोकाः।
31. प्रश्न- रामायणस्य रचनाकालः कोऽस्ति?
उत्तरम्- 500 ई. पूर्वम्।
32. प्रश्न- श्रीरामः कस्य महर्षेः यज्ञम् अरक्षत्?
उत्तरम्- विश्वामित्रमहर्षेः।
33. प्रश्न- "वानरसेना" कस्मिन् अवतारे विष्णोः आसीत्?
उत्तरम्- श्रीरामावतारे।
34. प्रश्न- कुञ्जरस्य पुत्री, केसरीनाम्नः पत्नी, हनुमतः माता च का?
उत्तरम्- अञ्जना।
35. प्रश्न- "अयोनिजा" इति कस्याः प्रातः स्मरणीयायाः विशेषणम्-?
उत्तरम्- सीतायाः।
36. प्रश्न- शची-इन्द्रयोः पुत्रस्य नाम किम्?
उत्तरम्- जयन्तः।
37. प्रश्न- "अरुन्धती" कस्य ऋषेः पत्नी?
उत्तरम्- वशिष्ठस्य।
38. प्रश्न- विश्वजित् "यज्ञमसौ कृतवान्?
उत्तरम्- रघुः।
39. प्रश्न- प्रहस्तः केन हतः?
उत्तरम्- लक्ष्मणेन।
40. प्रश्न- मकराक्षं कः हतवान्?

उत्तरम्- श्रीरामः।

41. प्रश्न- रामायणस्य रचनाकारः कः?
उत्तरम्- वाल्मीकि।

42. प्रश्न- कानि नृपदशरथपुत्र-पुत्रवधूनामानि सन्ति?
उत्तरम्-1. रामः-सीता, 2. लक्ष्मण-उर्मिला, 3. भरतः-माण्डबी, 4. शत्रुध्नः-श्रुतिकीर्तिः।

43. प्रश्न-अतिकायः केन हतः?
उत्तरम्- लक्ष्मणेन।

44. प्रश्न- केन अस्त्रेन लक्ष्मणः अतिकायं अमारयत्?
उत्तरम्- ब्रह्मास्त्रेण।

45. प्रश्न- कुम्भकरणं कः अमारयत्?
उत्तरम्- श्रीरामः।

46. प्रश्न- रावणं कः अमारयत्?
उत्तरम्- श्रीरामः।

47. प्रश्न- मेघनादः केन हतः?
उत्तरम्- लक्ष्मणेन।

48. प्रश्न- दारुकं कः अमारयत्?
उत्तरम्- लक्ष्मणः।

49. प्रश्न- नरान्तकः केन हतः?
उत्तरम्- अंगदेन।

50. प्रश्न- देवान्तकः केन हतः?
उत्तरम्- हनुमता।

51. प्रश्न- अकम्पन्नं कः अमारयत्?
उत्तरम्- सुग्रीवः।

52. प्रश्न- अक्षयकुमारं केन हतः?
उत्तरम्- हनुमता।

53. प्रश्न- मारीचः केन हतः?
उत्तरम्- श्रीरामेण।

54. प्रश्न- अहल्यायाः उद्धारः केन कृतः?
उत्तरम्- श्रीरामेण।

55. प्रश्न- दशरथस्य चतुर्थपुत्र शत्रुध्नस्य पत्नी नाम किम्?
उत्तरम्- "श्रुतकीर्ति।

56. प्रश्न- दशरथस्य प्रथमपुत्र रामस्य भार्यायाः किं नाम?
उत्तरम्- सीता।

57. प्रश्न- वशिष्ठस्य पितुर्नाम किम्?
उत्तरम्- मित्रावरुणौ।

58. प्रश्न- दशरथस्य द्वितीयायाः पुत्रवध्वाः नाम किम्?
उत्तरम्- "उर्मिला।
59. प्रश्न- अहल्या कस्य पुत्री आसीत्?
उत्तरम्- मुदगलस्य।
60. प्रश्न- अगस्त्यः कस्य पुत्रः आसीत्?
उत्तरम्- मित्रवर्णस्य।
61. प्रश्न- अगस्त्यस्य अपरं नाम किम्?
उत्तरम्- कुम्भजः, घटोद्भवः।
62. प्रश्न- बालिः कस्य राज्यस्य राजा आसीत्?
उत्तरम्- पंपापुरस्य।
63. प्रश्न- बालिं कः अमारयत्?
उत्तरम्- रामः।
64. प्रश्न- हनुमतः मातुर्नाम किमासीत्?
उत्तरम्- अंजनी।
65. प्रश्न- दशरथं कौ अशपताम्?
उत्तरम्- श्रवणस्य पितरौ।
66. प्रश्न- दशरथस्य पत्नीनां कानि नामानि?
उत्तरम्- कौशल्या, कैकेयी, सुमित्रा।
67. प्रश्न- जनकपुरे शिवधनुः कः खण्डितवान्?
उत्तरम्- श्रीरामः।
68. प्रश्न- सीता रामं सर्वप्रथमं कुत्र अपश्यत्?
उत्तरम्- पुष्पवाटिकायाम्।
69. प्रश्न- रामायणे कियन्ति काण्डानि?
उत्तरम्- (7) सप्त।
70. प्रश्न- "शोकः श्लोकत्वमागतः" इयं सूक्तिः केन सम्बद्धा?
उत्तरम्- महर्षिणा वाल्मीकिना।
71. प्रश्न- सुग्रीवस्य भार्या नाम किम्?
उत्तरम्- लोमा।
72. प्रश्न- महावलि-वालेः पत्नी नाम किम्?
उत्तरम्- तारा।
73. प्रश्न- अंगदः कस्य पुत्रः आसीत्?
उत्तरम्- वालेः।
74. प्रश्न- जामवन्तः कस्य मंत्री आसीत्?
उत्तरम्- सुग्रीवस्य।

75. प्रश्न- सुग्रीवस्य राजधानी कुत्रासीत्?
उत्तरम्- किस्किन्धायाम्।
76. प्रश्न- वालिं कः अमारयत्?
उत्तरम्- श्रीरामः।
77. प्रश्न- हनुमान कस्य अवतारः मन्यते?
उत्तरम्- रुद्रस्य।
78. प्रश्न- बाल्मीकि-रामायणस्य प्रथम-सप्तमकाण्डे किं मन्यते?
उत्तरम्- प्रक्षिप्तकाण्डम्।
79. प्रश्न- "चतुर्विंशति साहस्री संहिता" कथ्यते?
उत्तरम्- रामायणम्।
80. प्रश्न- रामायणकारः कः?
उत्तरम्- वाल्मीकिः।
81. प्रश्न- रामायणे मुख्यरूपेण प्रयुक्तं छन्दः किमस्ति?
उत्तरम्- अनुष्टुप्।
82. प्रश्न- रामायणस्य अङ्गीरसः कः?
उत्तरम्- करुणः।
83. प्रश्न- रघुवंशस्य उपजीव्यं काव्यं किमस्ति?
उत्तरम्- रामायणम्।
84. प्रश्न- रामायणे कति सर्गाः विद्यन्ते?
उत्तरम्- (500)
85. प्रश्न- आर्षकाव्येषु "चतुर्विंशतिसाहस्री" संज्ञकं किमस्ति?
उत्तरम्- रामायणम्।
86. प्रश्न- आर्षकाव्यस्य उदाहरणं किमस्ति?
उत्तरम्- रामायणम्।

(थ) महाभारतस्य वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- गङ्गा "शान्तनोः अष्टौपुत्राः" समुत्पन्नाः, तत्र भीष्मः कतमः?
उत्तरम्- अष्टमः।
2. प्रश्न- महाभारते कः पुत्रानुमत्या दौत्येन च वृद्धावस्थायां विवाहमकरोत्?
उत्तरम्- शान्तनुः।
3. प्रश्न- वेदव्यासस्य माता का?
उत्तरम्- सत्यवती।
4. प्रश्न- पाण्डु-धृतराष्ट्र-विदुराणां जनकः कः?
उत्तरम्- कृष्णद्वैपायनः(व्यासः)
5. प्रश्न- श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि उपलभ्यते?
उत्तरम्- भीष्मपर्वणि।

6. प्रश्न- धृतराष्ट्र-पाण्डु-विदुरेषु त्रिषु कः "शूद्रायाम्" उत्पन्नः?
उत्तरम्- विदुरः।
7. प्रश्न- व्यासस्य सम्मुखं का नेत्रे पिधाय गतवती?
उत्तरम्- अम्बिका।
8. प्रश्न- कस्य महर्षेः शापवशात् यमधर्मराजः शूद्ररूपेण अवतरितः?
उत्तरम्- माण्डव्यमहर्षेः।
9. प्रश्न- कुन्त्याः देवरः कः?
उत्तरम्- विदुरः।
10. प्रश्न- नकुलसहदेवौ-कस्याः पुत्रौ-?
उत्तरम्- माद्र्याः।
11. प्रश्न- गान्धारी कस्य पुत्री?
उत्तरम्- गान्धारनरेश-सुबलस्य।
12. प्रश्न-राजापाण्डुः"हरिणवेषेण स्वपत्न्या सह विहरन्तं मुनिं मारितवान्, तस्य मुनेः नाम किम्?
उत्तरम्- किन्दममुनिः।
13. प्रश्न- दुर्योधनप्रभृतीनां कौरवाणां भगिनी का?
उत्तरम्- दुःशला।
14. प्रश्न-हिडिम्बायां राक्षस्यां भीमसेनादुत्पन्नः पुत्रः कः?
उत्तरम्- घटोत्कचः।
15. प्रश्न-विराटराजसभायां पाण्डवाः कति वर्षाणि अवसन्?
उत्तरम्- एकवर्षकालम्।
16. प्रश्न-विराटराज्ये पाण्डवानां कानि नामानि?
उत्तरम्- युधिष्ठिरः-वैयाघ्रपद्यम्, भीमसेनः-वल्लवः, अर्जुनः-बृहन्नला, नकुलः-ग्रन्थिकः, सहदेवः-अरिष्टनेमिः।
17. प्रश्न-अज्ञातवाससमये पाण्डवपत्न्याः द्रौपद्या नाम किमासीत्?
उत्तरम्- सैरन्ध्री।
18. प्रश्न-विराटराज्ञः सेनापतिः कः आसीत्-?
उत्तरम्- कीचकः।
19. प्रश्न-कीचकः कस्याः भ्राता?
उत्तरम्- सुदेष्णायाः।
20. प्रश्न-उत्तरकुमारस्य रथसारथिः कः आसीत्?
उत्तरम्- बृहन्नला।
21. प्रश्न-महाभारतयुद्धे भीष्मः कतमदिवसे बाणैः प्रसाधिताङ्गो निपपात?
उत्तरम्- दशमे दिवसे।
22. प्रश्न-धृष्टद्युम्नशिखण्डी द्रौपदेयान् पञ्चपुत्रान् च कः जघान?

उत्तरम्- अश्वत्थामा।

23. प्रश्न-श्रीकृष्णस्य ज्येष्ठपुत्रस्य नाम किम्?
उत्तरम्- प्रद्युम्नः।

24. प्रश्न-श्रीकृष्णस्य निर्वाणे कस्य व्याधस्य कर्तृत्वमासीत्?
उत्तरम्- जरसस्य।

25. प्रश्न-बभ्रुवाहनेन कः पाण्डवः निपातितः?
उत्तरम्- अर्जुनः।

26. प्रश्न-बभ्रुवाहनस्य माता का?
उत्तरम्- उलूपी।

27. प्रश्न-"इरावतः बभ्रुवाहनः अभिमन्युः" -इत्येते त्रयः कस्य पुत्राः?
उत्तरम्- अर्जुनस्य।

28. प्रश्न-निषादराजस्य हिरण्यधनुनामकस्य पुत्रः गुरुभक्तश्च कः?
उत्तरम्- एकलव्यः।

29. प्रश्न-क्रमशः दशदिनानि कौरवसेनापतिः कः आसीत्?
उत्तरम्- भीष्मः।

30. प्रश्न-अष्टादश दिनानि यावत् प्रवृत्ते कुरुक्षेत्रमहासंग्रामे कति सेनापतय आसन्?
उत्तरम्- चत्वारः।

31. प्रश्न-आत्मनो वधोपायं कः स्वयमसूचयत्-?
उत्तरम्- भीष्मः।

32. प्रश्न-महाप्रस्थानसमये धर्मराजं(युधिष्ठिरं) कः पशुः अनुगतवान्?
उत्तरम्- श्वा(कुक्कुरः)

33. प्रश्न-"नपुंसको भव" -इति अर्जुनं का शप्तवती?
उत्तरम्- ऊर्वशी।

34. प्रश्न-पञ्चपाण्डवेषु कः हस्तिनापुरात् बहिः द्वादशवर्षाण्यवसत्?
उत्तरम्- अर्जुनः।

35. प्रश्न-धृतराष्ट्रस्य मन्त्री कः?
उत्तरम्- सञ्जयः।

36. प्रश्न-कयोः "गुरुशिष्ययोर्मध्ये" त्रयोविंशति दिनानि युद्धमभवत्?
उत्तरम्- परशुरामभीष्मयोः।

37. प्रश्न-के सन्ति सप्त चिरजीविनः?
उत्तरम्- "अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः।
कृपः परशुरामश्च सप्तैते चिरजीविनः।।"

38. प्रश्न-महाभारते कानि सन्ति अष्टादश पर्वाणि?
उत्तरम्-आदि-सभा-वन-विराट्-उद्योग-भीष्म-द्रोण-कर्ण-साल्व-सौप्तिक-स्त्री- शान्ति-अनुशासनाऽश्वमेधा-ऽऽश्रमवासि-मौसल-महाप्रस्थानिक-स्वर्गारोहणाख्यानि-अष्टादशपर्वाणि।

39. प्रश्न-अम्बाकारणात् भीष्मः केन गुरुश्रेष्ठेन सह युद्धं अकुर्वत्?
उत्तरम्- गुरु-परशुरामेणसह।
40. प्रश्न-महाभारत मतानुसारेण अक्षौहिणी सेनायां अश्वानां संख्या का भवति?
उत्तरम्- 65, 610,
41. प्रश्न-"समन्तपञ्चक" इति पदेन कस्य बोधो जायते?
उत्तरम्- कुरूक्षेत्रस्य।
42. प्रश्न-महाभारतमतानुसारेण उत्तङ्कः कोऽस्ति?
उत्तरम्- गुरुभक्तः।
43. प्रश्न-जनमेजयेन कस्य विदुषः पुरोहितपदे अलंकृतम्?
उत्तरम्- सोमश्रणस्य।
44. प्रश्न-महाभारत मतानुसारेण "ऋचीकं" शब्दस्य कोऽर्थः?
उत्तरम्- सूर्यः।
45. प्रश्न-"मगधराज-शिरोमणि" इत्युपाधिना कस्य बोधो जायते?
उत्तरम्- जरासन्धस्य।
46. प्रश्न-महर्षि च्यवनस्य पितुः नाम किमासीत्?
उत्तरम्- भृगुः।
47. प्रश्न-श्रीकृष्णद्वैपायनस्य पितुः नाम किमस्ति?
उत्तरम्- पराशरः।
48. प्रश्न-विचित्रवीर्यस्य पत्नी का आसीत्?
उत्तरम्- अम्बिका।
49. प्रश्न- श्रीकृष्णद्वैपायनस्य मातुः नाम किमस्ति?
उत्तरम्- सत्यवती।
50. प्रश्न-गान्धार प्रदेशस्य राजा कः आसीत्?
उत्तरम्- शकुनी।
51. प्रश्न-मधुवंशस्य राजकुमारी का आसीत्?
उत्तरम्- सुभद्रा।
52. प्रश्न-पाञ्चालीशब्दस्य कोऽर्थः?
उत्तरम्- पाण्डव।
53. प्रश्न-उत्तरायाः पितुः नाम किम्?
उत्तरम्- मत्स्यराजो विराट्।
54. प्रश्न-भीष्मपितामहस्य पितुः नाम किमस्ति?
उत्तरम्- शान्तनुः।
55. प्रश्न-वीर अभिमन्योः माता नाम किम्?
उत्तरम्- सुभद्रा।

56. प्रश्न-नकुलस्य मातुः नाम किम्?
उत्तरम्- माद्री।
57. प्रश्न-सूतवंशशिरोमणि कोऽस्ति?
उत्तरम्- लोकहर्षणः।
58. प्रश्न-नृलोके महाभारतस्य कः प्रवचनकर्त्ता?
उत्तरम्- व्यासः।
59. प्रश्न- महर्षि च्यवनस्य मातुः नाम किमासीत्?
उत्तरम्- पुलोमा।
60. प्रश्न-कति प्रजापतयः प्रभवन्?
उत्तरम्- पञ्च।
61. प्रश्न-जनमेजयः कस्य पुत्रः?
उत्तरम्- परीक्षितस्य।
62. प्रश्न-सारमेयः कस्य पुत्रः?
उत्तरम्- सरमायाः।
63. प्रश्न-अरुणः गरुड़स्य कः?
उत्तरम्- अग्रजः।
64. प्रश्न-शेषनागस्य माता का आसीत्?
उत्तरम्- कद्रू।
65. प्रश्न-जरात्काः कस्य भगिनी?
उत्तरम्- वासुकेः।
66. प्रश्न-परीक्षितस्य पिता कः?
उत्तरम्- अभिमन्युः।
67. प्रश्न-"गीता" महाभारतस्य कस्मिन् पर्वणि वर्णितः?
उत्तरम्- भीष्मपर्वणि।
68. प्रश्न- उत्तरा का आसीत्?
उत्तरम्- अभिमन्योः पत्नी।
69. प्रश्न- महाभारतस्य लेखकः कः?
उत्तरम्- कृष्णद्वैपायनव्यासः वेदव्यासः।
70. प्रश्न- सुभद्रा कस्य पत्नी आसीत्?
उत्तरम्- अर्जुनस्य।
71. प्रश्न- द्रौपदी का आसीत्?
उत्तरम्- पाण्डवानां पत्नी।
72. प्रश्न- महाभारतः कीदृशः ग्रन्थः अस्ति?
उत्तरम्- ऐतिहासिकः।

73. प्रश्न- महाभारते कस्य रसस्य प्रधानता वर्तते?
उत्तरम्- शान्त-रसस्य।
74. प्रश्न- महाभारतग्रन्थे कति श्लोकाः सन्ति?
उत्तरम्- 1, 00, 000 एकलक्षं श्लोकाः।
75. प्रश्न- महाभारतग्रन्थे कति पर्वाणि सन्ति?
उत्तरम्- 18 अष्टादश पर्वानि।
76. प्रश्न- "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्" इति कस्य ग्रन्थस्योक्तिः?
उत्तरम्- महाभारतस्य।
77. प्रश्न-भीष्म-पितामहस्य युधिष्ठिरं प्रति मोक्षधर्म राजधर्म विषयकोपदेशःकस्मिन् पर्वणि उपलभ्यते?
उत्तरम्- शान्तिपर्वणि।
78. प्रश्न- सत्यभामायाः पिता "सत्रजित्" नामा सूर्यात् कं मणिं प्राप्तवान्?
उत्तरम्- स्यमन्तकमणिम्।
79. प्रश्न- "पञ्चमो वेदः" कः कथ्यते?
उत्तरम्- महाभारतम्।
80. प्रश्न- "हरिवंश-पुराणम्" कस्य काव्यस्याङ्गम्?
उत्तरम्- महाभारतस्य।
81. प्रश्न- "हरिवंश-पुराणम्" कियत्सु भागेषु विभक्तम्?
उत्तरम्- (3) त्रिषु भागेषु।
82. प्रश्न- "विष्णुसहस्रनामस्तोत्रम्" इदं कस्यांशः?
उत्तरम्- महाभारतस्य।
83. प्रश्न- "गजेन्द्र-मोक्षः" अयं कस्यांशः?
उत्तरम्- महाभारतस्य।
84. प्रश्न- "धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ। यदि हास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।" इदं पद्यं केन ग्रन्थेन सम्बद्धम्?
उत्तरम्- महाभारतेन।
85. प्रश्न- श्रीकृष्ण-शंखस्य किं नाम?
उत्तरम्-पञ्चजन्यः।
86. प्रश्न- श्रीकृष्णस्य गुरोर्नाम किम्?
उत्तरम्- सान्दीपनि।
87. प्रश्न- सान्दीपनस्य पुत्र नाम किम्?
उत्तरम्- पुरन्दरः।
88. प्रश्न- विराट-राजकुमार-उत्तर कः अमारयत्?
उत्तरम्- शल्यः।

89. प्रश्न-घटोत्कचं कः अमारयत्?
उत्तरम्- कर्णः।
90. प्रश्न- कर्णः केन अस्त्रेण घटोत्कचं हतवान्?
उत्तरम्- इन्द्रप्रदत्त शक्त्यास्त्रेण।
91. प्रश्न- दुःशलायाः पति कः आसीत्?
उत्तरम्- जयन्द्रथः।
92. प्रश्न- मुचकुन्दः कस्य वंशस्य राजा आसीत्?
उत्तरम्- इक्ष्वाकुवंशस्य राजा।
93. प्रश्न- मुचकुन्दस्य पितुर्नाम किम्?
उत्तरम्- मान्धाता।
94. प्रश्न- कालयवनं कः दग्धवान्?
उत्तरम्- मुचकुन्दः।
95. प्रश्न- उग्रश्रवा कस्य पुत्रः आसीत्?
उत्तरम्- लोमहर्षस्य।
96. प्रश्न-युयुधानः कस्य वंशस्य योद्धा आसीत्?
उत्तरम्- वृष्णिवंशावतंसः।
97. प्रश्न- द्रोणाचार्यस्य महातः सैन्य समूहान् कः भूमिगतं कृतवान्?
उत्तरम्- युयुधानः।
98. प्रश्न- काः सन्ति पञ्चकन्यकाः?
उत्तरम्- अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा। पञ्चकन्या स्मरेन्नित्यं महापातक नाशनम्।।
99. प्रश्न- "अवश्यमेव भोक्तव्यं कृत कर्म शुभाशुभम्" कस्येयमुक्तिः?
उत्तरम्- संजयस्य।
100. प्रश्न- राज्ञः परीक्षितस्य कति पुत्राः आसन्, के च ते?
उत्तरम्- चत्वारः, 1. जनमेजयः, 2. श्रुतसेनः, 3. उग्रसेनः, 4. भीमसेनः।
101. प्रश्न- च्यवनपुत्रस्य किं नाम आसीत्?
उत्तरम्- प्रभति।
102. प्रश्न- प्रभतेः भार्या नाम किमस्ति?
उत्तरम्- घृताची नामिका अप्सरा।
103. प्रश्न- प्रभति-घृताच्योः पुत्र नाम किम्?
उत्तरम्- रूरूः।
104. प्रश्न-रूक्मदस्य भगिनी का आसीत्?
उत्तरम्- रूक्मिणी।
105. प्रश्न-रूक्मिणी विवाहं रूक्मदः केन सह निश्चितवान्?
उत्तरम्- शिशुपालेन सह।

106. प्रश्न-रूक्मिणी कं पण्डितं कृष्णपार्श्वे प्रेषितवती?
उत्तरम्- सतानन्द पुरोहितम्।
107. प्रश्न-रूक्मिणी कस्य राज्यस्य राजकुमारी आसीत्?
उत्तरम्- कुन्दीनपुरस्य।
108. प्रश्न- भोजस्य दत्तक पुत्री का?
उत्तरम्- कुन्ती।
109. प्रश्न- कुन्ती कस्या आत्मजा आसीत्?
उत्तरम्- सुरसेनस्य।
110. प्रश्न- कुन्ती वशीकरणमन्त्रं कस्मात् प्राप्तवती?
उत्तरम्- दुर्वाससः।
111. प्रश्न- गंगापुत्रः कः आसीत्?
उत्तरम्- भीष्मः।
112. प्रश्न- द्रोणाचार्यस्य पत्नी का आसीत्?
उत्तरम्- कृपी
113. प्रश्न- द्रोणाचार्यः कस्य पिता आसीत्?
उत्तरम्- अश्वत्थाम्नः।
114. प्रश्न- कीचकं कः अमारयत्?
उत्तरम्- भीमसेनः।
115. प्रश्न- कीचकः कस्य राज्यस्य सेनापतिः आसीत्?
उत्तरम्- मत्स्यराज्यस्य।
116. प्रश्न- उत्तरा कस्य पत्नी आसीत्?
उत्तरम्- अभिमन्योः।
117. प्रश्न- छद्मवेशधारी वासुदेवः कः?
उत्तरम्- पाण्डकः।
118. प्रश्न- पाण्डकस्य पत्नी नाम का?
उत्तरम्- तारा।
119. प्रश्न- विष्णोः भार्यायाः किं नाम?
उत्तरम्- लक्ष्मी।
120. प्रश्न- सूर्यस्य भार्यायाः किं नाम?
उत्तरम्- संज्ञा।
121. प्रश्न- गणेशस्य प्रियभोज्यपदार्थं किम्?
उत्तरम्- मोदकम्।
122. प्रश्न- दशावतारक्रमे विष्णोः प्रथमावतारः कः?
उत्तरम्- मत्स्यः।

123. प्रश्न- संस्काराणां का संख्या कथ्यते?
उत्तरम्- 16 षोडश।
124. प्रश्न- सत्यवत्या: पत्युर्नाम किम्?
उत्तरम्- शान्तनु:।
125. प्रश्न- नर्मदा-नदीं धरायां क: आनीतवान्?
उत्तरम्- व्यास:।
126. प्रश्न- "महाभारते" कस्य वंशस्य इतिहासस्य वर्णनम् अस्ति?
उत्तरम्- चन्द्रवंशस्य।
127. प्रश्न- सत्यवती कस्य धीवरस्य पुत्री आसीत्?
उत्तरम्- वासुराजस्य।
128. प्रश्न- भीष्मस्य अपरं नाम किम्?
उत्तरम्- देवव्रत:।
129. प्रश्न- कुंती कस्य पुत्री आसीत्?
उत्तरम्- शूरसेन यादवस्य।
130. प्रश्न- द्रौपदी कस्य पुत्री आसीत्?
उत्तरम्- राज्ञ: द्रुपदस्य।
131. प्रश्न- अभिमन्यु कस्य पुत्र: आसीत्?
उत्तरम्- अर्जुनस्य।
132. प्रश्न- अभिमन्यु मातुर्नाम किम्?
उत्तरम्- सुभद्रा।
133. प्रश्न- अश्वत्थामा कस्य पुत्र: आसीत्?
उत्तरम्- द्रोणाचार्यस्य।
134. प्रश्न- कृपाचार्य: कस्य पुत्र: आसीत्?
उत्तरम्- शरद्वानस्य।
135. प्रश्न- कृपाचार्य: कस्य पौत्र: आसीत्?
उत्तरम्- गौतमस्य।
136. प्रश्न- विदुर: कस्य पुत्र: आसीत्?
उत्तरम्- व्यासस्य।
137. प्रश्न- व्यास: दिव्यदृष्टिं कस्यै प्रदत्तवान्?
उत्तरम्- संजयाम्।
138. प्रश्न- जयद्रथ: कस्य देशस्य राजा आसीत्?
उत्तरम्- सिन्धुदेशस्य।
139. प्रश्न- दुर्योधनस्य भगिन्या दु:शालाया: भर्ता क: आसीत्?
उत्तरम्- जयद्रथ:।

140. प्रश्न- जयद्रथं कः अमारयत्?
उत्तरम्- अर्जुनः।
141. प्रश्न- उल्लुकः कस्य पुत्रः आसीत्?
उत्तरम्- शकुनेः।
142. प्रश्न- बलरामस्य पितरौ कौ स्तः?
उत्तरम्- रोहिणी-वासुदेवौ।
143. प्रश्न- अर्जुनं गीतायाः उपदेशं कः दत्तवान्?
उत्तरम्- श्रीकृष्णः।
144. प्रश्न- कृष्णद्वैपायनः कः?
उत्तरम्- वेदव्यासः।
145. प्रश्न- "जय" नामके ग्रन्थे कति श्लोकाः?
उत्तरम्- 8800,
146. प्रश्न- महाभारते कति श्लोकाः सन्ति?
उत्तरम्- लक्षसंख्यकाः।
147. प्रश्न- "शतसहस्री संहिता" का अस्ति?
उत्तरम्- महाभारतम्।
148. प्रश्न- "भारत" नामके महाकाव्ये कति श्लोकाः आसन्?
उत्तरम्- चतुर्विंशति सहस्राणि।
149. प्रश्न- महाभारतस्य प्रमुखं छन्दः किम्?
उत्तरम्- अनुष्टुप्।
150. प्रश्न- महाभारते अङ्गी रसः कः?
उत्तरम्- वीरः।
151. प्रश्न- अभिज्ञानशाकुन्तस्य उपजीव्यं काव्यं किमस्ति?
उत्तरम्- महाभारतम्।
152. प्रश्न- महाभारतयुद्धं कति दिनानि यावत् प्राचलत्?
उत्तरम्- (18) अष्टादशदिनानि।
153. प्रश्न- "श्रीमद्भगवद्गीता" महाभारतस्य कस्मिन् पर्वणि विद्यते?
उत्तरम्- भीष्मपर्वणि।
154. प्रश्न- "जयाख्यम्" काव्यं किमस्ति?
उत्तरम्- महाभारतम्।
155. प्रश्न- ऐतिहासिकं आर्षकाव्यं किमस्ति?
उत्तरम्- महाभारतम्।
156. प्रश्न- उपजीव्यकाव्येषु केषां प्रमुख-स्थानं वर्तते?
उत्तरम्- रामायण-महाभारतयोः।

• • •

TOTAL- 774

11
धर्मशास्त्रंकर्मकाण्डञ्च-

(क) धर्मशास्त्रम्- The Science of Jurisprudence

वेदः सर्वासां विद्यानां मूलभूतः। धर्मस्य मूलं वेद एव। धर्मो विश्वस्य जगतः प्रतिष्ठा। शुक्लयजुर्वेदे-"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" इत्यनेन "धर्मो रक्षति रक्षितः" इति मनु वचनेन च धर्मपालनार्थं धर्मरक्षणार्थं च उपदिशन्ति। धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्त्तकरूपेण तथा नियंत्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा विद्यते। धर्मेणोपार्जितोऽर्थः मनुष्यं सर्वविधानन्देन संयोज्य परवर्त्तिजीवनमपि सुखमयं करोति धर्मशास्त्रम्। धर्मशास्त्राणि पुराणानि अपि शास्त्रकोटावन्तर्भूतानि भवन्ति। धर्मशास्त्राणि एव स्मृतय इति व्यवह्रियते। वेदे विद्यमानाः धर्माः पुनः धर्मशास्त्रेषु स्मृताः। अतस्ताः स्मृतयः इति ख्याताः। मनुस्मृतिः समाजशास्त्रस्य अद्वितीया कृतिरस्ति। मन्वत्रिविष्णुहारीतादि स्मृतयः विंशतिः सन्ति।, देवल-चन्द्रायण-कपिलादिभिश्च विरचिताः स्मृतयः पञ्चाशत् सन्ति। आहत्य-सप्तति स्मृतयस्सन्ति। मनुस्मृत्यादि ग्रन्थेषु धर्मविषयकचर्चा, आध्यात्मिक-चर्चा कारणात् धर्मशास्त्रमपि शास्त्ररूपेण गृहीतानि भवन्ति।

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनभ्यनुज्ञातो यो धर्मस्तं निबोधत।।

"चोदनालक्षणोऽर्थो धर्मः" "स्वर्गसाधनस्य शास्त्रैकसमधिगम्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः" इति धर्मस्य परिभाषा कृता स्मृतिकारैः। मनुयाज्ञवल्क्यादिभिः महर्षिभिः प्रणीतमिदं धर्मशास्त्रं समाजस्योपकारायैव प्रवर्त्तते। सर्वेषां धर्मशास्त्रंग्रन्थानां प्रवर्त्तनं धर्ममार्गस्य प्रतिपादनार्थमेव। अतः प्रतिवेदं प्रतिशाखं प्रतिप्रान्तमपि धर्मशास्त्राणि विरचितानि सन्ति।

सर्वेषां प्रणिनां प्रवृत्तिः सुखार्था न तु दुःखार्था। किन्तु कानि सुखोपकरणानीति यथार्थ-तयाऽजानन्तो यथेष्टमीहमानाः पुनः पुनः संसरन्ति तान् उद्धर्तुकामो भगवान्परमेष्ठी शतसहस्र-श्लोकात्मकं धर्मशास्त्रं विरचय्य भगवते मनवे प्रोवाच। भगवान् स्वायंभुवो मनुश्च संक्षिप्य तद्भृगवे प्रोवाच। या च लोके मनुस्मृतिनाम्ना प्रथिमस्ति। अस्मिन् मानवे धर्मशास्त्रे भगवता मनुना "वर्णधर्मः

आश्रमधर्मो, वर्णाश्रमधर्मो, गुणधर्मो, निमित्तधर्मः सामान्यधर्मश्चेति" षड्विधो धर्मः प्रतिपादितः। यद्यपि पत्न्युपगमादिरूपःकामोऽप्यत्राभिहि-तस्तथापि "ऋतुकालाभिगामी स्यात्" इति ऋतुकालादि नियमेन सोऽपि धर्म एव।

एवमर्थार्जनमपि "ऋतामृताभ्यां जीवेत" इत्यादि नियमेन धर्म एवेत्यवगन्तव्यम्। मोक्षोपायत्वेनैभिर्महात्मभिहितस्यात्मज्ञानस्यापि धर्मत्वाद्धर्मविषयत्वं मोक्षोपदेशष्टत्वं चास्य शास्त्रस्योपपन्नम्। किं च धर्मशास्त्रप्रणेतृभिः पराशरवशिष्ठप्रभृतिभिर्महात्मभिरसकृत् प्रमाणतया स्वीकृतत्वात्, "यन्मनुरवदत्तद्भेषजं भेषजताया:" इति श्रुत्युपग्रहाच्च धर्मशास्त्रे महामहिमवतीयं धर्मं जिज्ञासमानानां परमप्रमाणरूपा मनुस्मृतिरिति बहुभिः पण्डितैः व्याकृतास्ति। धर्मशास्त्रस्य वाङ्मयः विशालं रुपं धारयति। धर्मशास्त्रस्य विषयाः आचार-व्यवहार-प्रायश्चित्तभेदेन त्रिधा विभज्यन्ते।

स्त्रीधर्मप्रकारेणोक्तेनाचार्येण पतिशुश्रूषा भर्त्रव्यभिचारादिना मनोवाक्कायसंयता स्त्री इह लोके प्रकृष्टां कीर्तिं परत्रलत्या सहार्जितं च स्वर्गादिलोकं प्राप्नोतीति।

(ख) धर्मशास्त्रस्य परिचय-

"धर्मो विश्वस्य जगतः प्रतिष्ठा" विश्ववासिनां जनानामभ्युदयनिः श्रेयससिद्ध्यर्था।

जगति विराजमानस्य धर्मस्य महती प्रतिष्ठा। स्वावयवार्थप्रतिपादकत्वेऽपि धर्मसूत्रं भारतीयानां प्राणभूतवेदस्य बहुत्र बहुष्वर्थेषु प्रयुक्तम्। भारतीयाः सनातनधर्मं दृढं विश्वसन्ति। तदनुसारं वेद एव हिन्दूसंस्कृतेः प्राचीनप्रमाणरूपेण स्वीकृतः। वेदस्य परमं प्रामाण्यं सर्वैः स्मृतिकारैः मन्वादिभिरपि स्वीकृतमस्ति।

1. ऋग्वेदे-धारणार्थे पालनार्थे च पुंलिङ्गे एव प्रयुक्तः।
2. यजुर्वेदे-धारणार्थे धारकार्थे च प्रयुक्तः।
3. अथर्ववेदे-धार्मिकक्रियाजनितगुणार्थे दृश्यते।
4. तैत्तिरीयोपनिषदि-नियमाचरणाय निर्दिष्टः।
5. ऐतरेयब्राह्मणे-सकलधार्मिककृत्येषु व्यवहृतः।
6. छान्दोग्योपनिषदि-यज्ञाध्ययनदानार्थेष्वभिहितः।
7. मनुस्मृतौधृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
   धीर्विद्या स्त्यमक्रोधो दशकं धर्मलक्षणम्।।
8. याज्ञवल्क्यस्मृतौ-श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
   सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम्।।
9. वशिष्ठ, आपस्तम्ब, बौधायन, गौतम, हारीतादयः-श्रुतेः प्राथम्यं स्वीकृत्यानन्तरं स्मृतेः प्रामाण्यं स्वीकृतवन्तः।

एते धर्मस्य गुणाः खलु मानवसमाजस्य विकासस्य बीजम् अस्ति। अन्येऽपि शास्त्रकाराः "वैदिकमन्त्रोपदेशानुष्ठितकर्मभिरुत्पादितं पुण्यमेव धर्मः" इति स्वीकृतवन्तः। वैशेषिकशास्त्रमपि

"येन कर्मणा ऐहलौकिक-पारलौकिककल्याणसिद्धिः भवति स एव धर्मः" इति। अमरसिंहस्तु विश्वं धर्मः धारयति, जनाः धर्मं धारयन्तीति धर्मशब्दं व्युत्पादितवान्। मेदनी-हेमकोषयोस्तु "पुण्यार्थे धर्मशब्दः प्रयुक्तः"।

(ग) धर्मभेदा-

मत्यपुराणे एवं च माधवीयादिषु श्रौतस्मार्त्तभेदेन धर्मः द्विधा विभक्तः। तत्र श्रौतधर्मः त्रिविधः। इष्टिः, पशुयागः, सोमयागश्चेति। स्मार्त्तधर्मे विशेषतः स्मृतिप्रतिपादितान् वर्णाश्रमसम्बन्धि-शौचाचमननियमानन्तर्भावयन्ति। बौधायनधर्मसूत्रम्-अनुशासनपर्वशान्तिपर्वादिषु च धर्मः वेदस्मृतिशिष्टागमप्रतिपाद्यरूपेण त्रिधा वर्णितः। हेमाद्रि-विज्ञानेश्वरादयः धर्मं भविष्यपुराणदृष्ट्या षोढा विभाजयन्ति। यथा-वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च।

1. **इष्टिः**-औषधिप्रधानयागः इष्टिः।
2. **पशुयागः**-पशुयागे प्रधानतः पशुः।
3. **सोमयागः**-सोमयागे च सोम एव समर्प्यते।
4. **वर्णधर्मः**-ब्राह्मणो नित्यं सुरां विवर्जयेत्।
5. **आश्रमधर्मः**-ब्रह्मचारी नित्यं दण्डं गृहणीयात्।
6. **वर्णाश्रमधर्मः**-ब्राह्मणः ब्रह्मचारी पलाशदण्डं गृहणीयात्।
7. **गुणधर्मः**-राज्ञः प्रजापालनम्।
8. **निमित्तधर्मः**-विहितस्याननुष्ठाने प्रतिषिद्धकर्मकरणे च प्रायश्चित्तम्।
9. **साधारणधर्मः**-अस्तेयाहिंसादयः।

मनुस्मृति-आनुशासनिकपर्व-देवीभागवत-पराशरमाधवीयादिषु-देशधर्म-जातिधर्म-कुलधर्म-गुणधर्म-वयोधर्म-शरीरधर्म-कालधर्म-आपद्धर्म-ग्राम्यधर्म-युगर्मादीनां विभागाः दर्शिताः। एते धर्माः कदाचिदपि परिवर्त्तिताः सन्तः युगधर्मादिवत् वैरूप्यं धारयन्ति।

(घ) धर्मस्य मुख्यपुरुषार्थत्वम्-

धर्मार्थकाममोक्षभेदेन चतुर्धा प्रतिपादिताः। अपौरुषेयस्य वेदस्यानुमापकतया स्मृत्यादीनामपि वेदानुकरणेन धर्मे प्रामाण्याद् धर्मशास्त्रं पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकम्। अतः पुरुषार्थचतुष्टयेषु धर्मस्य श्रेष्ठत्वं सर्वैः स्वीक्रियते। एतेषां धर्मार्थकामानां पुरुषार्थत्रयाणां विशुद्धाचरणे मोक्षप्राप्तिर्नाम चतुर्थः पुरुषार्थः सिद्ध्यति। चतुर्वर्गेऽर्थकाममोक्षाणां पुरुषार्थानां मूलः धर्मः। धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम्। गृहस्थाश्रमे धर्म्योपायेनार्थकामयोरर्जनं सेवनञ्च विहितम्। धर्मः रक्षितो रक्षकं रक्षति। यः धर्महानिं करोति धर्मोऽपि तं नाशयति।

(ङ) धर्मशास्त्रस्योत्पत्तिः विकाशश्च-

धर्मस्य मूलं वेद एव। स च वेदः सर्वासां विद्यानां मूलभूतः। वेदवृक्षमाश्रित्य सर्वाणि

शास्त्राणि प्रभवन्ति। तस्यैव वेदस्य षडङ्गानि सन्ति। एतेषु वेदाङ्गेषु कल्पभागे एव धर्मशास्त्रस्यान्तर्भावः। अतः कल्पभागादेव धर्मशास्त्रस्योत्पत्तिः समभूत्। कल्पसूत्रं चतुर्विधं-

1. श्रौत्रसूत्रं, 2. शुल्वसूत्रं, 3. धर्मसूत्रं, 4. गृह्यसूत्रञ्चेति। महाभारत-रामायणादिषु मनूक्त-धर्मशास्त्रस्य बहूनि प्रमाणवचनानि दृश्यन्ते। पतञ्जलेः व्याकरणमहाभाष्येऽपि धर्मशास्त्रीय-ग्रन्थानामुदाहरणानि इतस्तत उद्धृतानि। सर्वे वेदगताः विषयाः धर्मशास्त्रेऽस्मिन् प्रतिपादिताः। वेदस्तु 1. कर्मकाण्ड-2. ज्ञानकाण्ड-भेदेन द्विधा विभज्यते। वेदेषु विवाह-वर्णाश्रम-पुत्रभेद-उत्तराधि-कारिनिर्णय-धनविभाग-श्राद्धादिविषयकाः बहवः प्रसङ्गा उपलभ्यन्ते। ते प्रसङ्गाश्च कालक्रमेण धर्मशास्त्रस्य विषयीभूताः। प्राधान्येन धर्मप्रतिपादकान्येव शास्त्राणि स्मृतिपदेनोच्यन्ते। याज्ञवल्क्यस्य चतुर्दशविद्याव्याख्यानावसरे विष्णुपुराणे धनुर्वेदायुर्वेदादीनामपि विद्यात्वं स्वीकृत्याष्टादशत्वं साधयति। यथा-

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश।।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः।।

(च) धर्मशास्त्रवाङ्मयस्य परिचयः-

श्रुत्यनुमापकत्वेन प्रमाणभूतस्य धर्मशास्त्रस्य निखिलाः विषयाः सामान्यतः त्रिधा विभज्यन्ते। धर्मस्य वेद-स्मृति-सदाचारात्मतुष्ट्यादि लक्षणानि। तस्यैव धर्मवृक्षस्य त्रयः पादाः। ते च 1. आचारः, 2. व्यवहारः, 3. प्रयश्चित्त-काण्डत्रयरूपाः। अतः धर्मशास्त्रस्य विषयाः1. आचारः, 2. व्यवहारः, 3. प्रयश्चित्तभेदैः विभज्यन्ते। स्मार्त्तधर्मः धर्मशास्त्रस्य विषयीभूतः। वर्णाश्रमधर्म-षोडशसंस्कार-गार्हस्थ्यधर्म-पञ्चमहायज्ञ-भक्ष्याभक्ष्यनिरूपण-द्रव्यशुद्धि-जननमरणाशौ चनिरूपण-श्राद्ध-राजधर्म-ऋणादानाद्यष्टादशव्यवहारपद-आपद्धर्मप्रकरण-प्रायश्चित्तनिरूपण-कृच्छ्रचान्द्रायण-व्रतोत्सर्ग-प्रतिष्ठा-तीर्थयात्रादयः विषयाः धर्मशास्त्रे सन्निविष्टाः। अत एव धर्मस्य तत्त्वं मानवस्य समग्रजीवनमभिव्याप्योपदिष्टम्।

(छ) धर्मसूत्रस्य परिचय-

धर्मसूत्रं वेदाङ्गभूतस्य कल्पसूत्रस्यांगविशेषः। धर्मसूत्राणि वेदैः सह संपृक्तत्वाद् वैदिकशाखासु प्रमाणिकतया व्यवह्रियन्ते स्म। धर्मसूत्राण्यपि बहूनि रचितानि सन्ति। तेषु गौतम-आपस्तम्ब-बौधायन-वशिष्ठ-विष्णु-हारीत-शंखलिखित-वैखानस-हिरण्यकेशिप्रभृतीनां धर्मसूत्राणि प्रमुखानि। धर्मसूत्रस्य मुख्यप्रतिपाद्यविषयो भवति मनुष्यजीवनस्याचारकर्त्तव्ययोर्वर्णनम्। प्राचीनधर्मसूत्राणां कालः 500 ई.पू. तः 100 ई.पू. मध्ये निश्चीयते। धर्मसूत्रे मुख्यतः वर्णानामाश्रमाणाञ्च नियमाः, द्विजानां दैनिककृत्यं, गृह्ययज्ञः, पाकयज्ञः, गर्भाधान-पुंसवनादयः षोडशसंस्काराः, ब्रह्मचारि-स्नातकादीनां नियमाः, मधुपर्कः, श्राद्धकर्म, धर्मस्योपादेयता, वर्णधर्माः, वर्णानां जीवनवृत्तयः, आश्रमधर्माः, जाति-अनुलोम-प्रतिलोम-वर्णसंकरधर्माः, सपिण्डसगोत्रादिनिरूपणं, पाप-प्रायश्चित्त-व्रत-अशौचादि, प्रमाणानि, ऋणादानादीनि विवादपदानि, राजधर्मः, स्त्रीपुंधर्मः, पुत्रभेदाः, उत्तराधिकारादयश्च विषयाः वर्णिताः।

(ज) धर्मशास्त्रकाराणां संक्षिप्तपरिचयः-

क्र. सं.	धर्मशास्त्रकाराः	कृतयः(ग्रन्थाः)	समयः (कालः)
1.	(सूत्रकाराः) गौतमः	गौतमधर्मसूत्रम्	600 खी. पूर्व-400 खी. पूर्व
2.	बौधायनः	बौधायनधर्मसूत्रम्	500खी. पूर्व-200खी. पूर्व
3.	आपस्तम्बः	आपतम्बधर्मसूत्रम्	600खी. पूर्व-300खी. पूर्व
4.	वशिष्ठः	वशिष्ठधर्मसूत्रम्	300खी. पूर्व-100खी. पूर्व
5.	विष्णुः	विष्णुधर्मसूत्रम्	300खी. पूर्व-100खी. पूर्व
6.	हारीतः	हारीतधर्मसूत्रम्	500खी. पूर्व-300खी. पूर्व
7.	शङ्खलिखितौ	शङ्खलिखितधर्मसूत्रम्	300खी. पूर्व-100खी. पूर्व
8.	देवलः	देवलधर्मसूत्रम्	खी. पू. 200 तः परः
9.	हिरण्यकेशी	हिरण्यकेशिधर्मसूत्रम्	100 खी. 300खी.
10.	वैखानसः	वैखानसधर्मसूत्रम्	400 खीष्टपरः
11.	(स्मृतिकाराः) मनुः	मनुस्मृतिः	300खी. पूर्व. 100खी- पूर्व
12.	याज्ञवल्क्य	याज्ञवल्क्यस्मृतिः	100खी. पूर्व. 100खी-पूर्व
13.	शङ्खः	शङ्खस्मृतिः	300खी. पूर्व. 100खी-पूर्व
14.	लिखितः	लिखितस्मृतिः	300खी. पूर्व. 100खी-पूर्व
15.	कात्यायनः	कात्यायनस्मृतिः	100खी. पूर्व. 100खी-पूर्व
16.	अङ्गिराः	अङ्गिरास्मृतिः	100खी. पूर्व. 100खी-पूर्व
17.	दक्षः	दक्षस्मृतिः	100खी. पूर्व. 100खी-पूर्व
18.	पराशरः	पराशरस्मृतिः	100खी. पूर्व. 100खी-पूर्व
19.	नारदः	नारदस्मृतिः	100खी. पूर्व. 300खी-पूर्व
20.	बृहस्पतिः	बृहस्पति स्मृतिः	100 खी.
21.	व्यासः	व्यासस्मृतिः	100खी. पूर्व. 300खी-पूर्व
22.	हारीतः	हारीतस्मृतिः	100 खी-
23.	संवर्त्तः	संवर्त्तस्मृतिः	100 खी-
24.	अत्रिः	अत्रिस्मृतिः	100 खी-
25.	शातातपः	शातातपस्मृतिः	100 खी-
26.	उशनाः	उशनास्मृतिः	100 खी-
27.	पैठीनसिः	पैठीनसिस्मृतिः	100 खी-
28.	जतूकर्ण्यः	जतूकर्ण्यस्मृतिः	100 खी-
29.	पुलस्त्यः	पुलस्त्यस्मृतिः	400खी-700खी.
30.	पितामहः	पितामहस्मृतिः	400खी-700खी.

क्रमशः .....

क्र. सं.	धर्मशास्त्रकाराः	कृतयः(ग्रन्थाः)	समयः (कालः)
31.	(भाष्यनिबन्धकाराः) असहायः	नारदस्मृतेःभाष्यम्, मनुस्मृतेभाष्यम्, गौतमधर्मसूत्रभाष्यम्,	700ख्री-750ख्री.
32.	भर्तृयज्ञः	गौतमधर्मसूत्रभाष्यम्, कात्यायनश्रौत्रसूत्रेभाष्यम्	800ख्री-850ख्री.
33.	विश्वरूपः	याज्ञवल्क्यस्मृतेःबालक्रीडा, विश्वरूपसमुच्चयः	800ख्री-825ख्री.
34.	मेधातिथिः	मनुभाष्यम्	825ख्री. 900ख्री.
35.	भारुचिः	मनुस्मृतिटीका, विष्णुधर्मसूत्रटीका	900ख्री. 1000ख्री.
36.	श्रीकरः	धर्मनिबन्धः	800ख्री. 900ख्री.
37.	धारेश्वरभोजदेवः	सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः, राजमृगाङ्कः, भूपालपद्धतिः, भुजबल-निबन्धः, तत्त्वप्रकाशः	950ख्री. 1062ख्री.
38.	देवस्वामी	आश्वलायनश्रौतसूत्र/ गृह्यसूत्रभाष्यम्, स्मृतिसमुच्चयः	1000ख्री. 1100ख्री.
39.	जितेन्द्रियः	व्यवहारविधिः	1000ख्री.-1100ख्री.
40.	शतानन्दमिश्रः	शतानन्दसंग्रहः, भास्वती, शतानन्दरत्नमाला,	1000ख्री.- 1100ख्री.
41.	बालरूपः	निबन्धग्रन्थः	1000ख्री.- 1100ख्री.
42.	योग्लोकः	बृहद्योग्लोकः, स्वल्पयोग्लोकः,	1000ख्री.- 1050ख्री.
43.	कामधेनुः	निबन्धग्रन्थः	1050ख्री.- 1100ख्री.
44.	बल्लालसेनः	आचारसागरः, प्रतिष्ठासागरः, दानसागरः, अद्भुतसागरः	1000ख्री.- 1175ख्री.
45.	बालकः	व्यवहारनिबन्धः	1100ख्री.- 1150ख्री.
46.	प्रकाशः	महार्णवप्रकाशः	1100ख्री.- 1150ख्री.
47.	परिजातः	निबन्धग्रन्थः	1100ख्री.- 1150ख्री.
48.	विज्ञानेश्वरः	याज्ञवल्क्यस्मृतौ मिता-क्षराटीका, अशौचदशकञ्च	1050ख्री.- 1120ख्री.

क्रमशः .....

क्र. सं.	धर्मशास्त्रकारा:	कृतय:(ग्रन्था:)	समय: (काल:)
49.	गोविन्दराज:	मनुस्मृतौ मनुटीका, स्मृतिमञ्जरी च।	1050खी.- 1100खी.
50.	भवदेवभट्ट:	व्यवहारतिलकम्, कर्मानुष्ठाननद्धति:, प्रायश्चित्तनिरूपणम्, तौतातितमततिलकञ्च	1100खी.-1150खी.
51.	अपरार्क:	याज्ञवल्क्यस्मृतौ अपरार्क-धर्मनिबन्ध:	1125खी . 1200खी
52.	प्रदीप:	निबन्धग्रन्थ:	1100खी . 1150खी
53.	कविकान्तसरस्वती	विश्वादर्श:	1100खी . 1150खी
54.	लक्ष्मीधर:	कृत्यकल्पतरु:	1100खी . 1150खी
55.	जीमूतवाहन:	धर्मरत्नम्	1125खी . 1200खी
56.	हलायुध:	ब्राह्मणसर्वस्वम्, वैष्णवसर्वस्वं, पण्डितसर्वस्वम्, कर्मोपदेशिनी च।	1150खी . 1200खी
57.	हरिहर:	व्यवहारोपरि निबन्ध:, पारस्करगृह्यसूत्रभाष्यम्	1150खी . 1250खी
58.	श्रीधर:	स्मृत्यर्थसार:	1150खी . 1200खी
59.	अनिरुद्धभट्ट:	दानसागर:, हारलता-पितृदयिता च	1150खी . 1200खी
60.	देवणभट्ट:	स्मृतिचन्द्रिका	1160खी . 1225खी
61.	हेमाद्रि:	चतुर्वर्गचिन्तामणि:, शौनकप्रणवकल्पभाष्यम्, कात्यायनीयश्राद्धकल्पश्च।	1200खी . 1300खी
62.	कुल्लूकभट्ट:	मनुस्मृतौ मन्वर्थमुक्ता-वलीटीका, स्मृतिसागरश्च	1200खी . 1300खी
63.	श्रीदत्तोपाध्याय:	आचारादर्श:, पितृभक्ति: छन्दोगाह्निकं, श्राद्धकल्प, समयप्रदीपश्च	1200खी . 1313खी
64.	शम्भुकरमिश्रवाजपेयी	श्राद्धपद्धति:, विवाहपद्धति:, स्मार्त्तरत्नावली, शम्भुकरपद्धतिश्च।	1260खी . 1330खी

क्रमश: .....

क्र. सं.	धर्मशास्त्रकाराः	कृतयः(ग्रन्थाः)	समयः (कालः)
65.	विद्याकरमिश्रवाजपेयी	नित्याचारप्रदीपः, क्रम-दीपिका, दिनकृत्यदीपिका, मोक्षपरीक्षा च।	1285खी . 1350खी
66.	अल्लाडनाथसूरिः	निर्णयामृतम्	1250खी . 1500खी
67.	हरिनाथः	स्मृतिसारः	1300खी . 1400खी
68.	मधवाचार्यः	कालमाधवः, सर्वदर्शन-संग्रहः, पराशरमाधवीय-टीका, जैमिनीयन्याय-मालाविस्तरादयः।	1296खी . 1386खी
69.	चण्डेश्वरः	स्मृतिरत्नाकरः, कृत्यचिन्तामणिः, राजनीतिरत्नाकरः, शिववाक्या-वलिः, दशवाक्यावलिश्च।	1300खी . 1370खी
70.	मदनपालः	मदनपरिजातः, स्मृतिमहार्णवः, तिथिनिर्णयसारः, स्मृतिकौमुदी, सूर्यसिद्धान्तविवेकः, मदन-विनोदनिधण्टुः, आनन्द-संजीवनश्च।	1300खी . 1400खी
71.	शूलपाणिः	याज्ञवल्क्यस्मृतौदीपकलिका-टीका, स्मृतिविवेकः	1350खी . 1450खी
72.	विद्यापतिः	वर्षकृत्यम्, दानवाक्यावली, विभागसागरः	1360खी . 1448खी
73.	मदनसिंहः	मदनरत्नम्, मदनरत्नप्रदीपश्च	1350खी-1500खी
74.	बृहस्पतिः	कृत्यकौमुदी	1400खी-1500खी
75.	हरदत्तः	आपस्तम्बधर्मसूत्रे उज्ज्वलाटीका, गौतमधर्मसूत्रे मिताक्षराटीका, आपस्तम्बगृह्यसूत्रे अनाकुलाटीका, आश्वलायनगृह्यसूत्रे अनाविलाटीका, आपस्तम्बन्त्रपाठभाष्यञ्च	1400खी . 1500खी
76.	पृथ्वीचन्द्रः	पृथ्वीचन्द्रोदयः	1400खी . 1500खी
77.	मिसरुमिश्रः	विवादचन्द्रः, पदार्थचन्द्रिका,	1400खी . 1450खी
78.	रुद्रधरः	शुद्धिविवेकः, श्राद्धविवेकः, वर्षकृत्यञ्च,	1425खी . 1475खी
79.	वाचस्पतिमिश्रः	तिथिनिर्णयः, विवादनिर्णयः, द्वैतनिर्णयः, महादाननिर्णयः,	1425खी . 1540खी

क्रमशः .....

क्र. सं.	धर्मशास्त्रकाराः	कृतयः(ग्रन्थाः)	समयः (कालः)
		शुद्धिनिर्णयः, आचारचिन्तामणिः, शुद्धिचिन्तामणिः, कृत्यचिन्तामणिः, तीर्थचिन्तामणिः, तिथिचिन्तामणिः, द्वैतचिन्तामणिः, सम्बन्धचिन्तामणिः, विवादचिन्तामणिः, नीतिचिन्तामणिः, व्यवहारचिन्तामणिः, शूद्राचार-चिन्तामणिः, आह्निकचिन्तामणिः, श्राद्धचिन्तामणिः, कृत्यमहार्णवः	
80.	वर्द्धमानः	दण्डविवेकः	1425खी . 1500खी
81.	नृसिंहप्रसादः	नृसिंहप्रसादः	1430खी . 1530खी
82.	प्रतापरुद्रदेवः	सरस्वतीविलासः	1460खी . 1550खी
83.	गोदावरमिश्रः	नीतिचिन्तामणि, आचारचिन्ता-मणिः, जयचिन्तामणिः	1460खी . 1590खी
84.	अचलद्विवेदी	निर्णयदीपकः, आह्निकदीपिकः	1450खी . 1550खी
85.	श्रीनाथाचार्यचूडामणिः	कृत्यतत्त्वार्णवः, गूढार्थदीपिका, श्राद्धदीपिका, विवेकार्णवः, शुद्धितत्त्वार्णवः, विवाहतत्त्वार्णवः, आचारचन्द्रिका, श्राद्धचन्द्रिका, दानचन्द्रिका, दुर्गोत्सवविवेकः, शुद्धिविवेकः, नारायणकृत-छन्दोगयकृत्यं, परिशिष्टस्य सारमञ्जरी, तिथिविवेकस्य तात्पर्यदीपिका, जीमूतवाहनस्य दायभागटीका।	पञ्चदशशताब्दी
86.	गोविन्दानन्दः	दानक्रियार्कामुदी, श्राद्धक्रियाकौमुदी, शुद्धिक्रियाकौमुदी, वर्षक्रियाकौमुदी, श्रीनिवासकृत-शुद्धिदीपिकाभाष्यम्, शूलपाणिकृतप्रायश्चित्तविवेके तत्त्वार्थकौमुदीटीका च	15500खी 1560खी
87.	महेश्वरः	माधवप्रकाशः,	
88.	टोडरमल्लः	टोडरानन्दः	1500खी . 1581खी
89.	रघुनन्दनः	स्मृतितत्त्वम्, गयाश्राद्धपद्धतिः, तीर्थतत्त्वम्, रासयात्रापद्धतिः, त्रिपुष्करशान्तितत्त्वम्,	1490खी . 1570खी

क्रमशः .....

क्र. सं.	धर्मशास्त्रकाराः	कृतयः(ग्रन्थाः)	समयः (कालः)
		द्वादशयात्रातत्त्वम्, जीमूतवाहनकृत-दायभागोपरि टीका	
90.	नरायणभट्टः	अन्त्येष्टिपद्धतिः, प्रयोगरत्नम्, त्रिस्थलीसेतुः, तिथिनिर्णयश्च।	1513खी . 1600खी
91.	नरसिंहमिश्रवाजपेयी	चयनप्रदीपः, भक्तिप्रदीपः, वर्षप्रदीपः, प्रायश्चित्तप्रदीपः, श्राद्धप्रदीपः, प्रतिष्ठाप्रदीपः, शाबरभाष्यप्रदीपः, शान्तिप्रदीपः, समयप्रदीपः, व्यवस्थाप्रदीपः, नित्याचारप्रदीपः	1520खी . 1580खी
92.	खण्डेरायः	परशुरामप्रकाशः,	1400खी . 1600खी
93.	विश्वनाथमिश्रः	स्मृतिसारसंग्रहः	1550खी . 1600खी
94.	नन्दपण्डितः	विज्ञानेश्वरकृतमिताक्षरायां प्रमिताक्षराटीका, विष्णुधर्मसूत्रे केशववैजयन्तीटीका, पराशरस्मृतौ विद्वन्मनोहराटीका, श्राद्धकल्पलता, शुद्धिचन्द्रिका, दत्तकमीमांसा च।	1560खी . 1630खी
95.	वरदराजः	व्यवरनिर्णयः	1550खी . 1620खी
96.	भट्टरामः	अनूपविवेक, अमृतमञ्जरी	1550खी . 1625खी
97.	कमलाकरभट्टः	निर्णयसिन्धुः, शान्तिरत्नम्, दानकमलाकरः, पूर्तकमलाकरः, व्रतकमलाकरः, प्रायश्चित्तरत्नम्, विवादताण्डवः, बह्वृचाह्निकम्, गोत्रप्रवरदर्पणः, कर्मविपाकरत्नम्, शूद्रकमलाकर, सर्वतीर्थविधिश्च।	1570खी . 1640खी
98.	नागोजिभट्टः	आचारेन्दुशेखरः, प्रायश्चित्तेन्दुशेखरः, तीर्थेन्दुशेखरः, श्राद्धेन्दुशेखरः, प्रायश्चित्तसारसंग्रहः, सापिण्ड्यनिर्णयः, अशौचनिर्णयः, सपिण्डमञ्जरी च।	1575खी . 1675खी
99.	लक्ष्मणभट्टः	आचाररत्नम्, गोत्रप्रवररत्नम्, द्वैतनिर्णयश्च।	1580खी . 1640खी
100.	मणिरामदीक्षितः	टनूपविलासः, गयायात्राप्रयोगादयश्च,	1600खी . 1700खी

क्रमशः .....

क्र. सं.	धर्मशास्त्रकाराः	कृतयः(ग्रन्थाः)	समयः (कालः)
101.	विप्रमिश्रः	श्राद्धप्रदीपः,	1600खी . 1650खी
102.	विश्वम्भरत्रिवेदी	स्मृतिसारोद्धारः	1600खी . 1650खी
103.	भट्टोजिदीक्षितः	धर्मशास्त्रसर्वस्वम्, तिथिनिर्णयः, प्रायश्चित्तनिर्णयः, आचार-प्रदीपादयश्च।	1600खी . 1650खी
104.	दिवाकरभट्टः	कालनिर्णयचन्द्रिका, आचारार्कः, तिथ्यर्कः, आह्निकचन्द्रिका	1600खी . 1680खी
105.	नीलकण्ठभट्टः	भगवन्तभाष्करः, व्यवहारतत्त्वम्, दत्तकनिर्णयश्च।	1600खी . 1680खी
106.	मित्रमिश्रः	वीरमित्रोदयः, याज्ञवल्क्यस्मृतौ-वीरमित्रोदयटीका च।	1600खी . 1650खी
107.	दिव्यसिंहमहापात्रः	कालदीपः, श्राद्धदीपश्च।	सप्तदशशताब्दी
108.	शङ्करभट्टः	व्रतार्कः, सदाचारसंग्रहः, कर्मविपाकादय।	1620खी . 1675खी
109.	गदाधरराजगुरुः	गदाधरपद्धतिः	1650खी . 1735खी
110.	रघुनाथदाशः	कालनिर्णयः, श्राद्धनिर्णयश्च	1685खी . 1775खी
111.	अनन्तदेवः	स्मृतिकौस्तुभः,	1670खी . 1700खी
112.	दिवाकरभट्टः	श्राद्धसुधानिधिः	1686खी खीष्टाब्दात्परम्
113.	गोपालन्यायपञ्चाननः	तिथिनिर्णयः, आचारनिर्णयः, श्राद्धनिर्णयादयः।	1683खीष्टाब्दात्परम्
114.	जगन्नाथतर्कपञ्चाननः	विवादभङ्गार्णवः	1615खी . 1805खी
115.	काशीनाथोपाध्यायः	धर्मसिन्धुः, (धर्माब्धिसारः) प्रायश्चित्तशेखरादयः।	1730खी . 1805खी
116.	कृष्णमिश्रः	कालसर्वस्वं, शुद्धिसर्वस्वं, भक्तिसर्वस्वादयः	1746खी . 1826खी
117.	बालकृष्णभट्टः	विज्ञानेश्वरकृतमिताक्षरायां बालम्भटीगोत्रनिर्णयः, तिथिनिर्णयादयः	1740खी . 1830खी
118.	त्र्यम्बकभट्टः	आचारेन्दुः, प्रतिष्ठेन्दुः, आशौचनिर्णयादयः।	1760खी . 1850खी
119.	पं. कुलमणिमिश्रः	धर्मशास्त्रकोशः, पारस्करगृह्यसूत्रे मार्गदर्शिनीटीका, वसिष्ठस्मृतौ तत्त्वप्रकाशिकाटीका, गौतमधर्मसूत्रे सूक्ष्माटीका, कालदीपे तेजनीटीका, दर्शदीपिकायां वर्त्तिकाटीका च।	1918खी . 1990खी

(झ) एकादशीव्रतविवरणी-

एकादशीनाम	तिथिः	विशेषकृत्य	विशेषफल	विहितविधान
1. पापमोहिनी	चैत्रकृष्ण एकादशी	जितेन्द्रिय	पापानामुक्तिः	विभिन्नपुराण
2. कामदा	चैत्रशुक्ल एकादशी	जपहवनपाठादि	कामनायाःपूर्तिः	पुराणस्मृतौ
3. बरुथनी	वैशाख कृष्ण एकादशी	निद्रात्यागादि	अनन्तशान्ति	विभिन्नस्मृतिः
4. मोहिनी	वैशाख शुक्ल एकादशी	मूर्तिपार्श्वेरात्रि-शयनम्	मोहजालात् मुक्तिः	कूर्मपुराणम्
5. अचला/ अपरा	ज्येष्ठकृष्णएकादशी	फलाहारेवकरणम्	परा-पापात् मुक्तिः	ब्रह्माण्डपुराणम्
6. निर्जला	ज्येष्ठशुक्लएकादशी	निर्जलेव	आरोग्य-वृद्धिः	महाभारत
7. योगिनी	आषाढ़ कृष्ण एकादशी	रात्रि-जागरणम्	कुष्ठादि विमुक्तिः	ब्रह्मवैवर्तपुराणम्
8. देवशयनी	आषाढ़शुक्ल एकादशी	रुचि-स्वादयोः त्यजनम्	मनोकामनायाःपूर्तिः	भविष्योत्तर
9. कामिका	श्रावणकृष्ण एकादशी	मानसिकतपः	अनन्तफलप्राप्तिः	ब्रह्मवैवर्तपुराणम्
10. पवित्रा	श्रावणशुक्ल एकादशी	भजनकीर्तनम्	संतानबाधामुक्तिः	भविष्यपुराणम्
11. अजा	भाद्र कृष्ण एकादशी	कर्मकाण्डकरणम्	पुनर्जन्मात् मुकितः	ब्रह्मवैवर्तपुराणम्
12. पद्मा	भाद्रशुक्ल एकादशी	लक्ष्म्याःपूजनम्	अभीष्ट-सिद्धिः	ब्रह्माण्डपुराणम्
13. इंदिरा	आश्विनकृष्ण एकादशी	शालिग्रामपूजनम्	पितृणां सदगतिः	ब्रह्मवैवर्तपुराणम्
14. पापांकुशा	आश्विनशुक्ल एकादशी	दिने विष्णुपूजनम्	पापवृद्धिोपरिविराम	पद्मपुराणम्
15. रंभा/रमा	कार्तिक कृष्णएकादशी	केशवपूजनम्	दिव्यसुखप्राप्तिः	ब्रह्मवैवर्तपुराणम्
16. देवोत्थान	कार्तिक शुक्लएकादशी	भगवानस्यरथयात्रा	ज्ञानस्य प्राप्तिः	वाराहपुराणम्
17. उत्पन्ना	मार्गशीर्ष कृष्णएकादशी	फलभोगः	दैविकतापात् मुक्तिः	भविष्योत्तर
18. मोक्षदा	मार्गशीर्षशुक्लएकादशी	गीतापाठ	मोक्षप्रति उन्मुखता	ब्रह्मांडपुराणम्
19. सफला	पौष कृष्णएकादशी	रात्रिजागरण, कीर्तनम्	बाधानिराकरणम्	पद्मपुराणम्
20. पुत्रदा	पौषशुक्लएकादशी	विष्णु-पूजनम्	पुत्रप्राप्तिः	ब्रह्मवैवर्तपुराणम्
21. षट्तीला	माघ कृष्णएकादशी	तिलसेवनम्	सद्गतिप्राप्तिः	हेमाद्री
22. जया	माघशुक्लएकादशी	कृष्णस्यगंधित-पूजनम्	पिशाचपराजयः	पद्मपुराणम्
23. विजया	फाल्गुन कृष्णएकादशी	दिन-रात्रि कीर्तनम्	व्रत्याःजयः	स्कंदपुराणम्
24. आमलकी	फाल्गुनशुक्लएकादशी	आंबलावृक्षपूजनम्	जटिलपापात् मुक्तिः	ब्रह्माण्डपुराणम्

(ञ) प्रमुखव्रतानि-

व्रतम्	तिथिः	धर्मग्रन्थः	व्रतम्	तिथिः	धर्मग्रन्थः
गौरीव्रतम्	चैत्रकृष्णप्रतिपदा	व्रतविज्ञान	नागव्रतम्	कार्तिकशुक्ल 4	कुर्मपुराण
भवानीव्रतम्	चैत्रशुक्लाष्टमी	भविष्यपुराण	नवमीव्रतम्	कार्तिकशु.9	देवीपुराण
मातृकाव्रतम्	चैत्रशुक्लनवमी	विष्णुधर्म	भीष्मपंचक	कार्तिकशु.11	पद्मपुराण
कामदेवव्रतम्	वैशाखशुक्ल-13	मदनरत्न	गौरीतपव्रतम्	मार्गशीर्ष अमावास्या	अंगिरा
वट सावित्री	ज्येष्ठ अमावस्या	निर्णयामृत	यमव्रतम्	माघशुक्ल 4	हेमाद्रि
स्कंद षष्ठी	आषाढ़शुक्लषष्ठी	वराहपुराणम्	जनकीव्रतम्	फाल्गुनकृष्ण 8	निर्णयसिन्धु
पापनाशिनी	श्रावणशुक्लसप्तमी	हेमाद्रि	पयोव्रतम्	फाल्गुनशु01 12	श्रीमद्भागवत
मंगलागौरी	श्रावणे प्रतिमंगलवार	व्रतराज	मधुकतृतीया	फाल्गुनशु03	पुराणसमुच्चय
कज्जलीतृतीया	भाद्रपदकृष्णतृतीया	कृत्यरत्नावली	अविघ्नकर-व्रतम्	फाल्गुनशु04	वाराहपुराण
पुत्रव्रतम्	भाद्रपदकृष्णसप्तमी	वाराहपुराण	महेश्वरव्रतम्	फाल्गुनशु014	विष्णु धर्मोत्तर
उमा-महेश्वरव्रत	भाद्रपदकृष्णाष्टमी	हेमाद्रि	वृषदानव्रतम्	फाल्गुनशु014	वीरमित्रोदय
हरितालिका	भाद्रपदकृष्णतृतीया	भविष्योत्तर	सर्वार्तिहरव्रतम्	फाल्गुनशु014	सनत्कुमार-संहिता
दशावतारव्रतम्	भाद्रपदशुक्लदशमी	भविष्योत्तर	होली	चैत्रकृष्ण 1	
अनन्तव्रतम्	भाद्रपदशुक्लचतुदर्शी	स्कंन्द-ब्रह्मपुराण	रामनवमी	चैत्रशु० 9	

जीवित्पुत्रिकाव्रतम्	आश्विनकृष्णाष्टमी	हेमाद्रि	अक्षयतृतीया	वैशाखशु०3
पुत्रप्राप्तिव्रतम्	आश्विनशुक्लएकादशी	भविष्योत्तर	रक्षावंधन	श्रावणपूर्णिमा
कोजागराव्रतम्	आश्विन पूर्णिमा	कृत्यनिर्णय	जन्माष्टमी	भाद्रपदकृ०8

राधाष्टमी-	भाद्रशुक्लाष्टमी	छठ	कार्तिक शुक्ल 6	शारदीयनवरात्र	आश्विनशुक्ल 1-9
विजयादशमी-	आश्विनशुक्ल 10	मौनी आमावास्या	माघ आमावास्या	करवाचौठ	कार्तिककृष्ण 4
शरदपूर्णिमा	आश्विन अमावास्या	महाशिवरात्रि	फाल्गुनकृष्ण 14	धनतेरस	कार्तिककृष्ण 13
दीवाली	कार्तिक अमावास्या	होलिकादहन	फाल्गुन पूर्णिमा	चित्रगुप्तपूजा	कार्तिकशुक्ल 2
अन्नकूट	कार्तिक शुक्ल-प्रतिपदा	पितृपक्ष	आश्विनकृष्ण 1-15	वसंतपञ्चमी	माघशुकल 5
भैयादूज	कार्तिक शुक्ल 2	मातृनवमी	आश्विन-कृष्णनवमी	माघी	मघपूर्णिमा

(त) धर्मशास्त्रंकर्मकाण्डयो:वस्तुनिष्ठप्रश्नोत्तराणि-

1. प्रश्न- " धर्मशास्त्रे कति श्लोका: सन्ति?
   उत्तरम्- लक्षम् (1,00,000)
2. प्रश्न- ब्रह्मा कस्मै धर्मशास्त्रम् उपदिष्टवान्?
   उत्तरम्- स्वायम्भुवमनवे।
3. प्रश्न- मनुस्मृति इति ग्रन्थस्य प्रवर्त्तक: क:?
   उत्तरम्- स्वायम्भुवमनु:।
4. प्रश्न- कति अध्याया: सन्ति मनुस्मृतौ?
   उत्तरम्- 12 द्वादश।
5. प्रश्न- स्मृति: शास्त्रं किमस्ति?
   उत्तरम्- धर्मशास्त्रम्।
6. प्रश्न- मनु: कियत: ऋषीन् धर्मशास्त्रं श्रावयामास?
   उत्तरम्- (10) दश।
7. प्रश्न- प्राचीना: स्मृतिकारा: कियन्त आसन्?
   उत्तरम्-(21) एकविंशति:।
8. प्रश्न- मनुस्मृतिग्रन्थे विचार: क:?
   उत्तरम्- धर्मशास्त्र-सम्बन्धि-विचार:।
9. प्रश्न- मनुस्मृतिग्रन्थे विवेचित: धर्म: क:?
   उत्तरम्- श्रुतिप्रमाणको धर्म:।
10. प्रश्न-गोविन्दराजस्य धर्मलक्षणं किम्?
    वेद विद्भिरनुष्ठित: संशयरहितश्च धर्म:।
11. प्रश्न- संस्कारा: कति सन्ति, येषु मुख्या: संस्कारा: कति सन्ति?
    उत्तरम्- 48 संस्कारा:, 16 षोडष् मुख्या: संस्कारा:-
12. प्रश्न- प्रथम-श्रद्धाधिकारी क: भवति?
    उत्तरम्- ज्येष्ठ पुत्र:।
13. प्रश्न- स्मृति-कल्पतरु इत्यस्य लेखक: क:?
    उत्तरम्- भक्त हलायुध:।
14. प्रश्न- धर्मस्य लक्षक: कोऽस्ति?
    उत्तरम्- वेद:-स्मृति:।
15. प्रश्न- वेद: अखिल-धर्मस्य मूलोऽस्ति इति कस्य कथनम्?
    उत्तरम्-मनु: महोदयस्य।
16. प्रश्न- प्रथम-स्मृतिकार: कोऽस्ति?
    उत्तरम्- मनु:।
17. प्रश्न- नान्दी-श्राद्ध: कस्मिन् समये भवति?
    उत्तरम्- उपनयनादि-समये।

18. प्रश्न- अशौचस्य पूर्णावधिः कियत् काल-पर्यन्तं भवति?
उत्तरम्- एक-मास पर्यन्तम्।
19. प्रश्न- सर्वोत्तमः विवाहः कोऽस्ति?
उत्तरम्- ब्राह्म-विवाहः।
20. प्रश्न- सपिण्डतायाः निवृत्तिः कदा भवति?
उत्तरम्- (8) अष्टपुरुषे।
21. प्रश्न- धर्मशास्त्रे कति आश्रमाः स्वीकृता सन्ति?
उत्तरम्-चत्वारः, 1. ब्रह्मचर्याश्रमः, 2. गृहस्थाश्रमः, 3. वानप्रस्थाश्रमः, 4. सन्यासाश्रमः।
22. प्रश्न- मनुस्मृतौ के अष्ट-प्रकारकाः विवाहाः स्वीकृताः?
उत्तरम्-1. ब्राह्म, 2. प्राजापत्यः, 3. आर्षः, 4. दैवः, 5. गान्धर्वः, 6. आसुरः, 7. पैशाचः, 8. राक्षसः।
23. प्रश्न- कति महापातकाः भवन्ति?
उत्तरम्- (5) पञ्च।
24. प्रश्न- मानवजातेः आदि-पुरुषः कः?
उत्तरम्- मनुः।
25. प्रश्न- धर्मसूत्रम् इत्यस्य रचनाकारः कः?
उत्तरम्- वशिष्ठः।
26. प्रश्न-सामाजिक-व्यवस्थामाधृत्व प्राचीनभारतस्य कानि त्रीणि ऋणानि?
उत्तरम्-1. पितृऋणम्, 2. ऋषिऋणम्, 3. देवऋणम्।
27. प्रश्न- मनुस्मृति ग्रन्थे कति अध्यायाः सन्ति?
उत्तरम्- (12) द्वादश अध्यायाः।
28. प्रश्न- कति उपस्मृतिः ग्रन्थाः सन्ति?
उत्तरम्- (16) षोडश।
29. प्रश्न- मनुस्मृतौ धर्मस्य लक्षणं कतिविधं निर्दिष्टम्?
उत्तरम्- (10) दशविष्वम्।
30. प्रश्न- कति सन्ति स्मृति-ग्रन्थाः?
उत्तरम्-1. महर्षि याज्ञवल्क्यानुसारम्-20 विंशतिः, 2. भविष्यपुराणानुसारम्-33 त्रयस्त्रिंशत, 3. भगवान् मनु अनुसारम्-18 अष्टादश।
31. प्रश्न- स्मृतिग्रन्थेषु "कस्य" महती प्रसिद्धिः-?
उत्तरम्- मनुस्मृतेः।
32. प्रश्न- चातुर्वण्ये पञ्चसामान्यधर्मा इमे-?
उत्तरम्-अहिंसा, असतेयम्, सत्यम्, शौचं, इन्द्रियनिग्रहः।
33. प्रश्न- प्रसिद्धेषु धर्मसूत्रेषु इदमप्येकम्-?
उत्तरम्- आपस्त्मबः।

34. प्रश्न- वैश्यस्त्रियां क्षत्रियादुत्पन्नमपत्यं किमिति कथयन्ति?
उत्तरम्-माहिष्यः।
35. प्रश्न- वैश्यस्त्रियां ब्राह्मणादुत्पन्नं सन्तानं किमिति उच्यते?
उत्तरम्- अम्बष्ठः।
36. प्रश्न- षोडशसंस्कारेषु कः सप्तमः संस्कारः-?
उत्तरम्- अन्नप्राशनम्।
37. प्रश्न- गृहस्थैः क्रियमाणेषु पञ्चयज्ञेषु-अयमन्यतमः?
उत्तरम्- बलिवैश्वदेवयज्ञः।
38. प्रश्न- विवाहः कतिविधः स्मृतिग्रन्थेषु प्रतिपादितः?
उत्तरम्- अष्टविधः।
39. प्रश्न- "धर्म एव ततो हन्ति धर्मो रक्षति रक्षितः" इति इयमुक्तिः कुत्रोपलभ्यते?
उत्तरम्- मनुस्मृतौ।
40. प्रश्न- ब्रह्मा कस्मै धर्मशास्त्रम् उपदिष्टवान्?
उत्तरम्- स्वायम्भुवमनवे।
41. प्रश्न- ब्राह्मणानामुपनयनकालाः कति सन्ति?
उत्तरम्- (3) त्रयः।
42. प्रश्न- धर्मशास्त्रानुसारं विवाहः कति विधः?
उत्तरम्- (8) अष्टविधः।
43. प्रश्न- नीतयः कति विधा?
उत्तरम्- (4) चतुर्विधः।
44. प्रश्न- स्मृत्यनुसारं राज्यानां कियन्ति अङ्गानि?
उत्तरम्- 7 सप्त।
45. प्रश्न- मनुस्मृतिग्रन्थस्य प्रथमेऽध्याये विचार कः?
उत्तरम्- विश्वसृष्टिसम्बन्धि-विचारः।
46. प्रश्न- धर्मस्य प्रतिपाद्यविषयः कस्मिन् अध्याये वर्तते?
उत्तरम्- द्वितीयेऽध्याये।
47. प्रश्न- मनुस्मृतेः तृतीयाध्याये विवेच्यविषयः कः?
उत्तरम्- समावर्तक-संस्कारः।
48. प्रश्न- मनुस्मृतेः चतुर्थाध्याये विवेच्यविषयः कः?
उत्तरम्- जीविकायाः नियमः।
49. प्रश्न- मनुस्मृतेः पञ्चमाध्याये विवेच्यविषयः कः?
उत्तरम्- स्त्रीधर्मयोगः।
50. प्रश्न- मनुस्मृतेः षष्ठाध्याये विवेच्यविषयः कः?
उत्तरम्- वानप्रस्थ-सन्यासादि धर्मः।

51. प्रश्न- मनुस्मृते: सप्तमोऽध्यायस्य प्रधान विषय: क: वर्तते?
उत्तरम्- राजधर्म:।
52. प्रश्न- मनुस्मृते: अष्टमाध्यायस्य मुख्य विषय: क:?
उत्तरम्- नीतिपरकज्ञानम्।
53. प्रश्न- मनुस्मृते: नवमोऽध्यायस्य मुख्य विषय: क:?
उत्तरम्- स्त्रीपुरुषसंयोगवियोगस्य नित्य धर्म:।
54. प्रश्न-मनुस्मृत्यौ ब्राह्मणादिवर्णानां विशेषाधिकारकर्त्तव्यवर्णनं कस्मिन् अध्याये अस्ति?
उत्तरम्- दशमेऽध्याये।
55. प्रश्न- मनुस्मृते एकादशाऽध्याये विवेच्यविषय: क:?
उत्तरम्- प्रायश्चितविधि:।
56. प्रश्न- मनुस्मृतौ वेदस्तुति: कस्मिन् अध्याये विद्यते?
उत्तरम्- द्वादशेऽध्याये।
57. प्रश्न- मनुस्मृते दशमोऽध्याये विवेच्यविषय: क:?
उत्तरम्- वैश्यशूद्रोपचार-धर्मानुष्ठानम्।
58. प्रश्न- मनुस्मृते द्वादशाऽध्याये विवेच्यविषय: क:?
उत्तरम्- त्रिविधकर्मणां गुण-दोष-विवेचनम्।
59. प्रश्न-याज्ञवल्क्यस्मृतौ कियन्ति काण्डानि, कानि च तानि?
उत्तरम्-3त्रीणि काण्डानि, 1. आचार:, 2. व्यवहार:, 3. प्रयश्चित्तम्।
60. प्रश्न- शुक्ल-यजुर्वेदेन सम्बद्धा स्मृति: का?
उत्तरम्- याज्ञवल्क्यस्मृति:।
61. प्रश्न-याज्ञवल्क्यस्मृते: चतुर्दशविद्यानां चर्चा कस्मिन् काण्डे अस्ति?
उत्तरम्- प्रथमे काण्डे।
62. प्रश्न- स्मृत्यनुसारं कति महायज्ञा:?
उत्तरम्- (5) पञ्च।
63. प्रश्न- स्मृत्यनुसारं सदाचारस्य कियन्तो नियमा:?
उत्तरम्- (10) दश नियमा:।
64. प्रश्न- याज्ञवल्क्यस्मृते: द्वितीयखण्डे कस्य सम्बन्धविचार: प्राप्यते?
उत्तरम्- धर्मशास्त्र-अर्थशास्त्रयो:।
65. प्रश्न-याज्ञवल्क्यस्मृतौ कतिविधा: पुत्रा: वर्णिता:?
उत्तरम्- (12) द्वादशविधा:।
66. प्रश्न- स्मृत्यनुसारं नरका: कतिविधा:?
उत्तरम्- (21) एकविंशतिधा:।
67. प्रश्न- स्मृत्यनुसारं महापातकानि कानि?
उत्तरम्- (5) पञ्च।

68. प्रश्न- आचारादर्शस्य लेखक: क:?
उत्तरम्- श्रीदत्तोपाध्याय:।
69. प्रश्न- "कृत्यसारसमुच्चय:" अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- म. म. अमृतनाथ झा।
70. प्रश्न- "तिथिनिर्णय:" इत्यस्य लेखक: क:?
उत्तरम्- म. म. रज्जे मिश्र:।
71. प्रश्न- "तिथितत्त्वचिन्तामणे:" अस्य ग्रन्थस्य लेखक: क:?
उत्तरम्- म. म. महेशठक्कुर:।
71. प्रश्न- वाचस्पतिमिश्र-रचित धर्मशास्त्रग्रन्थ: क:?
उत्तरम्- तिथिनिर्णय:।
72. प्रश्न- तिथिचन्द्रिकाया: रचनाकार: क:?
उत्तरम्- पक्षधरमिश्र:।
73. प्रश्न- निर्णयसिन्धो: इत्यस्य लेखक: क:?
उत्तरम्- कमलाकरभट्ट:।
74. प्रश्न- दण्ड: कं विनाशयति?
उत्तरम्- धर्मभ्रष्टनृपम्।
75. प्रश्न- दूत: किं करोति?
उत्तरम्- सन्धिकार्यम्।
76. प्रश्न- पुराणानां संख्या का?
उत्तरम्- अष्टादश।
77. प्रश्न- पिता कन्यां कस्मिन् समये रक्षति?
उत्तरम्- बाल्ये।
78. प्रश्न- पुत्रेषु क: सर्वश्रेष्ठ:?
उत्तरम्- गूढोत्पन्न:।
79. प्रश्न- विनयात् ब्राह्मणत्वं क: प्राप्तवान्?
उत्तरम्- पृथु:।
80. प्रश्न- राज्ञ: गुणानां संख्या कति?
उत्तरम्- षट्।
81. प्रश्न- भवति दायादबान्धबानां संख्याका?
उत्तरम्- चतस्र:।
82. प्रश्न- क: पुंनाम नरकात् पितरं त्रायते?
उत्तरम्- पुत्र:।
83. प्रश्न- प्रजापालनं क: करोति?
उत्तरम्- राजा।

84. प्रश्न-श्रुतिः कति विधः, के च ते?
द्विविधः, 1. वैदिकी, 2. तान्त्रिकी च।
85. प्रश्न- मनस्मृतेः मतानुसारं कतिप्रकारकाणि दण्डाः भवन्ति?
उत्तरम्- चतुः प्रकारकाणि।
86. प्रश्न- धर्मशास्त्रानुसारं कति दुर्गाणि सन्ति?
उत्तरम्- (3) त्रीणि।
87. प्रश्न- मनुमतानुसारं कति विद्या भवन्ति?
उत्तरम्- चतस्त्रः।
88. प्रश्न-धर्म विषये किं प्रमाणम्?
उत्तरम्- मन्वादीनां च वेदविदां स्मृतिधर्मे प्रमाणम्।
89. प्रश्न- गर्गानुसारेण-धर्म विषये किं प्रमाणम्?
उत्तरम्- "वैकल्पिकेः आत्मतुष्टिः प्रमाणम्।
90. प्रश्न-कः धर्मः अनुष्ठेयः?
उत्तरम्- "श्रुति-स्मृत्युदितं धर्ममनुतिष्ठेद्"
91. प्रश्न-मनुमतानुसारम्, अग्नि, वायु, सूर्य, चन्द्रमा, यम, कुवेर, वरुण, महेन्द्रादिप्रभृति कः भवति?
उत्तरम्- राजा।
92. प्रश्न- स्मृतिग्रन्थे कति विधो धर्म प्रतिपादितः? के च ते?
उत्तरम्-षड्विधो धर्मः प्रतिपादितः, 1. वर्णधर्म, 2. आश्रमधर्मो, 3. वर्णाश्रमधर्मो, 4. गुणधर्मो, 5. निमित्तधर्मः 6. सामान्यधर्मश्चेति।
93. प्रश्न-मीमांसा-वार्तिककार-कुमारिलभट्टः स्ववार्तिके धर्मप्रमाणे कं प्रमाणं मण्डयति?
उत्तरम्- प्रत्यक्षप्रमाणम्।
94. प्रश्न- "चोदनालक्षणोऽर्थो धर्मः" इति कस्या लक्षणम्?
उत्तरम्- धर्मस्य।
95. प्रश्न- मनुस्मृतौ वेदविषये किमुक्तमस्ति?
उत्तरम्- वेदोऽखिलो धर्ममूलम्।
96. प्रश्न- धर्मस्यार्थः किम्?
उत्तरम्-धार्यते-अवलम्बने-पाल्यते इति वा धर्मः।
97. प्रश्न- मनुस्मृतौ धर्मस्य का परिभाषा?
उत्तरम्-श्रुतिप्रमाणको धर्मः।
98. प्रश्न- स्मृतिकारानुसारेण धर्मस्य कानि स्वरूपाणि, कानि च तानि?
उत्तरम्-(5) पञ्च, 1. वर्णधर्मः, 2. आश्रमधर्मः, 3. वर्णाश्रमधर्मः, 4. नैमित्तिकधर्मः, 5. गुणधर्मश्च।
99. प्रश्न- नैमित्तिकधर्मः कः भवति?
उत्तरम्-प्रायश्चित-विधानम्।

100. प्रश्न- गुणधर्मः कः भवति?
उत्तरम्-अभिषिक्त-राज्ञः संरक्षणात्मकः।

101. प्रश्न- भगवान् इति शब्दस्य कोऽर्थः?
उत्तरम्- समग्रैश्वर्यवान् ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः,
ज्ञान-वैराग्ययोश्चैव षण्णां भग इतीङ्गना।।
इति विष्णुपुराणे उक्तम्, मतुवन्तेन संबोधन भगवन्निति।

102. प्रश्न-स्मृतिकारानुसारेण धर्मस्य किम् दश-लक्षणम्?
उत्तरम्-धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।

103. प्रश्न- वेदानां देवता काः?
उत्तरम्- अग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः, 3. आदित्यात्सामवेदः।

104. प्रश्न- के दश प्रजापतयः?
उत्तरम्-1. मरीचि, 2. अत्रिः, 3. अङ्गिरः, 4. पुलस्त्यः, 5. पुलहः, 6. क्रतुः, 7. प्रचेतसः, 8. वसिष्ठः, 9. भृगुः, 10. नारदः इति दश प्रजापत्याः।

105. प्रश्न- स्मृतिकारानुसारेण कालनिर्णयस्य समीक्षा काः?
उत्तरम्- मनुष्याणां मासः-पितृणां अहोरात्र, मनुष्याणां वर्षः-देवानां दिवारात्रिः, 1. सतयुगस्य-चत्वारि वर्ष सहस्राणि-ब्राह्मणाः(तपः), 2. त्रेतायाः-त्रीणि वर्ष सहस्राणि-क्षत्रिय (आत्मज्ञानम्) 3. द्वापरस्य-द्वेवर्ष सहस्रे-वैश्यः(यज्ञः), 4. कलियुगस्य-वर्षसहस्रम्-शुद्रः (दानम्)

106. प्रश्न- स्मृतिग्रन्थे ब्रह्मोत्पत्तिः विषये किं कथनम्?
उत्तरम्- तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।। 9।।

107. प्रश्न-स्मृतिग्रन्थे ब्रह्मस्वरूप विषये किं कथनम्?
उत्तरम्-यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम्।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते।। !!।।

108. प्रश्न- कानि पञ्च ज्ञानेन्द्रियाणि?
उत्तरम्-!. श्रोत्रः, 2. त्वचा, 3. चक्षुः, 4. जिह्वा, 5. नासिकाश्च।

109. प्रश्न- कानि पञ्च कर्मेन्द्रियाणि?
उत्तरम्-1. पायु(गुदा), 2. उपस्थ(शिश्न/योनी), 3. हस्त, 4. पाद, 5. वाणी।

110. प्रश्न- स्मृतिग्रन्थे ब्राह्मणेषु कथं ब्रह्मवेदिनः श्रेष्ठः?
उत्तरम्- ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः।
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः।। मनु-//97।।

111. प्रश्न- स्मृत्यानुसारं प्रधानधर्मः कः?
उत्तरम्-आचारः परमो धर्मः।

112. प्रश्न- धर्मस्य सामान्य-लक्षणं किम्?
उत्तरम्- विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनवीयनुज्ञातो यो धर्मस्तं निबोधत।। मनु- 2/1।।
113. प्रश्न- श्रुतिशब्देन गृहयन्ते / बुध्यन्ते?
उत्तरम्- (4) चत्वारो वेदाः।
114. प्रश्न- स्मृतिः शब्देन किं ज्ञेयम्?
उत्तरम्- धर्मशास्त्रम्।
115. प्रश्न- कः वेद निन्दकः?
उत्तरम्- नास्तिको वेद निन्दकः।
116. प्रश्न- धर्मस्य साक्षात् लक्षणं किम्?
उत्तरम्- वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्।। मनु- 2/12।।
117. प्रश्न- धर्मस्य कति प्रमाणानि, कानि च तानि?
उत्तरम्- चत्वारि प्रमाणानि, 1. वेदः, 2. स्मृतिः, 3. सदाचारः, 4. प्रियमात्मनः।
118. प्रश्न- मनुस्मृतौ आर्यावर्तस्य का सीमा वर्णिताऽस्ति?
उत्तरम्- आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्त्तं विदुर्बुधाः।। मनु- 2/22।।
119. प्रश्न- मनुस्मृतौ ब्राह्मणस्य उपनयन-संस्कारस्य उत्कृष्टसमयः कः?
उत्तरम्- गर्भाष्टमवर्यः गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भातु द्वादशे विशः।। मनु- 2/36।।
120. प्रश्न- ब्रह्मचारि प्रथमा भिक्षा का ददाति?
उत्तरम्- माता, मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्।। मनु- 2/50।।
121. प्रश्न- पूर्वाभिमुख भोजनेन किं फलं प्राप्नोति?
उत्तरम्- आयुः।
122. प्रश्न- दक्षिणाभिमुख भोजनेन किं फलं प्राप्नोति ?
उत्तरम्-यशः।
123. प्रश्न- पश्चिमाभिमुख भोजनेन किं फलं प्राप्नोति ?
उत्तरम्- श्रियम् (धनम्)
124. प्रश्न- उत्तराभिमुख भोजनेन किं फलं प्राप्नोति ?
उत्तरम्- सत्यस्य-इच्छाम्।
125. प्रश्न- स्त्रीणां वैदिक-संस्कारः कदा भवति?
उत्तरम्- विवाहसमये।
126. प्रश्न- कः प्रणवः?
उत्तरम्- (अ उ म्) ॐ।

127. प्रश्न- मौनात् किं विशिष्यते?
उत्तरम्- सत्यम्।
128. प्रश्न- "परं ब्रह्म" इत्यनेन किं ज्ञायते?
उत्तरम्-एकाक्षरमोंकारः।
129. प्रश्न- परं तपः कः?
उत्तरम्- प्राणायामः।
130. प्रश्न- मन्त्रेषु श्रेष्ठः कः?
उत्तरम्- गायत्री-मन्त्रः।
131. प्रश्न- केन नित्यवन्दनेन पापनाशो भवति?
उत्तरम्- सन्ध्यावन्दनेन।
132. प्रश्न- अभिवादन-शीलस्य कानि चत्वारि वर्धन्ते?
उत्तरम्- आयुर्विद्यायशोबलम्।
133. प्रश्न- कानि मान्य-(सम्मान) स्थानानि?
उत्तरम्- (5) पञ्च, 1. धनम्, 2. कुटुम्बी:, 3. आयुः, 4. कर्म, 5. विद्या।
134. प्रश्न- मनुस्मृतौ कः आचार्यः कथितः?
उत्तरम्- उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।। मनु- 2/140।।
135. प्रश्न- मनुस्मृत्यनुसारं कः उपाध्यायः?
उत्तरम्-एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्यर्थमुपाध्यायः स उच्यते।। मनु- 2/141।।
136. प्रश्न- मनुस्मृतौ अध्यापकस्य का प्रशंसा?
य आवृणोत्यवितथं ब्राह्मणा श्रवणावुभौ।
स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन।। मनु- 2/144।।
137. प्रश्न- मनुस्मृतौ गुरुनिन्दाश्रवणनिषेधविषये किं कथितम्?
उत्तरम्- गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः।। मनु- 2/200।।
138. प्रश्न- मनुस्मृतौ गुरुशुश्रूषाफलं किम्?
उत्तरम्-यथा खनन्खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।। मनु- 2/218।।
139. प्रश्न- त्रिवर्गस्य (धर्मार्थकाम) अनुकूलतया किं भवति?
उत्तरम्- कल्याणं भवति।
140. प्रश्न- मनुस्मृतौ अष्टविवाहप्रकाराः के सन्ति?
उत्तरम्- 1. ब्राह्मः 2. दैवः 3. आर्षः 4. प्राजापत्यः 5. आसुरः 6. गान्धर्वः 7. राक्षसः 8. पैशाच इति अष्टौ।

141. प्रश्न- अतिथिपूजनेन किं प्राप्नोति?
उत्तरम्- 1. धनम्, 2. यशः, 3. आयुः, 4. स्वर्गम्।
142. प्रश्न- पिण्डान्वाहार्यकश्राद्धः कस्मिन् तिथौ भवति?
उत्तरम्- अमावास्याम्।
143. प्रश्न- पुण्यार्थाय कान् भोजयेत्?
उत्तरम्- मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्।। मनु- 3/148।।
144. प्रश्न- के सर्वे नरकं यान्ति?
उत्तरम्- परिविित्तिः परिवेत्ता यथा च परिविद्यते।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः।। मनु-3/172।।
145. प्रश्न- ऋषिभ्यः के जाताः?
उत्तरम्- पितरः।
146. प्रश्न- पितृभ्यो के जाताः?
उत्तरम्- देवमानवाः।
147. प्रश्न- देवेभ्यो के जाताः?
उत्तरम्- चराचरसम्पूर्णजगतः।
148. प्रश्न- श्राद्धे कानि श्रावयेत्?
उत्तरम्- स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि।
आख्यानानीतिहासांश्च पुराणान्य खिलानि च।। मनु- 3/232।।
149. प्रश्न- धर्मशास्त्रग्रन्थानां निर्माणकालः कः?
उत्तरम्- ईसवी पूर्व-600-300।
150. प्रश्न- के सन्ति अष्टादश-मुख्य-स्मृतिकाराः?
उत्तरम्-1. मनुः, 2. दक्षः, 3. वृहस्पतिः, 4. गौतमः, 5. यमः, 6. अंगिरा, 7. योगीश्वरः, 8. प्रचेता, 9. शातातपः, 10, पराशरः, 11. संवर्तः, 12. उशना, 13. शंखः, 14. लिखितः, 15. अत्रिः, 16. विष्णुः, 17. आपस्तम्बः, 18. हारीतः।
151. प्रश्न- रामायण-महाभारत-पुराणादि-ग्रन्थेषु कस्य महत्त्वपूर्ण-योगदानं वर्तते?
उत्तरम्- धर्मशास्त्रस्य।
152. प्रश्न- के सन्ति प्रमुखाः "धर्मसूत्र" रचनाकाराः?
उत्तरम्- नव 1. गौतमः, 2. वशिष्ठः, 3. शंखः, 4. गोभिलः, 5. आपस्तम्बः, 6. बौधायनः, 7. विष्णुः, 8. हारीतः, 9. मनुः।
153. प्रश्न- प्राचीन धर्मसूत्रकारः कः?
उत्तरम्- गौतमः।
154. प्रश्न- बौधायनः कस्य वेदस्य आचार्यः?
उत्तरम्- कृष्णयजुर्वेदस्य।

155. प्रश्न- धर्मशास्त्रान्तर्गतमेव राजनीति-लक्षणमर्थशास्त्रं किम्?
उत्तरम्- कौटिल्य-अर्थशास्त्रम्।

156. प्रश्न- कौटिल्य-अर्थशास्त्रे कति अधिकरणानि?
उत्तरम्- (15) पञ्चदश।

157. प्रश्न- कौटिल्य-अर्थशास्त्रे कति अध्याया: सन्ति?
उत्तरम्- (150) पञ्चाशताधिकशतम्।

158. प्रश्न- के सन्ति अष्टादश-उपस्मृतिकारा:?
उत्तरम्- 1. नारद:, 2. पुलह:, 3. गार्ग्य:, 4. पुलस्त्य:, 5. शौनक:, 6. क्रतु:, 7. बौधायन:, 8. जातुकर्ण:, 9. विश्वामित्र:, 10. पितामह:, 11. जाबालि:, 12. नाचिकेता, 13. स्कन्ध:, 14. लौगाक्षि:, 15. कश्यप:, 16. व्यास:, 17. सनत्कुमार:, 18. शन्तनुर्जनक:।

159. प्रश्न- के सन्ति एकविंशति-अन्य-स्मृतिकारा:?
उत्तरम्- वशिष्ठो नारदश्चैव सुमन्तुश्च पितामह:।
विष्णु: काष्णाजिनि: सत्यव्रतो गार्ग्यश्च देवल:।।
जमदग्निर्भरद्वाज: पुलस्त्य: पुलह: क्रतु:।
आत्रेयश्च गवेयश्च मरीचिर्वत्स एव च।।
पारस्कश्चर्ष्यशृङ्गो वैजवापस्तथैव च।
इत्येते स्मृतिकर्तार एकविंशतिरीरिता:।।

160. प्रश्न- मनुस्मृति-ग्रन्थस्य सर्वप्रथम-मुद्रणं कदा अभूत्?
उत्तरम्- 1813 ईसवीये कोलकतायाम्।

161. प्रश्न- मनुस्मृतौ कति श्लोका: सन्ति?
उत्तरम्- 2694 श्लोका:। (चतुर्नवत्याधिकषड्विंशतिशतम्)

162. प्रश्न- सम्पूर्ण-याज्ञवल्क्यस्मृति: कस्मिन् छन्दसि विद्यते?
उत्तरम्- अनुष्टुप् छन्दे।

163. प्रश्न- पराशरस्मृतौ कति अध्याया: श्लोकाश्च सन्ति?
उत्तरम्- (12) द्वादश अध्याया:, 593श्लोकाश्च सन्ति।

164. प्रश्न- कात्यायनस्मृतौ कति श्लोका: सन्ति?
उत्तरम्- 900 श्लोका:।

165. प्रश्न- अङ्गिरास्मृतौ कति श्लोका: सन्ति?
उत्तरम्- 72 श्लोका: सन्ति।

166. प्रश्न-यमस्मृतौ कति श्लोका: सन्ति?
उत्तरम्- 78 श्लोका: सन्ति।

167. प्रश्न- वंगाले धर्मशास्त्रस्य त्रिदेवा: के?
उत्तरम्- 1. जीमूतवाहन, 2. शूलपाणि, 3. रघुनन्दन।

168. प्रश्न- वृत्त्यनुसारं ब्राह्मणानां के दश-प्रकारा: सन्ति?
उत्तरम्- 1. देव-ब्राह्मण:, 2. मुनि-ब्राह्मण:, 3. द्विज-ब्राह्मण:, 4. क्षत्र-ब्राह्मण:,

5. वैश्य-ब्राह्मण:, 6. शूद्र-ब्राह्मण:, 7. निषाद-ब्राह्मण:, 8. पशु-ब्राह्मण:, 9. म्लेच्छ-ब्राह्मण:, 10. चाण्डाल-ब्राह्मण:।

169. प्रश्न- भारते दासप्रथाया: विरुद्ध-नियम: कदा स्वीकृत:?
उत्तरम्- सन् 1843 तमे वर्षे।

170. प्रश्न- महर्षि-गौतम मते संस्काराणां का संख्या निर्धारित?
उत्तरम्- (40) चत्वारिंशत्।

171. प्रश्न- मनुमतानुसारं धर्मस्य महत्त्वं किम्?
उत्तरम्- यज्ञोऽनृतेन क्षरति तप: क्षरति विस्मयात्।
आयुर्विप्रापवादेन दानं च परिकीतितात्।।

172. प्रश्न- के सन्ति पञ्चमहायज्ञा:?
उत्तरम्- 1. ब्रह्मयज्ञ:, 2. पितृयज्ञ:, 3. देवयज्ञ:, 4. नृयज्ञ:, 5. भूतयज्ञ:।

173. प्रश्न- क: ब्रह्मयज्ञ:?
उत्तरम्- अध्ययनम्-अध्यापनं च ब्रह्मयज्ञ:।

174. प्रश्न- क: पितृयज्ञ:?
उत्तरम्- "अन्नाद्येनोदकेन वा" इति तर्पणं वक्ष्यति, स: पितृयज्ञ:।

175. प्रश्न- क: देवयज्ञ:?
उत्तरम्- अग्नौ होमोवक्ष्यमाणो देवयज्ञ:।

176. प्रश्न- क: मनुष्ययज्ञ:?
उत्तरम्- अतिथिपूजनं मनुष्ययज्ञ:।

177. प्रश्न- क: भूतयज्ञ:?
उत्तरम्- भूतबलि: भूतयज्ञ:।

178. प्रश्न- के सन्ति सप्तर्षय:?
उत्तरम्-1. मरीचि, 2. अंगिरा, 3. अत्रि:, 4. पुलस्त्य:, 5. पुलह:, 6. क्रतु:, 7. वशिष्ठ:।

179. प्रश्न- सप्तसमुद्र: के सन्ति?
उत्तरम्-1. क्षीरसागर:, 2. लवणसागर:, 3. दधिसागर:, 4. घृतसागर:, 5. मद्यसागर:, 6. इक्षुसागर:, 7. स्वादुसागर:।

180. प्रश्न- कानि सप्तधान्यानि?
उत्तरम्-1. कङ्गु, 2. मुदगल, 3. तिल:, 4. भव (कोण) 5. धान्यम्, 6. पणक, 7. माष:।

181. प्रश्न- कानि पञ्चरत्नानि?
उत्तरम्-1. स्वर्ण, 2. हीरकं, 3. मौलिक, 4. पद्मराग:, 5. नीलराग:।

182. प्रश्न- के पञ्चवायव:?
उत्तरम्- 1. प्राण:, 2. अपान:, 3. व्यान:, 4. उदान:, 5. समान:।

183. प्रश्न- के पञ्चमहायज्ञ:?
उत्तरम्- 1. ब्रह्मयज्ञ:, 2. देवयज्ञ:, 3. अतिथियज्ञ:, 4. पितृयज्ञ:, 5. भूतयज्ञ:।

184. प्रश्न- के पञ्चोपचार:?
उत्तरम्-1. गंध:, 2. पुष्पम्, 3. धूपम्, 4. दीपम्, 5. नैवेद्यम्।

185. प्रश्न- के पञ्चवृक्षा:?
उत्तरम्-1. आम्र, जम्बू, 3कपित्थ, 4. वट, 5. बिल्व:।

186. प्रश्न- के पञ्चदेवता?
उत्तरम्-1. दुर्गा, 2. गणेश:, 3. सूर्य:, 4. विष्णु:, 5. शिव:।

187. प्रश्न- के त्रयोऽग्नय:?
उत्तरम्-1. दक्षिणाग्नि:, 2. गार्हपत्याग्नि:, 3. आहवनीयाग्नि:।

188. प्रश्न- जपस्य भेदत्रयी का?
उत्तरम्- वाचिकजप: 2. उपांशुजप: 3. मानसिकजप:।

189. प्रश्न- के अष्टगन्धा:?
उत्तरम्- 1. अगर, 2. तगर, 3. चन्दन, 4. कस्तूरी, 5. देवदारू, 6. लालचन्दन, 7. कुडम, 8. केसर।

190. प्रश्न- के सन्ति षोडशोपचार:?
उत्तरम्-1. पाद्यम्, 2. अर्घ्य:, 3. आचमनं, 4. स्नानं, 5. वस्त्रम्, 6. आभूषणम्, 7. गन्ध:, 8. पुष्पम्, 9. धूप:, 10. दीप:, 11. नैवेद्यम्, 12. आचमनम्, 13. ताम्बूलम्, 14. स्तवपाठ:, 15. तर्पणम्, 16. नमस्कार:।

191. प्रश्न- जम्बूदीपस्य कानि नववर्षानि?
उत्तरम्-1. भारतवर्ष:, 2. किम्पुवर्ष:, 3. हरिवर्ष:, 4. कुरूवर्ष:, 5. भद्राश्वर्ष:, 6. हिरण्यवर्ष:, 7. रम्यवर्ष:, 8. केतुमालवर्ष:, 9. इलावृतवर्ष:।

192. प्रश्न- के पञ्चोपचारा: सन्ति?
उत्तरम्-1. गन्धम्, 2. पुष्पम्, 3. धूपम्, 4. दीपम्, नैवेद्य:।

193. प्रश्न- "नवग्रहेषु" आद्य: ग्रह: क:?
उत्तरम्- रवि:।

194. प्रश्न- भगवत: सूर्यनारायणस्य "रथस्य" कति चक्राणि?
उत्तरम्- 1-एकम्।

195. प्रश्न- मङ्गलदेवताया: वाहनं किम्?
उत्तरम्- मेष:।

196. प्रश्न- बुधग्रहस्य वाहनं किम्?
उत्तरम्- सिंह:।

197. प्रश्न- बृहस्पतेरायुधं किम्?
उत्तरम्- दण्ड:।

198. प्रश्न- कर्मकाण्डेन सम्बद्धं किं सूत्रम्?
उत्तरम्- श्रौतसूत्रम्।

199. प्रश्न- कः स्मृति-ग्रन्थः विधि-ग्रन्थोमन्यन्ते?
उत्तरम्- मनुस्मृतिग्रन्थः।
200. प्रश्न-मनु पुत्रः कः?
उत्तरम्- भृगुः।
201. प्रश्न-कियन्त आश्रमाः, के च ते?
उत्तरम्- चत्वारः-1. ब्रह्मचर्याश्रमः, 2. गृहस्थाश्रमः, 3. वानप्रस्थाश्रमः, 4. संन्यासाश्रमश्च।
202. प्रश्न-कियन्तः पुरुषार्थाः, के च ते?
उत्तरम्- चत्वारः-1. धर्मः, 2. अर्थः, 3. कामः, 4. मोक्षः।
203. प्रश्न-धर्म शब्दस्य का व्युत्पत्तिः?
उत्तरम्- "धरति लोकान्" यद्वा "ध्रियते पुण्यात्मभिः यः स धर्मः।
204. प्रश्न-भारतीय-संस्कृतेः सिद्धान्तः कः?
उत्तरम्- आत्मदर्शनम्।
205. प्रश्न-को नाम आत्मा?
उत्तरम्- ज्ञानाधिकरणमात्मा।
206. प्रश्न- आत्मा कति विधः?
उत्तरम्- द्विविधः-परमात्मा जीवात्मा च।
207. प्रश्न-वेदे प्रतिपादिता संस्कृतिः का कथ्यते?
उत्तरम्- "भारतीया संस्कृतिः"
208. प्रश्न-भारतीय-संस्कृतेराधारभूता भाषा का?
उत्तरम्- संस्कृतभाषा।
209. प्रश्न-संस्कृतेः मुख्यमुद्देश्यं किम्?
उत्तरम्- शारीरिक-मानसिक-आत्मशक्तीनां विकासः।
210. प्रश्न-धर्मेण हीना मानवाः भवन्ति?
उत्तरम्- पशुभिः समानाः भवन्ति।
211. प्रश्न-विजयस्य मूलं किम्?
उत्तरम्- "यतो धर्मस्ततो जयः।"
212. प्रश्न-महाभारतानुसारेण धर्माऽधर्मयोः के लक्षणे स्तः?
उत्तरम्- "परोपकारः पुण्याय पापाय परपीडनम्।"
213. प्रश्न-"अर्थमूलौ हि धर्मकौ" सिद्धान्तोऽयं केन प्रतिपादितः?
उत्तरम्- कौटिल्येन।
214. प्रश्न-कामः कतिविधः, कश्च सः?
उत्तरम्- त्रिविधः-1. सात्त्विकः, 2. राजसः, 3. तामसश्चेति।
215. प्रश्न-भारतीय-जीवनस्य अन्तिमं लक्ष्यं किम्?
उत्तरम्- मोक्षप्राप्तिः।

216. प्रश्न-सर्वविध-कामनाया: परित्यागो "मोक्ष:" इति केन सूच्यते?
उत्तरम्- श्रुत्या न मोक्षो नभस: पृष्ठे न पाताले न भूतले।
सर्वाशासंक्षये चेत: क्षयो मोक्ष इति श्रुति:।।

217. प्रश्न-के नाम संस्कारा:?
उत्तरम्-डॉ. राजवली पाण्डेयऽनुसारेण याभि: धार्मिक-क्रियाभि: व्यक्ते: दैहिको मानसिको बौद्धिकश्च परिष्कारो जायते ता: क्रिया: क्रियासम्पादकान्यनुष्ठानानि च संस्कारा उच्यन्ते।

218. प्रश्न-संस्कार-शब्दस्यार्था भवन्ति?
उत्तरम्- सामान्यरूपेण समस्त-धार्मिककृत्यानि।

219. प्रश्न-जन्मकालिक: क: संस्कार:?
उत्तरम्- जन्मकालिक: संस्कारो जातकर्मसंस्कार उच्यते।

220. प्रश्न-नामकरण-संस्कार: कदा भवति?
उत्तरम्-बृहस्पति-मतानुसारेण शिशोर्नामकरणं जन्मनो दशम-द्वादश-त्रयोदश-षोडशैकोनविंश-द्वात्रिंश-दिवसेषु वा भवति।

221. प्रश्न-शिशो: निष्क्रमणकाल: क:?
उत्तरम्- द्वादशदिवसात्-चतुर्थमासपर्यन्तम्।

222. प्रश्न-शिशो: सूर्यदर्शनं कदाऽपेक्षितमस्ति?
उत्तरम्- चतुर्थे मासि।

223. प्रश्न-अन्न-प्राशनं कदा कार्यम्?
उत्तरम्- षष्ठे मासि।

224. प्रश्न-चूडाकरण-संस्कार: कदा कार्य:?
उत्तरम्- प्रथमे तृतीये वा वर्षे।

225. प्रश्न-कर्णवेधस्य काल: क:?
उत्तरम्- बृहस्पति-मतानुसारेण जन्मनो दशमे द्वादशे षोडशे वा दिवसे।

226. प्रश्न-विद्यारम्भ: संस्कार: कदाऽपेक्षित:?
उत्तरम्- विद्यारम्भ-संस्कारो विश्वामित्रस्याऽनुसारेण पञ्चमे वर्षेऽपेक्षित:।

227. प्रश्न-किन्नाम समावर्तनम्?
उत्तरम्- वेदाध्ययनानन्तरं गुरुकुलात् स्वगृहाऽगमनं समावर्तनम्।

228. प्रश्न-स्नातक: कतिविध:, कश्च स:?
उत्तरम्-त्रिविध:-1. विद्यास्नातक:, 2. व्रतस्नातक:, 3. विद्याव्रतस्नातकश्च।

229. प्रश्न-वात्सायनस्य कामसूत्राऽनुसारेण प्रत्येकस्याऽऽश्रमस्य कियन्ति वर्षाणि निर्धारितानि सन्ति?
उत्तरम्- (25) पञ्चविंशति: वर्षा: निर्धारिता: सन्ति।

230. प्रश्न-प्राचीनकाले "वेद:" केन नाम्ना प्रथित आसीत्?
उत्तरम्- "श्रुति:" इति नाम्ना।

231. प्रश्न-को नाम आचार:?
उत्तरम्- उत्तमो व्यवहार एवाऽऽचार:।
232. प्रश्न-क: सदाचार:?
उत्तरम्- उत्तमजनानां सतां वा आचार: सदाचार:।
233. प्रश्न-को नाम शिष्ट:?
उत्तरम्- शास्त्रविहिताऽनुशासनेन योऽनुशासित: स शिष्ट:।
234. प्रश्न-विनयशीलो जन: कथं भवति?
उत्तरम्- विधया।
235. प्रश्न-का नाम क्षमा?
उत्तरम्- परेणापकारे कृते तं प्रत्यपकाराऽनाचरणं क्षमा।
236. प्रश्न-को नाम परोपकार:?
उत्तरम्- स्वार्थं परित्यज्य-अन्येषां जनानां प्राणिनां वा हिताय यत् कर्मक्रियतेतत्(कर्म) "परोपकार:" कथ्यते।
237. प्रश्न-"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता" इयं भावना कस्मिन् ग्रन्थे प्रकटिता विद्यते?
उत्तरम्- मनुस्मृतौ।
238. प्रश्न-वैदिक-संस्कृतेरात्मा क:?
उत्तरम्- "विश्ववन्धुत्वभावना।
239. प्रश्न-वेद शब्दस्यार्थ: क: भवति?
उत्तरम्- ज्ञानम्।
240. प्रश्न-हिन्दु-धर्मे कानि पञ्चमहाव्रतानि?
उत्तरम्- 1. संवत्सर:, 2. रामनवमी, 3. कृष्ण-जन्माष्टमी, 4. शिवरात्रि:, 5. दशावतार:।
241. प्रश्न-संवत्सरस्य प्रारम्भ: कदा भवति?
उत्तरम्- चैत्र-मासे शुक्लपक्षस्य प्रतिपदा तिथित: भवति।
242. प्रश्न- कृष्ण-जन्माष्टमी कदा भवति?
उत्तरम्- भाद्रपदे कृष्णपक्षस्य अष्टभ्यां तिथौ भवति।
243. प्रश्न- शिवरात्रि: कस्मिन् मासे कस्यां च तिथौ भवति?
उत्तरम्- फाल्गुनमासे कृष्णपक्षस्य चतुथ्यां तिथौ भवति।
244. प्रश्न- दशावतार: कस्मिन् मासे कस्यां च तिथौ भवति?
उत्तरम्- भाद्रमासे शुक्लपक्षस्य दशभ्यां तिथौ भवति।
245. प्रश्न-प्रजापति दक्षस्य पत्नी नाम किम्?
उत्तरम्- वीरणी।
246. प्रश्न-दक्षप्रजापते: कति पुत्रा: आसन्?
उत्तरम्-दशसहस्त्र हर्यस्व नामका:पुत्रा:, एवं एकसहस्त्र शबलाश्च नामका:पुत्रा: आसन्।
247. प्रश्न-दक्षप्रजापते: कति आत्मजा: आसन्?
उत्तरम्- (53) त्रिपञ्चाशत् आत्मजा: आसन्।

248. प्रश्न-प्रजापति-दक्षः धर्मं कतिभ्यः आत्मजेभ्यः दत्तवान्?
उत्तरम्- (10) दशः आत्मजोभ्यः।

249. प्रश्न- प्रजापति-दक्षः कश्यपाय कति आत्मजान् दत्तवान्?
उत्तरम्- (13) त्रयोदश आत्मजान्।

250. प्रश्न- प्रजापति-दक्षः चन्द्रमसे कति आत्मजान् दत्तवान्?
उत्तरम्- (27) सप्तविंशतिः।

251. प्रश्न- प्रजापति-दक्षः पितृभ्यः अग्न्ये शंकराय कति आत्मजा दत्तवान्?
उत्तरम्-एकाराय अत्मजां पितृभ्यः, एकाः अत्मजां अग्नेय, एकाम् अत्मजां सती शंकरः।

252. प्रश्न-रामचरितमानसस्य रचनाकारः कः?
उत्तरम्- तुलसीदासः।

253. प्रश्न- तुलसीदासस्य जन्मवर्षं कः?
उत्तरम्- 1532 ईसवीं।

254. प्रश्न- तुलसीदासस्य पितरौ कौ आस्ताम्?
उत्तरम्- माता-हुलसी, पिता-आत्मारामः आस्ताम्।

255. प्रश्न- तुलसीदासस्य भार्या नाम किम्?
उत्तरम्- रत्नावली।

256. प्रश्न- धर्मग्रन्थेषु वर्णित-मुख्य-परलोकाः के सन्ति?
उत्तरम्-(5 पञ्च) 1. स्वर्गलोकः, 2. नरकलोकः, 3. पितृलोकः, 4. प्रेतलोकः, 5. पाताललोकः।

257. प्रश्न-शनै श्चरस्य मातुर्नाम किम्?
उत्तरम्- छाया।

258. प्रश्न-त्रेतायुगस्य वानरराजसुग्रीवः एवं द्वापरयुगस्य महारथी कर्णः कस्य पुत्रौ स्तः?
उत्तरम्- भगवतःसूर्यस्य।

259. प्रश्न- वास्तुशास्त्रस्य का परिभाषा?
उत्तरम्- गृहनिर्माणसम्बन्धिसमस्तविषयाणां पारलौकिक-विवेचनमेव वास्तुशास्त्रम्।

260. प्रश्न-समस्तवेदेषु विवेच्य-त्रयीविषयाः के सन्ति?
उत्तरम्- 1. ज्ञानकाण्डम्, 2. उपासनाकाण्डम्, 3. कर्मकाण्डम्।

261. प्रश्न-चतुर्वेदानां के सन्ति उपवेदाः?
उत्तरम्-1. ऋग्वेदस्य-आयुर्वेदः, 2. यजुर्वेदस्य-धनुर्वेदः, 3. सामवेदस्य-गान्धर्ववेदः, 4. अथर्ववेदस्य तन्त्रः।

262. प्रश्न-आरण्यकं किमस्ति? कानि च तानि?
उत्तरम्-अरण्ये भवमध्ययनं मननमेव आरण्यकम्, तच्च (7 सप्त) 1. ऐतरेयम्, 2. शांखायनम्, 3. तैत्तरीयम्, 4. मैत्रायणी, 5. माध्यन्दिनम्, 6. तल्वकारम्, 7. जैमिनीयम्।

263. प्रश्न- उपनिषद् शब्दस्य कोऽर्थः?
उत्तरम्-"उप-नि-सद्" (समीपे उपवेशनम्) ब्रह्मविद्या प्राप्त्यर्थं गुरोः समीपे उपवेशनं-ज्ञानम्।

264. प्रश्न- न्यायदर्शनानुसारं ईश्वरः कः?
उत्तरम्- परमात्मा एव ईश्वरः, आत्मानः द्वे रूपे स्तः-1. जीवात्मा, 2. परमात्मा च।
265. प्रश्न- गीतायां मोक्षप्राप्त्यर्थं कानि त्रीणि साधनानि कथ्यते?
उत्तरम्- 1. कर्मयोगः, 2. ज्ञानयोगः, 3. भक्तियोगः।
266. प्रश्न- कृष्णभक्त-सुरदासस्य जन्म कदा अभूत्?
उत्तरम्- सन् 1478 ईसवीये।
267. प्रश्न- श्री शंकराचार्यस्य जन्म कदा कस्मिन् स्थाने/परिवारे च अभूत्?
उत्तरम्- 788 ईसवीये, मालावारस्य ब्राह्मणपरिवारे च।
268. प्रश्न- निर्गुणशाखायाः प्रमुखभक्तस्य कवीरदासस्य जन्म कदा अभूत्?
उत्तरम्- 1398 ईसवी वर्षे।
269. प्रश्न- स्वामीविवेकानन्दस्य जन्म निधनश्च कदा अभूत्?
उत्तरम्- सन् 1862-4 जुलाई-1902 ईसवीये।
270. प्रश्न- मीराबाई कस्य पुत्री आसीत्?
उत्तरम्- राठौरस्य रतनसिंहस्य।
271. प्रश्न- जयन्त-जयन्ती नामिके कस्य अत्मज-आत्मजे आस्ताम्?
उत्तरम्- पुरन्दर-देवराज-इन्द्रस्य।
272. प्रश्न- धर्मशास्त्रस्य का परिभाषा?
उत्तरम्- धर्मसूत्राणां स्मृतीनां सम्मिलितं रूपमेव धर्मशात्रम्।
273. प्रश्न-कानि प्रमुखानि धर्मसूत्राणि?
उत्तरम्-आपस्तम्बः, वसिष्ठः, बौधायनः, गौतमः, विष्णुः, हारीतः, गोभिलः, खादिरः, कौशिकः,
274. प्रश्न- कानि प्रमुखानि श्रौतसूत्राणि?
उत्तरम्-बोधायनश्रौतसूत्रम्, आपस्तम्बश्रौतसूत्रम्, कात्यायन श्रौतसूत्रम्, सत्याषाढश्रौतसूत्रम्,
275. प्रश्न- कानि प्रमुखानि गृह्यादिसूत्राणि?
उत्तरम्-शांखायन गृह्यसूत्रम्, परस्कर गृह्यसूत्रम्, वार्हस्पत्यसूत्रम्, आश्वलायन गृह्यसूत्रम्, वैखानसस्मार्तसूत्रम्, गौतमपितृमेघसूत्रम्, बोधायनपितृमेघसूत्रम्, मानवगृह्यसूत्रम्, काठक गृह्यसूत्रम्, हिरण्यकेशिगृह्यसूत्रम्, भरद्वाजगृह्यसूत्रम्, इत्यादयः।
276. प्रश्न- "अक्षय-तृतीयायाः" व्रतं कदा भवति?
उत्तरम्- वैशाख-मासस्य शुक्लपक्षस्य तृतीयातिथौ।
277. प्रश्न- "जानकी-नवमी" कदा मन्यते?
उत्तरम्- फाल्गुनमासस्य कृष्णपक्षे नवमी तिथौ।
278. प्रश्न- (छठ) प्रतिहास षष्ठी व्रतं कदा मन्यते?
उत्तरम्- कार्तिकमासस्य शुक्लपक्षस्य षष्ठीं तिथौ।
279. प्रश्न- हिन्दू धर्मे भक्तिः कति प्रकारकाः भवति?
उत्तरम्-"नवधाभक्तिः" 1. श्रवणम्, 2. कीर्तनम्, 3. स्मरणम्, 4. पादसेवनम्, 5. अर्चनम्, 6. वन्दनम्, 7. दास्यम्, 8. सख्यम्, 9. आत्मनिवेदनम्।

280. प्रश्न-"यत्र नार्मस्तु पूजन्ते, रमन्ते तत्र देवता:" इदं प्रसिद्ध-वचनं कस्य ग्रन्थस्य वर्तते?
उत्तरम्- मनुस्मृते:।

281. प्रश्न शिवस्य औरसपुत्रस्य किं नाम?
उत्तरम्- कार्तिकेय:।

282. प्रश्न- विष्णो: अवतारस्य का संख्या?
उत्तरम्- 24 चतुर्विंशति:।

283. प्रश्न- ब्रह्माणा: शक्ति: का कथ्यते?
उत्तरम्- ब्राह्मी।

284. प्रश्न- महाविद्या सृष्टिक्रमानुसारं कति भागेषु विभज्यते?
उत्तरम्- 10 दश भागेषु।

285. प्रश्न- कुमारी पूजाया: सम्बन्ध: कया उपासनया वर्तते?
उत्तरम्- शक्त्युपासनया।

286. प्रश्न- "अथातो भक्तिं व्याख्यास्याम:" कस्येदं वचनम्?
उत्तरम्- नारदस्य।

287. प्रश्न- नचिकेत: कथा कस्मिन् उपनिषदि विद्यते?
उत्तरम्- कठोपनिषदि।

288. प्रश्न- "विष्णु स्मृतौ" गुरुवारं कथ्यते?
उत्तरम्- जैव:।

289. प्रश्न- आजीवन-अविवाहिता विद्याध्यनरता कन्यां का कथ्यते?
उत्तरम्- ब्रह्मवादिनी।

290. प्रश्न- चक्रपूजाया: सम्बन्ध: तन्त्रस्य कया विद्यया अस्ति?
उत्तरम्- वामाचारेण।

291. प्रश्न- तान्त्रिकस्य आदि देव: क:?
उत्तरम्- शिव:।

292. प्रश्न- मारण-वशीकरणदि मन्त्रा: कस्याम् कोट्यां मन्यन्ते?
उत्तरम्- शाबर-मन्त्रे।

293. प्रश्न- एकस्मिन् कल्पे कति मन्वन्तरा: भवन्ति?
उत्तरम्- 14 चतुर्दश।

294. प्रश्न- श्रीराम संवत् कुत: प्रारभ्यते?
उत्तरम्- रावण-विजयत:।

295. प्रश्न- कियत्समये व्यतीते सति अधिकमास: भवति?
उत्तरम्- 32 माह 16 दिन 4 घड़ी।

296. प्रश्न- होराया: चतुर्विंशति: घटिकायां कति प्रहरा: भवन्ति?
उत्तरम्- 8 अष्ट प्रहरा:।

297. प्रश्न- यज्ञोपवीते कति डोरका: भवन्ति?
उत्तरम्- तिस्र:।
298. प्रश्न- जम्बुद्वीपस्य कति विभागा: कथ्यन्ते?
उत्तरम्- 9 नव।
300. प्रश्न- सूर्य-पृथिव्यो: मध्ये स्थितो-लोक: कथ्यते?
उत्तरम्- सूर्याधोलोक:।
301. प्रश्न- कोणार्क-मन्दिरस्य त्रिभागेषु के सन्ति?
उत्तरम्- 1. विमान:, 2. जगमोहन:, 3. अलंकृति:।
302. प्रश्न- "तुलसी-मानस-मन्दिरम्" कुत्र विद्यते?
उत्तरम्- वराणस्याम्।
303. प्रश्न- एकादशीव्रत: कस्यां श्रेण्यां आगच्छति?
उत्तरम्- नित्यव्रतश्रेण्याम्।
304. प्रश्न- प्राजापत्य-व्रत कति दिनानां कृते भवति?
उत्तरम्- 12 द्वादश दिनानाम् कृते।
305. प्रश्न- गोपाष्टमी कस्मिन् दिवसे भवति?
उत्तरम्- कार्तिक-शुक्लाष्टम्याम्।
306. प्रश्न- दत्तात्रेय जयंती कदा मन्यते?
उत्तरम्- मार्गशीर्ष-कृष्ण-दशमी तिथौ।
307. प्रश्न- मित्रावरुणयज्ञात् कस्य महर्षे: उत्पत्ति: अभूत्?
उत्तरम्- वशिष्ठस्य।
308. प्रश्न- मृकुण्डु-मुने: पुत्रस्य किं नाम?
उत्तरम्- मार्कण्डेय:।
309. प्रश्न- उपमन्यु: इत्यस्य गुरोर्नाम किमासीत्?
उत्तरम्- महर्षि धौम्य:।
310. प्रश्न- सती सावित्री इत्यस्या पितुर्नाम किम्?
उत्तरम्- अनुरागेश्वर:।
311. प्रश्न- सांख्यदर्शनस्य प्रवर्तक-कपिलस्य भगिनी का?
उत्तरम्- अनुसूया।
312. प्रश्न- मध्वाचार्यस्य मातुर्नाम किमासीत्?
उत्तरम्- वेदवती।
313. प्रश्न- रामकृष्णपरमहंस: अद्वैतज्ञानं कस्मात् वेदान्तिन: प्राप्नोति?
उत्तरम्- सुकीर्तिवेदान्तिन:
314. प्रश्न- गुरुगोविन्द सिंहस्य जन्म कुत्र अभूत्?
उत्तरम्- पाटलिपुत्रे।

315. प्रश्न- "अकाल-स्तुति" इत्यस्य रचनाकार: क:?
उत्तरम्- गुरु गोविंद सिंह:।
316. प्रश्न- सिक्खधर्मे कति मनकानां माला जपानुकूल भवति:?
उत्तरम्- 108 मनकस्य।
317. प्रश्न- गुरु नानकदेव: संस्कृतभाषाया: ज्ञानं कस्मात् प्राप्तवान्:?
उत्तरम्- बृजनाथम्।
318. प्रश्न- गुरु नानकदेव: फारसीभाषाया: ज्ञानं कस्मात् प्राप्तवान्?
उत्तरम्- मौलवी सैय्यद हुसैनन्य।
319. प्रश्न- गुरुग्रन्थसाहवे कति कवीनां संतानां वा कविता संकलितोऽस्ति?
उत्तरम्- 36 षट्त्रिंशत्।
320. प्रश्न- ब्रह्मावतार: कस्य रचना वर्तते?
उत्तरम्- गुरु गोविन्द सिंहस्य।
321. प्रश्न- गुरुद्वारायां गुरुग्रन्थसाहिवस्य पाठक: कथ्यते?
उत्तरम्- ग्रन्थी।
322. प्रश्न- "वाहे गुरु दा खालसा, वाह गुरु दा फतह" इयं उद्घोषणा (नारा) कस्य?
उत्तरम्- गुरु गोविन्द सिंहस्य।
323. प्रश्न- गुरु गोविन्द सिंहस्य भार्या नाम किम्?
उत्तरम्- जीतोदेवी।
324. प्रश्न- गुरु नानकदेवस्य कुलपुरोहित: क: आसीत्?
उत्तरम्- हरदयाल:।
325. प्रश्न- पारसी धर्मस्य स्थापना कुत्र अभूत्?
उत्तरम्- ईराने।
326. प्रश्न- संत जरथुष्ट्र ज्ञानस्य प्राप्ति: कस्यास्य अवस्थायां अभूत्?
उत्तरम्- 30 त्रिंशति:।
327. प्रश्न- भारते पारसी-धर्मावलम्बिनां सर्वाधिका-संख्या कस्मिन् नगरे आस्ति?
उत्तरम्- मुम्बई-नगरे।
328. प्रश्न- पारसी-धर्मस्य मुख्यदेवता का अस्ति?
उत्तरम्- अग्नि:।
329. प्रश्न- जरथुष्ट्रधर्मस्य उत्पत्ति: कदा जाता?
उत्तरम्- इस्लामधर्मात् पूर्वम्।
330. प्रश्न- मुसलमान: रोजा कस्मिन् मासे रक्षति?
उत्तरम्- रमजान-उल-मुबारिके।
331. प्रश्न- भारते यवनानां संख्या किं प्रतिशतं विधते?
उत्तरम्- 12 प्रतिशतं द्वादश।

332. प्रश्न- मक्का इत्यस्योपरि हजरतमोहम्मद: कदा विजयं प्राप्नोति?
उत्तरम्- 630 ईसवीये।
333. प्रश्न- कुरान शरीफस्यानुसारं शैतानस्य रचनां क: कृतवान्?
उत्तरम्- अल्लाह:।
334. प्रश्न- हजरत-मोहम्मद: अल्लाहस्य संदेशं कस्मात् प्राप्तवान्?
उत्तरम्- देवदूत जिबरीलेम्।
335. प्रश्न- "मियां की सारंग" रागस्य आविष्कार: केन क्रियते?
उत्तरम्- तानसेनेन।
336. प्रश्न- ट्यूराइड चित्रकारी इत्यस्य भारते आगमनं कुत: अभूत्?
उत्तरम्- ईरान मिश्र देशाभ्याम्।
337. प्रश्न- कुरान-शरीफे कति अध्याया: सन्ति?
उत्तरम्- 114 अध्याया:।
338. प्रश्न- हजरत-मोहम्मद-साहवस्य मृत्यु: कदा अभूत्?
उत्तरम्- 632 ईसवीये।
339. प्रश्न- हिजरी संवत वर्षे एकवर्ष: कति दिवसानां मेलनेन भवन्ति?
उत्तरम्- 354 दिवसानाम्।
340. प्रश्न- खीष्ट-पुराणस्य रचनाकार: क:?
उत्तरम्- फादर स्टीफेंस:।
341. प्रश्न- ईसा-मसीहस्य माता-पितौ कौ आस्ताम्?
उत्तरम्- यहूदी।
342. प्रश्न- मुगलकाले लैटिन भाषायां संस्कृत-व्याकरण रचनाकार: क:?
उत्तरम्- रोथ:।
343. प्रश्न- भारते प्रोटेस्टेंट सम्प्रदायस्यागमनं सर्वप्रथमं कदा अभूत्?
उत्तरम्- 1706 ईसवीये।
344. प्रश्न- ईसा मसीह: सलीबोपरि कस्यामवस्थायां कृपामकरोत्?
उत्तरम्- 33 वर्षस्य अवस्थायाम्।
345. प्रश्न- बाइबिले ईश्वरस्य कति आदेशानां उल्लेखो विद्यते?
उत्तरम्- 10 दश आदेशानाम्।
346. प्रश्न- "ओल्ड टेस्टामेंटे" कति लेख शृंखला संकलिताऽस्ति?
उत्तरम्- 46 लेखा:।
347. प्रश्न- "न्यू टेस्टामेंटे" कति लेख शृंखला संकलिताऽस्ति?
उत्तरम्- 27 लेखा:।
348. प्रश्न- प्रथम-जैन-संगीति कस्य शासनकाले अभूत्?
उत्तरम्- चन्द्रगुप्त मौर्यस्य 322 त: 298 ई०पू०।

349. प्रश्न- जैन-धर्मस्य पञ्चमहाव्रतेषु सर्वाधिक-महत्वपूर्णव्रतं किमस्ति?
उत्तरम्- सत्यम्।
350. प्रश्न- कः जैन-तीर्थंकरः विष्णु-भागवत-पुराणयोः नारायणवतारारूपेण वर्णितोऽस्ति?
उत्तरम्- ऋषभनाथः।
351. प्रश्न- पञ्चमहाव्रतेषु ब्रह्मचर्यं स्थापनाकारः तीर्थंकरः कः?
उत्तरम्- वर्द्धमान महावीरः।
352. प्रश्न- दिगम्बर-सम्प्रदायः कः?
उत्तरम्- पूर्ण-नग्नतावादी।
353. प्रश्न- वर्द्धमान-महावीरस्य स्व-जामाज्या-जामालि महोदयेन सह कस्य सिद्धान्तस्योपरि-मतभेदः आसीत्?
उत्तरम्- क्रियमाणकृत्योपरि।
354. प्रश्न- वर्द्धमान-महावीरस्य प्रतीकः कोऽस्ति?
उत्तरम्- सिंहः।
355. प्रश्न पार्श्वनाथस्य प्रतीकः कोऽस्ति?
उत्तरम्- ऋजदार सर्पः।
356. प्रश्न- बौद्धधर्मस्य विशुद्विनागग्रन्थस्य लेखकः कः?
उत्तरम्- बुद्धघोषः।
357. प्रश्न- प्रथमबौद्धसंगीतिः कुत्र अभूत्?
उत्तरम्- राजगृहे।
358. प्रश्न- हीनयान सम्प्रदायस्य का शाखा अस्ति?
उत्तरम्- वैभाषिकी।
359. प्रश्न- बुद्धस्य सम्बन्धे अश्वः कस्य प्रतीकः वर्तते?
उत्तरम्- गृहत्यागस्य।
360. प्रश्न- बुद्धस्य ज्ञानप्राप्तेः प्रतीक-चिह्नं किमस्ति?
उत्तरम्- पिप्पलः।
361. प्रश्न- बौद्धधर्मे शून्यवादस्य प्रवर्तकः कः?
उत्तरम्- वस्तुमित्रः
362. प्रश्न- प्रथमबौद्धसंगीतेः अध्यक्षः कः?
उत्तरम्- महाकस्यपः।
363. प्रश्न- बुद्धः सर्वाधिक-उपदेशः कुत्र प्रदत्तवान्?
उत्तरम्- पाटलिपुत्रे।
364. प्रश्न बौद्धधर्मः कस्य शासनकाले हीनयान-महायानरूपेण विभाजितोऽभूत्?
उत्तरम्- बिम्बसारस्य।
365. प्रश्न- बुद्धस्यानुसारं कति आर्यसत्यम्?
उत्तरम्- चत्वारि।

366. प्रश्न- चतुर्दिशं महातीर्थः चत्वारिधामानि भारते कानि सन्ति ?
उत्तरम्-1. उत्तरे-श्रीवद्रीनाथः, 2. दक्षिणे-श्रीरामेश्वरः, 3. पूर्वस्मिन् श्रीजगन्नाथः, 4. पश्चिमे-श्रीद्वारः।

367. प्रश्न- मोक्षदायिन्यः-सप्तनगर्यः(सप्तपुर्यः) भारते के सन्ति?
उत्तरम्-1. काशी, 2. कांची, 3. मायापुरी, 4. अयोध्या, 5. द्वारावती, 6. मथुरा, 7. अवन्तिका।

368. प्रश्न- भारते पञ्चकेदाराः के सन्ति?
उत्तरम्- 1. केदारनाथः, 2. मध्यमेश्वरः, 3. तुंगनाथः, 4. रुद्रनाथः, 5. कल्पेश्वरः।

369. प्रश्न- पञ्चकाशी संज्ञिताः के सन्ति?
उत्तरम्- 1. काशी, 2. गुप्तकाशी, 3. उत्तरकाशी, 4. तेन्काशी, 5. शिवकाशी।

370. प्रश्न- के सन्ति पञ्चप्रयागाः?
उत्तरम्- 1. देवप्रयागः, 2. रुद्रप्रयागः, 3. कर्णप्रयागः, 4. नन्दप्रयागः, 5. विष्णुप्रयागः।

371. प्रश्न- के सन्ति पञ्च-सरोवराः?
उत्तरम्-1. बिन्दुसरोवरः, 2. नारायणसरोवरः, 3. पम्पासरोवरः, 4. पुष्करसरोवरः, 5. मानसरोवरः।

372. प्रश्न- के सन्ति पञ्चनाथाः?
उत्तरम्-1. श्रीबदरीनाथः, 2. श्रीरंगनाथः, 3. श्रीजगन्नाथः, 4. श्रीद्वारकानाथः, 5. श्रीगोवर्धननाथः।

373. प्रश्न- के सन्ति सप्तनद्यः?
उत्तरम्- 1. गंगा, 2. यमुना, 3. गोदावरी, 4. सरस्वती, 5. कावेरी, 6. नर्मदा, 7. सिन्धु।

374. प्रश्न- के सन्ति सप्तबदरी?
उत्तरम्- 1. श्रीबदरीनाथः, 2. आदि बदरी, 3. वृद्धबदरी, 4. भविष्यबदरी, 5. योगबदरी, 6. आरिबदरी, 7. नृसिंह बदरी।

375. प्रश्न- काः सन्ति सप्तगंगाः?
उत्तरम्- 1. भागिरथी, 2. वृद्धगंगा, 3. कालिन्दी, 4. सरस्वती, 5. कावेरी, 6. नर्मदा, 7. वेणी।

376. प्रश्न- कानि सन्ति सप्तक्षेत्राणि?
उत्तरम्- 1. कुरुक्षेत्रम्, 2. हरिहरक्षेत्रम्, 3. प्रभासक्षेत्रम्, 4. रेणुकाक्षेत्रम्, 5. भृगुक्षेत्रम्, 6. पुरुषोत्तमक्षेत्रम्, 7. सूकरखेत्रम्।

377. प्रश्न- कानि सन्ति नव-अरण्यानि?
उत्तरम्- 1. दण्डकारण्यम्, 2. सैन्धवारण्यम्, 3. पुष्करारण्यम्, 4. नैमिषारण्यम्, 5. कुर्वारण्यम्, 6. उत्पलावर्तकारण्यम्, 7. जम्बूमार्गारण्यम्, 8. हिमवरदारण्यम्, 9. अर्बुदारण्यम्।

378. प्रश्न- गायत्री-मन्त्रः कः?
उत्तरम्- ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

379. प्रश्न- आचमन-मन्त्रः कः?
उत्तरम्- शन्नो देवीर्भिष्टय आपो भवन्तु पीतये। शंयोर्भिस्रवन्तु नः।।
380. प्रश्न- मानसिकशुद्धेः मन्त्रः कः?
उत्तरम्- अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शूचिः।।
381. प्रश्न-यज्ञोपवीत-धारण-मन्त्रः कः?
उत्तरम्- यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्।
आयुष्ममग्रयं प्रतिमुंच शुभ्रं यज्ञोपवींत बलमस्तु तेजः।।
382. प्रश्न-यजमानस्य तिलकधारणावसरे प्रयुक्तो मन्त्रः कः?
उत्तरम्- स्वस्ति नः इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।
383. प्रश्न- यजमानस्य मौलि-बन्धनसमये प्रयुक्तो मन्त्रः कः?
उत्तरम्- यदाबध्नन् दाक्षायणा हिरण्यँ शतानीकाय सुमनस्यमानाः।
तन्म आ बध्नामि शतशारदायायुष्मांजरदष्टिर्यथासम्।।

TOTAL- 383

• • •

12

सामान्यज्ञानम्-

(क) भारतस्य राज्यानि राजधान्यश्च-

राज्यानां नामानि	राजधानीनां नामानि	राज्यानां नामानि	राजधानीनां नामानि
1. बिहार:	पाटलिपुत्रम् (पटना)	2. झारखण्डम्	राँची
3. उत्तरप्रदेश:	लखनऊ	4. मध्यप्रदेश:	भोपाल:
5. राजस्थानम्	जयपुरम्	6. हिमाचल प्रदेश:	शिमला
7. पश्चिम बंगाल:	कोलकाता	8. उड़ीसा	भुवनेश्वरम्
9. पंजाब:	चण्डीगढम्	10. हरियाणा	चण्डीगढम्
11. तमिलनाडु:	चेन्नई (मद्रास:)	12. आन्ध्रप्रदेश:	हैदराबाद:
13. महाराष्ट्रम्	मुम्बई (बम्बई)	14. असम: (असोम)	दिसपुरम्
15. अरुणाचलप्रदेश:	ईटानगरम्	16. गोवा	पणजी
17. गुजरात:	गांधीनगरम्	18. कर्नाटक:	बंगलोरम्
19. केरल:	तिरुअनन्तपुरम्	20. जम्मू: कश्मीरश्च	श्रीनगरम्
21. त्रिपुरा	अगरतल्ला	22. मणिपुरम्	इम्फाल:
23. नागालैण्डम्	कोहिमा	24. मेघालय:	शिलांग:
25. मिजोरम:	आइजोल:	26. सिक्किम:	गंगटोक:
27. छत्तीसगढम्	रायपुरम्	28. उत्तराञ्चलम्	देहरादूनम्

(ख) विश्वस्य प्रमुखदेशास्तेषां राजधान्यश्च-

प्रमुखदेशानां नामानि	राजधानीनां नामानि	प्रमुखदेशानां नामानि	राजधानीनां नामानि
1. भारत:	देहली (नई दिल्ली)	2. पाकिस्तानम्	इस्लामाबाद:
3. अफगानिस्तानम्	काबुलम्	4. इरान:	तेहरान:

क्रमश: .....

प्रमुखदेशानां नामानि	राजधानीनां नामानि	प्रमुखदेशानां नामानि	राजधानीनां नामानि
5. इराकः	बगदादः	6. बंगलादेशः	ढाका
7. जापानम्	टोकियो	8. चीनः	बीजिंगः
9. वर्मा (म्यानमारः)	रंगूनम्	10. भूटानः	थिम्पूः
11. श्रीलङ्का	कोलम्बो	12. उत्तरी कोरिया	पियांग यंगः
13. नेपालः	काठमाण्डूः	14. मंगोलिया	उलन-बटोरः
15. कुवैतः	कुवैतः	16. टर्की	अंकारा
17. जोर्डन	अम्मानम्	18. सऊदी अरबः	रियादः
19. अरब अमीरातः	आबूधवी	20. कतारः	दोहा
21. इजराइलः	येरूसलमः	22. द० कोरिया	सियोलः
23. मालदीपः	मालेः	24. इन्डोनेशिया	जकार्ता
25. थाईलैण्डः	बैकाकः	26. मलेशिया	क्वालालम्पुरम्
27. सिङ्गापुरम्	मलयः	28. आस्ट्रिया	वियाना
29. आयरलैण्डः	डब्लिनम्	30. इटली	रोमः
31. स्विटजरलैण्डः	वर्नः	32. बेल्जियमः	ब्रुसेल्सः
33. फ्रांसः	पेरिसः	34. यूनानः	एथेन्सः
35. यूगोस्लाविया	बेलग्रेडः	36. यूनाइटेडः	किंगडमः
37. जर्मनी	बेनम् (बर्लिनम्)	38. उजबेकिस्तानम्	तासकन्दः
39. बेलारूसः	मिस्कः	40. यूक्रेनः	कीबः
41. रूसः	मास्को	42. मिश्रः	काहिरा
43. सूडानम्	खार्तूमम्	44. जिम्बाम्बे	हरारेः
45. द० अफ्रिफका	प्रीटोरिया	46. कोलम्बिया	बगोटा
47. ब्राजीलः	ब्रासीलिया	48. आस्ट्रेलिया	कैनबरा
49. न्यूजीलैण्डम्	बेलिंगटनम्	50. फिजी	सूबा
51. कनाडा	ओटाबा	52. क्यूबा	ळ्वाना
53. अमेरिका	वशिंगटनम्	54. नार्वे	ओसलो
55. ताइवानः	ताइपेः	56. लेबनानः	बेरूतः
57. वियतनामः	हनोई	58. फिलीपीन्सः	मनीला
59. स्वीडनः	स्टाकहोमः		

(ग) भारतीयसंस्कृतिः, सभ्यता, भाषादि-

1. प्रश्न -विश्वस्य प्राचीनतमा भाषा का?
   उत्तरम्- संस्कृतभाषा।
2. प्रश्न -संस्कृतस्य शाब्दिकार्थः किमस्ति?
   उत्तरम्- संस्कारिता/परिमार्जिता भाषा संस्कृतभाषा।
3. प्रश्न -संस्कृतभाषा कस्यां लिप्यां लिखन्ति स्म?
   उत्तरम्- देवनागरिक-लिप्याम्।
4. प्रश्न -संस्कृतभाषां देवभाषा कथं कथ्यते?
   उत्तरम्- संस्कृतस्य दिव्यतायाः(वैज्ञानिकतायाः) कारणेन।
5. प्रश्न -संस्कृतं कासां भाषानां जननी इति कथ्यते?
   उत्तरम्- भारतीय-आर्य-भाषानाम्।
6. प्रश्न- संस्कृत-साहित्य-वैभवस्य का विशेषता अस्ति?
   उत्तरम्- यन्नेहास्ति न तत् क्वचित्।
7. प्रश्न- आर्यैः विकासिता का सभ्यता?
   उत्तरम्- वैदिकी सभ्यता।
8. प्रश्न- आर्याणां का भाषा?
   उत्तरम्- संस्कृतभाषा।
9. प्रश्न- वैदिक-सभ्यतायाम् उच्चाधिकारी को भवति स्म?
   उत्तरम्- राजा।
10. प्रश्न- आर्याणां समाजः कियत्सु भागेषु विभक्तः?
    उत्तरम्- त्रिषु भागेषु।
11. प्रश्न-आर्याणां समये राज्ञो मुख्यविचारकः कः?
    उत्तरम्- मन्त्री पुरोहितो वा।
12. प्रश्न-आर्याणां को मुख्यो देव?
    उत्तरम्- इन्द्रः।
13. प्रश्न-धार्मिकावसरेषु-आर्याणां पेयं द्रव्यं किम्?
    उत्तरम्- सोमरसः।
14. प्रश्न-वैदिकयुगे-ऋषिभिः "जीवनम्" कियत्सु-आश्रमेषु विभक्तम्?
    उत्तरम्- चतुर्षु-आश्रमेषु।
15. प्रश्न-आर्याणां धार्मिकाणि पुस्तकानि कानि?
    उत्तरम्- वेदाः, ब्रह्मणानि, आरण्यकानि, उपनिषदः, मन्वादि-स्मृतयः, रामायणम्, महाभारतम् पुराणानि च।
16. प्रश्न-वैदिककालाः कियत्सु भागेषु विभक्ता आसन्?
    उत्तरम्- चतुर्षु भागेषु।

17. प्रश्न-उत्तरवैदिक-काल: क:?
उत्तरम्- 1000 ई० पूर्वत: 600 ई०पूर्व-पर्यन्तम्।
18. प्रश्न-हड़प्पा-सभ्यता केन युगेन सम्बद्धा?
उत्तरम्- कांस्ययुगेन।
19. 372. प्रश्न -आयुर्वेदस्य प्रवर्तक: क:?
उत्तरम्- धन्वन्तरि:।
20. प्रश्न -कौटिल्यस्य अर्थशास्त्रमनेन सम्बद्धमस्ति-?
उत्तरम्- राजनीत्या।
21. प्रश्न -"राजा" कनिष्कस्य सभापण्डित: खलु-?
उत्तरम्- अ श्वघोष:।
22. प्रश्न -प्रथमसंस्कृतचलचित्रस्य आदिशङ्कराचार्यस्य निर्देशक: क:?
उत्तरम्- जि. वि. अय्यर।
23. प्रश्न -गुरुकुले स्नातकत्वं प्राप्तुमावश्यक: संस्कार: क:?
उत्तरम्- समावर्तनम्।
24. प्रश्न-"महावलीपुरम्" इति मन्दिरस्य को निर्माता?
उत्तरम्- नरसिहंवर्मन्(द्वितीय:)
25. प्रश्न-सिन्धुघाटी-सभ्यताया: विकासस्याऽनुमानित: काल: क:?
उत्तरम्- 3000 ई० पूर्वत: 1500 ई० पूर्वं यावत्।
26. प्रश्न-सिन्धुघाटी-सभ्यताया: पत्तननगरं किम्?
उत्तरम्- लोथल:।
27. प्रश्न-कस्या नद्यास्तटे सिन्धुघाटी-सभ्यताया: विकासो जात:?
उत्तरम्- सिन्धुनद्यास्तटे।
28. प्रश्न-सिन्धुघाटी-व्यवसितानां को देवो मुख्य:?
उत्तरम्- पशुपति:।
29. प्रश्न-सिन्धुघाटी-व्यवसितानां मुख्यो व्यवसाय: क:?
उत्तरम्- कृषि:।
30. प्रश्न-आर्याणामुद्गमस्थानं किम्?
उत्तरम्- आल्प्सम् (एसिया-यूरोपयो: सीमाञ्चल-क्षेत्रम्)।
31. प्रश्न-भारते-आगतानां प्रमुखाऽऽर्याणां कानि नामानि?
उत्तरम्- इन्डो-आर्या:।
32. प्रश्न-भारते-आगतानां प्रमुखाऽऽर्याणां प्रथम-निवासस्थानं किम्?
उत्तरम्- सिन्धुनद्यास्तटम्।
33. प्रश्न-सिन्धुघाटी-व्यवसितानां मुख्य: अहार: क:?
उत्तरम्- गोधूम:।

34. प्रश्न-हड़प्पा पाकिस्तानस्य कस्मिन् मण्डले विद्यते?
उत्तरम्- पंजाब-प्रान्तस्य माउन्ट-गोमरी-मण्डले।
35. प्रश्न- भारतस्य सर्वप्राचीनतमा संस्कृतिः नाम किम्?
उत्तरम्- हडप्पासंस्कृतिः।
36. प्रश्न -पञ्चकन्यासु "इयं" प्रसिद्धा का?
उत्तरम्- मन्दोदरी।
37. प्रश्न -सप्तकल्पेसु "अयं" प्रथमः-?
उत्तरम्- पार्थिवकल्पः।
38. प्रश्न -"नीललोहितः" इति को भगवान् प्रथितः?
उत्तरम्- शिवः।
39. प्रश्न -सोमनाथः, केदारनाथः, विश्वनाथः, इमानि केषां नामानि?
उत्तरम्- द्वादशज्योतिर्लिङ्गानाम्।
40. प्रश्न -चतुर्दशविद्यासु इयमप्यन्यतमा विद्या?
उत्तरम्- कल्पः।
42. प्रश्न -"निष्क्रमण-नामकरण-समावर्तन" इति के?
उत्तरम्- षोडशसंस्कारेष्वन्यतमाः।
43. प्रश्न -महाकविः विद्यापतिः कस्य युगस्य कविः आसीत्?
उत्तरम्- मध्यकालस्य।
44. प्रश्न सौर-परम्परायां कस्य देवस्य अर्चना भवति?
उत्तरम्- सूर्यस्य।
45. प्रश्न -भागीरथीपुस्तकं कस्यां भाषायां रचितमस्ति?
उत्तरम्- संस्कृतम्।
46. प्रश्न सर्वाधिक लघुग्रहः कः?
उत्तरम्- बुधः।
47. प्रश्न -धनञ्जय" इति श्रीकृष्णः कं सम्बोधयति?
उत्तरम्- अर्जुनम्।
48. प्रश्न -"वाणी" केन भाति?
उत्तरम्- व्याकरणेन।
49. प्रश्न- गायत्रीमन्त्रेण को देवः नमस्क्रियते?
उत्तरम्- सूर्यः।
50. प्रश्न -विचारानां अदान-प्रदानस्य श्रेष्ठ-माध्यमं किमस्ति?
उत्तरम्- भाषा।
51. प्रश्न- संस्कृतभाषायाः लेखनलिपिः का?
उत्तरम्- देवनागरी।

52. प्रश्न- नाटकेषु सर्वाधिकं प्रसिद्धमस्ति-?
उत्तरम्- अभिज्ञानशाकुन्तलम्।
53. प्रश्न- विद्याया: कति भेदा:?
उत्तरम्- चतुर्दश।
54. प्रश्न- संस्कृतस्य शाब्दिकार्थोऽस्ति-?
उत्तरम्- परिमार्जितभाषा।
55. प्रश्न- साधारणजना: कस्या: वाण्या उपयोगं कुर्वन्ति?
उत्तरम्- वैखरीवाण्या:।
56. प्रश्न- उपनिषदा किमभिप्रायम्?
उत्तरम्- ब्रह्मज्ञानम्।
57. प्रश्न- संस्कृतदिवस: कदा आयोज्यते?
उत्तरम्- श्रावणपूर्णिमायाम्।
58. प्रश्न- भाषाविज्ञानस्य आद्यपण्डित: कं मन्यते?
उत्तरम्- आचार्ययास्क:।
59. प्रश्न- नवमल्लिका कस्य नाम?
उत्तरम्- मन्मथबाणस्य।
60. प्रश्न- त्रिभाषासूत्रे संस्कृतस्य स्थानम्-?
उत्तरम्- वेकल्पिकम्।
61. प्रश्न- गुरुपूर्णिमायां कस्या पूजा भवति?
उत्तरम्- व्यासमहर्षे:।
62. प्रश्न- प्राचीनकाले शिक्षाया: प्रमुखमुद्देश्यमासीत्-?
उत्तरम्- मोक्ष:।
63. प्रश्न- पूर्ववेदिककाले परिवार: आसीत्?
उत्तरम्- मातृप्रधान:।
64. प्रश्न- संस्कृतशिक्षया: प्रधानतममुद्देश्यम् -?
उत्तरम्- चरित्रस्य निर्माणम्।
65. प्रश्न -सर्वप्रथमम् आङ्ग्लभाषायामनुदितो ग्रन्थ: क:?
उत्तरम्- अभिज्ञानशाकुन्तलम्।
66. प्रश्न -वाण्या: कति भेदा:?
उत्तरम्- चतस्र:।
67. प्रश्न -"षोडशसंस्कारा:" कस्य विषयोऽस्ति?
उत्तरम्- गृह्यसूत्रस्य।
68. प्रश्न -हर्षवद्धनस्य आस्थानेऽयं कविरासीत्-?
उत्तरम्- बाणभट्ट:।

69. प्रश्न- "तिरुपति" इत्यस्य कोऽर्थः?
उत्तरम्- श्रीपतिः।
70. प्रश्न- विश्वामित्रस्य पिता कः आसीत्?
उत्तरम्- मधुच्छन्दा ऋषि।
71. प्रश्न "सिद्ध-हेमानुशासनम्" केन विरचितम्?
उत्तरम्- हेमचन्द्रेन।
72. प्रश्न कामसूत्रस्य को रचनाकारः?
उत्तरम्- वात्स्यायनः।
73. प्रश्न- बालानां सचित्रसंस्कृतमासिकी पत्रिका का अस्ति?
उत्तरम्- चन्दामामा।
74. प्रश्न- भारतीयखगोलविज्ञानी कः?
उत्तरम्- आर्यभट्टः।
75. प्रश्न- पञ्चतन्त्रस्य रचयिता कः?
उत्तरम्- विष्णुशर्मा।
76. प्रश्न -गौतमबुद्धस्य जन्मस्थानं "लुम्बिनी" कुत्र अस्ति?
उत्तरम्- नेपालदेशे।
77. प्रश्न इस्लामधर्मं सर्वप्रथमं भारते कः आनीतः?
उत्तरम्- मोहम्मद-बिन-कासिमः।
78. प्रश्न -एक-मन्वन्तरे कति दिव्यवर्षाणि-मनुष्यवर्षाणि च भवन्ति?
उत्तरम्-चतुर्युगमानम् (852000) दिव्यवर्षाणि, मनुष्यवर्षाणि-(306720000)
79. प्रश्न -गांधी महोदयस्य चंपारण-सत्याग्रहः केन सम्बद्धः?
उत्तरम्- तीनकठिया।

(घ) शासकाः तेषां कालः, धर्मश्च-

1. प्रश्न-"कुतुबुद्दीन ऐवक्" कस्य परजीवी आसीत्?
उत्तरम्- "मुहम्मद गोरी" इत्यस्य।
2. प्रश्न-चालुक्यकल्याणीवंशस्य शक्तिशाली राजा कः?
उत्तरम्- विक्रमादित्यः(षष्ठः)
3. प्रश्न-चालुक्य-बेंगीवंशस्य कः प्रवर्त्तकः?
उत्तरम्- विष्णुवर्धनः।
4. प्रश्न-चालुक्य-वातपीवंशस्य संस्थापकः?
उत्तरम्- जयसिंहः।
5. प्रश्न मौर्यवंशस्य पतनहेतुः कः?
उत्तरम्- अशोकस्य अहिंसा नीतिः।
6. प्रश्न-दिल्ली-नगर्याः प्रथमा मुस्लिमं-शासिका का?
उत्तरम्- "रजिया वेगम"।

7. प्रश्न-लोदीवंशस्य संस्थापक: क:?
   उत्तरम्- "बहलोल लोदी" महोदय:।
8. प्रश्न-"आगरा" -नगरस्य स्थापना केन कृता?
   उत्तरम्- "सिकन्दर लोदी" महोदयेन।
9. प्रश्न-सिकन्दस्य क: उत्तराधिकारी?
   उत्तरम्- इब्राहिम लोदी।
10. प्रश्न-"मुइनुद्दीन चिस्ती" इति नाम्नो "दरगाह:" कुत्र वर्तते?
    उत्तरम्- अजमेरे।
11. प्रश्न-"मुइनुद्दीन चिस्ती" इति नाम्नो दरगाहस्य निर्माणं केन कारितम्?
    उत्तरम्- "इल्तुत मिश्" इति नामधेयेन।
12. प्रश्न-मौर्यवंशस्य संस्थापक: क:?
    उत्तरम्- चन्द्रगुप्त-मौर्य:।
13. प्रश्न-नन्दवंशस्य अन्तिमो राजा केन पराजित:?
    उत्तरम्- चन्द्रगुप्त-मौर्येण।
14. प्रश्न-चन्द्रगुप्तस्य जन्मकाल: क:?
    उत्तरम्- ई० पू० 345 वर्षम्।
15. प्रश्न-चन्द्रगुप्तस्य मातुर्नाम किम्?
    उत्तरम्- मोरिया(मूरा)
16. प्रश्न-चन्द्रगुप्तस्य क: प्रधानमंत्री?
    उत्तरम्- चाणक्य:।
17. प्रश्न-चाणक्यस्य अपरं नाम किम्?
    उत्तरम्- कौटिल्य:।
18. प्रश्न-कौटिल्यस्य प्रधानो ग्रन्थ: क:?
    उत्तरम्- कौटिल्य-अर्थशास्त्रम्।
19. प्रश्न-मौर्यवंशस्य द्वितीयो राजा क:?
    उत्तरम्- बिन्दुसार:।
20. प्रश्न- मौर्यवंशस्य सर्वप्रसिद्धो राजा क:?
    उत्तरम्- अशोक:।
21. प्रश्न- अशोकस्य राज्यारोहण-काल: क:?
    उत्तरम्- ई० पू० 269 वर्षम्।
22. प्रश्न- अशोकस्य राजधानी कुत्र आसीत्?
    उत्तरम्- पाटलिपुत्रे।
23. प्रश्न- अशोक: कस्मिन् युद्धे विजयं प्राप्तवान्?
    उत्तरम्- कलिङ्ग-युद्धे।

24. प्रश्न- अशोकः कस्य धर्मस्य अनुयायी आसीत्?
उत्तरम्- बौद्धधर्मस्य।
25. प्रश्न- मौर्यवंशस्य शासनं कियन्ति वर्षाणि यावज्जातम्?
उत्तरम्- 137 वर्षाणि।
26. प्रश्न- अशोकस्य मृत्युः कदा अभवत्?
उत्तरम्- ई० पू० 236 वर्षे।
26. प्रश्न- "सेल्युकस्" केन पराजितः?
उत्तरम्- चन्द्रगुप्तमौर्येण।
27. प्रश्न- कालिदासः कस्य राज्ञः सभायां "आस्थानकविः" बभूव?
उत्तरम्- चन्द्रगुप्तविक्रमादित्यस्य।
28. प्रश्न- "भारतीयनेपोलियन्" इति कोऽयं प्रसिद्धः?
उत्तरम्- समुद्रगुप्तः।
29. प्रश्न- गुप्तवंशस्य संस्थापकः कः?
उत्तरम्- श्रीगुप्तः।
30. प्रश्न- गुप्तवंशस्य कालः कः?
उत्तरम्- 320 ई० तः 550 ई० वर्षाणि यावत्।
31. प्रश्न- श्रीगुप्तस्य पुत्रनाम किम्?
उत्तरम्- घटोत्कचः।
32. प्रश्न- चन्द्रगुप्तस्य प्रथमोत्तराधिकारी कः?
उत्तरम्- समुद्रगुप्तः।
33. प्रश्न- स्वर्णयुगं किम्प्रोच्यते?
उत्तरम्- गुप्तंकालः।
34. प्रश्न- समुद्रगुप्तेन अश्वमेघयज्ञः कस्मिन् वर्षे आयोजितः?
उत्तरम्- 360 ई० वर्षे।
35. प्रश्न- समुद्रगुप्तेन कियन्तो राजानः पराजितः?
उत्तरम्- (21) एकविंशतिः।
36. प्रश्न- गुप्तकाले सर्वोच्चं शिक्षा-केन्द्रं किम्?
उत्तरम्- नालन्दा।
37. प्रश्न- चन्द्रगुप्त-द्वितीयस्य प्रसिद्धमुपनाम किम्?
उत्तरम्- विक्रमादित्यः।
38. प्रश्न- गुप्तवंशस्य प्रसिद्धाऽऽयुर्वेदाचार्यः कः?
उत्तरम्- धन्वन्तरिः।
39. प्रश्न- चन्द्रगुप्त-द्वितीय-काले संस्कृत कवि कः?
उत्तरम्- कालिदासः।

40. प्रश्न- विक्रमादित्यस्य राज्यसभायां कियन्ति रत्नानि?
उत्तरम्- (9) नव।
41. प्रश्न- संस्कृतस्य प्रसिद्धं कथापुस्तकं किम्?
उत्तरम्- पंचतन्त्रम्।
42. प्रश्न- अमरसिंहस्य को ग्रन्थः?
उत्तरम्- अमरकोषः।
43. प्रश्न- गुप्तवंशस्य अन्तिमो राजा कः?
उत्तरम्- भानुगुप्तः।
44. प्रश्न- गुप्तवंशस्य शासनकालः कियन्ति वर्षाणि यावत् स्थितः?
उत्तरम्- (200) द्वि वर्षाणि यावत्।
45. प्रश्न-कोऽयं गुप्तकालीकोवैज्ञानिकः यस्य नाम्ना भारतस्य प्रथमोपग्रहःसम्बोध्यते?
उत्तरम्- अर्यभट्टः।
46. प्रश्न -. "स्वर्णयुगः" इति कस्मिन् काले इतिहासे प्रसिद्धः?
उत्तरम्- गुप्तकाले।
47. प्रश्न- बौद्धविद्वान् "अश्वघोषः" कस्य सभायामास्थानकविरासीत्?
उत्तरम्- कनिष्कस्य।
48. प्रश्न- चरकः कस्य राज्ञः शासनकाले प्रसिद्धः चिकित्सको बभूव?
उत्तरम्- कनिष्कस्य।
49. प्रश्न -रजिया सुल्ताना कस्य पुत्री?
उत्तरम्- इल्तुत मिशस्य।
50. प्रश्न -भारते मुगलसाम्राज्यस्थापकः कः?
उत्तरम्- बावर।
51. प्रश्न- बावरः फरगनायाः शासकः कदा नियुक्तः?
उत्तरम्- 8 जून 1494 ई० वर्षे।
52. प्रश्न -"बावर" कदा भारतराष्ट्रम् आक्रामत्?
उत्तरम्- 1526 तमे वर्षे।
53. प्रश्न- बावरस्य शासनकालः कः?
उत्तरम्- 1526-1530 ई० यावत्।
54. प्रश्न- बावरस्य मृत्युतिथिः का?
उत्तरम्- 26 दिसम्बर 1530 ई० वर्षम्।
55. प्रश्न- बावरस्य उत्तराधिकारी कः?
उत्तरम्- "हुमायूँ" महोदयः।
56. प्रश्न- "हुमायूँ" महोदयस्य शासनकालावधिः कः?
उत्तरम्- 1532-1556 वर्षं यावत्।

57. प्रश्न -पानीपतस्य प्रथमयुद्धं कदा अभूत्?
उत्तरम्- 1526 तमे वर्षे।
58. प्रश्न- "हुमायूँ" महोदयस्य मृत्युः कुत्र अभवत्?
उत्तरम्- पुस्तकालये।
59. प्रश्न- "हुमायूँ" महोदयस्य उत्तराधिकारी कः?
उत्तरम्- अकबरः।
60. प्रश्न- अकबरस्य जन्मस्थानं कुत्र अभवत्?
उत्तरम्- अमरकोटे।
61. प्रश्न- अकबरस्य जन्मतिथिः का?
उत्तरम्- 15 अक्टूबर 1542
62. प्रश्न- अकबरस्य शासनकालः कः?
उत्तरम्- 1556 ई०,तः 1605 ई०वर्ष पर्यन्तम्।
63. प्रश्न- अकबर-महाराणा प्रतापयोः मध्ये हल्दीघाटीयुद्धं कदा अभवत्?
उत्तरम्- 1576 ई० वर्षे।
64. प्रश्न- अकबरस्य सेनापतिः कः?
उत्तरम्- मानसिंहः।
65. प्रश्न- अकबरेण "जाजिया-करः" कदा निरस्तः?
उत्तरम्- 1564 ई० वर्षे।
66. प्रश्न- "अकबरनामा" इत्यस्य ग्रन्थस्य को रचनाकारः?
उत्तरम्- "अबुल फजल" महोदयः।
67. प्रश्न- अकबरस्य राजसभायाः प्रसिद्धः संगीतकारः कः?
उत्तरम्- तानसेनः।
68. प्रश्न- अकबरेण को धर्मः प्रचारितः?
उत्तरम्- "दीन ए इलाही" धर्मः।
69. प्रश्न- अकबरस्य द्वितीया राजधानी कुत्राऽऽसीत्?
उत्तरम्- "फतेहपुर सिकरी" इति स्थाने।
70. प्रश्न- अकबरस्य राजसभायां कियन्ति रत्नानि?
उत्तरम्- (9) नव।
71. प्रश्न- अकबरस्य राजसभा कुत्र प्रचलिता?
उत्तरम्- "आगरा" नगर्यां "दिल्ली" नगर्याञ्च।
72. प्रश्न- कस्य राज्ञः नवरत्नेषु एकंरत्नं वीरबलः?
उत्तरम्- अकबरस्य।
73. प्रश्न -"अकबर" कदा मृत्युमगात्?
उत्तरम्- 1605 तमे वर्षे।

74. प्रश्न- अकबरस्य उत्तराधिकारी कः?
उत्तरम्- "जहाँगीर" महोदयः।
75. प्रश्न- जहाँगीरेण कया विवाहः कृतः?
उत्तरम्- "नूरजहाँ" महाभागया।
76. प्रश्न- जहाँगीरस्य राज्यशासनाऽनन्तरं को राज्यसिंहासने उपविशत्?
उत्तरम्- "शाहजहाँ" महोदयः।
77. प्रश्न-कस्य स्मृतौ शाहजहाँ-महोदयेन"ताजमहल" इति नाम्नो भवनस्य निर्माणंकारितम्?
उत्तरम्- "वेगम-मुमताज-महल" इत्यस्य स्मृतौ।
78. प्रश्न -"ताजमहल" एतस्य निर्माण कतिषु वर्षेषु पूर्णमभवत्?
उत्तरम्- द्वाविशति वर्षेषु।
79. प्रश्न -नवदेहल्यां "रक्तदुर्गस्य" निर्माता कः?
उत्तरम्- "शाहजहाँ" महोदयः।
80. प्रश्न- दिल्ल्यां "जामा मश्जिद" इत्यस्य कः निर्माणं कारितवान्?
उत्तरम्- "शाहजहाँ" महोदयः।
81. प्रश्न- औरङ्गजेबः" कदा सम्राड् बभूव?
उत्तरम्- 31 जुलाई 1658 ई० वर्षे।
82. प्रश्न -अन्तिमः "मुगल सम्राट्" कः?
उत्तरम्- बहादुरशाहजफरः।
83. प्रश्न- बहादुर साह जफरस्य मृत्युः कुत्राऽभवत्?
उत्तरम्- "रङ्गून" नगरे।
84. प्रश्न -शेरशाहस्य मृत्युः कदा अभूत्?
उत्तरम्- 1555 तमे वर्षे।
85. प्रश्न- सर्वप्रथमं डाक-प्रथायाः प्रचलनं केन कारितम्?
उत्तरम्- शेरसाहेन।
86. प्रश्न- "शेरखाँ" महोदयः "शेरसाह" इत्युपाधिना कदा विभूषितः?
उत्तरम्- दिल्ल्याः सिंहासने यदा आरूढोऽभवत्।
87. प्रश्न- देशे भूमेः सर्वेक्षण-व्यवस्था केन प्रवर्तिता?
उत्तरम्- शेऱसाहेन।
88. प्रश्न- महाभारत-रामायणोः अनुवादः फारसीभाषायां केन कृतः?
उत्तरम्- "बदायूनी" महोदयेन।
89. प्रश्न- गीतायाः फारसीभाषायामनुवादः केन कृतः?
उत्तरम्- "दारा" महोदयेन।
90. प्रश्न- दरभङ्गायाः को विद्वान्-अकबरकालस्येतिहासं संस्कृत-भाषायामलिखत्?
उत्तरम्- म० म०महेश ठक्कुरः।

91. प्रश्न -"बुलन्द दरवाजा" क्व अस्ति?
उत्तरम्- फतेहपुरसीकरीमध्ये।
92. प्रश्न -"टीपू सुल्तान" इत्यस्य शासनकेन्द्रमासीत्-?
उत्तरम्- मैसूरः।
93. प्रश्न -"अमीर खुसरो" कस्य राज्ञः आस्थाने आसीत्?
उत्तरम्- अलाउद्दीनखिलजी।
94. प्रश्न- मराठा-साम्राज्यस्य संस्थापकः कः?
उत्तरम्- शिवाजी।
95. प्रश्न- शिवाजी महोदयस्य पितृर्नाम किम्?
उत्तरम्- सरदार साहजी भोंसले।
96. प्रश्न -शिवाजी महोदयस्य राज्याभिषेकः कस्मिन् वर्षे अभूत्?
उत्तरम्- 1664 तमे वर्षे।
97. प्रश्न -"छत्रपति शिवाजी" कस्मिन् राज्ये शासनमकरोत्?
उत्तरम्- महाराष्ट्रे।
98. प्रश्न- शिवाजी महोदयस्य उत्तराधिकारी पुत्रः कोऽभवत्?
उत्तरम्- शम्माजी।
99. प्रश्न- शम्माजी महोदयाऽन्तरं राज्यस्य कोऽधिकारी?
उत्तरम्- राजारामः।
100. प्रश्न- औरङ्गजेबस्य देहावसानाऽन्तरं को राजाऽभवत्?
उत्तरम्- शम्माजी महोदयस्य पुत्रः शाहूमहोदयः।
101. प्रश्न- मराठा-वंशस्य कालः कः?
उत्तरम्- 1649 ई० तः 1818 ई० वर्ष-पर्यन्तम्।
102. प्रश्न- सिक्ख-धर्मस्य संस्थापकः आचार्यः कः?
उत्तरम्- गुरुनानकः।
103. प्रश्न- अमृंतसरे स्वर्णमन्दिरस्य निर्माणं केन कारितम्?
उत्तरम्- गुरु-अर्जुनेन।
104. प्रश्न -सिक्खसम्प्रदाये कति गुरवः सन्ति?
उत्तरम्- दश (10)।
105. प्रश्न -पटनानगरे कः शिखगुरुः जन्म अलभत्?
उत्तरम्- गोविन्दसिंहः।
106. प्रश्न- खालसा-पंथस्य नवमो गुरुः कः?
उत्तरम्- दशमो गुरुः-गुरु गोविन्दसिंहः।
107. प्रश्न- रणजीत सिंहस्य शासनकालः कः?
उत्तरम्- 1780 ई० तः 1839 ई० वर्षपर्यन्तम्।

108. प्रश्न -इस्ट इंडिया कंपनी इत्यस्य स्थापना कदा अभूत्?
उत्तरम्- 1600 तमे वर्षे।
109. प्रश्न- "लॉर्ड विलियम बैन्टिक" महोदयस्य कः कालः?
उत्तरम्- 1828 ई० तः 1835 ई० वर्षाणि यावत्।
110. प्रश्न- "सर चार्ल्स मैटकॉक" महोदयस्य शासनकालः कः?
उत्तरम्- 1835 ई० तः 1836 ई० वर्षे यावत्।
111. प्रश्न- "लॉर्ड ऑकलैण्डस्य" कः कालः?
उत्तरम्- 1836 ई० तः 1842 ई० वर्षाणि यावत्।
112. प्रश्न- "लॉर्ड कैनिङ्ग" महोदयस्य कालः कः?
उत्तरम्- 1956 ई० तः 1858 ई० वर्षाणि यावत्।
113. प्रश्न- "लॉर्ड माउन्टवेटन" महोदयस्य कालः कः?
उत्तरम्- 1947 ई० तः 1948 वर्षाणि यावत्।
114. प्रश्न- चक्रवर्ती राजगोपालाचारी-महोदयस्य कालः कः?
उत्तरम्- 1948 ई० तः 1950 ई० वर्षाणि यावत्।
115. प्रश्न- चक्रवर्ती राजगोपालाचारी कदा स्वपदं त्यक्तवान्?
उत्तरम्-1950 ई० वर्षे यदा गणतन्त्रवादि-सम्विधानं भारते कार्यरूपे परिणतं तदा गवर्नरजेनरलपदं त्यक्तवान्।
116. प्रश्न -दुधवाराष्ट्रियोद्यानं कुत्र विद्यते?
उत्तरम्- उत्तरप्रदेशे।
117. प्रश्न -राज्यविधानसभायां सदस्यानां संख्या का?
उत्तरम्- 550,
118. प्रश्न -"त्यज भारतं" आन्दोलनमिदं कदा प्रारम्भयत्?
उत्तरम्- 1942 तमे वर्षे।
119. प्रश्न -बंगालस्य विभाजनं कदा अभूत्?
उत्तरम्- 1905 तमे वर्षे।
120. प्रश्न-. भारतीयभाषानिन्दकः आङ्ग्लशिक्षाप्रचारकश्च कः?
उत्तरम्- लार्डमैकाले।
121. प्रश्न- "मुश्लिम लीग" संस्थायाः संस्थापकौ कौ?
उत्तरम्- आगा खान नवाव-सली मुल्लामहोदयौ।
122. प्रश्न- "मुश्लिम लीग" इति संस्थायाः स्थापनावर्षं किम्?
उत्तरम्- 1906 ई० वर्षम्।
123. प्रश्न -कामेश्वरसिंहसंस्कृतविश्वविद्यालयः कुत्र अस्ति?
उत्तरम्- दरभंगा (बिहारे)
124. प्रश्न विक्रमशीला विश्वविद्यालयः बिहारस्य कस्मिन् मण्डले आसीत्?
उत्तरम्- "भागलपुर" मण्डले।

125. प्रश्न "नवद्वीप- विश्वविद्यालयः" कुत्र अवस्थित आसीत्?
उत्तरम्- आधुनिक-बंगलादेशस्य गङ्गा-जलाङ्गी नद्योः सङ्गमतटे।
126. प्रश्न "तक्षशीला" इदं स्थानं वर्तमानकाले कस्मिन् देशे स्थितम्?
उत्तरम्- पाकिस्ताने।
127. प्रश्न -राष्ट्रियसंस्कृतविद्यापीठं कुत्र?
उत्तरम्- तिरुपतिः।
128. प्रश्न -भारते कति संस्कृतविश्वविद्यालयाः सन्ति?
उत्तरम्- 09 नव,
129. प्रश्न -राष्ट्रियसंस्कृतसंस्थानस्य रणबीरपरिषरः कुत्र अस्ति?
उत्तरम्- जम्मू।
130. प्रश्न -कालिदाससंस्कृतविश्वविद्यालयः कुत्र?
उत्तरम्- नागपुरे।
131. प्रश्न -राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायुपरिषरः कुत्र?
उत्तरम्- केरले।
132. प्रश्न- बिहारस्य वर्तमान-मुख्यमन्त्री कः?
उत्तरम्- नीतीश कुमारः।
133. प्रश्न- बिहारस्य वर्तमान-उपमुख्यमन्त्री कः?
उत्तरम्- सुशील कुमार मोदी।
134. प्रश्न- झारखण्डस्य प्रथमो मुख्यमन्त्री कः आसीत्?
उत्तरम्- बबूलाल मराण्डी।
135. प्रश्न- बिहारस्य उच्च-न्यायालयः कुत्र विद्यते?
उत्तरम्- पटनायाम्।
136. प्रश्न -बिहारदिवसः कदा मन्यते?
उत्तरम्- 1 अप्रैल।
137. प्रश्न -बिहारस्य सर्वाधिकक्षेत्रे कः फसलः भवन्ति?
उत्तरम्- धान्यम्।
138. प्रश्न बिहार विधानपरिषदि कतिसंख्यकाः सदस्याः सन्ति?
उत्तरम्- (75) पञ्चसप्ततिः।
139. प्रश्न विधानसभायाः कार्यकालः कः?
उत्तरम्- पञ्चवर्षात्मकः।
140. प्रश्न बिहार विधानसभायां सदस्यानां संख्या कियती?
उत्तरम्- (243) त्रिचत्वारिंशदुत्तरं द्वे शते।

(ङ) विशिष्टजनानां परिचयः-

1. प्रश्न-कबीरस्य जन्मकालः कदा?
उत्तरम्- 1425 ई० वर्षम्।

2. प्रश्न-कबीरः कस्य प्रदेशस्य वास्तव्यः?
उत्तरम्- उत्तर-प्रदेशस्य।
3. प्रश्न-कबीरः कस्य वादस्य समर्थकः?
उत्तरम्- एकेश्वरवादस्य।
4. प्रश्न-"रामानुजम्" कस्य क्षेत्रस्य निवासी?
उत्तरम्- दक्षिणस्य।
5. प्रश्न- नागार्जुनः कः आसीत्?
उत्तरम्- रसायनज्ञः।
6. प्रश्न-रामदासः कस्य प्रदेशस्य विद्वान् आसीत्?
उत्तरम्- महाराष्ट्रस्य।
7. प्रश्न-चैतन्यमहाप्रभु कस्य क्षेत्रस्य निवासी?
उत्तरम्- बंगस्य (नदिया-नगरस्य)।
8. प्रश्न-चैतन्य महाप्रभोः जन्म कदा अभवत्?
उत्तरम्- 1485 ई० वर्षे।
9. प्रश्न-श्रीमद्बल्लभाचार्यस्य जन्मकालः कः?
उत्तरम्- 1479 ई० वर्षम्।
10. प्रश्न-चैतन्य महाप्रभोः प्रमुखाः शिष्याः के सन्ति?
उत्तरम्- रविदासः, कबीरः, धाना सेनादयश्च।
11. 252. प्रश्न- आर्यभट्टः प्राचीनभारतस्य कः आसीत्?
उत्तरम्- गणितज्ञः।
12. प्रश्न- चरकः कः आसीत्?
उत्तरम्- वैद्यः।
13. प्रश्न- रामकृष्ण परमहंसस्य जन्म कदाऽभवत्?
उत्तरम्- 1836 ई० वर्षे।
14. प्रश्न- रामकृष्ण परमहंसस्य निर्माणतिथिः का?
उत्तरम्- 15 अगस्त 1886 ई० वर्षम्।
15. प्रश्न- आर्य-समाजस्य कः संस्थापकः?
उत्तरम्- स्वामी दयानन्द सरस्वती।
16. प्रश्न- शङ्कराचार्यः कस्य प्रदेशस्य वास्तव्यः?
उत्तरम्- केरलप्रदेशस्य।

(च) संस्था-संस्थापकः-लेखकश्च-

1. प्रश्न- "अभिनव-भारती" संस्थायाः संस्थापना केन कृता?
उत्तरम्- विनय सावरकर-महोदयेन।
2. प्रश्न- "विश्वभारती" संस्थायाः संस्थापकः कः?
उत्तरम्- रवीन्द्रनाथ टैगोर-महोदयः।

3. प्रश्न- हिन्दू-महासभाया: संस्थापको मनीषी क:?
उत्तरम्- मदन मोहन मालवीय:।
4. प्रश्न- "स्वराज्यपार्टी" इति संस्थाया: संस्थापकौ कौ?
उत्तरम्- मोतीलाल नेहरू-चित्तरंजनदासौ।
5. प्रश्न -महात्मा गांधी महोदय: असहयोग-आन्दोलनं कदा प्रारम्भयत्?
उत्तरम्- 1920 तमे वर्षे।
6. प्रश्न- "आजाद हिन्द फौज" इति संघटनस्य संस्थापक: क:?
उत्तरम्- नेताजी सुभाष चन्द्र बोस-महोदय:।
7. प्रश्न- प्रथमस्य भारतीयसमाचारपत्रस्य प्रकाशनं क: अकरोत्-?
उत्तरम्- राजा राम मोहनराय।
8. प्रश्न- "रामकृष्णमिशन" इत्यस्या: संस्थापक: क:?
उत्तरम्- विवेकानन्द:।
9. प्रश्न- वैजयन्तीकोषस्य क: रचनाकार:?
उत्तरम्- यादवप्रकाशाचार्य:।
10. प्रश्न- "पृथ्वीराज रासो" इत्यस्य लेखक: क:?
उत्तरम्- चन्द्रवरदायी।
11. प्रश्न- राजाराममोहनराय:कस्मिन् विषये विरोधमात्मन:अभिव्यक्तवान्?
उत्तरम्- सतीसहगमन विषये।
12. प्रश्न- ब्रह्मसमाजस्य संस्थानक: क:?
उत्तरम्- राजाराम मोहन राय:।
13. प्रश्न- राजाराम मोहन रायस्य जन्मकाल: क:?
उत्तरम्- 1774 ई० वर्षम्।
14. प्रश्न- कांग्रेसस्य स्थापनावर्षं किम्?
उत्तरम्- 1885 ई० वर्षम्।
15. प्रश्न- भारतीय-राष्ट्रिय-कांग्रेसस्य संस्थापक: क:?
उत्तरम्- ए. ओ. ह्यूम-महोदय:।
16. प्रश्न- कांग्रेसस्य प्रथमकाल: क:?
उत्तरम्- 1885 ई० त: 1905 ई० वर्षाणि यावत्।
17. प्रश्न- कांग्रेसस्य द्वितीयकाल: क:?
उत्तरम्- 1906 ई० त: 1919 ई० वर्षाणि यावत्।
18. प्रश्न-"स्वराज्यं मम जन्मसिद्धोऽधिकार:" इयमुक्ति: कस्य महानुभागस्य वर्तते?
उत्तरम्- "बालगंगाधर तिलक" महानुभागस्य।
19. प्रश्न -देहलीस्थ "जन्तर मन्तर" इत्यस्य स्थापक: क:?
उत्तरम्- सवाई जयसिंह।

20. प्रश्न -भारते प्रथम-रेललाइनस्य प्रारम्भः कदा अभूत्?
उत्तरम्- 16 अप्रैल 1853 तमे वर्षे।
21. प्रश्न -"वारारस संस्कृत कॉलेज" इत्यस्य संस्थापकः?
उत्तरम्- डङ्कन्।
22. प्रश्न -बिहारे सर्वाधिक-समयपर्यन्तं मुख्यमंत्री पदे कः निवसति?
उत्तरम्- श्रीकृष्ण सिंहः।
23. प्रश्न- विक्रमसंस्कृतविश्वविद्यालयः कुत्रस्ति?
उत्तरम्- उज्जैननगरे।
24. प्रश्न- सम्पूर्णानन्दसंसकृतविश्वविद्यालयः कुत्रास्ति?
उत्तरम्- वाराणसीमध्ये।
25. प्रश्न- राजस्थाने संस्कृतविश्वविद्यालयः कुत्रास्ति?
उत्तरम्- मदाऊ(जयपुरे)
26. प्रश्न -राजस्थानस्य भीनमालक्षेत्रात् सम्बन्धितः कविरस्ति?
उत्तरम्- माघः।
27. प्रश्न -भागीरथीपुस्तकस्य लेखकः कः?
उत्तरम्- गोविन्दचन्द्रपाण्डेय।
28. प्रश्न -राघवपाण्डवायं कस्य कृतिः?
उत्तरम्- कविराजस्य।
29. प्रश्न -महात्मनागान्धिना सम्पादिता पत्रिका का?
उत्तरम्- इण्डियन ओपिनियन।
30. प्रश्न -"रामचरित्रमानस" कः अरचयत्?
उत्तरम्- तुलसीदासः।
31. प्रश्न -"मधुशाला" इति हिन्द्यां काव्यरचयिता कः?
उत्तरम्- हरिवंशराय बच्चन।
32. प्रश्न -सुलभ इंटरनेशनलस्य संस्थापकः कः?
उत्तरम्- विन्देश्वर पाठकः।
33. प्रश्न -इंदिरा गांधी तारा-मंडल सह विज्ञान-परिसरः कुत्र अस्ति?
उत्तरम्- पटनायाम्।

(छ) प्रथमः, ऐतिहासिककालः, उपाधिः,

1. प्रश्न -स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री कः?
उत्तरम्- जवाहरलालनेहरू।
2. प्रश्न- राष्ट्रिय-आन्दोलनस्य कः कालो मन्यते?
उत्तरम्- 1919 ई० तः 1929 ई० वर्षाणि यावत्।
3. प्रश्न- "जालियाँ बाला वाग" इत्यत्र हत्याकाण्डं कदा जातम्?
उत्तरम्- 1919 ई० वर्षे।

4. प्रश्न- पूर्ण-स्वतन्त्रताया याचनाकालः कः?
   उत्तरम्- 1919 ई० तः 1947 वर्षाणि यावत्।
5. प्रश्न- भारतदेशः कदा स्वतन्त्रतां प्राप्तवान्?
   उत्तरम्- 15 अगस्त 1947 ई० वर्षे।
6. प्रश्न- "सीमान्त गाँधी" इत्युपाधिना को विभूषितः?
   उत्तरम्- अब्दुल गफ्फार खान" महोदयः।
7. प्रश्न- "लोकनायक" इत्युपाधिः कस्य महोदयस्य आसीत्?
   उत्तरम्- जय प्रकाश नारायणस्य।
8. प्रश्न- "पंजाब केसरी" इत्युपाधिना को विभूषितः?
   उत्तरम्- लाला लाजपत रायः।
9. प्रश्न- "लौहपुरुषः" इत्युपाधिः कस्य महोदयस्य आसीत्?
   उत्तरम्- सरदार बल्लभभाई पटेल।
10. प्रश्न- "गुरुदेव" इत्युपाधिना को विभूषितः?
    उत्तरम्- रवीन्द्रनाथ टैगोरः।
11. प्रश्न- "लोकमान्य" केन नाम्ना विश्रूयते?
    उत्तरम्- "बालगंगाधर तिलक" महानुभागेन।
12. प्रश्न- "मोहन दास करमचन्द गाँधी" कैरुपाधिभिः विभूषितः?
    उत्तरम्- राष्ट्रपिता, बापू, महात्मा चेत्युपाधिभिः।
13. प्रश्न पं. जवाहरलाल नेहरू" महोदयस्य उपनाम किम्?
    उत्तरम्- "चाचा"
14. प्रश्न महात्मा गाँधिनो जन्मदिवसः कः?
    उत्तरम्- 2 अक्टूबर 1869 ई० वर्षम्।
15. प्रश्न "विहार केसरी" इत्युपाधिना को विभूषितः?
    उत्तरम्- श्री कृष्ण सिंहः।
16. प्रश्न "नेताजी" महोदयस्य मृत्युः कदा कुत्र चाऽभवत्?
    उत्तरम्- 18 अगस्त 1945 ई० वर्षे, वायुयान-दुर्घटनायाम्।
17. प्रश्न केन्द्रिय-विधानसभायाम् आग्नेयास्त्रस्य विस्फोटः केन कदा कृतः?
    उत्तरम्- भगतसिंहेन 8 अप्रील 1929 ई० वर्षे।
18. प्रश्न "लाला लाजपत राय" महोदयस्य बलिदान-दिवसः कः?
    उत्तरम्- 17 नवम्बर 1928 ई० वर्षम्।
19. प्रश्न "हवा-महल" इति नामधेयम्, अजमेरस्य किला च कुत्र स्तः?
    उत्तरम्- जयपुरे।
20. प्रश्न "जल-महल" इति नामधेयं भवनं कुत्र विराजते?
    उत्तरम्- उदयपुरे।

21. प्रश्न "जगन्नाथ-मन्दिरम्" कस्यां नगर्यां विराजते?
उत्तरम्- "पुरी" इत्यस्याम्।
22. प्रश्न- "पोर्ट विलियम कॉलेज" कस्मिन् नगरे लार्डवेलेजली स्थापयामास:?
उत्तरम्- कलकत्तानगरे।
23. प्रश्न- भारते "LAND OF SPICES" इति क: प्रदेश: प्रसिद्ध:?
उत्तरम्- केरलप्रदेश:।
24. प्रश्न- प्रथम: "Open university" कस्मिन् राज्ये संस्थापित:?
उत्तरम्- आन्ध्रप्रदेशे।
25. प्रश्न -THEA SLA TICSOCIETY LIBRA RY" कस्मिन् नगरे स्थापित:?
उत्तरम्- कलकत्तानगरे।
26. प्रश्न- प्रथममुद्रणालय: कदा प्रारब्ध:?
उत्तरम्- 556 A .D.
27. प्रश्न -समाचारपत्रं सर्वप्रथमं कदा जनहस्तेषु आगतम्?
उत्तरम्- 1780 तमे वर्षे।
28. प्रश्न- "QUIT INDIA" आन्दोलनं कदा अभूत्?
उत्तरम्- 1942 तमे वर्षे।
29. प्रश्न- प्रथम-भारतीयस्वतन्त्रतासङ्ग्रामं कदा प्रारब्धम्?
उत्तरम्- 1857 ई० वर्षे।
30. प्रश्न -भारते कस्मिन् वर्षे सर्वप्रथमं साधारणनिर्वाचनम् अभवत्?
उत्तरम्- 1950-51वर्षाणि यावत्,
31. प्रश्न- प्रथम-स्वतन्त्रता-सङ्ग्रामं कस्य काले संवृत्तम्?
उत्तरम्- "लॉर्ड कैनिङ्ग" महोदयकाले।
32. प्रश्न- प्रथम: भारतीयगवर्नन् जनरल् क:?
उत्तरम्- सी. राजगोपालचारी।
33. प्रश्न- प्रथमं क्रिकेटक्रीडाव्याख्यानं कदा श्रुतं जनै:?
उत्तरम्- 01. 01. 1936
34. प्रश्न- प्रथमं दूरदर्शनप्रसारणं कस्मिन् वर्षे अभवत्?
उत्तरम्- 15. 09. 1959.
35. प्रश्न -प्रादेशिकभाषासु दूरदर्शनप्रसारणकार्यक्रम: कदा वभूव:?
उत्तरम्- 01. 10. 1993.
36. प्रश्न- बधिराणां कृते साप्ताहिकवार्ताप्रसारणं कस्मिन् वर्षे प्रारब्धम्?
उत्तरम्- 15. 10. 1987.
37. प्रश्न -"CA MEL POST OFFICE" 27. 10. 1977 कस्मिन् नगरे स्थापित:?
उत्तरम्- बीकानेरनगरे।

38. प्रश्न -प्रथम-महिला राज्यपालः का?
उत्तरम्- सरोजनी नायडू।
39. प्रश्न -प्रथम-महिला केन्द्रीयमंत्री का?
उत्तरम्- राजकुमारी अमृता कौर।
40. प्रश्न -प्रथम-महिला-भारतरत्न प्राप्त प्रधानमंत्री का?
उत्तरम्- इंदिरा गांधी।
41. प्रश्न -प्रथम-महिला राष्ट्रपतिः का?
उत्तरम्- प्रतिभा देवी सिंह पाटिल।
42. प्रश्न -प्रथम-दलित-महिला मुख्यमंत्री का?
उत्तरम्- सुश्री मायावती।
43. प्रश्न -प्रथम-महिला-आईपीएस का?
उत्तरम्- किरण बेदी।
44. प्रश्न -प्रथमा महिला राज्यपालः?
उत्तरम्- विजयलक्ष्मी पण्डित।
45. प्रश्न स्वतन्त्र-भारतस्य प्रथमो राष्ट्रपति कः?
उत्तरम्- डॉ. राजेन्द्र प्रसादः।
46. प्रश्न स्वतन्त्र-भारतस्य प्रथमो प्रधानमंत्री कः?
उत्तरम्- पं. जवाहरलाल नेहरू।
47. प्रश्न -भारतस्य प्रथमा महिला "राजदूत" का?
उत्तरम्- विजयालक्ष्मी पण्डितः।
48. प्रश्न -भारतस्य सर्वप्रथमः उपप्रधानमन्त्री कः?
उत्तरम्- सरदारवल्लभभाई-पटेलः।
49. प्रश्न बिहारस्य प्रथमो राज्यपालः कः?
उत्तरम्- जयरामदास दौलतरामः।
50. प्रश्न बिहारस्य प्रथमा महिला मुख्यमन्त्री का अभवत्?
उत्तरम्- रावड़ी देवी।
51. प्रश्न प्रथम एशियाई क्रीडायाः आयोजनं कदा अभूत्?
उत्तरम्- देहल्याम्।
52. प्रश्न भारतस्य प्रथम अंतरिक्षयात्री कः आसीत्?
उत्तरम्- राकेश शर्मा।
53. प्रश्न भारतस्य प्रथम-उपग्रहं किमस्ति?
उत्तरम्- आर्यभट्टः।
54. प्रश्न -राष्ट्रियसंस्कृतसंस्थानस्य प्रथमः कुलपतिः कः?
उत्तरम्- प्रो. वेम्पटिकुटुम्बशास्त्री।

55. प्रश्न- राजस्थानसंस्कृताकादम्याः स्थापना कस्मिन् वर्षे जाता?
उत्तरम्- 1980 तमे वर्षे।
56. प्रश्न -संस्कृतभारतीसंस्थयाः पञ्जीकरणं जातम्-?
उत्तरम्- 1996 वर्षे

(ज) राष्ट्रीय-अन्तर्राष्ट्रिय-सम्बन्धि-विशिष्टज्ञानम्-

1. प्रश्न -"जन गण मन-" इति राष्ट्रगीतं कः अलिखत्?
उत्तरम्- रवीन्द्रनाथटैगोर।
2. प्रश्न राष्ट्रगीतं किम्?
उत्तरम्- "वन्दे मातरम्" इत्यादिकम्।
3. प्रश्न अस्माकं राष्ट्रभाषा का?
उत्तरम्- हिन्दी।
4. प्रश्न -"सत्यमेव जयते" -इतीदं कस्माद् उद्धृतम्?
उत्तरम्- मुण्डकोपनिषदः।
5. प्रश्न -मीनाक्षीमन्दिरं कुत्र अस्ति?
उत्तरम्- मदुरैनगरे।
6. प्रश्न -"अजन्ता" गृहः कुत्र विद्यते?
उत्तरम्- महाराष्ट्रे।
7. प्रश्न "इंकलाब जिंदाबाद" इत्यस्य उद्घोषः सर्वप्रथमः कः प्रदत्तः?
उत्तरम्- सरदार भगत सिंहः।
8. प्रश्न -हरिहरनाथस्य मंदिरः कुत्र अवस्थितोऽस्ति?
उत्तरम्- सोनपुरे।
9. प्रश्न -कोणार्क-सूर्यमन्दिरं कुत्र विद्यते?
उत्तरम्- ओडिसाराज्ये।
10. प्रश्न जयदेवः कस्य प्रदेशस्य निवासी?
उत्तरम्- उड़ीसा(ओडिसा) प्रदेशस्य।
11. प्रश्न - प्राचीनं स्मारकं किम्?
उत्तरम्- कोणार्क।
12. प्रश्न -भारतीयसेनायाः सर्वोच्चः"कमाण्डर" भवति?
उत्तरम्- राष्ट्रपतिः।
13. प्रश्न- नौसेनाप्रशिक्षणकेन्द्रं कुत्रास्ति?
उत्तरम्- कोचिन्।
14. प्रश्न- भारतवर्षस्य "राष्ट्रपतिः" स्वत्यागपत्रं कस्मै ददाति?
उत्तरम्- उपराष्ट्रपतये।
15. प्रश्न- भारतवर्षस्य द्वितीयः राष्ट्रपतिः कः आसीत्?
उत्तरम्- एस. राधाकृष्णन्।

16. प्रश्न- स्वतन्त्रभारतस्य प्रथमः" राष्ट्रपतिः" कः?सः कति वर्षाणि सेवामकरोत्?
उत्तरम्- डॉ. राजेन्द्रप्रसादः, द्वादशवषाणि।
17. प्रश्न -V- V- GIRI- सम्पूर्ण नाम निर्दिशत-?
उत्तरम्- वराहगिरिवेङ्कटगिरि।
18. प्रश्न -उच्चन्यायालयस्य प्रथममहिला न्यायाधीशः का?
उत्तरम्- सुश्री लीलासेठ।
19. प्रश्न -भारतस्य राष्ट्रिय-पक्षि-पुष्पं-पशुः-?
उत्तरम्- मयूरः-कमलं-व्याघ्रः।
20. प्रश्न भारतस्य राष्ट्रिय-वृक्षं-फलं-ग्रन्थः-नदी-क्रीडा-?
उत्तरम्- वट-वृक्षः-आम्रं-गीता-गङ्गा-हॉकी।
21. प्रश्न- "LAND OF WHITE ELEPHA NT" सम्पूर्ण नाम निर्दिशत-?
उत्तरम्- थाइलैण्डदेशः।
22. प्रश्न- अशोकचक्रम् कस्य प्रतीकम्?
उत्तरम्- भारतस्य राष्ट्रियं प्रतीकम्।
23. प्रश्न -चन्द्रः तारं कस्य देशस्य राष्ट्रियप्रतीकम् अस्ति?
उत्तरम्- पाकिस्तानदेशस्य।
24. प्रश्न- अन्ताराष्ट्रियविकलांगदिवसः कदा भवति?
उत्तरम्- 15 मार्चमासे।
25. प्रश्न- प्रतिवर्ष सप्तमदिवसः अप्रैलमासस्य किमर्थं महत्त्वपूर्णः?
उत्तरम्- विश्वस्वास्थ्यदिवसः।
26. प्रश्न -"गेट वे ऑफ इण्डिया" कुत्र विद्यते?
उत्तरम्- मुम्बई-नगरे।
27. प्रश्न मण्डनमिश्रस्य जन्मस्थानं किम्?
उत्तरम्- माहिष्मती (महिषी) ग्रामे।
28. प्रश्न कवि-कोकिलस्य विद्यापति ठक्कुरस्य जन्मस्थानं किम्?
उत्तरम्- "विस्फी" ग्रामे।
29. प्रश्न "अयाची मिश्रस्य" जन्मस्थानं किम्?
उत्तरम्- "सरिसव" ग्रामे।
30. प्रश्न वाचस्पति मिश्रस्य वास्तव्यं किम्?
उत्तरम्- मधुबनी-मण्डलान्तर्गत-"ठाढी ग्रामः।
31. प्रश्न "रेड स्क्वायर" इति स्थानं कुत्र विलोक्यते?
उत्तरम्- "मास्को" नगरे।
32. प्रश्न "काबा" साम्प्रतं कुत्र विद्यते?
उत्तरम्- "मक्का" नगर्याम्।

33. प्रश्न "व्हाइट हाउस" "पैटागन" इति स्थानद्वयं कुत्र शोभते?
उत्तरम्- "वाशिंगटन" नगरे।
34. प्रश्न संयुक्तराष्ट्रसंघस्य मुख्यः कार्यालयः कुत्राऽस्ति?
उत्तरम्- न्यूयार्के (अमेरिका देशे)
35. प्रश्न संयुक्तराष्ट्रसंघस्य स्थापना दिवसः कः?
उत्तरम्- 24 अक्टूबर 1945 ई० वर्षम्।
36. प्रश्न "अन्तर्राष्ट्रिय मुद्रा कोष" इयं संस्था कुत्र विद्यते?
उत्तरम्- वाशिंगटन-नगरे (अमेरिकायाम्)।
37. प्रश्न राष्ट्रमण्डलस्य मुख्यालयः कुत्राऽस्ति?
उत्तरम्- लन्दन-नगरे।
38. प्रश्न भारते संविधानसभायाः प्रथमाऽधिवेशनं कदा प्रारब्धम्?
उत्तरम्- 09 दिसम्बर 1946 ई० वर्षे।
39. प्रश्न भारतस्य संविधानं कदा पूर्णतां गतम्?
उत्तरम्- 26 नवम्बर 1949 ई० वर्षे।
40. प्रश्न भारतीय-संविधानसभायाः प्रारूपसमितेरध्यक्षः कः?
उत्तरम्- बी. आर. अम्बेदकरः।
41. प्रश्न- सर्वाधिकशिक्षितवर्गस्य प्रतिशतता कस्मिन् राज्ये विद्यते?
उत्तरम्- केरलराज्ये।
42. प्रश्न -"इटानगरं" कस्य प्रदेशस्य राजधानी?
उत्तरम्- अरुणाचलप्रदेशस्य।
43. प्रश्न- "आपरेशन ब्लैक थंडर" केन समबद्धमस्ति-?
उत्तरम्- अमृतसर।
44. प्रश्न -राष्ट्रपतिपदस्य शपथं कः सम्पादयति?
उत्तरम्- मुख्यन्यायाधीशः।
45. प्रश्न -"वन्दे मातरम्" इति राष्ट्रियगीतरचयिता कः?
उत्तरम्- बंकिमचन्द्रचटर्जी।
46. प्रश्न -"राष्ट्रगीतम्" कस्माद् ग्रन्थात् उद्धृतः?
उत्तरम्- "आनन्दमठ" ग्रन्थात्।
47. प्रश्न राष्ट्रिय-ध्वजे हरितरङ्गः कस्य प्रतीकः?
उत्तरम्- समृद्धेः।
48. प्रश्न अस्माकं राष्ट्रिय-ध्वजं किं कथ्यते?
उत्तरम्- तिरंगा।
49. प्रश्न -भारतीयराष्ट्रध्वजे वर्णाः कति?
उत्तरम्- त्रयः।

50. प्रश्न अस्माकं राष्ट्रिय-पर्वाणि कानि?
उत्तरम्-26 जनवरी-गणतन्त्रदिवसः, 15 अगस्त-स्वतन्त्रतादिवसः, 2 अक्टूबर-गाँधी जयन्ती च।
51. प्रश्न भारतीयराष्ट्रध्वजे मध्ये किं विलोक्यते?
उत्तरम्- अशोकचक्रम्।
52. प्रश्न संविधान-सभाद्वारा "राष्ट्रिय-ध्वजम्" कदा समादृतम्?
उत्तरम्- 22 जुलाई 1947 ई० वर्षे।
53. प्रश्न -"बालदिवसः" कदा आयोज्यन्ते?
उत्तरम्- नवम्बरमासस्य 14 दिनाङ्के:।
54. प्रश्न -भारते द्वयोः राज्ययोः राजधानी कः?
उत्तरम्- चण्डीगढः।
55. प्रश्न -आकाशगङ्गा इति कं वदामः?
उत्तरम्- गैलेक्सीम्।
56. प्रश्न भारतस्य "गुलाबी नगरी" इत्यनेन विख्यातः नगरः कः?
उत्तरम्- जयपुरः।
57. प्रश्न - भारतराष्ट्रध्वजस्य अशोकचक्रे कति अराः सन्ति?
उत्तरम्- 25 पञ्चविंशति।
58. प्रश्न -राज्यसभासदस्यानां संख्या का?
उत्तरम्- 250,
59. प्रश्न -लोकसभायां सांसदानाम् अधिकतमा संख्या का?
उत्तरम्- 550 संख्या,
60. प्रश्न -भारते सुविशालः कारागारः कः?
उत्तरम्- तिहार सेन्ट्रल जेल।
61. प्रश्न -"लोकसभासदस्यः" भवितुम् अपेक्षितं वयः कियत्?
उत्तरम्- 25 वर्षवयः।
63. प्रश्न -भारतस्य चतसृषु दिक्षु चतुरः मठान् कः स्थापितवान्?
उत्तरम्- शङ्कराचार्यः।
64. प्रश्न राष्ट्रपतेः निर्वाचनं के कुर्वन्ति?
उत्तरम्-सदनद्वयस्य निर्वाचिताः सदस्याः, विधानसभानां निर्वाचित-सदस्याश्च।
65. प्रश्न -"उपराष्ट्रपतिः" कैः निर्वाच्यते?
उत्तरम्- लोकराज्यसभासदस्यैः।
66. प्रश्न -राज्यसभासदस्यान् के निर्वाचयन्ति?
उत्तरम्- विधानसभासदस्याः।
67. प्रश्न -राष्ट्रपतिः कतिभ्यः वर्षेभ्यःनिर्वाचितो भवति?
उत्तरम्- पञ्चवर्षेभ्यः।

68. प्रश्न -उच्चतमन्यायालयस्य न्यायाधीशान् कः नियुङ्क्ते?
उत्तरम्- राष्ट्रपतिः।
69. प्रश्न -लोकसभाध्यक्षः कैः नियुक्तो भवति?
उत्तरम्- लोकसभासदस्यैः।
70. प्रश्न -"राज्यपालस्य" नामाङ्कनं कः करोति?
उत्तरम्- राष्ट्रपतिः।
71. प्रश्न -"राज्यसभायाः" सभाः कस्य आध्यक्ष्ये भवन्ति?
उत्तरम्- उपराष्ट्रपते।
72. प्रश्न - गणतन्त्रदिवसे कः सर्वेषाम् अभिवादनं स्वीकुरुते?
उत्तरम्- राष्ट्रपतिः।
73. प्रश्न राष्ट्रपतिः कस्य परामर्शानुसारेण कार्यं करोति?
उत्तरम्- केन्द्रीय-मन्त्रिमण्डलस्य।
74. प्रश्न प्रधानमन्त्री को भवति?
उत्तरम्- लोकसभायां बहुमत-प्राप्तदलस्य नेता।
75. प्रश्न मुख्य-न्यायाधीशस्य, अपरेषां न्यायाधीशानां नियुक्तिं कः करोति?
उत्तरम्- राष्ट्रपतिः।
76. प्रश्न -संसारे शीतलतमः देशः कः?
उत्तरम्- रष्या,
77. प्रश्न -भारतस्य विशालनगरं किम्?
उत्तरम्- कोलकत्तानगरम्।
78. प्रश्न -"जकार्ता" कस्य देशस्य राजधानी?
उत्तरम्- इण्डोनेशिया।
79. प्रश्न -"टका" इति कस्य देशस्य मुद्रा भवति?
उत्तरम्- बंगलादेशस्य।
80. प्रश्न -"सिंहली" कस्य देशस्य प्रमुख भाषा?
उत्तरम्- श्रीलङ्कायाः।
81. प्रश्न भारतस्य सशस्त्रसेनाणां सेनापतिः कः?
उत्तरम्- राष्ट्रपतिः।
82. प्रश्न विश्वस्य अतिदीर्घझीलः कः?
उत्तरम्- केस्पियनः।
83. प्रश्न विश्वस्य सर्वाधिक-तण्डूलोत्पादकः देशः कः?
उत्तरम्- चीनः।
84. प्रश्न भारतस्य राष्ट्रीयक्रीडासंस्थानं कुत्र स्थितोऽस्ति?
उत्तरम्- पंजाब।

85. प्रश्न सार्कस्य सचिवालयं कुत्र स्थितोऽस्ति?
उत्तरम्- काठमांडू।
87. प्रश्न अस्माकं संविधान: कदा अधिसूचित:?
उत्तरम्- 26 जनवरी 1950।
88. प्रश्न खजुराहो-मंदिरस्य निर्माणं कस्य वंशस्य शासक: कृतवान्?
उत्तरम्- चंदेलवंशस्य।
89. प्रश्न भारत: पञ्चशीलसमझौतावार्ता: केन देशेन कृतवान्?
उत्तरम्- चीनदेशेन।
90. प्रश्न अमेरिकाया: क: राष्ट्रपति: दासप्रथां विखण्डित:?
उत्तरम्- अब्राहम लिंकर:।
91. प्रश्न "विशाखापटनम" बन्दरगाह: कस्मिन् राज्ये स्थितोऽस्ति?
उत्तरम्- आन्ध्रप्रदेशे।
92. प्रश्न शेरशाह इत्यस्य मकबरा कुत्र स्थितोऽस्ति?
उत्तरम्- सासारामे।
93. प्रश्न जनसंख्यायां सर्वाधिक-घनत्वं राज्य: क:?
उत्तरम्- पश्चिम बंगाल:।
94. प्रश्न- भारतीयभाषासु का प्राचीनतमा जीवन्ती च भाषा?
उत्तरम्- तमिलम्।
95. प्रश्न हरिगंगा-भागीरथ्यो: संगमं किं कथ्यते?
उत्तरम्- हरिप्रयाग:।
96. प्रश्न तमिलनाडु-राज्यस्य कं स्थानं "भारतस्य काशी" इति कथ्यते?
उत्तरम्- कांचीपुरम्।

(झ) नदी, पर्वत, पदार्थादि ज्ञानम्-

1. प्रश्न आगरा-दिल्ली-मथुराया: पार्श्वे का नदी वहति?
उत्तरम्- यमुना।
2. प्रश्न इलाहावादस्य समीपे कासां नदीनां सङ्गम:?
उत्तरम्- गङ्गा-यमुना-सरस्वतीनाम्।
3. प्रश्न "सरयू" नदीसमीपे का प्रसिद्धा नगरी?
उत्तरम्- अयोध्या।
4. प्रश्न "गङ्गा" नदीसमीपे/तटे वा का: प्रसिद्धा: नगरी?
उत्तरम्- पटना-कानपुर-हरिद्वार-वाराणसी इत्यादि।
5. प्रश्न कोलकतां निकषा का नदी प्रवहति?
उत्तरम्- "हुगली"।
6. प्रश्न "पेट्रोलियम" पदार्थस्योत्पादनं कुत्र भवति?
उत्तरम्- असोमे, गुजराते, मुम्बई-नगरस्य समुद्रतटे च।

7. प्रश्न "हीरा" इति रत्नस्योत्पादनं प्रधानरूपेण कुत्र भवति?
उत्तरम्- मध्यप्रदेशे।
8. प्रश्न स्वर्णस्योपलब्धि-स्थानानि कुत्र सन्ति?
उत्तरम्- कर्नाटके, स्वर्णरिखा-नद्याम् बिहारे च।
9. प्रश्न "अभ्रकः" (अबरख) इत्यस्य समुपलभ्धता केषु प्रान्तेषु विद्यते?
उत्तरम्- झारखण्ड-राजस्थान-मध्यप्रदेशेषु।
10. प्रश्न "ताँबा" केषु प्रान्तेषु उपलभ्यते?
उत्तरम्- झारखण्डे-राजस्थाने-आन्धप्रदेशे च।
11. प्रश्न "लौह" पदार्थस्योत्पादनं कुत्र कुत्र भवति?
उत्तरम्- झारखण्डे, ओडीसायाम्, तमिलनाडौ, मध्यप्रदेशे, कर्नाटके च।
12. प्रश्न "कोयला" इति पदार्थः कुत्र कुत्र मिलति?
उत्तरम्- झारखण्डे, ओडीसायाम्, बंगाले, राजस्थाने च।
13. प्रश्न "बाक्साइट" इति पदार्थः प्रमुखरूपेण केषु राज्येषूपलभ्यते?
उत्तरम्- झारखण्ड-ओडिसा-आन्ध्रप्रदेशे-गुजरातराज्येषु।
14. प्रश्न "कोशी-परियोजना" कुत्र प्रचलति?
उत्तरम्- बिहारस्य कोशीनद्याम्।
15. प्रश्न "फरक्का" कस्मिन् राज्ये कुत्र च विराजते?
उत्तरम्- पश्चिम बंगाले-हुगलीनद्याम्।
16. प्रश्न- वृन्दावनोद्यानं कस्मिन् जलबन्धे निर्मितमस्ति?
उत्तरम्- कृष्णराजसागरजलबन्धे।
17. प्रश्न -हीराकुण्ड सेतुः कस्याः नद्या अस्ति?
उत्तरम्- महानद्याः।
18. प्रश्न- नर्मदा नदी कुतः उद्भवति?
उत्तरम्- अमरकंटकात्।
19. प्रश्न कस्मिन् राज्ये सर्वाधिकमात्रायां रबरस्य उत्पादनं भवति?
उत्तरम्- केरलराज्ये।
20. प्रश्न -भारतस्योत्तरस्यां दिशि कः पर्वतोऽस्ति?
उत्तरम्- हिमालयः।
21. प्रश्न -बिहारे गंगानद्याः लम्बतरः किमस्ति?
उत्तरम्- 445 कि. मी.।
22. प्रश्न -चायोद्यानम् (ज्मं हंतकमद) इति कस्य राजस्य नाम-?
उत्तरम्- आसामस्य(आसोस्य)
23. प्रश्न -विश्वे बृहती नदी का?
उत्तरम्- अजेमननदी।

(ञ) आविष्कारकाः, निर्मातारः,

1. प्रश्न-"कुतुब् मीनार" इत्यस्य निर्माता कः?
   उत्तरम्- "कुतुबुद्दीन ऐवक्" -महोदयः।
2. प्रश्न-"कुतुब् मीनार" इत्यस्य निर्माणं कस्मिन् वर्षे जातम्?
   उत्तरम्- 1206 ई० वर्षे।
3. प्रश्न- महाबलिपुरे "पञ्चरथः" इति मन्दिरं केन निर्मितम्?
   उत्तरम्- पल्लववंशेन।
4. प्रश्न "टेलीफोन" केन आविष्कृतम्?
   उत्तरम्- "ग्राहमवेल" महोदयेन।
5. प्रश्न "विद्युद् बल्व" इत्यस्य निर्माणं कः कृतवान्?
   उत्तरम्- "थामस-अल्वा एडीसन" महोदयः।
6. प्रश्न "राइट बन्धु" महोदयेन किम् आविष्कृतम्?
   उत्तरम्- वायुयानम्।
7. प्रश्न "दूरवीन" इत्यस्य आविष्कारकः कः?
   उत्तरम्- गैलेलियो महोदयः।
8. प्रश्न "रेल-इंजन" इति निर्माणं केन कृतम्?
   उत्तरम्- "स्टीफन्स" महोदयेन।
9. प्रश्न "होमियो-पैथी" चिकिन्साया आविष्कारकः कः?
   उत्तरम्- "हनिमैन" महोदयः।
10. प्रश्न "टेप रिकॉर्डर" इत्यस्य आविष्कारकः कः?
    उत्तरम्- "पाउलसन" महोदयः।
11. प्रश्न "फाउन्टन पेन" इत्यस्य निर्माणं केन कृतम्?
    उत्तरम्- "वाटर मैन" महोदयेन।
12. प्रश्न "टाइपराइटर" इति यन्त्रं केन आविष्कृतम्?
    उत्तरम्- "शेल्ज" महोदयः महोदयेन।
13. प्रश्न "गोबर-गैस संयन्त्रम्" केन आविष्कृतम्?
    उत्तरम्- "डॉ. सी. बी. देसाई" महोदयेन।
14. प्रश्न "डायनामाइट" इत्यस्य संरचना केन कृता?
    उत्तरम्- अल्फेड नोवेल महोदयेन।
15. प्रश्न- "केन्द्रीय-लीची-अनुसन्धानकेन्द्रम्" कुत्राऽवस्थितमस्ति?
    उत्तरम्- मुजफ्फरपुर (बिहारे)
16. प्रश्न- "इलेक्ट्रॉन" पदार्थस्य कः आविष्कारकः?
    उत्तरम्- जे. जे. थामसन महोदयः।
17. प्रश्न- "न्यूट्रॉन" इत्यस्य आविष्कारकर्त्ता कः?
    उत्तरम्- जे चॉडविक महोदयः।

18. प्रश्न- दूरदर्शनयन्त्रमिदं केन आविष्कृतम्?
उत्तरम्- जे. एल. वेयर्ड महोदयेन।
19. प्रश्न- "रेडियो धर्मिता" इति नामक आविष्कारः केन कृतः?
उत्तरम्- हेनरी वेक्सवायरल महोदयेन।
20. प्रश्न- "परमाणु-संरचना" केन कृता?
उत्तरम्- नील बोहर महोदयेन।
21. प्रश्न- "हाइड्रोजन" इत्यस्याविष्कारकं कः कृतवान्?
उत्तरम्- कैवेन्डिस महोदयः।
22. प्रश्न- "हली कॉप्टर" इत्यस्याविष्कारकं कः कृतवान्?
उत्तरम्- ब्रेकेट महोदयः।
23. प्रश्न- डॉक्टरी थर्मामीटर इति पदार्थस्याविष्कारकर्ता कः?
उत्तरम्- साइमन महोदयः।
24. प्रश्न- गुरुत्वाकर्षण-सिद्धान्तः केन प्रदत्तः?
उत्तरम्- न्यूटन महोदयेन।
25. प्रश्न- "ऑक्सीजन" इत्यस्य क आविकारकः?
उत्तरम्- प्रिस्टले महोदयः।
26. प्रश्न- ट्रांस-फर्मर इत्यस्यानुसन्धानकर्त्ता कः?
उत्तरम्- माइकल फैराडे महोदयः।
27. Colour television इत्यस्य आविष्कारकः कः?
उत्तरम्- John logie Baird महोदयः।
28. E- mail इत्यस्य आविष्कारकः कः?
Roy Tamlinson महोदयः।

(ट) चलचित्रादि,

1. प्रश्न- भारतीयचलचित्राणां जन्मदाता खल्वयम्-?
उत्तरम्- धुंडीराजगोविंदफालके।
2. प्रश्न- भारतीयचलचित्रेतिहासे सप्तगीतोपेतं चित्रं किम्?
उत्तरम्- आलम आरा।
3. प्रश्न- भारते प्रथमं भाषमाणं हिन्दी चलचित्रं कदा प्रारबधम्?
उत्तरम्- 14 मार्च 1931,
4. प्रश्न - कस्मिन् हिन्दीचलचित्रे एकसप्ततिः(71) गितानि वर्तते?
उत्तरम्- इन्द्रसभा।
5. प्रश्न -"भंगडा" लोकनृत्यं कस्य राज्यस्य वर्तते?
उत्तरम्- पञ्जाबराज्यस्य।
6. प्रश्न -पुंगीनृत्यं कस्य प्रदेशस्य अस्ति?
उत्तरम्- हिमाचलप्रदेशस्य।

7. प्रश्न- प्रथमं 61 गीतोपेतं हिन्दी-चलचित्रमिदम्-?
उत्तरम्- इन्द्रसभा।
8. प्रश्न- प्रथमं हिन्दी"सिनेमासकोप" चलचित्रं किम्?
उत्तरम्- कागज के फूल।
9. प्रश्न- "कागज के फूल" इति चित्रस्य निदेशक: क:?
उत्तरम्- गुरुदत्त:।
10. प्रश्न- "अछूतकन्या" इति चलचित्रे इयं नायिका-?
उत्तरम्- देविका रानी।
11. प्रश्न- 1944 तमे वर्षे"रतन" इति हिन्दीचलचित्रस्य गीतरचयिता क:?
उत्तरम्- नौशाद।
12. प्रश्न- दादासाहेबफाल्केनिर्दिष्टम् अन्तिमं चित्रं किम्?
उत्तरम्- गङ्गावतरणम्।
13. प्रश्न- प्रथमं "संस्कृतचलचित्रं" किम्?
उत्तरम्- आदिशङ्कराचार्य:।
14. प्रश्न- प्रथम: संस्कृतचलचित्रनायक: क:?
उत्तरम्- सर्वदमनबनर्जी।
15. प्रश्न--दक्षिण भारतीय चलचित्रेषु अत्यधिकानि पौराणिकपात्रणि अयमभिनीतवान्?
उत्तरम्- एन. टी. रामाराव:
16. प्रश्न- विजयनगरसाम्राज्यस्य अभिनेता क:?
उत्तरम्- कृष्णदेवराय:।
17. प्रश्न- पल्लवानां राजधानी का?
उत्तरम्- कांची।
18. प्रश्न- प्रथमं संस्कृतचलचित्रमस्ति-?
उत्तरम्- आदिशङ्कराचार्य:।

(ठ) आदर्शवाक्यम्-

1. प्रश्न- "तत्त्वं पूषन् अपावृणु" इति कस्या:संस्थाया: आदर्शवाक्यम्?
उत्तरम्- केन्द्रीयविद्यालयस्य।
2. प्रश्न- "धर्मो विश्वस्य जगत: प्रतिष्ठा" इति कस्य आदर्शवाक्यम्?
उत्तरम्- राजस्थानविश्वविद्यालयस्य।
3. प्रश्न-"स्वत: प्रमाणं परत:प्रमाणम्, वृहस्पते सवितर्बोधयैनम्" इति कस्य ध्येयवाक्यम्?
उत्तरम्-कामेश्वर सिंह दरभंगा संस्कृतविश्वविद्यालय:दरभंगा, बिहार। स्थापना-1961,
4. प्रश्न- "सुनियोगात् समृद्धि:" इति कस्य आदर्शवाक्यम्?
उत्तरम्- यूनिटट्रस्ट ऑफ इण्डिया।

5. प्रश्न- दूरसञ्चारकेन्द्रस्य किम् आदर्शवाक्यम्?
   उत्तरम्- अहर्निशं सेवामहे-इति।
6. प्रश्न- "योऽनूचानः स नो महान्" -इति कस्य आदर्शवाक्यमस्ति?
   उत्तरम्- राष्ट्रियसंस्कृतसंस्थानस्य।
7. प्रश्न- "योगक्षेमं वहाम्यहम्" इति आदर्शवाक्यं कुत्र पश्यामः?
   उत्तरम्- L.I.C. संस्थायाम्।
8. प्रश्न- "ज्ञाने सर्वं प्रतिष्ठितम्" - इति कस्य आदर्शवाक्यम्?
   उत्तरम्- चौखम्बासंकृतप्रतिष्ठानस्य।
9. प्रश्न -"स्वाध्यायान्न प्रमदितव्यम्" इति आदर्शवाक्यं कस्य?
   उत्तरम्- चौखम्बासुरभारती-प्रकाशनस्य।
10. प्रश्न -भारतीयजलसेना केन वाक्येन स्वादर्शं सूचयति?
    उत्तरम्- शं नो वरुणः।
11. प्रश्न- अशोकचक्रस्याधः किम् आदर्शवाक्यं लिखितं भवति?
    उत्तरम्- सत्यमेव जयते।
12. प्रश्न- संसदः ध्येयवाक्यं किम्?
    उत्तरम्- वसुधैव कुटुम्बकम्।

(ङ) सम्मानः

1. प्रश्न-भारतस्य सर्वोच्चसम्मानः कः?
   उत्तरम्- भारतरत्नम्।
2. प्रश्न -भारतीयभाषासु सर्वोत्कृष्टसाहित्यपुरस्कारः कः?
   उत्तरम्- ज्ञानपीठपुरस्कारः।
3. प्रश्न- विभिन्नेषु क्षेत्रेषु अभूतपूर्व-आविष्कारेभ्यः कः पुरस्कारः?
   उत्तरम्- नोबेलपुरस्कार।
4. प्रश्न- चिकित्साक्षमत्रम विशिष्टःपुरस्कारः कः?
   उत्तरम्- धन्वन्तरिपुरस्कारः।
5. प्रश्न-संस्कृतभाषाक्षमत्रम रामकृष्णदाल्मिया श्रीवाण्यल्लङ्करणप्रशस्तिपत्रं प्रथमं कस्मै विदुषे प्रदत्तम्?
   उत्तरम्- रामानुजताताचार्याः।
6. प्रश्न -ज्ञानपीठपुरस्कारः केन दीयते?
   उत्तरम्- साहित्य-अकादम्या।
7. प्रश्न -ज्ञानपीठपुरस्कारस्य संस्थापकस्तु-?
   उत्तरम्- शान्तिप्रसादजैनः।
8. प्रश्न- प्रथमं "भारतरत्न" पुरस्कारेणायं पुरस्कृतः?
   उत्तरम्- एस. राधाकृष्णन्।

9. प्रश्न- मरणानन्तरं "भारतरत्नं" इति पुरस्कारेषु प्रथमः कः?
उत्तरम्- लालबहादुरशास्त्री।
10. प्रश्न- "स्वर्णकमलम्" पुरस्काररूपेण कस्मिन् क्षेत्रे दीयते?
उत्तरम्- चलचित्रेषु।
11. प्रश्न- प्रथमः नोवेलपुरस्कारगृहीता कः?
उत्तरम्- रविन्द्रनाथटैगोरः।
12. प्रश्न -वेदाचार्यगुरुगङ्गेश्वरानन्दस्य संस्मरणार्थं का प्रशस्तिः दीयते?
उत्तरम्- वेदरत्नप्रशस्तिः।
13. प्रश्न -"नोवेल" पुरस्कारं प्रप्तेषु प्रथमः भारतीयवैज्ञानिकः?
उत्तरम्- सी. वी. रमण।

(ढ़) क्रीडा

1. प्रश्न -विम्बलडनप्रतियोगिता कस्यां क्रीडायां भवति?
उत्तरम्- लानटेनिसक्रीडायाम्।
2. प्रश्न -"रोवर्सकप" -इत्यस्य कया क्रीडाया सम्बन्धः?
उत्तरम्- फुटबालक्रीडायाम्।
3. प्रश्न -भारतस्य राष्ट्रीया क्रीडा का?
उत्तरम्- हॉकीक्रीडा।
4. "प्रश्न -हॉकी" क्रीडायाः खेलनावधिः कः?
उत्तरम्- 70 निमेषाः।
5. प्रश्न -राजस्थानस्य "राज्यक्रीडा" का?
उत्तरम्- पादकन्दुकक्रीडा।

(ण) विशिष्टज्ञानम्-

1. प्रश्न -कस्य वृक्षस्य पत्रं सर्वस्मात् बृहत् भवति?
उत्तरम्- कदलीवृक्षस्य।
2. प्रश्न -जन्तुषु कस्य "आयुः" अधिकतः?
उत्तरम्- कच्छपस्य।
3. प्रश्न -पारसीजनाः नूतनवर्षारम्भं कस्मिन् मासे कुर्वन्ति?
उत्तरम्- अगस्तमासे।
4. प्रश्न -हिमालयस्य सर्वोन्नतं शिखरं किम्?
उत्तरम्- एवरेस्ट।
5. प्रश्न -आन्ध्रप्रदेशस्य सम्बद्धं नृत्यं सूचय?
उत्तरम्- कुचिपुडी।
6. प्रश्न -द्वितीयं विश्वयुद्धं कदा समाप्तिमगात्?
उत्तरम्- 9 अगस्त 1945,

7. प्रश्न -C.P.U. इति पूर्णवाक्यं किम्?
   उत्तरम्- सेन्ट्रल-प्रोसेसिंग-यूनिट।
8. प्रश्न -गौतमबुद्धस्य वास्तविकं नाम किम्?
   उत्तरम्- सिद्धार्थः।
9. प्रश्न -रामस्य परमभक्तः वानरः कः?
   उत्तरम्- हनुमान्।
10. प्रश्न -भूमैः ओन्नत्यं केन यन्त्रेण माप्यते?
    उत्तरम्- हिप्सोमीटरयन्त्रेण।
11. प्रश्न -वृश्चिकस्य विषं कुत्र भवति?
    उत्तरम्- पुच्छे।
12. प्रश्न -मक्षिकायाः विषं कस्मिन् अङ्गे भवति?
    उत्तरम्- मुखे।
13. प्रश्न -सर्पस्य विषं क्व भवति?
    उत्तरम्- दन्ते।
14. प्रश्न - केन समः व्याधिः नास्ति?
    उत्तरम्- लोभसमः।
15. प्रश्न -रिपुः केन समः नास्ति?
    उत्तरम्- क्रोधसमः।
16. प्रश्न -दुःखं किं वत् नास्ति?
    उत्तरम्- दारिद्र्यवत्।
17. प्रश्न -कुलं केन भाति?
    उत्तरम्- सत्पुत्रेण।
18. प्रश्न -प्रवासे मित्रं किंस्विद्?
    उत्तरम्- विद्या।

TOTAL- 539

• • •

13
कवि-परिचय

'संस्कृतशास्त्रमञ्जूषा' हेतु कवि-परिचयः-

1. महाकविः कालिदास	2. महाकविः माघः	3. भारविः
4. महाकविर्दण्डी	5. वाल्मीकि	6. महाकवि-अश्वघोषः
7. महाकविः भास	8. मुरारिः	9. भवभूतिः
10. पण्डितराज जगन्नाथ	11. विश्वनाथः	12. मम्मटः
13. आनन्दवर्धन	14. उद्भटः/भट्टोद्भटो वा	15. कुन्तकः
16. क्षेमेन्द्र	17. विशाखदत्तः	18. शूद्रकः
19. महाकविः श्रीहर्ष	20. भोजः	21. भरतमुनिः
22. आचार्य भामहः	23. सुबन्धुः	24. वाणभट्टः
25. कल्हणः	26. भट्टिस्वामि	27. जयदेवः
28. राजशेखरः	29. कुमारदासः	30. बिल्हणः
31. अमरूकः	32. श्रीकृष्णमिश्रः	33. व्यासः
34. रत्नाकरः	35. हर्षवर्द्धनः	

(1) महाकविः कालिदासः- (प्रथमशतके/चतुर्थशतके वा)

(समयः, देशः, जीवनवृत्तम्, रचना, कविताशैली,)

कालिदासस्य समयः- संस्कृत साहित्याकाशे कविकुलगुरुः कालिदासः देदीप्यमाननक्षत्रवत् अस्ति। कविता कामिनीविलासः कालिदासः रससिद्धः कवीश्वरः संस्कृतकाव्यक्षेत्रे सर्वश्रेष्ठः अस्ति।

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठकाधिष्ठित कालिदासा।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवत्ती बभूव॥

तस्य स्थितिकालविषये विदुषां मध्ये मतवैभिन्न्यम् अस्ति। अस्यां स्थितौ अन्यकृतैरुल्लेखैः अनुमानेन च प्राचां कवीनां समयो व्यवस्थापनीयो भवति। अद्यावधि अन्वेषकाः अस्य कविकुलगुरु कालिदासस्य स्थितिकाल विषये,जन्मस्थानविषये च अन्वेषणं कुर्वन्ति। अस्मादेव हेतोः कालिदासस्य समयसम्बन्धेऽपि मतभेदाः वर्त्तन्ते-

1. सर विलियम जोन्स-महोदयः ई0 पू0 प्रथमशतके विक्रमादित्यस्य सत्तया तत्सभायां स्थितस्य कालिदासस्य स एव समयः संभवति।
2. आचार्यविमलराजपुरी अस्य महाकवेः सम्बन्धे अन्वेषयन् कथयति यत् अभिरूपभूयिष्ठायां परिषदि अस्य अभिज्ञानशाकुन्तलं नाटकमभिनीतमभवत्। तस्य परिषदः स्थितिकालः चतुर्थतः षष्ठ-शताब्दी अनुमीयते।
3. डा0 वेबर लौसन,याकोबि,मॉनियर विलियम,महानुभागानां सम्मतिषु ई0 द्वितीयशतकचतुर्थशतक- योर्मध्यकालिकत्वं कालिदासस्य समयः स्वीक्रियते।
4. स्मिथ-मैकडानल-कीथ-भण्डारकर-पाठक-प्रभृतयो विद्वान्सः गुप्तयुगे स्वीकुर्वन्ति कालिदासम् इति गैरोला बलदेवोपाध्यायश्च।
5. ए0 सी0 चटर्जीमहोदयस्तु कालिदासं मालवनरेशयशोधर्मसमकालिकं मत्वा षष्ठशतकवर्त्तिनमाह।
6. रामचन्द्रविनायकपटवर्धनस्तु 'आषाढस्य प्रथमदिवसे','प्रत्यासन्ने नभसि' इत्यादि पद्याधारेण ज्यौतिषानुसारिणीं गणनां कृत्वा 1800 वर्षपूर्ववर्त्तिनं कालिदासमातिष्ठते।
7. म0 म0 रामावतारशर्मा महोदयः कालिदासं द्वितीयचन्दगुप्तसमकालिकं मत्वा 375 तः 450 ई0 मध्यवर्त्तिनं सप्रमाणं साधयति।

अतः ई0 पू0 प्रथमशतके विक्रमादित्यस्य सत्तया तत्सभायां स्थितस्य कालिदासस्य स एव समयः संभवति। किञ्च-निश्चितः समयः अश्वघोषस्य,स हि कुणालनरेश-कनिष्कसमकालिकतया प्रथमशताब्दीस्थितः। तत्काव्ये कालिदासस्य काव्यमनुक्रियमाणं वीक्ष्यते। रघुवंशे कुमारसम्भवे च विद्यमानं पद्यं बुद्धचरितेऽश्वघोषेण किञ्चिदेव विपर्यस्योपन्यस्तम्, अतः अश्वघोषात्पूर्ववर्त्ती सम्भवति कालिदासः।

तदाभ्यां सम्भवप्रमाणाभ्यां कालिदासस्य ई0 पूर्वप्रथमद्वितीयशतकसम्भवत्वं स्वीकर्त्तुं समर्थयन्ते-आचार्य श्रीरामचन्द्रमिश्रः, आचार्य हंसराजः अग्रवालः,पं0 वेदव्यासशुक्लः, इत्यादयः संस्कृतसाहित्येतिहासकाराः ग्रन्थकाराश्च।

कालिदासस्य देश

कालिदासस्य को देशः(जन्मस्थानम्)इति विषये महान् मतभेदः। केचित् विद्वांसः अस्य जन्मस्थानं मिथिला मन्यन्ते। केचित् उज्जयिन्यां मन्यन्ते। केचन काश्मीरान्, अपरे वङ्गान् च तद्देशमाहुः। वयन्तु पश्यामः-मालवगणमुख्यविक्रमादित्यसभास्थस्य कालिदासस्य मालवमुख्यनगरी उज्जयिनी एव स्थानम्। कालिदासस्य उज्जयिनीवर्णनपक्षपातोऽपि पक्षमिमं समर्थयते। कालिदासेन यया सूक्ष्मेक्षिकयावन्तीनां भौगोलिकी स्थितिर्मेघदूते निबद्धा सा तद्देशवासित्वे एव सम्भवति।

कालिदासस्य जीवनवृत्तम्

किंवदन्तीभिर्ज्ञायते यत् कालिदासो बाल्ये मूर्खः आसीत्। पण्डितानां छलेन प्रबुद्ध्या विद्यावत्या सह अस्य विवाहोऽभूत्। तयाऽपमानितश्च कालिकामाराध्य कविर्बभूव। कालिदेव्याः

दासः कालिदासः इति नाम्ना प्रसिद्धो बभूव। पत्नीं द्रष्टुं गृहमागतश्च द्वारं पिहितं दृष्ट्वा 'अनावृतकपाटं द्वारं देही'ति जगाद। 'अस्ति कश्चिद् वाग्विशेष' इति तया पृष्टश्च काव्यत्रयं रचयति स्म। कलिदासः त्यागसमन्वितमार्गस्य समर्थकोऽस्ति। कालिदासः आदर्शप्रियः भारतीयसंस्कृत्याः आराधकः शाश्वत् सौन्दर्यस्य समर्थकः सूक्ष्मतत्त्वानां ज्ञाता, प्रकृतेः पूजकः,श्रेयस्य साधकः, विश्वकविः आसीत्।

कालिदासस्य रचना

कालिदासः सर्वसंस्कृतकवीनामग्रणीः इति सर्वे: अभ्युपगम्यते। सत्यमेव च कालिदासः भारतीय शेक्सपियर इत्याख्यायते। महाकाव्य गीतिकाव्य-रूपकेतित्रिविधकाव्यस्य कर्ता कालिदासः आसीत्। कालिदासस्य सप्तग्रन्थाः सन्ति। काव्यचतुष्टयं नाटकत्रयं च कालिदासरचितमिति।

काव्यचतुष्टये-1.रघुवंशम्-(19)एकोनविंशति-सर्गात्मकं महाकाव्यम्। अत्र रघोर्वंशस्य कथा निबद्धा। वायुपुराणे वर्णितरामवंशावल्या सह रघुवंशवर्णितरामवंशावली भूयसा सामञ्जस्यं धारयति। न केवलं कालिदासस्य काव्येषु अपितु समग्रसंस्कृतसाहित्ये रघुवंश उत्कृष्टमहाकाव्यं विद्यते। अस्मिन् काव्ये सर्वरसानां रमणीयपरिपाकं परिलक्ष्यते अग्निवर्णस्य विलासवर्णने शृंङ्गाररसस्य,युद्धवर्णने वीररसस्य,अजविलापे करुणरसस्य प्रधानता दरीदृश्यते।

2.कुमारसंभवम्-(17)सप्तदश-सर्गात्मकं महाकाव्यम्। कुमारसम्भवं कालिदासस्य कलायाः सुन्दरसृष्टिः विद्यते। अत्र शिवपार्वत्याः पाणिग्रहणस्य कुमारकार्तिकेयजन्मवर्णनं तारकासुरवधस्य च कथा वर्तते। मार्मिकभावाभिव्यञ्जनायां उदात्तकोमलकल्पनया प्राञ्जलपदविन्यासेन च एषा कृतिः अद्भुता खलु। वाह्यप्रकृत्याः मनोरमचित्रणं कुमारसम्भवस्य महती विशेषता वर्तते।

'एष ते राम गङ्गाया विस्तरोऽभिहितो मया।
कुमारसंभव श्चैव धन्यः पुण्यस्तथैव च।। (बालकाण्डे 37/32)

3.गीतिकाव्येषु-1.ऋतुसंहारम्-(6)षट्सर्गात्मकं 144 श्लोकात्मकं गीतिकाव्यम् अस्ति। ऋतुसंहारस्य षट्सर्गेषु षड्ऋतवः यथाक्रमं वर्णिताः। अस्य भाषा प्राञ्जला, परिमार्जिता प्रवाहपूर्णा प्रसादगुणयुता च -

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां ।
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ॥

4. गीतिकाव्येषु-2.मेघदूतम्-कुवेरकोपंभाजनयक्षस्य प्रणयकथा मेघदूतेऽस्ति। मन्दाक्रान्ता छन्दसि प्राकृतिदृश्यैः सह मानवीया भावाः सूक्ष्मेक्षिकया पूर्वोत्तरनामकभागद्वये वर्णितम् अस्ति।

5. नाटकत्रयेषु-1.मालविकाग्निमित्रम्-पञ्चाङ्कात्मकं रूपकमस्ति। मालविकाग्निमित्रं नाम रूपके शुङ्गवंशीयस्य राज्ञः अग्निमित्रस्य मालविकया सह कृता प्रेमकथा एव निबद्धा।

2. विक्रमोर्वशीयम्-पञ्चाङ्कात्मकं रूपकमस्ति। विक्रमोर्वशीये पुरुरवस उर्वश्या सह कृता प्रेमकथा एव निबद्धा। माङ्गलिकप्रेमस्वीकृतिरेव लक्ष्यं गृहस्थधर्मस्येति कवेरुपदेशोऽत्र।

3.अभिज्ञानशाकुन्तलम्-(7)सप्ताङ्कात्मकं रूपकमस्ति। भारतीयानां मते रूपकेषु तिलकायतेऽभिज्ञानशाकुन्तलम्। 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति उक्तम्। अङ्गुलीयकदर्शनेन समाप्तऋषिशापो दुष्यन्तःशकुन्तलां स्वीकृत्य समोदमास्ते इति कथानकं सप्ताङ्केषूपनिबद्धं कविना।

कालिदासस्य कविताशैली

मानवजीवनस्य सर्वाङ्गसम्पूर्णचित्रमुपस्थापयितुमसौ रघुवंशं प्रणीतवान्, प्रेम्णः परं प्रकर्षं प्रकाशयितुञ्च कुमारसम्भवं प्रणीतवान्। उपमा कालिदासस्येति कथनं तु न प्रमाणमपेक्षते। कलिदासस्य कृतिषु जीवनस्य व्यवहारिकज्ञानपूर्णतथ्यानां प्रकाशनमपि भवन्ति। रसाभिव्यक्तौ कालिदासस्य कृतिषुशृङ्गाररसस्य प्रधानता दरीदृश्यते। करुणरस परिपाकेऽपि कवि कुशलः। अलङ्काराणां प्रयोगोऽपि सुरुचिपूर्णः। उपमाप्रयोगे तु विश्वविख्यातः। कथितमपि-'उपमा कालिदासस्य' तस्य उपमाः अद्वितीयाः खलु। चरित्रचित्रणेऽपि कवि कुशलः। कालिदासस्य प्रकृतिचित्रणमपि अद्भुतम्।

• • •

2. महाकविः माघः-(700)

माघस्य समयः

संस्कृतमहाकाव्यप्रणेतृणां मध्ये शास्त्रसम्मतलक्षणयुतमहाकाव्यानां क्षेत्रे महाकविमाघस्य स्थानं विशिष्टं वर्तते। यथा कथितम्-

पुष्पेषु जाती नगरीषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः।
नदीषु गङ्गा क्षितिपेषु रामः
काव्येषु माघः कविकलिदासः॥

सुप्रसिद्धमहाकाव्यस्य शिशुपालवधस्य प्रणेतामहाकविर्माघस्य पिता श्रीदत्तकसर्वाश्रयः आसीत् एवं तस्य पितामहः सुप्रभदेव वर्मलातनाम्नः राज्ञः महामन्त्री आसीत्। माघस्य जीवनकालविषये महान् मतभेदो वर्तते। वसन्तगढनामके स्थाने प्राप्त शिलालेखेन सप्तमशतकप्रारम्भो माघस्य समयो नि श्चीयते। माघस्य स्थितिकालः स्पष्टतः 682 मितवैक्रमाब्दमभितः,समालोचकैः तस्य कालः-700-780 मितवैक्रमाब्दानभितोऽनुमितः। आचार्य हंसराजः अग्रवालः 650 मितात् 700 मितं खीष्टाब्दं यावत् मन्यते।

माघस्य देशः-

शिशुपालवधप्रणेतुर्माघस्य पितामहः सुप्रभदेवः गुर्जरशासकस्य वर्मलात नाम्नो नृपस्य मन्त्री आसीत्। माघस्य पिता दत्तको विद्वान् दानप्रसिद्धश्चासीत्। माघस्य जन्म विद्यापीठतया राजधानीभावेन च पुरा प्रथिते मीनमल्लाख्यनगरे अभवत्।

माघस्य जीवनवृत्तम्-

पितुर्दानशीलतायाः प्रभावो माघस्यप्युपरि पतितः। असीतदानदोषेणायं निर्धनत्वं गतः। भोजेन माघस्य संख्या तस्मै द्रव्यसाहाय्यं दत्त्वोपकारः कृतः इति श्रूयते। माघकालेऽपि भोजस्य सद्भावः सम्भवति।

माघस्य रचना-

शिशुपालवधम्-माघस्य शिशुपालवधे द्वाविंशतिः(22) सर्गाः सन्ति। अत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधो मुख्यतया वर्णितः। महाभारतोक्तां निष्प्राणामिमां कथां माघो वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्। माघः उच्चकोट्याः कविः विद्यते। तस्य समग्रकाव्यं प्रोढोदात्तशैल्याः उत्कृष्टनिदर्शनं वर्तते। अत्र हृदयेण सह मस्तिष्कस्यापि अपूर्वो समिश्रणो दरीदृश्यते। कविः संस्कृतभाषायाः प्रकाण्डपण्डितः आसीत्। तस्य काव्यं नूतनशब्दानामगारो विद्यते। उक्तं च-'नवसर्ग गते माघे नवशब्दो न विद्यते। शब्दशक्तीनां साहचर्येणैव पदयोजना भावप्रकाशने सफला भवति। महाकविमाघस्य महाकाव्ये शक्तीनां प्रभावो दरीदृश्यते। अस्य काव्यस्य सरसता, अलङ्काराणां नवीनता,श्लेषस्य उपयुक्तता चित्रालङ्काराणां च विचित्रता दर्शनीया विद्यते। उपमार्थगौरवपदलालित्यत्रयाणां गुणानाम् अस्मिन् काव्ये समन्वयोऽवलोक्यते।

माघस्य काव्यगुणा-कविताशैलीश्च-

'माघे सन्ति त्रयो गुणाः' इति कथनेन माघस्य कालिदासभारविदण्डिनामेकायतनीभूतं स्वरूपमाख्यायते। 'नवसर्गगते माघे नव शब्दो न विद्यते' 'मेघे माघे गतं वयः' इत्याद्युक्तिभिर्वहुप्रशंसितस्य महाकाव्यस्य प्रणेतृनाम्नैव समाधिकारख्यातिः। माघो हि एकीभूत-कालिदास-अश्वघोष-भारवि-भट्ट इत्येषां प्रभावेन प्रभावितः। तस्य काव्ये कालिदासस्य काव्यसौन्दर्यम्, अश्वघोषस्य स्वाभीष्टदर्शनसिद्धिः, भारवेरर्थगौरवम्,भट्टेश्च व्याकरणपाटवञ्च सर्वे एव परस्परं समन्विता सन्ति इति दृश्यते। यथा कथ्यते-

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥

• • •

3.भारविः-(600)

भारवेः समयः-

संस्कृतमहाकाव्यपरम्परायां कालक्रमदृष्ट्या भारवेस्तृतीयं स्थानं वर्तते। स हि संस्कृतकाव्यजगति अलङ्कृतशैल्याः प्रथम उन्नायकः पण्डितयुगस्य प्रवर्त्तकश्च। तस्य स्थितिकालः कविजीविते 585 मितवैक्रमाब्दमभितोऽनुमितः। तस्य हि हंसराजानुसारेण 607 मितवैक्रमाब्दः स्थितिकालः। आचार्य श्रीरामचन्द्रमिश्रानुसारेण भारवेः समयः षष्ठेशवीसशतकं मन्तुं युज्यते। पुलकेशिनद्वितीयस्य एहोलशिलालेखे भारवेर्नाम मिलति। तदनुसार अस्य समयः

634 ख्रिस्ताब्दः 556 शकाब्दो वा वर्तते। 600 ख्रिष्टाब्दे भारविरासीदिति बलदेवोपाध्यायाः। अवस्यमयं षष्ठशताब्द्याउत्तरार्धे सप्तमशताब्द्याः पूर्वार्धे वेति वाचस्पति गैरोला। भारविरासीत् षष्ठशताब्द्याः उत्तरार्धे इति वेदव्यासशुक्लः मन्यन्ते।

भारवेः देशः(जन्मस्थानम्)-

भारविरासीद् दाक्षिणात्यः। कौशिकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रो भारविः। भारवेः पूर्वजाः पूर्वम् उत्तरपश्चिमभारतान्तर्गतम् आनन्दपुरं नाम नगरमध्यवात्सुः, ते नासिकनामकं दक्षिणभारतनगरमयाताः। बाल्येऽस्य नाम आसीद् दामोदरः। विष्णुवर्धनोऽस्य मित्रम्। त्रयोऽस्य पुत्राः।

भारवेः जीवनवृत्तम्-

अस्य महाकवेः जीवनस्य विषये लोकेषु किंवदन्ती एका प्रसिद्धा अस्ति यत् -बाल्यकालादेव एषः मेधावी कविः आसीत्, किन्तु अस्य पिता एनं अधिकारिकं सुयोग्यं कर्तुं सदैव प्रताडनं तिरस्कारं च करोति स्म। पितुः अनेन व्यवहारेण क्रुद्ध भारविः स्वपितुः वधस्य एव निश्चयम् अकरोत्। एकदा स्वपितुः वधार्थे प्रयत्नवान् आसीत्। तदैव तेन पितुः कथिता स्व-उन्नतिपरा हितैषिणी च वाणी श्रुता। पिता तस्य जननीं प्रति कथयति स्म यत्-'यद्यपि भारविः अयं अतीव बुद्धिमान् कुशलः कविः च अस्ति,किन्तु अस्य विद्वत्समाजे सुदृढा स्थितिः भवेत्,अनेनैव अहं नित्यं अस्य तर्जनां करोमि।' एतत् वचनं श्रुत्वा भारविः खिन्नमनाः सञ्जातः। अन्ते च तेन अस्य अपराधस्य प्रायश्चित्तं द्वादशवर्षं यावत् श्वसुरगृहं गत्वा गाश्चारयितुं प्रारभत इति बलदेवोपाध्यायाः।

अर्थाभावेन त्रस्ता कविजाया 'सहसा विदधीत न क्रियामि'त्यादिकं 2/30 श्लोकं कस्यैचित् श्रेष्ठिपत्न्यै दत्वा धनमापेति इति डॉ.हरिहरदत्त शास्त्री महोदयेन भणितम्।

भारवेः रचना-

किरातार्जुनीयमेव एका प्राप्ता रचना भारवेः। सर्वविधलक्षणोपेतं महाकाव्यं शिवार्जुनयुद्धमवलम्ब्य किरातार्जुनीयाभिधं काव्यं प्राप्यते। अष्टादशसर्गनिबद्धेऽत्र महाकाये महाभारताधारकं सुन्दरमुपाख्यानं चित्रितम्। महाकाव्यस्यास्य कथा इतिहासप्रसिद्धा। द्यूते पराजितो युधिष्ठिरः भ्रातृभिः पत्या च सह द्वैतवने वसति स्म। दुर्योधनस्य शासनपद्धतिं ज्ञातुं वनेचरं गुप्तचररूपेण प्रेषितवान्। सर्वं ज्ञात्वा सः युधिष्ठिराय निवेदयामास। पाशुपतास्त्रमासादयितुमर्जुनः शिवेन(किरातेन)युद्धमकरोत्। अर्जुनपराक्रमदर्शनतुष्टः शिवोऽर्जुनाय पाशुपतास्त्रं ददौ। अस्मिन् काव्ये धीरोदात्तः नायकः अर्जुनः। कथ्यते हि भारविः भाषा-भाव-सौन्दर्य-रससिद्धिवर्णनाचातुरी- शास्त्रीयपाण्डित्यादि विविध पक्षाणामेकाश्रय इति। अर्थगौरवं तु तस्य वैशिष्ट्येषु प्रकृष्टमेव। भारविः कर्मणि विश्वसिति न तु भाग्ये। अस्मिन् काव्ये महाकाव्यस्य सर्वाण्यपि काव्यशास्त्रनिर्दिष्टानि लक्षणानि संघटन्ते। समस्तसंस्कृतसाहित्ये किरातार्जुनीयस्य समं अन्यद् एतादृशम् ओजपूर्णं काव्यं न मिलति। भारविः नीतिशास्त्रअलंकारशास्त्रव्याकरणशास्त्रस्य च पण्डितः आसीत्। तस्य महाकाव्ये

नीतिविषयकसूक्तीनां तु भण्डारगारः विद्यते। राजनीतेरपि विशिष्टवर्णनम् अस्मिन् काव्ये उपलभ्यते।

अयं महाकविः स्वकृतिविषये स्वयमेव कथयति यत्-अस्मिन् काव्ये भावानां स्पष्टाभिव्यक्तिः वर्तते। अर्थगाम्भर्यादिगुणाः अत्र अनिवार्यतः स्वीकृताः सन्ति-

स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित्॥

भारवेः काव्यशैली-

भारवेः अर्थगौरवं प्रसिद्धम्। भावपक्षः कलापक्षः समृद्धिभाजौ। रसप्रयोगे नैपुण्यमस्य प्रशंसनीयमेव। अर्जुनहृदयस्थः स्थायिभावोत्साहो विभावानुभावसञ्चारिसंयोगात् वीररसतमेति। संस्कृतसाहित्ये वीररसप्रधाना इयमेका एव रचना। भारवेः शास्त्रज्ञानं प्रशंसनीयम्। कवेर्नीतिज्ञानं सुविस्तृतम्। नेदमावश्यकं राज्ञामेव। सर्वेषां जीवनेऽस्त्यावश्यकताऽस्य ग्रन्थोऽयं नीतेराकरः। अलङ्काराणां प्रयोगेऽपि कविः कुशलः। नारिकेलफलसम्मितं वचो भारवेरित्याह-मल्लिनाथः। नारिकेलफलस्य वाह्यरूपं रूक्षं विषमं च विद्यते परं अन्तरे काव्यस्य मधुरं रसं निहितमेव-

नारिकेलफलसंमितं वचो भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्॥

• • •

4. महाकविर्दण्डी- (700)

दण्डिनः समयः-

संस्कृतसाहित्ये दण्डिनो महती प्रतिष्ठाऽनुमीयते। 'दण्डिनः पदलालित्यम्' इत्युक्तिरपि तस्य प्रसिद्धौ प्रमाणम्। गद्यलेखकेषु दण्डी सर्वं विशिष्टं स्थानं रक्षति। समालोचकाः वदन्ति यत् भारवेः दण्डिनोऽपि पूर्ववर्तित्वम् सिध्यति। दण्डिनः कथनमिदमादाय पण्डिता भारविनं दण्डि-प्रपितामहं मन्यन्ते। दण्डिनोऽपि स्थितिकालः सन्दिग्ध एव सम्प्रत्यपि। अत्र हि समालोचकाः सुबन्धु-बाण-दण्डिनः,बाण-दण्डिसुबन्धवः, सुबन्धु-दण्डि-बाणाश्चेति त्रिविधक्रमसमर्थका दृश्यते। दण्डी हि संस्कृतसाहित्ये मूर्तिमत्काव्यमेव-

जाते जगति बाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥

आचार्य श्रीरामचन्द्रमिश्रः स्व-संस्कृतसाहित्येतिहासे- षट् प्रमाणैर्दण्डिनः समयस्य परिसीमा अष्टमशतकमिति मनुते । दण्डिनः समयस्य पूर्वसीमा षष्ठं शतकमिति मन्यते। सर्वमुपरितनं सन्दर्भं विभाव्य मैक्समूलर-वेबर-मैक्डोनल-याकोबि-प्रभृतयः पाश्चात्या विद्वांसो दण्डिनः समयं षष्ठशतकं मन्यन्ते। अन्ये पुनः अवन्तिसुन्दरीकथायां दण्डिनो भारविवंशजत्वमुक्तम्।

भारवेः समयः खी0 634 मन्यते, तदनुसारेण दण्डिनः सप्तमशतकान्तभागसम्भूतत्वमायाति। एतेन सर्वे दण्डिनः समयः सप्तमशतकान्तभागः सिद्ध्यति इति चाहुः।

दण्डिनः देशः-

दण्डिनो वासदेशस्य निर्णयेऽनुक्रम्यमाणे अवन्तिसुन्दरीकथा प्रमाणम्। तदनुसारेण दण्डिनः पूर्वपुरुषाः गुर्जरप्रान्तस्थिते आनन्दपुरेऽतिष्ठन् ततस्ते दक्षिणदेशावस्थितं सम्प्रति एलिचपुरसंज्ञया प्रथमानमचलपुरं नाम स्थानमायाताः। तदेवं कवेर्दाक्षिणात्यभावः सिद्ध्यति। कौशिकगोत्रोद्भवोऽयं स्वपितामहस्य भारवेराश्रयदातुर्नृपस्याश्रये काञ्चीनगरे वसति स्म। काञ्चीराजे शत्रुभिः आक्रमणेन पराभूतेऽयं काननेषु निलीयस्थितः। सोऽयं विप्लवः 655 तमे खीष्टाब्दे बभूव। तदा दण्डी बाल एवासीत्। एतेन दण्डिनः कालोऽपि प्रकाशमानीयते।

दण्डिनः जीवनवृत्तम्-

दण्डिनो वास्तविकं नाम न ज्ञायते। यथा भवभूतेर्माघस्य च नामविषये श्रूयते तथैव 'ब्रह्माण्डच्छत्रदण्डः'इत्यादिदशकुमारमङ्गलाचरणस्थदण्डपदप्रयोगेण दण्डिनाम्नाऽयं ख्यातः। दण्डी हि महेन्द्रवर्मणः सुतस्य नरसिंहवर्मणस्तत्सुत रामवर्मणः सभाध्यक्ष आसीत्। तस्य स्थितिकालः-747-782 मितवैक्रमाब्दानभितः। 'दण्डिनः पदलालित्यम्'इति।

दण्डिनः रचना-

त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥

'त्रयो दण्डिप्रबन्धाश्च' एतदुक्तिमनुसृत्य 1.काव्यादर्शः, 2.दशकुमारचरितम्, 3. अवन्तिसुन्दरीकथा, इति त्रयो ग्रन्था दण्डिनः कथ्यन्ते।

1. काव्यादर्शः-अस्य ग्रन्थस्य त्रयः(3) परिच्छेदाः सन्ति,येषु 660 श्लोकाः लिखिताः। प्रौढप्रतिभायाः परिचायको ग्रन्थः।

2. दशकुमारचरितम्-इदमाख्यानप्रधानमेकं कथानकम्। अत्र नानाविधा रोमाञ्चकारिन्यो घटना वर्णिता या विस्मयं जनयन्ति। अत्र द्वे पीठके पूर्वोत्तरनामिके। भूमिकाभागरूपः पञ्चम उच्छ्वासः पूर्वपीठिका नाम्ना ज्ञायते। शिष्टमुत्तरपीठिकारूपम्। वस्तुतः अष्टावेव कुमारा वर्णिता अत्र। पूर्वापरसमायोजनेन दशत्वसार्थकता। दशकुमारचरितं कवेः साहित्यिकजीवनस्य प्रभातकालस्य रचना अस्ति। दशकुमाराणां पर्यटनशौर्यानुभवानां वैचित्र्यपूर्णमनोरञ्जकवर्णनमेव अस्य ग्रन्थस्य विशेषता विद्यते। चौरशास्त्रराजनीतिशास्त्रस्य ज्ञानं तु पदे पदे उपलभ्यते। दण्डीसुभगमनोरमवैदर्भीरीत्याः उपासकोऽस्ति। अस्य भाषा तु सर्वत्र व्यवहारिकी परिष्कृता परिमार्जिता चास्ति। चरित्रचित्रणेऽपि विविधता सजीवता चास्ति। दण्डिनः पात्राणि प्रायः सर्वेषां वर्गाणां प्रतिनिधित्वं कुर्वन्ति। निम्नवर्गस्य वर्णनेन व्यवहारिकशिक्षया च दशकुमारचरितं संस्कृतगद्यसाहित्ये विशिष्टं स्थानमाश्रयते। अतः उचितमेव कथितं भारतीयालोचकैः-

कविर्दण्डी कविर्दण्डी कविर्दण्डी न शंसयः।

3. अवन्तिसुन्दरीकथा- अवन्तिसुन्दरीकथाऽपूर्णा। कथासारस्तु कथायाः पद्यानुवादः। दण्डिनः तृतीयकृतिः विद्वद्भिः स्वीकृता परं कीथमहोदयस्य मतमत्र उचितमेव प्रतीयते यत् शैल्याः भिन्नतायाः अप्रमाणिकतायाः च दृष्ट्या नैषा दण्डिनः कृतिः।

दण्डिनः काव्यशैली-

दण्डिनः रचनायां प्रवाहः परिदृश्यते। अर्थस्य स्पष्टता रसस्य सुन्दराभिव्यक्तिः सततमवलोक्यते। दैनन्दिनसंस्कृतप्रयोगकारकाणामुपयोगाय दण्डिनः शैली कल्पवृक्षायते। लोकोक्तिप्रयोगे धुरन्धरोऽयम्। अनेन अस्य शैली मनोहारिणी जाता। रसप्रयोगोऽप्यस्य प्रशंसायोग्यः। राजनीतेः, कामशास्त्रस्य,व्याकरणस्य साहित्यस्य च पाण्डित्यं दण्डिनः साहित्येऽवलोक्यते एव। अयं पदलालित्यस्याचार्यः। यादृशी पदललितता वर्ततेऽत्र न तादृशी संस्कृतसाहित्ये निखिले द्रष्टुं शक्यते। अर्थस्य शब्दस्य च मनोहरतां विलोक्यैव सुधीभिरुक्तम्-

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।

• • •

5. वाल्मीकिः- (400.500)

कवत इति कविः, कवेः कर्म काव्यम्, काव्यं तु दृश्य-श्रव्य भेदाद् द्विविधम्। गद्यपद्यमिश्रभेदादपरं त्रिविधम्। लौकिकसंस्कृतसाहित्यस्य आदि कवेरस्यैतिह्यविषये बहुभिर्बहुधा संसूचितमस्ति। कथ्यते हि पद्मपुराणे यत् कश्चित् क्रूरकर्मा किरातः कस्यचित्तापसस्यानुग्रहेण लब्धसज्ज्ञानस्तपसि निरतः,सुचिरं तपस्यततस्य शरीरं वाल्मीकिरित्यभिधानेन ज्ञातोऽभूदिति। लौकिकसंस्कृते काव्यलेखनस्य क्रमः वाल्मीकितः प्रारब्धः। आदिकविः यदा कामातुरक्रौञ्चपक्षि-मिथुनयोरेकस्य वधम् अपश्यत्। हृदयद्रवीकरणाय, रसानुभूतिकृते च आदिकवेः वाल्मीकेः श्लोकः अवश्यं द्रष्टव्यः। **यथा-**

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीःसमाः ।
यत्क्रौञ्चमिथुनादेकमवधीःकाममोहितम्।।

तमसा नदीतीरे व्याधः कश्चन क्रौञ्चमिथुनादेकमवधीत्। हृदयविदारिकां तद्घटनां दृष्ट्वा वाल्मीकिः स्वीयामनुभूतिं श्लोकरूपेण व्यक्तीकृतवान्। अर्थात् शोकः श्लोकत्वमागतः एषानुभूतिरेव रसानुभूतिरिति कविना परिभाषायाम् उच्यते।

वाल्मीकेःसमयः/रामायणस्य रचनाकालः-

संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणमेव प्रसिद्ध्यति। रामायणात् प्राचीनः संस्कृतभाषानिबद्धः काव्यलक्षणोपपन्नः कोऽपि ग्रन्थो न श्रूयते,दृश्यत इति कथैव का? यतो रामायणे न केवलं युद्धमेव वर्णितमपि तु रूपकोपमाद्यलङ्कारयुतायां भाषायां प्रकृतेरपि वर्णनं कृतमतो रामायणं काव्यमिति स्वीक्रियते,न वीरगाथामात्रम्,न वा शुष्केतिहासमात्रम्।

1. रामायणे महाभारतवर्णितस्य कस्यापि पात्रस्य नाम नोपलभ्यते, अतः रामायणं महाभारतात् प्राचीनम्। वाल्मीकि- महर्षेर्व्यासादपि पूर्ववर्तीति।

2. याकोबिमहोदयो भाषाविज्ञानद्वारा बौद्धकालपूर्वभवत्वं रामायणस्य आह।

3. जैनकविना विमलसूरिनाप्रकृतभाषानिबद्धे स्वीये 'पउमचरिआ' 62ई0 समयेऽरच्यतातो रामायणं ततः प्राचीनम्।

4. पाटलिपुत्रस्य प्रतिष्ठापनमजातशत्रुणा 500 ई0पू0 समये कृतम्,रामायणे शोणगङ्गासङ्गम- मतिक्रम्य पुरः सरत्यपि रामे पाटलिपुत्रस्य नामापि न श्रूयते,तेन स्पष्टो भवति यद् रामायणम् 500 ई0 पू0 समयतः पूर्वकालिकः।

5. रामायणः बुद्धपूर्वकालिकं वर्तते।

एभिः सर्वैरपि प्रमाणैरिदं सिद्धं यद् रामायणं खीष्टपूर्वपञ्चमशतकात्पूर्वमेव प्रणीतम्।

वाल्मीकेः देशः/जीवनवृत्तम् च-

कथ्यते हि पद्मपुराणे यत् कश्चित् क्रूरकर्मा किरातः कस्यचित्तापसस्यानुग्रहेण लब्धसञ्ज्ञानस्तपसि निरतः, सुचिरं तपस्यततस्य शरीरं वाल्मीकिरिव्यभिधानेन ज्ञातोऽभूदिति। लौकिकसंस्कृते काव्यलेखनस्य क्रमः वाल्मीकितः प्रारब्धः।

वाल्मीकेः रचना-

'रामायणम्' आदिकाव्यं तत्प्रणेता च वाल्मीकिः आदिकविः। संस्कृतकाव्यकानने वाल्मीकिः रामायणमेव आदिकाव्यत्वेन आद्रियते। काव्यमिदमत्यधिकं लोकप्रियतां प्राप्तम्। 'रस एव काव्यस्यात्मा' इति काव्यशास्त्रिणां मतम्। अस्मिन् प्रसंगे आचार्यप्रवरः आनन्दवर्धन उवाच-

काव्यस्यात्मा स एवार्थस्तस्मादादिकवेः पुरा।
क्रोञ्चद्वन्द्वियोगोत्थः शोकः श्लोकत्वमागतः।।

रामस्यादर्शता विषये आचार्य श्रीरामचन्द्रमिश्रः कथयति-वाल्मीकिना स्वकाव्यकलायाः प्रदर्शनाय यत्पात्रम् आधारीकृतं तस्य रामस्य चरितमेव तादृशं यत्तदाधारीकृत्य कोऽपि कविः साफल्यमासादयेत्, यथोक्तं साकेते-

राम तुम्हारा चरित स्वयं ही काव्य है।
कोई कवि बन जाय सहज संभाव्य है।।

अतो रामाधारकं वाल्मीकिकाव्यं रामायणं नितान्तहृद्यं स अतिशयशिक्षाप्रदं च भूत्वा रसास्वादसुखपिण्डप्रदानद्वारेण विनेयान्विनयति यत्काव्यस्य मुख्यं प्रयोजनमुच्यते। रामचन्द्रः आदर्शभ्राता-आदर्शपतिः-आदर्शपुत्रः-आदर्शशासकः-आदर्शमनुष्यश्चासीदिति समर्थयितुमेव रामायणं निरमीयत, यत्र लक्ष्ये तत्सफलमभूत्। आदर्शचरित्रचित्रणं रामायणस्य अद्वितीयं वैशिष्ट्यम्। अस्य नायकः श्रीरामः मर्यादापुरुषोत्तमः। किमधिकम्-सत्यवादित्वेन, वचनपालकत्वेन, आज्ञाकारिपुत्रत्वेन, विनीतशिष्यत्वेन,भ्रातृवत्सलत्वेन, एकपत्नीव्रतपतित्वेन, शरणागतवत्सलत्वेन, सन्मित्रत्वेन, उदारस्वामित्वेन,दीनबन्धुत्वेन, न्यायकारिभूपतित्वेन, लोकाराधकत्वेन च रामायणचित्रितो रामः सर्वथा सर्वदा सर्वैः सर्वत्र सततमनुकरणीयः पूजनीयश्च।

रामायणस्य स्वरूपम्-

रामायणे चतुर्विंशतिः सहस्राणि श्लोकानामिति तत् चतुर्विंशतिसाहस्त्री संहितापदेनाभिधीयते। रामायणग्रन्थे सप्तकाण्डानि सन्ति।

1. प्रथमे बालकाण्डे-रामस्य यौवनमुखं, विश्वामित्रेण मुनिवरेण सह तदाश्रमपदं प्रतिप्रस्थानं, तत्र यागविघातिनां राक्षसानां हननं जनकजापाणिपीडनं च इति।
2. द्वितीये अयोध्याकाण्डे-रामस्य यौवराज्यपदाभिषेकसमारोहोपक्रमः, तत्र कैकेयीकृतः प्रत्यूहः, रामस्य निर्वासनम्, रामविरहे दशरथस्य प्राणत्यजनम्।
3. तृतीय अरण्यकाण्डे-रामस्य दण्डकागहनंनाऽवगाहनं विराधाऽऽदिचतुर्दशसहस्रराक्षसान् उज्जासनं च रावणकृतं जानकीहरणम्।
4. चतुर्थे किष्किन्धाकाण्डे-रामस्य सुग्रीवेण सह मित्रता, बालिनो निषूदनं च सीतायाः अन्वेषणम्।
5. पञ्चमे सुन्दरकाण्डे-समुद्र लङ्घनं लङ्कादहनं हनूमतः सीतायाः अन्वेषणम्।
6. युद्धकाण्डनाम्नि षष्ठे काण्डे-राम-रावणयोर्मध्ये युद्धं, रामस्य रावणमारणं लङ्काजयञ्च।
7. उत्तरकाण्डेतिसंज्ञिते सप्तमे काण्डे-रामराजादिष्टं, सीताप्रव्राजनं, सीताशोकः, वाल्मीकेराश्रमेशरणम्।

एकश्लोकी-रामायणोपाख्यानानि-

आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम्।
बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णहननमेतद्धिरामायणम्॥१॥

वाल्मीकेः काव्यशैली-

सर्वप्रथमं रामायणं काव्यं वर्तते तदनन्तरमेव धर्मग्रन्थ इतिहासोऽन्यद्वा किञ्चिदिति वस्तुतत्त्वं कविना कदापि न विस्मृतमत एव चासौ सर्वत्र कवित्वं व्यञ्जयितुमचेष्टत। काव्यानामादर्शभूतं रामायणं कवीनामादर्शभूतश्च वाल्मीकिरिति कथनं सत्यादनपेतम्। रामायणकाव्ये करुणो रस एव प्रधानत्वं भजते। अनुष्टुप्छन्दसा सहसा किल वाल्मीकिः वाचं व्याजहार इति आभाणकाद् 'वाल्मीकेरुपज्ञा नूनमनुष्टुप्छन्दः' इति संसूच्यते। अथारम्भकतिपर्यन्तं सर्वत्र रामायणी भाषा विशुद्धा परिष्कृता च क्वचित् क्वचिच्च अलङ्कार-मण्डिताऽपि च। उपमारूपके चास्य परमरमणीये दर्शनीये च भवतः। शब्दार्थयोः प्रसादगुणमयत्वं काव्यस्यास्य प्रणेतुः कोऽपि महान् अन्यकवि-व्यतिरेकी गुणो भवति। साहित्यगुणैर्वाल्मीकिर्भारतीयकाव्यधाराया हिमवान् मन्यते।

कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद् रामायणकथा लोकेषु प्रचरिष्यति॥

रामायणस्य लोकप्रियतायाः एतत् प्रत्यक्षं प्रमाणं यद् रामायणोत्तरकालिकैः कविभिः रामकथामाश्रित्य बहूनि काव्यानि नाटकानि च विरचितानि। तानि यथा-रघुवंशमहाकाव्यम्, प्रतिमानाटकम्, कुन्दनमाला, भट्टिकाव्यम्, उत्तररामचरितम्, महावीरचरितम्, अनर्घराघवः, रामायणमञ्जरी, रामायणचम्पूः चेत्यादिनि। इत्थं रामायणस्य उपजीव्यत्वमपि सिद्ध्यति।

• • •

6. महाकवि-अश्वघोषः-(प्रथम ई० पू०)

महाकवि-अश्वघोषस्य समयः-

संस्कृते ये कतिपये महाकवयस्तेषामन्यतमः किल अश्वघोषो गण्यते। स हि खण्डकाव्य-महाकाव्य-रूपकेतिविविधकाव्यकर्ताऽऽसीत्। समुद्रगुप्तप्रणीते कृष्णचरिते राजकविवर्णनप्रसङ्गे अश्वघोषस्य चर्चा विद्यते। अश्वघोषेणाऽपि स्वस्थितिकालादिविषये मौनमेवावलम्बितम्। कनिष्कसमकालिकतयाऽश्वघोषस्य समयः प्रथम ई0 पू0 स्थिरः। डॉ0 चाउ सियांग महोदयः चीनी बौद्धधर्मस्य इतिहासे अश्वघोषस्य समयः प्रथमः खिष्टाब्दः मन्यते। अश्वघोषस्य काव्यं चीनभाषायाम् 384-417 ई0 समयेऽनूदितम्। इत्सिङ्गो नाम चीनवासी यात्री अश्वघोषं महोपदेशकः नागार्जुनात् पूर्ववर्त्तिनञ्चाह। सारनाथस्थिते कनिष्कशिलालेखे अश्वघोषराज इति नाम-निदेशोऽपि मिलति। तेन हि अस्य स्थितिकालो विक्रमानन्तरतृतीयशतकमभित इत्यनुमितः। 1893 खिष्टाब्दात् पूर्वमयं दार्शनिकरूपेणैव प्रसिद्ध आसीत्। एभिः प्रमाणैः सिद्ध्यति यत् कविरयं कनिष्कसमये जीवित आसीत्। अतः अश्वघोषस्य समयः प्रथमः खिष्टाब्दः इति मन्यन्ते।

महाकवि-अश्वघोषस्य देशः/जीवनवृत्तम्-

अश्वघोषः साकेतवासीति प्रसिद्धम्। अश्वघोषस्य मातुर्नाम च सुवर्णाक्षी। जन्मना ब्राह्मणः। कालक्रमेण च बौद्धो बभूव। पार्श्वस्य शिष्यश्च कथ्यते। स हि मगधराजारित आसीत्। उत्तरभारतशासकः कनिष्को मगधाधीशम् आक्रमणेन नमयित्वा राज्यस्य परिवर्त्ते वस्तुद्वयं दातुमादिष्टवान्-1.बुद्धस्य पात्रम् 2.अश्वघोषञ्च। राजा मगधानां पात्रं दातुमुद्यतोऽपि कविम श्वघोषं दातुं नैच्छत्। अश्वघोषः इतिहाससंगीतस्य महाराजकनिष्कस्य गुरु आसीदिति अनुसन्धातृणां मतम्। अश्वघोषस्य काव्यानि संस्कृतसाहित्यस्य सुन्दतमेषु काव्येषु गण्यन्ते। अश्वघोषस्य प्रतिभा चतुर्मुखी आसीत्। स तु प्रचारवादिषु कविषु अग्रिमः।

महाकवि-अश्वघोषस्य रचना-

अस्य महाकवेः महाकाव्यद्वयं प्रकरणमेकं च विवादरहितम्। तच्च-

1.बुद्धचरितम्-बुद्धचरितं संस्कृतभाषामयं (17)सप्तदशसर्गनिबद्धमेकं महाकाव्यं विद्यते। अत्र बुद्धस्य चरितमुपदेशाँश्च कविः अवर्णयत्। बुद्धचरितं 404 खिस्ताब्दे चीनीभाषायां

अनुवादो बभूव। 800 खिस्ताब्दे च तिब्बतीभाषायामनुवादो बभूव। बुद्धचरितस्य भाषा सरला शैली च मनोहारिणी वर्तते। प्राकृतिकवर्णनं सजीवम्। मञ्जुलोऽलकारसन्निवेशः।

2. सौन्दरानन्दः-अष्टादश(18)सर्गात्मकेऽत्र महाकाव्ये इक्ष्वाकुवंश्यस्य राज्ञो नन्दस्य धर्मपरिवर्त्तनम् सुन्दर्या सह तत्पाणिग्रहणं च वर्णयति कविः। द्वितीयं महाकाव्यं म0 म0 हरप्रसादशास्त्रिणा कलिकतातः प्रकाशितम्। गौतमस्य लघुभ्रातुः सुन्दानन्दस्य चरित्रं वर्णितमत्र सरलभाषायां वैदर्भीशैल्यामुपमारूपकबहुलायाम्।

3. शारिपुत्रप्रकरणम्-अस्य शारिपुत्रप्रेरणस्य प्रकाशनं एच0 लूडर्सममहोदयेन बर्लिनस्थानात् बभूव। गद्यं पद्यं प्रकृतप्रयोगं भरतवाक्यादिकं च अत्र मिलति।

महाकवि-अश्वघोषस्य काव्यशैली-

कणदक्षोऽयं महाकविः। नन्दस्य भिक्षुरूपग्रहणे, सुन्दर्याः विलापे, नन्दानुतापे, यशेधराविलापे, मायारोदने, शुद्धोदनक्रन्दने च करुणस्यैव मन्दाकिनी प्रवहति। उपमारूपकादीनां प्रयोगेऽश्वघोषो निपुणः। अश्वघोषेण शब्दानां विशिष्टेऽर्थे प्रयोगः कृतो योऽन्यत्र नासाद्यते,यथा 'गन्त्री'शब्दो यानार्थे 'धर्मन्'शब्दश्च व्यवहारार्थे। अश्वघोषः वैदिकपौराणिकविषयाणां महान् भाण्डागार आसीत् यदि कालिदासस्य रचनासु चातुर्वर्ण्यस्य व्यापिकापृष्ठभूमिर्दृश्यते तदाश्वघोषस्य रचनासु बौद्धधर्मस्य विश्वजनीनगम्भीरनैतिकता विलोक्यते।

• • •

7. महाकविः भासः-(100 ई0 पू0)

महाकविः भासस्य समय/देशः/जीवनवृत्तम्-

यस्याश्चौरश्चिकुरनिकरः कर्णपूरो मयूरः।
भासो हासः कविकुलगुरुः कालिदासो विलासः॥

संस्कृतनाट्यसाहित्ये महाकविः भासः अन्यतमं स्थानं धत्ते। भासस्य स्थितिकालविषये पण्डिताः सम्प्रत्यपि नैकमत्यं भजन्ते। कालिदासात्पूर्वं भासस्य नाट्यग्रन्थाः एवाद्य लभ्यन्ते।

1. 'प्रथितयशसा भाससौमिल्लकविपुत्रादीनाम्' इत्यादिके वाक्ये कालिदासद्वारा महाकविः ससम्मानं संस्मार इति कालिदासात् पूर्ववर्ती आसीत् भासः इति निश्चीयते।
2. केचन भासस्य कालं 100 ई0 पू0 मानयन्ति।
3. प्रोफेसर बर्नटः भासम् ईस्वीयस्य सप्मतशताब्द्यां स्थितिं स्वीकरोति।
4. स्टेनकेनो महोदयः विन्टरनित्स भासम् ईस्वीयस्य द्वितीयचतुर्थशताब्द्योरन्तराले स्थितिं स्वीकुरुतः।
5. केचित्तमुदयनसमकालिकं मन्यते। परे तु तं विक्रमसमकालीनमन्ये तं श्रीहर्षसमकालीनमपि मन्यन्ते। ते हि राजशेखरस्य-

कारणं तु कवित्वस्य न सम्पन्नकुलीनता।

धावकोऽपि हि यद्भासः कवीनामग्रिमोऽभवत्।।

6. भासं तु श्रीहर्षस्यैव सभाकविर्वाणभट्टः-

'सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव।।'

7. समुद्रगुप्तो हि स्वकीये कृष्णचरिते मुनिकविवर्णनप्रसङ्गे भासं स्मरति। भासस्य अग्निवर्णसभाकवित्वं सिध्यतीति।

वस्तुतस्तु भासो हि उदयनसभाकविरिति कपिलदेवस्य मतमेव युक्तियुक्तं दृश्यते। उदयनो हि बुद्धसमकालिकः। तदा हि मगधेषु अजातशत्रोः पुत्रस्य दर्शकस्य शासनमासीत्। केचिद्दर्शकं विम्बसारज्येष्ठपुत्रमपि मन्यन्ते। कौटिल्यो हि चन्द्रगुप्तस्य विन्दुसारस्य प्रधानामात्यः, तेन हि कौटिल्यस्य समयः-300-215 मित विक्रमपूर्वकालाब्दान्तरालेऽनुमितः। चन्द्रगुप्तस्य समयः-272-241 वि0 पू0, बिन्दुसारस्य समयः 241-216 वि0 पू0 मन्यन्ते।

एभिः कारणैर्भासस्य प्राचीनता सिद्धा भवति। सा च प्रचीनता कालिदासादपि प्रचीनमिमं साधयन्ती 100 ई0 पूर्वमितं कालं भासस्य बोधयति।

महाकविः भासस्य रचना-

भासः संस्कृतसाहित्यस्य प्रथमनाटककारः विद्यते। तात्पर्यमिदं यत् सम्प्रति उपलब्धेषु नाटकेषु भासस्य एव नाटकापि प्राचीनतमानि। भासनाटकसंग्रहः नाटकचक्रनाम्ना प्रसिद्धः। त्रयोदशानां नाटकानां संक्षिप्तः परिचयः अधः प्रस्तूयते-

1. **प्रतिज्ञायौगन्धरायणम्**-अस्मिन् नाटके अङ्क-चतुष्टये वत्सराजस्य उदयनस्य उज्जयिन्याः राज्ञः प्रद्योतस्य राजदुहित्र्या वासवदत्तया सह प्रणयव्यवहारः चित्रितः। यौगन्धरायणस्य प्रतिज्ञया एव अस्य नामकरणं ' प्रतिज्ञायौगन्धरायणम्' वर्तते।
2. **स्वप्नवासवदत्तम्**-षष्ठाङ्कयुक्ते अस्मिन् नाटके प्रतिज्ञायौगन्धरायणस्य उत्तरवर्तिकथानकं विद्यते।
3. **अविमारकम्**-अस्मिन् नाटके षष्ठाङ्काः विद्यन्ते। अत्र सौवीरराजकुमारस्य कुन्तीभोजस्यपुत्र्या कुरङ्गया सह प्रणयलीलायाः चित्रणं वर्तते।
4. **प्रतिभानाटकम्**-सप्ताङ्के नाटकेऽस्मिन् रामजन्मनः वनगमनपर्यन्तं रामायणस्य कथानकं वर्णितम्।
5. **अभिषेकनाटकम्**-अस्मिन् नाटके षडङ्काः विद्यन्ते। अत्र किष्किन्धाकाण्डात् युद्धकाण्डपर्यन्तं रामायणस्य कथा वर्णिता वर्तते।
6. **मध्यमव्यायोगः**-एकाङ्कं नाटकमिदम्। भीमेन घटोत्कचात् ब्राह्मणपुत्रस्य रक्षणं वर्णितमस्ति। पुनश्च भीमस्य हिडिम्बया सह मिलनं भवति।
7. **पञ्चरात्रम्**-अङ्कत्रयात्मके नाटकेऽस्मिन् द्रोणाचार्यस्याग्रहेन दुर्योधनः पाण्डवेभ्यः राज्यं दातुं स्वीकरोति परञ्च यदि पञ्चरात्र्यान्तरे एव तेषां दर्शनं भविष्यति।

8. **दूतवाक्यम्**-एकाङ्कं नाटकमिदम्। अस्मिन् श्रीकृष्णस्य दौत्यकर्मणः वर्णनं विद्यते।
9. **दूतघटोत्कचम्**-एकाङ्कं नाटकमिदम्। अभिमन्योः मरणोपरान्तघटोत्कचस्य दौत्यकर्मणः वर्णनं विद्यते।
10. **कर्णभारम्**-एकाङ्कं नाटकमिदम्। अस्मिन् इन्द्राय कर्णेन कवचकुण्डलयोः वर्णनं विद्यते।
11. **ऊरुभङ्गम्**-एकाङ्कं नाटकमिदम्। अस्मिन् द्रौपद्याः अपमानस्य प्रतीकारार्थं दुर्योधनस्य उरुभङ्गस्य वर्णनं वर्तते। सम्पूर्णसंस्कृतसाहित्ये एतदेव दुःखान्तं नाटकं विद्यते।
12. **बालचरितम्**-पञ्चाङ्केऽस्मिन् नाटके श्रीकृष्णस्य बालचरितस्य वर्णनमस्ति।
13. **दरिद्रचारुदत्तम्**-अस्मिन् नाटके अङ्कचतुष्टयमस्ति। अत्र दरिद्रब्राह्मणचारुदत्तस्य वेश्यया वसन्तसेनया सह प्रणयव्यापारः चित्रितो वर्तते।

भासस्य नाट्कानाम् अनेकता विविधता च तस्य मौलिकतायाः नाट्यकुशलतायाः च परिचयं साधु ददाति। भासस्य सर्वाणि नाटकानि रंगमंचाय एव रचितानि विद्यन्ते। संस्कृतभाषायां एकाकी नाटकानां सर्वप्रथमं रचयिता भास एव। चरित्रचित्रणेऽपि कविकुशलः। भासस्य प्रकृतिचित्रणमपि सुन्दरं स्वाभाविकं चास्ति। अलङ्काराणां चयने नवरसानां चित्रणे च भासः सिद्धहस्तः। रसाभिव्यक्तौ भासस्य नाटकेषु शृङ्गारवीरकरुणत्रयाणां रसानां सुन्दरपरिपाको दरीदृश्यते। भासस्य कविता मनोवैज्ञानिकाकर्षणेन सहृदयानां मनांसि मोहयति।

महाकविः भासस्य काव्यशैली-

भासस्य भाषितभाषा प्रयोगः भाषासौष्ठवं, सरलाकिन्तु सरसा शैली, रसपरिपाकश्च शब्दाडम्बरशून्यता, कथा प्रवाहश्च सर्वे सम्भूय तं हि पण्डितयुगान्तितान्तान्तपूर्ववर्तिनं सूचयन्ति। भासस्य नाटकेषु कथानकस्य संघटनं चरित्रचित्रणं कथोपकथनं रससंयोजनं भाषा शैली च हृदयग्राहिणी आकर्षका उपयुक्ता समीचीना विद्यते।

• • •

8. मुरारिः-(900)

मुरारेः समयः-

संस्कृतकविषु मुरारेर्महती प्रतिष्ठा विद्यते। अस्य रचनायामतिशयोक्तेः प्राचुर्यं दृश्यते।

1. मुरारिः भवभूतेः परवर्तीति सिध्यति। एवं च रत्नाकर(855-884)पूर्ववर्तित्वं सिध्यति।
2. 1135 खीष्टाब्दे वर्त्तमानोऽथ श्रीकण्ठचरितरचयिता मङ्खः मुरारिं राजशेखरात् प्राचीनं मन्यते।
3. 800-960 वा 800-880 मितवैक्रमाब्दकाल एवास्य स्थितिकालत्वेनानुमितः।
4. डॉ. कीथस्य मतानुसारं मुरारि माहिष्मती(नर्मदातटे स्थित मान्धाता)इत्यस्य नृपस्य सभापण्डितः आसीत्।

इदं सर्वं विचार्य आचार्य श्रीरामचन्द्रमिश्रः कथितः-खीष्टनवमशतकपूर्वार्द्धे मुरारिरजायतेति प्रतीयते।

मुरारेः देशः-

कविवरो मुरारिः मौद्गल्यगोत्रस्य माहिष्मतीपुर/मङ्गलपुर वास्तव्यस्य वर्धमानाख्यस्यात्मजः। माताऽस्य तन्तुमती। असौ हि कलचुरिवंश्यस्य कस्यचिद्राज्ञः सभाकविरप्यासीत्। स तु कश्चिन्मैथिलो वा गौडीय आसीदिति विदुषां मतम्।

मुरारेः रचना-

श्रमसाध्ये मुरारिकृते सप्ताङ्कमये 'अनर्घराघवे' रामायणी कथावस्तुत्वेन उपाता। कथया एतद् नाटकं महावीरचरितेन साम्यं बिभर्ति। अस्य कविता प्रौढा साऽलङ्काराझङ्कारशालिनी च कथ्यताम्। विश्वामित्रस्य आगमनतः रावणवधानन्तरं, पुष्पकविमानेन अयोध्यापरावर्तनम्, रामराज्याभिषेकपर्यन्तं समस्तकथाः स्वनाटके 'अनर्घराघवे' चित्रिताः।

मुरारेः काव्यशैली-

असत्यामपि उपमाचमत्कृतौ सत्यामपि क्लिष्टतायां बन्धदार्ढ्येन सङ्गीतकृत्तमाधुर्येण चास्य कवित्वं रमणीयशैलीसम्पन्नं मन्यते। वस्तुवर्णने निपुणस्य मुरारिकवेर्भाषावैदुष्यं व्याकरणपाटवं चात्यन्तं चमत्करोति। मुरारिर्मूलतः अलङ्कारवादी कविः आसीत्।

• • •

9. महाकविःभवभूति-(700)

महाकविः भवभूतेः समयः-

संस्कृतभाषायां नाटकानां प्रणेतृषु प्रधानान्यतमस्य भवभूतेर्वास्तविकं नामधेयं श्रीकण्ठ इत्यासीत्। असारे खलु अस्मिन् संसारे नैव कोऽपि ईदृशः साहित्यानुरागी जनः येन नाटककारस्य महाकवेः भवभूतेः नाम न श्रुतम्। 'गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ' इति पद्यप्रणयनमूलकमस्य भवभूतिनाम्ना प्रथनं श्रूयते। हर्षचरिते बाणभट्टः भवभूतेर्नाम कीर्त्तयति, अष्टमशतकोत्पन्नो वामनश्च तदीयग्रन्थतः स्वग्रन्थे उदाहरणं ददाति। राजशेखरोऽपि भवभूतिं स्वपूर्वभवं प्रख्यापयति। भवभूति-बाण-वामन-मध्यवर्ती अर्थात् 750-800 मितवैक्रमाब्दान्तरालवर्ती काल एव स्थितिकालः इति पर्यवस्यति। अथवा बाणवाक्पतिराजयोरन्तराले तस्य स्थितिकालः। राजतरङ्गिण्याम्-

'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्॥'

इति निर्दिशन् कल्हणो भवभूतेर्यशोवर्मकालिकतां प्रत्येति, यशोवर्मा च 736 मिते खीष्टाब्दे धिर्यते स्म। एभिः साक्ष्यैर्भवभूतेः समयः (७००) सप्तमशतकासन्नः प्रतिपन्नः।

महाकविः भवभूतेः देशः-

एषः महाकविः दक्षिणभारते विदर्भस्थपद्मपुराभिजनः तैत्तिरीयशाखाध्यायी उदुम्बरवंश्यस्य श्रोत्रियविप्रवंश्यस्य काश्यपगोत्रीयस्य भट्टगोपाललाख्यस्य पौत्रः, नीलकण्ठाख्यस्य पुत्रः जातुकर्ण्याख्यायां जातः। सौभाग्यवशाद्भवभूतिर्हि- मालतीमाधवमहावीरचरितप्रस्तावनायां स्वपरिचयं प्रस्तौति। तस्य हि प्रारम्भिकं नाम श्रीकण्ठः पश्चाच्च भवभूतिः इत्याख्याया प्रसिद्धिः।

महाकविः भवभूतेः जीवनवृत्तम्-

संस्कृतनाट्यपरम्परायां भवभूतेः प्रवेशः सौभाग्याय समपद्यत। यद्यपि समालोचकाः 'उत्तररामचरिते भवभूतिर्विशिष्यते' इति समामनन्ति तथापि अस्य सर्वा अपि कृतयो विशिष्टा एव। भवभूतिः हि कान्यकुब्जेश्वरस्य यशोवर्मणः सभापण्डितः आसीदिति।

महाकविः भवभूतेः रचना-

1. उत्तररामचरितम्, 2. महावीरचरितम, 3. मालतीमाधवम् इति त्रिषु शृङ्गार-वीर-करुण-रसाः प्राधान्येनावलम्बिताः।

1. **उत्तररामचरितम्**-करुणरसमुख्यं नाट्यमिदं सप्ताङ्कम्। अत्र हि रामायणस्योत्तरकाण्ड सम्बद्धा कथा कविकल्पनाया समुन्नीय प्रस्तुताऽस्ति। सीतापरित्यागः, रामविलापः, लवकुशप्राप्तिः, सीतास्वीकारश्चास्येति वृत्तस्य मुख्यांशाः।
2. **महावीरचरितम्**-महावीरचरितं हि रामायणसम्बद्धं वीररसमुख्यं नाटकं सप्ताङ्काः सन्ति। अत्र हि रामायणस्यैव कथा स्वल्पपरिवर्तितरूपा चित्रिता।
3. **मालतीमाधवम्**-ग्रन्थोऽयं दशाङ्केषु विभक्तः प्रकरणसंज्ञको वृत्तस्यास्य कविकल्पितत्वात्। अत्र हि पद्मावतीनरेशस्य मन्त्रिणो भूरिवसोः पुत्र्या मालत्याः विदर्भराज मन्त्रिणो देवरातस्य सुतस्य माधवस्य च प्रेमकला वर्णिताऽस्ति। प्रकरणेऽस्मिन् मुख्योरसःशृङ्गारः, वीरो बीभत्सश्चाङ्गे।

महाकविः भवभूतेः काव्यशैली-

भवभूतिरतिभावुकः कविः। यदि भवभूतेः कृतिषु कालिदासकृतिसुलभं सौन्दर्यं माधुर्यं च दुरावापं तर्हि परिमितैः पदैर्वस्तुस्वरूपस्य वर्णने भवभूतिः कालिदासमप्यतिशेते। रसवर्णने कविः अद्भुतः। अत्रापि नाटके करुणरस एव मुख्यः रसः स्वीकृतः। शृंगारवीरादयोऽपि करुणरसस्यैव अंगरसाः सन्ति। अलंकारप्रयोगेऽपि महाकविः भवभूतिः कालिदासादीनां कोटौ समागच्छति। भवभूतेः भाषा सरला-तरला, स्वभाविकी चास्ति।

• • •

10. पण्डितराज जगन्नाथ-(1700)

पण्डितराज जगन्नाथस्य समयः-

पण्डितराज-जगन्नाथस्य अभ्युदयः काव्यशास्त्रे नव्यपरम्परोद्द्योतकः। पण्डितराजस्य-

स्थितिकालस्तु शाहजहानस्य सभापण्डितरुपेण स्वीक्रियते। शाहजहानश्च-1685 मितवैक्रमाब्दे इति पण्डितराजस्य वैक्रमसप्तदशशतकोद्भवत्वं प्रतीयते, 1698 मितवैक्रमाब्दे आसफअली महाशयस्य निधनानन्तरं पण्डितराजो देहली तत्याजेति जनश्रुतिः। तस्य जन्म 1655 मितवैक्रमाब्दमभितोऽनुमातुं शक्यते। 1700 मितवैक्रमाब्दमभितोऽप्पयदीक्षितः तनुं तत्याज तयोरपि समकालिकत्वं सिध्यति। पण्डितराजो हि 1720 मितवैक्रमाब्दपर्यन्तं जीवित एवाऽऽसीदिति तस्य आसफविलासतो ज्ञायते। आचार्य श्रीरामचन्द्रो स्व-संस्कृतसाहित्येतिहासे वर्णयति यत्-शाहजहां 1628 तः 1638 ई पर्यन्तं राज्यमकरोत्। अतो जगन्नाथस्य समयविषये कोऽपि संशयो नोदयते। शाहजहांनृपतेः पुत्रो दारासिकोहो जगन्नाथस्य पोषक आसीत्। पण्डितराज अप्पयदीक्षितस्य समकालीनः आसीत्।

पण्डितराज जगन्नाथस्य देशः-

पण्डितराजो हि तैलङ्गो ब्राह्मणः, पिताऽस्य पेरुभट्टो माता च लक्ष्मीदेवी। तैलङ्गदेशावयवमुनगुण्डाभिध ग्रामवासी वेजनतीजातीयो जगन्नाथो गोदावरीनामकमण्डलस्य भूषणमासीत्। तस्याभिजनं नाम 'उपद्रष्टा' इत्यासीत्। यथा-

तैलङ्गान्वय-मङ्गलालय-महालक्ष्मीदयालालितः,
श्रीमद् पैरमभट्टं सूनुरनिशं विद्वल्ललाटं तपः।
संतुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्णनम्,
श्रीमत्पण्डितराजपण्डित जगन्नाथो व्यधासीदिदम्॥

पण्डितराज जगन्नाथस्य जीवनवृत्तम्-

पण्डितराज जगन्नाथः सप्तदशखीष्टाब्दस्य मध्यभागे तैलङ्गदेशे(आधुनिक कर्णाटक प्रदेशे)समुत्पत्तिं लेभे। अयमान्ध्रवेगिनाड़िपरिवारस्य तैलङ्गो ब्राह्मणः आसीत्। जगन्नाथः वेदान्त-न्याय-वैशेषिक-पूर्वमीमांसा-व्याकरणादि विषयाणामध्ययनं स्वपितुः सविधे स्वपितुर्गरोः वीरेश्वस्य च सविधे अकार्षीत्। आचार्य श्रीरामचन्द्रमिश्रः स्व-संस्कृतसाहित्येतिहासे वर्णितवान् यत्- जगन्नाथः स्वाध्ययनविषयं स्वयं लिखति-

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत् सर्वविद्याधरो यः॥
पाषाणादपि पीयूषं स्यन्दते यस्य लीलया।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्॥

जगन्नाथः कस्यांचन यवनयुवत्यामासक्तो जातिच्युतो भूत्वा तामुपयेमे इति प्रवादो जगन्नाथस्य नाम्ना प्रचारिताभिः कविताभिरपि पुष्टिं नीयते। तस्यां मृतायां जगन्नाथो राजाश्रयं परित्यज्य मथुरामायातो यत्र तस्य 1674 ई0 वर्षे मृत्युरभवत्। मृत्योः पूर्वं स प्रायश्चित्तं कर्तुमपि सन्नद्ध आसीत् परं तत्काल- प्रसिद्धौ पण्डितौ भट्टोजिदीक्षिताप्पय्यदीक्षितौ नानुमेनाते। तत्र कारणं

तयोर्जगन्नाथेन सह शास्त्रीयमतभेद एवोच्यते। अयं परमोवैष्णव आसीत्। अयं स्वग्रन्थे दिल्लीश्वरस्य वदान्यतायाः वर्णनं कुर्वन् प्राह-

दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः।
अन्येन केनाऽपि नृपेण दत्तं शाकाय वा स्यात् लवणाय वा स्यात्॥

पण्डितराज जगन्नाथस्य रचना-

पण्डितराज जगन्नाथस्य अनेके ग्रन्थाज्ञाताः सन्ति। आचार्य श्रीरामचन्द्रमिश्रः स्व-संस्कृतसाहित्येतिहासे पण्डितराजस्य ग्रन्थसूचिः प्रदत्तः-

पण्डितराजस्य ग्रन्थाः-

क्र०सं. ग्रन्थः	श्लोकसंख्या	विषयः
1. गङ्गालहरी	52 द्विपञ्चाशत्	गङ्गास्तुतिः
2. सुधालहरी	32 द्वात्रिंशत्	सूर्यस्तुतिः
3. अमृतलहरी	11 एकादश	यमुनाप्रशस्तिः
4. करुणालहरी	64 चतुष्षष्ठि	विष्णुस्तुतिः
5. लक्ष्मीलहरी	41 एकचत्वारिंशत्	लक्ष्मीस्तुतिः
6. यमुनावर्णनचम्पू		नामव्याख्यातविषया
7. आसफविलासः		आसफखाँमहोदयस्य प्रशस्तिः
8. प्राणाभरणम्		कामरूपाधीशस्य प्राणनारायणस्य प्रशस्तिः
9. जगदाभरणम्		उदयपुराधीशराणाकर्णसिंहसूनोर्जगत्सिंहस्य प्रशस्तिः
10. चित्रमीमांसाखण्डनम्		अप्पय्यदीक्षितकृतचित्रमीमांसानामक-ग्रन्थालोचना
11. मनोरमाकुचमर्दनम्		सिद्धान्तकौमुदीटीकाया मनोरमायाः खण्डनम्
12. रसगङ्गाधरः		अपूर्णोऽतिप्रौढोऽलङ्कारशास्त्रग्रन्थः
13. भामिनीविलासः		कवितासङ्ग्रहः

अत्र रसगङ्गाधरः काव्यशास्त्रसम्बद्धोग्रन्थः। ग्रन्थेऽस्मिन् द्वे एव आनने दृश्यते। ग्रन्थश्चायमपूर्ण एव। अत्र हि काव्यस्वरूपं, काव्यभेदाः, रसविवेकः, शब्दगुणानां लक्षणं, अर्थगुणानां लक्षणं, भावलक्षणं, ध्वनिविवेकः, शक्तिविवेकः, अलङ्कारनिरूपणं च प्रतिपादितविषया।

पण्डितराज जगन्नाथस्य कविताशैली-

अस्य पण्डितराजस्य संस्कृतभाषायामुपरि प्रतिभापूर्णमाधिपत्यमासीत्। सः स्वकीयश्लोकेषु शब्दध्वन्याः एव भावाभिव्यक्तं कर्तुमशक्योत्। पण्डितराजस्य कविताया अद्भुतं चमत्कारित्वं विद्यते यदन्वयः सातिशयः स्फुटो भवति, कुत्रापि अन्वयस्यावश्यकता न भवति, रसपरिपाक श्च स्फीतो भवति। रसनिरूपणेऽनेन महती स्पष्टता सूक्ष्मता च प्रकटीकृता, माधुर्यादिनिरूपणमपि नितान्तनूतनं कृतम्। अलङ्काराणां लक्षणं सूत्रशैल्या निबध्य तद्भाष्यमपि नितान्तप्रौढं कृतम्। भामिनीविलासस्यान्ते तेनैवोक्तम्-

धुर्यैरपि माधुर्यैः द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम्।
वन्द्यैवमाधुरीयं पण्डितराजस्य कवितायाः॥

• • •

11. विश्वनाथः- (1400)

महाकविःविश्वनाथस्य समयः-

कविराजविश्वनाथस्य समयादिनिरूपणोपयोगि किमपि स्फुटतरं प्रमाणं नोपलभामहे,तथापि समुपलब्धानि कानिचन प्रमाणानि आधारीकृत्य तन्निरूपणे प्रवर्तामहे। तथा च साहित्यदर्पणस्य चतुर्थे परिच्छेदे कविरयं यवनाधिपति अल्लावुद्दीनखिलजीनामकसन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः। यथा-

'सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।
अल्लाबदीननृपतौ न सन्धिर्न च विग्रहः॥'

इति पद्येऽनेन अल्लाउदीनखिलजी' स्मृतो यो 1316 ई0 मृतः। एतेन श्लोकस्य माध्यमेन स्मरति यत् अल्लावुद्दीनखिलजीनामकस्य यवनाधिपतेः शासनकालः 1296 ईस्वीतः 1316 ईसवीं यावद् अभूत्। विश्वनाथः अल्लावुद्दीनस्य शासनकालस्य पश्चादेवाभूत्। साहित्यदर्पणस्य एका 1384 ईस्वयां लिखिता हस्तलिखिता प्रतिरपि समुपलब्धा वर्तते। अनया विश्वनाथस्य समयः 1384 ईसवीतो अर्वागेव निश्चीयते। अस्यमहाकवेः त्रयोदशशताब्द्याः उत्तरार्धमारभ्य चतुर्दशशताब्द्याः पूर्वार्द्धो भवितुमर्हति कालः।

महाकविः विश्वनाथस्य देशः-

विश्वनाथः उत्कलवासी समृद्धकुलसम्भवश्चासीत्। अस्य कुलं पाण्डित्ये प्रसिद्धम्। एतत्पित्रा चन्द्रशेखरेण प्रणीतम्-पुष्पमाला, भाषार्णवश्चेति ग्रन्थद्वयं प्रथते। एतत्पितामहभ्राता चण्डीदासः काव्यप्रकाशस्य दीपिकां नाम टीकां निरमात्। अलङ्कारजगति सर्वाधिको लोकप्रिय आलङ्कारिको वर्तते। अयं हि विद्वान् नारायणदासस्य पौत्रः श्रीचन्द्रशेखरपण्डितस्य तनूजन्माऽभवत्। सोऽयं विश्वनाथकविराजः प्रसिद्धं 'साहित्यदर्पणः' नाम ग्रन्थं निर्ममे इति तेन स्वयमेवाभ्यधायि-

श्रीचन्द्रशेखरमहाकविचन्द्रसूनु
श्रीविश्वनाथकविराजकृतं प्रबन्धम्।
साहित्यदर्पणममुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त॥ (सा0द0श्लो099)

महाकविः विश्वनाथस्य जीवनवृत्तम्-

विश्वनाथस्य 'अष्टादशभाषावारविलासिनीभुजङ्ग' इत्युपाधिर्नानाभाषाभिज्ञत्वं समर्थयति। अयमुत्कलीयः आसीत्। विश्वनाथः स्वपित्रा सह सम्भवतः कलिङ्गदेशस्य कस्याऽपि राज्ञः महत्त्वपूर्ण पदाधिकारिणावास्ताम्। उभावपि तत्र 'सन्धिविग्रहिक महापात्र' पदव्या विभूषितावास्ताम्।

विश्वनाथः वैष्णवधर्मावलम्बी आसीत्। नाम्नोऽन्ते 'कविराज' इत्युपाधिना विभूषितोऽयं महापात्र विश्वनाथः। अत्र विचार्यते-'कवीनां राजा' कविराजः इति व्युत्पत्त्याऽऽस्य कविष्वपि प्रमुखप्रतिपादनपरत्वमेवाभिव्यक्ति। विश्वनाथकविराजः अष्टादशभाषा ज्ञातवान् यथा तासु तासु तास्वपि भाषासु रमणीयान् गुणालङ्कारयुतान् भाषा पाठावबोधकप्रबन्धान् रचयितुं समर्थो बभूव। अतएव 'अष्टादशभाषावारविलासिनीभुजङ्ग' इति विशेषणेन संस्तूयते विद्वद्वरैः।

महाकविःविश्वनाथस्य रचना-

विश्वनाथस्य कृतिषु प्रसिद्धो ग्रन्थः साहित्यदर्पणः। अत्र काव्यस्य नाटकस्य च सर्वाङ्गीणं विवेचनं प्रस्तुतम्। विश्वनाथप्रणीताः नवसंख्याकाः ग्रन्थाः सन्ति। नवनवोन्मेषशालिन्या प्रज्ञायाः परिचयं ददाति। ते च सन्ति निम्नांकिता ग्रन्थाः-

1. राघवविलासमहाकाव्यम्।	2. चन्द्रकला(नाटिका)	3. प्रभावतीपरिणयम् (नाटकम्)
4. कुवलयाश्चरितम् (प्रकृतं काव्यम्)	5. प्रशस्तिरत्नावलिः	6. नरसिंहविजयः (खण्डकाव्यम्)
7. कंसवधम्(काव्यम्)	8. साहित्यदर्पणः	9. काव्यप्रकाशदर्पणः (काव्यप्रकाशस्य व्याख्या)

महाकविःविश्वनाथस्य (8) साहित्यदर्पणः-अस्मिन् ग्रन्थे दशसंख्य : परिच्छेदाः सन्ति। अत्र काव्यस्य नाट्यस्य च सर्वाङ्गीनं विवेचनं प्रस्तुतम्। अस्य लेखकस्य प्रमुखकाव्यशास्त्रीयग्रन्थः साहित्यदर्पणोऽस्ति। अस्य ग्रन्थस्य प्रमुखवैशिष्ट्यमिदमस्ति यद् अस्मिन् ग्रन्थे श्रव्यदृश्ययोरुभयोरपि काव्ययोः वर्णनमास्ते। अतएव सम्पूर्णस्य काव्यशास्त्रस्य प्रतिनिधिभूतोऽयं ग्रन्थो वर्तते।

महाकविः विश्वनाथस्य कविताशैली-अस्य विलक्षणकाव्यप्रतिभां परिलक्ष्यैव त्रिकलिङ्गेश्वरेण सुप्रीतमनसोपाधिरयं प्रादायीति-

'धम्मिले नवमल्लिकासमुदयो हस्तेसिताम्भोरुहे-
हारः कण्ठतटे पयोधरयुगे श्रीखण्डलेपो घनः।
एकोऽपि त्रिकलिङ्गभूमितिलक त्वतीर्त्तिराशिर्ययौ-
नानामण्डनतां पुरन्दरपुरीवामभ्रुवां विग्रहे॥

अतिगहनव्याकरणदर्शनादितत्तच्छास्त्राणां प्रकर्ष पाण्डित्यस्य परिचायिकः शास्त्रीयप्रबन्ध साहित्यदर्पण एव दर्शनीयोऽस्ति।

• • •

12. मम्मटः- (1100)

मम्मटस्य समयः-

काव्यप्रकाशकर्त्ता मम्मटः वाग्देवतावतारः ध्वनिप्रस्थापनपरमाचार्यश्चोच्यते। अस्य समयः (1100) एकादशशतकस्य चरमभागः। अस्य स्थितिकालस्य पूर्वसीमा तु भोजसमय एव अर्थात् 1020-1110 मितवैक्रमाब्दभित-कालः। तेन हि सामान्यतः 1050-1130 मितवैक्रमाब्दभितो मम्मटस्य स्थितिकालः सिध्यति। स हि प्रायो भोजसमकालिको वा किञ्चिन्मात्रोत्तरकालवर्ती। मम्मटस्य विद्वत्तां प्रमाणयितुं तत्काव्यप्रकाशः एवालम्।

मम्मटस्य देशः-

मम्मटः काश्मीरवासी भोजराजात् परवर्त्ती च। अस्यानुजौ कैयटोव्वटौ इति प्रसिद्धिम्। भोजराजस्य दानशौण्डत्वं प्रशंसितम्, मम्मटस्य पिता जैयटाख्यः आसीदिति सुधासागरकारेण भीमसेनोक्तम्, किन्तु अन्वटस्तु आत्मानं वज्रटाख्यस्य पुत्रं मन्यते तेन स हि तस्य पितृव्यपुत्रः सम्भवति। जैयटवज्रटौ हि भ्रातरौ ययोः प्रथमस्य मम्मटकैयटावपरस्य उन्वटः पुत्रः। मम्मटस्य पुत्रो हि अल्लटः इति केषाञ्चिन्मतम्।

मम्मटस्य जीवनवृत्तम्-

काव्यप्रकाशो हि काव्यालङ्कारग्रन्थः। सर्वाङ्गपूर्णालङ्कारशास्त्रप्रणयणे हि मम्मटाचार्यः प्रथम आचार्यः। मम्मटस्य रचना-मम्मटाचार्यस्य प्रमुखरचना काव्यप्रकाशः काव्यशास्त्रजगति तरुणभास्कर एव। स हि काव्यशास्त्रस्य सहस्राब्दार्जितानुभवं संगृह्णति। तत्र हि क्रमेणकाव्यहेतु-काव्यलक्षण- काव्यफल- काव्यभेद-शब्दशक्ति- ध्वनिविवेकगुणीभूतव्यङ्ग्य-काव्यदोष-काव्यगुण-शब्दार्थालङ्कारा निरूपिता दशसूल्लासेषु। मम्मटात्पूर्वं काव्यशास्त्रस्य क्षेत्रे ये सिद्धान्ताः निर्धारिता अभूवन् तेषां सर्वेषां सिद्धान्तानां विवेचनं कुर्वन् काव्यस्वरूपस्य तस्याङ्गानां च विशदं विवेचनमकरोत् काव्यप्रकाशे मम्मटाचार्यः। राजानकमम्मटभट्टस्य पाण्डित्येन प्रायः सर्वे एव टीकाकारा मुग्धाः सन्ति।

मम्मटस्य रचना- राजानकमम्मटभट्टस्य सुप्रसिद्धः पाण्डित्यपूर्णो ग्रन्थः 'काव्यप्रकाशः' वर्तते। अन्योऽप्येकः 'शब्दव्यापारविचारः' इत्याख्यो ग्रन्थः पुण्यपत्तन(पूना)स्थदक्षिणकाजेल संज्ञकसंस्थातः प्रकाशितः समुपलभ्यते। काव्यप्रकाशग्रन्थो मम्मटेन परिकरालङ्कारपर्यन्त एव रचितः। अवशिष्टस्तु अल्लटसूरिणा पूरित इति टीकाकृतां प्रवादः। तथाहि ते समुदीरयन्ति-

कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः।
प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा॥

काव्यप्रकाशे दश उल्लासाः सन्ति। अत्र ध्वनिविरोधिनां मतं खण्डयित्वाऽयमाचार्यः सुचारुरूपेण ध्वनिनिरूपणं तथाकृतवान् यथा तत्परवर्त्तिनः कस्याप्याचार्यस्य ध्वनिविरोधे साहसो नाभूत्। अत एव हि एष मम्मटः 'ध्वनिप्रस्थापनपरमाचार्य' इत्युपाधिनाऽलङ्कृतोऽवान्तरविद्वद्भिः। अस्य ग्रन्थस्य त्रयोंशाः कारिकावृत्तिरुदाहरणञ्चेति। अस्य ग्रन्थस्य कारिकैव सूत्रनाम्ना व्यपदिश्यते। अनेन कारिकाः काश्चित् भरतस्यापि गृहीताः शेषाः स्वयं

रचिता:,वृत्तिस्तु स्वीया एव,उदाहरणानि परेषामदीयन्त। मम्मटाचार्येण केवलं नाट्यशास्त्रं विहाय काव्यशास्त्रस्य सर्वेषां विषयाणां केन प्रकारेण विवेचनं कृतमास्ते। अस्य विवेचनस्य क्षेत्रमपि व्यापकमस्ति। अन्येभ्यो लेखकेभ्य: प्राय: 620 श्लोकान् गृहीत्वा स्वमतस्यायं स्पष्टीकरणमकरोत्। प्राचीनाचार्याणां मतस्याप्यनेन खण्डनं कृतम्। काव्यप्रकाशस्य टीकानां संख्या भूयसी वर्तते। प्राचीनकाले काव्यप्रकाशस्य टीकाकरणं वैदुष्यस्य मानदण्ड: अवर्त्तत।

मम्मटस्य कविताशैली-

यावन्मम्मटस्योदयो नाजायत तावत्काले ध्वनिविरोधिनां शिरांस्युदनमन्, ध्वनिविरोधिनो ग्रन्था अरचिषत, परं मम्मटेन ध्वनिविरोधिनस्तथाऽधिक्षिप्ता यथा पुनस्ते ध्वनिं विरोद्धुं साहसं नाकुर्वन्। परिमितशब्दावल्या सुविस्तृतविषयप्रतिपादनमेव मम्मटस्य वैशिष्ट्यम्।

• • •

13. आनन्दवर्धन:-(900)

आनन्दवर्धनस्य समय:-

आनन्दवर्धनो हि काव्यशास्त्राकाशे सर्वसमुज्ज्वलं नक्षत्रम्। अयमानन्दवर्धनाचार्यो ध्वनिसम्प्रदायस्य संस्थापक आचार्यो वर्तते। काव्यजगति तस्य ध्वन्यालोकस्य प्रवेश: सुमहत् सौभाग्यमाधत्ते। आनन्दवर्धन: काश्मीरक्षितिपालस्य अवन्तिवर्मेण: सभापण्डित आसीत्। तस्य स्थितिकालो राजतरङ्गिणी-

मुक्ताकण: शिवस्वामी कविरानन्दवर्धन:।
प्रथां रत्नाकरञ्चागात् साम्राज्येऽवन्तिवर्मण:।।' (5/4)

काश्मीराधिपते: अवन्तिवर्मण: समय: 855 ईसवीत: 883 ईसवीयं यावत् स्वीक्रियते। आनन्दवर्धनोऽपि तत्कालिक:। केचित्तु आवन्तिवर्मा हि 910-941 मितवैक्रमाब्दानभित: सिंहासनासीन आसीत्। तेन आनंन्दवर्धनोऽपि-880-950 मितवैक्रमादानभित: स्थितिकाल: अनुमीयते। अत एवानन्दवर्धनाचार्यस्य कालो नवम: शताब्द: स्वीक्रियते। आनन्दवर्धनाचार्यस्य पञ्चग्रन्था: प्रख्याता: सन्ति। तेषु पञ्चसु ख्यातग्रन्थेषु ध्वन्यालोकेनैवानन्दवर्धनस्य प्रख्यातिरास्ते। अस्मिन् ध्वन्यालोकग्रन्थे आनन्दवर्धनाचार्य: प्रत्यपीपदत् यत् ध्वनिरेव काव्यस्यात्मा वर्तते।

आनन्दवर्धनस्य देशश्च-अस्याचार्यस्य पितुर्नाम 'नोण:' इत्यासीत्। इति एतत् प्रणीतात् 'देवीशतक' पुस्तकात् ज्ञायते। अयं काश्मीरेषु खीष्टाब्दीय नवमशतकोत्तरार्द्धे 'अवन्तिवर्म'नाम्नोमहीपते राज्यसमये प्रसिद्ध आसीदिति 'राजतरङ्गिणी' ग्रन्थाज्ज्ञायते।

आनन्दवर्धनस्य जीवनवृत्तम्-

रसो न वाच्य इति साधयितुं प्रवर्त्तमान आचार्य आनन्दवर्धनो ध्वनेरावश्यकतामनुभूय ध्वनिसम्प्रदायं प्रवर्त्तितवान्। आनन्दवर्धनात्पूर्वं ध्वनेरभाववाद:, लक्षणास्वरूपतावाद:, अनिर्वाच्यतावादश्च प्रथते स्म। अयं ध्वनिवाद: सर्वाधिकव्यवस्थिमरूपेण प्रचरित:।

आनन्दवर्धनस्य रचना-

ध्वन्यालोके त्रयोऽशाः-कारिकाः, वृत्तयः, उदाहरणानि च। अत्रग्रन्थे 129 कारिकाः। तत्रहि चत्वार-उद्द्योताः, प्रथमे हि उद्द्योते ध्वनिप्रतिष्ठापना, द्वितीये-व्यङ्ग्यमुखेन ध्वनिस्वरूपविवेकः, तृतीये तु व्यञ्जनकमुखेन तत्स्वरूपविवेक, चतुर्थे तु ध्वनिव्युत्पादनप्रयोजनं चेति निरूपितविषयाः। उत्तरवर्ति साहित्येषु ध्वनिकाररूपेणानन्दवर्धन एव गृहीतो दृश्यते। इदं विश्वस्यते यत्कारिकाभागोऽस्य काव्यालोकसंज्ञितोऽनिर्णीत कर्तृको वृत्तिभागस्तु ध्वन्यालोकसंज्ञित आनन्दवर्धनप्रणीत इति। ग्रन्थोऽयं कारिकारूपो ध्वनिनामा, परिकरश्लोक- संग्रहश्लोकसंक्षेप-श्लोकघटितवृत्तिरूपश्चालोकनामेति भागद्वयभाक्,ध्वन्यालोकः सहृदयालोकः काव्यालोकश्चेति संज्ञात्रयभाक् चेति। ध्वन्यालोकोऽयं यथाजीर्णेऽपि वृक्षे मधुमासे समागते वासन्ती श्रीरभिव्याप्ता भवति तथैव ध्वने-रसस्य च सम्बन्धेन पूर्वकविभिः वर्णितेष्वपि प्राचीनकविकाव्येष्वेव सौदर्यमभिव्याप्यते। ध्वन्यालोकातिरिक्ताः। विषबाणलीला, अर्जुनचरितम्, देवीशतकम् इति त्रयोऽस्य कविता ग्रन्थाः प्रथन्ते।

आनन्दवर्धनस्य काव्यशैली- अयमाचार्यस्य कवित्वशक्तिरपि विलक्षणा वर्तते। एतस्य महाकवेर्नाम काव्यशास्त्रेतिहासे सुवर्णाक्षरेणाङ्कितुं योग्यं रसगङ्गाधरकृतास्तु सत्यमेवेदं कथ्यते यदयमानन्दवर्धनः साहित्यशास्त्रस्य मार्गं परिष्कृतवानिति। तथाहि-'ध्वनिकृतामालङ्कारिक-सरणि-व्यवस्थापकत्वादिति'।

• • •

14. उद्भटः/भट्टोद्भटो वा-(900)

उद्भटः/भट्टोद्भटो वा इत्यस्य समयः-

काव्यालङ्कारशास्त्रपरम्परायां भट्टोद्भट्टस्य काव्यालङ्कारसारसंग्रहः सगौरवं स्थानं गृह्णाति। स हि कश्मीरकस्य जयापीडाख्यस्य राज्ञः सभापतिरासीदिति। तेन हि भट्टोद्भटोऽपि वामनसमकालिको वा तस्माक्तिञ्चिज्ज्येष्ठः। तस्य समयः 810-880 मितवैक्रमाब्दानभितः स्थितिकालः।

उद्भटः/भट्टोद्भटो वा इत्यस्य देशः-'उद्भट'नाम श्रवणेन ज्ञायते यत् अयं महानुभावः काश्मीरवासी आसीत्। कैयट,जैलट,मम्मट,अल्लट,झल्लट, कल्लट एतादृशनाम कश्मीरदेशे एव भविष्यन्ति। राजतरंगिणी ग्रन्थे कल्हणः लिखति यत् उद्भटः जयापीड़स्य सभापति आसीत्। तस्य दैनिक-वेतनः एकलक्ष-दीनारः आसीत्। यथा-

विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः॥

उद्भटः/भट्टोद्भटो वा इत्यस्य जीवनवृत्तम्-अस्य महानुभागस्य जीवनवृत्त सम्बधे ध्वन्यालोकस्य रचयिता आनन्दवर्द्धनाचार्यः स्वग्रन्थे(108 पृ0) लिखति-''अन्यत्र वाच्यत्वेन प्रसिद्धो यो रूपकादिरलंकारः सोन्यत्र प्रतीयमानतया बाहुल्येन प्रदर्शितस्तत्रभवद्भिर्भट्टोद्भटादिभिः'' तथा च रुय्यकः व्यक्तिविवेकस्य टीका (पृ03)लेखनक्रमे लिखति-'इह हि

चिरन्तनैरलंकारतन्त्रप्रजापतिः भट्टोद्भटप्रभृतिभिः शब्दधर्मा एवालंकाराः प्रतिपादिता नाभिधाधर्मा'' एवं च पण्डितराज जगन्नाथः स्वकथनस्य समर्थने उल्लेखयति-''अत्राहुरुद्भटाचार्याः। येन नाप्राप्ते य आरभ्यते स तस्य बाधक इति न्यायेनालंकारान्तरविषय एवायमाभारायमाणोऽलंकारान्तर बाधते'' इत्यादयः।

उद्भटः/भट्टोद्भटो वा इत्यस्य रचना-

तस्य हि त्रयो ग्रन्थाः प्रसिद्धाः 1.भामहविवरण्म्, 2.कुमारसम्भवकाव्यम्, 3. काव्यालङ्कारसारसग्रहश्च। सम्प्रति भट्टोद्भटस्य एक एव ग्रन्थो लभ्यते 'काव्यालङ्कारसारसग्रहो नाम। अयं ग्रन्थः षट्सु भागेष्वलङ्कारान् विभज्य पठति। तत्र 79 कारिकाः सन्ति।

उद्भटः/भट्टोद्भटो वा इत्यस्य काव्यशैली-उद्भटः अलंकारसम्प्रदायस्य प्रमुखः आचार्यः आसीत्। ''अर्थभेदेन तावच्छब्दा भिद्यन्ते इति भट्टोद्भटस्य सिद्धान्तः।'' उद्भटः शब्दश्लेष-अर्थश्लेषौ अर्थालंकार एव मन्यते। भट्ट उद्भटः महान-विद्वान् एवं च धुरन्धर-अलंकारिकः आसीत्।

• • •

15. कुन्तकः-(1100)

कुन्तकस्य समयः-

कुन्तकः काश्मीरवासी आसीत्। तस्य स्थितिकालः (1100)एकादशशतकप्रारम्भसमुद्भवश्च। राजशेखरमहिमभट्टयोरन्तरालवर्त्ती कुन्तक इति पूर्वोक्तसमये साक्षीभूतम्। स हि आनन्दवर्धनमतमुल्लिखतीति इयमेव तस्य स्थितिकालस्य पूर्वसीमा। महिमभट्टो हि तं नामत एव गृह्णाति इति तस्यावरसीमा। तेन कुन्तको हि काश्मीरो वैक्रमदशमशतकोत्तरार्द्धभवः। राजशेखरस्तं नैव स्मरतीति कुन्तकस्य तत्परवर्तित्वं स्पष्टमेव। व्यक्तिविवेककारोमहिमभट्टः स्वकीयेग्रन्थे कुन्तकस्योल्लेखमकार्षीत्। यथा-

काव्यकाञ्चनकषाश्ममानिना कुन्तकेन निजकाव्य लक्ष्मणि।
यस्य सर्वनिरवद्यतोदिता श्लोक एष स निदर्शितो यथा॥

कुन्तकस्य देशः-कुन्तकः काश्मीरिको विद्वान् आसीत्।

कुन्तकस्य जीवनवृत्तम्-'वक्रोक्तिं काव्यजीवितम्' इति वदन्नसौ वक्रोक्तिजीवितन्नाम ग्रन्थं न्यबध्नादित्यसौ' वक्रोक्तिजीवितकारः इति नाम्नैव सर्वत्र विख्यातोऽभूत। अत एव कुन्तकेन वक्रता वैचित्र्यरूपेण तथा वैदग्ध्यभङ्गी भणितिरूपेण वर्णिता। वक्रोक्तेर्व्यापकतानयनाय कविना षड्विधा वक्रोक्तिरङ्गीकृता। कुन्तकानुसारेण वक्रोक्तिरेव काव्यस्यात्मा भवति।

कुन्तकस्य रचना-

ध्वनिप्रस्थानस्य ध्वन्यालोकतल्लोचनाभ्यां परिष्कृतत्वकऽपि तद्विरोधाय कुन्तकः 'वक्रोक्तिजीवितम्' नाम वक्रोक्तिसम्प्रदायस्य मुख्यं ग्रन्थं निबबन्ध। वक्रोक्तिजीवितमपूर्णमेव लभ्यते। अत्र चत्वार उन्मेषा येषु वक्रोक्तेः प्रभेदानां साङ्गोपाङ्गवर्णनं कृतम्। वक्रोक्तिष्वेव

ध्वनेरपि समावेश इत्यस्य मार्गस्य प्रधानं वक्तव्यम्। कुन्तको हि वक्रोक्तिमेव काव्यसर्वस्वं मन्यते। ''वैदग्ध्यभङ्गिभणिति रेव वक्रोक्तिः।'' सा च षड्विधा-1.वर्णविन्यासवक्रता, 2. पदपूर्वार्धवक्रता, 3.प्रत्ययाश्रयवक्रता, 4.वाक्यवक्रता, 5.प्रकरणवक्रता, 6.प्रबन्धवक्रतेति।

वक्रोक्तिजीवितस्य त्रयो भागाः सन्ति-1.कारिकाभागः,2.वृत्तिभागः,3.उदाहरणभागश्चेति। कारिकावृत्ती उभे कुन्तकलिखिते वर्तेते। उदाहरणानि च प्रसिद्धेभ्यः काव्यग्रन्थेभ्यः सङ्गृहीतानि सन्ति।

कुन्तकस्य काव्यशैली-ग्रन्थकृता हि सर्वेषामलङ्काराणां वाक्यवक्रतायामेवान्तर्भावो दर्शितः-तथा चोक्तम्-

वाक्यस्य वक्रभावोऽन्यो विद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।। (1.21)

रसस्यान्तर्भावस्तु प्रेय-ऊर्जस्विनोरलङ्कारयोर्मध्ये कृतोऽस्ति। समस्तसाहित्यिकतत्त्वानि सम्मिलितानि कृत्वा कुन्तकेनैतादृशविदग्धतायाः परिचयोदत्तः,येन मर्मज्ञा साहित्यिका सर्वदानुरक्ता एव स्थास्यन्तीति। आचार्यकुन्तकस्यैक एव वक्रोक्तिजीविताऽभिधानो ग्रन्थो वर्तते। किन्त्वनेनैव ग्रन्थेन कुन्तकः प्रख्यातः परां काष्ठामचुम्बत्। साहित्यसौदामिन्यभिधाने गोपालभट्टः कुन्तकस्य प्रशंसायां लिखति-

वक्रानुरञ्जिनीमुक्तिं शुक इव मुखे वहन्।
कुन्तकः क्रीडति सुखं कीर्त्तिस्फटिकपञ्जरे।।

• • •

16. क्षेमेन्द्रः-(1100)

क्षेमेन्द्रस्य समयः-

काश्मीरराजस्य अनन्तस्य सभापण्डितः क्षेमेन्द्रः, अनन्तस्य शासनकालः 1027 ईशवीतः 1064 ई0 पर्यन्तम्, अतः क्षेमेन्द्रस्य समयः 1100 एकादशशतकमिति निश्चित्य वक्तुं शक्यते। विभिन्नविषयाणां राशिलेखको महाकविः क्षेमेन्द्रः काश्मीर देशे जनिं लेभे। अयं हि अलङ्कजगति औचित्यसम्प्रदायस्य संस्थापकरूपेण प्रख्यातो वर्तते।

क्षेमेन्द्रस्य देशः-

क्षेमेन्द्रः काश्मीरदेशवासी आसीत्। व्यासदासापरनामा क्षेमेन्द्रः प्रकाशेन्द्रस्य पुत्रः सिन्धोः पौत्रः चासीत्। क्षेमेन्द्रस्य पिता प्रकाशेन्द्रः ब्राह्मणानां संरक्षकः आसीत्। क्षेमेन्द्रो लिखति-

आसीत् प्रकाशेन्द्र इति प्रकाशः काश्मीरदेशे त्रिदिशेश्वरश्रीः।
अभूद्गृहे यस्य पवित्रसत्रमच्छिन्नमग्रासनमग्रजानाम्।।
यः श्री स्वयंभूभवने विचित्रे लेप्यप्रतिष्ठापितमातृचक्रः।
गोभूमिकृष्णाजिनवेश्मदाता तत्रैव काले तनुमुत्ससर्ज।।

क्षेमेन्द्रस्य जीवनवृत्तम्-

क्षेमेन्द्रः प्रथमं शैवः आसीत्परन्तु पश्चात् सोमाचार्यप्रभावात् वैष्णवः समजायत। तस्य शास्त्रगुरुः अभिनवगुप्तः आसीत्। क्षमेन्द्रस्य चापरं नाम व्यासदासः' आसीत्। क्षेमेन्द्रः काश्मीरराजस्य अनन्तस्य सभापण्डित आसीत्। अनन्तस्य शासनकाले असन्तोष-षड्यन्त्र-नैराश्य-रक्तपातानां बाहुल्यमासीदतः कोमलकवितायाः कृते तद्युगमयुक्तमासीत्, तथापि क्षेमेन्द्रः स्वदेशवासिनः सत्पथमानेतुं प्रयस्यन्निव बहूनुपदेशप्रचुरान् ग्रन्थान्निर्बबन्ध। अस्य परिवारः अति सम्पन्नश्चासीत्। पिता च दानी तथोदारश्चासीत्। अस्मिन् विषये दशावतारचरितस्यान्ते द्वितीयः श्लोकः दर्शनीयः-

काश्मीरेषु बभूव सिन्धुरधिकः सिन्धो श्च निम्नाशयः,
प्राप्तस्तस्य गुणप्रकर्षयशसः पुत्रः प्रकाशेन्द्रताम्।
विप्रेन्द्रप्रतिपादितान्नदानधनभूगोसङ्घकृष्णाजिनैः,
प्रख्यातातिशयास्य तस्य तनयः क्षेमेन्द्रनामाऽभवत्॥

क्षेमेन्द्रस्य रचना-

क्षेमेन्द्रस्य प्रवेशेन औचित्यविचारसम्प्रदायः काव्यशास्त्रं समारब्धः। क्षेमेन्द्रप्रणीतत्वेन बहवो ग्रन्था निर्दिष्टाः सन्ति। आचार्य श्रीरामचन्द्रमिश्रः स्व-संस्कृतसाहित्येतिहासे 57 पृष्ठोपरि क्षेमेन्द्रस्य कृतयः प्रदत्तः, येषु कति नाममात्र शेषाः,कति श्रूयन्ते प्राप्यन्ते च। परञ्च संस्कृतकाव्यशास्त्रेतिहासस्य रचयिता आचार्य जगदीशचन्द्र मिश्रः उल्लेखयति यत् क्षेमेन्द्रः प्रायः(40)चत्वारिंशत्संख्याकानां ग्रन्थानां प्रणयनमकरोत्। तेन निम्नलिखिताः ग्रन्थाः प्रणीताः-

1. शशिवंशमहाकाव्यम्,	2. अमृतरङ्गकाव्यम्,	3. अवसरसारः,
4. मुक्तावली,	5. लावण्यवती,	6. देशोपदेशः,
7. पवनपञ्चाशिका,	8. पद्मकादम्बरी	9. अवदानकल्पलता,
10. नीतिकल्पतरुः,	11. लोकप्रकाशकोशः,	12. सेव्यसेवकोपदेशः,
13. विनयवल्ली,	14. दर्पदलनम्,	15. कविकण्ठाभरणम्,
16. रामायणमञ्जरी,	17. भारतमञ्जरी,	18. वृहत्कथा-मञ्जरी,
19. समयमातृका,	20. दशावतारचरितम	21. चित्रभारतनाटकम्
22. कविकर्णिका	23. नृपवती(राजवती)	24. कर्ममाला
25. वात्सायनसूत्रसारः	26. विनयवती	27. बौद्धावदानकल्पलता
28. नीतिकल्पलता	29. क्षेमेन्द्रप्रकाशः	30. कनकजानकी
31. व्यासाष्टकम्	32. चतुर्वर्गसंग्रह	33. कलाविलासः
34. औचित्यविचारचर्चा	35. सुवृत्ततिलकम्	36. चारूचर्या
37. मुनिमतमीमांसा	38. नीतिमाला	

राजतरङ्गिण्याम्(1/13) क्षेमेन्द्ररचितनृपावल्यारुल्लेखः समायाति-

केनाऽप्यनवधानेन कविकर्मणि सत्यऽपि।
अंशोऽपि नास्ति निर्दोषः क्षेमेन्द्रस्य नृपावलौ।।

क्षेमेन्द्रस्य कविताशैली-

क्षेमेन्द्रस्य अवदानकल्पलता सार्धशतवर्षाभ्यन्तर एव तिब्बतभाषाऽनुवादावसरं लेभे इति क्षेमेन्द्रस्य धार्मिकोदारतायाः सुन्दरकाव्यशैल्याश्च प्रबलं प्रमाणम्। क्षेमेन्द्रस्य भाषा मधुरा, सरसा सुबोधा चासीत्। उदाहरणमेकं यथा-

'दयितजनवियोगोद्वेगरोगातुराणां विभववियहदैन्यम्लायमाननानानाम्।
शमयति शितशल्यं हन्त नैराश्यनश्यद्भवपरिभवतान्तिः शान्तिरन्ते वनान्ते।।

• • •

17. विशाखदत्तः-(500)

विशाखदत्तस्य समयः-

राजनीतिगर्भितरूपकप्रणेतृष्वस्य द्वितीयं स्थानम्, अस्य 'मुद्राराक्षसं' नाम रूपकं प्रसिद्धमस्ति। कवेरस्य स्थितिकालविषयेऽपि पण्डितेषु नैकमत्यं दृश्यते। केचिदमुं प्रथमचन्द्रगुप्तसमकालिकमत्वा (377-392)वैक्रमचतुर्थशतकोत्तरार्द्धभवं मन्यन्ते, अपरे तु द्वितीयचन्द्रगुप्तसमकालिकं मत्वा तं वैक्रमपञ्चमशतक(432-471)मध्यवर्तिनं मन्यन्ते। जायसवालस्तु- 375-413 खीष्टाब्दकाले आसीदिति तत्रैव काले विशाखदत्तस्य समयः इति मन्यते। 'आवन्तिवर्मा' एकः काश्मीरकः, अपरञ्च कान्यकुब्जशासिता मौखरिवंश्यः। अस्यैव पुत्रो ग्रहवर्मा महाराजहर्षवर्धनस्य भगिनीं राज्यश्रियं नाम परिणीतवान्। अस्यैव समये विशाखदत्तो मुद्राराक्षसं विरचितवानिति मतमेव इतिहाससमर्थितम्। यतोऽत्रैव काले हूणानामुपद्रवः पश्चिमोत्तरभारतेऽजायत। इयं घटना 582 खीष्टाब्दसमीपे जाता, अतो मुद्राराक्षसस्य प्रणयनकालः षष्ठशताब्दी सिद्ध्यति।

विशाखदत्तस्य देशः-

विशाखदत्तः स्वं सामन्तवटेश्वरदत्तपौत्रं महाराज नदभाजः पृथोः सुतं कथयति।

विशाखदत्तस्य जीवनवृत्तम्-

स्वग्रन्थप्रस्तावनायां दत्तेन परिचयेन कवेरस्य राजवंशोद्भवत्वं प्रकाश्यते, अत एव चास्य राजनीतिनिपुणत्वं स्वाभाविकम्। विशाखदत्तो राजनीतौ निपुणो दर्शने ज्यौतिषे च कृताधिकारः प्रतीयते।

विशाखदत्तस्य रचना-

विशाखदत्तस्यैकमेव 'मुद्राराक्षसं' नाम नाटकमस्य स्थानं नाटककारेषु प्रधानं प्रमापयति। मुद्राराक्षसस्य विशिष्टताविषये स्वग्रन्थे आचार्यप्रवरः श्री रामचन्द्रमिश्रः स्व-संस्कृतसाहित्येतिहासे कथयति- असत्यामपि शृङ्गारकथायामसत्यपि च प्रणयव्यापारकलापे नाटकमिदमलौकिकेन सरलत्वेनामूलमाचूलं चाप्यायित्वे वर्त्तते। ओजोगुण एवात्र तथा समृद्धो यथा समाजिकमनोरञ्जनाय

वस्त्वन्तरं नापेक्षते। स्त्रीपात्रयाभावे विदूषकस्य चाभावे सत्यपि यदिदं नाटकमेतावत्सरसं जातं तदस्य रचयितुः काव्यकलाप्रवीणतायाः परमं प्रमाणम्।

विशाखदत्तस्य चत्वारि रूपकाणि प्रमितानि सन्ति। 1.मुद्राराक्षसम्, 2.देवीचन्द्रगुप्तम्, 3. अभिसारिकचञ्चितकम्, 4.राघवनन्दम् इति।

विशाखदत्तस्य काव्यशैली-

मुद्राराक्षसस्य शैली विलक्षणतमा,अलङ्काराणां प्रयोगेऽपि हृद्यतमः। मुद्राराक्षसस्य नायकश्चन्द्रगुप्त श्चाणक्यो वेति विचारविषयः। प्रधानफलाश्रयतया चन्द्रगुप्तं कथातन्तुसञ्चालनप्रधानतया चाणक्यमेव नायकं स्वीकुर्वन्ति। सुघटितकथावस्तुयोजनायां व्यक्तित्वपूर्णपात्रचरित्रचित्रणे, ओजस्विवातावरणोपन्यासे च नाटमिदमद्वितीयमिति सर्वसम्मतम्।

• • •

18. शूद्रकः-(खृष्टपूर्वं 400.500)

शूद्रकस्य समयः-

संस्कृतसाहित्ये शूद्रकस्य महती प्रसिद्धिः। वेतालपंचविंशतिकायां, कादम्बर्यां, कथा-सरित्सागरे, दशकुमारचरिते च ते ते कवयः शूद्रकस्य राज्ञो नाम सस्मरूः। महाकवेः शूद्रकस्य कालविषये अनेके विचाराः सन्ति-

1. स्कन्दपुराणमतेन विक्रमादित्यात् पूर्ववर्त्ती नृपोऽयम्।
2. केचन विद्वांसः-आन्ध्रभृत्यकुलोत्पन्नः शिमुक एवायं शूद्रको वर्तते, अत एव अस्य कालः विक्रमस्य प्रथमशताब्दी वर्तते इति प्राहुः।
3. दण्डी काव्यादर्शे शूद्रकस्य 'लिम्पन्तीव तमोऽङ्गानि' इति पद्यमुद्धृतवान्, अत एव अयं सप्तमशताब्द्याः पूर्ववर्ती सिद्ध्यति।
4. शूद्रकः वराहमिहिरात् पूर्ववर्ती प्रतीयते। वराहमिहिरस्य कालः 500-600 खृिष्टाब्दः। अतः शूद्रकस्य कालः 500 खृिष्टाब्दात् पूर्वमेव स्वीकरणीयः।
5. मनुस्मृतेः प्रणयनादनन्तरमेव बभूव मृच्छकटिकम् इति निश्चप्रचम्।
6. चन्द्रबली पाण्डेयोऽमून्येवैतिहासिकतत्त्वान्यारित्य शूद्रकं वासिष्ठीपुत्रं श्रीपुलमाविनाऽभिन्नं प्रतीत्य 130-155 खीष्टाब्दकालिकं प्रमापयति।
7. मृच्छकटिकस्य रचना भासरूपकानुहारिणीति बलदेवोपाध्यायाः। अतः शूद्रकस्य कालः भासोत्तरमेव स्वीकरणीयः।
8. डॉ. स्मिथः आन्ध्रवंशसम्भवं सिमुकमेव शूद्रकं निर्धारयति।
9. प्रो.स्टेनकोनो कवते यत् 248 तमे खैस्ताब्दे सम्भूतः शिवदत्ताख्यः क्षितीश एव शूद्रक आसीत्।

एततसर्वमालोचयन्तो विद्वांसो शूद्रकस्य समयं 8। मिते ख्रष्टाब्दे पुराणप्रसिद्धनाराशंसीतिहासादिषु विश्वसतामन्येषां च (मतेन)ख्रष्टपूर्वं चतुर्थे वा पञ्चमे वा शतके किल शिवस्वातिर्बभूव।

शुद्रकस्य देशः-

मृच्छकटिकस्य अध्ययनेन प्रतीयते यत् शूद्रकस्य समये उज्जियिनी भारतवर्षस्य समृद्धतमा नगर्यासीत्। तदात्वे चौर्यधूर्तयोः प्रचुरः प्रसारः आसीत् तस्मिन् काले दासप्रथा अपि व्यवहारे आसीत्।

शुद्रकस्य जीवनवृत्तम्-

संस्कृतसाहित्ये शूद्रकस्य यशः सर्वत्र प्रसृतं प्राप्यते। शूद्रकस्यैकैवेयं मृच्छकटिकं नाम कृतिस्तात्कालिकसमाजदशायाः प्रस्फुटितं चित्रं प्रकटीकरोति। राज्ञां प्रभुत्वमधिकं परं ते मन्त्रिणां सहयोगमपेक्ष्यैव कार्यं चालयन्ति स्म।

शुद्रकस्य रचना-

शूद्रकप्रणीतमृच्छकटिकस्य कथाभागे-चारुदत्तवसन्तसेनयोः प्रणयकथायाः सरसं चित्रणं कृतं, परं तनैव सह तात्कालिकसमाजस्य चित्रमप्यङ्कितम्। अस्य मृच्छकटिकस्य कथाया अंशद्वयमास्ते, प्रथमांशे चारुदत्तवसन्तसेनयोः प्रणयः प्राधान्यमेधते। द्वितीयेऽंशे आर्यकस्य राज्यप्राप्तिः प्रवर्धते। दशाङ्कनिबद्धेऽत्र रूपके कविनारायप्राप्तिश्चारुदत्तवसन्तसेनयोर्विवाह श्चेत्यादयोऽर्था निपुणं वर्णिताः। यन्मृच्छकटिकमुत्तमां कोटिं नयति तदस्ति तस्य कथावस्तु। तदीया कथातितरामेव प्रस्फुरता घटनाचक्रेण पूर्यमाणास्ति। अत एव प्रकरणमिदं नितरां लोकप्रियतामुपेतमस्ति। संस्कृतसाहित्ये चरित्र-चित्रणप्रधानेषु रूपकेष्वन्यतमं रूपकमिदम्। तत्र सर्वविधानामपि पात्राणां सन्निवेशः कृतो रूपककारेण तस्मात् तत्र समाजस्य यथार्थं सजीवं च चित्रं दृग्गतं सञ्जायते। मृच्छकटिके नवनवा भावाः,रमणीया उपमाः,सरसाश्च कल्पनाः प्रतिपदमवाप्यन्ते। भाषा तत्र सरला प्रवाहमयी च विद्यते। अस्ति सा पूर्णतया कथावस्त्वनुगुणा।

शुद्रकस्य काव्यशैली-

महाकवेः शूद्रकस्य काव्यशैली सरलतमा मनोहरा दीर्घः समासे गाढो बन्धः च वर्तते। वैश्यकुले संजाताया वसन्तसेनाया ब्राह्मणेन चारुदत्तेन साकं विवाहः समाजे नवस्य विचारस्य उदय एव। नवानां भावानामुद्भावने जागरूकमतेरस्य काव्ये शृङ्गारस्य पुष्टं रूपं दृश्यम्। शूद्रकेण राजन्यायभवनस्य यद् वर्णनं कृतं तदतिहृद्यम्। हास्यप्रयोगेऽपि कवेरस्य साफल्यम्। सर्वांशतो विचारेण नाटकमिदमतिसफलम्। आधुनिकयुगेऽप्यस्य चमत्कारित्वमक्षुण्णमत एव पाश्चात्या आलोचका नाटकमिदं प्रशंसन्ति।

• • •

19. महाकविः श्रीहर्षः-(1200)

महाकविः श्रीहर्षस्य समयः-

' ऐतिहासिकानामनुसारेण कान्यकुब्जेश्वरः जयचन्द्रः गढवालवंश्यो राजाऽऽसीत्। एकादशे द्वादशे च ईशवीयशतके अस्य वंशस्य उत्तरभारते प्रचुरः प्रभाव आसीत्। विजयचन्द्रजयचन्द्रौ मिलित्वा 1156 ईशवीतः 1193 ई पर्यन्तं राज्यं चक्रतुः। अतः श्रीहर्षस्य स्थितिकालो द्वादशशतकोत्तरार्धभागो मन्यते। आचार्य हंसराजः अग्रवालः स्व-संस्कृतसाहित्यकतिहासे अपि श्रीहर्षस्य समयः 1150 मितात् 1200 मितं खृीष्टसंवत्सरं यावत् मन्यते।

महाकविः श्रीहर्षस्य देशः-

महाकविः श्रीहर्षः संस्कृतसाहित्यजगति सम्माननीयं स्थानम् अधिकरोति। अस्य कवेः 'नैषधीयचरितम्' इति महाकाव्यम् अस्ति। अयं स्वकीयविषये स्वकृतिषु काञ्चन परिचयं दत्तवान् अस्ति। श्रीहर्षस्य पिता श्रीहीरः माता च मामल्लदेवी आस्ताम्। श्रीहीरः काशीवासिनो गढवालवंशोद्भवस्य विजयचन्द्रस्य सभापण्डित आसीत्।

महाकविः श्रीहर्षस्य जीवनवृत्तम्-

श्रीहर्षः विभिन्नेषु शास्त्रेषु प्रवीणः आसीत्। दर्शनशास्त्रे विशिष्टा ख्यातिः आसीत्, इतोऽपि अद्वैतवेदान्ते अस्य गतिः आसीत्। अयं कान्यकुब्जेश्वरस्य जयचन्द्रस्य सभायाम् अतीव सम्मानितरूपे तिष्ठति स्म। कान्यकुब्जेश्वरः जयचन्द्रः तस्मै ताम्बूलद्वयम् आसनं च दत्त्वा तं सम्मानयति स्म।

महाकविः श्रीहर्षस्य रचना-

संस्कृतसाहित्येतिहासे नैषधीयचरितं नाम अन्तिमं महाकाव्यं कन्नौजाधिपतेः महाराजजयचन्द्रस्य परिगृहीतेन श्रीहर्षेण द्वादशशतकोत्तरार्द्धे लिखितम्। अत्र (22)द्वाविंशतिः सर्गाः 2830 श्लोकाश्च सन्ति। निषधशासकस्य नलस्य चरित्रं प्रस्तूयते। अस्मिन् ग्रन्थे दमयतीपरिणय-पर्यन्ता च नलकथा वर्ण्यते। दमयन्त्याः पिता विदर्भः स्वयंवरमारचयति। दमयन्तीकामुका देवा अपि तत्रायान्ति, धृतनलस्वरूपाश्चत्वार इन्द्रयमवायुकुवेराः पञ्चमो नल श्चेति सर्वेषां समरूपतया दमयन्ती विचित्रं दशां प्रपद्यन्ते। सभावर्णनाय समागता सरस्वत्यपि श्लेषवर्णनया दमयन्तीं व्यामोहयति। अवसाने दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीता देवाः स्वानि विशिष्टचिह्नानि प्रकटीकुर्वन्ति यैर्नलः परिचितो वृतश्च भवति। जाते पाणिग्रहे कलिप्रवेशो मुखमुद्रणं च तस्य भवति नलदमयन्त्योः सुखसङ्गमेन च ग्रन्थः समाप्यते। आचार्य श्रीरामचन्द्रमिश्रमहोदयः स्व-संस्कृतसाहित्येतिहासे 'श्रीहर्षकृतिपरिचयः' 59 पृष्ठोपरि ददाति। तदनुसारम्-

क्र.सं. ग्रन्थनाम	विषयवस्तुः
1. स्थैर्यविचारणप्रकरणम्-	नामतो दार्शनिकग्रन्थोऽयं प्रायः क्षणभङ्गवादखण्डनपरः।
2. विजयप्रशस्तिः-	जयचन्द्रपितुर्विजयचन्द्रस्य प्रशंसापरकं काव्यम्।

3. खण्डनखण्डखाद्यम्	स्वनामख्यातोऽनिर्वचनीयतासर्वस्वभूतो वेदान्त ग्रन्थः।
4. गौडोर्वीशकुलप्रशस्तिः-	वङ्गीयस्य कस्यचिद्राज्ञः स्तुतिपरं काव्यम्।
5. अर्णववर्णनम्-	स्वनामख्यातम्।
6. छिन्दप्रशस्तिः-	अज्ञातपरिचयस्य कस्यापि राज्ञो वर्णनपरोऽयं ग्रन्थः स्यात्।
7. शिवशक्तिसिद्धिः-	शिवशक्त्योरुपासनाग्रन्थोऽयं सम्भाव्यते।
8. नवसाहसाङ्कचरितचम्पूः-	नाम्नैव विषयः स्वरुपञ्च आख्यायेते।
9. नैषधीयचरित्रम्-	निषधशासकस्य नलस्य चरित्रं प्रस्तूयते। ग्रन्थे-22सर्गाः,2830 श्लोकाः सन्ति।

महाकविः श्रीहर्षस्य काव्यशैली-

श्लेषरचनायां महानिपुणः श्रीहर्षः सुश्लिष्टां भाषां प्रयुङ्क्ते चतुरमधुरया च भङ्ग्या मनोगतं वाचि निवेशयति। पद-पदान्तगता अनुप्रासा अस्मै भृशं रोचन्ते। श्रीहर्षस्य महाकाव्ये कलापक्षस्य प्रधान्यं विद्यते। शैलीम् आश्रयस्तु कलाप्राधान्यवादिषु भारविमाघश्रीहर्षेषु कलात्मकप्रदशानस्य दृष्ट्यां श्रीहर्षः-

'तावद् भा भारवेर्भाति यावद् माघस्य नोदयः।
उदिते नैषधे काव्ये क्व माघः क्व च भारविः॥

कलात्मकं प्रदर्शनमेव श्रीहर्षस्य कवित्वस्य परमम् उद्देश्यं प्रतीयते। महाकविः श्रीहर्षः अलंकाराणां विन्यासे अतीव निपुणः अस्ति। अद्भुतानां कल्पनानाम् उद्भावनात् हेतोः श्रीहर्षेण प्रयुक्तेषु अर्थालंकारेषु अपूर्वं सौन्दर्यं समागतम् अस्ति। 'नैषधे पदलालित्यम्' बहुशः प्रशंसितं वर्तते।

• • •

20. भोजराजः-(1100)

भोजराजस्य समयः-

भोजराजः प्रसिद्धः समाजसेवी, संस्कृतकवीनामाश्रयदाता,प्रगाढ़ पण्डितः,प्रतिभाशाली आलोचकाः अपि आसीत्। साहित्यशास्त्रस्य इतिहासे भोजराजं समन्वयवादी-अलङ्कारिकः मन्यन्ते। काव्यस्य विविध अङ्गेषु भोजराजस्य नवीनमतमस्ति। अस्य विशिष्टमतमिदं यत् शृङ्गाररस एव प्रमुखम्।

शृङ्गारवीरकरुणाद्भुतरौद्रहास्य-
वीभत्सवत्सलभयानकशान्तनाम्नः।
आम्नासिषुर्दश रसान् सुधियो वयं तु,
शृङ्गारमेव रसनाद्रसमामनामः॥

1. भोजराजस्य दानपत्रस्य समयः संवत् 1078(1021ई0)वर्तते।

2. भोजराजस्य उत्तराधिकारी जयसिंहस्य शिलालेखे संवत् 1112 (1055 ई0)वर्तते।
3. अयं भोजराजः (1100)एकादशशतकोद्भवः इति मन्यते आचार्यः श्रीरामचन्द्र मिश्रः।

भोजराजस्य देशः-

मुञ्जराजस्य अनन्तरराज्यकर्ता 'नवसाहसांक'उपाधिधारकः सिन्धुराजः सिन्धुल वा भोजराजस्य पिता आसीत्।

भोजराजस्य जीवनवृत्तम्-

धारानरेशः भोजराजः संस्कृतकवीनामाश्रयदाता,प्रगाढ़ पण्डितः,प्रतिभाशाली आलोचकाः अपि आसीत्।

भोजराजः रचना-

1. भोजराजेन धाराधीशेन कृता 'रामायणचम्पूः' किष्किन्धाकाण्डावसाना एव, तस्या युद्ध लक्ष्मणभट्टेन कृतम्।
2. 'सरस्वतीकण्ठाभरणम्' यः ग्रन्थः रत्नेश्वरस्य टीका सह काव्यमालायां प्रकाशितः।
3. 'शृङ्गार-प्रकाश' ग्रन्थोऽयं हस्तलिखितरूपे सम्पूर्णतया प्राप्तोऽस्ति।

भोजराजस्य काव्यशैली-

चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्त्वपूर्णम्। भोजस्य शब्दगुम्फः स्वभावसरलः अर्थराशिश्च चमत्कारातिशयशाली। अस्य वाल्मीकिकाव्यप्रशंसायां लिखितं पद्यं नितान्तहृद्यम्-

'वाल्मीकिगीतरघुपुङ्गवकीर्त्तिलेशै-
स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितृणाम्॥'

सीतया अशोकवाटिकायां तिष्ठन्त्या दशां वर्णयति कविः-

'उपध्यवृक्षस्य परोक्षभावादाश्रित्य भूमिं सुचिरं लुठन्त्याः।
नक्तञ्चरस्त्रीमुखकर्शितायाः सीतालतायास्त्रिजटा जटाभूत्॥'

तदिदमतिचमत्कारि चम्पूकाव्यम्।

• • •

21. महाकविःभरतमुनिः-(प्रथमशताब्दी)

महाकविः भरतमुनेः समयः/ देशः-

भरतमुनेः कालस्य निर्णयः सर्वथा दुरूहो विषयो वर्तते। समयस्य विषये विद्वत्सु ऐकमत्यं नास्ति।

1. अभिनवगुप्तः 'अभिनवभारती' नाम्नीं नाट्यशास्त्रस्य व्याख्यां ईस्व्याः एकादशशताब्द्यां चकार। कालिदासः विक्रमार्वशीयनाटकस्य 2/98 श्लोके भरतमुनिना शब्दन भरतस्य नामग्रहमुल्लेखं चकार। तथाहि-

मुनिना भरतेन यः प्रयोगो भवतीष्वदृष्टरसाश्रयः प्रयुक्तः।
ललिताभिनयं तमद्य भर्त्तामरुतां द्रष्टुमनाः सलोकपालः।। इति।

महाकविना कालिदासेन निर्दिष्टा इमाः सर्वाः विशेषता नूनं वर्त्तमाने नाट्यशास्त्रे समुपलभ्यन्ते। एभिः प्रमाणैरयमर्थो भवति यन्महाकविः कालिदासो भरतस्य नाट्यशास्त्रेण पूर्णतया परिचितः आसीत्। अतः भरतमुनिः कालिदासात् पूवपर्ती सिद्ध्यति।

2. संस्कृतसाहित्यस्य इतिहासे सूत्रसूत्रकाररूपेण ईस्वीपूर्वस्य चतुर्थशताब्दी स्वीक्रियते।
3. अन्यवहवो विद्वासः भरतस्य समयं विक्रमपूर्वस्य 500 वत्सरेभ्य आरभ्य प्रथमशताब्दीं यावत् स्वीकुर्वन्ति।

महाकविः भरतमुनेः जीवनवृत्तम्-

संस्कृतसाहित्ये जगति आचार्यभरतमुनेः विशिष्टं स्थानं वर्तते। भरतमुनिः नाट्यशास्त्रस्य प्रणेता विद्यते। नाट्यशास्त्रस्य आंग्लानुवादको 'मनमोहनघोषः कथयति यत्- 'भरतमुनिः एकः काल्पनिकपुरुषो वर्तते।' मत्स्यपुराणानुसारेण भरतमुनिः देवलोके लक्ष्मीस्वयम्बरनामकस्य नाटकस्य अभिनयं कारयामास। तत्र उर्वशी नाम्न्यप्सरा लक्ष्मया अभिनयं चकारः।

महाकविः भरतमुनेः रचना-

भरतमुनेः 'नाट्यशास्त्रम्'एक एव ग्रन्थो समुपलभ्यते। सम्पूर्णोऽयं ग्रन्थः (36) षट्त्रिंशत् अध्यायेषु समुपलभ्यते। अस्मिन् ग्रन्थे (6000)षट्सहस्रसंख्याकाः श्लोकाः सन्ति। अत्र बहवस्तु अनुष्टुप् कुत्रचित् आर्याछन्दांसि प्रयुक्ता श्लोकाः सन्ति। रसनिरूपणस्य प्रसङ्गे क्वचन सूत्राणि क्वचन गद्यव्याख्यानानि समुपलभ्यन्ते। सम्पूर्णो ग्रन्थ सूत्र-भाष्य-कारिकासु च निबद्धो वर्तते। नाट्यशास्त्रे सप्तत्रिंशत् अध्यायाः सन्ति। नाट्यशास्त्रे छन्दः शास्त्र-अलंकारशास्त्र-संगीतशास्त्रप्रभृतीनां विषयाणां प्राथमिकं विवरणं समुपलभ्यते। अत एवेदं प्राचीनललितकलाया विश्वकोश इव आभाति। भरतप्रणीतं नाट्यशास्त्रस्य प्रकाशनं त्रिप्रकारकं समुपलभ्यते। तद्यथा-1.दाक्षिणात्यप्रकाशनम्,

2.औत्तराह प्रकाशनम्, 3.प्रचीनतम प्रकाशनञ्चेति।

महाकविः भरतमुनेः काव्यशैली-

भरतः नाट्यशास्त्रे अलंकारशास्त्रीयाणि तत्त्वानि गौणरूपेण व्याकार्षीत्। भरतानुसारेण अभिनयाः चतुर्धा विभज्यन्ते, तत्र वाचिकाभिनये अलंकारशास्त्रं सन्निविशते। आचार्यभरतः 'काव्यालंकारनाम्नि ग्रन्थे अलंकारशास्त्रस्य तत्त्वानां स्वतन्त्ररूपेण व्याख्यां चकारः।

• • •

22. आचार्य भामहः-(500)

आचार्य भामहस्य समयः-

भामहः दण्डिनः पूर्ववर्ती वर्तते। बौद्धाचार्यः शवन्तरक्षितः(अष्टमशतकस्य) स्वकीये तत्त्वसंग्रहे ग्रन्थे भामहस्य मतस्य उल्लेखं कृत्वा भामहस्य काश्चन श्लोकानुद्धृतवान्। अतः भामहः अटमशत्याः ईसब्याः पूर्वकालिकोऽस्तीति निश्प्रचमास्ते। भामहः बाणभट्टादपि पूर्ववर्ती सिद्धयति। भामहः 50। ईस्व्याः दिङ्नागस्य प्रत्यक्षं कल्यनापोढमिति प्रत्ययलक्षणं कव्यालङ्कारे उद्धृतवान्। प्रत्ययलक्षणे अभ्रान्तम्' पदप्रयोगविषये धर्मकीर्तिः भामहस्य समयः 620 ईस्व्या मन्यते। एतेन ज्ञायते यत् भामहः 500 ईस्व्याः आरभ्य 620 ईस्व्याः अन्तराले एव प्रादुर्बभूव। इत्थं भामहस्य कालः षष्ठशताब्द्याः पूर्वकाल एव सिद्ध्यति।

आचार्यभामहस्य देशः/ जीवनवृत्तम्-

अनेके विद्वांसः भामहं काश्मीरवासिनं स्वीकुर्वन्ति। भामहालंकारानुसारेण भामहस्य पितुर्नाम रक्रिलगोम्यासीत्। भामहस्य पिता रक्रिलगोमी बौद्धः आसीदिति सिद्ध्यति। भामहः काव्यालंकारे रामायणस्य महाभारतस्य बृहत्कथायाश्च पात्राणि असकृत् सस्मार,तस्मात् कारणात् ज्ञायते यदयं बौद्धो नासीत्। प्रत्युत स वैदिकधर्मावलम्बी ब्राह्मण आसीत्।

आचार्य भामहस्य रचना/ काव्यशैली -

भामहः सर्वप्रथममलंकारशास्त्रीयं ग्रन्थं रचयामास। तस्य 'काव्यालङ्कार' एव एकः प्रसिद्धोऽस्ति। काव्यालंकारे षट् परिच्छेदाः सन्ति। काव्यस्य अलंकारव्यतिरिक्तोऽपि कश्चन ग्रन्थो भामहेन प्रणीतोऽस्ति। केषाञ्चन विदुषां मतानुसारेण भामहः प्राकृतप्रकाशस्य 'प्राकृतमनोरमाख्यां' टीकां प्रणीतवान्। एतेन भाति यत् भामहः काव्यालंकारव्यतिरिक्तानपि ग्रन्थान् व्यरिरचत् ये साम्प्रतं नोपलभ्यन्ते

• • •

23. सुबन्धुः-(600)

सुबन्धोः समयः-

संस्कृतवाङ्मये गद्यकाव्यस्य महत्त्वपूर्णं स्थानं विद्यते। गद्यकारेषु सुबन्धोः स्थानं सर्वप्रथमं वर्तते। 'गद्यं कवीनां निकषं वदन्ति' इति इति प्राहुः केचन आलोचकाः। गद्ये काव्ये समर्थः कविः स्वशब्दार्थयोः देशकालपात्रानुसारिण्या शक्तेः प्रकाशने सर्वथा समर्थां विधिमाश्रयते। शब्दालंकारणामर्थालंकाराणाञ्च कृतेन स्थाने प्रयोगेण कविः सहृदयानां परमप्रेमास्पदतां भजते। सुबन्धाः कालस्य विषये किञ्चिदपि बाह्यं प्रमाणं नोपलब्धं भवति। अथापि कतिपयैरन्तरङ्गसाधनैः सुबन्धोः समयस्य निर्णयः क्रियते। 1.तथाहि सुबन्धुः स्वयमेव स्वग्रन्थे भणितम्-

सारस्वता विहता नवका विलसन्ति चरतिनीकङ्कः।
सरसीवकीर्तिशेषं गतवति भुवि विक्रमादित्यः॥

1. अस्मिन् श्लोकेन सिध्यति यत् सुबन्धुः विक्रमादित्य-यशोधर्मा समकालिकः आसीत्। एतेन सुबन्धोः समयः षष्ठशतकस्य पूर्वभाग इति वक्तुं शक्यते।
2. बाणभट्टः सुबन्धोः कथां 'धिया निबद्धेयमतिद्वयी कथा' इत्येवं स्मरति। बाणः सप्तमशतकोत्पन्न इति सुबन्धोस्ततः पूर्ववर्त्तित्वेन तस्य षष्ठशतकपूर्वभागभवत्वं युज्यत एव।
3. सुबन्धुः स्ववासवदतायां श्लेषद्वारा उद्योतकरं स्मरति, उद्योतकरस्य चास्य समयः षष्ठसप्तमशताब्द्योरन्तराले मन्यते। एभिर्निदर्शनैः सुबन्धोः कालः षष्ठशतकं मन्यते।

सुबन्धोः देशः- अनेके विद्वासः सुबन्धुं काश्मीरी मन्यन्ते। एवं च डॉ0 भोला शंकर व्यासः तं मध्यदेशीयः मन्यते।

सुबन्धोः जीवनवृत्तम् -विद्वज्जनहृदयहारिश्लेषादिविविधालङ्कारसर्गतः सुबन्धुः पण्डितपाठकानां हृदयान्याक्रष्टुमलमिति। प्रणयकथायाः कथांशे गद्यकविषु सुबन्धोः स्थानं अग्रगण्यः वर्तते। वासवदत्तायाः विरह-वर्णने सुबन्धुः अनुप्रासिक-चमत्कारस्य एव प्रदर्शनं करोति स्म। सुबन्धुः चमत्कारी कविः आसीत्। तस्य अलंकारस्य प्रयोगः केवल अलंकाराय भवति। यथा-

खिन्नोऽसि मुञ्च शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः।
भरभुग्नवititatबाहुषु गोपेषु हसन् हरिर्जयति॥

सुबन्धोः रचना-

सुबन्धोः एक एव ग्रन्थः 'वासवदत्ता' नामकः समुपलभ्यते। केचन अस्या वासवदत्तया आख्यायिकात्वमपि स्वीकुर्वन्ति। उदयनकथाया प्रधाननायिकाया वासवदत्तायाः नामानुध्यानमेवः अस्या एव वासवदत्तायाः प्रशंसायां बाणभट्टो लिखति हर्षचरिते-

'कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्त्येन पाण्डुपुत्राणां नूनं वासवदत्तया॥'

शब्दार्थालङ्काररससौष्ठवैर्वासवदत्तायास्तुलायां कोऽप्यन्यो गद्यग्रन्थो नास्तीति तदध्ययनेन प्रतिभासते। यमकानुप्रासोपमाविरोधाभाससंख्यादिका अलंकाराः यत्र-तत्र स्थाने लब्धप्रवेशाः सन्ति। वासवदत्तया आख्यायिकाग्रन्थतया कतिचन श्लोका अपि यत्र तत्रात्र निवेशिता विद्यते, यैः अस्य सुबन्धोः पद्यप्रणयनपाटवं प्रकटं प्रतीयते।

सुबन्धोः काव्यशैली-

सुबन्धुः पण्डितपाठकानां हृदयान् आकर्षितुमलमिति कथयितुं शक्यते। कल्पनाप्रौढिचय-नालङ्कारसज्जाभिरयं कविः सकलहृदयजनस्तुत्य इति निर्बाधं कथयितुं शक्यते। सुबन्धुः श्लेष-योजनायाः सभङ्ग-अभङ्गश्लेषे एव विशेषज्ञः वर्तते। सभङ्गश्लेषस्य एकमुदाहरणम्-

सा रसवता विहिता नबका विलसन्ति चरति नो कङ्कः।
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये॥

• • •

24. महाकविः बाणभट्टः-(700)

महाकविः बाणभट्टस्य समयः-

महाकविः बाणभट्टः गद्यकारेषु मूर्धन्यः सरस्वत्याश्च वरदपुत्रः आसीत्। प्रचीनः चीनदेशोद्भवो यात्री ह्वेनत्सांग नामा 629 तः 645 खीष्टीयवर्षपर्यन्तं भारतं बभ्राम। स हि स्वयात्रवर्णनप्रसङ्गे उत्तरभारतसम्राजो हर्षदेवस्य सविस्तरं वर्णनं कृतवान्। महाराजहर्षदेवः 606 ईशवीयसमयादारभ्य 648 पर्यन्तं थानेश्वरनामनि स्थाने राज्यं कृतवान्। स च अयं हर्षः बाणभट्टेन स्वीये हर्षचरिते सविशेषं वर्णितः। एतेन बाणभट्टस्य समयः सप्तमशतकं सिद्ध्यति।

महाकविः बाणभट्टस्य देशः-

बाणभट्टः वात्स्यायनवंशे जन्म गृहीतवान्। अयं महाकविः हर्षचरिते स्वजीवनस्य वृत्तान्तं विस्तरेण वर्णितवान्। तत्र शोणनदस्य तटे शाहबादमण्डले बिहारप्रदेशे प्रीतिकूटनामकनगरे प्रतिवसति स्म इत्यस्ति उल्लेखः। हर्षचरितस्यानुसारम् अस्य वंशस्य परिचयः ब्रह्मणः आरभते। तत्र कुवेरस्य पुत्रः पाशुपतः, पाशुपतस्य पुत्रः अर्थपतिः, अर्थपतेः पुत्रः चित्रभानुः, चित्रभानोः पुत्रः बाणभट्टः इति उपलभ्यते। अस्य माता राजदेवी बाल्यैव दिवंगता।

महाकविः बाणभट्टस्य जीवनवृत्तम्-

पित्रा लालितः पालितः पोषितश्चापि अयं सुयोगस्य अभिभावकस्य अभावात् मित्रैः सह ग्रामात् ग्रामं पर्यटन् देशान्तरस्य अवलोकनाय आकृष्टमना बहुकालम् अन्यत्र उषित्वा पुनः स्वग्रामं प्रति आजगाम। स्वगृहेऽवस्थाय शास्त्राणामध्ययने प्रावर्त्तत। स्वपाण्डित्यप्रकर्षेण थानेश्वरस्य राजधान्या महाराजहर्षवर्धनस्य पण्डितसभायाः सर्वोत्कृष्टं पदम् अलंकृतवान् बाणभट्टः।

बाणेन हर्षचरिते यः स्ववंशपरिचयः प्रदत्तः स निम्नलिखितवंशवृक्षतः सुखावगम्यः।



भृगुः हंशः शुचिः कविः धर्मः जातवेदाः चित्रभानुः ऋक्षः अहिदत्तः विश्वरूपः बाणः

महाकविः बाणभट्टस्य रचना

बाणभट्टेन ग्रन्थद्वयमेव गद्यमयं प्रणीतम्-1.हर्षचरितम्, 2.कादम्बरी चेति। 1.हर्षचरितग्रन्थेऽष्टौ उच्छ्वासास्तत्राद्ये उच्छ्वासत्रये बाणेन स्वीया कथा लिखिता। चतुर्थादुच्छ्वासादारभ्य समाप्तिपर्यन्तं हर्षस्य चरितं वर्णितम्। 'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्' इति गद्यं

विशेषयतामालङ्कारिकाणां मते गद्यलेखकानां मूर्धन्यो बाण: गद्यकाव्यानां प्रथमं च हर्षचरितम्। व्यञ्जनाप्रयोगे वक्रोक्तिरचनायां च बाण: सकलकविमूर्धन्य:। हर्षचरिते तात्कालिकोत्तरभारतस्य स्थिति: प्रकटं प्रकाश्यते।

2. कादम्बरी-बाणस्य कादम्बरी कथाग्रन्थ: अस्ति। स्वयमेव कविना उक्तम्-'धिया निबद्धेयमतिद्वयीकथा' इति कादम्बर्या: कथाग्रन्थत्वमुक्तम्। कादम्बर्या: कथा जन्मत्रयवृत्तान्तमङ्गीकरोतीति जटिला। कादम्बर्या: पात्रचित्रणम् अत्युत्तमम्। कादम्बरी पूर्वार्धे उत्तरार्धे च विभक्तम्। तत्र भाषाभावयो: शब्दार्थयो: च समुचित: समावेश: अवलोक्यते, वर्णनं सौन्दर्यं तु अनिर्वचनीयं विद्यते।

'बाणस्तु पञ्चानन:' अस्य महाकवे: काव्ये वाल्मीके: माधुर्यं,व्यासस्य प्रसादिकता, कालिदासस्य कोमलत्वं,दण्डिन: पदलालित्यं, सुबन्धोश्च ओजत्वं परिलक्ष्यते।

महाकविबाणभट्टस्य काव्यशैली-

कवे: गद्यानि पाञ्चालीरीतिम् अनुसरन्ति। प्राय: श्लेषयुक्तानि ओज: गुणपूरितानि,विशालानि विशालानि वाक्यानि सन्ति। सरल: अर्थ: सुकुमारवर्णविन्यास: रचनाशैली रमणीया चास्ति। तत्र रसोपादकानि सर्वाणि काव्यतत्त्वानि पूरितानि सन्ति। अत: धर्मदासेन उक्तम्-

'रुचिरस्वरवर्णपदा रसभाववती जगन्मनोहरति।
सा किं तरुणी न हि न हि वाणी वाणस्य मुधुरशीलस्य॥'

अनेन केनचित् उक्तं यत्-**'श्रीहर्षो विततार गद्यकवये बाणाय वाणी फलम्।''**

अथ सर्वविधबाणस्य वैशिष्ट्यं गद्यकाव्ये विलोक्य आलोचकै: उक्तं यत्-

''बाणोच्छिष्टं जगत्सर्वम्' इति अर्थात् काव्यसम्बन्धिनि सर्वविधानि वर्णनानि बाणै: एव कृतानि। अन्यकवयस्तु बाणम् एव अनुकुर्वाणा: सन्ति।

एतत्सकलमपि वैशिष्ट्यं मनसि निधायैव गोवर्द्धन: प्रोक्तवान्-

'जाता शिखण्डिनी प्राग्यथा शिखण्डी तथाऽवगच्छामि।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति॥'' इति।

• • •

25. कल्हण:-(1149-150)

कल्हणस्य समय:-

संस्कृते इतिहासलेखकेषु प्रमुख: खलु कल्हण एव। कल्हण: स्वीयां राजतरङ्गिणीं राज्ञ: सुस्सलस्य पुत्रे राजनि जयसिंहे (1127-1159) शासति निर्मितवान्। कल्हणेन 1148 तमेशवीयवर्षे प्राब्धा राजतरङ्गिणी 1150 तमेशवीयवर्षे समापितेति वर्षत्रयं तत्र कार्ये लग्नम्।

कल्हणस्य देश:-

कल्हणोऽयं कश्मीरदेशवास्तव्य: आढ्यब्राह्मणवंशीय: राजसभास्थ:। अस्य पिता चणपक:

कश्मीरनृपतेः हर्षदेवस्य (1048-1101)प्रधानामात्यः आसीत्। पितुः स्थानं प्राप्तुं सक्षमोऽप्ययं राजसेवनं परित्यस्य लेखनं प्रारभत। कल्हणः परमशैवः सन्नपि धार्मिकदृष्टौ सहनशीलो बौद्धानामहिंसासिद्धान्ते धृतादरस्तन्त्रमार्गविमुखश्चासीत्।

कल्हणस्य जीवनवृत्तम्-

कल्हणो रामायणमहाभारतयोरन्यान्यसंस्कृतकाव्यानाञ्च निपुणं ज्ञाता ज्यौतिषशास्त्रनिष्णात श्चासीत्। हर्षे हते सति स काश्मीरान् विहाय वाराणसी अध्यवसत्। कल्हणस्य संस्कृतं नाम कल्याण इत्यासीत्। स हि अलकदत्तनाम्नः कस्यचित्सत्पुरुषस्यच्छत्रच्छायामाश्रितवान्।

कल्हणस्य रचना-

'राजतरङ्गिणी' कश्मीरदेशस्य राजनैतिकं भौगोलिकं सामाजिकं साहित्यिकमेतिहासिकं च विवरणमत्र दत्तम्। अष्टौ तरङ्गाश्चात्र सन्ति। 813 ख्रिष्टाब्दात् 1150 ख्रिष्टाब्दं यावद् वैज्ञानिकमितिहासोऽत्र मिलति। अस्मात् प्राग् यत्कथितं तत् कल्पनाप्रसूतमेव। नीलमतपुराणस्य नृपावलेः, पार्थिवालेः, शिलालेखानां, दानपत्राणां, प्रशस्तिपत्राणां चोपयोगोऽत्र विहितः। बौद्धशैवयोः शैववैष्णवयोः वर्णनमत्र निर्मत्सरे प्रशंसापूर्वं करोति कविः। सः कश्मीरजानां दोषानपि वदति परदेशजानां गुणानपि वर्णयति-

'श्लाध्यः स एव गुणवान् रागद्वेषबहिष्कृता।
भूतार्थकथने यस्य स्थेयस्येव सरस्वती॥'

राजतरङ्गिणी स्वीयक्गुणैः परां प्रसिद्धिं गता। 1421 तः 1472 पर्यन्तं काश्मीरान् शासितवता 'जैनउलआवीदीनं नामकेन राजतरङ्गिण्याः प्रथमः फारसीकभाषानुवादः कारितः। अकबरः अपि प्रचलितभाषायां राजतरङ्गिण्याः द्वितीयमनुवादं 'अलवदाऊंनी' द्वारा कारितवान्। जहांगीरस्य राजत्वकाले काश्मीरवासी हैदरमलिक' नामक उच्चकुलोत्पन्नो विद्वान् राजतरङ्गिण्याः सङ्क्षप्तमनुवादं विहितवान्।

कल्हणस्य काव्यशैली-

इतिहासविवरणभूतेऽप्यस्मिन् ग्रन्थे काव्यशोभा दर्शनीया, भाषा सरला सरसा सुप्रबोधा। शैली च मनोहारिणी अलङ्काराणि यत्र तत्र विराजन्ते। यथा-

"योऽयं जनापकरणाय श्रयत्युपायं
तेनैव तस्य नियमेन भवेद् विनाशः।
धूम्र प्रसौति नयनान्ध्यकरं यमग्नि-
र्भूत्वाम्बुदः स शमयेत् सलिलैस्तमेव॥

• • •

26. भट्टिस्वामि (610 ई0)

भट्टिस्वामि-महोदस्य समयः-

शास्त्रकाव्येषु भट्टिकाव्यं प्रसिद्धतरम्। अत्र कानि शास्त्र काव्यानि? व्याकरणसम्बन्धि-

पदप्रयोगनियमानां ज्ञानायान्यशास्त्रीयज्ञानसौलभ्याय च यानि काव्यानि प्रणीतानि तानि शास्त्रकाव्यानि इत्युच्यन्ते। श्रीधरसेननामकाश्चत्वारो राजानः 500 ई0 तः 650 ई0 पर्यन्तमजायन्त। यदि अयं भट्टिर्भट्टिकाव्यस्यैव प्रणेता तदा तस्य समयः 610 ई0 मन्तुं शक्यते। यतः शिलालेखोऽयं तदैव लिखितः। केषाञ्चिन्मते प्रथमस्यैव सभासदोऽयम्।

भट्टिस्वामि-महोदयस्य देशः-

बलभीनरेशस्य श्रीधरसेनस्य सभासदोऽयम्। तत्र चत्वारो नृपा श्रीधरसेनसंज्ञकाः। प्रथमस्य कालः 500 ख्रिष्टाब्दः। अन्तिमस्य 650 ख्रिष्टाब्दः। तेषु कतमस्य श्रीधरस्य समये भट्टिरजायतेति निश्चेतव्यम्। द्वितीयेन भट्टिनामकाय विदुषे किञ्चिद् भूमिर्दत्तेति शिलालेखैर्ज्ञायते। स एव भट्टिकाव्यविधाता चेत् कालोऽस्य 610 ख्रिष्टाब्दः।

भट्टिस्वामि-महोदयस्य जीवनवृत्तम्-

स्वजीवनवृत्तप्रसेङ्गे ग्रन्थनिर्माण प्रसङ्गे वा भट्टिस्वामिना स्वग्रन्थे लिखितम्-''काव्यमिदं लिखितं मया बलभ्यां श्रीधरसेननरेन्द्रपालितायाम्'' काव्यरचनायाः उद्देश्यं मनोविनोदेन सह संस्कृतव्याकरणस्य ज्ञानम्। तदिदमुद्देश्यं पूर्णमपि भवति।

भट्टिस्वामि-महोदस्य रचना-

भट्टिस्वामिनो 'भट्टिकाव्यम्' शास्त्रकाव्येषु प्रसिद्धतरम्। काव्यमिदं भट्टिस्वामिना प्रणीतम्। तन्नाम्नैव च अस्य प्रसिद्धिरपि जाता। इदं काव्यं रावणवधनाम्नापि प्रथते। अस्य एका एव रचना मिलति। अत्र 20 विंशतिसर्गाः 3624 श्लोकाः। राघवचरितमाध्यमेनात्र सरलरूपेण व्याकरणशिक्षा प्रदत्ता। साहित्यविषया अपि सन्निविष्टाः। शब्दालङ्कारयमकालङ्कारमाधुर्यगुणभाषाविमर्शादयोऽपि विवेचिताः। विभीषणवाक्येषु राजनीतिः शूर्पणखावाक्येषु कौटिल्यमृतुवर्णनं प्रभातवर्णनञ्च दर्शनीयमेव।

भट्टिस्वामि-महोदस्य काव्यशैली-

भट्टिः काव्यमिदं किमपि प्रचीनमीदृशं काव्यमालोक्यैव प्रणीतवान्। पातञ्जलमहाभाष्ये कतिपयानि व्याकरणप्रयोगपराणि पद्यान्युद्धृतानि सन्ति तेन ज्ञायते यत् पतञ्जलेरपि समये किमपि तादृशं काव्यमासीत्, तदेव किमपि काव्यमाधारीकृत्य भट्टिना स्वं काव्यं विरचितं स्यात्। कविना काव्यगुणा अपि समावेशिताः। अस्य काव्यस्य दशमे सर्गे शब्दार्थालङ्काराणां निवेशेन एकादशे सर्गे माधुर्यगुणस्य समावेशेन चास्य गौरवमेधते। छन्दांसि लघून्येवाधिकानि, अलङ्कारा उपमारूपकोत्प्रेक्षादयः। श्लोकोऽयमेकावलेरुदाहरणरूपेणावलोक्यते ग्रन्थान्तरेषु-

'न तञ्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः॥

• • •

27. जयदेवः-(1200)

जयदेवस्य समयः-

श्रीकृष्णस्य परमभक्तः जयदेवः मधुरकोमलकान्तपदावलीनिर्माणरसिकः लक्ष्मणसेननामकस्य वङ्गीयस्य राज्ञः सभायामासीत्। लक्ष्मणसेनस्य संवत् वङ्गदेशे बिहारप्रान्ते च सर्वत्र प्रचलति। लक्ष्मणसंवतखोष्टाब्दयोरन्तरं 1109 मितं वर्तते। अतो लख्मणसेननृपतेर्द्वादशशतकप्रारम्भ एव कालः। स एव कालो जयदेवस्यापि मन्यते।

जयदेवस्य देशः-

अयं कविः लक्ष्मणसेनसभास्थः केन्दुबिल्वनिवासी च आसीत्। स्नेहस्योदात्ततात्रणे एव जयदेवस्य साफल्यम्।

जयदेवस्य जीवनवृत्तम्-

भक्तकविजयदेवस्य गीतगोविन्दस्य प्रभावो केवलमुत्तरभारतीयसाहित्येऽपितु गुर्जरकन्नडादिदक्षिणप्रान्तसाहित्येऽपि प्रकटमुपलक्ष्यते। चण्डीदासविद्यापतिप्रभृतयस्तु कवयो गीतगोविन्दमुपजीव्यैव विश्ववन्धं पदमवापुः। कतिचन विद्वांसोऽत्र ग्रन्थे 'गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली' इत्यादि शृङ्गारप्रधानपद्यानि दृष्ट्वा अश्लीलतां वदन्ति। वस्तुतस्तु अत्रग्रन्थे श्रीकृष्णो नाम परमात्मतत्त्वं गोपिकाश्च जीवतत्त्वानि, तयोर्मिलनमत्र वर्णितमिति परे। अत्र श्रीकृष्णस्य गोपीभिः सह लौकिक्यः क्रीडा एव यदि वर्णितास्तदात्र काश्लीलता? कुमारसम्भवे, शिशुपाले, नैषधे च महाकाव्ये तत्र तत्र कामसूत्रमनुसृत्य वर्णिता सम्भोगप्रकाराः यदि क्षम्यन्ते तदाऽत्रत्यःशृङ्गारः कथं न क्षम्येत।

जयदेवस्य रचना-

गीतगोविन्दं ग्रन्थं (12) द्वादशसर्गात्मकं खण्डकाव्यम्। यद्यपि सर्वथेव काव्यकोटौ नायाति यतोऽत्र चरितं न वर्ण्यतेऽथापि वर्णनपरकखण्डकाव्यत्वमस्य स्वीकर्त्तव्यमेव। केचिदाधुनिकास्तु गीतगोविन्दं गीतिनाट्यं मन्यन्ते। अर्थात् गीतगोविन्दं शुद्धगीतिकाव्यशुद्धनाट्ययोरन्तरे वर्त्तते। अस्य ग्रन्थस्य निर्माणं द्वादशशताब्द्यां अभवत्। इदं गीतगोविन्दं शुद्धनाट्यस्यानुगामि मन्तुं शक्यते। अत्र संवादः नास्ति। गीतगोविन्दस्य सम्पूर्णसर्गाः गीतमयाः विद्यते। सर्गाणां कथां परस्परं योजयितुं कतिचन श्लोकाः अपि सन्ति। अत्र सरसमधुरकवितायाः पराकाष्ठा निदर्शिता। भक्तेः सरसकवितायाश्चैकत्र समावेशो यथा गीतगोविन्दे न तथा क्वापि परत्रेति कथनं नानुपयुक्तम्। स्वयमुक्तं जयदेवेन-

'यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्।
मधुरकोमलकान्तपदावलिं शृणु तदा जयदेवसरस्वतीम्॥'

जयदेवस्य काव्यशैली-

उपमोत्प्रेक्षादयोऽलङ्काराश्चात्र बाहुल्येन दृश्यन्ते। स्नेहस्योदात्ततात्रणे एव जयदेवस्य साफल्यम्। यथा-

'दृशौ तव मदालसे वदनमिन्दुसन्दीपकं
गतिर्जनमनोरमा विजितरम्भमूरुद्वयम्।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा
वहो विबुधयौवतं वहसि तन्वि पृथ्वीगता।।'

श्लेषेण देवाङ्गनानिर्देशः मुद्रलङ्कारेण मुद्रालङ्कारेण वृत्तनिर्देशःसहृदयानन्दाय एव। यथा-

'वहति च वलितविलोचनजलभरमाननकमलमुदारम्।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम्।।'

विरहिण्याः राधिकायाश्चित्रणे कवि कियान् सफल इति सुधीभिरूह्यमेव। अत्रत्यानि गीतानि रागतालशुद्धानि परिष्कृतपदानि नितान्तमधुराणि च सन्ति।

• • •

28. राजशेखरः-(993)

राजशेखरस्य समयः-

राजशेखरः स्वनाटकप्रस्तावनासुस्वजीवनसम्बन्धे यदुक्तवांस्तदाधारेण यायावरवंशेऽस्य जन्माऽसीत्,

यो वंशोऽकालजलदसुरानन्दतरलकविराजादीनां जन्मग्रहणेन गौरवान्वितः कथ्यते। महेन्द्रपालस्य आश्रये विद्धशालभञ्जिकाया अभिनयो जातः। महेन्द्रपालानन्तरमयं पुनस्तत्तनयस्य महीपालस्य सभ्यभावेन स्थितो यदादेशेन बालभारतस्य अभिनयः प्रथमं पदमधत्त। एषां राज्ञां समयस्य पर्यालोचनया राजशेखरस्य कालः खीष्टनवमशतकस्यावसानभागो दशमशतकस्य पूर्वभागश्च सिद्ध्यति। यं अयं महेन्द्रपालं स्मरति तेन कारितौ शिलालेखौ 903,907 खीष्टाब्दयोरुत्कीर्णौ।, नवमशतकोत्पन्नम् आनन्दवर्धनमयमुद्धरति। मुञ्च (975-993) कृपाश्रयेण धनञ्जयेन चायं स्मर्यते, सर्वमपीदम् उक्तम् अनुमोदयति।

राजशेखरस्य देशः-राजशेखरः महाराष्ट्रदेशीयः आसीत्। सः अकालजलदस्य पौत्रः दर्दुकस्य शीलवत्याश्च पुत्र आसीत्। अयं क्षत्रियचौहानवंशोद्भवाम् अवन्तिसुन्दरीं नाम ललनामुपयेमे। अयं कान्यकुब्जराजस्य उपाध्यायपदमलमकृत। एतदाश्रयदातुर्नाम महेन्द्रपाल इत्यासीद्यः प्रतीहारवंश्यनृपेषु गौरवशाली समाख्यातः। एतदादेशेनैव बालरामायणं प्रथममभिनीयते स्म।

राजशेखरस्य जीवनवृत्तम्-

राजशेखरः यदि नाटकस्थाने महाकाव्यं निरमास्यत्तदा साफल्यमधिकमध्यगमिष्यदिति कथनं सत्यपि कटुत्वे सत्यसमीपगतम्। यथा स्वविषये राजशेखरेण-

'बभूव वल्मीकभवः पुरा कविस्ततः प्रपेदे भुवि भर्तृमेण्ठताम्।
स्थितः पुनर्यो भवभूतिरेखया स राजते सम्प्रति राजशेखरः।।

राजशेखरः संस्कृतप्राकृतपैशाच्यपभ्रंशाभिधासु चतसृष्वपि भाषासु निपुणो विद्वानत एव तस्मिन् कविराज इति संज्ञाऽन्वर्था। तन्मतानुसारेणैकाधिकभाषायां सफलकविरेव कविराज इति कथ्यते। राजशेखरस्य शब्दगुम्फनव्यग्रता तस्य शब्दकवित्वं प्रकाशयति। वर्णननैपुण्यं पुनस्तस्य तत्राप्यव्याहतमेव।

राजशेखरस्य रचना-

बालरामायणगतं 'विद्धि नः षट् प्रबन्धान्' इति वचनमाधारीकृत्य राजशेखरेण षट् ग्रन्था रचिता इति वक्तुं शक्यते। यथा-विवेचितः-आचार्यश्रीरामचन्द्रमिश्रमहोदयाः स्व-संस्कृतसाहित्येतिहासे-

1. **काव्यमीमांसा**-कविकर्त्तव्यतत्स्वरूपादिप्रतिपादनाय रचितः साहित्यविद्याविषयको हृद्यो ग्रन्थः। अत्र कविताविषयकं बहु ज्ञातव्यं निर्दिष्टम्।
2. **बालरामायणम्**-बालरामायणे रामायणस्य कथा नाटकीयरूपमापादिता। एतत्प्रणयने कविः सर्वमपि स्वं पाडित्यं प्रदर्शितवान्। भवभूतेः कवित्वमनुध्याय प्रवृत्तोऽप्ययं वर्णनबाहुल्येन तमतिशेतुमयतिष्ट। अत्रत्या कथा तदङ्कनामभिरप्याख्यातेति तानि निर्दिश्यन्ते- 1. प्रतिज्ञापौलस्त्यः, 2. रामरावणीयः, 3. विलक्षलङ्केश्वरः, 4. भार्गवभङ्गः, 5. उन्मत्तदशाननः, 6. निर्दोषदशरथः, 7.असमपराक्रम, 8.वीरविलासः, 9.रावणविद्रावणः, 10. सानन्दरघुनन्दनः।
3. **बालभारतम्**-बालभारतस्य द्वावेवाङ्कौ लभ्येते, मन्ये तत्रापि महाभारतस्य कथोपनिबद्धा स्यात्।
4. **कर्पूरमञ्जरी**-कर्पूरमञ्जरीसट्टके कर्पूरमञ्जर्या सह राज्ञः चण्डपालस्य प्रेमकथाङ्किता। सेयं कथोदयनकथासम्बद्धरत्नावल्यादिसुप्रसिद्धनाटकादीनि स्मारयति।
5. **विद्धशालभञ्जिका**- विद्धशालभञ्जिकाऽपि प्रेमकथावर्णनपरैव चतुरङ्का नाटिका।
6. **हरविलासः**-हरविलासस्योद्धरणं हेमचन्द्रेण काव्यानुशासनविवेके दत्तम्। तावतैव तस्य सत्त्वमनुमीयते।

राजशेखरस्य काव्यशैली-

राजशेखरकृतेषु रूपकेषु गतिशीलताया अभावेऽपि पात्राणां सजीवता न हीयते। रसपरिपाकः, हृदयभावाविष्कारपाटवं, प्रकृतमनुष्ययोः स्वरसवाही परिचयश्चात्र नास्तीति अस्य कवित्वशक्तावक्षतायामपि रूपकाणि समधिककाव्यलक्षणयोगीनीव प्रतीयन्ते। डॉ कीथमतानुसारेण यद्यनुप्रासः कविताया: प्रमाणं मन्यते तदा राजशेखरस्य महाकवित्वं सिद्धं भवति। संस्कृतप्राकृतच्छन्दसां नानाविधानां सम्यसमयकप्रयोगे कवेरस्य महान् संरम्भो दृश्यते। अयं लोकभाषाशब्दान् संस्कृते प्रयुङ्क्ते। अन्त्यानुप्रासस्यापि कविनाऽनेन प्रयोगः प्राचुर्येण कृतः। यथा सीतारूपवर्णने कविचमत्कारो दृश्यताम्-

'इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव देहद्युतिः।

पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव॥'

• • •

29. कुमारदासः-(600)

कुमारदासस्य समयः-

डॉ0 वासुदेवशरण-अग्रवाल-मतेऽस्य कुमारदासस्य समयः 700 ख्रिष्टाब्दः। जनाश्रयी छन्दोविचितिनामके ग्रन्थे जानकीहरणस्य श्लोकाः समुद्धृताः। उक्तग्रन्थस्य समयः पं0 बलदेवोपाध्यायमते 600 ख्रिष्टाब्दस्य पूर्वार्धे एव। अतः कुमारदासस्य कालः तस्मात् प्रागेव। कुमारदासप्रेम्णा कालिदासः लङ्कामगमत्। तत्र कथञ्चित् तत्याज जीवनम्। कुमारदासोऽपि तमनुजगामेति किंवदन्ती सिंघलग्रन्थेषु चलति। कालभेदाद् विश्वासानर्हा।

कुमारदासस्य देशः-

कुमारदासः लङ्कायामुत्पन्नो बभूव। तस्य पितुर्नाम मानितः लङ्काधिपतेः कुमारमणेरयं सेनानी आसीत्। कुमारदासस्य बाल्ये एव स पञ्चत्वमापः(20/60)मातुलपालितोऽयं जानकीहरणं नाम काव्यं जग्रन्थ इति जानकीहरणादेव(20/61-62) ज्ञायते।

कुमारदासस्यजीवनवृत्तम्-

शाङ्र्गधरपद्धतौ,सुभाषितावल्यां,सदुक्तिकर्णामृते,पदचन्द्रिकायां,सर्वस्वकामधेनौ, गणरत्नमहोदधौ, उणादिसूत्रवृत्तौ, काव्यानुशासने,शृगारप्रकाशे, काव्यमीमांसायां च उद्धृतः कुमारदासः लङ्कायामुत्पन्नो बभूव।

कुमारदासस्य रचना-

जानकीहरणम् इयमेका एव प्राप्ता रचना कवेः। अत्र 20 विंशति सर्गाः। रामायणीया एवात्र कथा। कालिदासापेक्षया भारविप्रभावोऽत्राधिकः । एकाक्षर-द्व्यक्षर- सर्वतोभद्रमुरजबन्ध-निरोष्ठ्यादिवर्णने कविः यत्नवान्। सन्ध्या-सूर्यास्त-चन्द्रोदयादिवर्णने प्रकृतिप्रेत लक्ष्यते कवेः। यथा-

'विरामः शर्वर्या हिमरुचिरवाप्तोऽस्तशिखरं
किमद्यापि स्वापस्तव मुकुलिताम्भोरुहदृशः।
इतीवायं भानुः प्रमदवनपर्यन्तसरसीं
करेणाताम्रेण प्रहरति विबोधाय तरुणः॥'

कुमारदासस्य काव्यशैली-

पितृसमयोः सीतारामयोः स्वच्छन्दां रतिलीलां चित्रयन् कविः विस्मरति श्रीमदभिनवगुप्त-पदाचार्यसिद्धान्तान् रसनियामकानिति महदाश्चर्यम्।

• • •

30. बिल्हण:-(1100)

बिल्हणस्य समय:-

विल्हण: स्वकृते विक्रमाङ्कदेवचरितं नाम महाकाव्ये अन्तिमेऽष्टादशसर्गे स्वीयं चरितं विस्तरेणोपनिबद्धवान्. ततोऽवगम्यते यद् अस्य समय: एकादशख्रिष्टाब्दस्योत्तरार्ध: इति श्री पं0बलदेवोपाध्याया:। विक्रमादित्यषष्ठस्य काल: 1076 त: 1127 ई0 पर्यन्तं मन्यतेऽतोऽस्य कवे: समय: एकादशशतकोत्तरभागो द्वादशशतकस्यादिभागश्च निश्चीयते इति आचार्य श्रीरामचन्द्रमिश्रमहोदया:।

बिल्हणस्य देश:-

अस्य कवे: प्रपितामह: मुक्तिकलश: आसीत्। स: राजकमलस्य पौत्र: ज्येष्ठकलशस्य पुत्र: मध्यमो बिल्हण:। माता च अस्य नागदेवी। अस्य भ्रातरौ इष्टराय: आनन्दश्चेति द्वौ आस्ताम्। अयं कश्मीरे एव शिक्षित:। कंसरस्य कविताया श्चोत्पत्तिस्थानं कश्मीरदेश एवेति बिल्हण:। आश्रयदातारं कमपि गुणिनं राजानमन्विष्यन्नयं मथुरा-क्रान्यकुब्ज-प्रयाग-काशी-धारादीनि स्थानानि गत्वा दक्षिणभारतस्थितं कल्याणनगरं प्राप्तवान्, यत्र तदा चालुक्यवंश्य: प्रसिद्धो राजा विक्रमादित्य: षष्ठ: शासनं करोति स्म। भोजो धारानरेशो नानेन दृष्टो यदाऽयं धारामायातो यतोऽस्य धारागमनात् पूर्वमेव स दिवं गतवानासीत्।

बिल्हणस्य जीवनवृत्तम्-

नाटिकायां शृङ्गारस्य पञ्चाशिकायां वियोगस्य प्राधान्यं निखिले भारते भ्रमन् कवि: वृन्दावनं, मथुरां, प्रयागं, काशीं, सोमनाथादिकं चाजगाम। समयतस्तत् स्थानानि वर्णयति-

'यत्र स्त्रीणां मसृणघुसृणालेपनोष्णा कुचश्री-
स्ता: कस्तूरीपरिमलमुच: पट्टिका राङ्कवाणाम्।
नौपृष्ठस्था: शिशिरसमये ते वितस्ताजलान्त:
स्नानावासा: प्रचुरमपि च स्वर्गसौख्यं दिशन्ति॥'

बिल्हणस्य रचना-

अस्य रचनात्रयमक्षिपथमायाति-1.विक्रमाङ्कदेवचरितम्, 2.कर्णसुन्दरीनाटिका, 3. चौरपञ्चाशिका च। विल्हणकृते विक्रमाङ्कदेवचरितनामके काव्येऽष्टादश सर्गा: सन्ति। अत्र चालुक्यवंश्यस्य विक्रमादित्यषष्ठस्य जीवनचरितं प्रसङ्गतस्तत्पूर्वजानां च चरितं निबद्धं विद्यते। ऐतिहासिकघटनानां निर्देशे विल्हणस्तथा सावधानोऽवर्त्तत यथा चालुक्यवंशस्येतिहासोऽत्र स्फुटावभासतां गत:। अत्र काव्ये कविना वैदर्भमार्गस्यानुसरणं कुर्वता माधुर्यस्य प्रसादस्य च प्रयोगे प्रचुरं प्रयतितम्। वीररसस्य प्रधान्येऽपि शृङ्गारादिरसस्तदङ्गतया निपुणं निबद्ध:। आहवमल्लस्य पुत्रत्रये मध्यम एव काव्यनायक: चोलवंशजा चन्दनदेवी च नायिका।

बिल्हणस्य काव्यशैली-

कालिदासेन यथा रघुवंशे इन्दुमतीस्वयंवरवर्णनं कृतं तथैव विल्हणेनापि स्वयंवरस्य

वर्णनं कृतम्। समतानां दर्शनेन सुखमवगन्तुं शक्यते, यद् विल्हणेन कालिदासकाव्यानि निपुणमनुशील्यैव स्वीयं काव्यं निर्मितम्। वसन्त-पुष्पावचय-सहस्नान-मधुपान-वर्षा-मृगयादीनां सुन्दरं चित्रं विल्हणस्य काव्ये वर्तते। भाषाया: प्राञ्जलता, सरलता स्पष्टता चात्रावलोकनीया। वैदर्भी अत्र विराजते।

• • •

31. अमरूक:-(800)

अमरूकस्य समय:-

विराजते तत्रभवान् शृङ्गारमन्दराचलोऽमरुक:। अस्य श्लोका एव प्रबन्धायमाना इति समीक्षकप्रवरा:। परं कुत्र कदा वाऽसौ जन्म लेभे? कं जनकत्वेन भूषयति स्म? का शारदाऽस्य मातेत्यादिकं सर्वं तिमिराच्छन्नमेव। धन्येयं वाणी या रसिकरसनासु नर्तकीवाद्याऽपि नृत्यति। प्रबन्धकाव्यमलिखच्चेत् परिभाषाप्रकरणं लक्षणग्रन्थानां किञ्चिदन्यदिवाभविष्यत्। अमरुक: नवमशतकत: पूर्वमवर्त्ततेति कथयितुं शक्यते, अतो 850 खीष्टीयकालिको ध्वनिकार:-'मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिन: कवयो दृश्यन्ते। यथाऽमरुकस्य कवेर्मुक्तका:शृङ्गारस्यन्दिन: प्रबन्धायमाना: प्रसिद्धा एव।' इत्युक्तवान्।

वामनेनापि 800 ई0 समुद्भूतेनास्य पदयमुदाहृतम्, अतोऽस्य समय: अष्टमं शतकं मन्यते, तत: पूर्वमपि किञ्चित् कथयितुं शक्यते।

अमरूकस्य जीवनवृत्तम्/देश:-

अनेनशृङ्गाररसानुनुकूला: प्रणयव्यवहारा: कामिजनमनोभावश्चैव केवलं वर्णिता:, परं तत्रैव तावत्याकर्षकतोत्पादिता यदयं सुधीसमाजे गौरवमभजत।

अमरूकस्य रचना-

अस्य महाकवे: काव्यं तन्नाम्नैव 'अमरुकशतकम्' इति ख्यातम्। अत्र प्रतिश्लोकं शृङ्गारभागीरथी प्रवहति। यथा च आनन्दवर्धन:-

मुक्तेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिन: कवयो दृश्यन्ते। यथा अमरूकस्य कवे: मुक्तका:शृङ्गाररसस्यन्दिन: प्रबन्धायमाणा प्रसिद्धा एव। शार्दूलविक्रीडितमत्र वृत्तम्। भाषा समासरहिता स्वल्पसमासा वा। अलङ्कारा:शृङ्गारपोषका:। बहुभिरनुकृता अस्य श्लोका: संस्कृतसाहित्ये प्रभाविशिष्टा एतादृशा: श्लोका: सामान्येन न मिलन्ति-

'लिखिन्नास्ते भूमिं बहिरवनत: प्राणदयितो
निराहारा: सख्य: सततरुदितोच्छूननयना:।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना।।'

अर्जुनवर्मदेवस्य रसिकसञ्जीवनी वेमभूपालस्य शृङ्गारदीपिका चास्य टीका: शोभना:।

अमरूकस्य काव्यशैली

शृङ्गाररसानुकूलाः, प्रणयव्यवहाराः, ब्रह्मज्ञानानुकूला, व्यञ्जनाशक्तिरतिप्रौढा सन्ति।

• • •

32. श्रीकृष्णमिश्रः-(1100)

श्रीकृष्णमिश्रस्य समयः-

प्रबोधचन्द्रोदय-ग्रन्थस्य लेखकः श्रीकृष्णमिश्रः स्व-ग्रन्थस्य प्रस्तावनायां कीर्त्तिवर्मण उल्लेखो दृश्यते। कीर्त्तिवर्मणः समयश्च 1049 तमखीष्टाब्दतः 1100 तमखीष्टाब्दपर्यन्तमिति पुरातत्त्वविदो वदन्ति। अनेनैव कीर्त्तिवर्मणा 1065 खीष्टाब्दसमीपे कर्णवर्मा जितः। अस्य कर्णवर्मविजयस्योल्लेखोऽपि प्रबोधचन्द्रोदय-प्रस्तावनायां विद्यते। अतः प्रबोधचन्द्रोदय-प्रणेतुः श्रीकृष्णमिश्रस्य जीवनकाल 1100 एकादशशतकयोत्तरार्धभागोऽवधारयितुं शक्यते।

श्रीकृष्णमिश्रस्य देशः-

अयं श्रीकृष्णमिश्रः बङ्गदेशोद्भव इति वस्तुवृत्तविदः।

श्रीकृष्णमिश्रस्य जीवनवृत्तम्-

एतत्प्रस्तावनायां प्रसङ्गाद् 'नृपकीर्त्तिवर्मणा नृपकर्णदेवो जितः' इत्येवंविध उल्लेखोऽवाप्यते।

श्रीकृष्णमिश्रस्य रचना-

कृष्णमिश्रकृतं प्रबोधचद्रोदयाभिधानं नाटकं रूपकाख्यानतया संस्कृते महत्त्वस्य पदमर्हति। स्वशिष्याणामन्यतमस्य मूढमतेरद्वैतदर्शनशिक्षायै किल कृष्णमिश्र एतत् प्रणीतवान्। श्रीकृष्णमिश्रस्यैकमेव प्रबोधचद्रोदयाभिधानं रूपकं प्राप्यते। इदं रूपकं प्रतीकेषु प्रथमत्वेन सरसरचनाशालित्वेन च प्रसिद्धम्। अमूर्त्ता भावा धर्मादयोऽत्र मूर्त्तप्राणिरूपतया कल्पिताः। इदमेव चास्य प्रतीकरूपकत्वम्। अस्यैव सरसस्य सरलस्य च ग्रन्थरत्नस्यानुकरणे तैस्तैः कविपण्डितैः चैतन्यचन्द्रोदयविद्यापरिणयामृतोदयादीनि प्रतीकरूपकाणि विरचितानीति संस्कृते प्रतीकरूपकप्रणयनपथि प्रदर्शकोऽयं मन्यते।

प्रबोधचन्द्रोदयकथावस्तु-

कामक्रोधलोभादिसहितो महामोहो नाम नृपः काश्यां राज्यमकरोत्। तस्य मत्यादिसमन्वितेन विवेकेन सह महान् विरोध आसीत्। महामोहो विवेकं स्वदेशाद् बहिष्कृतवान्। तस्मिन्नेव काले आकाशवाण्यभूद्यत् कालेनास्य विवेकस्योपनिषदा सह संसर्गे प्रबोधस्य जन्मनि जाते तेन महमोहस्य उन्मूलनं शक्यक्रियं भविष्यति। अन्ततोगत्वा सत्पक्षस्य विजयोऽसत् पक्षस्य च पराजयो भवति। एवं च मङ्गलमयी नाटकसमाप्तिर्भवति।

श्रीकृष्णमिश्रस्य काव्यशैली-

प्रबोधचन्द्रोदये स्वशिष्यान्यतमस्य कस्यचन मन्दमतेः शिक्षायै श्रीकृष्णमिश्रोऽमूर्त्तान्

धर्मादिभावान् मूर्त्तमानवभावेन परिकल्प्य सरसया शैल्या अद्वैतमतप्रधान्यं प्रदर्शितवान्। अस्य नाटकस्य कविता नितान्तरसपेशला सरलपदा च। यथा-

'अपि यदि विशिखाः शरासनं वा
कुसुममयं ससुरासुरं तथापि।
मम जगदखिलं वरोरु नाज्ञा
मिदमतिलङ्घ्य धृतिं मुहूर्त्तमेति।।'

• • •

33. वेदव्यासः-(400 ई0 पू0)

वेदव्यासस्य समयः-

साम्प्रतिकस्य महाभारतस्य रचनाकालात् नैकशताब्दीभ्यः पूर्वमासीदिति निर्विकल्पं सिद्ध्यति। मूलमहाभारतस्य जयाभिधानस्य वर्त्तमानमहाभारतात् पूर्वकालिकत्वं निश्चितम्। अत्र वर्त्तमानमहाभारतस्य रचनाकालसम्बन्धे विचारणीयमस्ति,तत्र-

1. खीष्टैकादशशतके क्षेमेन्द्रप्रसवा 'भारतमञ्जरी' ग्रन्थकथाया वर्त्तमानमहाभारतस्य एकादशशतकस्य पूर्वकालिकत्वं सर्वथा सिद्धम्।
2. अष्टमशतकोत्तराधे जाता आद्यशंकराचार्या वेदादयऽनधिकृतानां (स्त्रीशूद्राणां)धर्मज्ञानाय महाभारतं स्मृतित्वेन प्रादिशन्ति। तेन महाभारतस्य ततः पूर्वकालित्वं सिद्धम्।
3. अष्टमशतकोत्पन्नाः कुमारिभट्टाः, सप्तमशतकोत्पन्नाः बाणसुबन्धुप्रभृतयः कवयः महाभारतस्य बहूनि पर्वाणि स्मरन्ति।
4. पञ्चमशतकीये आश्वलायनगृह्यसूत्रे, चतुः शतकीये बौधायनधर्मसूत्रे च महाभारतोल्लेखाः वीक्ष्यन्ते।

अतः सर्वसमीक्षया महाभारतम् 400 ई0 पू0 समयतः पूर्वमेव निर्मितमिति प्रतीयते। अपि च, प्रकृतमहाभारतस्य कर्ता वेदान्तकृत्(ब्रह्मसूत्र रचयिता)वेदविद् महामुनिर्व्यासः श्रीमद्भगवद् गीतायाः उपदेष्ट्रा श्रीकृष्णेन समकालभवः आसीद् इति स्पष्टमेव।

वेदव्यासस्य देशः-

वेदव्यास एव कर्ता महाभारतस्य इति परम्परा सुभाषितग्रन्थाश्च। पराशरोऽस्य पिता माता च सत्यवती। द्वीपे जन्मसत्वात् द्वैपायन, शरीररङ्गात् कृष्णमुनिः कृष्णद्वैपायनो वा, वेदानां विभागाद् वेदव्यासश्च। ग्रन्थस्यास्य निर्माणे भगवतो गणेशस्यापि महद्योगदानमस्ति। पुराणेषु अयमपि अवतारूपेण स्वीकृतः। प्रचीनभारतस्य इमां प्रतिभां नमन्त्याधुनिकाः पुरातनाश्च समानरूपेण।

वेदव्यासस्यजीवनवृत्तम्-

वेदव्यासः नास्त्ययमितिहासकार एव। भूगोलवेत्ता, बहुभाषाज्ञाता, शस्त्रशास्त्रमर्मज्ञः,

सेनापरिचितः, कलानिष्णातः, समाजशास्त्री, लोकाचारज्ञः, अर्थशास्त्री, कामशास्त्रज्ञः धर्मशास्त्री च आसीत्।

वेदव्यासस्य रचना-

महाभारतं भारतीयसभ्यतायाः संस्कृतेश्च भव्यस्वरूपबोधाय ग्रन्थरत्नमिदमावश्यकम्। भगवदगीता-विष्णुसहस्रनाम-अनुगीता-भीष्मस्तवराज-गजेन्द्रमोक्ष-संज्ञकं चरत्नप्रदानादेवास्य पञ्चमवेदता। धर्मार्थकाममोक्षविषयकसम्यक् प्रबोधोऽत्रैव द्रष्टुं शक्यते। महाभारते लक्ष्यैकश्लोकाः सन्ति। अस्य ग्रन्थस्य मौलिकं रूपं जयनाम्ना प्रसिद्धम्। पर्वणि विभक्तमिदं ग्रन्थम्। यथा-

आदि-सभा-वन-विराट्-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रमवासी-मौसल-महाप्रस्थानिक-स्वर्गारोहणाभिधपर्वाणि तानि च अष्टादशसंख्यकानि।

वेदव्यासस्य काव्यशैली-

महाभारते कविना भौतिकजीवनस्य निःसारता एवोट्टङ्किता। मोक्ष एव ज्यायान्। न केवलमिदं काव्यमपि तु अर्थशास्त्रं कामशास्त्रं च। यथा स्वयं भगवान् वेदव्यासः-

'अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत्।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना॥'

• • •

34. रत्नाकरः-(900)

रत्नाकरस्य समयः-

पञ्चाशत् सर्गनिबद्धं बृहत्कायं खलु हरविजयं नाम महाकाव्यं 850 मितख्रीष्टसंवत्सरस्य समीपवर्तिनि काले किल 'रत्नाकरः' चकार।

रत्नाकरस्य देशः/जीवनवृत्तम्-

हरविजयप्रणेता महाकवी रत्नाकरः कश्मीरानलङ्कृतवान्। अस्य पितुर्नाम अमृतभानुरित्यासीत्। रत्नाकरस्य आश्रयभूतो राजा चिप्पटजयादित्य आसीत्। रत्नाकरोक्त्या स राजा बालबृहस्पत्युपाधिक आसीत्, यतोऽसौ-'बालबृहस्पत्यनुजीविनः' इति स्वविषये लिखति। चिरजीविना रत्नाकरेण जयादित्यानन्तरं सम्राडवन्तिवर्माऽऽश्रितो यथोक्तम्-

'मुक्ताकणः शिवस्वामी कविरानदवर्धनः।
प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः॥'

अवन्तिवर्मा च 855 तः 884 पर्यन्तं राज्यं कृतवान् अतो रत्नाकरस्य समयः नवमशतेवर्तित्वं सुप्रतीतम्।

रत्नाकरस्य रचना-

रत्नाकरस्य रचना-हरवजयकाव्यं संस्कृतकाव्येषु परिमाणतो गुणतश्च श्रेष्ठं मन्यते। अत्र

पञ्चाशत् सर्गाः सन्ति 432। संख्यकानि च पद्यानि विद्यन्ते। रत्नाकरस्य समये माघस्य महती ख्यातिरासीत्, माघस्य प्रसिद्धिमालोक्य तत्प्रतिस्पर्धयैव रत्नाकरेण हरविजयं प्रणीतम्।

रत्नाकरस्य काव्यशैली-

कल्हणेनास्य काव्यस्योल्लेखः कृतः, अलकेनात्र व्याख्या लिखिता, क्षेमेन्द्रेणात्र प्रयुक्तायाः वसन्ततिलकायाः प्रशंसा कृता। कविना शास्त्रीयपाण्डित्यस्य पराकाष्ठा प्रदर्शिता।

• • •

35. हर्षवर्द्धनः-(700)

हर्षवर्द्धनस्य समयः-

शास्त्रीयपद्धतिमाश्रित्य विरचितेषु दृश्यकाव्येषु सम्राजो हर्षवर्द्धनस्य 'रत्नावली' नाम दृश्यकाव्यमेकं श्रेष्ठं दृश्यकाव्यमस्ति। तच्छ्रेष्ठतायाः कारणमिदमस्ति यत् मत्र तेषामुदाहरणानां संख्याधिकतमा वर्तते, अर्थात् नाट्यशास्त्रं कस्यचन रूपकस्य विशिष्टतायाः प्रदर्शनाय अपेक्षते। महाराजहर्षवर्द्धनः प्रभाकरवर्धनाद् यशोमत्यामजनि। अस्य भ्राता राज्यवर्धनः कनिष्ठा भगिनी च राज्यश्रीः आस्ताम्। दुर्दैववशाद्राज्यवर्धनः शशाङ्कनामकेन वङ्गीयनृपतिना छलेन निहतः। तदनन्तरं हर्षवर्धनो राजा वभूव। अस्य राजधानी स्थाण्वीश्वरनामकं स्थानमासीत्। अस्य राज्यकालः 606-647 खीष्टाब्दमासीदिति प्रतीतम्।

हर्षवर्द्धनस्य देशः-

अस्य राजधानी 'स्थाण्वीश्वर'नामकं स्थानमासीत्। हर्षवर्द्धनः प्रभाकरवर्धनस्य कनिष्ठपुत्रः आसीत्। तस्य अग्रजः राज्यवर्धनः आसीत्। हर्षवर्धनस्य भगिनी राज्यश्री आसीत्।

हर्षवर्द्धनस्य जीवनवृत्तम्-

पञ्चनदप्रदेशे बहूपद्रवतो हूणान् पराजेतुं प्रेषिते भ्रातरि तमनुगच्छन्नयं मध्येमार्गं पितुरस्वास्थ्यं श्रुत्वा राजधानीं परावृत्तः सन् पितुर्मरणे जाते तदौर्ध्वदेहिकं कृत्वा यावद् भ्रातुरागमनं राज्यं शशास, आगते च तस्मिंस्तद्राज्यं भरतो रामायेव तस्मै प्रतिपादयामास। दुर्दैववशाद्राज्यवर्धनः शशाङ्कनामकेन वङ्गीयनृपतिना छलेन निहतः। तदनन्तरं हर्षवर्धनो राजा वभूव। अस्य राजधानी स्थाण्वीश्वरनामकं स्थानमासीत्। अस्य राज्यकालः 606-647 खीष्टाब्दमासीदिति प्रतीतम्। तस्य शैल्या विशिष्टतेयं यत् तत्र चित्रात्मकानां ध्वन्यात्मकानाञ्च पदानां प्रयोगोऽभ्युपगतः। तधुरभावनाभिव्यक्त्यर्थं वैदर्भी ह्यपेक्ष्यते।

हर्षवर्द्धनस्य रचना-

हर्षवर्द्धनस्य रूपकत्रयं प्रथते-1.रत्नावली,2.प्रियदर्शिका,3.नागानन्दञ्च। त्रिष्वपि रूपकेषु प्रस्तावनायां हर्षस्य नाम स्मर्यते, एतेनैषामेककर्त्तृकत्वं सिद्धम्।पद्यमेकं रत्नावलीप्रियदर्शिकयोः समानम्,पद्यद्वयं च प्रियदर्शिकानागानन्दयोः समानमिति समाना शैली, कथावस्तुसादृश्यं चेति सर्वं मिलित्वा त्रयाणामपि रूपकाणामेककर्त्तृकत्वं व्यवस्थापयति।

1. रत्नावली-रत्नावल्या: कथावस्तु उदयनसागरिकयो: प्रणयपाधारीकरोति। पोतभङ्गेन दुरवस्थतां गमिता रत्नावलीनाम्ना स्वमप्रख्याप्य सागरिकानाम्ना उदयनराजभवने प्रविश्य तन्महिष्या वासवदत्तया दासी बभूव। उदयनसागरिकयोरनुरागे विदिते पतिसुखकामनया स्वसुखं विहाय वासवदत्ता तयोर्विवाहमनुमेने। नाटिकाया नायक: उदयनो धीरललितनायक: अस्ति। तस्य चरित्रे विलासिता,प्रेमपरता,कलाप्रियता,प्रणयपरायणता च दृश्यन्ते। रत्नावली स्वीयेन गुणगणेन प्राचीनकालादेव प्रसिद्धा। शास्त्रीयपद्धतिमाश्रित्य प्रणीतमिदं रूपकमिति हेतुना दशरूपकेऽतीवादरोऽस्या जात:। श्रीहर्ष: आदर्शभूतं कथानकमाश्रित्य भव्यं रूपकमिदं कृतवान् यदुदाहरन्ति यथाप्रसङ्गं रीतिकृत:।
2. प्रियदर्शिका-प्रियदर्शिकायामुदयनारण्यिकयो:प्रणयकथा वर्णिता विद्यते। कथानक-मिदंरत्नावलीकथानकच्छायानुहार्येव।
3. नागानन्द-नागानन्दे जीमूतवाहनस्य यशो गीतम्। नाटकेऽस्मिन् बौद्धहिन्दुधर्मयोरतिमधुरा संसृष्टिरस्ति।

हर्षवर्द्धनस्य काव्यशैली-

श्रीहर्षवर्धनस्य काव्यशैलीसरला सुबोधा वैदर्भीपरिष्कृता वर्तते। वर्णनस्य स्वाभाविकता विशदता च हृदयमाकर्षत:। रोमाञ्चकदृश्यकाव्यस्य यावन्ति कमनीयान्युपकरणानि सम्भवन्ति तेषां सर्वेषां प्रयोगेऽयं सदा जागरूक:। वर्णनचातुरी चास्य सर्वमनोहरा। श्रीहर्षनृपतिरयं रूपकरचनायां कालिदासमनुकुर्वन्निव प्रतीयते। भवभूतिरस्य गर्भाङ्कयोजनामनुहरतीति गौरवमप्यस्य महत्त्वं गमयति। अस्य संस्कृतभाषाऽप्रश्लथा,श्लिष्टा शिष्टैकप्रयुक्ता च,अलङ्कारैस्तदलङ्करणं च यथोचितं लोचना-सेचनकं च चकास्ति। सत्यपि च उपज्ञाया: स्वल्पे वर्णनशक्तिस्त्वस्मिन् महती विद्यते, शैली चैतत्सर्वकृतीनामेकरसमसृणा पाठकमनो रमयतितराम्। शब्दालङ्कारेषु श्लेषोऽपि कवये रोचते।

●●■

चौखम्बा प्रतियोगिता प्रकाश

नंदिनी

(संस्कृत)

टी.जी.टी./पी.जी.टी.
डी.एस.एस.एस.बी. एवं अन्य राज्यों

द्वारा आयोजित अध्यापक भर्ती परीक्षा एवं
अध्यापक पात्रता परीक्षा (टी.ई.टी.-संस्कृत) हेतु

संस्कृत भाषा एवं साहित्य के वस्तुनिष्ठ एवं
निबन्धात्मक प्रश्न तथा आदर्श प्रश्न-पत्रों सहित

लेखक
डॉ. विश्वम्भर दयालु

पृष्ठ संख्या 480 मूल्य ₹ 250

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस
4697/2, 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 23286537

चौखम्बा सुरभारती प्रकाशन
के. 37/117 गोपालमन्दिर लेन
वाराणसी 221001
दूरभाष : 2335263

↠ प्रतियोगिता सम्बंधित अन्य महत्त्वपूर्ण प्रकाशन ↞

- **चौखम्बा प्रतियोगिता प्रकाश** (यु.जी.सी. नेट/स्लेट संस्कृत कोड-25) तृतीय प्रश्नपत्र गिरिधर गोपाल शर्मा एवम् अंजना शर्मा
- **प्रश्नोत्तरसंग्रहः।** पूर्वशिक्षाशास्त्री, यू.जी.सी. संस्कृत (कोड 73 एवं कोड 25) राज्यस्तरीय प्राध्यापक पात्रता परीक्षा (संस्कृत) तथा अन्य प्रतियोगि-परीक्षोपयोगी अतिलघूत्तरीय-प्रश्नोत्तर-संग्रह। डॉ. दयानाथ झा
- **चौखम्बा यु.जी.सी./नेट दिग्दर्शिका।** द्वितीय प्रश्नपत्र । चित्रा त्रिपाठी

चिरन्तनी

पूर्वशिक्षाशास्त्री मार्गोपदेशिका

डॉ. रमाकान्तमिश्रः

• राष्ट्रिय संस्कृत संस्थान, नई दिल्ली • राष्ट्रिय संस्कृत विद्यापीठ, तिरुपति • श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली • जगद्गुरु रामानन्दाचार्य राजस्थान संस्थान विश्वविद्यालय, जयपुर

द्वारा आयोजित पूर्वशिक्षाशास्त्रीपरीक्षा के पायक्रमानुसार

भारतीय संस्कृति

लेखक-डॉ. दीपक कुमार, प्राक्कथन लेखक-उमाशंकर शर्मा 'ऋषि'

भारतीय संस्कृति हम भारतीयों को हमारी सांस्कृतिक सम्पदा को समझने हेतु पाठकों तथा समीक्षकों के समक्ष प्रस्तुत है । प्रस्तुत ग्रन्थ में भारतीय सामाजिक संस्थाओं की अविच्छिन्न परम्परा को दर्शाने का प्रयास किया गया है, जो सत्य, त्याग, तप, दया, दान एवं धर्ममूलक अर्थ काम एवं मोक्ष पर आधृत है। हमारा विपुल संस्कृत वाङ्मय संतुलित समन्वयकारी, सत्य, सनातन एवं अमर जीवन प्रदान करने वाली भारतीय संस्कृति का संरक्षक रहा है। जिन संस्कृत वाङ्मयों के माध्यम से हम भारत के गौरवपूर्ण अतीत और हमारे देश के प्राण-तत्त्व रूप भारतीय संस्कृति को समझते हैं उन संस्कृत वाङ्मय से प्रसङ्गानुकूल यथा संभव उद्धरण लिए गए हैं तथा उनके अवलोकन के आधार पर भारतीय सामाजिक संस्थाओं की विशेषताओं पर प्रकाश डाला गया है । साथ ही, आधुनिक परिप्रेक्ष्य में इन सामाजिक संस्थाओं की उपादेयता या प्रासङ्गिकता को दर्शाने का प्रयास किया गया है ।

भारतीय संस्कृति के व्यापक आयाम में जो कुछ भी विवेच्य, प्रमेय तथा अनुसन्धेय है उसके मुख्य उपादान इस ग्रन्थ में पर्याप्त मौलिक प्रमाणों के साथ आ गये हैं। वर्ण, आश्रम, पुरुषार्थ, संस्कार, नारियों की स्थिति, विवाह तथा शिक्षा जैसे सामान्य सांस्कृतिक उपादानों पर तो स्वतन्त्र अध्याय इस पुस्तक में हैं ही, कुछ अभिनव पक्षों पर भी प्रस्तुत पुस्तक में गम्भीर विचेचन किया है जैसे आर्ष महाकाव्यों में विवेचित तात्कालिक संस्कृति, पुराण-कालीन संस्कृति, प्राचीन भारत में अध्यात्म और धर्म की चेतना । अन्त में भारतीय संस्कृति में यज्ञ की महत्ता पर स्वतन्त्र अध्याय देकर इसका गम्भीर एवं व्यापक विवेचन किया गया है ।

संस्कृत विषय से सम्बन्धित सभी प्रतियोगिता परीक्षा में निश्चित सफलता हेतु संस्कृत व्याकरण का सर्वाधिक विश्वसनीय एवं प्रामाणिक संस्करण

श्रीमद्विद्वद्वर-वरदराजाचार्यप्रणीता

लघुसिद्धान्तकौमुदी

श्रीधरमुखोल्लासिनी-हिन्दी-व्याख्यासमन्विता
(पदच्छेद, समास, अनुवृत्तिक्रम, सूत्रार्थ, भावार्थों का स्फोरण, विस्तृत हिन्दीव्याख्या, प्रयोगसिद्धि के साथ उदाहरण एवं अभ्यासार्थ प्रश्नावली सहित)

व्याख्याकारः
गोविन्द प्रसाद शर्मा (गोविन्दाचार्य)

मूल्य-250/- छात्र संस्करण पृष्ठसंख्या-1248

संस्कृत एवं दर्शन विषय से सम्बन्धित सभी प्रतियोगिता परीक्षा में निश्चित सफलता हेतु भारतीय दर्शन का सर्वाधिक विश्वसनीय एवं प्रामाणिक नवीन संस्करण

भारतीय दर्शन
INDIAN PHILOSOPHY

लेखक
जगदीशचन्द्र मिश्र

मूल्य-250/- छात्र संस्करण पृष्ठसंख्या-800

संस्कृत विषय सें सम्बन्धित परीक्षा में निश्चित सफलता हेतु सर्वाधिक विश्वसनीय एवं प्रामाणिक प्रतियोगिता संस्करण पुस्तकें तथा प्रश्नोत्तर पुस्तकों के लिए अवश्य सम्पर्क करें :-

चौखम्बा सुरभारती प्रकाशन-वाराणसी